आशीर्वादकृतं जनं परमया भक्त्या नमन् यद्कृत् सन्तापं जनयिष्णवे च परया प्रीत्यामृतार्थं ददत्। काकिण्ड्यैकदापि नेऽपि वितरन्कार्षापणानां चयं प्राणानं परिरक्षकस्य च कृते प्राणास्त्यजन्नात्मनः॥ तत्स्लोकतरास्पदं

च पुरुष
रूपः पदं
न्मयन्
नेर्धूय
स्पर्श
मेद...

गान्धिवंशीया धानधारव्यवैश्यवर्णाः। तेऽमी पुरा स्तोकानापण्णानिष्काप्य वाणिज्यं कुर्वते स्मेति प्रतिभाति। किन्त्वस्मतातमारभ्यते त्रिपौरुष[illegible] काठियावाडदेशस्य [illegible] संस्थानेषु प्रधा[illegible]भूवः।

मृत[illegible]राज्ञागान्धिपादितायां भार्यामुवाह। अस्य प्रथमभार्यायां [illegible]पुत्रौ द्वितीयायां च द्वौ बभू[illegible]ः। एते भिन्नोदराइति बाल्ये नाहमवेदम्। षण्णामेषां करमचन्द्रगान्धिः कनागान्धिः कबागान्धिपरनामा: पञ्चमः। यदा मे पिता राजस्थानिकन्यायसभासदस्य त्वमित्रु राजकोटं प्रति प्रास्थितस्तदा मया सप्तवर्षदेशीयेन भाव्यम्। तत्राहं प्राथमिकशालां प्रवेशितोऽभवम्। [illegible] चाहमितरापेक्षया बुद्धिमत्तर [illegible]गणनीयोऽभवम्।

अथैक एव [illegible] रूढमूलोऽभवत्। [illegible] गलः प्रतिष्ठा[illegible]स्मेव [illegible] रूप तत्त्व[illegible]ति [illegible]समोपासनमेव मम मु[illegible]द्देश्यमभवत् यदेकस[illegible] प्रातः कर्मकराणां २ सम[illegible] भवति स्म।

अह[illegible]कारे मार्गमपश्यं यस्मि गमन्विष्यामि तत्र दिव्यज्योतिर्मत्साहाय्यार्थमागतम्।

ब्रह्मचर्य
नाम मनो
वाक्कायक
र्मभिः

सर्वेन्द्रियाणां निग्रहः...

यथा ब्रह्मचर्यस्य महिमा निरवधिकस्तथा त्यागस्य प्रभावोऽप्यपरिमेयो भवति।

ईदृशं ब्रह्मचर्यं नाल्पेन यत्नेन साध्यम्। परमार्थमुद्दिश्य परमः प्रयत्नो यथावश्यकस्तत्र किमाश्चर्यम्॥

॥सत्य शोधनम्॥



SATYA-SHODHANAM

Sanskrit Translation of Mahatma Gandhi's autobiography : "The Story of My Experiments with Truth"

By

HOSAKERE NAGAPPA SASTRI

BVB Sri S… acharya Sanskrit Mahavidyalaya
443

1965

GANDHI SMARAK NIDHI : NEW DELHI 1

BHARATIYA VIDYA BHAVAN : BOMBAY 7

Copyright reserved

First Edition, July 1965

Price : Rs. 25.00

PRINTED IN INDIA
By B. G. DHAWALE at KARNATAK PRINTING PRESS, Karnatak House, Chira Bazar, Bombay 2, and Published by S. RAMAKRISHNAN, Executive Secretary, BHARATIYA VIDYA BHAVAN, Bombay 7, for the Central Publication Committee, Gandhi Smarak Nidhi, New Delhi 1.

Funding by IKS-MoE

गान्धीमहात्मभिः विरचितम्

सत्यशोधनम्

अनुवादकः

पण्डित होसकेरे नागप्प शास्त्री

BVB Sri Saankaracharya Sanskrit Mahavidyalaya
५५३

१९६५

गान्धीस्मारकनिधिः : नवदिल्ली १

भारतीय विद्या भवन : मुम्बई ७

श्री

श्रीमद्भारतभूषण
पण्डित मदनमोहन मालवीयजी–
महाशयैः कृता ग्रन्थप्रशस्तिः ॥

महात्मनो गान्धेः सत्यशोधनाख्यग्रन्थस्य श्रीमता होसकेरे नागप्प शास्त्रिणा कृतोऽनुवादो मया दृष्टः । गीर्वाणवाण्यां परिष्कृतललितपदविभूषितोऽयमनुवादः सहृदयानां विदुषां विनोदाय भविष्यतीत्यहं मन्ये । अनुवादकर्तुरयं परिश्रमः प्रशंसनीयः ॥

मुम्बई श्रावण शु. २
संवत् १९८८

मालवीयो मदनमोहनः ।

॥ नायकप्रशंसा ॥

शमिनामग्रणीर्धीमानहिंसादिव्यशस्त्रभृत् ।
गुणरत्नमहापण्यो लोकसेवापरायणः ॥ १ ॥
किमयं ब्राह्मणः पूज्यः किंवा क्षत्रियपुङ्गवः ।
उताहो वणिजां वर्यः शूद्रो वा निजधर्मभाक् ॥ २ ॥
चतुर्णामपि वर्णानां गुणसम्पन्निकेतनम् ।
अनघाद्भुतचरित्रो महात्मा ब्रूहि कोन्वयम् ॥ ३ ॥
अहिंसामेव संश्रित्य हिंसां गन्धयितुं क्षमः ।
गांधिरेको महात्मा स्यात्कुटुम्वी जगतो मुनिः ॥ ४ ॥

ग्रन्थानुवादकः
पंडित होसकेरे नागप्प शास्त्री ।

प्राक्कथनम्

“सत्यशोधनम्” इतिसंज्ञोऽयं ग्रन्थो गान्धीमहात्मनां “सत्यना प्रयोगो अथवा आत्मकथा” इत्याख्यस्य मूलतो गुजरातीभाषायां षट्त्रिंशद्वत्सरेभ्यः प्राग्विरचितस्यात्मचरित्रस्यानुवादः। मूलग्रन्थो जगत्यां नितरां लब्धवर्ण इति सुविदितमेव। प्रथितयशसोऽस्य ग्रन्थराजस्य पृथिव्यां विविधासु भाषासु व्यधायिषतानुवादा इति न विस्मयावहम्। नैतच्च चित्रं यद्भारतस्य प्रायोऽखिलासु लोकभाषासु विहितचरा अनुवादाः। आश्चर्यकुतूहलयोः स्थानं त्वेतदेव यदद्य यावन्न निरमायि केनापि पुस्तकस्यास्य भारतीयसंस्कृतिललामभूतस्य गैर्वाण्यामनुवादः परिकीर्तिताया अप्यस्या भारतीयभाषाजनन्या अस्मत्संविधाने। इदं पुरःस्फुरद्वैकस्यमधुना प्रस्तुतेनानुवादेन निमील्यते।

“आत्मकथा” या आङ्ग्लभाषायामनुवादः स्व. महादेवदेसाईमहोदयैरक्रियत। स च स्वयं गान्धीमहात्मभिः परिशोधितोऽभूत्। परिशोधविधौ दत्तहस्ता आसन् श्रीनिवासशास्त्रिमहोदया। भूयिष्ठमनेनैवानुवादेन प्रसिद्धेः परां कोटिमध्यरोहदियमसाधारणी निर्मितिर्गान्धीमहात्मनाम्।

न पुनः साहित्यनिर्माणचिकीर्षया प्रचोदिता आसन् गान्धीमहात्मन आत्मकथां लिखन्तः। न च विरचितवन्तो ग्रन्थमिममात्मप्रकाशनार्थं न च स्वजनानामपरेषां वोपदेशाय। अद्वितीयमिदमात्मचरित्रं केवलमात्मपरीक्षाहेतुकमासीत्। परिणामतो ग्रन्थस्य शीर्षकमपि तमेवोद्भवं निर्मिमीषायाः प्रकटयति। एवंविधे सत्यपि निर्माणहेतौ ग्रन्थोऽयं साहित्यनिकषे परीक्षितप्रतीतानां ग्रन्थानां तुलामधिरोहति प्रणेतुः शीलस्य शुद्धिबलादनागसो वृत्तेश्च। प्रकृष्टोऽयं ग्रन्थो न शैलीगुणेभ्यः किन्तु शीलविलासेभ्यः। प्रणेतुर्विचाराचारयोर्निग्रहः प्रतिबिम्बित इव खलु तस्य मितवचनत्वे। लेखनशैल्या मर्म न सालङ्कृतिवाक्षु प्रत्युत सहसंवेदने प्रतिवसतीति प्रत्याययतीदं पुस्तकम्।

अनुवादकारैः स्व. पण्डित होसकेरे नागप्पाशास्त्रिभिरयमेवोररीकृतः साहित्यगुणः। अतः प्रसादगुणं पर्याप्तं पुष्णन्ननुवादोऽयं सहृदयमनांसि चिराय प्रीणयिष्यतीति दृढं विश्वसिमि।

नवदिल्लीतः **चिं. द्वा. देशमुख**
ई. स. २३-४-६५

PUBLISHERS' PREFACE

The autobiography of Mahatma Gandhi is one of those rare world classics which never ceases to delight and grip the reader. Aptly called "The Story of My Experiments with Truth", one of the hallmarks of the Gandhi autobiography is its utter simplicity and truthfulness.

Gandhiji wrote it originally in Gujarati and it was serialized, as it came to be written, in *Navajivan* from November 1925 to February 1929. Simultaneously an English translation of it, done by Mahadev Desai, was serialized in *Young India* during the same period.

The first edition of the book, both in Gujarati and in English, appeared in 1927. Since then it has been published in at least eight Indian and six foreign languages.

This first Sanskrit edition of the book is the result of some endeavours made by Sri R. R. Diwakar, himself a lover of the classic language. The translation is the life-work of the late Pandit Hosakere Nagappa Sastri, former Professor of Sanskrit and Kannada in the Khalsa College, Bombay. He began the work at an early age, but could apply himself wholly to it only during his later years. He passed away at the age of 85, while the book was still in print, but with the satisfaction that his life-work was being crowned with success.

We are specially indebted to Dr. C. D. Deshmukh, Vice-Chancellor of the University of Delhi, for his Foreword in Sanskrit with which this book goes out into the world. Among others whose cooperation has been invaluable in bringing out the volume, we must mention the unfailing courtesy of the translator's son and daughter and the competence with which Prof. S. A. Upadhyaya and Prof. N. N. Pandya helped us with the proofs.

We believe it is a natural consummation that this great world classic should also thus become accessible to lovers of the classic world of Sanskrit.

BVB Sri Sankaracharya Sanskrit Mahavidyalaya
443

पीठिका

इतः प्राक् चतुःपञ्चवत्सरेभ्यः केषाञ्चित्परमाप्तानां मदीयसहोद्यमिनामिष्टानुरोधेन स्वीयामात्मकथामुपनिबद्धुं प्रतिज्ञामकरवम् । उपक्रान्तलेखनेन च प्रथमपुटं परिसमाप्य यावदावर्तितं पत्रं तावन्मोहमयीनगरे हस्ताहस्तिमहाक्षोभसमुद्भवात्कार्यमेतद्विघ्नितमभूत् । तदनन्तरवृत्तघटनाभिश्च पर्यन्ते ‘ यरवडा ’कारागृहवासो मया लब्धः । तत्र मे सहबन्दिनामेकतमः श्रीजयरामदासार्यः सर्वथा कार्यान्तरं परित्यज्यात्मकथाप्रबन्धः परिसमापनीय इति मामबोधयत् । तदा कश्चिदभ्यासक्रमः पूर्वमेव मया निश्चित्याङ्गीकृतः । स यावन्न परिसमाप्यते तावदन्यत्र मनो न हि व्यापारयिष्यामीत्यभिधाय तं व्यसर्जयम् । यद्यहं क्लृप्तावधिपर्यन्तं ‘ यरवडा ’लयमेवाध्यासिष्ये तदावश्यमेवात्मकथां समापयिष्यम् । परन्तु तदुपक्रमादेकसंवत्सरात्प्रागेव मां बन्धनादमूमुचन् । तत्रभवद्भिः श्रीमदानन्दस्वामिभिः पुनरस्य कृते प्रबोधितोऽस्मि । अतो दक्षिणाफ्रिकादेशसम्बन्धिसत्याग्रहेतिहासस्य पूर्वमेव मया प्रणीतत्वादिदानीं स्वजीवनचरितस्य ‘नवजीवन’वृत्तपत्रिकायां लेखनमङ्गीकर्तुमिच्छामि । स्वामिनस्तु पुस्तकरूपेण पृथक् प्रकाशनार्थं ग्रथितव्यमित्यभिलषन्ते । परन्तु न तावदेवं कर्तुं शक्यतेऽवसरालाभात् । प्रतिसप्ताहमेकप्रकरणक्रमेण लेखनं सुकरम् । ‘नवजीवन’स्यार्थे प्रतिसप्ताहमवश्यमेव खलु यत्किञ्चिल्लेखितव्यम् । तदेतदात्मकथैवास्तु । इत्यावेदिताः स्वामिनस्तथेति प्रत्यपद्यन्त । अतोऽहमेवं तल्लेखनपरिश्रमे प्रवृत्तोऽस्मि ॥

परन्तु भगवद्भक्तः कश्चिन्मे सखा कदाचित्सोमवासरे मौनव्रतस्थं मामुपसृत्यास्मिन्प्रसङ्गे स्वमनोगतान् संशयानित्थमभिव्याञ्जयन् । यथा—

कुतोऽस्मिन्साहसे प्रवृत्तो भवान् । ईदृक्प्रबन्धस्य पाश्चात्यदेशमात्रे खलु प्रथा दृश्यते । पाश्चात्यसंस्कृत्या परिवृत्तिमप्राप्तः स्वकथोपनिबद्धः पौरस्त्यो जनः कोऽपि मे न विदितः । अपि च किमिवात्र लेखनीयम् । यदेवाद्य सिद्धान्ततया परिगृहीतं तदेव श्वः परित्यक्तमिति । यदेवाद्य कर्तव्यतया समुद्दिष्टं तदेव परेद्युरन्यथानुष्ठितमिति । नन्वेवं भवद्वाक्यमेव प्रमाणीकृत्य व्यवहरतो जनान्बहूनिदं मार्गाद्भ्रंशयेत् । तस्मादात्मकथालेखनं वरं विलम्बयितुम् । अथवात्यन्तमेवतत्परित्यागोऽपि युज्यत इति ॥

सैष तर्को मन्मनसि लग्नोऽभूत् । किन्तु नेदं ममोद्देश्यं यन्मदीयमितिवृत्तं प्रकाशनीयमिति । सत्यमन्विच्छता यानि मयानुष्ठितानि बहूनि साधनानि तत्कथा परं वर्णनीयेत्येव ममाशयः । मम जीवितस्येदृक्साधनानुष्ठानरूपाभिन्नत्वात्तदाख्यानं च जीवनचरित्रस्वरूपमेवापद्यत इत्येतदपरिहार्यम् । प्रतिपुटमेतत्साधनविषयमात्रप्रतिपादनेनापि ग्रन्थस्य चारितार्थ्यं सिध्यति । नास्मात्परं किंचिदवेक्ष्यते । एतत्साधनवृत्तान्तः पाठकानां न लाभप्रदो न स्यादिति प्रत्येमि । ये मया राजकीयविषयेषु

कृताः प्रयत्नास्ते खलु न 'केवलमस्मिन् भरतखण्डे सर्वतः प्रथामागताः परमन्यत्रापि नागरिकप्रपञ्चस्य सामान्यतः सुविदिता एव भवन्ति। न पुनरेते बहुमन्तुमर्हाः। एतैर्मे सम्पादितस्य 'महात्मे'तिविरुदस्य सम्भावनाप्यल्पीयस्येव। अनेकशस्तेन मे मनसि परं यातनाः समुत्पन्नाः। न खलु स्मराम्येकमपि तादृशं क्षणं यत्र मया बिरुदप्राप्तिहेतुकोऽभिमानः कदाप्याकलितः। किन्तु राजकीयक्षेत्रे कायनिर्वाहदक्षतोपलम्भकानि स्वमात्रविदितान्याध्यात्मिकसाधनानि वर्णयितव्यानीति मे कुतूहलमस्ति। वस्तुतस्तेषामाध्यात्मिकत्वे सति नम्रता परं वर्धत एव। न च स्वप्रशंसायाः क्वचिदास्पदं लभ्येत। यथा यथा स्वपूर्ववृत्तमभिसमालोच्य विचारः क्रियते तथा तथा मम न्यूनताः स्पष्टमुपलक्ष्यन्ते ॥

आत्मज्ञानमीश्वरसाक्षात्कारं मोक्षं च लक्ष्यीकृत्य तत्साधनायैतस्त्रिंशद्वत्सरेभ्यः प्रभृति प्रयतमानः स्थितोऽस्मि। मम स्थितिर्गतिर्जीवितं चेत्येतत्सर्वमप्येतदर्थमेव। मया क्रियमाणानां कथालापलेखनराजकीयप्रयत्नानां च लक्ष्यमप्येतदेव। एकपुरुषेण यत्साधितं तत्सर्वेषामपि शक्यसाधनमिति मम सार्वदिकः प्रत्ययः। अत एव मम साधनानि सर्वलोकप्रत्यक्षतयानुष्ठीयन्ते न तु निभृतम्। अनेन हेतुना तेषामाध्यात्मिकत्वस्य न कापि हानिरिति प्रत्येमि। केचिदर्थाः सृष्टस्रष्टृमात्रसंवेद्या भवन्ति। परावबोधनं पुनरशक्यमेव। मया तु वक्ष्यमाणानि साधनानि न ह्येवंविधानि। तानि नैतिकविचारसम्बद्धतया किलाध्यात्मिकानीत्युपचर्यन्ते। नीतिरेव हि जीवातुर्धर्मस्य ॥

यथैव प्रौढानां तथैव बालानामपि सुखावगाह्या एव धार्मिकविचारा वृत्तान्तेऽस्मिन्नवरुध्यन्ते। यद्येतानहं तटस्थभावेन निरभिमानेन च वर्णयितुं शक्नुयां तदा मद्विधेन सिसाधयिषूणामितरेषामप्युपकारिणी सामग्री प्रबन्धेऽस्मिन्नुपलभ्यते। मदीयप्रयत्नेषु सम्पूर्णताभिमानो मम लेशतोऽपि नास्ति। वैज्ञानिकेन यद्यपि नियमपुरस्सरं सावधानं च शोधनं विधीयते तथापि ततोऽभिव्यक्तार्थानसौ स्वतःसिद्धानिव न मन्यते परन्तु कारणसद्भावे स्वमतमन्यथा नेतुं न विकल्पते। स्वप्रयत्नानां विषयेऽप्यहमेतादृश एव। मया हि सुतरामात्मपरामर्शः कृतः। मनस्याविर्भूताः सर्वेऽपि भावाः परीक्षिताः। तथाप्येवंरीत्या प्रत्यक्षीकृतानां परिणामानामव्ययत्वं वा स्वतःसिद्धतां वा नाहं समर्थये। एतावन्मात्रं तु मया समर्थ्यते यदेते परिणामा ममैकस्यात्यन्तनिर्दुष्टाः स्थिरतमाश्च प्रतिभासन्त इति। अन्यथा तानवष्टभ्य न किंचिदपि कार्यमनुष्ठातुं शक्यते स्म। मया हि पदे पदे ग्राह्यमिदं त्याज्यमिदमिति विविच्य ग्राह्यं वस्तु पुरस्कृत्य तदनुसारेणैव प्रवृत्तम्। एवं सुनिश्चिता प्रवृत्तिर्मम बुद्धेरन्तरात्मनश्च सम्मता यदि स्यात्तदा प्रस्तुतपरिणामानामव्ययत्वं निर्दोषत्वं चावश्यमेवाभ्युपेतव्यम् ॥

परं सिद्धान्तांस्तत्त्वानि वा यद्यहं जिज्ञासितुकामोऽभविष्यं तदा स्वात्मकथालेखनप्रयत्नं नैवाकरिष्यम्। वस्तुतस्तु तत्प्रमाणमेवाङ्गीकृत्य मया यद्यदाचरितं तस्योपनिबन्धनमात्रेऽद्यप्रवृत्तोऽस्मि। अत एवास्य सत्यशोधनमित्याख्या न्यधायि। सत्यभिन्नतया प्रतीयमानानामहिंसाब्रह्मचर्यादीनामपि

साधनविचारोऽत्र निरूप्यते। सत्यं हि सर्वव्यापकमिति मे प्रत्ययः। अत्र ह्यसङ्ख्यातानि तत्त्वान्यन्तर्भवन्ति। सत्यं नाम न केवलं वाङ्मयमेव। यथेदं वाङ्मयं तथा मनोमयं च। तथाप्येतन्न काल्पनिकं परं स्वतन्त्रं चिरस्थायि च। इत्थं च सत्यं नामेश्वरस्वरूपमेव। ईश्वरविभूतीनामसंख्यातत्त्वादीश्वरशब्दस्य व्याख्यानान्यप्यसंख्यानि भवन्ति। एतानि मामाश्चर्यचकितं कुर्वन्ति। क्षणमात्रं बुद्धिं व्यामोहयन्ति। किन्त्वहं सत्यमूर्तेरीश्वरस्योपासकोऽस्मि। स एव सत्यस्वरूपः शिष्टमखिलं मिथ्या। स तु नाद्यापि मया साक्षात्कृतः। तदर्थमेव नैरन्तर्येण शोधनपरायणोऽस्मि। तत्प्राप्तये ममात्यन्तप्रियाण्यपि वस्तूनि परित्यक्तुं सज्जस्थितोऽस्मि। एतत्साधनयज्ञे मच्छरीरमप्याहुतीकर्तुं न विकल्पिष्ये। एवं हि मे श्रद्धा। तथापि यावदस्य स्वतन्त्रस्य चिरस्थायिनः सत्यस्य साक्षात्कारो मे न जातस्तावदन्तरात्मना सत्यत्वेनाद्य परिगृहीतं काल्पनिकं सत्यमेव प्रमाणतयाङ्गीकृत्य तदेव मार्गदर्शकं प्रवृत्त्याश्रयभूतं च विधाय जीवनयात्रा निर्वहणीया भवति। एषा सरणिरसिधारेव निशितसङ्कटापि मदनुभवे सुलभा च शीघ्रफला च दृष्टा। एनं मार्गं नियतमवलम्ब्य प्रवर्तमानस्य मे दोषा हिमालयस्थूला अप्यणुमात्रतया प्रत्यभासन्त। अयं मार्गः सम्भविभ्यो महद्भ्यः सङ्कटेभ्यो मामरक्षीत्। अपि च मे प्रयाणं बहुशः सुकरमचीक्लृपत्। अस्मिन्मार्गे तस्य विशुद्धसत्यस्य प्रभामयूखा दूरदूरे मया प्रत्यक्षीकृताः। ईश्वरस्तावदेक एव जगति सत्यं तदन्यदखिलमप्यसत्यमिति श्रद्धा मे मनसि दिने दिने दार्ढ्यमापद्यते। कथमियं श्रद्धा मयि स्थैर्यमापन्नेति जिज्ञासवोऽवगच्छन्तु। मदीयसाधनानामपि च मे दृढप्रत्ययानाममी भागिनो भवन्तु। यद्यन्मया साधितं तत्तद्बालापत्यस्यापि शक्यसाधनमिति प्रत्ययो मे प्रतिदिनं दृढीभवति। ईदृग्विश्वासदार्ढ्यस्य प्रबलाः सन्ति हेतवः। सत्यशोधनस्य साधनानि यथा कठिनानि प्रतिभान्ति तथा सरलान्यपि भवन्ति। अहङ्कारिणः पुरुषस्य यदसाध्यमिव प्रतीयेत तदेव बालकस्य सर्वथा शक्यं भवेत्। सत्यशोधकेन रजःकणादप्यधिकनम्रतासम्पन्नेन भवितव्यम्। लोकः किल रजःकणं पादेनाहन्ति। तस्यापि कणस्य स्वयमधोवर्ती पादाहतियोग्योऽहमल्प इति सत्यशोधको यावन्न जानाति तावदस्योपरि स्वतन्त्रसत्यस्य प्रकाशो नाविर्भवति। इदं वसिष्ठविश्वामित्रयोः संवादे स्पष्टम्। क्रैस्तमतधर्म ‘ इस्लाममतं ’च वाक्यमेतत्समर्थयतः॥

यदि मदीयलेखनेषु यत्र क्वापि मे स्वाभिमानग्रहः पाठकानां प्रतिभासेत तदा नूनमवबोद्धव्यं यदस्य शोधनक्रमे किमप्यसाधु विद्यते। अनेन यत्प्रत्यक्षीकृतं सा मृगतृष्णिका न तु प्रकाश इति। प्रणश्यन्तु नाम परश्शता मादृशाः। सत्यं पुनर्विजयताम्। मद्विधानामल्पात्मनां योग्यतां परिशीलयद्भिर्मा खलु सत्यप्रमाणमणुमात्रमपि न्यूनीकृतं भूत्॥

अधस्तनाध्यायेषु प्रकीर्णाः सूचनाः प्रमाणत्वेन न कोऽप्यङ्गीकरोत्वित्याशास्यते। तथा च नाङ्गीकर्तव्यमिति मे प्रार्थना। अत्र वर्णितानि साधनानि दृष्टान्ततया परिगृह्य सर्वोऽपि स्वशक्ति-

बुद्ध्यनुरोधेन स्वेच्छया स्वीकर्तुमर्हति । एतावन्मात्रेणैव मदात्मकथार्थवत्सामग्रीकल्पत इति प्रत्येमि । तथा हि कथनीयां रोष्वाभासकरमिति न किञ्चिन्निगूह्यते न वा मन्दमुपवर्ण्यते । मम दोषापराधसर्वस्वं पाठकानां परिचयविषयीक्रियते । सत्याग्रहस्य शास्त्रीयप्रयोगवर्णनमेव ममोद्देश्यम् । मदीयसौगुण्यख्यातिलोभस्तावल्लेशतोऽपि मे नास्ति । मद्योग्यतापरितोलनायां सत्यमिव निर्दाक्षिण्यवृत्तिर्भवितुं यतिष्ये । अन्यैरप्येवं वर्तितव्यमिति मदाशयः । एवंविधपरिमाणेनात्मानं परिमाय निरूपयमाणेन मयापि श्रीसूरदासोक्तरीत्या वचनमित्थमुपन्यसनीयं स्याद्यथा–

“ क्व मत्समः कुटिलखलाभिको भवे–
त्तनुप्रदं परिजहदुद्धतो जनः ” ॥ इति ॥

सम्यगहं जाने यदीश्वरो मे जन्मदाता प्रतिश्वासं च तच्चैतन्यमनुगतमस्तीति । तथाप्यस्मादेवं दवीयसी मम स्थितिर्निरन्तरं मे हृदयं कृन्ततीव । तत्तादृशस्थितेर्मम मनोविकारा एव निदानमित्यवगच्छामि । अथापि तान्दूरीकर्तुं न पारये ॥

अलमिदानीमेतावतोपोद्घातेन । मच्चरितमग्रिमप्रकरणादारभ्यते ॥

साभ्रमत्याश्रमः ।
२६।११।१९२५

मो. क. गान्धी

Funding by IKS-MoE

अनुवादकस्य विज्ञप्तिः

इह खलु माधुर्यगाम्भीर्यलालित्याद्यखिलातिशायि गरिष्ठगुणलोभादभिज्ञलोकाः सर्वेऽपि गीर्वाणवाणीं नितरामाद्रियन्ते । पुरा किल सेयमाविद्वत्पामरं व्यवहारसाधनीभूयास्मिन् भारतमहीरङ्गे नरीनृत्यते स्म । विद्वज्जनकल्पद्रुमायमाणानामकबरशाहजहानप्रमुखमोगलसार्वभौमानामवस्थिति कालेऽपि सा परमोत्कर्षमपुष्यत् । परंतु कालमहिम्ना परिहीयमानश्रद्धेषु वृत्तिकार्श्यमापन्नेषु स्वदेशसम्पद्रक्षणनिरभिमानेषु वैदेशिकवृत्तिवेषभाषाडम्बरपरिग्रहकुतूहलिषु जनेषु सेयममृतवाणी निरालम्बेव सीदन्ती न केवलं विरलविरलप्रचारा समपद्यतापि तु लोकसामान्यस्याव्यवहार्यत्वान्मृतभाषेत्युपवर्ण्यमाना तन्महिम्नः पौर्वापर्यविदां विद्याभिमानिनामतिमात्रं विषादमावहति । तत्तादृशीयमखिलभाषाजननी संस्कृतवाणी सर्वोपायैः समुज्जीवनीयेत्यत्र न कोऽपि विप्रतिपद्येत ॥

संस्कृतभाषायां शुद्धगद्यात्मका ग्रन्थाः किल विरलाः । तत्रापि दैनन्दिनव्यवहारोपयुक्तसुबोधवचनगुम्फिताः प्रबन्धाः सुतरां विरलाः । इतरभाषासु व्युत्पित्सूनां गद्यमय्यः कृतयो भूयस्य उपलभ्यन्ते । तत्तद्भाषापरिचयाय संस्कृतभाषायामिव काव्यनाटकाख्यानकव्याख्यानटीकादीनामध्ययनसापेक्षता प्रायशो नास्त्येव । भाषोज्जीवनाय गद्यप्रबन्धरचनाप्येकं साधनम् । तादृशानेकविधप्रबन्धानां 'हि परिशीलनेन लोकः क्रमेण संस्कृतभाषया व्यवहर्तुमपि पटुः सम्पद्येत । किं च सुबोधगद्यकाव्यव्यासङ्गादधिगतभाषापरिचयस्य प्रौढकाव्यशास्त्रपाठाद्यभिरुचिः स्वतः शीघ्रमेव समुदेति । तस्मादादौ वचनकाव्यपरिशीलनं विद्यार्थिनामावश्यकं भवति ॥

अद्य खलु श्रीमद्भारतजननी गर्भशुक्तिमुक्तामणिरखिलजगद्विख्यातकीर्तिः सुगृहीतनामधेयो महात्मा श्रीगान्धीमहाशयः स्वयमनिच्छन्नपि लोकप्रार्थनया परवशीकृतात्मा सत्यशोधनाख्यं स्वजीवनचरितं स्वमातृभाषया निर्बबन्ध । तदेतत्कतिपयविदेशीयभाषासु भरतखण्डस्य सर्वास्वपि प्रधानभाषासु च परिवर्तितं दरीदृश्यते । एवमस्मिन्ग्रन्थे सर्वलोकानामादरातिशयस्य हेतुरपि ग्रन्थकर्तुरीश्वरांशसम्भूतत्वमेवेति न कापि विचिकित्सा । तथा हि श्रीभगवद्गीतायां " यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवाऽवगच्छ त्वं मम तेजोंऽशसम्भवम् । " इति भगवानाह । अत्रापि महात्मनि विभूतिमत्त्वश्रीमत्त्वोर्जितत्वादि गुणसम्पत्तिस्तत्कार्यत एव प्रत्यक्षीभवति । अतो देवांशसम्भूतस्य हि चरितं देवभाषया जेगीयमानमखिललोकान्तरङ्गं सुतरामुत्तरङ्गयतीत्याकलय्य तद्व्याजेन गीर्वाणवाणीसमुज्जीवनप्रयत्नकणिकामपि बहुमन्यमानः सत्यशोधनग्रन्थस्य गद्यात्मिकां संस्कृतानुवादरचनामहमारप्सि । यद्ययमनुवादो मूलग्रन्थतात्पर्यमव्यभिचरन् यया कयापि विधया पाठकानां लेशतोऽप्युपयुक्तः स्यात्तदानेन चरितार्थमात्मानं मन्यतेऽयं जन इति ॥

अपि च गांधीस्मारकनिधिनाम्न्याः संस्थाया अध्यक्षपदमारूढः श्री आर. आर. दिवाकर-महोदयोः गांधेरात्मकथायाः प्रथमभागमालोक्य संतुष्टोऽनुवादप्रगतिं प्रति बहुशो विचारयन्प्रोत्साहमदात् । ततोऽहमस्य सुतरां कृतज्ञोऽस्मि । इदानीं संपूर्णग्रंथानुवादं तस्य हस्ते प्रकटनाय समर्पयामि । स एष शीघ्रमेव प्रकाशं प्राप्य सफलं मे प्रयतनं करिष्यतीति निरीक्ष्यते मया ॥

अभिनंदनीया इमे त्रयः —

प्रथमो मे पुत्रः आर. एन. शास्त्री । अयं किल परित्यक्तापविद्धं संस्कृतानुवादं पत्रेभ्यः समुद्धृत्य अनुवादं परिपूरयितुं मां पुनः पुनः प्रेरयामास । इदानीं परिपूर्णं पश्यति ॥

द्वितीयः प्रोफेसर जी. एम. काळे युवकः । अयं किल मूलभाषान्तरं समीचेन स्वहस्ताक्षरेण व्यलिखत् ॥

तृतीया मम पुत्री प्रोफेसर कुमारी कमला एन्. शास्त्री भाषान्तरीकरणवेलायामावश्यकविषयानन्विष्य शुद्धप्रतिलिपेस्तुलनेन अक्षरव्यत्यासलोपादिकं समीकृत्य मया सह परिश्रम्य चरमव्यवस्थापने महत्साहय्यं कृतवती ॥

पंडित होसकेरे नागप्प शास्त्री

Funding by IKS-MoE

विषयानुक्रमणिका

प्रथमो भागः

अध्यायः विषयः पृष्ठसङ्ख्या

ग्रन्थपीठिका

१ अन्वयविचारः—जन्म १
२ बाल्यम् ३
३ बाल्यविवाहः ४
४ मम याजमान्यम् ७
५ उच्चविद्यालये ९
६ दुःखकरः प्रसङ्गः (१) १३
७ दुःखकरः प्रसङ्गः (२) १५
८ चौर्यम् । तस्य प्रायश्चित्तम् १८
९ अस्मज्जनकस्य मृतिः—मम द्विगुणापमानः २०
१० धर्मप्रभादर्शनम् २२
११ विदेशप्रस्थानसन्नाहः २६
१२ जातिबहिष्कारः ३०
१३ इङ्ग्लेण्डदेशप्राप्तिः ३२
१४ अहं सर्वात्मना शाकाहारी सम्पन्नः ३५
१५ अहमाङ्ग्लेयनागरिको जातः ३८
१६ परिवर्तनम् ४०
१७ आहारविषयकशोधनानि ४३
१८ लज्जाशीलता – मदाश्रयः ४६
१९ असत्याख्यं विषम् ४९
२० धर्माणां परिचयः ५२
२१ निर्बलानां बलं रामः ५५
२२ नारायणहेमचन्द्रः ५७
२३ महावस्तुप्रदर्शनम् ६०
२४ सम्पादितं 'ब्यारिस्टरपदम्' – ततः किम् ६२
२५ मदीयमितिकर्तव्यतामूढत्वम् ६४

द्वितीयो भागः

१ श्रीमान् रायचन्दभाईमहाशयः ६९
२ संसारप्रवेशः ७१

Funding by IKS-MoE

३ मम प्राथमिको व्यवहारः ७४
४ प्रथम आघातः ७७
५ दक्षिणाफ्रिकाप्रस्थानसज्जीकरणम् ८०
६ नातालदेशप्राप्तिः ८२
७ केचिदनुभवाः ८५
८ प्रिटोरियानगरं प्रति गमनम् ८८
९ अतिशयितक्लेशपरम्परा ९२
१० प्रिटोरियानगरे प्रथमदिनम् ९६
११ क्रैस्तमतेन संपर्कः ९९
१२ भारतीयैः सह परिचयः १०२
१३ 'कुली' स्थितेरनुभवः १०५
१४ व्यवहारस्यकृते सज्जीकरणम् १०७
१५ धार्मिकमथनम् ११०
१६ मनुष्यस्य प्रयत्नस्तावदेकश्चेत दैवेच्छान्या ११३
१७ नातालदेशे निवासः ११५
१८ वर्णद्वेषः ११९
१९ नातालभारतीयराष्ट्रमहासभा १२१
२० बालासुन्दरमः १२४
२१ त्रिसुवर्णमुद्राशुल्कम् १२६
२२ तुलनात्मकदृष्ट्या धर्मज्ञानलाभः १२९
२३ गृहे याजमान्यम् १३२
२४ स्वदेशयात्रा १३४
२५ हिन्दुस्थाने १३६
२६ राजनिष्ठा रोगिशुश्रूषा च १४०
२७ मोहमयीनगरे प्रचलितसभा १४२
२८ पूनायां मद्रासनगरे च १४५
२९ 'झटिति निवर्तस्व' १४७

तृतीयो भागः

१ चण्डमारुतसूचना १५३
२ चण्डमारुतः १५५
३ परीक्षा १५८
४ चण्डमारुतविरामोत्तरकालीना शान्तिः १६१
५ बालकविद्याभ्यासः १६४

६ सेवावृत्तिः १६६
७ ब्रह्मचर्यम् — १ १६९
८ ब्रह्मचर्यम् — २ १७१
९ सरलजीवनम् १७४
१० 'बोअर' – युद्धम् १७६
११ नैर्मल्यसुधारणं क्षामनिवारणं च १७८
१२ हिन्दुस्थानं प्रति निवृत्तिः १८०
१३ पुनश्च हिन्दुस्थाने १८३
१४ लेखको भृत्यश्च १८५
१५ महासभायाम् १८७
१६ लॉर्डकर्झनराजास्थानम् १८९
१७ गोखलेमहाशयेन सहैकमासः (१) १९१
१८ गोखलेमहाशयेन सहैकमासः (२) १९३
१९ गोखलेमहाशयेन सहैकमासः (३) १९५
२० काश्याम् १९७
२१ मोहमयीनगरे स्थितिग्रहणम् २०१
२२ धर्मसंकटम् २०३
२३ दक्षिणाफ्रिकादेशं प्रति पुनर्गमनम् २०६

चतुर्थो भागः

१ कृतं सर्वं वृथां जातम् २११
२ एशियाखंडादागता निरङ्कुशाधिकारिणः २१३
३ अपमाननिगिरणम् २१५
४ कार्यविधानशीघ्रभावः २१६
५ आत्मविचारफलम् २१८
६ शाकीययज्ञः २२०
७ मृत्तिकाजलचिकित्साप्रयोगः २२२
८ प्रबोधः २२३
९ अधिकारिभिः कलहः २२५
१० पवित्रस्मृतिः प्रायश्चित्तं च २२७
११ 'ऐरोप्यैः' सह गाढः परिचयः २२९
१२ 'युरोप' जनेन संपर्कः २३१
१३ 'इंडियन – ओपिनियन' २३३
१४ 'कुली' स्थानानि अथवा 'घेटो' २३५

१५ असितप्लेगोपद्रवः (१) २३७
१६ असितप्लेगोपद्रवः (२) २३८
१७ घस्मरं 'कुली'स्थानम् २४१
१८ एकपुस्तकस्येंद्रजालप्रभावः २४२
१९ 'फीनिक्स'–आश्रमः २४४
२० प्रथमा रात्रिः २४६
२१ पोलाकमहाशयो निमज्जनं प्राप्नोति २४७
२२ देवः कं रक्षति २४९
२३ गृहकृत्यस्यैकं दृश्यम् २५२
२४ 'झूलु' प्रकृतिक्षोभः २५४
२५ हृदयमन्थनम् २५६
२६ सत्याग्रहोदयः २५८
२७ आहारनियमान् प्रकृत्याधिकपरीक्षणानि २५९
२८ कस्तुरबाईमहाशयाया धैर्यम् २६०
२९ आंतर्वेश्मिकः सत्याग्रहः २६३
३० आत्मनियन्त्रणामुद्दिश्य २६५
३१ उपवासः २६६
३२ पाठशालाध्यापकः २६८
३३ अक्षरशिक्षणम् २७०
३४ आध्यात्मिकशिक्षणम् २७१
३५ गोधूममध्यवर्ती कक्षः २७३
३६ उपवासः प्रायश्चित्तरूपः २७४
३७ गोखलेदर्शनार्थम् २७६
३८ संग्रामे मम भागित्वम् २७७
३९ धार्मिकसमस्या २७९
४० सत्याग्रहस्य सूक्ष्मचित्रम् २८१
४१ गोखलेमहाशयस्यौदार्यम् २८४
४२ पार्श्वशूलस्य चिकित्सा २८६
४३ स्वदेशं प्रतिगमनम् २८८
४४ मम न्यायवादिवृत्तिं प्रकृत्य किंचित्स्मरणम् २८९
४५ विदग्धव्यवसायः २९१
४६ व्यवहारिणः सहकारिणो जाताः २९३
४७ कथं व्यवहारी रक्षितः २९४

Funding by IKS-MoE

पञ्चमो भागः

१ मम प्रथमानुभवः २९९
२ पुण्यपत्तने गोखलेमहाशयेन सहवर्तनम् ३००
३ ततः किं भर्त्सनम् ३०२
४ शांतिनिकेतनम् ३०४
५ तृतीयश्रेणीप्रयाणिकानां संकटानि ३०७
६ प्रेमोत्पादने प्रयत्नः ३०८
७ कुम्भमेलः ३१०
८ लक्ष्मणसेतुः ३१३
९ आश्रमस्थापनम् ३१५
१० दुष्परीक्षोत्तरणम् ३१७
११ कर्मकराणां विदेशयात्राप्रतिरोधः ३१९
१२ नीलकलंकः ३२२
१३ साधुशीलो बिहारी ३२४
१४ अहिंसादेव्याः संमुखे ३२७
१५ व्यवहारो व्यपनीतः ३२९
१६ सेवाक्रमः ३३२
१७ मम सहचराः ३३४
१८ ग्रामान्तः प्रवेशः ३३६
१९ राज्याधिपतिर्यदा सज्जनः ३३८
२० कर्मकरैः सह संबन्धः ३३९
२१ आश्रमान्तः सूक्ष्मनिरूपणम् ३४१
२२ उपवासः ३४३
२३ खेडासत्याग्रहः ३४६
२४ पलांडुचोरः ३४७
२५ खेडासत्याग्रहस्यान्तः ३४९
२६ ऐक्यार्थे प्रबलापेक्षा ३५१
२७ सैनिकानां प्रवेशः ३५३
२८ मृत्युसंमुखे ३५८
२९ 'रोलेट'शासनमपि च मम धर्मसंकटम् ३६१
३० अद्भुतदृश्यम् ३६४
३१ स्मरणीयः सप्ताहः (१) ३६६
३२ स्मरणीयः सप्ताहः (२) ३७०

Funding by IKS-MoE

३३ हिमालयसदृशः प्रमादः ३७३
३४ ‘ नवजीवनं’ ‘ यंग इंडिया’च ३७४
३५ पंजाबदेशे ३७७
३६ ‘ खिलाफतं ’ प्रति गोरक्षणम् ३७९
३७ अमृतसरनगरस्य महासभा ३८२
३८ महासभाप्रवेशः ३८५
३९ ‘ खादी ’जन्म ३८७
४० पर्यन्ते लब्धम् ३८८
४१ शिक्षाप्रदं संभाषणम् ३९२
४२ प्रवाहोद्गमः ३९३
४३ नागपुरे ३९५
समाप्तिः ३९७

Funding by IKS-MoE

प्रथमो भागः

Funding by IKS-MoE

प्रथमोऽध्यायः

अन्वयविचारः – जन्म

गान्धिवंशीया बनियाख्यवैश्यवर्णाः । तेऽमी पुरा स्तोकानापणान्प्रतिष्ठाप्य वाणिज्यं कुर्वते स्मेति प्रतिभाति । किन्त्वस्मत्तातमारभ्यते त्रिपौरुषपर्यन्तं काठियावाडदेशस्य कतिपयसंस्थानेषु प्रधानसचिवा बभूवुः । ओतागान्ध्यपराख्येनोत्तमचन्दगान्धिनाखण्डितवादिना भाव्यम् । तस्यास्य पोरबन्दरसंस्थाने प्रधानपदमारूढस्य क्वचित्कूटनीतिवशात्तत्संस्थानं परित्यज्य जूनागढसंस्थान आश्रयः समन्वेषणीयोऽभूत् । तदा तत्रत्यनवाबप्रभोरयं सव्यहस्तेन सभाजनं चकार । तत्प्रेक्षकेण केनचित्पुरुषेण तावदविनीतवर्तनस्य हेतुं पृष्टः स प्रत्याह–इतः पूर्वमेव मम दक्षिणो हस्तः पोरबन्दरसंस्थानस्य वशवर्ती भवतीति ॥

मृतजानिरोतागान्धिर्द्वितीयां भार्यामुवाह । अस्य प्रथमभार्यायां चत्वारः पुत्रा द्वितीयायां च द्वौ बभूवुः । एते भिन्नोदरा इति बाल्ये नाहमवेदम् । न च तद्वृत्ततो वा प्रकाशितम् । षण्णामेषां करमचन्दगान्धिः कबागान्ध्यपराख्यः पञ्चमः । तुलसीदासगान्धिश्चरमः । द्वावेतौ भ्रातरौ पोरबन्दरसंस्थाने क्रमशः प्रधानसचिवावभूताम् । कबागान्धिर्हि मे पिता । स च राजास्थानिकन्यायसभायां सदस्योऽभूत् । सा सभा साम्प्रतं न विद्यते । पुरा खलु सा राज्ञश्च तद्वंश्यानां च विवादव्यवस्थापनाय प्रतिष्ठापिता भूत्या गौरवास्पदमासीत् । अपि च मे तातः कियन्तं कालं राजकोटसंस्थाने क्वचिद्वाङ्कानेरसंस्थाने च प्रधानसाचिव्यमकोरत् । अस्य निर्याणकाले राजकोटसंस्थानाद्विश्रान्तिवेतनं लभ्यते स्म ॥

कबागान्धिरनुक्रमेण चतस्रो भार्या उदवहत् । द्वयोराद्ययोर्द्वे दुहितरौ चरमायां पूतलीबाईनाम्न्यामेका पुत्री त्रयः पुत्राश्च समजायन्त । एतेषामहमेवान्तिमः ॥

मम पिता कुटुम्बवत्सलः सत्यप्रियः शूर उदारश्च । परन्तु क्रोधनः । मनाग्विषयासक्त इत्यपि वक्तव्यम् । स किल व्यतिक्रान्तचत्वारिंशद्वत्सरोऽपि चतुर्थी भार्यामुपायंस्त । किन्त्वयमुत्कोचादिलोभपरवशो नाभूत् । यथा स्वकुटुम्बे तथा बहिरप्ययं निष्पक्षपातीति प्रथां सम्पादितवान् । अस्य राजनिष्ठा सर्वलोकविदिताभवत् । कदाचिदयं निजस्वामिनो राजकोटप्रभोष्ठाकूराह्वयस्य कृतापमानं 'असिस्टेण्ट्र् पोलिटिकल्र् एजेण्ट्' इति व्यपदिश्यमानराजकीयप्रतिनिधिं प्रत्यवतस्थे । क्रुद्धेन तेन प्रतिनिधिना क्षमामभ्यर्थयस्वेति कबागान्धिः समादिष्टोऽपि न तथाकर्तुं प्रत्यपद्यत । ततस्तेन कतिपयहोराकालपर्यन्तमसाववष्टभ्य स्थापितोऽभवत् । परन्तु वज्रकठोरमनस्कतामस्यावबुध्य स राजकीयप्रतिनिधिर्विमुच्यतामयमित्यादिदेश ॥

मम पितुर्द्रव्यसङ्ग्रहलोभो न कदाप्यासीत् । तदस्माकं पैतृकं रिक्थमल्पमल्पमागतम् ॥

अनुभवमेकं मुक्त्वा तस्य शिक्षाक्रमः कोऽपि नासीत् । अध्ययनमपि भूयसा गुजराती-

Funding by IKS-MoE

पञ्चमश्रेणीपर्यन्तमेव तस्य प्रवृत्तम् । चरित्रभूगोलपरिज्ञानं तस्य न किञ्चित् । तथाप्यस्य व्यावहारिकज्ञानसम्पन्नत्वादतिसूक्ष्मप्रश्नानां निर्णये परःशतानां जनानां शासनेऽपि प्रगल्भोऽभवत् । तेन लब्धं धार्मिकशिक्षणमत्यल्पम् । तथाप्यसंख्यातैर्हिन्दुजनैर्देवस्थानगमनपुराणपुण्यकथाश्रवणादिभिर्यावती धार्मियज्ञानसम्पत्तिरधिगन्तुं शक्या तावती तेनापि सम्पादिता । स्वस्य मरणात्कतिपयवत्सरेभ्यः पूर्वमस्मदीयकुटुम्बमित्रेण केनचिद्ब्राह्मणविदुषा बोधितो मे पिता गीतापारायणं कर्तुमारभत । अपि च प्रत्यहं पूजासमये कतिपयश्लोकानुच्चैः पठति स्म ॥

मम मातुर्विषये कदाप्यविस्मणीयतया यन्मे मनसि निरूढस्थितं तत्खलु सा पतिव्रता स्त्रीति । सेयं धर्मभीरुः । प्रतिदिनमापूजापाठावसानं भोजनचिन्तामपि न कलयति स्म । हवेल्याख्यवैष्णवदेवालयगमनं तस्याः प्रात्याहिककर्तव्येष्वेकतममासीत् । स्मारं स्मारमपि तस्याश्चातुर्मास्यव्रताचरणलोपः कादाचित्कोऽपि मम स्मृतिपथं नायाति । अत्यन्तकृच्छ्रव्रतान्यपि सा सर्वात्मना समापयते स्म । आरब्धव्रतं व्याधिवशान्न कदापि पर्यत्यजत् । एकदा चान्द्रायणव्रतमाचरन्त्या रोगपीडितयाप्यपरित्यज्य व्रतं यथावत्समापितं मम स्मृतिमुपैति । द्वित्रदिनानि यावदुपवासो नाम तस्या ईषत्करः । चातुर्मास्ये प्रतिदिनमेकमुक्तं तयाभ्यस्तमासीत् । इयताप्यपरितृप्य चातुर्मास्ये क्वचिदेकाहिकमुपवासं कुर्वती व्रतं समापयत् । अपरस्मिंश्चातुर्मास्ये सूर्यनारायणदर्शनं विना नाहारं स्वीकरिष्य इति व्रतमग्रहीत् । तदास्माभिर्बालकैर्बहिः स्थित्वा गगनैकदृष्टिभिः सूर्यदर्शनं मात्रे निवेदयितुमवसरः प्रतीक्ष्यते स्म । वर्षाकालमध्ये सूर्यदर्शनमतीवविरलमिति सर्वेषामपि विदितमेव । बहुषु दिवसेषु सहसा प्रत्यक्षीभवति सूर्ये यथा वयं ‘अम्ब अम्ब सूर्यो दृश्यते’ इति ससम्भ्रममवोचाम यथा च न यावदम्बा स्वयं द्रष्टुं बहिरुपधावति तावत्सूर्यस्तिरोहितोऽभूत् यथा चानेन तस्यास्तस्मिन्दिने भोजनाभावः प्राप्तस्तथा सर्वं स्मरामि । ईदृक् सम्भवेष्वस्मन्माताम्लानमुखी ‘न कापि चिन्ता । ममाद्य भोजनं देवाय न रोचते’ इति वदन्ती स्वकार्यमनुष्ठातुं प्रतिनिवर्तते स्म ॥

सा व्यवहारकुशला । राजास्थानसम्बन्धिनामखिलवृत्तान्तानामप्यभिज्ञाभवत् । अस्या बुद्धिकौशलमवरोधजनस्य सुविदितमासीत् । अहमनेकशो बाल्ये वयसि जनन्या सह राजमन्दिरं गत्वा तत्र मदम्बाठाकूरप्रभुजनन्योः संवृत्तं कथालापं श्रुतवानित्यद्यापि स्मरामि ॥

अनयोर्मातापित्रोर्गर्भादहं संवत् १८३५ भाद्रपदबहुलद्वादश्यां (तथा च श्रीशालिवाहनशकस्य द्विनवत्युत्तरसप्तशताधिकैकसहस्रतमे शुक्लनाम्नि संवत्सरे भाद्रपदकृष्णद्वादशीतिथौ) अधुना पोरबन्दरेतिप्रसिद्धे सुदामापुर्यां जन्माग्रहीषम् ॥

पोरबन्दरपुरे मया बाल्यमतिवाहितम् । कामप्येकां पाठशालां प्रति मया गम्यते स्मेति ज्ञप्तिरस्ति । गणितकोष्टकानां घट्टीकरणं मम क्लेशावहं संवृत्तम् । अपि च सहपाटिभिः सहास्मदुपाध्यायनिन्दामशिक्षिपि । इदं मुक्त्वा नान्यत् किञ्चिदपि स्मरामि । एतेन तदानीं मे बुद्ध्या मन्दया भवितव्यं ज्ञापकशक्त्या चापकया भाव्यमिति तर्कये ॥

Funding by IKS-MoE

द्वितीयोऽध्यायः

बाल्यम्

यदा मे पिता राजास्थानिकन्यायसभासदस्यत्वमिच्छू राजकोटं प्रति प्रस्थितस्तदा मया सप्तवर्षदेशीयेन भाव्यम् । तत्राहं प्राथमिकशालां प्रवेशितोऽभवम् । तदात्वे पाठयितृणामुपाध्यायानां नामानि सम्यगहं स्मरामि । यथा पोरबन्दरपुरे तथैवात्रापि मम पाठलेखनादिषु न कोऽपि विशेषो दृष्टः । नचाहमितरापेक्षया बुद्धिमत्तर इति गणनीयोऽभवम् । एनां शालामतिक्रम्य नगराबाह्यवर्तिन्यां पाठशालायां दिनकतिपयान्यावदध्यगीषि । तदनु द्वादशेवर्षे हाईस्कूलाख्यमुच्चविद्यालयमहं प्रविष्टः । अस्मिन्नल्पीयसि कालेऽस्मदुपाध्यायान् वा सहपाठिनो वा नाहमनृतं कदाप्यचकथम् । अतीव लज्जालुतया परगोष्ठीं पर्यहार्यम् । मदीयपुस्तकपाठा एव मे सहायाः । घण्टावादनसमये पाठशालोपस्थानं शालाविरामे च गृहाभिमुखीभवनं—एवं हि मेऽभ्यासः । अन्यैः सह कथालापनिस्सहेन गृहं प्रति त्वरितगतिना गम्यते स्म मा कोऽपि दृष्ट्वा मां परिहसीदिति ॥

उच्चविद्यालये मम प्रथमवर्षपरीक्षायां यत् संवृत्तं सा घटनाद्य कथनीया भवति । तदानीन्तनविद्याभ्यासपरीक्षको जैईल्सनामा समागतः । अस्मत्परीक्षणार्थं पञ्चशब्दानस्माभिरलेखयत् । तेषामेकतमः 'केटल' (kettle) इति पदमासीत् । तस्य लेखनेऽहं स्खलितमकार्षम् । अस्मदुपाध्यायः स्वपादरक्षाग्रेण मत्पादमभिस्पर्श्य स्खालित्यसूचनाय महान्तं यत्नमकरोत् । तथापि तत्संविदं नाहमग्रहीषम् । मत्पार्श्वस्थितबालकस्य फलकं निरूप्य तल्लिखितानुकारेण स्खलितं मदीयं समीकर्तव्यमित्यस्मदुपाध्यायस्याशयोऽभवत् । तदेतन्मनसो मे नास्फुरत् । अन्योन्यलिखितानुकरणस्य निवारणमेवोपाध्यायानां कर्तव्यमिति मया हि गृहीतम् । मदेकवर्जमन्ये सर्वेऽपि शब्दान्निर्दोषेण व्यलेखिषुः । अहमेक एव मूर्खः । ततः परमुपाध्यायो मम मुग्धतां दर्शयितुं प्रायतिष्ट । तेन तस्यैव वृथाश्रमो जातो न पुनर्मया लिखितानुकरणमशिक्षि ॥

अथाप्येतेनोपाध्यायं प्रति मे गौरवं नाहीयत । ज्येष्ठगतानां हि दोषाणां यदुद्भावनं तन्मे स्वभावदूरमासीत् । यद्यपि तदुपाध्यायस्येतरे दोषा मया क्रमेणोपलब्धास्तथापि तन्निष्ठभक्तिभावो मे नान्यथा पर्यवर्तत । ज्येष्ठानामाज्ञानुवर्तनमेवास्मत्कर्तव्यं न पुनस्तेषां चारित्रपरिशोधनमित्यर्थो मम हृदयंगतोऽभूत् ॥

एतस्मिन्नेव समये संवृत्तं घटनाद्वयमन्यदपि मे मनसि लग्नं भवति । शालापुस्तकानि मुक्त्वा पुस्तकान्तरपठनं मम नेष्टमासीत् । उपाध्यायादाक्षेपवचनं वा मया तत्प्रतारणं वा न मे रोचते स्म । अतो मया दैनन्दिनीयपाठाः शिक्षणीया एवापतिताः । तथाप्येवं शिक्षमाणस्य मानसं सर्वदा पाठैकव्यग्रमासीदिति वक्तुं न शक्यते । एवं मयि पाठ्यपुस्तकेऽपि

निरवधाने सति पुस्तकान्तरं मया न हि पठ्यते स्मेति किमु वक्तव्यम् । किन्तु मम पित्रा क्रीतस्थापितस्य श्रवणपितृभक्त्याख्यनाटकग्रन्थस्योपरि कथमपि मे दृष्टिरपतत् । तमेनं तत्परतयाहमपाठिषम् । तत्कालमेव ग्रामाद्ग्रामं पर्यटन्तः पुत्तलिकाप्रदर्शनोपजीविनः केचिदस्मद्ग्राममुपागमन् । तत्प्रदर्शितपुत्तलिकासु यात्रामुद्दिश्य स्कन्धावलम्बिवीवधेन स्वमातापितरौ वहमानस्य श्रवणस्य प्रतिकृतिरेका व्यलोकि । एतत्पुस्तकं पुत्तलिकाचेति द्वयं मिलित्वा श्रवणकथां मे मनसः कदाप्यप्रमार्जनीयामकरोत् । श्रवणस्य पितृभक्तिरादर्शरूपेण त्वया स्थापनीयेत्यात्मनात्मानमबोधयम् । श्रवणस्य मरणेन सन्तप्यमानयोस्तत्पित्रोर्विलापोऽद्यापि मे मनसि शोश्रूयत इव । मदर्थे पित्रा वितीर्णया रागमालिकया तमहमालापयम् । स रागो मे हृदयं व्यलीनयदिव ॥

नाटकान्तरसम्बन्धिन्यपरा तत्सदृशी घटनैका संवृत्ता । एतत्कालमेव कयापि नाटकमण्डल्या प्रयुक्तं नाटकमवलोकयितुं पितुरनुज्ञामभ्यगच्छम् । तन्नाटकं हरिश्चन्द्रचरितात्मकमासीत् । तदेतल्लोचनासेचनकं मम मानसमकर्षत् । किन्त्वनुज्ञां कतिकृत्वः प्राप्य गन्तुं शक्येत । तथाप्येतन्निमित्तं व्यसनं नैव माममुञ्चत् । निस्संख्यवारमिदं नाटकं मया स्वयं मनसा प्रयुक्त स्यात् । हरिश्चन्द्रेणेव सर्वैरपि कस्मात्सत्यवद्भिर्न भवितव्यम् । इत्येष प्रश्नो दिवानिशं मे मनसि पुस्फोर्यते स्म । सत्यानुसरणं सत्यस्यार्थे हरिश्चन्द्रवन्निर्विकल्पेन मनसा क्लेशानामनुभवः । इत्येष आदर्श एक एव मे मनस्याविरभूत् । हरिश्चन्द्रकथायामक्षरशः सत्यत्वप्रतीतिर्मयासीत् । सर्वस्यास्य स्मरणमनेकशो मे नेत्राभ्यामश्रूणि निरसारयत् । कथाहरिश्चन्द्रः कश्चिद्वस्तुतो न जीवन् स्थित इत्यधुना मम लौकिकज्ञानमाख्याति । किन्तु हरिश्चन्द्रश्रवणावुभावपि मम हृदये नित्यसंनिहितौ स्तः । अद्यापि तन्नाटकपाठेन पूर्ववन्मे हृदयं विलीयत इत्यहं जाने ॥

तृतीयोऽध्यायः

बाल्यविवाहः

एतदध्यायलेखनसन्दर्भो मा सम्भवत्विति बहुतरमाशंसमानस्याप्येतद्वृत्तान्तं कथयिष्यतो मे विदितमेवेदं यदेतत्सदृशास्तिक्तगुलिका इतोऽपि भूयस्यो मया निगरीतव्याः सन्तीति । यद्यहं परमार्थेन सत्योपासकोऽस्मि तदा मे नान्या गतिः । मम त्रयोदशे वयसि संवृत्तविवाहवृत्तान्तवर्णनरूपं मनस्सन्तापकरं कर्तव्यमिदानीं प्राप्तम् । मत्पोष्यवर्गस्थितानेतद्वयस्कान्बालकान्विलोक्य मद्विवाहः स्मर्यते यदि तदाहमात्मन एव न केवलं दयनीयो भविष्यामि परन्तु परिहृतबाल्यविवाहा-

Funding by IKS-MoE

न्बालकान्प्रति यूयमेव भाग्यशालिन इति विवक्षा मे जायते। एवमतिबाल्ये वयसि विवाहकरणं नाम नीत्यनुरोधीति किमपि प्रमाणं नोपलभे॥

अत्र विषये पाठका मान्यथा विदाङ्कुर्वन्तु। मम यत्संवृत्तं स विवाह एव न पुनर्भाविनं विवाहं प्रति संमतिमात्रम्। काठियावाडदेशे विवाहः संमतिरिति द्वौ पृथक् संस्कारौ स्तः। संमतिर्नाम बालकबालिकयोर्मातापितृभिर्भाविनं विवाहं प्रति परस्परं वाग्दानम्। संमतिरियं नोल्लङ्घनीयेति निर्बन्धः कोऽपि न हि। न च मृते बालके बालिकाया वैधव्यप्राप्तिः। बालिकाबालकौ न खलु तत्र भागिनौ भवतः। बहुशस्तद्विचारोऽपि तयोरविदितो भवेत्। एष संमतिसंस्कारो मम त्रिवारं समपद्यतेति प्रतिभाति। अपि तु कदा कदा सम्पन्न इति न जाने। मदर्थनिश्चिते द्वे बालिके क्रमशोऽम्रियेतामिति कथितोऽस्मि। तृतीया संमतिर्मम सप्तमे वयसि संवृत्तेति क्वचित्स्मरामि। न तावत्स्मर्यते तदिदं केनापि मे निवेदितमिति। इह लेखिष्यमाणो वृत्तान्तो मद्विवाहविषयः। स तु स्पष्टतरं स्मर्यते॥

उक्तपूर्वं खल्विमे वयं त्रयो भ्रातर इति। तत्र प्रथमः पूर्वमेवोढः। मदपेक्षया द्वित्रवर्षज्येष्ठस्य द्वितीयभ्रातुरेकवत्सरज्येष्ठस्य मे कस्यचिद्दायादस्य मम च त्रयाणामेकदा विवाहः करणीय इति वृद्धैर्निरणायि। एवंविधप्रवृत्तेरस्मत्सुखदुःखचिन्ता वास्मदिष्टानिष्टभावना वा न हेतुरासीत्। एतेन स्वानुकूल्यं मितव्ययश्च सिध्यत इत्यभिप्रायेणैव तथा संविहितम्॥

हिन्दुजनेषु विवाहो नाम न खलु साधारणो विषयः। विवाहेन वधूवरयोर्मातापितरोऽनेकशो निर्धना भविष्यन्ति। अस्य कृते निजस्वं नाशयन्ति। कालं वृथा क्षिपन्ति। एतदावश्यकानां वस्त्राभरणवस्तूनां सज्जीकरणाय भोजनोपचारव्ययपङ्क्तिकालेखनाय च मासशः कालोऽपेक्ष्यते। विविधभक्ष्यभोज्याद्युपकल्पने वरपक्षीयाणां वधूपक्षीयाणां च स्पर्धा जरीजृम्भ्यते। ध्वनिमाधुर्यं तावदस्तु वा न वा स्त्रियः पुनराकण्ठशोषं गायन्ति। एतेन व्याधिसम्भवेऽपि न हि चिन्ता। प्रातिवेशिकजनानान्तु विश्रान्तिरेव नास्ति। तेऽपि तत्कलकलमुच्छिष्टकच्चरं च तूष्णीं सहन्ते। यतस्तैरपि करिष्यमाणविवाहप्रसङ्गेष्वेवंविधैव प्रवृत्तिराश्रयणीया भविष्यतीति तेषां विदितम्॥

सर्वस्यास्य क्लेशस्यैकदैव परिहारोऽस्त्वित्यस्मज्ज्येष्ठा व्यचिन्तयन्। समष्ट्या व्ययोऽल्पः। उत्कावस्तु महान्। त्रिः पृथग्व्ययस्थाने सकृदेव व्ययसम्भवः। ततो मुक्तहस्तेन धनं विकरीतुं शक्यते। मम पिता ज्येष्ठपितृव्यश्च वाधक प्राप्तौ। अस्मद्विवाहा एव ताभ्यां निर्वर्तनीयेषु चरमाः। चरमाङ्कः कुतो विभवोत्तरं न प्रयोक्तव्य इति तेषां मनसि विद्येत। सर्वमेतदभिसमालोच्य विवाहत्रयमेकदा निर्वर्तनीयमिति निश्चितमभूत्। पूर्वोक्तरीत्या वैवाहिकसंविधानं कियद्भिरपि मासैः समाप्तिमगात्॥

प्रचलद्वैवाहिककार्यविशेषैरेव विवाहो भावीत्यस्माभिरवगतम् । विवाह इत्येतेन धारणार्थे प्रशस्तवस्त्रलाभः । वाद्यतम्मटघोषः । वधूवरप्रदर्शनोत्सवः । महाभोजनसन्तर्पणन् । मया सह क्रीडितुमेककन्याप्राप्तिश्च । इत्येतावन्मुक्त्वा नान्यो विचारो मम मनस्यस्फुरत् । विषयसुखापेक्षा त्वनन्तरमागता । मुक्त्वा कतिचिदवश्यवर्णनीयान्विषयानेतदधिकृत्य नान्यत्किमपि लिलेखिषामि । ते च विषया अग्रे निरूपयिष्यन्ते । तेऽप्येतद्वृत्तान्तलेखने यन्मम मुख्योद्देश्यं तस्य भूयसा नोपकारका भवेयुः ॥

साग्रजं मां राजलोटात्पोरबन्दरपुरमनैषुः । सन्ति केचिच्चरमदशयात्पूर्वभाविनो हरिद्राचूर्णेन सर्वाङ्गलेपाविका विनोदावहा विषयाः । ते पुनः सर्वे वर्णयितुं न शक्यन्ते ॥

अस्मत्पिता प्रधानसचिव इति यद्यपि सत्यं तथापि किमयं न परोपजीवी । ठाकोरप्रभोर्विश्वासपात्रतया तस्य परतन्त्रता समधिकैवेति वक्तव्यम् । अतिप्रत्यासन्नेऽपि विवाहदिवसे ठाकोरप्रभुरस्मत्पितरं नैवाऽमुचत् । ततो मुक्तस्यास्य दिनद्वयात्पूर्वमेव यथा प्रयाणं समाप्येत तथा मार्गयानानि पृथगस्थाप्यन्त । परन्तु किमनेन । अन्या ह्येवासीदीश्वरेच्छा । सुदामापुरं राजकोटाद्विंशत्युत्तरैकशतपाषाणदूरे वर्तते । शकटेन पञ्चभिर्दिनैर्निर्वर्त्यं प्रयाणम् । तदेतत्प्रयाणमस्मत्पिता त्रिभिरेव दिनैः समापयत् । किन्तु तृतीयदिवसे यानं पर्यस्तपतितमभूत् । एतेन तस्य वहुनि क्षतान्यजायन्त । असौ सर्वाङ्गबद्धपट्टकः सदनमागतः । एतेन तस्य चास्माकं चोत्साहो यद्यप्यर्थे न ह्रासमगच्छत् तथापि विवाहो निर्वर्तनीय एवासीत् । अशक्यं खलु लग्नान्तरस्थापनम् । तस्मिन्बाल्ये पितृक्षतनिमित्तं मे दुःखं वैवाहिकविनोदसंरम्भमध्ये सर्वं विस्मृतमभूत् ॥

अहं मातापित्रोरतीव भक्तिमानासम् । किन्तु मे भोगासक्तिरासीत्ततोऽपि नाल्पीयसी । मातापितरौ शुश्रूषमाणेन जनेन परित्यक्तनिजसुखसन्तोषेण भवितव्यमिति नाहमद्याप्यवेदम् । भोगासक्तस्य मे दण्डरूपेणेव संवृत्ता काचिद्घटना मम मानसमद्यापि कृन्ततीव । एतद्वृत्तान्तस्तु पुरस्तान्निरूपयिष्यते । श्रीनिष्कुलानन्दो गायति यथा—

भोगतृष्णामनिर्धूय भोग्यमात्रं विमुञ्चतः ।
त्यागोऽयं सर्वथा न स्याच्चिरस्थायीति निश्चयः ॥ इति ॥

अभव्यः शोचनीयोऽयं वृत्तान्तो गीतिमेनां स्वयं पठतो वा गीयमानामितरैः शृण्वतो वा मम हृदयकुहरं प्रविश्य तत्स्मारणेन मामवनतमुखं करोति ॥

व्रणपीडितोऽपि मे पिता वेदनां बहिरप्रकटयन् विवाहं साङ्गं निरवाहयत् । विवाहे स्मर्यमाणे तत्तद्विधिकर्माणि यत्र यत्र स्थलेष्वनुष्ठीयन्ते स्मेत्यद्यापि मे मनश्चक्षुषः पुरस्ताच्चित्रयितुं शक्नोमि । निष्पन्नबाल्यविवाहहेतोः कदाचित्पितरं निष्ठुरखण्डनस्य विषयीकरिष्यामीति न हि स्वप्नेऽपि मया व्यचिन्ति । तदानीं सम्भवन्तोऽर्थाः सर्वेऽपि सुसङ्गता लोकसिद्धाः

Funding by IKS-MoE

सुखदायकश्चेति प्रत्यभासन्त । किं च ममाप्यासीत्परिणयनकुतूहलम् । अस्मत्पित्रानुष्ठितस्य सर्वस्यापि निर्दोषत्वेन मया गृहीतत्वात्सर्वमिदानीं स्पष्टमेव स्मर्यते । यथावाभ्यां विवाहवेदिकायामुपविष्टं यथावाभ्यां सप्तपदी रचिता यथा नवोढाभ्यामावाभ्यां कंसाराख्यमधुरगोधूमभक्ष्यविशेषोऽन्योन्ययोर्मुखे विन्यासि यथा चावाभ्यां सहावस्थानमारब्धं तथा सर्वमेतदिदानीमपि मे मनसि चित्रयितुं शक्नोमि । अहो सा प्रथमा रात्रिर्यस्यामत्यन्तमुग्धापत्ययोरायति परिज्ञानशून्ययोर्द्वयोरावयोः सहसा संसारसागरे निपातः समजनि । प्रथमरात्रौ यथा वर्तितव्यमिति प्रजावत्या सम्यगुपदिष्टोऽभवम् । मम भार्या तु केनोपदिष्टेति न जाने । मया सा न तत् पृष्टा । न चाद्य मे तस्य जिज्ञासा । आदावन्योन्यमुखदर्शनेऽप्यधीरा बभूवेति पाठकैर्निस्संशयं विज्ञायेत । लज्जा हि प्रबला स्थिता । कथमहं तया सम्भाषेय । किं वा सम्भाषितव्यम् । अस्मत्प्रजावत्या यदुपदिष्टं तेन नातिदूरमाकृष्टोऽभवम् । किन्त्वेवंविधप्रसङ्गेषु परोपदेशो नावश्यकः । प्राग्जन्मवासना प्राबल्यादैहिकशिक्षणसापेक्षता नास्त्येव । शनैः शनैरन्योन्यसंस्तवो जातः । परस्परमालपितुं प्रावर्तावहि । उभावपि समानवयसावभूव । तथापि पत्यधिकारवहने न मया कृतो विलम्बः । वृत्तान्तोऽयमुत्तराध्याये वर्णयिष्यते ॥

चतुर्थोऽध्यायः

मम याजमान्यम्

मद्विवाहसमकाले दाम्पत्यस्नेहः कुटुम्बनिर्वाहक्रमो बाल्यविवाह इत्येतेदादिविषयप्रतिपादका लघुप्रबन्धाः प्रत्येकं पादाणकेन वा काकिण्या (न हि सम्यक् स्मर्यते) व्यक्रीयन्त' । तेषां यत्पुस्तकं मे हस्तगतं तदामूलान्तं मया पठ्यते स्म । यत्तावन्ममानभिमतं तस्य विस्मरणं यत्पुनरभिमतं तस्य परिग्रहणमित्येषा हि मे पद्धतिरासीत् । भार्या यावज्जीवं पत्या नातिचरितव्येत्ययं तद्ग्रन्थोपदेशो मम मनस्यनपायितया निरूढोऽभवत् । किं चार्जवस्य मम नैसर्गिकत्वाद्भार्याद्रोहित्वसङ्कल्पस्यापि नावकाश आसीत् । तत्रापि तस्मिन्बाल्ये वयसि तादृशप्रवृत्तेर्वा कुतः सम्भवः ॥

एतेन हि कश्चिदसत्परिणामो जातः । मया यद्येकपत्नीव्रतस्थेन भवितव्यं तदा मत्पत्न्यापि मां प्रति ननु तथैव वर्तितव्यम् । एवं चिन्तयतो मे हृदयमीर्ष्या प्राविशत् । तया हि पतिपरायणया भवितव्यमित्याकारकस्थले सा मया पतिपरायणा स्थापनीयेति ग्रहो मामाक्रमीत् । उथा तस्याः स्थापनाय तत्प्रत्यवेक्षिणा मया भाव्यमित्यचिन्तयम् । मद्भार्यायाः पातिव्रत्यं प्रति

शङ्कितुं लेशतोऽपि कारणं नासीत् । परन्त्वसूया कारणानि नापेक्षते । तदीयगतागतमवश्यं मया ज्ञातव्यम् । तस्मान्मदनुज्ञां विना तया क्वापि न चलितव्यम् । ईदृग्वृत्तिरावयोर्मध्ये दुःखकरं कलहबीजमवाप्सीत् ॥

अनुज्ञां विना क्वापि न गन्तव्यमिति नियमस्तस्याः कारायते स्म । कस्तुरबाई त्वनीदृग्व्यसनसहिष्णुर्बालिका । सा हि मदनुज्ञां विनैव स्वेच्छया यथेष्टदेशं यथेष्टकालं च सञ्चरितुमारब्धवती । यथा यथा तां निरोद्धुं मया यत्नः कृतस्तथा तथा तदीया स्वैरप्रवृत्तिरधिकाधिका भवति स्म । एतेन मे क्रोधोऽवर्धत । अनेन हेतुना बालदम्पत्योरावयोरन्योन्यमनालापस्तु प्रात्याहिकः क्रमोऽभवत् । कस्तुरबाय्याः स्वातन्त्र्यप्रदर्शने न कोऽपि दोष इत्यधुना विस्पष्टमवगम्यते । देवतादर्शनार्थं वा सखीदर्शनार्थं वा जिगमिषोरात्मनः प्रतिरोधं निष्कलङ्कहृदया बाला कथं वा परिमृष्येत् । तन्नियमने यद्यस्ति ममधिकारो मन्नियमनेऽपि तस्याः स कुतो हि न स्यात् । सर्वमेतदद्य मे सुविदितमेव । तदानीं तु मत्प्रभुत्वं प्रदर्शनीयमासीत् ॥

एतेन पाठका अस्मत्संसारे माधुर्यलेशाभावं नित्यमनःक्लेशं च मा खलु शङ्कन्ताम् । मम नैष्ठुर्यस्य हि मम प्रेमैव कारणम् । मम प्रेयसी लोकनिदर्शनभूता करणीयेति मामकोऽभिलाषः । तया विशुद्धजीवितया भाव्यम् । मया शिक्ष्यमाणं तयापि शिक्षणीयम् । मया पठ्यमानं तयापि पठनीयम् । उभयोर्जीवितेनैकरूपेण भवितव्यम् । एषा हि मे महती प्रत्याशाभवत् ॥

न जाने कस्तुरबाई च मत्सदृशभावनामपुष्यन्न वेति । सा ह्यशिक्षिताक्षरा । ऋजुस्वभावा स्वातन्त्र्यप्रिया समारब्धकार्यसाधनच्छलवती मितभाषिणी च (इदमस्तु वा मा प्रतीति) । निजमौढ्यं न तस्याः सन्तोषजनकमासीत् । मदीयपठनशीलत्वेन तस्याः पिपठिषा न जनिता । तस्मादीदृशी प्रत्याशा सर्वापि मदेकनिष्ठैव । सैका स्त्री मम प्रेमसर्वस्वस्य केन्द्रस्थानमभूत् । तत्प्रेम्णा प्रतिध्वनितव्यमित्येव मे लालसा । कदाचित्प्रेम्णः पारस्पर्याभावेऽपि द्वयोरेकतरस्मिन्नस्य जागरूकत्वात् सुखच्छायारहितस्यैकान्तिकदुःखस्यानवकाशः ॥

सा मे परमप्रेमपात्रमित्येव वक्तव्यम् । पाठशालायामपि तद्वृत्तान्त एव मे मनस्यस्फुरत् । निशागमप्रतीक्षस्य मम कदा पुनर्द्वयोर्मेलनं भविष्यतीत्यजागरीत्सार्वदिकी चिन्ता । वियोगो दुस्सहः प्रत्यभासीत् । तत्तत्कथालापप्रसङ्गेन तां रात्रौ चिरायाहमजागरयम् । एवं गाढासक्तिमतो मे कर्तव्यपरायणतापि ना भविष्यद्यदि नूनमहं व्याधिपीडितः सन्नकालमृत्युना कवलितोऽभविष्यम् । अथवा भुवो भारभूतः सन् जीविकां निरवाहयिष्यम् । परन्तु तत्तद्दिवसकृत्यानि ममावश्यकर्तव्यान्येवासन् । असत्यभाषणस्य तु कथापि मे न सम्भाव्यते स्म । एवं सत्यानुवर्तिना मया बहूनि सङ्कटानि समुत्तीर्णानि ॥

उक्तपूर्वमेव हि यदशिक्षिताक्षराभूत्कस्तुरबाईति । सा विद्यां शिक्षयितव्येति यद्यप्यासीन्महान्मेऽभिलाषस्तथापि मदीयविषयासक्तिः कुतोऽस्यावकाशं दद्यात् । किंच सा निर्बन्धेन

पाठयितव्याभवत् । किन्त्वेतदपि रात्रिवेलायामेव शक्यमासीत् । अस्मज्ज्येष्ठसमक्षं दिवा तस्या दर्शनेऽप्यलभ्ये सति का कथा तया सम्भाषणास्य । तत्काले काठियावाडदेशे विचित्रो निरर्थकोऽनागरिकश्च 'घोषा'ख्यो योषावरोधनसम्प्रदायः प्रचरति स्म । सोऽद्यापि भूयसा विद्यत एव । एवं च तदध्यापनाय सर्वतः प्रतिबन्धकमासीत् । एभिः कारणैस्तारुण्यदशायां कस्तुरबाय्याः पाठशिक्षणाय मत्कृताः प्रयत्नाः सर्वेऽपि निष्फलाः सञ्जाता इत्यभ्युपगन्तव्यम् । यावदहं विषयनिद्रातः प्रबोधमाप्तस्तावत्सार्वजनिककार्येषु प्रविष्टोऽभवम् । तस्मात्पर्याप्तोऽवकाशस्तदानीमपि नालभ्यत । शिक्षकद्वारा तदध्यापनप्रयत्नश्च सफलो नाभवत् । इदानीं कस्तुरबाई कथंचिल्लेख्यपत्रादि लेखितुं सुबोधगुजरातीभाषां वाचयितुं च जानाति । यद्यहं पुरा मोहदूषितो नाभविष्यं तदा सा विदुषी समभविष्यदिति प्रत्येमि । अपि च तस्याः पठनालसत्वं सुजय्यमभविष्यत् । निष्कलङ्कप्रीतेर्न किंचिदसाध्यमस्तीत्यहं जाने ॥

मम विषयासक्तिमत्वेऽपि तद्दुष्टपरिणामव्यावर्तकं कारणमितः पूर्वमेव सूचितं भवति । अथान्योवृत्तान्तः कश्चिदुपवर्णनीयः । विशुद्धसङ्कल्पान्जनान्भगवानेव रक्षतीत्येतद्बहुभिर्निदर्शनैर्मम हृद्गतं भवति । हिन्दुजनेषु यत्र हानिकरी बाल्यविवाहपद्धतिः प्रचरति तत्र हानिह्रासकरः सम्प्रदायोऽप्येको दृश्यते । बालदम्पत्योश्चिरसहवासं तन्मातापितरौ परिहारयतः । अत्यर्धसमयं भार्या स्वमातुर्मन्दिर एवातिवाहयति । अस्मद्विषयेऽपि तथैव जातम् । विवाहोत्तरं पञ्चसु वत्सरेषु (त्रयोदशादष्टादशपर्यन्तं) आवयोः सहावस्थानकालः साकल्पेन वर्षत्रयादूर्ध्वं न भवेत् । यावत्सह वसतोः षडष्टौ वा मासा व्यतीतास्तावन्मे भार्यां तन्मातृगृहं नेतुं जन आगच्छति स्म । ममेदमतिमात्रमप्रियमासीत् । तथाप्येतेन द्वावप्यावां दुष्परिणामाद्रक्षितावभूव । अष्टादशे वयसि मयेङ्ग्लेण्डदेशं प्रतिप्रस्थितत्वादावयोश्चिरभावी वियोगः समजनि । इदं च नौ श्रेयस्करमेव संवृत्तम् । विदेशप्रवासात्प्रत्यावृत्तस्यापि मे भार्यया सह स्थितिः षण्मासतोऽधिका नासीत् । यन्मया राजकोटान्मोहमयीनगरं मोहमयीतो राजकोटपुरंच भूयो भूयो गतागतं कर्तव्यमापतितम् । तदनु दक्षिणाफ्रिकाखण्डयात्राप्रसङ्गः सम्प्राप्तः । अत्रान्तरेऽहं भूयसा विषयनिद्रायाः प्रबुद्धोऽभवम् ॥

पञ्चमोऽध्यायः

उच्चविद्यालये

निरूपितपूर्वं हि यन्मदीयविवाहकाले मयोच्चविद्यालयेऽधीयते स्मेति । त्रयोऽपि भ्रातरो वयमेकस्यामेव पाठशालायामध्यैष्महि । मम ज्येष्ठाग्रजः परमोर्ध्वश्रेणीमध्यास्त । सहोढस्त्व-

Funding by IKS-MoE

परोऽग्रजो मदग्रिमकक्ष्यायां स्थितः। विवाहादावयोरेकैकवर्षकालस्य वृथायापनं फलितम्। मदग्रजस्य तु तत्परिणामो भूयोऽनिष्टप्रापकोऽभवत्। यदनेन विवाहोत्तरं विद्याभ्यासोऽत्यन्तमेव परित्यक्तः। ईदृग्दुष्परिणामभाजः कियन्तो बालकाः सन्तीति परमात्मैकवेद्यमिदम्। विवाहोत्तरं विद्याभ्यासो नाम हिन्दुजनसंसारमात्रगोचरः॥

मम तावदध्ययनक्रमः प्रचलति स्म। उच्चविद्यालयेऽहं न मुग्धत्वख्यातिमगमम्। उपाध्यायप्रीतिमहं सदा समपीपदम्। प्रतिवत्सरं बालकानां चारित्रविद्याभ्युदयविषयकाणि योग्यता पत्राणि तन्मातापितॄणां सकाशं प्रेष्यन्ते स्म। तत्र ममाध्ययनक्रमो वा शीलं वा न हि प्रशस्तमिति न कदापि ख्यापितोऽस्मि। द्वितीयश्रेणीपरीक्षायामुत्तीर्णेन बहुमानमप्यलभ्यत। पञ्चमवर्गे रूप्यकचतुष्टयवेतनं षष्ठे दशरूप्यकाश्च प्राप्यन्ते स्म। अत्र मद्योग्यतापेक्षया नियतिबलमेव प्राप्तिकारणमिति वक्तव्यम्। यदेतद्वेतनं काठियावाडदेशान्तर्वर्ति सोरठजनपदीयविद्यार्थिप्रवरेभ्य एव प्रदीयते स्म। प्रस्तुतश्रेण्यां सम्भूय चत्वारिंशति पञ्चाशति वा स्थितेषु विद्यार्थिषु सोरठजनपदीयाः कियन्तो विद्येरन्॥

एतावत्त मया स्मर्यते यदहमतीव बुद्धिशालीति न मे सम्भावनासीत्। वेतनस्य वा बहुमानस्य वा प्राप्तौ ममाश्चर्यं जायते स्म। परन्तु मदीयचारित्रमधिकृत्य सुतरामहं जागरूकोऽभवम्। चारित्रविषये हि दोषलेशेऽपि भासमाने मम नेत्राभ्यामश्रूणि प्रावर्तन्त। मदनुष्ठितकार्येषु स्खालित्यदर्शिभिः शिक्षकैः कदाचित्क्रियमाणोऽधिक्षेपः सर्वदा मे दुस्सहोऽभवत्। अहमेकदा प्रहारमवापमिति ज्ञप्तिरस्ति। प्रहारप्राप्त्या न तावन्मे दुःखमभूत्। परमहं दण्डनार्ह इति परिगणितोऽभूवमित्येतन्मे महतीं व्यथामजनयत्। अहं भृशमरोदिषम्। इदं हि मे प्रथमे वा द्वितीयस्मिन्वा वर्गे स्थितस्य संवृत्तम्। सप्तमश्रेणीमधिष्ठिते मयि संवृत्त एतादृशः प्रसङ्गोऽन्यो विद्यते। तत्कालं दोराबजी एदलजी गिम्याख्या अस्मन्मुख्योपाध्याया आसन्। एते विद्यार्थिनामभिमताः। यदेते नियमान्निर्दाक्षिण्येन प्रचालयन्ति स्म। स्वकार्याणि यथावदन्वतिष्ठन्। पाठान्सम्यगध्यापयन्। ऊर्ध्वश्रेणीगतानां विद्यार्थिनामङ्गसाधनं क्रिकेटाख्यकन्दुकखेलनं चावश्यकर्तव्यतया व्यधिषत। ममैतद्द्वयमपि नेष्टमासीत्। यावदयं नियमो व्यधीयत तावन्मयाङ्गसाधनाय वा क्रिकेटफुटबोलखेलनाय वा न गम्यते स्म। एवं गमनवैमुख्यस्य मदीयलज्जाशीलत्वमप्येकं कारणमासीत्। ईदृग्वर्तनस्यासाधुत्वमधुना मे स्पष्टमालक्ष्यते। तदानीं तु पठनव्यायामयोर्नास्ति सम्बन्ध इत्यसद्भावनामहमकलयम्। परन्तु यथा बुद्धिविकासस्य तथा शरीरपुष्टेरपि शिक्षणक्रमे प्रामुख्यस्थानं प्रदेयमित्यहमिदानीं जाने॥

व्यायामार्थमगमनेन न कापि मे हानिः संवृत्ता। क्वचित्पठितपूर्वं हि मया यद्विशुद्धवायुप्रदेशेषु सञ्चरणं प्रशस्तमिति। मम तत्प्रियत्वात्तथा हि सञ्चरणमहमभ्यस्तवान्। अद्यापि न परित्यक्तोऽयमभ्यासः। एतेन मे शरीरं सुदृढं समपद्यत॥

Funding by IKS-MoE

अङ्गसाधनार्थं गन्तुमनिच्छायाः कारणं तु पितृशुश्रूषायां मम प्रबलेच्छैव । शालाविरामोत्तरक्षणमेव त्वरया गृहं प्राप्य तत्सेवासमुद्यतोऽभवम् । अङ्गासाधनार्थमवश्यं गन्तव्यमिति यः कृतो नियमबन्धस्तेनास्य विघ्नः समजनि । यथा मे पितृशुश्रूषणं शक्यं भवेत्तथाहं व्यायामगमननिर्बन्धाद्विमोचनीय इति गिमिमहाशयमभ्यर्थितवान् । स तु न तथा प्रत्यपद्यत ॥

एकदा स्थिरवासरे पाठशाला प्रातः प्रचलिता । मध्याह्ने चतुर्घण्टावादनसमये शालां प्रति व्यायामार्थं गन्तव्यमासीत् । मन्निकटे कालयन्त्रं न स्थितम् । आकाशस्य मेघच्छन्नतया वेला च नोपलक्षिता । यावदहं पाठशालां प्राप्तस्तावत्सर्वे गता एव । गिमिमहाशयः परेद्युरागतानागतच्छात्रपङ्क्तिकां विलोक्य पूर्वदिने मदनागमनमज्ञासीत् । यथा वृत्तमहमस्मै न्यवेदयम् । स तु मामविश्वस्यैकाणकं वा द्व्याणकौ वा (कियदिति विस्मृतमिदानीं) मामदण्डयत् ॥

एतेन मया मृषोक्तमिति सिद्धम् । तस्मादहमतीव दुःखितोऽभवम् । मदुक्तमनृतं नेति कथं वोपपादनीयम् । तत्र न कोऽप्युपायोऽदृश्यत । तन्महता सन्तापेनाहमश्रूण्यवर्तयम् । सत्यवादैकपरायणेन निरन्तरमप्रमत्तेन भवितव्यमिति तदाहमवेदिषम् । विद्यार्थीदशायां ममायमेव प्रथमः प्रमादः । स एव चरमश्च । पर्यन्ते दण्डोऽयमक्षस्यतेति मनाक् स्मृतिरस्ति ॥

शालाविरामोत्तरमेव शुश्रूषणार्थं मम पुत्रेण गृहेऽवस्थातव्यमिति मुख्योपाध्यायं प्रति मम तातः पत्रमलिखत् । ततः परमङ्गसाधनवर्जनाय मयानुज्ञा लब्धा । यद्यपि व्यायामार्थमगमनेन मम न कापि हानिः संवृत्ता तथापि क्वचिदन्यत्र विषये मया दर्शिताया अश्रद्धाया दुष्फलमद्याप्यहमनुभवामि । न जाने कथमयं मे मनसि लग्नोभिप्रायो यत्पठितुं शिक्षमाणस्य प्रशस्तलेखनशिक्षणमनावश्यकमिति । यावदहमिङ्ग्लेण्डदेशं प्राप्तस्तावदेवंविधैवासीन्मनीषा । तदनु तत्रापि दक्षिणाफ्रिकाखण्डे तत्रैव लब्धजन्मनां तत्रैव लब्धशिक्षणानां न्यायवादिनामितरयुवकजनानां च मुक्ताफलस्यूता इव सुन्दरतरा अक्षरपङ्क्तीर्विलोक्य जातव्रीडः सानुतापोऽभवम् । वक्रवक्राक्षराणि पुरुषस्यापक्वशिक्षाव्यञ्जकानीति तदाहमबुधम् । ततोऽहमक्षरसौष्ठवसम्पादनाय प्रायतिषि । तावच्च सुकालो व्यतीत आसीत् । बाल्ये वयसि यदश्रद्धया विहितं तत्समीकरणं पश्चादशक्यमेव जातम् । सुष्टुलेखनं सच्छिक्षायाः प्रतिनियतमेकमङ्गमिति मन्निदर्शनेन सर्वे युवका युवतयश्च विदाङ्कुर्वन्तु । अक्षराभ्यासतः पूर्वं शिशवश्चित्रकलां शिक्षणीया इत्यहमिदानीमाशये । पुष्पपक्षीप्रभृतीन्पदार्थान्प्रत्यक्षीकृत्य यथा शिशवस्तान् स्वतोऽवबुध्यन्ते तथा वर्णानपि निरूप्य शिक्षन्ताम् । अभ्यस्तचित्रलेखनैरक्षरलेखनमभ्यस्यताम् । तदा हि लेखनसौष्ठवं सिध्यति ॥

विद्याभ्यासकालसम्बद्धौ द्वौ वृत्तान्तावद्याप्यनुपवर्णितौ स्तः । विवाहप्रसङ्गेन हि वर्षमेकं मे वृथा क्षपितमासीत् । एतल्लोपव्यपोहनार्थमेकस्मिन्नेव वत्सरे मया कक्षाद्वयमुत्तरीतव्यमित्यस्मदुपाध्याय इच्छति स्म । प्रायेणायमधिकारः श्रद्धयाभ्यस्यतामेव विद्यार्थिनां लभ्य आसीत् । तस्मादहं तृतीयवर्गे षण्मासमात्रं स्थित्वा वसन्तविश्रान्तेः पूर्वभाविपरीक्षायाः समनन्तरं चतुर्थश्रेणी

मारोपितः। अस्मिन् वर्गे भूयसो विषयानाङ्ग्लेयभाषयैव बोधयन्ति स्म। इदं मे सुतरामबोध्यमासीत्। रेखागणितमपि चतुर्थश्रेण्यामेव प्रारभ्यत। पूर्वमेवैतन्मम दुरवबोधमासीत्। आङ्ग्लभाषया तु प्रतिपाद्यमनं सुतरामेवं जातम्। उपाध्यायास्तावदतीय सम्यगेवाध्यापयन्। तथापि तस्य दुरवबोधत्वाद्वर्षद्वयनिर्वाह्यस्य वर्षमात्रेण साधनप्रयत्नो मदीयशक्तिमतिक्रान्त इति मन्यमानोहमेकदा तदाशां परित्यज्य तृतीयश्रेण्यामुपवेष्टुमैच्छम्। परन्तु तथा ह्यनुष्ठिते न केवलमहमवमानितः स्यामपि तु मयि विश्वस्य मत्प्रशंसावादिनां शिक्षकाणामपि गौरवहानिः सम्भवेदित्युभयतो मानभङ्गमाशङ्क्य नाहं तथान्वतिष्ठम्। प्रयत्नेन युक्लिडगणितशास्त्रस्य त्रयोदशं प्रमेयं प्राप्तवतो मे मनस्यतिसरलोऽयं विषय इति सद्यः स्फूर्तिरासीत्। यथायथमुपयुज्यमानबुद्ध्यैकगम्ये वस्तुनि किंवा जटिलत्वं विद्येत। ततः प्रभृति रेखागणितं मे न केवलं सुलभमासीदपितु तत्रभिरुचिश्च मे समजनि॥

किं च संस्कृतं मे बहुक्लेशमदात्। रेखागणिते तावत्कण्ठे करणीयं न किञ्चित्। संस्कृते पुनः सर्वस्यापि कण्ठपाठः करणीय इत्यहमबोधिषम्। इदं च चतुर्थश्रेण्यां प्रारभ्यत। षष्ठकक्षां प्रविष्टस्य मम हृदयमवसन्नमिवाभवत्। संस्कृतोपाध्यायैरस्माकं महान्परिश्रमोऽदायि। मन्ये बालकास्तावदिच्छन्तु वा नेच्छन्तु वा तदीयमन्तःकरणं तु तत्तद्विषयैः सम्पूरणीयनित्यभूत्तेषां प्रत्याशेति। संस्कृतवर्गस्य फारसीयवर्गस्य च कापि स्पर्धाभवत्। फारस्युपाध्याया मोलव्याख्यपण्डिताः स्वच्छात्रान्न भृशं दण्डयन्ति स्म। इति हि बालकाः परस्परमालपन्। यथा—'फारसी किलातीव सुलभा भाषा। फारस्युपाध्याया अतीव साधवः। अमी बालकानां दयां दर्शयन्ति'। इति॥ फारसीभाषायाः सौलभ्यमाकर्ण्य सञ्जातचापलोऽहमेकस्मिन्दिने फारसीवर्गं प्रविश्योपाविशम्। एतेन विषण्णः संस्कृताध्यापको मामाकार्यैवमभ्यधात्। यथा-'युष्मज्जनको वैष्णव इति कथं त्वया विस्मृतम्। स्वधर्मसम्बन्धिनीं भाषां कथं न शिक्षितुकामोऽसि। मदीयशक्तिमतिक्रम्य बालकाः संस्कृतमध्यापनीया इतीच्छा मे जागर्ति। यथा यथा पाठः प्रौढिमानं भजते तथा तथा तस्य स्वारस्यं युष्मदनुभवगोचरो जायते। न खल्वेवं त्वया मन्दोत्साहेन भाव्यम्। पुनः संस्कृतवर्गमागत्य शिक्ष्यतां पाठः।' इति॥

अहं दयारसपरिप्लुतमेतद्वचनमाकर्ण्य नितरां लज्जितोऽभवम्। उपाध्ययस्य प्रीतिवचनमनादर्तुमात्मा नान्वमन्यत। अद्य खलु स्मरामि कृतज्ञतापुरःसरं यत्कृष्णशङ्करपण्ड्यामहाशयस्तदा ममोपाकरोत्। यावद्धि मया संस्कृतं तदाशिक्षितं तावतोऽप्यनभिज्ञतायामस्मत्पवित्रग्रन्थेष्वासक्तिरेव मे दुरुत्पादाभविष्यत्। इतोऽप्यतिशयेन संस्कृतं मया न शिक्षितमित्यहमिदानीमनुतप्ये। हिन्दुजनेषु हि बालकेन वा बालक्या वा संस्कृतमवश्यमध्येतव्यमिति पश्चादवगतोऽस्मि॥

सम्प्रत्येवं मयाभिप्रेयते यथा—भारतवर्षे प्रचलत्सु सर्वेष्वप्युच्चशिक्षणक्रमेषु मातृभाषया सह हिन्दीसंस्कृतफारस्यरब्याङ्ग्लेयभाषाणामास्पदं देयम्। एषा भाषासंख्या न कस्यापि

Funding by IKS-MoE

भयङ्करी भगतु। अस्मदीयशिक्षणक्रमे सुव्यवस्थिते सति परकीयभाषयांग्लवाण्या सर्वार्थोपलम्भनप्रयासे परिहृते च सति बालकानामिमाः सर्वा भाषा न केवलं सुशिक्षणीया भविष्यन्त्यपि तु सन्तोषदायकाश्च कल्पन्ते। यद्येकापि भाषा शास्त्ररीत्या शिक्ष्यते तदा भाषान्तरपरिज्ञानं सुसम्पादं भविता। सम्यक्परीक्ष्यमाणे हिन्दीगुजरातीसंस्कृतं चेति त्रयमप्येकभाषात्मकत्वेन परिगणयितुं शक्यते। एवं फारस्यरबीभाषाद्वयमपि समानम्। संस्कृतफारसीभाषयोर्वर्गोऽन्योऽरबीहीब्रूभाषयोर्वर्गोऽन्य इति यद्यपि सत्यं तथापि फारस्यरबीभाषयोः पूर्णविकासस्यापीस्लाममतप्रचारस्यैव कारणभूतत्त्वादुभयोरपि निकटसम्बन्धो विद्यते। उर्दूभाषा तु पृथग्भाषात्वेन मया न हि गण्यते। यतस्तद्व्याकरणं हिन्दीव्याकरणमेव। तद्गताश्च शब्दाः फारस्यरबीभाषामयाः। यथा गुजरातीहिन्दीबङ्गालीमराठीभाषाणां सम्यगध्ययनाय संस्कृतज्ञानमावश्यकं तथोर्दूभाषायाः सम्यगभ्यसनाय फारस्यरबीभाषाशिक्षणमावश्यकम्॥

षष्ठोऽध्यायः

दुःखकरः प्रसङ्गः (१)

निरूपितपूर्वं हि यदुच्चविद्यालये मदाप्तसुहृदः कियन्त एव स्थिता इति। परमाप्तौ तु भिन्नकालीनौ द्वावास्ताम्। एकेन सम्बन्धश्चिरस्थायीनाभवत्। तन्मैत्री न खलु मया परित्यक्तापितु उदन्येन केनचित् कृतसख्यस्य मम सङ्गं स एव स्वयमत्यजत्। अयं द्वितीयेन स्नेहबन्धो मम जीवमाने दुःखकरोऽध्याय इति मन्ये। सेयं मैत्री चिरस्थायिन्यासीत्। सुधारकदृष्ट्या सख्यमेतदकरवम्॥

पूर्वमयं मदग्रजस्य मित्रमासीत्। तावुभावेकश्रेण्यामधीयाते स्म। तस्य दोषाणामप्यखिलानामप्यहमभिज्ञ आसम्। तथाप्येनं मम विश्वसनीयं मित्रमित्यग्रहीषम्। मम मात्रा मम ज्येष्ठाग्रजेन मम भार्यया चायमसत्सङ्ग इति प्रागेव प्रबोधितोऽभवम्। किमिति भार्यावचनमनुरोद्धव्यमित्यासीत्तदानीं मे गर्वः। किन्तु जननीज्येष्ठसहोदरौ प्रत्यवस्थातुमधीरोऽभवम्। तथापि तावित्थं मया समाधायिषाताम्। यथा—

'जाने भवद्भ्यामारोपिता दोषास्तस्मिन्सन्तीति। किन्त्वनभिज्ञौ युवां तस्य गुणानाम्। स मां दुष्पथमाक्रष्टुं सर्वथा न शक्नुयात्। अयं सन्मार्गं लम्भयितव्य इत्येव तेन कृतसख्योऽस्मि। परिवृत्तशीलोऽयं महान् सत्पुरुषो भवितेत्यस्ति मे विश्वासः। मत्कृते वां मा स्म लेशतोऽपि भीतिरस्तु। इति मे प्रार्थना। इति॥

अनेन तयोः परितोषो जात इति वक्तुं न शक्यते । किन्तु मयि तौ विश्वस्य स्वेष्टानुसारेण प्रवर्तितुं माभन्वमन्येताम् ॥

मम तादात्विकाभिप्रायस्यासाधुत्वं पश्चान्मदनुभवगोचरोऽभवत् । सुधारणकृत्येषु प्रवृत्तो जनोयं पुरुषं सन्मार्गं लिलम्भयिषते तेन पुरुषेण सहातिमात्रस्निग्धवृत्तिर्भवितुं नार्हति । अकृत्रिमा तु मैत्री प्रमृष्टान्योन्यभेदसर्वस्वा भवति । ईदृशी लोके ह्यतीव विरला । बालकेषु समानगुणेष्वेव सुसदृशी चिरस्थायिनी च मैत्री सम्भाव्यते । मित्रयोः सर्वदान्योन्यचारित्रविपरिणामात्सुधारणस्य स्नेहेष्ववकाशो दुर्लभः । अतिस्नेहं न कोऽपि कुर्यादिति मन्मतम् । मनुष्यस्य सद्गुणसम्पादनापेक्षया दुर्मार्गानुवर्तनमतीव सुकरम् । भगवति स्नेहितुकामेनैकाकिना भाव्यम् । अथवा जगदेकमित्रेण भाव्यम् ॥ उपरि मयोपन्यस्तं सङ्गतं वा न वा । परन्तु स्नेहप्रसङ्गेऽस्मिन्मया कृतः प्रयत्नो निष्फलोऽभूत् ॥

एतत्सख्यबन्धसमये राजकोटे सुधारकव्यूहः प्रबलोऽभवत् । अयं सुहृदस्मदीयहिन्दूपाध्यायेषु भूयांसो जना मद्यमांससेवनं कुर्वन्तीति मामब्रवीत् । राजकोटे सर्वैः सुविदितानां बहूनां नामानि कथयित्वा तेऽपि तद्वर्गप्रविष्टा इति न्यवेदयत् । उच्चविद्यालयस्थबालकानामपि केचिदेवं वृत्ता एवेत्यकथयत् ॥

एतेन सञ्जातविस्मयविषादेन मया तत्कारणं पृष्टः स एवं प्रत्यवादीत् । यथा –

‘मांससेवनं विना वयं निर्बलाः स्थिताः । मांसाहारित्वादेवाङ्ग्लया अस्माञ्छासन्ति । कियद्दार्ढ्यं मे शरीरस्य कियती मे प्रधावनशक्तिश्चेति त्वं जानास्येव । अत्र मे मांसाशित्वमेव कारणम् । मांसाहारिणां विस्फोटो न जायते । शोभव्रणं नोत्पद्यते । कदाचिदुत्पन्नमपि झटिति रोहति । अस्मदीयशिक्षका अन्ये च बहवः प्रसिद्धाः पुरुषा इदं सेवन्ते । किमेते मूढास्तद्गुणविशेषज्ञानं विना तथा यत्सेवितुम् । तस्मात्त्वयाप्येतद्भक्षणीयम् । सकृद्भक्षणेनैव कियती पुष्टिस्तव शरीरमायातीति त्वमेव पश्यसि । इति ॥’

एतत्सर्वमेकदा समुपविश्योपदिष्टं न । अयं विविधदृष्टान्तोपन्यासेन बहूनि दिनानि यावत् हृदयङ्गमरीत्या समुपदिष्टस्य सारांशः । मदग्रजेन पूर्वमेवैतन्मार्गप्रविष्टत्वात्सोऽपि तत्पक्षमपोषयत् । नूनमहं मदग्रजं मन्मित्रं चापेक्ष्य दुर्बल एवासम् । तावुभौ मदपेक्षया समधिकदार्ढ्यबलधैर्यसम्पन्नावास्ताम् । अस्य मित्रस्य पराक्रमं निरूप्य मया मुग्धेन भूयते स्म । अयमतिदूरं च महता जवेन च धावितुं शक्तोऽभमत् । दूरप्लवनमुच्चैरुत्पतनं चास्य सुकरमासीत् । प्रहारसहनशक्तिरप्यधिकैव । स्वपराक्रमं सार्वकालं मे प्रदर्शयति स्म । स्वयमशक्तिमान्पुरुषः परत्र शक्तिं साक्षात्कृत्य प्रायेण चमत्कृतो भवति । इत्थमहं च तत्पराक्रमदर्शनेन चकितोऽभवम् । सम्यग्धावनं वा प्लवनं वा न भे

शक्यमभूत्। मत्सुहृदिव बलवान्भवितुमिच्छा मे तीव्रा समजनि। मयापि तद्वत्कुतो बलशालिना न भाव्यम् ॥

अहमतीव भीरुरप्यासम्। चोरपिशाचसर्पेभ्यो भयं मे सर्वदा मनसि स्थितम्। रात्रौ बहिर्गन्तुं कातरोऽभवम्। अन्धकारकथयापि मम शरीरं कम्पते स्म। दीपं विना विद्रातुमशक्यमेवाभवत्। एकतो भूतानामन्यतश्चोराणामपरतस्सर्पाणामागमनभयेन दीपाभावे स्वप्तुमशक्यमेवासीत्। पार्श्वसुप्तां प्रत्यग्रतारुण्यशालिनीं मे भार्यां कथं विदितमद्भयां कुर्याम्। ज्ञातं मया सा मत्तोऽप्यधिकधैर्यवतीति। स्वं निरूप्य स्वस्यैव लज्जासमजायत। सा हि कदाप्यदृष्टसर्पपिशाचिभया। अन्धकारेऽपि धैर्येण सर्वतो गच्छति स्म। मत्सखा सर्वानिमान्मे दोषांन्सम्यगवेदीत्। स च मामाह—जीवन्तमहं सर्पं हस्ते गृह्णीयाम्। चोरेभ्यो मन नेषदपि भयमस्ति। भूतपिशाचा नाम क्व विद्यन्ते। इति ॥ सर्वमेतदात्मनो मांसाहारनिमित्तकं फलमिति तस्याशयः। नर्मदनामगुर्जरकविना प्रणीतमेकं पद्यमस्मत्पाठशालाविद्यार्थिनां मुखेषु नित्यसन्निहितमासीत्। तस्यायमक्षरार्थो यथा—

लोकोत्तरजुगुप्सया विरोधेन च पश्यन्ति स्म। मम तावत्संस्कार एतादृश आसीत्। अपि च पित्रोरहमतीव भक्तिमानासम्। मांसं मया भक्षितमिति ज्ञातमात्र एव ताभ्यां प्राणान्तिकं सङ्कटमनुभूयत इति मे विदितमासीत्। किं च सत्यादरेणाऽहमतीव जागरूकोऽभवम्। मांसाशनप्रवृत्त्या पितृवञ्चना कृता स्यादिति न मे तदा विदितमिति वक्तुं न शक्यते। परन्तु कृत्यमिदं सर्वथाऽनुष्ठेयमिति व्यधायि सङ्कल्पः। न खलु मांसाशनमतीव रुच्यमित्याशयेन मया तथा विहितम्। मांसं रुच्यः पदार्थ इति न खलु मयाऽङ्गीकृतम्। परन्त्वेष हि मे प्रत्याशा यन्मया बलवता भाव्यम्। धैर्यवता भाव्यम्। अस्मद्देश्यैरप्येवं भवितव्यम्। एमं सम्पद्य तैराङ्ग्लेयान्पराजित्य हिंदुदेशः स्वतन्त्रदेशः करणीयः। इति ॥ तत्काले स्वराज्य शब्दो मया न श्रुतः। एवंविधसुधारणोन्मादेन मम स्मृतिरेवाभ्रशत् ॥

सप्तमोऽध्यायः

दुःखकरः प्रसङ्गः (२)

अथ निश्चितं दिनमुपागमत्। दुष्करं मदीयतादात्मिकस्थितेर्यथावदुपवर्णनम्। एकतः सुधारणस्यकृते महानुत्साहो मज्जीवयातायां तत्तादृशनवीनमार्गानुसरणकुतूहलं च। अन्यतश्चोरवत्सङ्गोऽप्यकृत्यमनुष्ठेयमिति व्रीडा। अनयोस्तदानीं कतरत्प्राधान्यमभजतेति नाहं स्मरामि। आवां सरित्तीरे किंचिदेकान्तस्थलमन्विष्यन्तौ दूरं प्रक्रम्य विविक्तप्रदेशमेकमासादयाव। तत्रा-

Funding by IKS-MoE

जन्मप्रभृत्यनवलोकितं मांसं मम प्रत्यक्षमागमत् । तच्चापणापूपसहस्थितमासीत् । द्वयं च मे नारोचत । छागमांसं तु चर्मसदृशमासीत् । तद्भक्षणं सुतरामशक्यमभवत् । वमनोन्मुखस्सन् भक्षणाद्व्यरंसिषम् ॥

तन्निशातिवाहनमतीव दुष्करं जातम् । निद्रा तावन्नागता । सुषुप्साऽपि दूरेऽभवत् । एकश्छागो मदीयजठरे प्रविश्य करुणकरुणं चाक्रन्द्यमानः स्थित इव । तेन भीतोऽहमनुतप्यमानः समुत्थाय तदुत्तर क्षणमेव 'किं न मे कर्तव्यं मांसाशनं । न खल्वीदृशः कातरभावो युक्तः । इत्यात्मानमेवाबोधयम् ॥

मम सुहृत्पुनरेतावता न ह्यधैर्यमागतः । सतु मांसेन विविधपाकनिष्पादने प्रवृत्तोऽभवत् । क्रमेण सरित्तीरगमनं वर्जयित्वा राज्यस्यातिथिमन्दिरे तत्रत्यं सूदं वशीकृत्य भोजनाय स्थलं समपादयत् । आसन्दीभोजनाग्रपीठप्रभृतिसाधनैः परिष्कृतस्य तस्याहारमन्दिरस्य वैभवप्रदर्शनेन मच्चित्ताकर्षणमेव तस्योद्देश्यमासीत् ॥

तदुद्देश्यं च सफलं जातम् । अपूपे रुचिरुदयितुमारभत । छागविषयिणी करुणातिरोऽभवत् मांसमात्रेऽप्यसम्भवन्त्यपि रुचिर्मांसप्रणीतेष्वाहार्यवस्तुषु वरीवृध्यते स्म । इदमेकवत्सरपर्यन्तमित्थमचालीत् । एषु दिवसेषु पञ्चषडदिनान्येव मांसभक्ष्याण्यखादिषम् । यतो राज्यस्यातिथिमन्दिरं नित्यलभ्यं ना भवत् । अपि च भूरिव्ययप्राप्याणि भक्ष्याणि सर्वदा निष्पादयितुमशक्यमभूत् एतत्सुधारणव्ययार्थे मन्निकटे द्रव्याभावात् सर्वोऽप्ययं व्ययः सख्युरुपर्येव पतितः । तेन द्रव्यं कुतो लभ्यते स्मेति नाद्याप्यहं जानामि । मांसाहारिणं मां विधातुमस्य बद्धच्छलत्वात् कथमप्यस्यहेतोरयं द्रव्यं सम्पादयति स्म । किन्तु तेनापि तावद्द्रव्यं कुतोऽवा लब्धव्यम् । तस्मादेते मांसभोजनमहोत्सवा बहुभिर्दिनैरेकैकवारं प्रचलिन्ति स्म ॥

एतेषु गुप्ताभ्युदयदिवसेषु गृहे भोजनकथाऽपि मे नासीत् । अम्बा तु यथापूर्वं मां भोक्तुमाहूय भोजनमनिच्छन्तं कारणं पृच्छति स्म । तदाहमद्य मे क्षुधा नास्ति । अन्नं कुतोऽपि न जीर्णमिति प्रत्यवोचम् । अनेन प्रतिवचनेन न मे सन्तापो जायते स्मेति न । मृषाव्याज एषः । तत्राऽपि मातुः समक्षं मृषाऽवादिषमिति मया ज्ञातम् । अपि चाहं मांसाहारीसंवृत्त इत्यवगतार्थौ यदि भवतो मत्पितरौ तदा तावतिमात्रं दूयेते इति च मे विदितम् । एतद् ज्ञानं मदीयमानसं निरन्तरमन्वतापयत् ॥

तस्मादहमित्थमचिन्तयम् । यथा —

मांसाशनं तावदावश्यकमेव । तत्प्रचारेण हिन्दुस्थाने सर्वत्राप्येवंविधसुधारणस्य परिकल्पनमप्यावश्यकम् । परंतु पितरौ वञ्चयित्वा तदग्रे यदनृतभाषणं तदेतन्मांसस्यानशनादपि पापीयः । तस्मात्पित्रोर्जीवितान्तं मांसं न भक्षयिष्ये । तन्मरणोत्तरं स्वातन्त्र्यमापन्नः सर्वलोकप्रत्यक्षमेव तदशिष्यामि । तावच्च मांसाहारं परित्यजामि । इति ॥

Funding by IKS-MoE

एवं कृतं मे निश्चयं सख्ये निवेद्य मांसाहारमहमत्यन्तमेव परित्यक्तवान् । ततः परं न कदापि मया मांसमभक्षि । स्वपुत्रेषु द्वौ मांसाहारिणावास्तामिति न हि पितृभ्यामान्तमप्यज्ञायि ॥

पितृवञ्चनां परिजिहीर्षता निष्कलङ्कहृदयेन मया यद्यपि मांसाहारः परित्यक्तस्तथापि तत्सुहृत्स्नेहो न दूरीकृतः । तत्सन्मार्गलम्भनोत्साहेन मदीये न मय्येव दुष्परिणामो जातः । किन्तु तत्स्मृतिरेव मे तदा नाभूत ॥

इयमेव मैत्री मां व्यभिचारपथेऽप्याक्रष्टुमलम्भूष्णुरिवासीत् । परन्तु रेखामात्रावलम्बेनेव मया गर्ते निपातः पर्यहारि । एकदायं सखा मां गणिकामन्दिरमेकमनैषीत् । तत्र मां ग्राहितसमयोचितसंविद्विशेषमन्तः प्रावेशयत् । सर्वं सुसंविहितमवस्थितम् । भाटीपणोऽपि पूर्वमेव प्रादायि । अन्योन्यकथालापमात्रमवशिष्टमभूत् । कृतो मया पापजाले रभसप्रवेशः । किन्तु परमेश्वरस्यापारकृपा मामभ्यरक्षत् । तस्मिन्पापकूपे मम जगत्सर्वमप्यन्धकारमयमिवालक्ष्यत । वक्तुमपि नष्टस्मृतिरासम् । लज्जया स्तब्धस्संस्तस्याः समीपे मञ्चोपर्युपविष्टोऽभवम् । किन्तु वचनमेकमप्यालपितुं । नाशकम् । सा पुनरतीव क्रुद्धा मामाकृष्य निर्गमनद्वारं मे प्रादर्शयत् । पुंस्त्वलोपं प्राप्तमिवात्मानं मन्यमानो वसुधाविवरे तिरोधानमिच्छुरिवाभवम् । परं त्वेवं मामुद्धृतवतो जगदीश्वरस्यानुग्रहः सर्वदा मे स्मृतिपथे जागर्ति ॥

मम जीविते त्रिचतुरा एतत्सदृशाः प्रसङ्गाः समभवन्निति ज्ञप्तिरस्ति । प्रायेणैतेषु मदुद्धारे भूयसा विधिप्राबल्यमेव हेतुरासीन्न पुनः स्वप्रयत्नः । नैतिकदृष्ट्या समीक्ष्य सर्वत्रापि मे धर्म्यपथाद्भ्रंश एक वक्तव्यः । विषयेच्छाप्रेरितत्वान्मम हि दुष्कर्मकारित्वं न्यायतः सिद्धमेव । परन्तु दुष्कर्मचिकीर्षुणापि पुरुषेण यदि तत्कर्म नानुष्ठीयेत तदा स पुरुषो लौकिकदृष्ट्या पापकारी न भवति । पूर्वोक्तो मदुद्धार एतावन्मात्रे ह्यर्थे पर्यवस्यति । केषांचित्कर्मणामनुष्ठानपरिहरणं मनुष्यस्य तत्सहवासिजनस्यापि शुभोदर्कं परिणमति । स च प्राप्तविवेकस्तत्परिहारं भगवदनुग्रहं मन्यते । यथा ह्येकान्ततोऽनिच्छन्नपि कश्चित्पुरुषः क्वचिदवसरेष्वधः पतति तथा दुष्कर्मचिकीर्षुरपि क्वचिद्भाग्यवशाद्दुष्पथादुद्धृतो भवतीत्येतल्लोकसिद्धम् । सर्वमप्येतत्कथमीदृक् सम्भवि कियद्वा तत्र स्वातन्त्र्यं पुरुषस्य कियन्मात्रमस्य बाह्यघटनापारवश्यं चेत्येतेषां प्रश्नानां समञ्जसमुत्तरं प्रदातुं नाद्यापि पारितं न चाग्रेऽपि पारयिष्यते ॥

अथ प्रकृतमनुसरामः । एतावताप्येतत्सुहृत्सख्यं परमानर्थदायीति ज्ञानं मे नैवागतम् । तस्मादवितर्कितानि कानिचित्तस्य दुष्कृत्यानि स्वयं प्रत्यक्षीकृत्य यावद्विवेकज्ञानमलभे तावद्भूयस्यस्तिक्तगुलिका मया न्यगीर्यन्त । परन्तु वृत्तान्तानामनुक्रमशो विवर्णयिष्यमाणत्वादस्य विस्तरोऽग्रे निरूपयिष्यते ॥

किन्त्वेतत्कालिको वृत्तान्तः कश्चिदिह वर्णनीयो भवति । समयेऽस्मिन्नावयोर्दम्पत्योर्मध्ये वैमनस्यमासीत् । तत्र मदीयदुस्सङ्गोऽप्येकं कारणमिति न सन्देहः । उक्तपूर्वं हि मया यन्मम भार्याया मत्परमप्रेमास्पदत्वेऽपि तस्यामहमसूयापरोऽभवमिति । तमेनमसूयाग्निं मत्सखा सुतरां प्रज्वलयति स्म ।

तस्य वचनेष्वहमेकान्ततः श्रद्धालुरासम्। तद्वाक्यश्रद्धितश्च भार्याया अतिमात्रं सन्तापमजनयम्। सेयं मे हिंसाप्रवृत्तिर्मदनुतापस्य परां काष्ठामतीत्य वर्तते। कष्टमीदृशं केवलं हिन्दुस्त्रियः सहन्ते। अत एव स्त्री नाम मूर्तिमती क्षमेत्यहं सर्वदा भावये। मिथ्याभियुक्तो ह्यनुजीवीजनः स्वोद्योगं परित्यजेत्। तथा च पुत्रः पितुर्गेहं परित्यजेत्। मित्रं च स्नेहं परित्यजेत्। भार्या पत्युर्द्रोहशङ्किनी तूष्णीमास्ते। पतिस्तु स्वभार्याद्रोहशङ्की यदि भार्याया गतिः प्रणष्टप्रायैव। क्व नु तया गन्तव्यम्। हिन्दुस्त्रीजनो न्यायसभामुपेत्य विवाहवन्धनादात्मानं न हि मोचयितुमर्हति। तस्याः सम्भवतोऽन्यायस्य भैषज्यमेव नास्ति। मया कृतमिदं भार्याहिंसनं न हि कदापि विस्मरेयम्। एनमात्मनोऽपराधं न हि क्षमेय॥

अहिंसातत्त्वज्ञानस्य समुदयानन्तरमेव ममायं विकल्पः समूलमनशत्। तदा हि मया ब्रह्मचर्यस्य महिमावगतः। तदा हि मे बुद्धिमारूढं यद्भार्या नाम पत्युर्दासी न भवति। सा हि तस्य सहचारिणी सहधर्मिणी तत्सुखदुःखयोः समभागिनी च। यथा पतिः स्वच्छन्दवर्तने स्वतन्त्रस्तथा भार्याप्येवमधिकारिणी। इति॥ यदा यदा तत्कालप्रवृत्तिं मदीयामहं स्मरामि तदा तदा मम मौर्ख्यं विषयान्धता क्रौर्यं च स्मृतिमुपेत्य स्वस्य स्वात्मन्येव कुत्सां जनयन्ति। अन्धवत्तस्मिन्मित्रे कृतविश्वासस्य मम पश्चात्तापोऽभिजायते॥

अष्टमोऽध्यायः

चौर्यं। तस्य प्रायश्चित्तम्

मांसाशनकालिकानां तत्पूर्वकालिकानां च मम केषांचिद्दुरभ्यासानामुपवर्णनमवशिष्टं भवति। ते च मद्विवाहप्राक्कालिका वा विवाहोत्तरकालीनकतिपयदिनान्तर्भाविनो वा भवन्ति॥

मम च मम बन्धोरेकस्य च कदाचिद्धूमवर्ति सेवनापेक्षा जाता। अस्मन्निकटे पणस्तु नासीत्। तत्सेवनेन किमपि प्रयोजनमस्तीति नावामजीगणाव। न च वा तत्परिमलोऽस्मदीयं मनः समाकर्षति स्म। किन्तु मुखाद्धूममोक्षे कोऽप्यानन्दविशेषोऽनुभूयत इत्यमंस्वहि। अस्मत्कनिष्ठपितृव्यः पूर्वमेव तदभ्यासी। तत्प्रभृतिभिर्जनैः सेव्यमानं धूमपानमवलोकमानयोरावयोरपि तत्सिसेविषा समजनि। किंत्वस्मदीयकञ्चुककोशे पणाभावात्पितृव्येन सेवितमुक्तानि वर्तिशकलानि गुप्तमेवोच्चित्य ग्रहितुं प्रावर्तावहि॥

किन्त्वेतानि शकलानि सर्वदा न लभ्यन्ते स्म। न हि तेभ्यः प्रकामं धूमोऽपि निरसरत्। तस्माद्गृहभृत्यस्य कञ्चुककोशान्मुषितलब्धाभिः पञ्चषकाकिणीभिर्धूमवर्तीः क्रीत्वा सम्पादयितुमारप्स्वहि। परं त्वेता वर्तयः कुत्र निगूहितव्याः। ज्येष्ठसमक्षं तु तत्सेवनमशक्यमेव। एवं

Funding by IKS-MoE

चोर्यमाणद्रव्येण कथंचित्कतिपयदिवसान्निरवाहयाव । एतन्मध्ये कस्यचिद्वृक्षविशेषस्य रिक्तकनालानि धूमवर्तिपानोपयोज्यानि भवन्तीत्यश्रौष्व । ततस्तान्येवानीय सेवितुमुपाक्रमावहि । किन्त्वेतदावयोर्न परितोषमजनयत् । अस्मत्पारतन्त्र्यमावां तुदति स्म । ज्येष्ठानुज्ञां विना न किञ्चिदनुष्ठातव्यमिति निर्बन्धो दुस्सहोऽभवत् । पर्यन्ते परमजुगुप्सया स्वात्महत्यां विधातुं निश्चयमकार्ष्व । किन्तु कथमिदं साधयितव्यम् । विषं कुतः सम्पादनीयम् । धातुरबीजभक्षणं प्राणहरमिति पूर्वमावाभ्यां श्रुतमासीत् । वनं गत्वा तद्बीजमानैष्व । सायं प्रतीक्ष्य केदारेश्वरदेवालयं गत्वा देवाग्रस्थितदीपे घृतं दत्वा निष्पन्नदेवतादर्शनौ किंचिद्विविक्तस्थानमगाव । परं तु विषप्राशनाय न धैर्यमागतम् । सद्यः प्राणानामनपगमे का गतिः । आत्महत्यया वा तावत्को हि लाभः । पराधीनतापि कस्मान्न सोढव्या । अथापि त्रिचतुरबीजानि गिलितानि । ततोऽप्यधिकभक्षणाय न धैर्यमलप्स्वहि । उभावपि मरणपराङ्मुखावभूव । श्रीरामदेवालयं गत्वा देवदर्शनं प्राप्य शान्तचित्ताभ्यामात्महत्याप्रसङ्गो विस्मर्तव्य इति निरणायि ॥

आत्महत्यासङ्कल्पस्तावत्सुकरः । परं तत्साधनं दुष्करमित्यनुभवाद्विदितमभूत् । तदाप्रभृत्यात्महत्यासङ्कल्पघोषणेन यः कोऽपि मां भीषयति चेत्तदहं नैवाद्रिये ॥

एवंविधप्रयत्नस्य फलितांशस्तु धूमवर्तिशकलसेवनाभ्यासस्य भृत्यकञ्चुकाद्द्रव्यमोषणप्रसङ्गस्य चात्यन्तिकः परित्यागः ॥

प्राप्तवयसो मम धूमपानेच्छा न कदापि जाता । अपि चाभ्यासोऽयमनागरिकश्च मलीमसश्चानर्थप्रदश्चेति सदा प्रत्येमि । लोके सर्वत्राप्यस्मिन्नभ्यासे कुतो हि जनानां तत्तादृश्यासक्तिरित्यद्यापि मया नावगतम् । धूमवर्तिसेविभिर्जनैः सम्बाधायां धूमशकट्यां प्रयाणं मे दुष्करम् । तद्धूमेन मम श्वासः प्रतिबद्धो भवति ॥

इतो दिनकतिपयात्परं यच्चौर्यमकारि तत्खलु पूर्वतनमप्यत्यशेत । काकिणीचौर्यकालेऽहं द्वादशत्रयोदशवर्षदेशीयोऽभवम् । ततोऽपि न्यूनवया वा । द्वितीयचौर्यकालेऽहं पञ्चदशाब्दवयस्कः । मांसाहारिणः पूर्वोक्तमदग्रजस्य हस्तगतसुवर्णकटकात् खण्डमेकमहमचोरयम् । अयमग्रजः कस्मैचिज्जनाय पञ्चविंशतिरूत्यकानधारयत् । सौवर्णं घनकटकं तदीयहस्तगतमासीत् । ततः शकलमेकमुत्पाट्य स्वीकरणं नाम नाभूद्दुष्करो व्यापारः ॥

अथ कृतं तदुत्पाटनम् । ऋणं च निर्यातितम् । परं त्वेतदकृत्याचरणं मम दुस्सहं जातम् । इतः परं नैव चौर्यं करिष्य इति निश्चयमकरवम् । अपि च पितुरग्रे स्वापराधमङ्गीकरिष्यामीति मतिमकरवम् । किन्तु तत्समक्षं वक्तुमधीरोऽभवम् । न तावत्स मां ताडयिष्यतीति भयादपि तु तस्य दुःखप्रदो माभूवमिति । अस्मन्मध्ये कमपि तेन ताडितं न हि स्मरामि । पर्यन्ते च यद्भवतु सर्वथा तं विदितार्थं करिष्यामीति निर्धारितवान् । अन्यथा तु स्वदोषस्यानङ्गीकारे नान्तःशुद्धिर्भवितेति मया व्यचिन्ति ॥

Funding by IKS-MoE

मद्‌पराधवृत्तान्तमखिलमेकस्मिन् पत्रे विलिख्य तत्तस्मै प्रदाय क्षमाभ्यर्थनीयेत्यवधार्य तथा च लिखितपत्रखण्डं तस्य हस्ते न्यधाम् । तत्र न केवलं स्वापराधाभ्युपगतिरुपन्यस्ता परं स्वस्मिन्दण्डपातनमपि प्रार्थितमभूत् । अपि चास्य कृते भवता विषादो न कर्तव्य इत्यभ्यर्थ्य न पुनरेवमपरात्स्यामीति प्रतिज्ञाक्षरमभ्यलेखि ॥

जनकाय पत्रिकां ददानस्य मम शरीरं कम्पते स्म । तत्कालमसौ भगन्दरव्याधिना सन्तप्यमानः शयनपतितोऽभवत् । तदानीं तु फलकमेकमध्यशेत । पत्रं समर्प्य तदग्रेऽहमुपाविशम् ॥

स च पत्रमवाचयत् । नयनाभ्यां मुक्ताफलसन्निभा अश्रुबिन्दवो निःसृत्य पत्रमार्द्रीकुर्वन्ति स्म । कंचित्कालं पर्याकुलीभूय चक्षुषी न्यमीलयत् । तदनु पत्रमुत्पाट्य प्राक्षिपत् । अथोत्थाय पठितुमुपविष्टः क्षणात्पुनः शयनमभजत । अहमप्यरुदम् । पितुः सङ्कटं तु प्रत्यक्षमालक्ष्यते स्म । यद्यहं चित्रकरोऽभविष्यं तदा तत्कालीनदृश्यमचित्रयिष्यम् । तच्चित्रमद्यापि मे मनश्चक्षुषः स्पष्टतरं भासतो ॥

तेऽमी मुक्ताबिन्दवो मम हृदयकालुष्यं निरसारयन् । तत्प्रेमबाणो मम पापानि निरभिनत् । स च प्रेमा स्वानुभवैकवेद्यः । तथा हि

प्रेमबाणविषयीभवन्नर
स्तस्य तीक्ष्णगतिविन्न चापरः ॥ इत्याहुः ॥

अयमेव ममाहिंसावस्तुपाठः संवृत्तः । तस्मिन्किलावसरे पितुः प्रेमैकमन्तरा न किंचिदपरं भासते स्म । अद्य हि सैष शुद्धाहिंसाप्रयोग इत्यवगच्छामि । सेयमहिंसा विश्वव्यापिनी कस्य वा शीलं न परिवर्तयेत् । अपरिमेयः खलु तस्याः प्रभावः ॥

ईदृक्षशान्तिमयी महनीया क्षमा मम पितुर्निसर्गसिद्धा नाभवत् । मया हि चिन्तितं यदसौ सललाटघातं क्रोधेन मां शप्स्यतीति । परन्त्वयमगाधशान्तिरसपरिप्लुतोऽभवत् । इदं हि विशुद्धान्तःकरणेन मया स्वापराधाङ्गीकरणस्य फलमिति तर्कयामि । इदं हि मन्ये कृतापराधस्य शुद्धतमं प्रायश्चित्तं यत् क्षमितुरग्रे स्वापराधितां प्रकटमङ्गीकृत्य पुनस्तदकरणे प्रतिज्ञानं नाम । जानेऽहमेवंविधया मम प्रवृत्त्या पिता निःशङ्कः समजनीति । मद्विषयिणी च तत्प्रीतिरमेया पर्यवर्धतेति ॥

नवमोऽध्यायः

अस्मज्जनकस्य मृतिः — मम द्विगुणापमानः

इहोपवर्ण्यमानो वृत्तान्तो मदीयषोडशवत्सरसम्बन्धी । विदितमेवेदं पाठकानां यदस्मत्पिता भगन्दरेणोपतप्यमानः शयनपतितः स्थितोऽभूदिति । अस्मन्माता चिरसेवक एको भृत्यः स्वयमहं

Funding by IKS-MoE

चेति त्रयस्तस्य शुश्रूषापरिकरः। व्रणं प्रक्षाल्य पटबन्धनमौषधप्रदानं गृहे साधयितव्यानामौषधानां सज्जीकरणमित्येतानि कृत्यानि मया निर्वर्तनीयान्यासन् । रात्रौ रात्रौ पितुः पादौ संवाहयन् सुप्ते तस्मिन्वा तत्पूर्वमनुज्ञातो वा ततो निर्गत्य विश्रान्तिमभजे । इयं शुश्रूषा ममातीव प्रियाभवत् । तत्र मया न कदाप्यश्रद्धा दर्शितेति प्रत्येमि । समापिताशेषकृत्यः प्रतिदिनमवशिष्टकालं पितृशुश्रूषया पाठशालाकृत्यव्यासङ्गैश्चात्यवाहयम् । जनकेनाभ्यनुज्ञातो वा तस्मिन्प्रशान्तवेदने वा सायमहं क्वचित्परिक्रमाय निरगच्छम् ॥

अस्मिन्नेव समये मम भार्या गर्भिणी स्थिता । अद्य खलु विस्मृशतः सैष मे द्विगुणापमान इति प्रतिभाति । एकतो विद्यार्थिनापि सता तदवस्थासदृशं ब्रह्मचर्यं मया नाचर्यत । अन्यतो विषयसुखाशया पठनलेखनादिप्रसङ्गस्तृणीकृतः । विशेषतश्च श्रवणपितृभक्तिमेवादर्शीकृत्य व्यवजिहीर्षन्नपि पितृशुश्रूषायामहं मन्दादरः संवृत्तः । प्रतिरात्रि मम हस्तयोः पितृपादसंवाहनप्रसक्तयोरपि मम मानसं वासगृहं परितः सरीसृप्यते स्म । तदप्यहो कस्मिन्काले । यदा धर्मशास्त्रं वैद्यशास्त्रं लौकिकज्ञानं च दम्पत्योः सङ्गमं दोषत्वेन समुद्घोषयन्ति । अवसिते हि सेवाकर्मणि मदात्मा परं हृष्यति स्म । ततः पितरं नमस्कृत्य सद्यः शय्यगृहमगच्छम् ॥

इतः पितुरारोग्यस्थितिरनुदिनं पर्यहीयत । आयुर्वेदभिषजो विविधलेपसर्वस्वं प्रादुः मुसलमानवैद्याः स्वलेपानखिलानलिपन् । स्थलीयचिकित्सका निजान्यौषधान्यपीप्यन् । आङ्ग्लेयभिषगेकः स्वचातुर्यमुपायुक्त । स चान्त्योपायत्वेन शस्त्रोपचारस्य विधेयतामाचष्ट । किंतु गृहवैद्यः प्रत्यवस्थायास्मज्जनकेनास्मिन्वयसि शस्त्रोपचारग्रहणं न युक्तमित्यवादीत् । कुशलस्य यशस्विनश्च तस्य वाक्यमेव परिग्राह्यमभूत् । शस्त्रोपचारकथा परित्यक्ता । एतदर्थंक्रीतानि बहून्यौषधानि व्यर्थीबभूवुः । मोहमयीनगरे केनचित्सुप्रसिद्धेन भिषग्वरेण शस्त्रप्रयोगोऽयं निर्वर्तनीय आसीत् । गृहवैद्यः शस्त्रोपचारं न चेन्न्यषेत्स्यत् तदा क्लेशं विना व्रणमरोक्ष्यदित्यहं मन्ये । दैवसङ्कल्पस्त्वन्यथाभवत् । सन्निहिते हि मृत्यौ को वा सच्चिकित्सायामुत्सहते । अस्मात्पिता व्यर्थीभूतशस्त्रोपचारसम्बधीन्युपकरणान्यादाय मोहमयीनगरात्परावर्तत । ततो जीविताशामसौ पर्यत्याक्षीत् । कालानुक्रमेण देहशक्तौ ह्रसन्त्यां मलमूत्रादिविसर्जनं शयनगतेनैव क्रियतामिति वक्तव्यमापतितम्। किन्त्वेवं कर्तुमान्तमप्यसौ नान्वमन्यत । वारंवारमतिमात्रवेदनामनुभवन्नपि शय्यां परित्यज्यापसरति स्म । बाह्यशुद्धिविषये वैष्णवनियमास्तावदेवं कठिना भवन्ति ॥

ईदृक् शौचमतिमुख्यमित्येतद्यद्यपि सत्यं तथापि स्नानमलमूत्रविसर्जनादिकं सर्वाशुचित्वपरिहारेण शय्यावर्तिनोऽपि यथा सुकरं भवेत् तथा हि विधानं पाश्चात्यवैद्यशास्त्रं बोधयति । तदनुसारेण प्रवर्तनं वैष्णवसम्प्रदायस्य सर्वथा न प्रतिकूलमित्यहं मन्ये । किन्त्वस्मत्पिता तत्तादृशीं यातनामनुभवन्नपि शयनादुत्थाय शौचकृत्यान्यन्वतिष्ठदित्येतन्मे तदा विस्मयमजनयत् । तत्खलु ममातीव प्रशंसनीयमासीत् ॥

Funding by IKS-MoE

अथ सा भयङ्करी रात्रिरागता। अस्मत्पितृव्यस्तदा राजकोट एव स्थितः। मत्पितुरस्वास्थ्यमधिकीभूतमाकर्ण्य स राजकोटे स्थितिमग्रहीदिति क्वचिदिदानीं स्मर्यते। एतौ सहोदरौ सौभात्रसम्पन्नौ। पितृव्यस्तावदादिनान्तमस्मत्पितुर्निकटेऽवर्तत। रात्रिकाले सर्वानस्मान् शयनाय विसृज्य स्वयं पितुः पार्श्वमन्मशेत। इयमेव पितुर्मरणाय दैवेन नियमिता रात्रिरिति न केनापि स्वप्नेप्यबोधि। तस्य दशा तु कृच्छ्रतरैव स्थिता॥

निशायां प्रायः सार्धदशैकादशहोरासमयेऽहं पितुः पादौ संवाहयन्नवस्थितोऽभवम्। अस्मत्पितृव्यस्तु स्वयं संवाहयामीति मामवोचत्। एतेन प्रहृष्टोऽहं मुक्तकार्यः सद्यः शय्यागारं प्राविशम्। मम भार्या गाढसुप्ताभवत्। मयि स्थिते कुतस्तस्या निद्राप्रसङ्गः। तामहं प्राबोधयम्। किन्तु षट्सप्तनिमेषान्तरे भृत्यो द्वारमघट्टयत्। उद्भ्रान्तोऽहमुदतिष्ठम्। ननूत्थीयतां तातो बलवदस्वस्थ इति स प्राह। तातो बलवदस्वस्थ इति पूर्वमेव मयावगतत्वात् भृत्येन पुनस्तथानिवेदनस्य भूतार्थो मम सुस्पष्टोऽभवत्। झटिति शयनं परित्यज्य यथावृत्तं कथयेति तमपृच्छम्। हन्त भो तातः स्वर्गत इति सोऽवादीत्॥

तर्हि सर्वमिदानीमवसितम्। स्वहस्तनिष्पीडनमात्रवशिष्टम्। भृशमनुतप्यमानः पर्याकुलीभूय पितुः कोष्ठागारं प्रधावितोऽस्मि। यद्यहं विषयान्धो नाभविष्यं तदा मत्पितुरवसानकाले वियोगो मे नाभविष्यत्। तत्पादौ संवाहयतो ममाङ्कस्योपर्येव स प्राणानमोक्ष्यत्। अद्य पुनस्तद्भाग्यमस्मत्पितृव्यमुपस्थितम्। यदयं स्वाग्रजे तत्तादृशभक्तिमानासीत्तदयं तद्भाग्यमलभत। प्रत्यासीदन्तमवसानकालं मे पिता लक्षणैरज्ञासीत्। स हि संज्ञया पत्रं लेखनीं चानाय्योत्तरक्रियार्थं सज्जीक्रियतामिति विलिख्य स्वहस्तगतं कङ्कणबन्धं स्वकण्ठगतं सौवर्णतुलसीमणिहारं चोत्पाट्य प्राक्षिपत्। तदुत्तरक्षणमेवायमिहलोकमत्याक्षीत्॥

एकस्मिन्नतीताध्याये मया प्रस्तुतस्य पश्चात्तापस्य कारणं तु मदीयपरमावधानसापेक्षेऽपि विपत्काले विषयासक्तिर्मया न परित्यक्तेति। कलङ्कोऽयं न केवलमद्यापि मे मनसो न प्रमार्जितः परमद्याप्यहमेवं मन्ये यदपरिमितपितृभक्तिविशिष्टस्यापि तत्कृते सर्वस्वदानसज्जस्थितस्यापि मम खलु मनसस्तत्कालं विषयावरुद्धत्वात् परीक्ष्यमाणायां मदीयभक्तावक्षम्यो दोषः प्रत्यक्षीभवतीति। ततोऽहमकृतभार्याद्रोहोऽपि कामोपहतः पतिरभूवम्। कामपाशादात्मनो विमोचनाय चिरकालः संवृत्तः। कामजयात्पूर्वं दैवेन बहुधा परीक्षितोऽभवम्॥

मद्भार्यागर्भसम्भूतः स तपस्वी शिशुर्न तावत् त्रिचतुरदिनान्यप्यश्वसीत्। तथा हि सति किं वाधिकं निरीक्षणीयम्। कृतोद्वाहैः सर्वैरप्यनेन मदीयदृष्टान्तेन जागर्यतामित्याशासानो मदीयद्विगुणापकीर्तिख्यापकादितः प्रकरणाद्विरमामि॥

Funding by IKS-MoE

दशमोऽध्यायः

धर्मप्रभादर्शनम्

आषट्सप्तवर्षवयः प्रभृति षोडशाब्दवयः पर्यन्तमहं पाठशालायामध्यगीषि । तत्रोच्चावचविषयेषु बोध्यमानेष्वपि धर्मस्य तावच्छिक्षणं न किल तिलशोऽपि प्रतिपादितम् । शिक्षकेभ्यः प्रयासमन्तरा यन्मया प्राप्तव्यमासीत् तदेव खलु मया न प्राप्तम् । तथाप्यहमभितो वर्तिलोकेभ्यः किंचित्किंचिद्धर्मज्ञानं समपीपदम् । अत्र धर्मपदस्य विशालोदारो ह्यर्थो वक्तव्यः । धर्मो नामात्मस्वरूपावबोधः— आत्मज्ञानम् ॥

मम वैष्णवाभिजनत्वाद्विष्णुदेवालयं प्रत्यसकृन्मया गन्तव्यमापतितम् । किन्त्वत्र मम हृदयं श्रद्धाशून्यमभवत् । तस्य देवालयस्य चाकचक्यं वैभवं च मे न रोचते स्म । तत्र ह्यनाचाराश्च प्रचरन्तीति मया श्रुतपूर्वमासीत् । अतस्तद्विषये ममौदासीन्यमजनि । अनेन कारणेन देवस्थानतो मया न किमपि प्रयोजनमलाभि ॥

किन्तु ततः शिक्षितुमशक्यभूतोऽर्थः कस्याश्चिदस्मत्कुटुम्बे चिरानुजीविन्याः स्त्रियः सकाशादवगतः । मयि तस्याः प्रीतिरद्यापि स्मरणीया भवति । निरूपितपूर्वं हि मम भूतपिशाचिभीरुत्वम् । रम्भा (तत्खलु स्त्रियो नाम) तस्यौषधं रामनामेति ममोपदिष्टवती । तदौषधापेक्षया तस्माभेव मे गरीयसी श्रद्धा निरूढा । तस्माद्भूतप्रेतादिभयस्य परिहारार्थे मया बाल्ये वयस्येव रामनामोच्चारणमारब्धम् । चिरायास्मिन्नप्रचलत्यपि यद्बाल्ये समुप्तं बीजं तन्नहि व्यर्थमभूत् । अद्य मे रामनामेत्यमोघायते या शक्तिस्तस्याः खलु रम्भाबाइकृतो बीजावाप एव कारणम् ॥

एतत्कालमेव रामायणे परमभक्तिमानस्मत्पितृव्यस्य कुमार एको मम च ममद्वितीयाग्रजस्य च रामरक्षाशिक्षाणार्थमानुकूल्यं पर्यकल्पयत् । तामेतां कण्ठेकृत्य प्रतिदिनं प्रातरावां स्नानोत्तरं स्तोत्रपारायणमकुर्वहि । पोरबन्दरपुरे यावदस्माभिः स्थितं तावदभ्यासोऽयं प्रचलति स्म । राजकोटस्य वायुमण्डले सैष तिरोहितोऽभवत । तत्र हि नाहमतिश्रद्धालुरभवम् । तच्छिक्षकस्य मदतिप्रेमास्पदत्वाद्रामरक्षायाः शुद्धोच्चारणकौशलाभिमानाच्च सेयं मया पठ्यते स्म ॥

इदं हि निरपायितया मम हृदये निरूढं यदस्मत्पितुरग्रे प्राचलद्रामायणपठनं नाम । व्याध्युपक्रमात्कतिपयदिनान्यस्मत्पिता पोरबन्दरपुरे स्थितिमग्रहीत् । तत्र प्रत्यहमसौ रामायणं शृणोति स्म । तत्पठिता श्रीरामपरमभक्तो बिलेश्वरस्थो लाधामहाराजो नाम । आसीत्तद्विषयिणी काचन किंवदन्ती यदयमात्मनः क्षताङ्गस्थलेषु श्रीबिलेश्वरमहादेवस्वामिनः पूजाबिल्वपत्राणि प्रयुञ्जानः श्रीरामनोच्चार्यमाणश्च किमप्यौषधमन्तरेणैव स्वकुष्ठव्याधेरुत्तीर्ण इति । सैषा यथार्था स्यान्न वा स्यात् । वयं तु तां यथार्थमिव प्रत्यैम । एवं च वस्तुतो रामायणपुराणमुपक्रममाणस्य तस्य शरीरे कुष्ठच्छायापि नादृश्यत । अयं मधुरकण्ठः । द्विपदीश्चतुष्पदीश्च गायन्नर्थापयति स्म । स्वयं तद्रसे लीनः श्रोतॄनप्यानन्दपरवशानकरोत् । तदानीं मया त्रयोदशवर्षदेशीयेन

भाव्यम् । तथापि तत्पुराणश्रवणादहं महान्तमानन्दमन्वभूवमिति जाने । इदानीं मे रामायणे या गाढभक्तिः सा तच्छ्रवणमूला । अद्य तुलसीदासप्रणीतं यद्रामायणं तत्खलु भक्तिसाहित्ये सर्वोत्तमं मन्ये ॥

तदनु कियद्भिरेव मासैर्वयं राजकोटमागताः । तत्र रामायणपुराणकथनमेवं न हि प्राचलत् । किन्तु प्रत्येकादशि भागवतं पठ्यते स्म । तस्य श्रवणाय सकृत्सकृदहमप्यगच्छम् । किन्तु तत्कथकस्यास्मास्वानन्दोत्पादनशक्तिर्नासीत् । अद्य खलु जाने भागवतं नाम मनुष्यस्य हृदये भक्तिरसोत्पादको ग्रन्थ इति । गुजरातीभाषामयमेतदत्युत्साहेन मया पर्यपाठि । मूलभागवतस्य क्वचिद्भागान्मया गृहीतत्रैसप्ताहिकोपवासव्रतसमये भारतभूषणपण्डितश्रीमदनमोहनमालवीयानां शुभमुखादश्रौषम् । अभूच्च मे मनसि यद्बाल्य एवैतादृशानां मुखाद्यदि भागवतमश्रोष्यत तदा बाल्यात्प्रभृत्येव मे तत्रासक्तिरुदैष्यदिति । बाल्ये वयसि रूढमूलः संस्कारो मानुषस्वभावमन्तरवगाह्य तिष्ठति । अतो ह्ययं मे शाश्वतिकपश्चात्तापहेतुर्जातो यत्तस्मिन्नवसरे भूयसा सद्ग्रन्थपाठश्रवणभाग्यं न मामुपानमदिति ॥

किन्त्वहं सर्वमतानां हिन्दुधर्मसम्प्रदायानां च सहनदृष्ट्यावेक्षणं राजकोटे ज्ञातवान् । अस्मत्पितरौ न केवलं विष्णुदेवस्थानमपि तु शिवदेवालयं रामदेवालयं च गच्छतः स्म । गच्छन्तावस्मानपि सहानयेताम् । अनेकशश्चास्मान् देवस्थानं प्रेषयन्ति स्म । जैनसंन्यासिनोऽस्मत्पितुर्दर्शनाय सर्वदामिलन्त । अपि चास्माकमजैनानां गृहे ते भिक्षां स्वीकुर्वन्ति स्म । पित्रा सह धर्मसम्बद्धान्व्यावहारिकसम्बद्धांश्च कथालापानकुर्वन् ॥

एवं मे पितुः पारसीमुसलमानजातीया अपि मित्राण्यासन् । तेऽपि पित्रा स्वस्वधर्मसम्बन्धिनीः कथाः कुर्वन्ति स्म । एतदालापान्मे पिता सर्वदाप्यादरेण क्वचित्तत्परतया चाशृणोत् । तदा मे पितरं शुश्रूषमाणस्य तत्तदादीनां श्रवणसम्भवः प्राप्तः । एवं मे कृतानेकविषयसङ्ग्रहस्य सर्वे धर्माः समदृष्ट्या ग्रहीतव्या इति तत्त्वं मनसि लग्नमभूत् ॥

क्रैस्तमतीयधर्मविचारस्तावदन्य एवासीत् । तत्र मे काचिदप्रीतिरजायत । तन्निमित्तं चैतत् । तदानीं तन्मतप्रचारका अस्मदुच्चविद्यालयसमीपे क्वचित्सन्धिप्रदेशे स्थित्वा हिन्दुजनांस्तदीयदेवताश्चाधिक्षिपन्ति स्म । इदं मे दुस्सहमासीत् । सकृदेव तच्छ्रोतुमहं गत इति स्मरामि । एतदनिष्टानुभवानन्तरं पुनस्तस्य श्रवणाय नैव गन्तुमना अभूवम् । तत्कालमेव प्रसिद्धः कश्चन हिन्दुपुरुषः क्रैस्तमतं प्रविष्ट इत्यश्रौषम् । आसीच्च जनप्रवादो यदयं ज्ञानस्नानकाले परिवर्तितवेषो गोमांसमद्यसेवी च भूत्वा तदनन्तरमैरोप्यम्लेच्छवद्वसनशीर्षकधारी पर्यटितुमारब्धेति । सर्वमेतन्निशम्य नितरामहमदूये । यस्य नाम धर्मस्य कृते गोमांसाशनं मद्यसेवनं वेषान्तरपरिग्रहश्च कर्तव्यतामापद्यन्ते स कथं धर्म इत्याख्यामर्हतीति प्रश्नो मन्मानसमबाधत । किं च प्रत्यग्रक्रैस्तीभूतः स पुरुषः पूर्विकाणां धर्मं च रीतीश्च नीतीश्च स्वदेशं च दूषयितुं प्रवृत्त इत्यशृणवम् । इमे सर्वे वृत्तान्ताः सम्भूय क्रैस्तमते मम द्वेषमजनयन् ॥

सर्वेष्वितरमतेषु मम समदर्शित्वमात्रेण न खलु मन्तव्यमहमीश्वरे दृढश्रद्धावानभूवमिति। एतर्हि मत्पितुःपुस्तकसङ्ग्रहान्तर्गतो मनुस्मृत्यनुवादो मदीयहस्तमागतः। तत्रोपवर्णितं जगत्सृष्टिक्रमादिकमपठिषम्। न केवलं मे तत्र श्रद्धा न जातापि तु नास्तिकतापि समजनि॥

अस्मदन्यपितृव्यकुमारस्य (अयमद्यापि जीवति) बुद्धिरतीव पटीयसीत्यासीन्मे प्रत्ययः। तस्मै मदीयसंशयं। न्यवीविदम्। स तु मां प्राह—प्रौढं वयः प्राप्य संशया इमे तवैव परिच्छेद्या भविष्यन्ति। बालकैरेवंविधाः प्रश्ना न प्रष्टव्या इति। एतदाकर्ण्य तूष्णीमभूवम्। परन्तु मे मनः समाधानं नाविन्दत। किं च मनुस्मृतौ खाद्याखाद्यप्रतिपादकाध्यायगता विषयाः प्रचलितपद्धतीनां विरुद्धा इव प्रत्यभासन्त। इमां शङ्कां प्रत्यपि कृतप्रश्नेन पूर्ववदेवोत्तरं लब्धम्। ततोऽहमेवमात्मानं समादधि यद्गच्छत्सु दिवसेषु मम बुद्धिर्विकसिष्यति। ततो भूयः परिशील्य विषयानिमान्सम्यग्ग्रहीष्य इति॥

मनुस्मृतिपरिशीलनादहिंसातत्त्व तावन्मया नावगतम्। उक्ता खलु मदीया मांसाहारविषयिणी कथा। मनुस्मृतिरेनां पर्यपोषयदिव। सर्पोत्कुणादीनां वधो धर्म्य इत्याशयो मे सञ्जातः। तद्वयसि मया धर्म्यत्वबुद्ध्या मत्कुणादीनां हिंसनं व्यधायीति ज्ञप्तिरस्ति॥

अथैक एव विषयो मन्मनसि रूढमूलोऽभवत्। धर्म एव जगतः प्रतिष्ठा सत्यमेव धर्मस्य तत्त्वमिति। सत्योपासनमेव मम मुख्योद्देश्यमभवत्। दिने दिने मदीयदर्शनगोचरे सत्यस्य महिमा वरीवृध्यते स्म। तत्तत्त्वार्थस्य च सीमापि मद्दृष्टिपथे विस्तारमाप्नुवन्ती वरीवर्ति॥

तथा च गुरातीनीतिपद्यमेकं मम हृदये निरूढिमुपेत्य मन्मनसि साम्राज्यमस्थापयत्। एतेन कृतापकारस्य प्रतीकारतया तदुपकारकरणमेव जीवनयात्रानिर्वाहसूत्रं परिणतम्। इह तत्त्वे मदीयासक्तिस्तथा दृढत्वमापन्ना यथाहं कार्यक्षेत्रे तद्बहुधा परीक्षितुमुपाक्रमे। तदेतदद्भुतं पद्यम्। यथा —

आशीर्वादकृतं जनं परमया भक्त्या नमन् भद्रकृत्
सन्तापं जनयिष्णवे च परया प्रीत्यामृतान्नं ददत्।
काकिण्दर्धकदायिनेऽपि वितरन्कार्षापणानां चयं
प्राणानां परिरक्षकस्य च कृते प्राणांस्त्यजन्नात्मनः॥
दत्तस्तोकतरास्पदं च पुरुषं भूयः पदं लम्भयन्
निर्धूय स्वपरप्रभेदमनिशं निष्पक्षपाती चरन्।
भूरिद्रोहकृतेऽपि शान्तमनसा श्रेयः परं भावयन्
प्राज्ञः सत्पुरुषो महान्विजयते जानीहि तं लक्षणैः॥
इति॥

एकादशोऽध्यायः

विदेशप्रस्थानसन्नाहः

क्रस्तशकस्य सप्ताशीत्युत्तराष्टशताधिकैकसहस्रतमे वत्सरे प्रवेशपरीक्षायामहमुत्तीर्णोऽभवम् । तत्कालमियं परीक्षामदाबादमोहमयीनगरयोर्द्वयोः स्थलयोः प्रचलति स्म । प्रायेण तद्देश्यानामनाढ्यतया विद्यार्थिनः सन्निकृष्टवर्तिनीमल्पव्ययप्राप्याममदाबादनगरीमेव गच्छन्ति स्म । अस्मदीयगृहजनस्याप्यनतिपुष्टत्वादहमप्येवमन्वतिष्ठम् । राजकोटादमदाबादनगरं प्रत्यसहायेन मया कृतं प्रयाणमिदं प्रथममासीत् ॥

उत्तीर्णतत्परीक्षेण मया महाविद्यालयं प्रविश्याध्येतव्यमित्यासीज्ज्येष्ठानामभिलाषः । मोहमयीनगर्यां भावनगरेऽपि महाविद्यालयावास्ताम् । व्ययाल्पत्वाद्भावनगरे श्यामलदासमहाविद्यालये प्रवेशमिच्छुस्तत्र गतोऽभवम् । किन्तु तत्राहं न किञ्चिदवेदम् । पाठाः सर्वेऽप्यतीव दुर्बोधतरा अलक्ष्यन्त । आस्तामध्यापकभाषणेषु ममोत्साहोदयकथा परं तदुक्तीनामर्थोऽपि मया नावगम्यते स्म । अत्र तेषां न कश्चिद्दोषः । तदानीं हि तन्महाविद्यालयाध्यापकाः प्रथमकोटिप्रविष्टा इति पर्यगण्यन्त । मम बुद्धेस्तावदप्रौढिमैव दुर्बोधत्वहेतुरासीत् । वृत्तायां वार्षिकप्रथमपरीक्षायामहं गृहं प्रतिन्यवर्तिषि ॥

व्यवहारकुशलो विद्वांश्च मावजी दवे इत्याख्यो ब्राह्मणोत्तमश्चिरादस्मत्कुटुम्बमित्रं मन्त्रणीयश्चासीत् । अस्मत्पितुर्मरणोत्तरमप्यसौ कुटुम्बेन पूर्वसम्बन्धं न पर्यत्यजत् । मम शालाविरामकाले कदाचिदयमस्मदीयगृहमुपागतोऽभूत् । मम मात्रा ज्येष्ठाग्रजेन च कथालापप्रसङ्गे मम विद्याव्यासङ्गमधीकृत्य तेन प्रश्नः कृतः । श्यामलदासमहाविद्यालये मामधीयानमाकर्ण्य स एवं प्राह । यथा —

अद्यतनकालो भिन्नः । यथोचितविद्याभ्यासमन्तरा युष्मास्वेकोपि कबागान्धिनाध्यासितमधिकारपीठमरोढुं न पारयेत् । युष्मद्वंशस्यैव तत्पीठरक्षणेच्छुभिर्बालकोऽयमधीयानः सादरमवेक्षणीयः । अस्य बि. ए. परीक्षामुत्तरितुं चतुःपञ्चवर्षाण्यपेक्ष्यन्ते । तावच्च कृताभ्यासेनापि पञ्चाशतो वा षष्टेर्वा रूप्यकाणां लाभः स्यदुद्योगप्राप्त्या । न पुनः प्रधानसचिवपदं लप्स्यते । अथवा मदीयकुमारवद्वकीलपरीक्षार्थमभ्यसिसिषीरितोप्यधिकः कालोऽपेक्ष्यते । तत्रान्तरे प्रधानपदवीकांक्षिणो वकीलपरीक्षामुत्तीर्णा बहवः सज्जस्थिता भवितारः । सर्वमेतदपेक्ष्य तस्य विदेशप्रस्थापनं वरं मन्ये । व्यारिस्टर्पदमतीव सुसाधमिति केवलरामो (इदं मावजीदवेमहाशयपुत्रस्य नाम) ब्रवीति । त्रिभिरेव वत्सरैरान्तमधीत्य परावर्तितुं शक्यते । व्ययश्च चतुःपञ्चसहस्ररूप्यकोर्ध्वं न भविता । अभिनवागतं व्यारिस्टर्पुरुषं पश्यत । कियता वैभवेनासौ विजृम्भते । प्रार्थितोत्तरक्षणमेव स प्रधानपदवीं लब्धा । अतोऽहमेवं मन्ये । अस्मिन्नेव वर्षे मोहनदास इङ्ग्लेण्ड्देशं प्रेषयितव्यः ।

Funding by IKS-MoE

तत्र केवलरामस्य बहूनि मित्राणि सन्ति । अयं तत्परिचयपत्रं लिखित्वास्म प्रयच्छति । मोहनदासस्य तत्र सर्वं सुसूत्रमापद्यते । इति ॥

जोशीजीमहाभागो (मावजीदवेमहाशयोऽस्माभिरेवं सम्बोध्यते स्म) मदभिमुखीभूय ' इहैव स्थित्वाध्ययनापेक्षया विदेशगमनं तवाप्यभिमतं ननु ' इति मामपृच्छत् । तद्वाक्यभङ्गौ निरूप्यमाणायां मत्प्रतिवचने तस्य संशयच्छायापि नासीदिति स्पष्टमुपलक्ष्यते स्म ॥

इतोऽप्यतिशयेन मन्मनस्तुष्टिकरीं कर्तव्यसूचनामुपदेष्टुं न शक्यमासीत् । महाविद्यालयस्य हि कठिनशिक्षणेनाहं पूर्वमेव निरुत्साहः सम्पन्नः । तस्मादविशङ्कया तत्सूचनामङ्गीकृत्याहमवोचम् । यथा मनागपि न विलम्ब्येत मे प्रस्थानं तथा कर्तुं हि प्रशस्यं भवति । परीक्षास्त्वरितमुत्तरितुं न शक्यन्ते । वैद्यपरीक्षामुद्दिश्य मत्प्रेषणमपि ननु स्पृहणीयम् । इति ॥

मदग्रजो मां प्रत्यवस्थायाचकथ तत्खलु पितुः सर्वथा नाभिमतमासीत् । वैष्णवैः शवच्छेदनप्रसङ्गः सर्वथा परिहार्य इति यत्तेन कथितं तत्किल त्वामुद्दिश्यैव । त्वया वकीलपदं प्राप्तव्यमित्येव तस्याशयोऽभूत् । इति ॥

जोशीजीमहाभागोऽवादीद्यथा —

गान्धिजी(अस्मत्पिता)महाशयस्य यथा वैद्यवृत्तिं प्रति विरुद्धोऽभिप्रायस्तथा न खलु ममापि । अस्मदीयशास्त्राणि नैतां निषेधन्ति । किन्तु वैद्यपरीक्षायामुत्तीर्णेनापि त्वया प्रधानपदं न लभ्यते । प्रधानपदवीं वा सति सम्भवे ततोऽप्युच्चतरस्थानं वा समारूढं भवन्तमिच्छामि । युष्मदीयमहाकुटुम्बसंरक्षणं तदा हि शक्यं भवेत् । अनुदिनं कालो विषम विषमः सम्पद्यते । तस्माद्विवेकिना ब्यारिस्टर्पदमेव त्वया सम्पादनीयम् । नान्य खलु विद्यते तत्सदृशः पन्थाः । इति ॥ तदनु मातुरभिमुखीभूय ' अद्य मया गन्तव्यम् । मदुक्तं सम्यग्विमृश्यताम् । भूयोऽहमत्रागतस्तस्य विदेशप्रस्थानसन्नाहं प्रचलन्तं श्रोतुमिच्छामि । यदि मत्सकाशात्किमपि साहाय्यमपेक्ष्यते तदाहं सर्वथात्र बोधनीय ' जोशीजीमहाभागो निरगात् ॥

ततो मया व्योम्नि प्रासादकल्पनं समारब्धम् । मदग्रजस्तदेकचिन्तानिमग्नोऽभवत् । एतदावश्यकं द्रव्यं कथं सम्पादनीयम् । बालवयसं मामसहायमेव तावद्दूरं प्रेषयितुमुचितं वा ॥

मदम्बा तु प्रतिपत्तिमूढाभवत् । मद्वियोगो हि तस्या नाभिमतः । सैवमाह — इदानीं युष्मत्पितृव्य एव कुटुम्बज्येष्ठः । तेनैव तावन्मन्त्रणीयम् । यद्यसावनुमन्येत तदैतद्विमर्शयिष्याम इति । एवमुक्त्वा मम सद्यस्तनं प्रस्थानं सा निरोद्धुमयतिष्ट ॥

मदग्रजस्य मनस्यन्यो विचारः कश्चिदस्फुरत् । तद्यथा—पोरबन्दरसंस्थानस्योपर्यस्माकमधिकारविशेषः कश्चिदस्ति । लेलीमहाशयस्तत्रेदानीं शासिता भवति अस्मत्कुटुम्बविषये सदभिप्रायं च पुष्यति । पितृव्ये तस्य कृपा विद्यते । विदेशे विद्याव्यासङ्गाय संस्थानकोशात्किमपि सहाय्यमर्थितः स कुर्यात् । इति ॥

ममैतत्सर्वं समञ्जसमलक्ष्यत । पोरबन्दरपुरं प्रति प्रस्थातुमहं सज्जोऽभवम् । तदात्वे धूमशकटीमार्गाभावाद्घोरथेन प्रयाणं पञ्चभिर्दिनैर्वर्त्यमभूत् । उक्तपूर्वं हि मदीयनिसर्गभीरुत्वम् । किन्तु तात्कालिकी तीव्रतरा मे विदेशजिगमिषा तद्भीरुत्वमन्तरधत्त । धोराजिपर्यन्तं बलीवर्दयानेनाहमगमम् । एकाहात्पूर्वमेव पोरबन्दरपुरं प्रेप्सुर्धोराजिपुरादुष्ट्रमारुह्य प्रायासिषम् । मम तावदिदं प्रथममेव क्रमेलकारोहणम् ॥

अथ पोरबन्दरपुरं प्राप्य पितृव्यं साष्टाङ्गं प्रणम्य तं विदिताखिलवृत्तान्तमकार्षम् । स पुनरात्मना मनसि विचार्य प्रत्यवोचद्यथा—

‘ विदेशं गतैः स्वधर्मरक्षणं शक्यं वा न वा न जाने । यथाश्रुतं तु विमृशतो मम तत्र शङ्केव समुदेति । महामहाब्यारिस्टर्पदारूढानां जीवनचरितविमर्शे क्रियमाणे तेषामैरोप्यम्लेच्छानां च वैलक्षण्यमेव नोपलक्ष्यते । पानभोजनादिव्यतिकरेषु निश्शङ्काह्यमीषां प्रवृत्तिः । धूमवर्तयस्तु सर्वदा तन्मुखसङ्गिन्यो भवन्ति । वेषश्चाङ्गलेयवेषानुकारीत्यपरा विडम्बना । एतादृशं वृत्तमस्मकुटुम्बयोग्यं न भवति । किञ्चाहमत्रान्तरे महायात्रासमुद्यत इवास्मि । मदीयमायुर्हि समाप्तप्रायम् । स्वयं मृत्युसागरतटे समुपविष्टस्त्वां विदेशगमनाय–समुद्रतरणाय–कथमनुजानीयाम् । तथापि त्वदीयमार्गे नाहमन्तरा भवितुमिच्छामि । अत्र हि मातुरनुज्ञा प्रधाना । तयानुमतश्चेदवश्यं प्रयाहि । नाहमन्तरा स्थास्यामीति तां ब्रूहि । सर्वथा मदाशिषः प्राप्तवानसि । इति ॥ ’

तदनु मयाभ्यधायि—

युष्मत्सकाशादितोऽप्यधिकमवाप्तुं नाहमाशंसे । अथास्मदम्बाया अनुज्ञामधिगन्तुं यतिष्ये । किन्तु लेलीमहाशयस्य भवद्भिरेका प्रशस्तिपत्रिका दीयतामिति ॥

एवं पृष्टः स प्रत्यवादीत्—

मया कथं लिख्यताम् । लेलीमहाशयस्तावत्साधुर्जनः । अस्मत्कुटुम्बपरिचयं प्रख्याप्य पत्रमेकं स्वयं लिख । तवायमवश्यं दर्शनं दास्यति । क्वचित्साहाय्यं च कुर्यात् । इति ॥

न जाने केन हेतुना मम पितृव्येन तस्य महाशयस्य प्रशस्तिपत्रिका न दित्सितेति । विदेशगमनं धर्मविरुद्धो व्यापार इति साक्षादुपकर्तुमसौ नोदसहिष्टेति क्वचित्स्मरामीव ॥

लेलीमहाशयं प्रति पत्रिकामलिखम् । स च स्वहर्म्ये द्रष्टव्योऽस्मीति सन्देशं प्राहिणोत् । हर्म्यप्रासादसोपानमारोहन्मामवलोक्य बि. ए. परीक्षामुत्तीर्य त्वयाहं द्रष्टव्यः । साम्प्रतं तु किमपि साहाय्यं कर्तुं न शक्यत इत्याख्यायोपरिगतोऽभवत् । अवसरेऽस्मिन्मया समुचितं प्रवर्तितव्यमित्यगाधप्रयत्नेन सज्जीभूय महतावधानेन कतिचिद्वाक्यानि कण्ठे कृत्य तं महाशयमहमुपासर्पम् । नीचैरवनम्य द्वाभ्यामपि हस्ताभ्यां तत्सभाजनमकार्षम् । किन्तु सर्वोऽपि श्रमोऽयं वृथा जातः ॥

Funding by IKS-MoE

भार्याया आभरणानि किमुपयुञ्जीयेति व्यचिन्तयम् । ज्येष्ठाग्रजे मम विस्रम्भो महानासीत् । अमेयं खलु तदौदार्यं मद्विषये । मय्यसौ स्वपुत्रनिर्विशेषं स्निह्यति स्म ॥

पोरबन्दरपुराद्राजकोटं प्रतिनिवृत्य यथावृत्तमखिलं तस्मै न्यवेदयम् । अथ सम्मन्त्रितो जोशीजीमहाशयः प्राह सति सम्भवे द्रव्यमृणीकृत्यापि विदेशमहं प्रस्थापनीय इति । अथ स्वभार्याभरणानां विक्रेतव्यतामग्रजाय समसूचयम् । ततो हि द्वित्रसहस्ररूप्यकद्रव्यमुत्तिष्ठेत् । अग्रजस्तु यथाकथंचिद्द्रव्यं सर्वथा स्वयं सम्पादयिष्यामीति प्रत्यजानीत ॥

किन्तु मातुर्नाद्यापि मनः समाहितमभूत् । सा किल प्रकृतसम्बद्धानखिलवृत्तान्तान् सूक्ष्मतया जिज्ञासितुमारब्ध । तया हि कुतोऽप्यश्रावि यद्विदेशंगता युवकाः सर्वेपि दुर्वृत्ता भविष्यन्तीति । अन्यः कश्चिदाह तत्र गताः सर्वोपि मांसाहारिणः सम्पत्स्यन्त इति । अपरेण च तस्याः कथितं यन्मद्यं विना तत्र दिवसमेकमपि स्थातुं न शक्यत इति । 'किमस्य ब्रूषे' इति जननी मामपृच्छत् । अथाहमवोचम्—किमु नाहं तव श्रद्धेयः । त्वामहं न कदापि मृषा कथयिष्यामि । न हि तद्वस्तूनामेकमपि स्प्रक्ष्यामीत्यहं ते प्रतिजाने । एतादृशभये तु सम्भवनीये तत्र भवाम् जोशीमहाशयः कि विदेशगमनमनुजानीयात् । इति ॥

सा पुनरभाणीत्—

सर्वथा मम त्वं विश्वसनीयोऽसि । किन्तु दूरदेशे कथं वा किं वा । यत्सत्यमहं भ्रान्तेवाद्य स्थिता । न मे बुद्धिः प्रसरति । इदं प्रस्तुत्य तत्रभवन्तं बेचरजीस्वामिनं प्रक्ष्यामीति ।

बेचरजीस्वामिनः पुरा मोढबनियाख्यवैश्यप्रभेदान्तःपातिनोऽपि पश्चाज्जैनसाधवः संवृत्ताः । तेऽमी जोशीजीमहाभागवदस्मत्कुटुम्बस्य मन्त्रणीया आसन् । ते किल मदीयपक्षमालम्ब्याहमेतद्विषयत्रयमधिकृत्य बालकेन प्रतिज्ञां कारयिष्यामि । अथास्य विदेशप्रस्थापनं क्रियताम् । इत्युक्त्वा मांसं च मद्यं च स्त्रीसङ्गं च त्रयमपि दूरीकरिष्य इति मां प्रतिज्ञामकारयत् । अथैवंकृतप्रतिज्ञस्य मे गमनानुज्ञामम्बा प्रादात् ॥

उच्चविद्यालयस्था मम गौरवप्रदर्शनार्थे सन्तोषकूटमेकं संव्यदधुः । राजकोटाद्बालकस्य विदेशगमनं नाम तदानीं खल्वियमपूर्वघटना । धन्यवादप्रदानाय द्वित्रवाक्यानि पूर्वमेव लिखित्वा तत्र गतोऽभवम् । किन्तु तत्र वचन मे कृच्छान्निरसरत् । तद्वाचयतो मम यत् संवृत्तं शिरोघूर्णनं सर्वाङ्गवेपथुश्च तन्मयाद्यापि स्मर्यते ॥

अथ ज्येष्ठानामाशिषः प्राप्य मोहमयीनगरमहं प्रस्थितः । राजकोटान्मोहमयीनगरं प्रति प्रस्थानं ममेदं प्रथममासीत् । अग्रोजोऽपि सहागतः । किंतु बहुशः किल हस्तगतमपि कवलं मुखं न प्रविशति । मोहमयीनगरे मां प्रत्यवस्थातुमन्तरायाः प्रतिपालयन्ति स्म ।

द्वादशोऽध्यायः

जातिबहिष्कारः

मातुरनुज्ञामाशीर्वादं च प्राप्य त्रिचतुरमासदेशीयापत्यां भार्यां विहाय सपरीवाहेनेव समुत्साहेन प्रेर्यमाणो मोहमयीनगरं प्रस्थितोऽभवम् । तत्र प्राप्ते मयि केचन सुहृदो मदग्रजमचकथन्-आङ्ग्लषष्ठसप्तममासयोर्हिन्दुसागरे तूफानाख्यो झञ्झावातः प्रवाति । मम तावदिदं प्रथमत्वात्समुद्रप्रयाणस्य सर्वथा निषेद्धव्यं मम प्रयाणमाङ्ग्लैकादशमासपर्यन्तमिति । किं च तरणिरेका तूफानवातप्रतिहता निमग्नाभवदिति केऽप्यवदन् । सर्वमेतदाकर्ण्य भीतोऽग्रजः क्वचिद्विपदः सम्भवं शङ्कमानः प्रस्थानं नान्वमन्यत । सख्युरेकस्य सहवर्तिनं मां विधाय मदीयव्ययार्थद्रव्यमेकस्य नः श्यालकस्य हस्ते विन्यस्य मदीप्सितसाहाय्यकरणाय मित्राणि कतिचिद्बोधयित्वा मदग्रजः कार्यवशाद्राजकोटं प्रतिन्यवर्तत ॥

अधिमोहमयीनगरमासीद्दुष्करो मे कालातिवाहः । विदेशसम्बद्धा एव स्वप्नाः प्रादुर्भवन्ति स्म ॥

अत्रान्तरे विदेशयानमधिकृत्यास्मत्कुले समुत्थितोऽभूच्चक्रवातः । अद्यावधि न कोऽपि मोढबनियो विदेशं गतः । तस्माद्गमनसाहसकारी नूनमहं दण्डनीयः । कौलिकैः सङ्घव्यमेलितायां सभायां तदग्रे मयोपस्थातव्यमित्यादिष्टोऽभवम् । तथा चाहं गतः । न जाने तावद्धैर्यं मया कुतः सहसा प्राप्तमिति । अत्यन्तमेव निर्भयः कृतनिश्चयश्च तेषां सम्मुखेऽहमवस्थितः । शेठाख्योऽस्मत्कुलप्रधानो न केवलमस्मद्दूरसम्बन्धी किन्तु मत्पितरि सुस्निग्धश्चाभवत् । सैष मां प्राह—

‘भवता चिकीर्षितं विदेशयानमस्मत्कुलजनः समुचितं न मन्यते । समुद्रलङ्घनमस्मद्धर्मविरुद्धम् । किं च विदेशं गतस्य स्वधर्मरक्षा न शक्येति श्रुतमस्माभिः । तत्र ह्यैरोप्यजनैः सहान्नपानादिकं सेवनीयं भविष्यति’ । इति ॥

अहं प्रत्यवोचम्—

‘विदेशयानमस्मद्धर्मस्य लेशतोऽपि न विरुद्धमित्यहं मन्ये । तत्र विद्याभ्यासो मया चिकीर्षितः । यद्विषयेषु भवन्तो मामतिशङ्कन्ते तद्विषयाणां दूरीकरणं मातुरग्रे मया प्रतिज्ञातम् । अतः कुतोऽपि भयं न विद्यते’ इति ॥

अथ कुलश्रेष्ठी पुनरचकथत्—

‘तत्र स्वधर्मरक्षणमशक्यमिति वयं ब्रूमः । युष्मत्पित्रा सह मम यादृशः परिचयोऽभूदिति भवान् जानाति । एवं स्थिते मदाज्ञानुवर्तनं तव कर्तव्यमिति’ ॥

ततः परं मया प्रत्यवाचि—

Funding by IKS-MoE

BVBSSMV

‘ नूनमहं जाने यादृशः श्रीमतां मम पित्रा सह परिचयोऽभूदिति । भवन्तो मे पूज्याः । किन्तु विषयेऽस्मिन्नकिंचिदपि कर्तुमुत्सहे । विदेशगमननिश्चयमन्यथाकर्तुं न शक्नोमि । अस्मत्पितुर्मित्रमस्मत्कुटुम्बस्य मन्त्रणीयो विद्वान्ब्राह्मणः कश्चिदस्ति । स तावद्विदेशयाने दोषः कोऽपि न हीत्याह । अस्मन्मात्रास्मदग्रजेन च द्वाभ्यामपि पूर्वमेवात्र सम्मतिरदायीति ’ ॥

“ तर्हि कुलजनस्याज्ञां किं भवान्निराकरोति । ”

“ नाहमत्र किमपि प्रतिवक्तुं पारये । मन्ये पुनरस्मिन्विषये भवद्भिरन्तरावस्थानं न युज्यत ” इति ॥

एतद्वचनमाकर्ण्य कुलिको मे भृशमक्रुधत् । अपि च मामाकुक्षत् । अहं तावन्निष्कम्प एव स्थितः । अथायमित्थं निर्णयमाचष्ट—

“ अद्यप्रभृति बालकोऽयं जातिबाहिरो मन्तव्यः । यस्तावदस्य साहाय्यं करिष्यति यो व तद्विसर्जनाय नौकास्थानं यास्यति स नूनं सपादरूप्यकं दण्डं दापयिष्यत इति ॥ ”

निर्णयादस्मादहं न चकितोऽभवम् । श्रेष्ठिनमामन्त्र्य ततो निरगच्छम् । अथाहमचिन्तयम्—सर्वमेतदाकर्ण्य मदग्रजः किन्नु खलु ब्रूयात् । अस्मात्स भीतश्चेत्का गतिरिति । स तु मदीयसद्भाग्यवशादचलितमनस्स्थैर्यः श्रेष्ठिनिर्णये त्वेवं स्थितेऽपि विदेशयानं स्वस्याभिमतमिति पत्रमलेखीत् ॥

इयं घटना मे शीघ्रप्रयाणाय परमौत्सुक्यमजनयत् । कुलजनेन मदग्रजोऽस्मिन्विषये बलात्कृतश्चेदथवा यः कोप्यन्तरायः समापतितश्चेत् का गतिः । इत्येवमात्मनः परिस्थितिमनुचिन्तयन् कतिपयदिनानि यावदक्षेप्सं तावज्जुनागढस्थः कश्चिन्न्यायवादी ब्यारिस्टर्पदप्रेप्सुराङ्ग्लनवममासस्य चतुर्थदिवसे विदेशं प्रस्थास्यत इति वार्तामश्रौषम् । मोहमयीनगरे मत्क्षेमचिन्तनाय मदग्रजेन नियुक्ताः सुहृदो मया गत्वावलोकिताः । तेऽपि तादृशे सहप्रस्थायिनि जने लभ्ये सति न त्याज्योऽयमवसर इत्यभिप्रायन् । कालविलम्बस्य नासीदवकाशः । सद्यः प्रस्थानमनुज्ञातव्यमिति मदग्रजस्य तन्त्रीसन्देशमहं प्राहैषम् । तेनाप्यनुज्ञा दत्ता । मम श्यालं गत्वा पणमपृच्छम् । स तु श्रेष्ठिनिदेशमुल्लङ्घ्य बहिष्कारं सम्पादयितुमहं न सज्जोऽस्मीत्यब्रवीत् । अस्मत्कुटुम्बमित्रमेकं गत्वा मत्प्रयाणस्येतरव्ययस्य च यावत्पर्याप्तं तावद्धनं मे दीयतामिदं च पश्चान्मदग्रजाद्गृह्यतामिति प्रार्थयम् । स चैतदङ्गीकृत्य मम धैर्यमाचष्ट । सोऽयमुपकारो मे चिरस्मरणीयोऽभवत् । तद्द्रव्यादंशमुपयुज्य प्रयाणानुज्ञापकं पत्रमक्रैषम् । नौकायां प्रयाणस्य यद्यदावश्यकं तत्तत्सज्जीकरणमवशिष्टमभूत् । विषयेऽस्मिन्ननुभवशाली सुहृदेकः स्थितः । स मे वसनाच्छादनादिकमखिलं सज्जीचकार । कतिचिद्वस्त्राणि ममाभिमतान्यासन् । अपराणि कानिचिन्न मह्यमरोचन्त । ततो भूयसोत्साहेन कण्ठग्रन्थिबन्धनसमुद्यतस्यापि ममात्र कुत्सा समजनि । ह्रस्वकवचधारणं तु व्रीडाकरमिव मे लक्ष्यते स्म । किन्तु विदेशयात्रासमुत्साहेन मानसं सपरीवाहमासीत् । अतः पूर्वोक्तन्यूनताप्रयुक्तोऽयमसन्तोषो नात्यवधेयोऽभवत् । अभ्यवहार-

Funding by IKS-MoE

विशेषाश्च प्रेप्सिताधिका एव स्थिताः । मत्सखा मदर्थे त्र्यम्बकराय मजमुदार (जुनागढन्यायवादी) महाशयस्य कोष्ठ एव स्थलमेकं सम्पाद्य मद्योगक्षेमचिन्तनं च कार्यमिति तस्यायबोधयत् । स किल प्रौढवया अनुभवशाली गृहस्थः । प्रापञ्चिकव्यवहाराभिज्ञश्च । अहं पुनर्लोकानुभवशून्योऽष्टादशवर्षदेशीयो बालः । स न्यायवादी सखायं प्राह मा भूदस्य विषये कापि चिन्तेति ॥

अथान्ते क्रस्तशकस्याष्टाशीत्युत्तराष्टशताधिकैकसहस्रतमे वत्सरे नवममासस्य चतुर्थदिवसे मोहमयीनगरादहं प्रायासिषम् ॥

त्रयोदशोऽध्यायः

इङ्ग्लेण्ड्देशप्राप्तिः

नाकावर्तिनो मम सकृदपि वमनं नाजायत । किन्तु यथा यथा दिवसा व्यतीतास्तथाहं पर्युत्सुकोऽभवम् । नौकावस्तुभाण्डागाराधिकारिणा सहालपितुं लज्जालुरासम् । आङ्ग्लभाषायां सम्भाषणाभ्यासो मम नासीदेव । मजमुदारमहाशयमेकं विना द्वितीयवर्गीयपथिकाः सर्वेऽप्यैरोप्या अभवन् । तैः सह सल्लपितुं नाहमशकम् । कदाचित्तैराभाष्यमाणोऽपि तदुक्तार्थे नावबुद्धवान् । कदाचिदवगतार्थोऽपि तत्प्रतिवचने न पटुरासम् । प्रागुच्चरणान्मनस्येव प्रतिवाक्यं रचयितव्यमासीत् । चमसच्छुरिके उपयुज्य भोक्तुं नाहमज्ञासिषम् । किं वस्तु मांसोपेतं किं च नेति प्रष्टुमपि न धीरोऽभवम् । अतोऽहमन्यैः सह भोजनाग्रपीठोपरि भोक्तुमामिलन् स्वकोष्ठागार एवाभुञ्जि । सहानीतभक्ष्यफलान्येव मुख्यो मदीय आहार आसीत् । मजुमदारमहाशयस्य तु नासील्लेशतोऽपि सङ्कोचः । स हि सर्वैरप्यमिलत । नौकाबहिश्शालायां स्वैरमेव पर्यक्रामत् । अहं पुनरादिनान्तं स्वकोष्ठ एवोपाविशम् । जनसम्बाधशून्ये तु क्वचिद्धैर्यमवष्टभ्य नौकाङ्गणे कंचित्कालं स्थित्वा प्रतिन्यवर्ते । मजमुदारमहाशयस्तु मां ‘सर्वगोष्ठीप्रविष्टेन त्वया भाव्यम् । असङ्कोचेन कथालापः करणीय’ इति बोधयति स्म । न्यायवादिना प्रौढकण्ठेन भवितव्यमित्युक्त्वा न्यायवादिकृत्यप्रसङ्गेषु स्वानुभवं विस्तरेणाचष्ट । स पुनश्चाब्रवीत्—आङ्ग्लभाषा तु स्वभाषा न भवतीति यद्यपि सत्य तथापि तया व्यवहरता स्खलितसम्भवेऽप्यहीनधैर्येण सम्भाषणमभ्यसनीयमिति । किन्तु मम भीरुकत्वमजय्यमासीत् ॥

मयि कश्चिदैरोप्यपथिकः साभिमानो मया सह कथालापं कर्तुमारभत । स वयसि मत्तोऽपि ज्यायान् । किं मया भुज्यते को ममोद्योगः क नु मया गन्तव्यमित्यादि मामप्राक्षीत् । अग्रपीठोपर्येव भुज्यतामिति मामवादीत् । मांसं मया निश्चितं न खाद्यत इति श्रुत्वा विहसन् सानुकम्पमाह—

Funding by IKS-MoE

'एतावद्दूरन्तु (वयं तदा शोणसागरे स्थिताः) नास्ति चिन्ता । किन्तु बिस्केजलसन्धौ भवन्मतमन्यथा भवितुमर्हति । इङ्ग्लेण्डदेशे पुनः शीतं तथा तीव्रं वर्तते यथा मांसाशनं विना तत्र जीवितुमेव न पार्यते' । इति ॥

'ननु मांसाहारवर्जं तत्र जीवितुं शक्यमिति मया श्रुत'मित्यहमवोचम् ।

स चाब्रवीत्–

तत्सर्वं मृषा । मांसमभक्षयंस्तत्र वास्तव्यो जनः कोऽपि न दृश्यते । पश्यतु भवान् । अहं यद्यपि मद्यपायी तथापि किं भवताप्येवं कर्तव्यमिति ब्रूयाम् । किन्तु मांसमवश्यं भवता भक्षयितव्यमिति ममाभिप्रायः । अन्यथा हि प्राणधारणमेव न शक्यमिति ।

ततोऽहं प्रत्यवोचम्—

नूनमुपकृतोऽस्म्यनया भवदीयसूचनया । किन्तु मांसं नैव स्पृशामीति मातुरग्रे मया प्रतिज्ञा कृता । अतस्तद्विषयिणी भावनापि मे परिहेया भवति । यदि मांसाशनमन्तरा तत्रावस्थातुमशक्यं स्यात्तदा हिन्दुस्थानं प्रति निवर्त्स्यामि न पुनर्विदेशे स्थितिग्रहणाय मांसं भक्षयिष्ये । इति ॥

अथ बिस्केजलसन्धिं प्राविशाम । तत्र मांसमद्ययोरपरिहार्यता मया न दृष्टा । मम मांसाभोजित्वसमर्थकानि साक्षिपत्राणि मया सङ्गृह्य स्थापनीयानीत्यादिष्टपूर्वोऽहमेनमैरोप्यसुहृदं तादृशपत्रमेकं मे दातुमर्हसीत्यभ्यार्थये । स च प्रीत्या तल्लिखित्वा मह्यमदात् । तच्च मया कियन्तमपि कालं जागरूकतया रक्षितम् । किन्तु मांसाहारिणोऽपि निरायासेन तथाविधानि पत्राणि सम्पादयितुं शक्नुवन्तीति पश्चादवगतस्य तद्गतो मोहः सद्यस्तिरोऽधत्त । यदि मद्वाक्यमश्रद्धेयं स्यात् तदा तादृशसाक्षिपत्रैः किमिव हि प्रयोजनम् ॥

अथ वयं साउथेम्प्टननगरोपकण्ठे समुद्रतीरं प्राप्नुम । तद्दिनं स्थिरवासर इति क्वचित्स्मर्यते । नौकायामहं कृष्णकवचाप्रपदीनधारी स्थितः । ततोऽवतरणोत्तरं धारणाय मत्सुहृत्परिकल्पितं श्वेतोर्णामयं कवचमाप्रपदीनं च मयोद्धृत्य बहिः स्थापितमभूत् । तत्कल्पितो वेषः शोभन इति मत्वा तद्वसनजातं प्रतिमुच्य भूतले पादौ विन्यस्तवान् । तदा किल सप्टेम्बरमासस्यान्तः । समन्तादवलोक्यमाने मत्सदृशवेषधारी नान्यः कोऽपि दृष्टः । मदीयवस्तूनि ग्रिण्डलेकम्पनीभृत्यस्य कस्यचिद्वशे न्यक्षिपम् । अन्यैरप्येवमनुष्ठितत्वादहमपि तत्कृतानुकारी कीलकहस्तानपि तद्वशेऽकरवम् ॥

मन्निकटे परिचयपत्राणि चत्वारि स्थितानि । 'डाक्टरप्राणजीवनमहेता–श्रीदलपतरामशुकल–राजकुमाररणजितासिंहजी–दादाभाईनवरोजी' त्येतेभ्यस्तानि लिखितानि । डाक्टरमहेतामहाशयं प्रति साउथेम्प्टननगरादहं तन्त्रीसन्देशं प्राहैषम् । लण्डननगरे विक्टोरियाहोटेल इत्येतदाख्येऽतिथिमन्दिरे वसतिर्ग्रहीतव्येति नौकायां केनचित्सूचितमभूत् । तदनुसारेण मजमुदार-

Funding by IKS-MoE

महाशयद्वितीयस्तत्र गतोऽभवम् । तत्र धवलांशुकवेषमात्मानमेकमेव निरूपयन्नर्धगतप्राण इवाभवम् । परेद्युर्भानुवासरत्वादासोमवारं मदीयवस्तूनि मां नोपगच्छन्तीति ज्ञात्वा प्राणैः साकल्येन गतमिव ॥

सायं प्रायोऽष्टघण्टावादनसमये डाक्टरमहेतामहाशया मां द्रष्टुमागताः । ते मां सादरमभिनन्द्य शुक्लाम्वरवेषं मदीयमालोक्याहसिषुः । तथा च प्रवर्तमाने कथालापप्रसङ्गे तदीयमहं कौशेयशीर्षकं गृहीत्वा तस्य स्निग्धतादर्शनकुतूहलेन तदुपरि भूयो भूयो हस्तेन परामृशम् । तेन तद्गतं कौशेयमखिलं समुद्गतमभूत् । एतदृष्ट्वा ते महाशयाः किञ्चिदिव क्रुद्धा मामुपेत्य चेष्टितान्मां न्यवारयम् । किन्तु कौशेयं यथापूर्वं न जातम् । एतेनाग्रे यथा मया प्रवर्तितव्यमिति प्रबोधित इवासम् । ऐरोप्यरीतिनीतीनामभ्यसनं तावदिदं प्रथममेवेति वक्तव्यम् । डाक्टरमहेतामहाशया हसन्तो मामेवमबोधयन् —

अन्यदीयवस्तूनि न खलु स्प्रष्टव्यानि । यथास्माभिर्हिन्दुस्थाने तथात्र परिचयोत्तरक्षणमेव न खलु प्रश्नाः प्रष्टव्याः । कथालापप्रसङ्गे न खलु प्रोच्चैर्भाषितव्यम् । यथा हिन्दुस्थाने वयमैरोप्यैः सहालपन्तः 'सर' इति सम्बोधयामस्तथात्र तत्पदप्रयोगो नावश्यकः । अत्र हि तत्पदं केवलं भृत्यैरल्पाधिकारिभिश्च निजस्वामिसम्भाषणप्रसङ्गे प्रयुज्यते । इत्यादि । किञ्चातिथिमन्दिरे वसतिग्रहणेन बहुव्ययः सम्पद्यते । तद्वरं कस्यचित्कुटुम्बे सहावस्थानं भवतः । परन्तु विषयमेनमधिकृत्य सोमवासरे विमर्शयिष्याम इति व्याहृत्य डा. महेतामहाशया निरगुः ॥

मजुमदारमहाशयस्य मम चातिथिगृहं नाभिमतमभूत् । तत्र व्ययश्च भूयान् । माल्टाद्वीपादस्माभिः सहागतः सिन्धुदेश्यः पथिकः कश्चिदासीत् । स च लण्डननगरे नवागन्तुको नाभवत् । तेन हि प्रति श्रुतमावयोरर्थे भाटिकाकोष्ठमेकं सम्पादयिष्यामीति । तच्चावाभ्यां प्रतिपन्नम् । सोमवासरेऽस्मदीयसम्भारान्प्राप्य यदतिथिमन्दिरस्य प्रदेयं द्रव्यं तद्वितीयं सिन्धीमित्रेण निश्चितपूर्वं कोष्ठमगाव । अतिथिगृहे प्रदेयं भोजनादिशुल्कं सुवर्णमुद्रात्रय-(पञ्चचत्वारिंशद्रुप्यकाः) मासीदिति मे ज्ञप्तिरस्ति । एतेन ममाश्चर्यमभूत् । तावद्व्ययीकृत्यापि क्षुधा मे न शान्ता । तत्र हि मे न किञ्चिदरोचत । एकं भोज्यमसमीचीनमित्यन्यदानाय्यते स्म । एतेन द्वयोरपि मूल्यं प्रदेयमापतितम् । वस्तुतस्तु मोहमयीनगरादानीतस्थापिता एव पदार्था अद्यावधि मयोपायुज्यन्त ॥

नूतनमन्दिरेऽपि मया न लब्धा मनःशान्तिः । स्वगृहस्मृतिः स्वदेशस्मृतिश्च सर्वदा समुन्मिषति स्म । दिवा मज्जनन्याः प्रेममयीमूर्तिः सदा समक्षवर्तिनीवादृश्यत । रात्रौ बहुधा गृहजनस्मरणेन नयनाम्बुधाराभिरार्द्रीकृतकपोलस्य मम निद्रा दूरेऽभवत् । सर्वमेतद्दुःखमन्यसमक्षमकथनीयमासीत् । अथवा कथितेऽपि तस्मिन्किन्नु फलं स्यात् । अस्य मनःक्लेशस्य प्रशमनाय मार्गः कोऽपि न मेऽस्फुरत् । तत्रत्यो जनश्च तत्रत्यानां रीतिनीतयश्च तत्तेषां वसतयश्चेति सर्वमेतद्विचित्रमलक्ष्यत । आङ्ग्लेयसद्गृहस्थैः संव्यवहारविद्यायामहमत्यन्तवालापत्यमिवासम् । ततस्तद्विषये

मया निरन्तरं सावधानेन भवितव्यमासीत्। मत्कृता मांसवर्जनप्रतिज्ञाप्यन्या बाधा। तत्र खाद्यान्यपि वस्तूनि शुष्काणि नीरसानि चाभवन्। विदेशे स्थितिरियं न मेऽभिनन्दनीयाभवत्। हिन्दुस्थानं प्रति परागमनं तु नैव सम्भाव्यते स्म सेयमुभयतस्पाशा रज्जुर्मामुपस्थिता। अथ मेऽन्तर्वाणी व्याहरत्– ‘इह त्वं कथंचिदागतोऽसि। त्रीणि वर्षाणि त्वया कथमपि सर्वथातिवाहयितव्यानीति’॥

चतुर्दशोऽध्यायः

अहं सर्वात्मना शाकाहारी सम्पन्नः

डा. महेतामहाशयाः सोमवासरे विक्टोरियाहोटेलगृहं प्रति मां द्रष्टुमगच्छन्। तत्र त्यक्तस्थितिं मामवगत्य विज्ञातमदीयनूतनावासा अस्मत्कोष्ठमागताः। अत्यन्ताविवेकवशान्नौकायाने मया कण्डूया सम्पादिताभवत्। नोकायां स्नानार्थं वस्त्रक्षालनार्थं च समुद्रजलमेवोपयोक्तव्यमासीत्। क्षारोदके मलहरी (साबूनापराख्या) न विलीयते। मलहरीप्रयोगस्तावन्नागरिकलक्षणमित्यालोच्य तयात्मानं प्रमृजतो मम शरीरं न केवलं न निर्मलं जातं परं सर्वाङ्गश्लिष्टिरुत्पद्यकण्डूयामुदपादयत्। तस्यां डा० महेतामहाशयेभ्यः प्रदर्शितायां ‘एसेटिक एसिड’ इत्येतदाख्यद्रावकलेपो दातव्य इत्यमी प्राहुः। तत्प्रयोगात्सञ्जातसन्तापेन मया यद्रुदितं तदद्यापि स्मर्यते। डा० महेतामहाशया अस्मन्निवासकोष्ठं तद्व्यवस्थां च विलोक्य सशिरःकम्पमाचक्षत —

अत्र निवासेन प्रयोजनं किमपि न लभ्येत। विदेशागमनं खलु न तावद्विद्याव्यासङ्गाय यावदाङ्ग्लेयजीवनस्य रीतिनीत्यनुभवसम्पादनायास्माभिरङ्गीक्रियते। तस्मात्केनापि कुटुम्बेन सह वसतिराश्रयणीया। तदहं मन्ये भवता किंचिदनुभवसम्पादनार्थं .... महाशयैः सह निवासः प्रशस्त इति। तत्सकाशमहं भवन्तं नेष्यामि। इति॥

अथ कृतज्ञतया तद्वाक्यमङ्गीकृत्य तदुक्तमित्रस्य मन्दिरमगच्छम्। स मां भूयसादरेण श्रद्धया चाभ्यनन्दत्। स्वभ्रातृवन्मयि वर्तयन्नाङ्ग्लेयरीतिनीतिर्मामबोधयत्। आङ्ग्लभाषया सम्भाषणक्रमं च मामशिक्षयत्। किन्तु मदुचितभोजनोपकल्पनकथा कष्टतराभवत्। लवणोपस्करवर्जं पाचितं यच्छाकं तन्मह्यं न रोचते स्म। मम भोजनार्थे किं वा सज्जीकरणीयमिति तद्गृहिणी न ह्यजानात्। प्रातराशाय गोधूमविशेषाद्यवागूः पर्यकल्प्यत। एतया यद्यपि जठरं किंचिदाप्याय्यत तथापि मध्याह्नभोजनेन सायन्तनभोजनेन वा क्षुधा मे नैव शाम्यति स्म। मांसं भोक्तव्यमिति मदीयसुहृदनुदिनं मामन्वशिषत्। अहं तु मातुरग्रे तदन्यथा प्रतिज्ञातमित्युक्त्वा तूष्णीमभूवम्। मध्याह्नभोजने पिष्टकं वरुणशाकं लेह्यविशेषश्च पर्यवेष्यन्त। सायमप्येतान्येव। मम जठरं तु बृहज्जठरम्। तथापि पिष्टकस्य द्वित्रमात्रशकलानि मयाभक्ष्यन्त। अधिकं मार्गितुं

लज्जालुरभवम्। तथा च मार्गणं न गौरवायेत्यहमचिन्तयम्। अपि च मध्याह्ने वा रात्रौ वा दुग्धं नालभ्यत। एतदवस्थं मामवलोक्य मम सुहृन्नितरामुद्विग्नः सन्नेकदा मामवादीत्—

यदि भवान्मे साक्षात्सहोदरोऽभविष्यत्तदाहं भवन्तं स्वदेशं प्रति परावर्तयिष्यम्। इह स्थलीयपरिस्थितिमजानत्या निरक्षराया भवदीयजनन्याः पुरतः कृतायाः प्रतिज्ञायाः किन्नाम गौरवम्। सा खलु नैव प्रतिज्ञा। न्यायतस्तस्याः प्रतिज्ञात्वं न कोऽप्यभ्युपेयात्। एतादृशप्रतिज्ञायामभिनिवेशस्तु परा मुग्धता। मांसं तावद्भवता भुक्तपूर्वमिति तच्च भवतो रुच्यमासीदिति च भवानङ्गीकरोति। यत्र तद्भक्षणमनावश्यकमासीत्तत्र तद्भवानभक्षयत्। यत्र पुनरवश्यमेव तद्भोक्तव्यं तत्र तत्परिवर्ज्यते। अहो इयं कीदृशी न्यायरीतिः। इति। तथाप्यहमचलित-निश्चय एव स्थितः॥

स दिवानिशमित्थं चर्चयन्निर्बन्धमकरोत्। नैवं करिष्यामीत्येतदेकमेव मे सर्वदा प्रतिवचनमासीत्। यथा यथा तेन कृता चर्चा तथा तथा मे दार्ढ्यमधिकमभूत्। भगवन् पाहि मामिति प्रतिदिनमीश्वरं प्रार्थयम्। भगवान्मयि कृपामधत्त। ईश्वरो नाम किं वस्त्विति परमार्थतो मया ज्ञातमिति न। किन्तु रम्भया मय्युप्तं भक्तिबीजं मामीदृक्कार्यमकारयत्॥

एकदा सुहृदयं बेंथमनामकस्य पुस्तकमुपयोगवादाख्यं मदर्थे वाचयितुमुपाक्रमत। तदेतन्न मे बुद्धिमारोहत्। भाषाकाठिन्यहेतोस्तन्मे दुर्बोधमासीत्। सखा तद्व्याख्यातुं प्रवृत्तः। तदाहमचकथम्—

‘भवद्भिरहं क्षन्तव्योऽस्मि। इमे गहनार्था मम बुद्धिशक्तिमतिक्रम्य वर्तते। मांसाशनं तावदावश्यकमित्यङ्गीकरोमि। किन्तु कृतां प्रतिज्ञां नोल्लङ्घयेयम्। एतदधिकृत्य चर्चयितुमप्यहमसमर्थः। विवादे भवतः प्रत्यवस्थातुं न प्रभवेयम्। मूर्खोऽयमिति वा बद्धच्छलोऽयमिति वा मां गृहीत्वा भवद्भिः स्वच्छन्दी परित्याज्योऽस्मि। जाने मय्यर्पितं वः प्रेमसारम्। भवन्तो मे हितैषिण इति नूनमवगच्छामि। मदवस्थानिरूपणेन वो दुःखसम्भवादेव भवन्तो मामेवं पदे पदे बोधयन्तीत्यपि जाने। किन्त्वत्र मे नान्या गतिः। प्रतिज्ञा नाम प्रतिज्ञा। तामन्यथा कर्तुं न शक्नोमि। इति॥’

मम सुहृद्विस्मितो भूत्वा मामभ्यपश्यत्। ततः पुस्तकं पिधाय बाढं नाहमितश्चर्चयिष्यामीत्यवोचत्। अहं प्रमुदितोऽभवम्। ततः परमेतत्कथा न भूयस्तेन प्रस्तुता। किन्तु मद्विषयिणी तदीयचिन्ता नान्तमगमत्। तेन खलु धूमवर्तिरसेव्यत। अपि च मद्यमपीयत। तथाप्यनयोर्वस्तुनोरेकतरं मयाप्युपसेवनीयमिति न स मामबोधयत्। एतावदेव न। परन्तु तद्वस्तु न सेवितव्यमित्येव मां कथयति स्म। एकैव खलु तं बाधमाना चिन्ता। यदहं मांसाहारं परिवर्ज्य दुर्बलस्सन्निङ्ग्लेण्डदेशे व्याकुलितो भविष्यामीति॥

एकमासं यावद्विदेशानुभव इत्थं सम्पादितः। अस्य मित्रस्य गृहं रिचमण्डपुरे स्थितम्। ततश्च लण्डननगरं प्रति प्रतिसप्ताहं द्विवाराधिकं न गन्तुमशकि। तस्मात् डा० महेतामहाशयः

Funding by IKS-MoE

श्रीदलपतरामशुकलमहाभागश्च केनापि कुटुम्बेन मया स्थातव्यमिति निरधारयताम्। श्रीशुकलो वेस्टकेन्सिङ्ग्टनस्थले कस्यचिदाङ्ग्लभारतीयस्य गृहमन्विष्य तत्र मन्निवासं पर्यकल्पयत्। तद्गृहस्य स्वामिनी विधवासीत्। मद्विहितं मांसत्यागं तस्यै न्यवेदयम्। यथार्हं भवन्तमवेक्षिष्य इति साकथयत्। इहाप्यप्रशान्तक्षुधेन मया स्थातव्यमापतितम्। मधुरपिष्टाद्याहारार्थं पूर्वमेव स्वदेशं प्रत्यलेखिषम्। किन्तु नाद्याप्येतदुपागमत्।भोज्यपदार्थाः सर्वेऽपि नीरसा अभूवन्। अनुदिनमपि सा जरठा कश्चित्पाकः समीचीन इति मां पृच्छति स्म। किन्तु सा तपस्विनी कुर्यात्। यथापूर्वं लज्जयाहमपरित्यक्तो मदग्रे स्थापितादधिकं प्रतीप्सितुं न धीरोऽभवम्। तस्या द्वे दुहितरावास्ताम्। ते मह्यं भूयः सोपरोधं पिष्टापूपशकलान्यदत्ताम्। एकपिष्टापूपस्य समग्रस्यापि भक्षणं विना जठरं मे न पूर्यत इति कथमेते हन्त विद्याताम्॥

अथाहमत्रान्तरे बलितपक्षतिः स्थितोऽभवम्। नियतक्रमेणाध्ययनं नाद्यापि समारम्भि। कथं कथमपि समाचारपत्रिका वाचयितुं प्रावर्तिषि। सैष श्रीशुकलस्य प्रभावः। भारतदेशे न कदाप्यहं वृत्तपत्रमवीवचम्। अत्र पुनः प्रत्यहं तत्पठनेन तदभिरुच्युत्पादने मया कृतः प्रयत्नः सफलोऽभवत्। 'डेली न्युस–डेली टेलिग्राफ–पेलमेल गॅझेट' इत्येतदाख्यसमाचारपत्राणि मया प्रतिदिनमवलोक्यन्ते स्म। तद्वाचनाय होरामात्रकालोऽपि नापेक्षितोऽभूत्॥

एवमहं लब्धावकाशस्सन् विहाराय प्रस्थितः शाकाहारातिथिगृहमन्वेषयमाणः पर्यक्रमिषम्। लण्डनपत्तने कतिपयस्थलानि तादृशि विद्यन्त इति गृहस्वामिन्यकथयत्। प्रतिदिनं दशद्वादशपाषाणदूरं परिक्रम्य स्वल्पव्ययगम्यमतिथिमन्दिरं प्रविश्य पिष्टापूपमुदरपूरमघसम्। एवं परिक्राम्यतो ममैकस्मिन् दिने फेरिंग्डनवीथ्यां शाकाहारविश्रान्तिगृहमेकं दृष्टिपथमागात्। यथा शिशुः स्वेप्सितवस्तुलाभान्नन्दति तथाहं तदा प्रहृष्टोऽभवम्। प्रवेशात्पूर्वं द्वाराभ्यर्णे विक्रयार्थं काचवातायनान्तः प्रदर्श्यमानानि कानिचित्पुस्तकान्यवालोकिषि। तत्र सॉल्ट इत्येतदाख्येन प्रणीतः 'सात्विकाहारगुणो' नाम प्रबन्धो दृष्टः। एकशिलिङ्गद्रव्येण तं क्रीत्वा गृहं प्राविशम्। तद्दिने हि मया विदेशप्राप्त्यनन्तरमुदरपूरं भुक्तम्। तस्मिन्दिने हि भगवान्मामन्वग्रहीत्॥

सॉल्टप्रणीतं पुस्तकमामूलान्तमपठिषम्। तन्मे मनः स्वायत्तमकरोत्। एतद्ग्रन्थावलोकनादारभ्य सर्वात्मनाहं शाकाहारी संवृत्त इति वक्तव्यम्। मातुरग्रे प्रतिज्ञाकरणदिवसमेव सुदिवसमजीगणम्। तावत्पर्यन्तं सत्यरक्षणार्थमेव–मात्रे दत्तवाक्यपरिपालनार्थमेव–मया त्यक्तमभून्मांसम्। किन्तु शेषैः सर्वैं मांसाहारिभिर्भवितव्यमित्यहं न केवलमैच्छं परं स्वयमपि कदाचित्प्रकटमेव मांसाहारी भवितुमवसरप्रतीक्षोऽभवम्। इतरेभ्योऽपि मांसाहारस्य महिमानमुपदेष्टुकामोऽभवम्। तदेतद्दिनात्प्रभृत्यहं सर्वात्मना शाकाहारी सम्पन्नः। एतत्तत्त्वोपदेश एव मम पवित्रं कर्तव्यमासीत्॥

Funding by IKS-MoE

पञ्चदशोऽध्यायः

अहमाङ्ग्लेयनागरिको जातः

सात्त्विकाहारविषयिणी श्रद्धा मम दिने दिने समवर्धत। सॉल्टपुस्तकस्य पठनादाहारविषयकग्रन्थानां पिपठिषा तीव्रा समजनि। लभ्यपुस्तकानि सर्वाण्यपि क्रीत्वाहमपाठिषम्। तेषामेकं 'हावर्ड विलियम्स' इत्येतदाख्येन विरचित आहारनीत्याख्यः प्रबन्धः। स च मानुषाहारविषयको जीवनवृत्तात्मक इतिहासः। पुरातनकालमारभ्याद्यावधि ये ज्ञानिनोऽवतारपुरुषाश्च पाइथागोरासक्रिस्तप्रभुतयस्ते सर्वेऽपि शाकाहारिणोऽभवन्निति प्रदर्शयितुं तद्ग्रन्थकर्त्रा प्रयत्नोऽकारि। डा० 'अॅना किङ्ग्सफर्ड' इत्येतदाख्यमहिलया विरचितं 'आहारविषयेऽत्युत्तमो मार्ग' इति शीर्षकोपेतं पुस्तकं च हृदयङ्गममासीत्। तथा डा० ॲलिन्सनकर्तृकैरारोग्यरक्षाविषयकैर्लेखनैश्च बहूपकृतं मे। एतद्ग्रन्थकर्ता रोगिणामुचिताहारप्रदानेन तद्रोगपरिहारपद्धतेः पक्षपाती। स किल स्वयं शाकाहारी भूत्वा रुग्णवर्गं च शाकाहारमात्रसेविनं चकार। एतदादिग्रन्थपरिशीलनादाहारविषयकाणि शोधनानि मम जीवने प्रामुख्यस्थानमभजन्त। आदौ यद्यपि तानि मुख्यश आरोग्यदृष्ट्यैव विहितानि तथापि पश्चात्तत्र धार्मिकदृष्टिरेव सर्वप्रधानाभवत्॥

एतन्मध्ये तेन मित्रेण मद्विषयिणी चिन्ता न परित्यक्ता। मयि बद्धप्रेमतया स इत्थमचिन्तयत्—यदहं मांसाहारवर्जनेन न केवलं दुर्बलो जनिष्ये परमाङ्ग्लसमाजे सम्यग्व्यवहर्तुमक्षमो मुग्धाग्रणीर्भविष्यामीति। शाकाहारविषयकाणि पुस्तकानि मया पठ्यन्त इति यावदसावजानात् तावत्तत्पठनेनाहं चित्तभ्रमं प्राप्य शोधनैरेव यावज्जीवमात्मानं व्यर्थीकृत्य स्वकर्तव्यानि विस्मृत्य परमुन्मत्तो भविष्यामीति भीतस्सन् मां सत्पथं प्रापयितुकामः प्रयत्नमन्तिममकरोत्। स एकदा मां नाटकावलोकनार्थमाह्वयत्। नाटकशालां प्रति गमनात्पूर्वमावाभ्यामुभाभ्यामपि 'हॉलबर्न' भोजनगृहे सहभोक्तव्यमिति निरणायि। तद्भोजनगृहं मे राजमन्दिरप्रख्यमलक्ष्यत। विक्टोरियातिथिगृहपरित्यागानन्तरमेतादृशगृहे प्रवेश इदं प्रथमः। तद्गृहं गच्छतो मम बुद्धिः परिभ्राम्यति स्म। अतस्तत्रत्यो मदनुभवः प्रयोजनकार्यासीदिति वक्तुं न शक्यते। अत्र हि लज्जावशादपि वा भोज्यपदार्थानुद्दिश्य प्रश्नानहं न पृच्छेयमिति विभाव्य गृहमिदं मां सुहृदानीतवान्। परःशतजनानां मध्ये प्रविश्य क्वचिदग्रपीठाभ्यर्णे समुपाविशाव। पूर्वमस्मदग्रे स्थापितशरावेषु यूषविशेषः स्थितः। किमात्मकोयमिति मे संशयो जातः। किन्तु मित्रात्तज्जिज्ञासितुं मया नोदसाहि। तस्मान्निकटवर्तिनं सेवकमाह्वयम्। सुहृदेतद् ज्ञात्वा कः समाचार इति क्रोधेन मामपृच्छत्। अहं सङ्कोचेन प्रत्यवोचम्—अयं यूषः किं मांससम्पृक्त इति जिज्ञासितुं स मयाह्वायीति॥ ततः स एवं मामकथयत्—

"सुशिक्षितानां मध्ये स्थातुं भवान्न योग्यः। उचितरीत्या व्यवहर्तुमक्षमत्वादितो भवान्निर्गत्य यत्र काप्यन्यस्मिन् भोजनगृहे कृताहारो मदागमनप्रतीक्षया बहिस्तिष्ठतु।" इति॥

Funding by IKS-MoE

एतेन मे महान् हर्षः समजनि। मया निष्क्रम्यापरं भोजनगृहमन्विष्टम्। शाकाहारभोजनगृहमेकं सन्निकृष्टस्थितमासीत्। किन्तु तद्बद्धकवाटमभूत्। अहमितिकर्तव्यता मूढः स्थितः। उपोषिता मया सा रात्रिः। अथ नाटकमन्दिरमगच्छाव। मदीयवृत्तमधिकृत्य मत्सुहृदा न किञ्चित्प्रास्तावि। न च मया वक्तव्यं किञ्चिदप्यासीत्। किन्तु खलु वक्तव्यं मया। इदमेवावयोः संवृत्तं मित्रयुद्धम्। एतेनास्मन्मैत्री न मनागप्यहीयत। ज्ञातं हि मया यदनेन मामुद्दिश्य कृतानां प्रयत्नानां मन्निष्ठं तदीयप्रेमैव कारणमिति। आचारविचारमधिकृत्य ततो भिन्नाभिप्रायोऽप्यहं तस्मिन् क्वचिदपि मन्दादरो न जातः। प्रत्युतासौ भूयश्च मे समादरणीयोऽभवत्॥

निश्चितं हि मया यन्मत्कृते सुहृन्निश्चिन्तः स्थापनीयः। इतः परं ग्राम्यवृत्तिं परित्यज्य नागरिकीभवितुं मया प्रयतितव्यम्। मदीयशाकाहारित्वनिमित्तां वैचित्रीं जनो विस्मारणीयः। तदर्थमितरनागरिकलक्षणान्यपि मया समधिगन्तव्यानि। इत्थं च सभ्यगोष्ठीप्रवेशयोग्यता मया सम्पादनीयेति। एवं मनसिकृत्य मया स्वशक्तिमतिक्रान्तमाङ्ग्लेयनागरिकीभवनरूपं कार्यमङ्गीकृतम्॥

मयाद्य धार्यमाणानि यानि मोहमयीनगरे निर्मापितानि वसनानि तान्याङ्ग्लेयसमाजयोग्यानि न भवन्तीति 'आर्मि ॲण्ड नेवि स्टोर्स' इत्येतदाख्यमहानिषद्यायामभिनवानि वस्त्राणि पर्यचीक्लृपम्। एकोनविंशत्या शिलिङ्गनाण्यै(तदानीमेतदेवाधिकं मूल्यम्)गोपुराकारं शीर्षकमेकमक्रैषम्। इयताप्यतृप्तः सन् रसिकजनयात्राक्षेत्रभूतां 'बॉण्ड स्ट्रीट' इत्येतदाख्यां विपणिं गत्वा दशभिः सुवर्णमुद्राभिः (१५० रूप्यकतुल्यमिदं) सायन्तनकञ्चुकाद्याकल्प(ईवनिङ्गसूट)मसेवयम्। उदारहृदयस्य मदग्रजस्य पत्रं विलिख्य कालयन्त्रसाङ्गिनीं द्वियष्टिकसौवर्णशृङ्खलामानीनयम्। सिद्धस्थितकण्ठग्रन्थिधारणं न शिष्टाचार इति मत्वा तस्य सम्यग्ग्रन्थनकलां हस्तगतामकार्षम्। भारतदेशे केवलमायुष्कर्मावसरे दर्पणोपयोगस्य सुसमयप्राप्तिरभूत्। अत्र पुनः प्रतिदिवसमेकस्य बृहद्दर्पणस्याभिमुखे स्थित्वा सम्यक्कण्ठग्रन्थिबन्धनाय कुन्तलमध्यसीमापरिष्करणाय च प्रतिकर्म दशनिमिषकालमत्यवाहयम्। कुन्तलानां परुषपरुषत्वात् तत्समीकरणाय प्रतिदिनं प्रसाधनकूर्चेन योद्धव्यमापतितम्। शीर्षकप्रतिमोकावमोककालयोर्हस्तः स्वयमेव चिकुरमध्यपरिष्करणाय प्रसरति स्म। चतुर्णां जनानां मध्ये समुपविष्टेन तु क्षणस्यैकवारं परिदर्श्यमानं चिकुरसीमासमीकरणं नाम नागरिकलक्षणमहो किमङ्ग वक्तव्यम्॥

समारम्भोऽयमियतैव न समाप्तिमगमत्। समुज्ज्वलवेषधारणमात्रेणैव किमहमाङ्ग्लनागरिकः स्याम्। अतो नागरिकत्वसाधकानां कतिपयबाह्यलक्षणानामभ्यसने दत्तदृष्टिरभवम्। नागरिकस्य हि नर्तनं फ्रेञ्चभाषावाक्पटुत्वं चावश्यकमिति प्राहुः। फ्रेञ्चनाम न केवलमिङ्गलेण्डदेशस्य पार्श्ववर्तिनः फ्रान्सदेशस्य भाषापि तु समस्तयूरोपखण्डस्य राष्ट्रभाषा। निखिलयूरोपदेशस्यापि दिदृक्षा ममासीत्। नाट्यं मया शिक्षितव्यमिति निश्चित्य तदर्थपरिकल्पिते वर्गे लब्धप्रवेश एकमण्डलकालप्रदेयं सुवर्णमुद्रात्रयं तत्र दत्तवान्। सप्ताहत्रयमध्ये मया षट्कृत्वः

कलाशिक्षणाय गतेन भाव्यम्। तालमनुसृत्य चरणविन्यासे नाहं पटुरासम्। स्वरमञ्जूषा वाद्यते स्म। किन्तु मया न तत् सङ्गीतमबोधि। किं कुर्वीय। मूषकबाधापरिजिहीर्षया मार्जारस्य रक्षणमङ्गीकृतवतः सन्यासिनः कथां मदीयवृत्तमन्वहरत्। मार्जारस्य क्षीरसम्पादनाय गौरेका तद्गोरक्षणाय भृत्य एक इत्येवं क्रमेण यथा तस्य परिवारोऽवरीवृध्यत तथा मदीयमहाकाङ्क्षापरिवारश्च वृद्धिमगात्। पाश्चात्यसङ्गीते मम श्रोत्रेन्द्रियस्य संस्तवापादनाय तन्त्रीवादनमभ्यसितुकामोऽहं न केवलं सुवर्णमुद्रात्रयेण तन्त्रीवाद्यविशेषमेकमक्रैषमपि तु तत्कलाशिक्षणाय भूरिद्रव्यं व्ययीकृतवान्। वाक्पाटवशिक्षणाय तृतीयमेकं शिक्षकमन्विष्य तस्मायेकगिनीमुद्रां (१६ रूप्यकाः) सत्यङ्कारमदाम्। स च यथा प्रतिश्रुतं 'बेल्स स्टँडर्ड एलोक्युशनिस्ट' इत्येतदाख्यपुस्तकं क्रीत्वा पिटमहाशयस्य भाषणमेकं मामभ्यासयितुं प्रवृत्तः॥

किन्तु बेल (घण्टा) महाभागो मम कर्णाभ्यर्णे घण्टामवादयत्। अहं च प्रबुद्धः॥

अथैवंविधा जिज्ञासा मदीयमानसमग्रहीत्। यथा—

इङ्ग्लेण्डदेशे मया कियान्कालो यापयितव्यः। आङ्ग्लभाषायां सम्यग्भाषणचातुरीमधिगम्य मया किन्तु खलु साधनीयम्। नाट्यकलाशिक्षया किमहं महापुरुषः स्याम्। तन्त्रीवाद्यमिदं ननु स्वदेश एव शिक्षितुं शक्यं भवति। अयमस्मि विद्यार्थी। मद्विद्यासम्बद्धपाठानधीत्य न्यायवादिशालाप्रवेशाय योग्यता किल सम्पादनीया। यदि मदीयसद्व्यवहारेण नागरिकत्वख्यातिमहं लभेय तत्खलु प्रशस्तमेव। नोचेदलमनया काङ्क्षया। इति॥

वाक्पटुत्वाभ्यासकस्य मदीयशिक्षकस्य सर्वमेतन्निरूप्य पुनरितः परं मदनागमनं क्षन्तव्यमिति पत्रमलेखिषम्। नाट्योपाध्यायस्याप्येवमेव लेखो व्यलेखि। तन्त्रीवाद्यं च तदुपाध्यायागृहं नीत्वा यथा लभ्यक्रयेण तद्विक्रीयतामित्यवोचम्। यदेषा मयि मित्रभावेन वर्तते स्म तदहमसदधेयप्रसङ्गित्वज्ञानं यथा मे समुदितमिति तस्यै न्यवेदयम्। सा च सम्पूर्णपरिवर्तनं सिसाधयिषोर्मम मनो निश्चयमभ्यनन्दत्॥

प्रायेण मासत्रयपर्यन्तं नागरिकत्वसाधनोन्मादो मामग्रहीदिति मन्ये। उज्ज्वलवेषकुतुकित्वं तु बहूनि वर्षाण्यस्थात्। परन्तु तदाप्रभृत्यहं विद्यार्थी जातः॥

षोडशोऽध्यायः

परिवर्तनम्

मम नाट्यादिशिक्षणप्रसङ्गात् स्वच्छन्दवर्ती स्थितोऽहमिति केनापि मा स्म विंचिन्ति। तदानीमपि मदीयविवेकशालित्वं पाठकानां दृष्टिगोचरं गतमेव खलु। तत्तादृश्यव्यामोहकालेऽपि नाहं सुतरां विवेचनशून्योऽभवम्। प्रतिकाकिणि मया गणना स्थाप्यते स्म। व्ययस्य

Funding by IKS-MoE

तावदियत्ता सर्वदा पूर्वमेव निश्चिताभूत । महात्वरयानगमनव्ययः पत्रादिप्रेषणव्ययो वृत्तपत्रक्रयणव्यय इत्येतत्सर्वमपि लिखित्वा शयनात्पूर्वमायव्ययस्थितिं न्यरूपयम्। अभ्यासोऽयमद्यावधि प्रचलति । अत एव मयाङ्गीकृतेषु बहुषु सार्वजनिककार्येषु लक्षान्तररूप्यकायव्ययनिर्वाहसम्भवेऽपि न केवलमहं सर्वत्रापि मितव्ययमकार्षं न केवलमेकापि काकिणी क्वचिदपि मया न ऋणी कृतापि तु पणः कियानप्यायस्थाने यथावशिष्टः स्यात्तथा हि मया व्यधायि। अशेषैरपि युवकैरिदमेवादर्शीकृत्य हस्तमागतस्य हस्तादपेतस्य च द्रव्यस्य प्रतिकाकिणिं गणना यदि स्थाप्यते तदा ममेव तेषामप्यवश्यं लाभो भविता ।।

इत्थं यदहमात्मनो जीवनरीतिं प्रति सूक्ष्मदर्शी स्थितस्तन्मयावबुद्धं मितव्ययकरणमावश्यकमिति । ततो मदीयव्ययस्यार्धशो ह्रासः कर्तव्य इति निरचेषि । व्ययपट्टिकानिरूपणेन परिभ्रमणभाटकं बहुद्रव्यं ग्रसते स्मेत्यबोधिषम्। अपि च कुटुम्बेन सह निवासात् प्रतिसप्ताहं पणो विसर्जयितव्योऽभवत् । कुटुम्बीयजनस्य तत्तदवसरेषु भोजनाय बहिर्नयनं सम्प्रदायत्वेन पर्यगण्यत। तेन सहान्यत्र भोजनाय वाभ्यवहाराय वा गन्तव्यमापतति स्म। एतेष्ववसरेषु भाटिकामुद्दिश्य भूयान्व्ययः करणीय आसीत् यदा पुनः स्त्रीजनः सहानीयत तदा तद्व्ययः सर्वोऽपि पुरुषैरेव सोढव्य इत्यासीदाचारः । भोजने बहिरन्यत्र निर्वर्तितेऽपि गृहभोजनव्ययस्तु नैवाह्रसीत्। एतद्व्ययजातं च तद्देशसम्प्रदायमनुरुध्य निर्विवेकेन क्रियमाणमन्यव्ययं च परिहर्तुं शक्यत इत्यहमचिन्तयम् ।।

कुटुम्बवासं परित्यज्य पृथक्कोष्ठ एको मयान्विष्य ग्रहीतव्य इति निरचेषि । अपि च प्रसक्तकार्यानुगुण्येन कोष्ठमन्यमन्यं ग्रहीष्यता मयानुभवः सम्पादनीय इत्यचिन्तयम्। यथा मदीयकार्यस्थानं पादचारिणा होरार्धकालेन प्राप्यमभूत् तथा सन्निकृष्टवर्तिन एव कोष्ठानन्विष्य स्वीकुर्वता यानभाटिकाव्ययो रक्षितः। इतः पूर्वं न केवलं यानभाटिकार्थं पणो व्ययीकर्तव्य आसीदपि तु विहरणार्थमन्यः समयः परिकल्पनीयोऽभवत्। इदानीं तु स्वकार्यमुद्दिश्य परिक्राम्यता प्रतिदिनमष्ट दशपाषाणदूरमवश्यं सञ्चरणीयमापतितम्। यथा मया विदेशस्थितिमता प्रायः सर्वोऽपि व्याधिः पर्यहारि यथाहं सुदृढकायश्च सम्पन्नस्तथा तत्र कारणं विशेषादीदृग्विहार एव ।।

एवं कुटुम्बवासं परित्यज्य कोष्ठद्वयमहं भाट्या पर्यग्रहीषि। तत्रैकः शयनाय द्वितीय उपवेशनाय । एषा स्थितिर्मदात्मपरिवर्तनस्य द्वितीयं सोपानमिति वक्तव्यम्। सद्यस्तृतीयसोपानं चाहमारुरुक्षुरासम् ।।

एभिः परिवर्तनैर्मम व्ययो ह्यर्धमह्रसत्। किन्तु कालः कथं नियन्तव्यः । ब्यारिस्टर्परीक्षार्थमध्येतव्यं बहु नास्तीति मे विदितम्। तस्मादपर्याप्तः काल इति भावना निरवकाशाभूत्। आङ्ग्लभाषायां मदीयमपटुत्वं सर्वदा मां व्याकुलीकरोति स्म। ‘बि. ए. परीक्षायां तावदुत्तीर्णो भव पश्चान्मत्पार्श्वमेहि’ इति लेली (पश्चादयं ‘सर फ्रेडरिक लेली’ जातः) महाशयोक्तानि वचनान्यद्यापि

मम श्रोत्रमविध्यन्निव । ब्यारिस्टर्पदेन सह साहित्यपदव्यप्येका सम्पादनीयेत्यहमचिन्तयम् । ऑक्सफर्ड–केम्ब्रिजविश्वविद्यानिलययोर्याद्दश्योऽभ्यासक्रमस्तत्र प्रविष्टस्य यावान्व्ययश्चेत्यादिविषयजिज्ञासया कांश्चित्सुहृदोऽहमप्राक्षम्। तत्र हि व्ययो भूयानवस्थितिकालश्च दीर्घ इत्यवेदिषम्। किन्तु नाहमेतावतः सज्जस्थितः। अथैकः सुहृन्मां प्राह– यदि नूनं कठिनपरीक्षोत्तरणतृप्तिकामो भवांस्तर्हि लण्डनमेट्रिक्युलेषन्परीक्षायामुत्तीर्णो भवितुं यत्नं करोतु। तदर्थं भवता भूयः श्रद्धया पठितव्यम् । भवतः सामान्यज्ञानं च वृद्धिमेष्यति । अधिकव्ययोऽपि न सम्पद्यत इति । इयं सूचना ममाभिमताभवत् । किन्तु परीक्षाविषयान्निरूप्य चकितोऽभवम् । ऌॅटिनभाषाधुनिकभाषा चैका एते अवश्यं शिक्षणीये। लॅटिनभाषा तावत्कथं शिक्षणीया । कश्चित्सुहृन्मामेवमाह–लॅटिनभाषा नाम न्यायवादिनां बहूपयुक्ता। तद्भाषावेदिनां धर्मशास्त्रग्रन्थाववबोधः सुलभः। अपि च रोमनधर्मशास्त्रमधिकृत्य प्रश्नपत्रिकैका लॅटिनभाषामयी वर्तते । किं च लॅटिनभाषाज्ञानमाङ्गलभाषायाः सम्यक्प्रयोगाय बहूपकरोति। इति ।। एतानि वचनानि मम मनसि लग्नान्यभूवन्। अतीव क्लिष्टतरापि लॅटिनभाषा सर्वथा मया शिक्षणीयेत्यहं निरचेषि । फ्रेञ्चभाषाशिक्षणस्य पूर्वमेवारब्धत्वात्सैवाधुनिकभाषात्वेन स्वीकर्तव्येत्यवधार्य मेट्रिक्युलेषनपरीक्षार्थमध्यापनाय परिकल्पिते वर्गे प्रवेशमलप्सि। एषा हि षाण्मासिकी परीक्षा। पञ्चमासमात्रं त्ववशिष्टमभूत्। कार्यमिदं मदीयशक्तिमतिक्रान्तमिति वक्तव्यम् । तथाप्यहमाङ्ग्लनागरिकी बुभूषया प्रबलया प्रेरितस्सनतीव श्रद्धालुर्विद्यार्थी सम्पन्नः। प्रतिनिमिषगणना पुरस्सरं कालनियामकपट्टिकामलेखिषम्। किन्तु मदीयबुद्धिशक्तिर्वा ज्ञापकशक्तिर्वा तथा प्रौढा नाभूद्यथेयमवशिष्टकाले फ्रेञ्चलॅटिनभाषे इतरविषयांश्च ग्रहीतुं प्रभवेत्। अथ परीक्षार्थमुपाविशम्। लॅटिनभाषायामनुत्तीर्णोऽभवम् । अनेन विषण्णोऽपि नाहमधैर्यं गतः। लॅटिनभाषायामभिरुचिर्ममोदपद्यत । भूयोऽपि परीक्षामासाद्य फ्रेञ्चभाषायामधिकव्युत्पत्तिं सम्पादयेयमित्यचिन्तयम्। अपि च परीक्षार्थं विज्ञानवर्गान्नवीनविषयो ग्रहीतव्य इति निश्चयमकार्षम्। मया गृहीतपूर्वस्य रसायनशास्त्रस्य हृदयङ्गमविषयत्वेऽपि प्रयोगाणामभावान्मम तत्राभिरुचिर्न जाता। भारतदेशे मम विद्यार्थिदशायां सैष सर्वैरवश्यमध्येतव्यो विषय आसीत् । तमेनमहं लण्डनमेटिक्युलेषनपरीक्षार्थमैच्छिकविषयत्वेन पर्यग्रहीषि । परमिदानीं तु भौतिकशास्त्रान्तर्गतं ‘ औष्ण्यं-उष्णपरिमितिः ’ इत्येतं विषयमग्रहीषम्। सरलोऽयं विषय इति प्रतीतिरासीत्। पश्चान्मयापि तथैवागृह्यत। भूयोऽपि परीक्षार्थं सज्जीभवितुमुद्यतस्तत्कालमेवात्मजीवनस्य रीतिमपि पूर्वतोऽपि भूयः सरलां विधातुं प्रयत्नमकरवम्। अस्मत्कुटुम्बस्य दीनावस्थानुरूपं मया न जीव्यते स्मेत्यहमचिन्तयम्। उदारबुद्धिर्मे ज्येष्ठ भ्राता प्रार्थित मात्र एव यत् कथं कथमपि द्रव्यं मम प्रेषयति स्म तदेतन्मदीयहृदयमकृन्तत्। प्रतिमासमष्टावारभ्य पञ्चदशसुवर्णमुद्रापर्यन्तं व्ययीकुर्वद्भिर्विद्यार्थिभिर्वेतनं लभ्यते स्मेति मया प्रत्यक्षीकृतम्। मदपेक्षया भूयः सरलरीत्या जीविकां निर्वहन्तो जना मया समदृश्यन्त । कश्चन विद्यार्थी दीनजनाध्युषितप्रदेशे कोष्ठमेकं शिलिङ्गनाण्यद्वयमितसाप्ताहिकभाट्या परिगृह्य ‘ लोकार्ट ’ इत्येतदाख्यस्य स्तोकव्यय-

लभ्ये भोजनगृहे पेनिनाण्यद्वयेन पिष्टापूपं कोकोपेयं च क्रीत्वा प्रात्याहिकं भोजनं निरवर्तयत्। मयाप्येवं वर्तितव्यमिति न ख़लु मया व्यचिन्ति। किन्तु विहाय कोष्ठाद्वयमेक एव कोष्ठः पर्याप्तः। स्वभोज्यस्य पाकः स्वेनैव कर्तुं शक्यश्चेत्यहममंसि। एवं विधानेन प्रतिमासं चतुःपञ्चसुवर्णमुद्रा मया रक्षिताः। सरलजीवनप्रतिपादकानि कतिपयपुस्तकान्यपि मयालभ्यन्त। कोष्ठद्वयं परित्यज्याष्टशिलिङ्गनाण्यमितसाप्ताहिकभाट्या कोष्ठमेकं स्वीकृत्याङ्गारधानीमेकां क्रीत्वा प्रातस्तनपाकं स्वयं कर्तुमुपाक्रमे। एतत्कार्यानुष्ठानाय प्रायो विंशतिनिमिषाधिकः कालो नापेक्ष्यत। यवगोधूमपिष्टयवागूपाचनाय कोकोपेयनिष्पादनार्थे जलक्वथनाय च कियानितोऽप्यधिकः कालोऽपेक्ष्येत। मध्याह्नेऽतिथिगृहेऽभुञ्जि। सायं कोष्ठ एव पिष्टकं जग्ध्वा कोकोपेयमपिबम्। एवं सपादैकशिलिङ्गमितद्रव्येण दिनस्य भोजनव्ययः समाप्तिमगात्। एतत्कालमेव मे बह्वध्येतव्यं स्थितम्। सरलजीवनेनावकाशः प्रकामं मयालभ्यत। द्वितीयवारं परीक्षायामहमुत्तीर्णोऽभवम्॥

एतादृशीं सरलतामङ्गीकृतवतो मम जीवनं शुष्कं समपद्यतेति पाठका न भावयन्तु। अनेन परिवर्तनेन मदान्तरिकजीवनशक्तिर्बाह्यजीवनशक्तिश्चैकतामापद्येताम्। अपि चेद्दृग्वर्तनमस्मत्कौटुम्बपरिस्थितेः सदृशमासीत। मम जीवनं भूयः सत्यमयमजनि। एतेन मदात्मा निस्सीममानन्दमन्वभूत्॥

सप्तदशोऽध्यायः

आहारविषयकशोधनानि

यथा यथाहमात्मपरामर्शमकरवं तथा तथा मदीयबाह्यान्तरिकरीतिषु परिवर्तनमावश्यकमित्यबोधि।

यथा यथा मदीयजीवनरीतिरायव्ययौ च परिवृत्तिमागतास्तथा तथा मदाहारक्रमश्च तैः सममेव ततः शीघ्रतरमेव वा पर्यवर्तत। दृष्टं च मया यच्छाकाहारविषयप्रतिपादकेष्वाङ्ग्लपुस्तकेषु विषयोऽयमतिसूक्ष्मतया धार्मिकवैज्ञानिकव्यावहारिकवैद्यशास्त्रीयदृष्ट्या परिशीलित इति। नैतिकदृष्ट्या विचार्यमाणे ह्येतत्खलु मतं ततः पर्यवस्यति यन्मनुष्याधिपत्यस्य पशुपक्षिणां वशवर्तित्वं तत्तेषां हननेन मनुष्यस्याहारसम्पादनोद्देश्यकं न भवति। किन्तु यथा मनुष्येषु परस्परं सहायीभूय शक्तैरशक्ताः संरक्ष्यन्ते तथैव पशुपक्षिषु मनुष्यैरपि वर्तितव्यम्। मनुष्यैराहारसेवनं न केवलं भोगार्थमेव परन्तु जीवनयात्रानिर्वहणाय। इति॥ एतदभिप्रायानुरोधेन तेषां केचिन्न केवलं मांसमपित्वण्डं क्षीरं च त्याज्य तयोपन्यस्यन्तः स्वयं तथैवावर्तिषत। अपरे च मानुषशरीररचनां विज्ञानदृष्ट्या परीक्ष्यैवमाहुर्यथा—मनुष्येण स्वाहारः पचनपूर्वकं निष्पाद्य भोक्तव्य इति नास्ति नियमः।

तस्य शरीरं हि पक्वफलसेवनयोग्यं निर्मितम्। स्तनन्धयत्वदशायामसौ मातुः स्तन्यं पिबेत्। जातदन्तस्तु चर्वणीयमाहारं स्वीकर्तुमारभेत्। इति॥ वैद्यशास्त्रीयदृष्ट्या सोपस्करपदार्था न सेवनीया इत्यमीभिः सूचितम्। आर्थिकदृष्ट्या व्यावहारिकदृष्ट्या चेतरापेक्षया शाकाहारस्यैव व्ययोऽल्पीयानित्यमन्यन्त । सर्वेऽप्येते विषया मम हृदयेऽलगन् । त एते नानाविधाः शाकाहारिणोऽपि भोजनगृहेऽमिलन्त। विदेशे तत्रैतत्सम्बन्धिन्येका सभ्यमण्डल्यासीत्। तयैका स्वकीया साप्ताहिकपत्रिका प्रचार्यते स्म। अहं तत्पत्रिकाग्राहको भूत्वा तन्मण्डल्यां सदस्योभवम्। कियद्भिरेव दिवसैस्तत्कार्यनिर्वाहकसमितिं च प्रविष्टः। तत्र हि शाकाहारप्रतिष्ठास्तम्भरूपैः पुरुषैः सह परिचयो मे जातः। ततोऽहमाहारविषयकाणि शोधनानि स्वतः कर्तुं प्रावर्तिषि॥

गृहादानायितानां पिष्टापूपसोपस्करवस्तूनां भक्षणमत्याक्षम्। तद्विषयो मम मनःप्रवृत्तेरन्यथा परीणतत्वात् तत्सम्बधिभ्रमोऽपि मन्दतरः संवृत्तः। अत एव रिचमण्डनगरे निस्सारमिव परिदृश्यमानमप्युपस्करशून्यमपि शाकमिदानीं रुच्यमदृश्यत। एतादृशैरनेकप्रकारैरनुभवैर्रुचेर्निजस्थानं मनो न पुनर्जिहेति शिक्षितोऽभवम्॥

आर्थिकदृष्टिस्तु मदीया निरन्तरमजागरीत्। आसीत्तदानीमेको वर्गो यस्य पेयवस्तुषु कॉफीचहाप्रभृतयो हानिकराः कोकोपेयन्तु प्रशस्तमित्यासीदभिप्रायः। शारीरव्यापारार्थमेवाहारः सेवितव्यं इति मया निस्सन्दिग्धमवगतत्वात् कॉफीचहापेये परित्यज्य कोकोपेयमुपयोक्तुमहं प्रवृत्तः॥

मयोपजुष्यमाणभोजनगृहेषु विभागद्वयमासीत्। एकत्र यद्वस्तु प्रेप्सितं तद्विचित्य पृथग्ग्राह्यमभूत्। एतदर्थमेकशिलिङ्गव्ययमारभ्य द्विशिलिङ्गपर्यन्तं व्ययः समपद्यत। एवं विभागमुत्तमस्थितिभाग्जन उपतिष्ठति स्म। अपरस्मिन्विभागे पदार्थत्रयं पिष्टापूपमेकं च पेनिषट्केन व्यक्रीयत। यदाहमतीव मितव्ययमकरवं तदायमेव विभागो मयोपास्थीयत॥

उपरि निर्दिष्टं मुख्यशोधनं कुर्वता मयेतराण्यल्याल्पशोधनान्यङ्गीकृतानि। तद्यथा —— सकृदिष्टपदार्थपरित्यागः। सकृत्पिष्टकफलमात्रसेवनम्। सकृन्नवनीतदुग्धाण्डमात्रेण जीवनमित्यादि। एतेषामन्तिमं यच्छोधनं तदुल्लेखयोग्यं भवति। तदेतत्पञ्चदशदिनान्यपि न हि प्राचलत्। पिष्टशून्यपदार्थाशनवादी सुधारको न केवलमण्डमनुत्तमः पदार्थ इति ख्यापयति स्म किन्त्वत्र मांसाभावमप्यसाधयत्। एषा किल स्वतः सिद्धोक्तिरभूद्यदण्डसेवनं नाम जीवत्प्राणिहिंसामूलं न भवतीति। एतादृशसमर्थनाद्व्यामोहमापन्नोऽहं प्रतिज्ञातविरुद्धमेवाण्डमभक्षयम्। किन्त्वेतद्विस्मृतिपारवश्यं क्षणमात्रस्थाय्यभूत्। प्रतिज्ञाक्षराणामभिनवार्थकल्पने मम नासीन्मनागप्यधिकारः। प्रतिज्ञाकरणावसरे यदेव मे मातुर्बुद्धिस्थितं तदहमज्ञासिषम्। मांसमित्यनया प्रतीतो यः पदार्थस्तस्मिन्नण्डमप्यन्तर्भूतमिति मे विदितम्। प्रतिज्ञायाः पारमार्थिकं रहस्यं प्रतिपन्नोऽहमण्डभक्षणमेतच्छोधनं च सद्यः पर्यत्यजम्॥

Funding by IKS-MoE

प्रस्तुतचर्चान्तःपाती विषय एकः सूक्ष्मो विचार्यश्च विद्यते। विदेशे मांसशब्दस्यार्थत्रयं पर्यकल्प्यत। तत्रैको यथा — मांसं नाम पशुपक्षिमांसमात्रमिति। एवं व्याख्यातारस्त्यक्तैतन्मांसा अपि मत्स्यानभक्षयन्। किमुताण्डानि। द्वितीयार्थो यथा — मांसं नाम सजीवप्राणिसामान्यस्य पिशितमिति। अनया दृष्ट्या मत्स्यस्त्याज्यः। अण्डं तु ग्राह्यम्। तृतीयार्थो यथा मांसं नाम न केवलं समस्तप्राणिगतं पिशितमपि तु प्राण्युत्पन्नाः सर्वेऽपि पदार्था इति। अत एवाण्डदुग्धादयस्त्याज्या बभूवुः। पूर्वमर्थमङ्गीकृत्य न केवलमण्डं परन्तु मत्स्योऽपि मम भक्षणीय आसीत्। किन्तु मातुर्मनोगत एवार्थो ग्राह्य इत्यकारि मया निश्चयः। अतः प्रतिज्ञां परिपालयितुकामस्य नाण्डं परिग्राह्यमभूत्। तस्मादहं तत्सेवनमत्यजम्। एतेन मम कष्टमापतितम्। यतोऽहमामूलात्कृतविचारः शाकाहारस्य भोजनगृहेष्वखिलेष्वपि बहवः पदार्था अण्डसम्पृक्ता एवेत्यबोधिषम्। तस्मादसम्यग्ज्ञातपदार्थस्वरूपस्य मम तत्तत्पदार्थानामण्डसम्पर्कजिज्ञासा सर्वदा प्रासज्यत। यतो विविधमोदकध्वांसीप्रभृति भोज्यवस्तून्यण्डसंमिश्रितान्येवासन्। एकतोऽनेन मम क्लेशविशेषसम्भवेऽपि मदीयाहारः सुलभतरोऽभवत्। अन्यतोऽनेन कतिपयरुच्यपदार्थानां परित्यागसम्भवापत्त्या मयि किञ्चिदाकुलीभूतेऽपि क्षणात्तिरोहिततद्भावा निश्चितनिर्व्यूढप्रतिज्ञतामूला काचिदान्तरिकीरुचिरारोग्यकरी सूक्ष्मा चिरस्थायिनी च समुदपद्यत॥

किन्तु पारमार्थिकी परीक्षाद्यापि भाविनी स्थिता। सा च मम द्वितीयव्रतसम्बन्धिनी। परन्तु श्रीरामशरणानामनिष्टमाचरितुं को वा समर्थः॥

प्रतिज्ञानामर्थव्यवस्थामधिकृत्य कतिपयोक्तीनामिहोपन्यासो नासंगत इति मन्ये। प्रतिज्ञाः खलु प्रपञ्चस्य सर्वभागेष्वपि भूयसां कलहानां बीजभूता भवन्ति। ता एता अतिविस्पष्टभाषया लिखिता भवन्तु तथापि लोकास्ताः स्वस्वानुकूले पथ्येव प्रवर्तयन्ते। ईदृशा जना आधनिकादादरिद्रमाक्षितिपादा भुजिष्यं सर्वतः समाजे दरीदृश्यन्ते। स्वार्थता हि सर्वानप्यन्धयति। उभयार्थान्वयिनीं मध्यसरणिमन्वीष्य व्याख्यां प्रवर्तयन्तः स्वं स्वेनैव वञ्चयित्वा लोकस्य देवस्यापि मोहभस्म प्रचिक्षिप्सन्ति। यस्याग्रेऽस्माभिः प्रतिज्ञातं तेन निर्वञ्चनया कृतस्यार्थस्यास्माभिरभ्युपगमो नामैक उत्तमो मार्गः। उभयार्थसम्भवस्थले दुर्बलपक्षीयव्याख्यानुसरणं नाम द्वितीय उत्तमो मार्गः। एतन्मार्गव्यतिक्रमो हि कलेरधर्मस्य च हेतुः। तस्य व्यतिक्रमस्याप्यसत्यमेव मूलम्। सत्योपासकस्यैकस्यैव सुगमोऽयं पन्थाः। तादृशः पुरुषस्य न खलु विदुषामाशयः प्रष्टव्यो भवति। यद्ययं मार्गो मयाप्यत्रलम्ब्यते तदा मांसाहारविषये मम मातुर्मनोगतमेवार्थं पुरस्कृत्य मया हि प्रवर्तितव्यम्। न पुनः स्वानुभवाद्वा स्वविद्याभिमानाद्वा स्वयं कल्पितमर्थमनुरुध्य॥

अस्मिन्विदेशे मम शोधनान्यारोग्यदृष्ट्यार्थिकदृष्ट्या च व्यधीयन्त। दक्षिणाफ्रिकादेशं प्रति गमनपर्यन्तं तानि धार्मिकरूपतां नाभजन्त। तत्राहमनया दृष्ट्या कठिनानि शोधनान्यकलयम्। एतान्यग्रे वर्णयिष्यन्ते। किन्त्वाङ्ग्लविदेश एवैतेषां बीजमवापीति वक्तव्यम्॥

नवीनधर्मस्वीकर्ता तद्धर्म एव गृहीतजन्मनः पुरुषस्यापेक्षया समधिकोत्साहशाली भवति। शाकाहारो विदेशे नवीनधर्म आसीत्। मद्विषयोऽपि तादृशः। यदहं मांसाहार एव श्रेयानिति बुद्धिपूर्वकं गृहीत्वा विदेशमगमम्। शाकाहार एव नीतिसंमत इति ज्ञानपूर्वकं पश्चादग्रहीषम्। अतोऽहं नवीनधर्ममेव प्रविष्टो वक्तव्यः। तदनुरूपमेव परमोत्साहसम्पन्नतया बेझवॉटरइत्येतदाख्ये स्ववसतिप्रदेशमण्डले शाकाहारिमण्डल्येका स्थापनीयेति निश्चित्य तत्रैव कृतनिवासं सरएडवीनआर्नल्डमहाशयमुपाध्यक्षताङ्गीकाराय प्रार्थितवान्। सोऽप्यन्वमन्यत। शाकाहार्याख्यवृत्तपत्रस्य सम्पादको डाक्टरओल्डफील्डमहाशयश्चाध्यक्षोऽभवत्। अहमेव कार्यदर्श्यभूवम्। सा मण्डली कियन्तं कालं सम्यक्प्रचलिता पश्चाद्ध्वंसीत्। यदहं निजपद्धतिमनुसृत्य तद्वसतिमण्डलं विहायान्यत्र गतोऽभवम्। किन्त्वनेनाल्पेनाचिरानुभवेनापि संस्थाप्रतिष्ठापनतच्चालनादिकर्मणि शिक्षणमलाभि ॥

अष्टादशोऽध्यायः

लज्जाशीलता–मदाश्रयः

अहं शाकाहारमण्डल्याः कार्यनिर्वाहकसमितौ सदस्यत्वाय वृतोऽभवम्। सर्वास्वपि सभासु संनिहितोऽपि सर्वदा तत्र बद्धमुख इवातिष्ठम्। एकदा डाक्टरओल्डफील्डमहाशयो मामब्रवीत्—मया सह भवांत्सम्यगेव भाषते। परन्तु सभायां किमिति मुखं पिनद्धं भवति। वृत्ततो भवान्पुरुषभ्रमरमनुहरतीति ॥ अहमेतत्परिहासरहस्यमग्रहीषम्। भ्रमर्यो हि सर्वदा कर्मणि व्यापृता भवन्ति। भमरास्तु खादनपाने विना नान्यत्कर्म कुर्वन्ति। समित्यामितरेषु स्वस्वमतान्यभिव्यञ्जयत्सु मया तावन्मुखं पिनह्योपविष्टमित्येतद्विचित्रमेव। न खल्वहं वक्तुकामो नाभूवम्। परन्तु भाषणभङ्गिर्मया न ज्ञाता। शेषाः सर्वेऽपि मदपेक्षयाभिज्ञतराः समलक्ष्यन्त। किं च कदाचिद्वक्तुकामेन मया न यावन्मनः स्थिरीकृतं तावदन्यविषयस्य चर्चा प्रारभ्यते स्म। इत्थं बहूनि दिनानि व्यतीयुः ॥

अत्रान्तरे महान्प्रश्न एको विचारपदवीमवतीर्णः। तदाहमचिन्तयम् – दिनेऽस्मिन्विमुखीभूय तूष्णीमवस्थानं न हि युज्यते। स्वाभिप्रायाणामप्रकाशनं मम भीरुकत्वं द्योतयतीति। विषयोऽयं चर्चास्पदमागतो यथा—'टेम्स आयर्न वर्क्स'—इत्येतदाख्यलोहशिल्पालयस्य स्वामी हिल्समहाशय अस्माकमण्डल्यध्यक्ष आसीत्। स च प्यूरिटनवर्गप्रविष्टो जनः। अस्य द्रव्यसाहाय्येनैव मण्डली जीवति स्मेति वक्तुं शक्यते। सामितेया बहवः सदस्याः प्रायेण तदाश्रयिणोऽभूवन्। शाकाहारसम्बद्धख्यातिमान् डा० ऍलिन्सनमहाशयोऽपि समित्यामेकः सदस्यः। कृत्रिमोपायैः

Funding by IKS-MoE

प्रजोत्पत्तिनिरोधाय प्रयत्नपरम्परा तत्कालं प्रचलति स्म । डा. ऍलिन्सनमहाशयस्तत्पक्षमालम्ब्य तद्विधानं कर्मकरानबोधयत् । अमी कृत्रिमोपाया लोकनीतिविध्वंसका इति हिल्समहाशयस्य मतमासीत् । अत एव न केवलमाहारविषयकं सुधारणमेव शाकाहारमण्डल्युद्देश्यमपि तु नीतिसम्बद्धविचाराणां समीकरणमप्येकमित्ययमभिप्रेत्य डॉ. ऍलिन्सन सदृशानां नीतिमार्गविरुद्धाभिप्रायजुषां सदस्यत्वं नाङ्गीकर्तव्यमिति प्रत्यवातिष्ठत। डॉ. ऍलिन्सनमहाशयो मण्डल्या बहिष्कार्य इत्येका सूचना समुपस्थापिताभूत् । विवादेऽस्मिन्मम महत्कुतूहलमासीत् । डॉ. ऍलिन्सनमहाशयस्याभिप्राया हानिकराः समलक्ष्यन्त । किं च नैतिकदृष्ट्या हिल्समहाशयेन कृतं प्रत्यवस्थानं न्याय्यमित्यहमचिन्तयम् । अपि च हिल्समहाशये तदौदार्ये च मम भूयानादरोऽभवत्। तथापि केवलं प्यूरिटनवर्गीयाणां या नीतिस्तस्य प्रसारोऽपि मण्डल्युद्देश्येष्वेकतम इत्यनङ्गीकुर्वाणस्य शाकाहाराभिवृद्धये प्रतिष्ठापितमण्डल्या बहिष्कारविधानमन्याय्यमित्यहमचिन्तयम् । हिल्समहाशयस्याभिप्रायाः स्वमात्रसम्बद्धाः । मण्डल्युद्देश्यन्तु केवलं शाकाहारप्रचारो न पुनर्नीतिप्रचाराः । अत एव हिल्समहाशयस्याभिप्रायाणां मण्डल्या सह न कोऽपि सम्बन्धो मयादृश्यत। नीतिं तावदधिकृत्य यद्वा कश्चिदभिप्रैतु । स यदि शाकाहारी तर्ह्ययं सङ्घस्य सदस्यो भवितुमर्हत्येवेति मदभिप्राय आसीत्॥

मत्समानमतावलम्बिनः परे केचन समित्यामभवन्। किन्तु मन्मनोगतमवश्यं मयैवाख्यातव्यमित्यहमचिन्तयम्। कथमेतत्प्रकाशनीयमित्येतन्महान् प्रश्नोऽभवत् । भाषणाय मे न धैर्यमासीत्। तस्माद्यावन्मे मनसि स्थितं तावल्लिखित्वा स्थापनीयमित्यहं निरचैषि । तल्लेखनं कञ्चुककोशे निक्षिप्य सभामगच्छम् । किन्तु तद्वाचयितुमप्यधीरोऽभवम् । अध्यक्षस्तदन्यमुखेनावीवचत् । डॉ. ऍलिन्सनमहाशयस्य पक्षो जयं न प्राप। इत्थं मम प्रथमयुद्ध एव पराजितपक्षमहं प्रविष्टः । किन्तु मदीयपक्ष एव सत्यानुबन्धी पक्ष इति मे श्रद्धावर्तत । एतेन परं सन्तुष्टोऽभवम् । पश्चादहं समितिं त्यक्तवानिति क्वचिदुक्तिरस्ति ॥

इयं मे लज्जाशीलता विदेशवासावसानं यावदवस्थिताभूत्। स्वैरं कस्यचिद्दिदृक्षया क्वचिद्गतस्यापि चतुःषट्जनसंनिधौ मम मुखाद्वचनं नैव निस्सरति स्म ॥

एकदा मजमुदारमहाशयद्वितीयोऽहं वेण्टनरइत्येतदाख्यस्थलमगच्छम् । तत्र कस्यचिच्छाकाहारिणो गृहेऽवातराव । तस्मिन्नेव जलपानचिकित्साप्रथिते ग्रामे 'ऍथिक्स ऑफ डायट' नामाहारनीत्याख्यग्रन्थप्रणेता न्यवसत्। आवां गत्वा तमपश्याव। शाकाहारप्रचारायैका तस्मिन् ग्रामे सभा मेलयितव्याभवत्। आवाभ्यामुपन्यासस्तत्र कर्तव्य इति सोऽभ्यलष्यत् । इदमावाभ्यामङ्गीकृतम् । लिखितानीतव्याख्यानस्य सभायामुपन्यासो न दोषायेत्येतत्पूर्वमेव मया विचार्यावगतमासीत् । अज्ञासिषं च यद्बहवः सपरिष्कारं संक्षिप्य लिखितानि स्वभाषणान्येवं वाचयन्ति स्मेति । अकृतसन्नाहेन मया सभायामुत्थाय सहसाभाषणं नाम केवलमसम्भाव्यमिति मे विदितम् । अतोऽहं स्वभाषणं लिखित्वा सहैव नीतवान्। तद्वाचयितुमुत्थितस्य मुखाद्वाणी नैव निरसरत्। नयनमन्धीभूतमिव ।

Funding by IKS-MoE

हस्तपादं कम्पितुमारभत । लिखितानीतं मदीयभाषणं फूलस्कॅपपत्रस्यैकपुटपरिमितमपि नासीत् । मजमुदारमहाशयेनेदं मदर्थे पठितव्यमापतितम् । तस्य स्वकीयभाषणं तु मनोहरमासीत् । श्रोतारः सहस्ततालं निजानन्दमप्रकटयन् । अहं सुतरां लज्जितोऽभवम् । हन्त भाषणयोग्यताहीनोऽहमिति भृशमदूये ॥

विदेशान्निर्गमनकाले कृतं यद्भाषणं स एव चतुःषट्जनसमक्षं भाषितुं मया कृतोऽन्तिमः प्रयत्नः । सोऽपि हास्यास्पदमेव पर्यणंसीत् ॥

विदेशपरित्यागात्पूर्वं मया शाकाहारिणो मत्सुहृदः पूर्वोक्त हॉबर्नभोजनगृहे भोक्तुमामन्त्रिताः । अथैवं मया स्वयमचिन्ति यच्छाकाहारभोजनगृहेष्ववश्यं लभ्यत एव शाकाहारः । मांसाहारभोजनगृहेऽपि शाकाहारभोजनाय कुतो न संविधातव्यमिति । ततो भोजनगृहस्य व्यवस्थापकमबोधयम्—शुद्धशाकाहारभोजनं सज्जीकर्तव्यमिति । एतद् वृत्तान्तमाकर्ण्य शाकाहारिणः सुतरामभ्यनन्दिषुः । एतादृशभोजनानि सर्वत्रापि भोगार्थमेव परिकल्प्यन्ते । किन्तु पाश्चिमात्येष्वियमेका महति कला । एतादृशानि सन्तर्पणानि सङ्गीतादिपरिकरेण विभवोत्तरं निर्वर्त्य तस्मिन्नवसरे भाषणानि कुर्वन्ति । मया परिकल्पितापि नातिमहती सजग्धिरेतादृशाडम्बरेणानुपेता नाभूत् । अथ प्राप्तो भाषणावसरः । अहमुदतिष्ठम् । बह्वालोच्य भाषणाय सज्ज एव गतोऽभवम् पञ्चषवाक्यानामेव वक्तव्यत्वेऽपि प्रथमवाक्यमपि मुखान्नोदगच्छत् । ॲडिसननामा सदस्यः प्रजापक्षसभायां स्वस्य प्रथमभाषणावसरे 'इत्थमहं चिन्तये' 'इत्थमहं चिन्तये' 'इत्थमहं चिन्तये' इति त्रिवारमुपक्रम्य बद्धवाक्प्रसरस्तूष्णीमस्थात् । आङ्ग्लभाषायां 'कन्सीव' इत्यत्रप्रयुक्तपदस्य 'चिन्तनं' 'गर्भधारणं' इत्यर्थद्वयमस्ति । तत्रत्यः कश्चित्परिहासकः प्राह—एष महाशयस्त्रिवारं धृतगर्भोऽपि न किञ्चित्प्रासुतेति । एतत्कथामेव मूलीकृत्य विनोदकरं भाषणं कर्तव्यमिति निश्चित्य तत्र तथैवोपक्रममकार्षम् । अग्रतो वाणी नैव प्रासरत् । विनोदावहं भाषणं चिकीर्षुः स्वयमेवोपहास्यतामगाम् । ततश्च—"अयि भो महाशया भवन्तो मत्कृतमामन्त्रणं स्वीकृत्य यदिहोपस्थितास्तेनाहमात्मनमुपकृतं मन्ये" इति झटित्याख्यायोपविष्टोऽभवम् ॥

दक्षिणाफ्रिकादेशगमनानन्तरमेव ममेयं लज्जाशीलता दूरीभूतेति वक्तव्यम् । न पुनरत्यन्तमेव मां परित्यज्य निर्गतेति वक्तुं शक्यते । सहसा भाषितुं नाहमशकम् । नूतनसमाजमध्ये सङ्कोचोऽन्वभावि । यावच्छक्यं भाषणप्रसङ्गं सर्वदा पर्यहार्षम् । अद्यापि सुहृद्गोष्ठ्यां स्वैरकथालापेन मया कालक्षेपः शक्य इति वा तादृगिच्छा ममास्तीति वा वक्तुं न पारये ॥

एषा मे निसर्गसिद्धा लज्जाशीलता मामसकृदुपहास्यतामगमयत् ॥ परन्तु न मे ततः कापि हानि संवृत्ता प्रत्युत लाभ एवेति स्पष्टमुपलक्ष्यते । झटितिभाषणशक्त्यभावः पूर्वं मे दुःखहेतुरासीन् । अद्य मे ततः सन्तोष एव । अयं हि तन्निमित्तः परमो लाभो यदेष मां मितभाषिणमकरोत् । मदीयमनस्युत्पद्यमानभावानां यदात्मवशे स्थापनं तदेतन्मम निसर्गसिद्धं भवति । तत्त्वतः सम्यग्विमर्शमन्तरा नैकमपि वचनं मयोच्चारितं न च वा लिखितमिति वक्तुं शक्नोमि । मदीयभाषण-

Funding by IKS-MoE

गतं लेखनगतं वा यत्किमपि वाक्यमुद्दिश्य लेशतोऽपि मे लज्जा वानुतापो वा समजनीति न स्मरामि। अपि चानेन बहुधा अनर्था दूरीकृता वृथाकालहरणप्रसङ्गश्च परिहृतः। सत्योपासकस्य शिक्षणे मौनशिक्षाप्येको भाग इति स्वानुभवादहं वेद्मि। अतिशयोक्तिः सत्यस्य निगूहनं तदन्यथाकरणं वा तदेतत्कर्मणां बुद्धिपूर्वकमबुद्धिपूर्वकं वानुष्ठानमित्ययं मानुषस्वभावः। एतादृशक्लेशपरिजिहीर्षोर्मौनमावश्यकम्। मितभाषिणो जनस्य निर्विचारभाषणप्रसङ्गोऽतीव विरलः। स खलु प्रतिवाक्यमक्षरं तोलयित्वोपन्यस्यति। भाषणसमुत्सुका जना भूयांसो दरीदृश्यन्ते। 'मया किञ्चिद्वक्तव्यमस्ती' ति सभायां सभायामध्यक्षं प्रति पत्राणि प्रेषयन्ते। अध्यक्षाद्भाषणानुज्ञां प्राप्य भाषितुमुपक्रमन्ते। भाषं भाषं नियतकालमतिक्रम्य पुनरवकाशं प्रार्थयन्ते। पर्यन्ते विनानुज्ञामेव भाषणप्रसक्तास्तेष्ठीयन्तं। एतादृशैर्भाषणैर्न हि सम्भाव्यते कोऽपि लोकोपकारः। किन्तु तावान्कालो व्यर्थो जात इत्येतत्स्पष्टम्। अत एवोच्यते ममेयं लज्जाशीलता मां वर्मेव समरक्षीत्। सेयं मदात्मविकासस्यावलम्बनं व्यतारीत्। सत्यस्योपासनायां मे साहाय्यमकार्षीच्चेति॥

एकोनविंशोऽध्यायः

असत्याख्यं विषम्

चत्वारिंशद्वत्सरेभ्यः पूर्वमाङ्ग्लविदेशे भारतीयविद्यार्थिनां सङ्ख्याद्यत्वापेक्षयाल्पीयस्यासीत्।

तेषां मध्ये कृतोद्वाहोऽपि विद्यार्थी स्वात्मानमनूढं ख्यापयति स्म। तस्मिन्देशे पाठशालायां महाविद्यालये वाधीयानाः सर्वेऽपि बालका अविवाहिता एव भवन्ति। यदेते विवाहितस्य विद्यार्थिजीवनमशक्यं मन्यन्ते। पुरा किलास्मास्वपि विद्यार्थिनं ब्रह्मचारिणमेवाहुः। अद्यत्वे तु बाल्यविवाहपद्धतिः सुप्रचरिता भवति। विदेशे पद्धतिरेखा न कस्यापि बोधविषयः। अतस्तत्रत्या हिन्दुस्थानीययुवका वृत्तं स्वविवाहमङ्गीकर्तुमलज्जन्त। विवाहवृत्तमपलपितुं कारणमन्यदप्येकमासीत्। तच्च यथा – एतद्रहस्ये प्रकाशिते सति स्वाध्युषितकुटुम्बान्तर्वर्तिनीभिर्युवतिभिः सह विहर्तुं क्रीडितुं च नावकाशो लभ्येतेति। ईदृग्विनोदः प्रायेण निर्दोष एवाभवत्। पितरौ स्नेहमीदृशं प्रोदसाहयताम्। तत्र सहधर्मिण्या युवकेनैवान्विष्य वरणीयत्वाद्युवकयुवतीनां सहवासस्तस्मिन्देशे प्रायेणावश्यकः स्यात्। तत्रत्यानामयं स्वाभाविकः सम्बन्धः। तादृशं सम्बन्धं हिन्दुस्थानीययुवकगणो विदेशं गत्वा यद्यङ्गीकुर्यात्तदा तत्परिणामः प्रायेण दुष्ट एव कल्पेत। तदेतदसकृल्लोकानुभूतिसिद्धम्। एतन्मोहपाशपतिता अस्मदीययुवकास्तत्रत्यैर्यद्यपि निर्दोषित्वेनैवागृह्यन्त तथाप्यस्मदीयानां तादृशसम्बन्धस्य

Funding by IKS-MoE

हेयत्वात् हेयसम्बन्धपरिग्रहेण युवका असत्यमयं जीवनपथं किलोपाश्रयन्त । असत्यमारुतोऽयं ममोपर्यप्यवासीत् । विवाहितोऽपि पुत्रवानप्यहमविकल्पेनैवात्मानमनूढमख्यापयम् । किन्त्वेवं सत्यं निगूह्य सुखमधिकं मया न लब्धम् । मम लज्जाशीलता मितभाषित्वं च मामरक्षताम् । रमणीयकथालापशून्येन मया सह का वा युवतिः सम्भाषितुं वा विहर्तुं वानुमन्येत ॥

यथाहं लज्जाशीलस्तथा भीरुकश्चासम् । मन्निवासाश्रयसद्दक्षकुटुम्बेषु विहारार्थं गृहिणीदुहित्रातिथीनां सहनयनं सम्प्रदाय आसीत् । मदीयवसतिगृहस्वामिन्या दुहिता मामेकस्मिन्दिने 'वेण्टनर'ग्राममभितः स्थितान्रमणीयशिलोच्चयान्प्रत्यनैषीत् । सा युवतिर्माममन्दगतिमप्याकृष्याधिमार्गमविश्रान्तमालपन्ती महता जवेन प्राक्रामत् । तस्याः प्रति वचनरूपेण मन्मुखात्कदाचित् 'हूं' इति कदाचित् 'उहूम्' इति वाथ बहूक्तौ 'अहो रामणीयकम्' इत्यर्धस्वरेण वाचो निरसरन् । सा शकुन्तीव वायुना सहोदसर्पत् । अहं पुनः कदा गृहमासादयेयमिति विस्मयमानो गतः । इत्थमावां शैलमारुक्षाव । तस्मादवतरणं कथम् । उच्चपार्ष्णिकपादुकाधारिण्यपि सा पञ्चविंशतिवर्षदेशीया पटीयसी युवतिः शरवेगेन स'झम्प'मवातरत् । अहं पुनर्लज्जमानोऽधस्तादवतरीतुं बहुप्रयासी स्थितः । सा मे मन्दहासिनी धैर्यमुपदिशन्ती पुनरारुह्य हस्तग्राहं मामवतारयिष्यामीत्यवदत् । अहो मे भीरुकत्वम् । सकृत्सकृद्गाढमुच्छ्वसन्नत्यन्तप्रयासेन कथंचिदवातरम् । सा तु प्रोच्चैर्हसन्ती 'शाबाश' इति मां श्लाघमाना मदीयलज्जां द्विगुणीचकार । तथा मां परिहसितुं सा खल्वधिकारिण्यासीत् ॥

किन्तु सर्वत्रापि निष्कलङ्केनैव मया स्वात्मरक्षणं कथं वा शक्यम् । असत्यविषाद्रक्षितव्योऽहमित्यासीद्भगवदिच्छा । वेण्टनरस्थलमिव समुद्रतीरे ब्राइटननामकमुत्तमवायुगुणोपेतं स्थलमेकं विद्यते-अहमेकदा तत्र गतः । इदं च वेण्टनरस्थलगमनात्पूर्वम् । तत्र क्वचिद्भोजनगृहेऽनतिविभवशालिनीमेकां वृद्धविधवामपश्यम् । स एव विदेशप्राप्त्यनन्तरं मे प्रथमो वत्सरः । तत्र प्राप्यभोज्यपदार्थानामेका पट्टिका फ्रेञ्चभाषामयी स्थिता । तद्गतार्थमहं नाबोधिषम् । तया वृद्धमहिलयाध्यासितस्य पीठस्याभिमुखमेवाहमुपाविशम् । सा मां नवागन्तुकमीषत्सम्भ्रान्तं चावगत्य तत्क्षणमेव समाश्वासयन्ती मामपृच्छत् —'नवागत इव भवान् लक्ष्यते क्वचित्सम्भ्रान्त इव च । किमित्यद्यापि महाभागेन भोज्यमेकमपि नादिष्टम्'—इति । यदेयं सद्गृहिणी मामेवमाभाषयत्तदाहं पट्टिकां वाचयितुं प्रयतमानः कैः कैः पदार्थैर्निष्पादितानि भोज्यानीति सेवकमनुयुञ्जानश्च स्थितः । उपकृतोऽस्मि भवत्या मामेवं विचारयन्त्येति प्रतिव्याहृत्य तस्यै मदीयकष्टमावेदयन्नचकथम् —'मम फ्रेञ्चभाषानभिज्ञत्वाद्भोज्येषु मांसवर्जितं भोज्यं किं किमित्युपलब्धुं मे नास्त्युपाय' इति ॥

सावादीत्—पट्टिकागतं भवते पूर्वमावेद्य यद्भवता खादनीयं तत्कथयिष्यामीति । अहं कृतज्ञतया तस्याः साहाय्यमङ्गीकृतवान् । तदारभ्यावयोर्नूतनपरिचयादुत्पन्ना मैत्री क्रमेण संवृध्य विदेशस्थित्यवसानपर्यन्तं ततश्च विदेशपरित्यागाद्बहूनि दिनानि च स्थिता । सा वृद्धा लण्डन-

Funding by IKS-MoE

पत्तने स्वकीयवसतिनामादिकं निवेद्य प्रतिभानुवासरं स्वगृहे भोजनाय मां न्यमन्त्रयत् । इतरप्रसङ्गेषु च मां भोक्तुमामन्त्र्य मदीयलज्जाप्रकृतिव्यपोहनाय युवतिभिः सह मे परिचयमुत्पाद्य ताभिः कथालापप्रसङ्गिनं मामकरोत् । आत्मसहवासिनीं युवतिमेकामितरापेक्षया समधिकमेव मया सह कथालापव्यवहाराय समयोजयत् । अनेकशश्चावामेकान्ते द्वावेव विसृज्य स्वयं निर्गच्छति स्म ॥

आदौ तदेतत्सर्वं मे कष्टतरमलक्ष्यत । संलापोपक्रमः कथं मया कर्तव्य इति नाज्ञासिषम् । नर्मालापस्याप्यनभिज्ञोऽभवम् । किन्तु सा युवतिः सर्वमेतन्मां शिक्षयितुं प्रवृत्ता । अहमपि शनैः कुशलकुशलः सम्पन्नः । क्रमेण प्रतिभानुवासरागममुत्सुकतया प्रतीक्षितुं प्रावर्तिषि । किञ्च तद्युवत्या सह सम्भाषणे मयाभिरुचिरुदेतुमारब्ध ॥

वृद्धया क्षिप्ता वागुरा दिने दिने विशङ्कटप्रसराभवत् । आवयोर्मिथः सम्मेलने तस्याः परं कुतूहलमासीत् । आवामुद्दिश्य तया मनसि किमपि मन्त्रयमाणया भवितव्यम् ॥

अहं सङ्कटे लग्नः । अथाहमचिन्तयम्—यद्यहमेतस्यै सद्गृहिण्यै कृतोद्वाहमात्मानं प्रागेवावेदयिष्यं तदा तत् परं शोभनमभविष्यत् । तदा हि सा द्वयोरावयोर्विवाहमुद्दिश्य नैव चिन्तामकरिष्यत् । भवतु । महति विलम्बेऽपि प्रमादः समीकरणीयः । सत्यकथनेनाहमितोऽप्यतिशयितसङ्कटान्निस्तारमाप्नुयामिति । ततोऽहं प्रायो वक्ष्यमाणाभिप्रायोपेतमिदं तस्याः पत्रमलेखिषम् । यथा —

“ आवां ब्राइटनपत्तने यदामिलितौ तदारभ्य भवत्या मयि प्रेम न्यवेशि । यथा माता निजापत्यमवेक्षते तथा भवत्याहमवेक्षितः । मम दारसङ्ग्रहमनुचिन्तयन्त्या भवत्या युवतिभिः सह परिचयो मे समुत्पादितः । यावदीदृशः सम्बन्धो न वरीवृध्येत तावन्मयैतदस्ति विज्ञापयितव्यं यदहं भवत्याः प्रेमपात्रीभवितुमनर्ह इति । यदा युष्मदीयगृहमागन्तुमहं प्रवृत्तस्तदैव मया भवत्यै निवेदयितव्यमासीद्यदहं विवाहितोऽस्मीति । ज्ञातं हि मया हिन्दुस्थानस्य युवकाः स्वदेशे परिणीता अपि तद्विषयमिहागता निगूहन्त इति । स एव क्रमो मयाप्यनुवर्तितः । किन्त्वेतदकृत्यमनुष्ठितमित्यधुना बत स्पष्टमवगम्यते । मम हि बाल्य एव विवाहः संवृत्त इति ममैकः पुत्रोऽपि विद्यत इति च मया प्रागेव भवत्यै निवेदयितव्यमासीत् । एतत्सर्वमेतावद्दिनं भवत्याः सकाशादहं निह्नुतवानिति परं विषीदामि । किन्तु भगवानिदानीं मम सत्योक्तिकथनाय धैर्यमदादिति प्रमुदितोऽस्मि । कच्चिन्मां क्षमिष्यते भवती । भवत्या परिचायिताभिः सहोदरीभिर्मया न काप्यनुचिता स्निग्धवृत्तिरालम्बितेति यत्सत्यमहं सशपथं ब्रवीमि । स्वमर्यादा हि मया पूर्वमेवावगता । किन्त्वहं विवाहित इति यदनभिज्ञा भवती तदेषा तरुणिर्मया परिणायितव्येति भवत्याः स्वाभाविकोऽयमभिलाषः । एतादृशसम्बन्धपरिजिहीर्षया सत्यं मयाद्य कथनीयम् ॥

एतत्पत्रमासाद्य यदि भवती मामातिथ्यपात्रं न मन्यते तदाहमेतदन्यथा नैव ग्रहीष्ये । मयि किल भवत्याः प्रेमवात्सल्यबन्धादयमस्मि चिरमृणी संवृत्तः । इतः परमपि भवती मामपरित्यजन्ती स्वगृहे सन्निधातुमर्होऽयमिति यदि मन्यते तदाहं न केवलं सुखी स्यामपि तु तदनुरूपयोग्यतां सम्पादयितुं यतिष्ये । अपि च मां प्रति भवत्या इदमभिनवं प्रेमचिह्नमाकलयिष्यामीति ॥ ”

पत्रमिदं क्षणमात्रेण मया व्यलेखीति वाचका न मन्यन्ताम्। तेन ह्यनेकशः शोधं शोधं लिखितेन भाव्यम्। किन्त्वेतत्पत्रं मन्निष्ठमहाभारमेकमवारोपयत्। परेद्युरेव प्रायस्तत्सकाशादुत्तरमागतम्। तया तस्मिन्नेवं लिखितमासीद्यथा —

"भवतो निर्व्याजस्पष्टलिखितं पत्रमालोक्य द्वयोरप्यावयोर्न केवलं परमः सन्तोषः परं हासोऽपि समजनि। भवताङ्गीकृतं यदसत्याचरणं तन्नूनं क्षमार्हमेव। तथापि काले परमार्थनिवेदनेन श्रेयः किल संवृत्तम्। भवानस्मद्गृहं यथापूर्वमागन्तुमर्हति। वयमागामिनि भानुवासरे न केवलं भवदागमनप्रतीक्षाः स्थास्यामः किन्तु भवदीयबाल्यविवाहकथाश्रवणसञ्जातहासाः परमानन्दमनुबुभूषामः। आवयोर्मैत्री प्रसक्तघटनया न हि लेशतोऽपि परिहीणेति भवतः किमु वक्तव्यम्" — इति॥

इत्थमहं मद्गतमसत्याख्यं विषं निर्मूलमकार्षम्। ततः परं मदीयविवाहादिकथाप्रसङ्गेषु निस्सङ्कोचेनैवालपितुं न मया शङ्क्यते स्म॥

विंशोऽध्यायः

धर्माणां परिचयः

मदीयविदेशगमनाद्द्वितीयवत्सरान्ते ब्रह्मविद्यासमाजप्रविष्टयोर्द्वयोः सहोदरयोः परिचयो मे जातः। तौ द्वावप्यनूढौ। श्रीभगवद्गीतामधिकृत्य मया तौ प्रस्तावमकुरुताम्। सरएडविन–आर्नोल्डमहाशयेन विरचितं भाषान्तरं ताभ्यामपाठि। तौ सहैव मूलपठनाय मामाह्वयताम्। किन्तु मया संस्कृते वा गुजरातीभाषायां वा गीताग्रन्थस्यानधीतत्वादहं लज्जितोऽभवम्। ततो मयैवमभ्यधायि — मया भगवद्गीता न कदाप्यपाठि। किन्तु भवद्भ्यां तत्पठितुं सज्जोऽस्मि स्थितः। सुतरामनभिज्ञोऽहं संस्कृतस्य। तथापि यत्रानुवादो मूलार्थं व्यभिचरेत् तत्स्थलप्रदर्शनं हि मया शक्यते कर्तुमिति प्रत्येमि — इति। ताभ्यां सह भगवद्गीतामध्येतुं प्रावर्तिषि। द्वितीयाध्यायस्य

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।
सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते॥
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥

इतीमे श्लोका मम हृदयमगाहन्त। अद्यापि खलु ते मदीयश्रोत्रयोर्दन्ध्वन्यन्ते। भगवद्गीतानामायममूल्यो ग्रन्थ इति तदाहमचिन्तम्। अत्र मान्यता क्रमशो मे वृद्धिमागता। सत्योपलब्धये

Funding by IKS-MoE

सर्वोत्तमोऽयं ग्रन्थ इत्यद्याहं मन्ये । मम निराशस्थित्यवसरे ग्रन्थेनानेनामूल्यं साहाय्यमकारि । अस्याहमाङ्ग्लभाषानुवादान् प्रायेण सर्वानप्यपठिषम् । तेष्वॉर्नाल्डमहाशयस्य भाषान्तरमनुत्तमं मे प्रतिभाति । तत्र मूलग्रन्थगताशयानां न हि लेशतोऽपि व्यतिक्रमो दृश्यते । अनुवादोऽप्ययमनुवादवन्न दृश्यते । सखिभ्यां सह पठितापि भगवद्गीता मया सम्यगधीतेति वक्तुं न पारये । ततः कतिपयवत्सरानन्तरमेव प्रत्यहमियं मया पठितुमारब्धा ॥

इमौ सहोदरावार्नोल्डमहाशयप्रणीतं बुद्धचरितं (लाइट ऑफ एशिया) पठितव्यमिति मामबोधयताम् । तदेतत्पुस्तकमहं भगवद्गीतापेक्षया समधिकोत्साहेनाध्यैषि । अध्ययनाय गृहीतपुस्तकस्य तज्जिहासा मे नैव जाता। आभ्यामेव सहोदराभ्यामेकदाहं ‘ब्लॅवॅट्स्की लॉज’ इत्येतदाख्यं मन्दिरं नीत्वा तत्र “ मॅडम् ब्लॅवॅट्स्की–मिसिस् अेनि बेसेण्ट ”इत्येतयोर्महिलारत्नयोर्दर्शनं कारितः । तत्कालमेव मिसिस्बेसेण्टमहाभागा ब्रह्मविद्यासमाजं प्रविष्टाभवत् । तया कृतं स्वमतत्यागमधिकृत्य वृत्तपत्रिकासु प्रचलन्तीं चर्चामहं महता कुतूहलेनापठिषम् । इमौ सहोदरौ मामिमां संस्थां प्रविशेत्यबोधयताम् । मया तु विनयेनोक्तम् — मम तावत्स्वधर्मज्ञानमेवाल्पम् । तदन्यसम्प्रदायाङ्गीकारो मम नेष्ट इति । अनयोर्भ्रात्रोः सूचनामङ्गीकृत्य मॅडम्ब्लॅवॅट्स्कीप्रणीतब्रह्मविद्यामर्माख्यग्रन्थो मया पठित इति क्वचिद्ज्ञप्तिरस्ति। एतद् ग्रन्थपठनेन न केवलं हिन्दुमतसम्बन्धिग्रन्थानां पिपठिषा मे जातापि तु हिन्दुधर्मो मूढभक्तिविजृम्भित इति क्रैस्तमतबोधकैरुत्पादितो दुरभिप्रायो दूरीकृतोऽभवत् ॥

एतत्कालमेव क्वचन शाकाहारभोजनगृहे माञ्चेस्टरस्थलीयस्य कस्यचित्क्रैस्तसाधोर्दर्शनं मे जातम् । स च क्रैस्तधर्मानधिकृत्य मया सह कथालापमारब्धवान् । राजकोटे मदनुभवांस्तस्मै न्यवेदयम् । स एतदाकर्ण्य नितरामदूयत । स एवं मामकथयत्–अयमस्मि शाकाहारी । मद्यं मया न सेव्यते । नूनं बहवः क्रैस्तमतीया मांसं मद्यं च सेवन्ते । किन्तु तयोरेकतरमवश्यमेव स्वीकर्तव्यमिति नास्ति धर्मतो नियमः । अधीयतां भवता क्रैस्तवेदः । सेयं मे विज्ञापना’ इति ॥ तद्वाक्यं मयाङ्गीकृतम् । स ‘ बाइबल ’ पुस्तकमादाय मह्यमदात् । इदं च क्वचित्स्मर्यते यदसौ स्वतः पुस्तकानि व्यक्रीणीत तस्माच्च चित्रानुक्रमणिकादिविषयोपेतमेकं पुस्तकमहमक्रैषमिति । तदेतदहं पठितुमुपाक्रमे । किन्तु तस्य पूर्वभागस्यान्तं पठनं ममाशक्यमासीत् । तत्र सृष्टिक्रमा(जेनेसिस)ध्यायमधीत्य पुरस्तात्पठितुमुद्यतं मां निरपायिनी निद्रा समावृणोति स्म । तथापि पठनश्लाघाकाङ्क्षिणात्यन्तनिरुत्साहेनाप्यर्थावबोधशून्येनापि बहु परिश्रम्य परे केचिदध्याया मयापाठिषत । ‘ नम्बर्स ’ इत्येतदाख्यमध्यायं पठतो ममातिमात्रं जिहासा समुत्पन्ना ॥

उत्तरभागस्त्वन्यविधः समलक्ष्यत । तत्रापि ‘ धि सर्मन ऑफ धि माउण्ट’ इत्येष उपदेशो हृदयङ्गम आसीत् । तमेनं भगवद्गीतयोपमाय न्यरूपयम् । “ एतदहं वः कथयामि यत् हिंसाकारिणं मा प्रत्यवतिष्ठध्वम् । यदि वो दक्षिणकपोले कश्चित्प्रहारं दद्यात्तदा तस्यापरमपि कपोलं दर्शयत । यदि कश्चिद्वः कञ्चुकमाच्छिद्यापहरेत्तदा तस्य युष्मदीयमुत्तरीयं च प्रयच्छत ” इत्येतत्पठित्वा

Funding by IKS-MoE

परं प्राहृष्यम्। 'आशीर्वादकृतं जनं परमया भक्त्या नमन् भद्रकृत्। सन्तापं जनयिष्णवे च परया प्रीत्यामृतान्नं ददित्येषा शामलभट्टीया चतुष्पदी स्मृतिपथमगात्॥' मदीया बालबुद्धिर्भगवद्गीता बुद्धचरितं क्रैस्तवचनानीत्येतेषां त्रयाणामप्येकतत्त्वप्रतिपादकत्वं ग्रहीतुमयतिष्ट। त्याग एव सर्वोत्तमो धर्म इत्येतन्मम मनः सुतरामप्रीणयत्॥

एतदादि पठितवतो ममेतरधर्माचार्यजीवनचरितानामध्ययने तीव्रेच्छा समजनि। कार्लाइल्महाशयस्य 'हीरोस ॲण्ड हीरो वर्षिप' (महापुरुषास्तत्पूजनं च) इत्येतदाख्यं पुस्तकं पठनीयमिति कश्चन सुहृन्मामकथयत्। तत्रावतारपुरुषसम्बद्धमशेषमपठिषम्। एतेन तेषां महत्त्वं शौर्यं तपश्चर्येत्येतदादिज्ञानं मे मनागुदपद्यत॥

लब्धैतावत्परिचयस्य तत्कालमितोऽप्यधिकज्ञानसम्पादनमशक्यमासीत्। परीक्षापुस्तकव्यासङ्गिनः पुस्तकान्तरावलोकनाय नावकाशो लभ्यते स्म। किन्त्वितरे धर्मग्रन्थाः पठितव्याः प्रधानधर्माणां परिचयः सम्पादनीयश्चेतीच्छा मनसि निरूढाभवत्॥

एतन्मध्ये नास्तिकतापरिचयस्य क्वचित्सम्पादनं कथं वा परिहरणीयम्। ब्रॅडलॉमहाशयस्य नामधेयं तदीयनास्तिकता च भारतीयस्य सर्वस्यापि विज्ञातचरो विषयः। एतद्विचारसम्बद्धमेकं पुस्तकमहमपठिषम्। तस्य नाम नाद्य स्मरामि। एतेन मे मनसि न कोऽपि जनितः परिणामः। यदहं तदानीं नास्तिक्यमरुभूमिमतिक्रम्य स्थितः। तदात्वे मिसिस्बेसेण्टमहाभागा परं प्रामुख्यमभजत। तया हि नास्तिकमतं परित्यज्य परिगृहीतमास्तिक्यम्। अत एव नास्तिकवादे मदीयमौदासीन्यं पूर्वापेक्षया बलीयः संवृत्तम्। 'कुतोऽहं ब्रह्मविद्याभिमानिनी जाता' इत्येतदाख्यस्तदीयः प्रबन्धः पूर्वमेव मयाध्यगायि॥

एतत्कालमेव ब्रॅडलॉमहाशयः पञ्चत्वं गतः। स च वोकिंगश्मशानभूगर्भे समाधीयत। अहं च तत्र तदानीं गतोऽभवम्। लण्डननगरवर्ती भारतीयो जनः सर्वोऽपि तत्रागत इत्यहं प्रत्येमि। कतिपये मतोपदेशकाश्च स्वादरप्रदर्शनार्थं तत्र सन्निहिता आसन्। परावर्तमाना वयमयोध्वनिकेतने धूमशकटीप्रतीक्षाः स्थिताः। तत्समाजवर्ती नास्तिकानामग्रेसर एकः केनचिन्मतोपदेशकेन विवदितुं प्रावर्तत॥

'स्वामिन् ननु भवानीश्वरस्यास्तित्वं प्रतिपादयति।'

'तथा हि' इत्येवं स साधुर्मृदूक्त्या प्रत्यवादीत्। स नास्तिकः स्वात्मविश्वासनिमित्तमन्दस्मितशोभी तं पुनरपृच्छत् — 'भुवः परिधिरष्टाविंशतिसहस्रपाषाणानि। नन्विदं भवताङ्गीक्रियते' इति॥

'अवश्यमेव।'

'तथा सति भवदीयस्येश्वरस्य किं परिमाणम्। स च कुत्र स्थितः कथ्यताम्।'

'तत्त्वतो गृह्यमाणः स आवयोरुभयोरपि हृदये प्रतिवसति।'

Funding by IKS-MoE

‘हन्त भोः पश्यत पश्यत। न खल्वहं बालडिम्भो मन्तव्यः’ इति वदंत्स वीरयोधो विजयोत्साहेन विलसन्तीं दृष्टिमस्मासु व्यकिरत्॥

मतोपदेशको नम्रतापूर्वकं मौनमालम्बत। अनेन संवादेन नास्तिकवादे मम भूतपूर्वोऽनादरः सुतरामवर्धत॥

एकविंशोऽध्यायः

निर्बलानां बलं रामः

यद्यपि हिन्दुधर्माणामैहिकानामितरधर्माणां च ज्ञानं क्वचिन्मया संपादितं तथाप्येतावदेव मामापद्भ्यो न तारयितुमलमिति मया बोद्धव्यमासीत्। कृच्छ्रपतितो हि मनुष्यः किमात्मनो रक्षकमिति नैव जानाति। तात्त्विकं तु ज्ञानं तस्य पूर्वमेव न विद्यते। नास्तिकस्तावदेव रक्षितश्चेदकस्मादहमुत्तीर्ण इति ब्रवीति। आस्तिकस्तु सदृशप्रसङ्गे भगवता रक्षितोऽस्मीति कथयति। एतच्च स्वधर्माध्ययनसंयमप्रभावेन हृदयान्तरीश्वराभिव्यक्तेः फलमिति निर्णयति। एवं निर्णेतुमयमधिकारी न भवतीति वक्तुं न शक्यते। किन्तु निस्तारसमये स्वरक्षकं किमात्मसंयम उतान्यद्वेति नायमवगच्छति। यस्य तु स्वसंयमेऽभिमानस्तस्य संयमो लोष्टनिर्विशेषं विध्वंसते। अनुभवोऽयमीदृशाभिमानिनः कस्य वा न जातः। इत्थमापत्काले धर्मज्ञानं (न तु तत्सम्बन्ध्यनुभवः) केवलं निस्सारमुपलक्ष्यते॥

केवलं धर्मज्ञानं निरर्थकमित्यनुभवो मया प्रथमं विदेशे प्राप्तः। ततः पूर्वं विपद्भ्यः कथमहं रक्षित इति न जानामि। तदानीं ह्ययमतीव बाल्ये वयसि स्थितः। अद्य पुनर्न केवलमहं विंशतिवर्षदेशीयोऽभवमपि तु गृहस्थाश्रमस्यानुभवोऽपि प्रायः सम्पादितोऽभूत्॥

यथाहमिदानीं स्मरामि तथा मम विदेशवासस्यान्तिमे वर्षे नवत्युत्तराष्टशताधिकैकसहस्रतमे क्रैस्तशकाब्दे पोर्टस्मथनगरे शाकाहारिणां कूट एकोऽमिलत। तत्राहं ममैको भारतीयः सुहृच्चामन्त्रितौ। तत्रावामुभावप्यगच्छाव। ‘पोर्टस्मथ’ नाम बहुभिर्नाविकैरध्युषितं समुद्रतीरोपनिविष्टं नगरम्। तत्र नीतिभ्रष्टानां स्त्रीणां गृहाणि बहूनि विद्यन्ते। ता एताः स्त्रियो न वेश्या न च गृहिण्यः। एवंविधे क्वचिद्गृहे वयं वसतिमग्राह्यामहि। गृहमेतदीदृशमिति स्वागतमण्डली न किलाभ्यजानात्। दिनद्वयस्थायिनामस्मादृशामागन्तुकानां पोर्टस्मथसदृशे पत्तने किं गृहं वासतेयं किं नेति दुरवधार्यमासीत्॥

अथ रात्रिरागता। सभाकृत्यं समाप्य गृहमागच्छाव। भुक्तोत्तरं छद्मक्रीडार्थमुपाविशाव। गृहस्वामिन्यपि क्रीडायाममिलत। विदेशे कुलीनगृहेष्वपि सम्प्रदायतः स्त्रीजनः पुरुषगोष्ठीं प्रविश्य क्रीडते। क्रीडनावसरे निर्दोषकथाविनोदश्च प्रचलति। किन्त्वस्मिन्गृहे गृह-

Funding by IKS-MoE

स्वामिनीमदीयमित्रयोरश्लीलकथाविनोदः प्रावर्तत । न मे ज्ञातपूर्वं यदयं मे सखात्र प्रसङ्गे परं कुशल इति । अहमप्यस्मिन्विनोदे सञ्जाताभिरुचिस्ताभ्यां सङ्गतोऽभवम् । यावदहं छद्मक्रीडामपास्य सरसालापाद्विरम्य दुश्चेष्टाप्रवृत्त्युन्मुखः स्थितस्तावत्परमात्मा मदीयमित्रस्य हृदयं प्रविश्य ‘ इयं पैशाची बुद्धिः कुतस्तवागता । इतस्त्वं पलायस्व’ इति तन्मुखाद्वाणीमुदचारयत् ॥

अहं लज्जितोऽभवम् । प्रबोधश्च सञ्जातः । एवमुपकृतोऽहं मनसा मित्रमवन्दे । मातुरग्रे कृता प्रतिज्ञा स्मृतिमागता । ततश्चाहं प्रधावितः कम्पमानो निजकोष्ठं प्राविशम् । हृदयं धडधडायते स्म । मदवस्था व्याधहस्ताद्रक्षितस्य हरिणशावकस्य दशामन्वहरत् ॥

परस्त्रीदर्शनेन विकारपरवशीभूतत्वं नाम ममेदं प्रथममिति स्मरामि । तस्यां रात्रौ मम निद्रा नागता । नानाविकल्पसमाक्रान्तमभून्मानसम् । गृहं परित्यज्य किन्तु खलु पलायेय । अहं क्व स्थितोऽस्मि । अनिगृह्यमाणमनसो मे का गतिः । इत्यादि चिन्तयन्नितः परं मया सुतरामप्रमत्तेन प्रवर्तितव्यमिति सङ्कल्पमकार्षम् । अपि च न केवलमिदं गृहमपि तु पोर्टस्मथपत्तनमेव परित्यक्तव्यमिति निरचैषम् । सम्मेलनं दिनद्वयातिगामि नाभवत् । परेद्युः सायमेव मया तन्नगरं विसृष्टं सुहृत्पुनर्दिनकतिपयांस्तत्रैव स्थित इति च ज्ञप्तिरस्ति ॥

धर्मो नाम कीदृशः । देवो नाम कीदृशः । स देवः कथमस्मासु व्याप्रियत इत्येतत्तदानीं मे न विदितम् । देवो मामरक्षदिति केवलमस्पष्टतया तदावगतोऽस्मि । सर्वापद्भ्योऽप्यहमीश्वरेण रक्षितोऽस्मि । देवो मामरक्षदिति वाक्यस्य पूर्वापेक्षया गभीरतरोऽर्थो ममाद्य द्योतत इति यद्यपि सत्यं तथाप्यस्य समग्रोऽर्थो नाद्यापि मयावगत इति तर्कयामि । अनुभवातिशयादेव विषयेऽस्मिन्त्सम्पूर्णज्ञानसिद्धिः शक्या । किन्तु मम सर्वसङ्कटेष्वपि– आध्यात्मिकप्रसङ्गेषु वा न्यायवादिकर्तव्येषु वा संस्थाप्रचालनकृत्येषु वा राजकीयप्रसङ्गेषु वा– ईश्वरेण निस्तारितोऽस्मीति दृढमहं ब्रूयाम् । अत्यन्तनैराश्यमापन्नं :अशरणमवसन्नं कथमपि कुतोऽपि साहाय्यमुपस्थास्यतीति ममानुभवः । स्तुतिरुपासना प्रार्थनेत्येताः सर्वा अपि मौढ्यविजृम्भितानि न भवन्ति । ताः किलान्नपानासनपरिक्रमणाद्यपेक्षया परमार्थभूताः क्रियाः । एतावन्मात्रमेव सत्यं शेषमखिलं मिथ्येति वचनमपि नातिशयोक्तिकोटिमवगाहेत ॥

सेयमुपासना प्रार्थना च केवलं वाचो वैभवं तयोर्मूलस्थानं न कण्ठः परं तु हृदयम् । ततोऽस्माभिर्हृदयनैर्मल्यापादिनी ‘ प्रेमैकशेषं निखिलान्यवर्जं ’ यथा स्यात्तथा विमलीभूतस्य हृदयस्य सम्पादयित्री चित्तशुद्धिः साध्यते यदि– हृदयतन्त्रीगणः सुसङ्घटितः संरक्ष्यते यदि–तदा हृदयान्निस्सरन्नादो गगनगामी भविष्यति । प्रार्थनाया जिह्वासापेक्षता नास्त्येव । सा स्वभावादिन्द्रियान्तःपातिनी न भवति । हृदयात्कश्मलं संशोधयिषोरुपासना हि रामबाणसन्निभमौषधम् । अत्र मे लेशतोऽपि न सन्देहः । किन्त्वनया सह सम्पूर्णनम्रतयापि भाव्यम् ॥

Funding by IKS-MoE

द्वाविंशोऽध्यायः

नारायणहेमचन्द्रः

प्रायोऽस्मिन्नेव समये नारायणहेमचन्द्रो विदेशमागतः। श्रुतपूर्वं मया यदयमेको ग्रन्थकर्तेति। 'नेशनल इण्डियन् असोसियेशन' इत्येतदाख्यसङ्घसामाजिकाया मिसमॅनिङ्गमहाशयाया मन्दिरे परस्परमावयोः प्रथमदर्शनं संवृत्तम्। अहं जनगोष्ठीपराङ्मुखो लज्जाशील इति मिसमॅनिङ्गमहाशयाया विदितम्। यतस्तद्गृहं गतोऽहमितरैरसम्भाषितश्चेत् स्वयमनालपन् सदा बद्धमुखः सन्नुपाविशम्। सा मां नारायणहेमचन्द्रं पर्यचीचयत्। सैष आङ्ग्लभाषाया अनभिज्ञः। तस्य वेषो विचित्रः। अस्तव्यस्तमाप्रपदीनमेकम्। वलितमलिनः पारसीयनिभो धूसरः कञ्चुक एकः। कण्ठग्रन्थ्यभावः। गलपट्टिका शून्या। लम्बशिखोपेतमूर्णामयं शीर्षकमेकम्। ईदृग्वेषः स लम्बकूर्चं च पुष्यति स्म॥

तस्याकृतिर्ह्रस्वा। उन्नतिरल्पा। वर्तुलं मुखम्। तच्च सर्वतः स्फोटकाङ्कितम्। तन्मध्यवर्तिनी नासानशिताग्रा। न च कुण्ठा। स सर्वदा हस्तेन कूर्चं परामृशति स्म। मनोहरवेषधारिणां मध्ये विचित्रविलक्षणवेषा व्यक्तिरीदृशी कथमशेषलोकलोचनगोचरा न भवेत्॥

अथाहमवोचम् –

'भवदीयवृत्तान्तो मया बहुशः श्रुतः। युष्मदीयलेखनेषु कानिचिन्मया पठितानि। मदीयवसतिं प्रति भवदागमनानुग्रहेण परं मे सन्तोषः स्यात्' इति॥

नारायणहेमचन्द्रस्य ध्वनिरीषद्गर्गरः। स मन्दं स्मयमानो मामपृच्छत् 'बाढं कुत्र वो निवास' इति।

'स्टोर स्ट्रीट' वीथ्याम्।

'तेन ह्यावां सन्निकृष्टवर्तिनौ स्वः। आङ्ग्लभाषामहं शिक्षितुकामोऽस्मि। अपि मां भवान् शिक्षयति।'

'यावच्छक्यमहं सन्तोषतः शिक्षयामि। यथाशक्ति प्रयतिष्ये। अपि वसतिं युष्मदीयामागमिष्यामि।'

'मा तावत्। मा तावत्। स्वयं भवद्गृहमेष्यामि। भाषान्तरस्याभ्यासपुस्तकं सहानेष्ये।'

आवामन्योन्यदर्शनाय यथावत्संविधानमकरवाव। शीघ्रमावयोः सख्यमवर्धत॥

नारायणहेमचन्द्रस्तावदजिघ्रो व्याकरणगन्धस्य। तस्य 'घोटक' इत्येतत्तिङन्तं पदम्। 'धाव'इति सुबन्तम्। एवंविधाः परिहास्यवृत्तान्ता मम स्मृतिपथे बहवः सन्ति। किन्तु स्वस्यानभिज्ञता तस्य भयहेतुर्नासीत्। यत्किंचिन्मया विज्ञातं व्याकरणं तत्तस्मिन्न क्रमते स्म। व्याकरणज्ञानशून्यता लज्जाकरीत्यसौ नैवामन्यत॥

सुतरामृजुस्वभावोऽयमविश्रान्तमेवमालपति स्म। "भवानिव कदाप्यहं पाटशालां न गतोऽस्मि। मनोगतार्थानां प्रकाशनाय व्याकरणसापेक्षता नाद्यापि दृष्टा। बाढम्। बङ्गभाषां किं जानाति

भवान् । अहं जाने । बङ्गालदेशे कृतसञ्चारोऽस्मि । मया हि महर्षिदेवेन्द्रनाथठाकूरमहाशयस्य प्रबन्धा गुर्जरदेश्यानां सुबोधाः कृताः । इतोऽप्यनेकभाषात्मकानाममूल्यग्रन्थानामनुवादं गुजरातीभाषायां विरचयितुकामोऽस्मि । शब्दार्थमात्रप्रकाशनपुरस्सरं भाषान्तरं न मया क्रियत इति भवान् जानात्येव । अन्तःसारप्रकाशनेनैव कृतार्थमात्मानं मन्ये । विशेषप्राज्ञा एतादृशं कार्यमग्रे सम्यक्तरां निर्वहेरन् । किन्तु व्याकरणसाहाय्यं विना मया यावन्निर्व्यूढं तावताहं सन्तुष्टोऽस्मि । अभिज्ञोऽहं बङ्गालीमराठीहिन्दीभाषाणाम् । इदानीमाङ्ग्लभाषां शिक्षितुं प्रवृत्तोऽस्मि । यद्धि मयापेक्षितं सा खलु शब्दसम्पत्तिः । इयतैव मदाकाङ्क्षा परिसमाप्तिं गतेति किं भवान्मन्यते । फ्रान्सदेशं गत्वा फ्रेञ्चभाषां शिक्षितुकामोऽस्मि । श्रुतं मया सा भाषा ह्यगाधसाहित्यमयीति । सति सम्भवे जर्मनीदेशं च गत्वा जर्मनभाषां शिक्षितास्मीति ॥" विविधभाषाशिक्षणे विदेशपरिभ्रमणे च तस्य निरवधिका महत्याकाङ्क्षा ॥

'तर्हि भवानमेरिकाखण्डं च प्रयाता ?'

'अथ किम् । नवीनप्रपञ्चमनवलोक्य हिन्दुस्थानं प्रति परागमनं कथं वा सम्भाव्येत'

'भवतु । सर्वस्यास्य कृते कथं द्रव्यनिर्वाहः ।'

'मम द्रव्येण किं कार्यम् । अहं भवानिव न खलु विलासी । अशनवसनार्थं कनिष्ठपक्षे यावदावश्यकमलं तावता । तदर्थं मदीयपुस्तकविक्रयाल्लभ्यं यत्किञ्चिन्मदीयसुहृद्भिर्वितीर्यमाणं च पर्याप्तं भवति । अहं सर्वदा तृतीयश्रेण्यामेव प्रयाणमङ्गीकरिष्यामि । अमेरिकाखण्डं प्रयास्यन्नौकाबाह्यशालामाश्रित्य गन्तास्मि ।'

नारायणहेमचन्द्रस्यार्जवमन्यत्र क्वापि जने नादृश्यत । तस्य निष्कापट्यमपि तादृशमेवासीत् । नूनमयं स्वलेखनपाटवमधिकृत्य मनाग्गर्वयते स्म । तदेकं मुक्त्वा तस्मिन्गर्वस्य गन्धोऽपि नासीत् ॥

प्रतिदिनमावाममिलावहि । आस्माककल्पनास्वास्माककार्येष्वपि बहुधा समानवृत्ती आवामभूव । उभावपि शाकाहारिणौ । उभावप्यसकृत्सहैवाहारमभुञ्ज्वहि । इदं हि यदा स्वतः पाकं विधाय प्रतिसप्ताहं सप्तदशशिलिङ्गद्रव्यव्ययेन जीविकामहं निरवाहयं तस्मिन्नवसरे संवृत्तम् । क्वचिदवसरेषु तस्य कोष्ठमहमगच्छम् । कदाचित्स एव मे कोष्ठमागमत् । आङ्ग्लेयरीत्या पाको मया निष्पाद्यते स्म । स तु स्वदेशपाकं विना न ह्यतृप्यत् । 'तुवरीदल'वर्जं तस्य वृत्तिरेवानिर्वाह्याभवत् । कदाचिदहं गार्जरप्रभृतिभिर्यूषं निरवर्तयम् । तदा स प्राह—अहो शोच्या तव रुचिरिति । स एकदा कुतश्चिन्मुद्गदलं सम्पाद्य निष्पन्नपाकं मत्पार्श्वमानीतवान् । तद्भुक्त्वा मम सन्तोषः समजनि । तदा प्रभृति विनिमयः प्रारभ्यत । मया निष्पादितं रुच्यमाहारं नीत्वा तस्मायदाम् । स्वेन निष्पादितं स आनीय मह्यमदात् ॥

अस्मिन्नवसरे कार्डिनलमॅनिंगमहाशयस्य ख्यातिर्विश्वजनीनाभवत् । जॉनबर्न्स-कार्डिनलमॅनिंगमहाभागयोः प्रयत्नविशेषैः समुद्रतीरस्थलीयकर्मकराणामाग्रहः शीघ्रमुपशान्त

Funding by IKS-MoE

आसीत्। विदेशराज्यप्रधानमन्त्रिणा डिझरायेलिमहाशयेन कृतां कार्डिनलमॅनिंगमहाभागस्यार्जवगुणप्रशंसामहं नारायणहेमचन्द्राय न्यवेदयम्। तदाकर्ण्य स प्राह – तर्हि महात्मानमेनं द्रष्टुमिच्छामीति ॥

‘स तावन्महामनुष्यः। कथं वा त्वया द्रष्टव्यः स्यात्।’

‘किं निमित्तम्। सर्वमहं जाने। मन्नाम्ना तव हस्तेन तस्य पत्रमेकं लेखयितव्यम्। तत्र च “अहमस्मि ग्रन्थकर्ता। लोकाभ्युदयाय भवद्भिरनुष्ठितकार्यनिमित्तगौरवं मुखतः सूचयितुमहमाशंसे” इति निवेद्य। ममाङ्ग्लभाषाया अनभिज्ञत्वात् द्विभाषी त्वं सहनेतव्य आपतित इत्यपि लिख’ इति ॥

अथ तस्याहमुक्तरीत्या पत्रमेकमलेखिषम्। द्वित्रदिनाभ्यन्तर एवामुकस्मिन्काले युवाभ्यामहं द्रष्टव्य इति तत्सकाशात्पत्रमुपागमत्। उभावपि तद्दर्शनाय प्रातिष्ठावहि। अन्यदर्शनाय गमनप्रसङ्गे यो धारणीयः कञ्चुकाद्याकल्पः स मया धृतः। नारायणहेमचन्द्रस्तु यथास्थितमूर्तिरेव। स एव कञ्चुकः। तदेवाप्रपदीनं च। इदमुद्दिश्य तमेनमहं परिहसितुं प्रवृत्तः किन्तु स एव मां हास्यास्पदं विधाय प्रावोचत्–यूयं नागरिकाः सर्वेऽपि भीरुकाः। न खलु महात्मानः पुरुषस्य वेषं विलोक्य तस्य योग्यतां परिमिमते। तेषां हि दृष्टिः पुरुषस्य हृदये निविष्टा भवति – इति ॥

यावदावामुपविष्टौ तावदेकः कृशोन्नतो वृद्ध उपागत्यावयोर्हस्तलाघवमदात्। नारायणहेमचन्द्रस्तमेवं समबोधयत्—

‘नाहं श्रीमतां कालमपहर्तुमिच्छामि। श्रैमत्को वृत्तान्तो मया बहुधा श्रुतः। इदानीं लब्धसन्दर्शनोऽहमेतावद्विज्ञापयितुकामोऽस्मि यद्वद्धाग्रहाणां कर्मकराणां पक्षमवलम्ब्य श्रीमद्भिरनुष्ठितात्सत्कार्यादस्माकमखिलानामानन्दः समजनीति। महात्मोपसर्पणं तत्सन्दर्शनं च मम हि सम्प्रदायः। अत एव श्रीमतामयं परिश्रमो मया दत्तः’ इति ॥

तदेतत्तेन गुजरातीभाषयोपन्यस्तस्य भाषान्तरमिति न किल पृथग्वक्तव्यम् ॥

कार्डिनलमहाशयः प्रत्याह—

‘भवदागमनेनाहं सन्तुष्टोऽस्मि। भवतां लण्डननगरे स्थितिरनुकूला स्यादत्रत्यजनानां च परिचयं भवन्तः सम्पादयन्तीत्यहमाशंसे’ इति ॥

एवमुक्त्वा समुत्थितः सन्नावां व्यसर्जयत् ॥

एकदा नारायणहेमचन्द्रः केवलमेकं वासः परिधायाभ्यन्तरकञ्चुकमात्रधारी मदीयावासस्थानमुपागमत्। गृहस्वामिनी द्वारमुद्घाट्य चकिता झटिति मत्पार्श्वमुपधाव्य (एषा हि नवा। नारायणहेमचन्द्रस्यापरिचितासीत्) मामकथयत्कश्चिदुन्मत्तो भवन्तं द्रष्टुमागत इति। ततोऽहं द्वारदेशं गत्वा नारायणहेमचन्द्रस्य दर्शनाद्विस्मितोऽभवम्। तस्य वेषमालोक्य प्रतिपत्तिमूढ आसम्। तस्य मुखोपरि सामान्यतः सदा परिदृश्यमानं मन्दस्मितमेकं विना नान्यत्किंचिदलक्ष्यत ॥

'वीथ्यां बालकास्त्वां परिवेष्ट्य कच्चिन्नोपाद्रवन्'।

'ते पुनर्मामन्वधावन्त । किन्त्वनादृतास्ते मया तूष्णीमासन् ।'

कतिपयमासान् लण्डननगरे स्थित्वा नारायणहेमचन्द्रस्ततः पेरिसनगरीमगात्। तत्र फ्रेञ्चभाषां शिक्षितुं फ्रेञ्चपुस्तकानां भाषान्तराणि कर्तुं चोपाक्रमत। तत्कृतानुवादपरिशोधनपर्याप्ता फ्रेञ्चभाषायां मया व्युत्पत्तिः पूर्वमेव सम्पादिताभूत्। अतस्तं पठितुमसौ मह्यमदात्। न चैष ग्रन्थस्यानुवादः परं तत्सारांशमात्रमासीत् ॥

अथामेरिकाखण्डं प्रतिगमनाय कृतं स्वनिश्चयं च स पर्यपूरयत्। अधस्तनवर्गीयं प्रयाणानुज्ञापकपत्रमधिगन्तुं तस्य महान् श्रमो जातः। अन्तरीयमेकमान्तरकञ्चुकमेकं च धृत्वा संयुक्तसंस्थाने बहिः सञ्चरमाणस्य तस्योपर्यधिकारिणः सभ्येतरवेषपरिग्रहापराधनिमित्तं व्यवहारमचालयन्। पर्यन्तेऽसौ पर्यमुच्यतेति स्मरामि ॥

त्रयोविंशोऽध्यायः

महावस्तुप्रदर्शनम्

नवत्युत्तराष्टादशशत (१८९०) तमे क्रिस्तीयाब्दे पेरिसनगरे महावस्तुप्रदर्शनमचलत्। अस्य सज्जीकरणाय कृतानामगाधसंविधानानां वृत्तान्तो मयापठ्यत। पेरिसनगरं द्रष्टव्यमितीच्छा प्रबला ममासीत्। तदेतस्मिन्नवसरे तत्र गमनं स्पृहणीयमित्यचिन्तयम्। प्रायः षट्छतहस्तोन्नतं कालायसमयमेफिलनामकं गोपुरं तत्र प्रदर्शने जनस्तोमाकर्षकं मुख्यं वस्त्वासीत्। नूनमासन्नितराण्यपि बहूनि लोकमनोहराणि वस्तूनि। किन्तु सर्वापेक्षया गोपुरमेव प्रधानम्। यतस्तावत्कालपर्यन्तमेतावदुच्छ्रायशालिभवनस्य निरपायिनी घटना न शक्येति लोको हि मन्यते स्म ॥

पेरिसनगरे शाकाहारस्य भोजनशालैका मया श्रुतपूर्वा। तत्रैकस्मिन्कोष्ठे वसतिं गृहीत्वा सप्तदिनान्यवसम्। अल्पाल्पव्ययेनैव मया सर्वं निर्वाहितम्। पेरिसनगरं प्रति प्रयाणं तत्रत्यदर्शनीयवस्तूनामवलोकनमित्यादि सर्वं तथैव मितव्ययेन निरवर्तयम्। एतदवलोकनसौकर्याय तन्नगरस्य चित्रपटमेकं वस्तुप्रदर्शनस्य विवरणपत्रमेकं च हस्ते कृत्य बहुशः पादचारेणैव पर्यक्रमिषम्। महावीथीनामितरद्रष्टव्यमुख्यस्थलानां च मार्गदर्शकास्तत्र बहवोऽविद्यन्त। वस्तुप्रदर्शनस्य महापरिमाणं तत्रत्यवस्तूनां वैविध्यमित्येतन्मुक्त्वा नान्यत्किंचनेदानीं मम स्मृतिपथे वर्तते। एफिळगोपुरं मया द्विस्त्रिर्वा समारोहि। अत एव तद्गता स्मृतिः स्पष्टतरा विलसति।

Funding by IKS-MoE

तस्य प्रथमान्तःस्थाने विश्रान्तिगृहमेकमासीत् । अत्युन्नतप्रदेशे मया कृतोऽभ्यवहार इति विकत्थनादात्मपरितोषमीप्सुस्तत्राहं सप्तशिलिङ्गमितद्रव्यमाहारार्थे व्यपक्षिपम् ॥

पेरिसनगरस्य प्राचीनाः क्रैस्तदेवालया अद्यापि मे स्मृतिमवगाहन्ते । तेषां वैभवं निरपायिनी शान्तिश्च कदाप्यविस्मरणीये स्तः । नोत्रदमइत्येतदाख्यस्य देवालयस्याद्भुतं शिल्पचातुर्यं तदन्तरलङ्करणाय सूक्ष्मखचितानि चित्रकर्माणि च चिरस्मरणीयानि भवन्ति । एतादृशस्वर्गीयदेवालयनिर्माणे लक्षान्तरद्रव्यं व्ययीकृतवतां हृदयेष्ववश्यमेव दैवभक्त्या जाग्रत्या भवितव्यमिति तदाहमचिन्तयम् ॥

पेरिसनगरस्य चाकचक्यदम्भाडम्बरानधिकृत्यानेकशो मया वृत्तान्ताः पठिताः । तत्र वीथ्यां वीथ्यामेतन्निदर्शनं विस्पष्टमालक्ष्यत । किन्तु देवालयास्तैरसंस्पृष्टा इति व्यक्तमवगम्यते स्म । देवालयं प्रविशन्नेव जनो बहिर्विजृम्भमाणं सम्भ्रमं कोलाहलं च सद्यो व्यस्मरत् । तत्र पवित्रकन्याविग्रहस्य पुरस्तान्नमन्तं जनमवलोक्य सद्यः परिवृत्तशीलः स्वयं भक्त्या गौरवेण च वर्तते स्म । एवं नमस्कृतिः प्रार्थना च केवलं मूढभक्तेर्विजृम्भितं सर्वथा न भवतीति तदानीं मे मनसि समुदितो भावः क्रमेण स्थिरः स्थिरः समजनि । पवित्रकन्याविग्रहस्य पुरस्तादवनतशिरसो ये भक्तिशीला न खलु ते केवलममृतशिलामपूजयन् । किन्तु तेषामात्मा नैजभक्तिभरेण परिप्लुतोऽभवत् । ते खलु शिलामूर्तिधरमीश्वरमर्चयन्त न पुनः शिलाविग्रहमात्रम् । एवंविधपूजनेन भगवतो महिमानमेते सुतरामुत्कर्षं प्रापयन्न मनागप्यपकर्षम् — इत्यादि भावनापरम्परा मन्मनस्याविरभूवन्निति स्मरामि ॥

एफिलगोपुरमधिकृत्य कियन्ति चिद्वचनान्युपन्यसितुमिच्छामि । तत्साम्प्रतं कथमुपयुज्यत इति न जाने । तदात्वे तु भूयोभिर्बहुधा श्लाघ्यमानमितरैश्च सुतरां तिरस्क्रियमाणमहमश्शृणवम् । तस्य तिरस्कर्तृणामग्रेसरः ‘ टॉल्स्टॉय ’ महाशयः । स चैवमाह — एफिलगोपुरं मनुष्यस्य मूर्खताया बृहल्लाञ्छनं न पुनस्तदीयं विवेकचिह्नमिति । किं चायमित्थं किल वादमकरोत्——

“ मादकद्रव्येषु तमाखुपत्रमत्यन्तदोषावहम् । यदनेन दासीकृतः पुरुषो मद्यपायिनोऽप्यधैर्यं जनकान् दुर्व्यापाराननुष्ठाप्यते । मद्यं हि मनुष्यमुन्मत्तं करोति । तमाखुपत्रं तु तस्य बुद्धिं व्यामोह्य तं व्योमप्रासादरचनायां प्रेरयति । एफिलगोपुरमेवंविधप्रेरणानुसारिणा मनुष्येण निर्मितानां वस्तूनामेकतमम् ”—इति ॥

गोपुरेऽस्मिन् कलाकौशलं न किंचिद्दृश्यते । वस्तुप्रदर्शनस्य रामणीयकमनेन कथमपि वृद्धिमगादिति वक्तुं न शक्यते । इदमपूर्वमसाधारणपरिमाणं च वस्त्विति जनाः सङ्घशस्तद्दर्शनारोहणकुतूहलेन समायान्ति स्म । इदं वस्तुप्रदर्शनस्यैकं क्रीडनकमासीत् । अस्मासु यावद्बालभावस्तावद्धि क्रीडनकान्यस्मानाकर्षन्ति । चाकचक्यभाञ्जि वस्तूनि यद्यस्मानाकर्षेयुस्तर्हि सर्वे वयं बालिशा एव मन्तव्या इति हि समर्थयितुमिदं गोपुरं समीचीनो दृष्टान्त इव स्थितम् । एतावदेवास्य सार्थक्यमिति वक्तव्यम् ॥

चतुर्विंशोऽध्यायः

सम्पादितं ब्यारिस्टर्पदम्–ततः किम्

मम विदेशगमनोद्देश्यं ब्यारिस्टर्पदावाप्तिः। तदेतदधिकृत्य मया नाद्यापि किमपि प्रस्तुतम्। तदिदानीं तत्सम्बद्धानां कियतांचिद्वचनानामिहोपन्यासायावसरः प्राप्तः ॥

ब्यारिस्टर्पदावाप्तये नियमद्वयं प्राक्पूरयितव्यमासीत् कप्तकालमण्डलपूर्तिः परीक्षोत्तरणं चेति। तत्र वत्सरश्चतुर्मण्डलात्मकः। ईदृशि द्वादशमण्डलानि (तथा च त्रीणि वर्षाणि) मयातिवाहयितव्यान्यासन्। मण्डलातिवाहनं नाम भोजनार्थं गमनम्। प्रतिमण्डलं चतुर्विंशति भोजनानि दीयन्ते स्म। तेषां षट्स्वपि वास्माभिरवश्यमुपस्थातव्यमासीत्। भोजनार्थं गमनमित्येतस्य तत्र यत्किंचिदवश्यमेव भोक्तव्यमिति नार्थः किन्तु नियतकालं तत्र संनिधाय भोजनसमाप्तिपर्यन्तमवस्थातव्यमिति। प्रायेण सर्वोऽपि तदानीं जग्धिपीतिप्रसक्तोऽभवत्। भोजनं प्रशस्तमासीत्। पानाय च मद्यमुत्तमं दीयते स्म। एतयोः कृते व्ययः सार्धद्वयात्सार्धत्रयं शिलिङ्गनाण्यानाम्। मूल्यमिदमत्यल्पमिति तत्र गण्यते स्म। यतोऽन्यत्र भोजनालये मद्यस्यैकस्यैव तावानर्थो व्ययीकर्तव्य आसीत्। भोजनव्ययात्पानव्ययस्याधिक्यं नाम हिन्दुदेशेऽस्माकं – अनागरिकत्वे सति–अत्यन्तमाश्चर्यमेव। विदेशागमनोत्तरमादौ तदेतद्विलोक्य नितरामहमदूये। कथं वा जनो मद्यस्य कृते द्रव्यमेतावत् क्षपयितुमुत्साही भवतीति विस्मितोऽभवम्। पश्चादस्य भूतार्थो मयावगतः। अनेकश एवंविधेषु भोजनेषु न मया किंचिदभुज्यत। यतस्तत्र मदुपयोज्यं पिष्टापूपः पक्व आलुकन्दः ‘कोशकन्दो’ वेत्येतावन्मात्रं लभ्यते स्म। आदौ मह्यमेतन्नारोचत। किन्तु पश्चात्सञ्जातरुचेर्मम पदार्थानितरानप्यपेक्ष्योपहारयितुं धैर्यमागतम् ॥

विद्यार्थिभोजनापेक्षया बेन्चरइत्येतदाख्यानां विद्यामन्दिराध्यापकानामाहारः प्रशस्यतरोऽभवत्। मया सह कश्चन पारसीविद्यार्थी स्थितः। सोऽपि शाकाहारी। उभौ मिलित्वा विद्यामन्दिराध्यापकानामाहारसामग्रीतः शाकाहारिणामुपयोगाय सम्भाराः प्रदातव्या इति प्रार्थयावहि। सेयं प्रार्थना सफला जाता। उक्ताध्यापकानां भोजनाग्रपीठादावाभ्यां पक्वशाकफलादिकमदीयत ॥

मद्यं तावदस्पृश्यं ममासीत्। चतुर्णां चतुर्णां विद्यार्थिनां द्वे द्वे मद्यस्य काचकुप्यौ दीयेते स्म। अस्मिन् कूटे मामपि प्रवेशयितुमेते सदा प्रायतन्त। यतस्तथा प्रविष्टे मद्यपरिवर्जके मयि कुपीद्वयमपि त्रयाणामेव संविभाज्यमभूत्। प्रतिमण्डलमेकस्यां रात्रौ महासन्तर्पणं निरवर्तत। तदा न केवलं पॉर्टशेरीमद्यविशेषो व्यतीर्यतापि त्वनुत्तमं शेम्पेनमद्यमपि। अत एव तैस्तद्रात्रिसन्तर्पणावसरे मदुपस्थितिः सविशेषमभ्यर्थ्यते स्म। तस्मिन् दिने हि मत्सहवासलालसा तेषामत्यारोहिणी समजायत ॥

Funding by IKS-MoE

एतादृशपानभोजनादिकं न्यायवादित्वयोग्यतासम्पादनाय कथं वा विद्यार्थिनामुपकारकमभूदिति मया नाज्ञायत । न चाद्यापि ज्ञायते । पुरा कस्मिंश्चित्काले स्थितेषु स्वल्पसङ्ख्याकेषु विद्यार्थिषु भोजनावसरे विद्यामन्दिराध्यापकैः सह कथालापप्रसङ्गायावकाशो लभ्यते स्म । उपन्यासास्तदा प्रचेलुः । तदेतत्तेषां न केवलं प्रपञ्चज्ञानोपकारकं संस्कारविशेषोत्पादकं चासीदपि तु तेषां वाक्पाटवं च विकासमगच्छत् । आस्माकस्थितिकाले तु सर्वमेतदसम्भाव्यमासीत् । विद्यामन्दिराध्यापकाः स्वगौरवसदृशं दूरादुपाविशन् । आचारेऽस्मिन् क्रमेणार्थवत्ता सर्वापि तिरोदधे । किन्तु प्राचीनताप्रेमिणेङ्ग्लेण्डदेशेनायमाचारोऽद्याप्यरक्ष्यत ।।

पाठक्रमः सुलभ आसीत् । ब्यारिस्टर्जनं भोजनब्यारिस्टर् इति परिहासका व्यपदिशन्ते स्म । आसां परीक्षाणां फल्गुतां सर्वोऽप्यवेदीत् । मम व्यासङ्गसमये परीक्षाद्वयं चलति स्म । एका रोमनलॉविषयिणी (प्राचीनरोमनप्रजाधर्मशास्त्रम्) । द्वितीया कॉमनलॉविषयिणी (आङ्ग्लदेशस्यासङ्गृहीतधर्मशास्त्रम्)। द्वयोरेतयोः पृथग्भागत्वात् परीक्षार्थं द्विवारमुपवेष्टुं शक्यमासीत् । परीक्षार्थं पठ्यत्वेन निश्चितमपि पुस्तकजातं न केनाप्यध्यायि । रोमनशास्त्रमधिकृत्य लघुटीकासङ्ग्रहा अलभ्यन्त । एतांत्सप्ताहद्वयमात्रं चेङ्गलेण्डदेशस्य धर्मशास्त्रलघुसङ्ग्रहांस्तु द्वित्रमासमात्रं चाधीत्य परीक्षायामुत्तीर्णानहं दृष्टवानस्मि । न केवलं परीक्षाप्रश्नाः सुलभाः परं परीक्षका अप्यौदार्यमदर्शयन् । रोमनलॉभागे शतस्य पञ्चनवतिमारभ्य नवनवतिर्जनाश्चरमपरीक्षायां च शतस्य पञ्चसप्ततिर्वा ततः किंचिदधिका वा विद्यार्थिनः समुत्तीर्णा बभूवुः । तस्मात्परीक्षायां पराजयभीतिरत्यल्पासीत् । किं चैषा परीक्षा वत्सराभ्यन्तरे न केवलं सकृदेव परंतु चतुर्वारं प्राचलत् । ईदृक्सुलभायाः परीक्षाया दुस्तरत्वं कस्यापि न सम्भाव्यते स्म ।।

किन्त्वहं स्वयमेव तां दुस्तरामकल्पयम् । परीक्षार्थं निर्दिष्टानि पठ्यपुस्तकान्यशेषाण्यप्यध्येतुकामोऽभवम् । तेषामनध्ययनं प्रतारणेति मया व्यचिन्ति । एतदर्थमधिकद्रव्यं व्ययीकृत्य पुस्तकान्यक्रेषि । रोमनलॉशास्त्रं लॅटिनभाषायामेव शिक्षितव्यमिति निरचेषि । लण्डनमेट्रिक्युलेषनपरीक्षार्थं या मया शिक्षिता लॅटिनभाषा साद्य मे बहूपयोगिनी जाता । परिश्रमोऽसौ न लेशतोऽपि व्यर्थोऽभवत् । दक्षिणाफ्रिकादेशे रोमनडचलॉक्रम एव प्रचरति । तस्मादेतदवबोधनाय प्राक्पठितं (प्रसिद्धरोमनधर्मशास्त्रप्रणेतुः) जस्टिनियनमहाशयस्य पुस्तकं मम बहूपकारकं संवृत्तम् ।।

इङ्ग्लेण्डदेशस्य धर्मशास्त्रनियमानां समग्रपठनाय नवमासपर्यन्तं मया सम्यक् प्रयसितव्यमभूत् । यतो ब्रूमाख्येन प्रणीतं कॉमनलॉविषयप्रतिपादकं पुस्तकं यद्यपि रसमयं तथापि तस्य बृहत्तरत्त्वान्महान् कालो व्यपेक्ष्यत । स्नेलाख्येन प्रणीतं 'इक्विटि' विषयप्रतिपादकं पुस्तकं यद्यपि मनोरञ्जकं तथापि दुखबोधमासीत् । व्हाइट–ड्युटरइत्येतदाख्ययोर्मुख्यव्यवहाराभिधानं पुस्तकं (अस्मिन् कतिपये व्यवहाराः परीक्षार्थं पठ्याः कल्पिताः) कुतूहलजनकं विज्ञानजनकं चासीत् ।।

Funding by IKS-MoE

‘विलियम्स–एडवर्ड’इत्येतदाख्ययोः स्थिरस्वविषयप्रतिपादकौ ग्रन्थौ ‘गुडीव’इत्याख्यस्य चरस्वविषयको ग्रन्थश्च पठितुमतीव रमणीया आसन्। विलियम्सप्रणीतो ग्रन्थस्तु कादम्बरीव रोचते स्म। एतदधीयानस्य मे न हि लेशतोऽपि जिहासा समजनि। हिन्दुस्थानं प्रत्यागतेन मया परमकुतूहलेन समवीतं यत्पुस्तकं स खलु ‘मेइन’इत्येतदाख्येन प्रणीतो हिन्दुधर्मशास्त्रविषयको ग्रन्थ एक एवेति स्मरामि। किन्तु हिन्दुस्थानस्य शासननियमानधिकृत्य लेखितुं नायमवसरः॥

अहं परीक्षयोरुत्तीर्णोऽभवम्। एकनवत्युत्तराष्टशताधिकैकसहस्रतमे क्रैस्तशकाब्दे षष्ठमासस्य दशमदिवसे ब्यारिस्टर्पदमवापम्। एकादशे दिवसेऽहमिङ्ग्लेण्डदेशस्य हाइकोर्टाख्यप्रधानन्यायस्थाने न्यायवादिश्रेण्यां प्रवेशितोऽभवम्। द्वादशे दिवसे हिन्दुस्थानं प्रति विदेशतः प्रास्थिषि॥

एवमधीतविद्यस्यापि मम निस्सहायता च भीतिश्च दुरन्ताभवत्। आत्मनो न्यायवादिकार्यचालनक्षमत्वे मम विस्रम्भ एव नासीत्॥

तामेतां मम निस्सहायतां वर्णयितुं पृथगध्याय एवावश्यकः॥

पञ्चविंशोऽध्यायः

मदीयमितिकर्तव्यतामूढत्वम्

ब्यारिस्टर् इति नामख्यातिरनतिक्लेशेन तावत्सम्पादिता। न्यायवादिकार्यनिर्वाहस्तु क्लिष्टतरोऽलक्ष्यत॥

अधीतधर्मशास्त्रेणापि मया व्यवहारचालनमद्यापि न शिक्षितम्। व्यवहारसूत्राणि यद्यप्युत्साहशालिना समधीतानि तथाप्येषां कार्येषु विनियोगो मया नाभ्यज्ञायि। निजस्वं तथा ह्युपयोक्तव्यं यथा परस्वस्य हानिर्न सम्भवेदित्येतत्तादृशमेकं सूत्रम्। किन्तु व्यवहारे मदीयकार्यिकस्य यथानेन प्रयोजनं स्यात् तथा तदुपयोजनरीतिर्ममाद्यापि न विदिता। एतत्सिद्धान्तसम्बन्धिनो मुख्यव्यवहारा यद्यपि मया पठितास्तथापि तच्छिक्षाज्ञानमुत्तरत्रकार्येषु विनियुञ्जीयेति मम धैर्यं नोदपद्यत॥

अपि च हिन्दुस्थानसम्बन्धिनां धर्मशास्त्रनियमानामहमद्याप्यनभिज्ञोऽभवम्। हिन्दुमहम्मदीयधर्मशास्त्रयोस्तत्त्वं नाद्याप्यधिगतमासीत्। व्यवहारपत्रिकालेखनक्रमोऽपि न ज्ञातः। तल्लेखनोद्यमं प्रति प्रतिपत्तिमूढोऽभवम्॥ श्रुतपूर्वं हि मया यत् सरफिरोजशामहेतामहाशयो न्यायसभायां सिंहवद्गर्जति स्मेति। ईदृशी शक्तिः कथमनेन विदेशे सम्पादितेति मम मानसमचित्रीयत। तत्सदृशं न्यायवादप्रागल्भ्यमस्मिञ्जन्मनि मया नैव सम्पाद्यत इत्यह-

Funding by IKS-MoE

मवेदिषम् । इदं तावदास्ताम् । परस्तु बलवान्सन्देहो मामबाधत यन्न्यायवादिवृत्तिमवलम्ब्य स्वजीविकामप्यहं सम्पादयेयं न वेति ॥

व्यारिस्टर्परीक्षार्थमधीयानस्यैव मे मानसमीदृशैः संशयसङ्कटैर्विह्वलीभवति स्म । कष्टमिदमाप्तेषु केषुचिन्न्यवेदयम् । तेषामेकः प्राह दादाभाईनवरोजिमहाशयस्यात्र बुद्धिवादोऽन्वेष्टव्य इति । उक्तपूर्वं हि मया यद्विदेशं प्राप्तस्य मम निकटे दादाभाईमहाशयं प्रति लिखितमेकं परिचयपत्रमासीदिति । तदेन्तमम बहोः कालादनन्तरमुपयुक्तमभूत् । परन्तु दर्शननिमित्तमेतादृशमहापुरुषाणामुपरोधकरणे नाहमधिकारीत्यहमाचिन्तयम् । ततोऽहं यदा कदाचित्तदीयोपन्यासश्रवणाय गत्वा क्वचिन्मन्दिरकोणे स्थित्वा तन्मूर्तिमानेत्रपूरं विलोक्य तदुक्तिमाकर्णपूरं निशम्य तृप्तः सन्प्रतिन्यवर्तिषि । तेन विद्यार्थिभिः सह गोष्ठीबन्धाय संस्थापिता काचिन्मण्डल्यवर्तत । तन्मण्डल्याः सभामेलनावसरेषु गत्वा तेन विद्यार्थिषु प्रदर्श्यमानमादरं विद्यार्थिनां तस्मिन् गौरवातिशयं च प्रत्यक्षीकृत्य प्रमुदितोऽभवम् । अथान्ते धैर्यमवष्टभ्य परिचयपत्रं प्रदर्श्य तत्समीपमगच्छम् । भवता यथेष्टकालमागत्य मदभिप्रायो गृह्यतामिति स मामब्रवीत् । परन्त्ववकाशोऽयं मया न कदाप्युपायुज्यत । अत्यन्तमपरिहार्यप्रसङ्गेष्वेव मया तस्य कालः क्षेपणीयस्तदन्यथाकरणेऽहं दोषभाग्भवेयमित्यहमचिन्तयम् । तस्मात्सुहृदा बोधितोऽपि तद्वाक्यानुरोधेन मदीयसङ्कटानि तस्मिन्नवसरे महापुरुषस्याग्रे निवेदयितुमधीरोऽभवम् । अयमेव सुहृत् (अन्यो वा न जाने) फ्रेडरिकपिंकटमहाशयो वरं मया द्रष्टव्य इत्यसूचयत् । यद्यप्यसौ प्राचीनताप्रेमिपक्षीयस्तथाप्ययं भारतीयविद्यार्थिषु निष्कलङ्कां निःस्वार्थां प्रीतिमबध्नात् । बहवो विद्यार्थिनस्तस्य बुद्धिवादमन्विच्छन्ति स्म । अहमपि तद्दर्शनावसरं प्रार्थयन्पत्रमेकमलिखम् । स च प्रतिपद्यकालं निर्दिष्टवान् । तद्दर्शनावसरस्तावत्कदाप्यविस्मरणीयो भवति । स किल मां निजं सुहृदमिवापश्यत् । आत्मनो हसन्मुखेन मम नैराश्यमद्रावयत् । अथ तेनोक्तम् —

“ सर्वेणापि फिरोजशामहेतामहाशयतुल्येन भवितव्यमिति किं भवान्मन्यते । तत्सदृशो बदरुद्दीनसदृशश्च जनो दुर्लभः । साधारणन्यायवादित्वं तत्तादृशीमधिककुशलतां नापेक्षत इत्येतन्निश्चितमवेहि । प्रामाणिकत्वकार्यशीलत्वसम्पन्नः पुरुषो न्यायवादी भूत्वा स्वजीविकां सम्पादयितुमलं भवति । न हि सर्वेऽपि व्यवहारा जटिला भवन्ति । भवतु । ब्रूहि तावत्कानि कानि सामान्यविषयकाणि पुस्तकानि त्वयाधीतानीतीति ॥ ”

मया पठितानि कियन्त्येव पुस्तकानि तस्मै न्यवेदयम् । स तदाकर्ण्य किंचिदिव भग्नाशः समलक्ष्यत । तत्तु क्षणमात्रमेव । तावच्च तस्य मुखे हास्यरेखाः प्रादुरभूवन् ॥

अथ सोऽब्रवीत् —

“ जाने तव क्लेशम् । यत्त्वयाधीतं तदत्यल्पम् । किं च लोकानुभवशून्योऽसि । तं विना न्यायवादिकार्यं न हि चलति । हिन्दुस्थानस्य चरित्रमपि त्वया न पठितम् । न्यायवादिना मनुष्यस्वभावाभिज्ञेन भवितव्यम् । पुरुषस्याकृतिवशात् तत्स्वभावपरिज्ञानशक्तिरावश्यकी ।

सर्वेणापि भारतीयेन हिन्दुस्थानेतिहासज्ञेन भाव्यम् । अस्य च न्यायवादित्वस्य च साक्षात्सम्बन्धाभावेऽपि तद् ज्ञानं तवावश्यकम् । के - मॅलेसनमहाशयाभ्यां प्रणीतं सप्तपञ्चाशदधिकाष्टशतोत्तरैकसहस्रतमे क्रैस्ताब्दे संवृत्तस्य प्रजाविप्लवस्य चरितमपि न हि त्वयापाठि । तत्पुस्तकमद्यैव सम्पाद्य पठितुमर्हसि । किं च लोकस्वभावपरिज्ञानार्थमन्यदपि पुस्तकद्वयमधीष्वेति ।। एतत्पुस्तकद्वयं नाम लॅवेटर - शेमलपेनिकइत्येतदाख्यमहाशयाभ्यां विरचितौ मुखसामुद्रिकौ ग्रन्थौ ।।

एतन्महनीयमित्रोपकृतिर्मम चिरस्मरणीयाभवत् । तत्सन्निधौ यद्यपि मे भीति दूरीभूता तथापि तमापृच्छ्य निर्गतोऽहं पुनः पर्याकुलितोऽभवम् । आकृत्या मनुष्यस्य योग्यता कथमवगन्तव्येति प्रश्नं मनस्यालोडयंस्तत्पुस्तकद्वयं प्रत्यनुचिन्तयंश्च गृहमगच्छम् । परेद्युर्लॅवेटरमहाशयस्य पुस्तकमक्रेषि । शेमलपेनिकप्रणीतपुस्तकमापणेषु नालभ्यत् । लॅवेटरविरचितो ग्रन्थः स्नेलप्रणीतपुस्तकादपि क्लिष्टतरोऽलक्ष्यत । तत्र मे पिपठिषापि न जाता । शेक्सपियरमहाकवेराकृतिविशेषानुसन्धानमकार्षम् । तथापि लण्डननगरस्य घण्टापथेषु सञ्चरमाणानां शेक्सपियरव्यक्तीनामभिज्ञाने कुशला शक्तिर्मया नाध्यगम्यत ।।

लॅनेटरस्य पुस्तकान्मदीयज्ञानं किमपि नावर्धत । पिंकटस्य बोधनाभ्यः सम्पादितं प्रयोजनमत्यल्पम् । किन्तु मय्यभिमानविशेषान्निर्व्याजविलसन्मन्दहासस्तदीयो मम मनसि निरूढोऽभवत् । न्यायवादी भूत्वा जीविकां निर्वाहयितुकामेन फिरोजशामहेतामहाशयस्य प्रतिभा मेधा योग्यता च नापेक्ष्यन्ते । प्रामाणिकत्वकार्यक्षमत्वविशिष्टो जनो निर्वोढुं पारयतीति य उपन्यस्तो बुद्धिवादस्तत्राहं श्रद्धितोऽभवम् । किं च ममैतद्गुणद्वयोपेतत्वान्मम हृदये किंचिद्धैर्यमजायत ।।

विदेशे के - मॅलेसनप्रणीतं पुस्तकमध्येतुं नापारि । किन्तु प्राप्तेऽवसरे तत्पठितव्यमिति निश्चितत्वाद्दक्षिणाफ्रिकादेशे तदपठिषम् ।।

एवं नैराश्येन सह किंचिदास्थामपि प्राप्य ‘आसाम’ इत्याख्यनौकायानेन मोहमयीनगरोपकण्ठमासादयम् । नौकाबन्धनस्थाने जलधिरुल्लोलकल्लोलमयोऽभवत् । तदहं द्रोण्या तीरमध्यगमम् ।।

इति श्रीगान्धिमहात्मनः
सत्यशोधनाख्यायामात्मकथायां
प्रथमो भागः
समाप्तः

द्वितीयो भागः

प्रथमोऽध्यायः

श्रीमान् रायचन्दभाईमहाशयः

मोहमयीनगरे प्रचण्डवातः समुत्थित इति पूर्वाध्याये मया न्यरूपि । आङ्गलषष्ठसप्तममासयोर्हिन्दुसागरे नायमपूर्वः सम्भवः । एडननगराद्यावन्मार्गं जलधिरुल्लोलकल्लोलमय आसीत् । प्रायेण पथिकाः सर्वेऽपि रुग्णशयिता अभूवन् । अहमेक एव निरातङ्कस्तरङ्गाघातविलोकनकौतुकेन नौकाबहिर्वेदिकायां समुच्छलितशीकरप्रहारानन्दमनुभवन्नवास्थिषि । प्रातराहारसमये मया सहैको वा द्वौ वा वर्तेते स्म । ऊरूपरि यवागूरपक्षिप्ता महतावधानेन शरावमूरूपरि विन्यस्य वयमभुञ्ज्वहि ॥

बाह्योऽयं प्रचण्डवातो मदीयहृदयान्तर्वर्तिनश्चण्डमारुतस्य सूचकोऽभवत् । किन्तु यथा बाह्येन तथैवान्तरिकेनापि मदीया शान्तिरविप्लुतैव स्थिता । कुलजनादुपद्रवस्तु प्रत्यक्ष एव (प्रथमभागस्य द्वादशाध्यायोऽवलोक्यताम्) । न्यायवादिकृत्य निर्वाहचिन्ता पूर्वमेव निरूपिता । किञ्च केषांचित् सुधारणानामारम्भक्रमः पर्यालोचनीय आसीत् । न केवलमेतावन्मात्रमेव परन्तु ममाद्याप्यविदिता क्लेशपरम्परा मां प्रतीक्षते स्म ॥

नौकानिवेशस्थानमुपप्राप्तस्य मम स्वागतानुयोगाय मदग्रजः पूर्वमेवागत्य तत्र स्थितः । तेन किल डाक्टरमहेतामहाशयतदग्रजयोः परिचयः पूर्वमेव सम्पादितोऽभूत् । डा० महेतामहाशयेन सोपरोधं सहावस्थानं प्रार्थितस्सन्नग्रजद्वितीयस्तद्वसतिमेवागच्छम् । एवमावयोर्विदेशे सम्प्रवृत्तः परिचयः स्वदेशेऽस्मिन्वृद्धिमासाद्य कुटुम्बयोरुभयोरपि शाश्वतमैत्रीरूपेण परिणतोऽभवत् ॥

मम मातुर्दर्शनेऽहं कातर इवाभूवम् । सा मां प्रत्युद्गम्यालिङ्गितुं न जीवन्तीस्थितेति न मे विदितमासीत् । तमेनं दुःखोदन्तमिदानीं मे न्यवेदयन् । यथाचारं सूतकस्नानमकारि । मम जननी मदीयविदेशस्थितिकालान्तर एव पञ्चत्वं गताभूत् । तन्निमित्तशोकाभिघातो मां विदेशवर्तिनं मा स्प्राक्षीदिति मदग्रजेन तद्वृत्तान्तः पूर्वं मे न निवेदितः । पश्चादद्यनिवेदितेऽपि तस्मिन्न मन्दीभूतः स दुःखाभिघातः । परन्त्वेतदास्तां वृतत्तानुबन्धकथनम् । पितृमरणनिमित्तदुःखापेक्षया गरीयानभून्ममाद्य हृदयोद्वेगः । भूयस्यो मनसि कल्पिता ह्याशा विघटिता बभूवुः । किन्तु वृत्तमेतदाकर्ण्य रोदनक्रन्दनादिकं नाहमकार्षम् । बहुशो नेत्राम्बुप्रतिरोधेऽपि शक्तोऽभवम् । यथा मातुर्मरणासम्भवे तथैवातः प्रभृत्यपि जीवनकृत्यानि निर्वर्तयितुमुपाक्रम इत्येतन्मया स्मर्यते ॥

Funding by IKS-MoE

डा० महेतामहाशयद्वारा मया केषांचिन्मित्राणां परिचयः सम्पादितः । तेषामेकस्तदग्रजो रेवाशङ्करजगजीवनमहाभागः । आवयोर्यावज्जीवस्थायिनी मैत्री समजायत । किन्त्वत्र विशेषतो यो निरूपयितुमिष्टः स किल ‘ कविरायचन्द ’ अपराख्यस्य श्रीरायचन्द्रमहाशयस्य परिचयः । सैष डा०महेतामहाशयस्य कस्यचिदग्रजस्य जामाता । स च रेवाशङ्करजगजीवननाम्ना प्रचलद्रत्नाभरणवणिज्यायामंशहरोऽभवत् । तदानीं तस्य वयः पञ्चविंशतिवत्सराधिकं नासीत् । तथापि प्रथमदर्शन एव विद्वानयं महोन्नतप्रकृतिरित्यसंशयमवेदिषम् । शतावधानित्वप्रख्यातिरपि तस्यासीत्। तस्य शतावधानकौशलं मया द्रष्टव्यमिति डा०महेतामहाशयो मामबोधयत् । यावती ममैरौप्यज्ञानसम्पत्तिस्तावतीं तत्कवेरग्रे प्रकाश्य तदेतद्वाङ्मयमुच्चार्यतामित्यवोचम् । कविरायचन्दभाईमहाशयो येन क्रमेण शब्दा उपन्यस्तास्तेनैव क्रमेण तान्पुनरुदाहरत् । सैषा तदीयशक्तिर्मम विस्मयकारिण्यपि न मां मुग्धमकरोत् । यत्तु मां मुग्धमकरोत्तद्वृत्तं पश्चान्मदनुभवगोचरोऽभवत् । तच्च विशालं तदीयशास्त्रज्ञानं विशुद्धं तदीयचारित्रं तीव्रा च तदीयात्मसन्दर्शनेच्छा । तस्य जीवितं केवलमात्मसाक्षात्कारार्थमेवेति पश्चादहमज्ञासिषम् । तत्र भवतो मुक्तानन्दस्योक्तिरियं सर्वदा तन्मुखवर्तिनी तदीयहृदयभित्तौ चित्रिता चाभवत् । सा यथा –

दिनकृत्येषु सर्वेषु हरिर्मे प्रकटो यदा ।
मदीयजन्मसाफल्यं भजेयं निश्चितं तदा ॥
भक्तमुक्तानन्दसत्ताघटनासूत्रसन्ततिः ।
भक्तिमज्जनमन्दारो भगवान्हरिरेव हि ॥ इति

रायचन्दभाईमहाशयः परोलक्षरूप्यकाणां वाणिज्यमकरोत् । किं च रत्नपरीक्षायामयंनिपुणोऽभूत् । तस्य बुद्धिशक्तिमतीतो वाणिज्यसम्बन्धी जटिलः प्रश्न एव नासीत् । किन्त्वेतदादिकं न हि तस्य जीवनस्य मुख्योद्देश्यम् । ईश्वरसाक्षात्कार एव तदीप्सितः पुरुषार्थः तदीयनिषद्यालेखनपीठस्योपरीतरवस्तुभिः सह यत् किमपि धार्मिकपुस्तकं च दिनचर्यापुस्तकं च सर्वदादृश्यत । विरते व्यापारप्रसङ्गे धर्मग्रन्थं वा स्वकीयदिनचर्यापुस्तकं वा स हस्ते करोति स्म । तस्य लेखनेषु प्रकटितांशस्य भूयान् भागस्तदीयदिनचर्यापुस्तकात्समग्राहि । लक्षाधिकरूप्यकव्यापारविरामोत्तरक्षणमेव यः पुरुषः स्वात्मज्ञानरहस्यविचारान्विलेखितुमुत्सहेत तत्तादृशपुरुषस्य वणिङ्मात्रता कथं नाम घटताम् । स नूनं सत्योपासक एव । एवमस्य निजव्यापारमध्य एवेश्वरोपासनायां लीनचित्तत्वं मया न केवलमेकद्विवारमेव परन्त्वनेकशः प्रत्यक्षीकृतम् । न कदाप्येनं क्वचिदपि प्रमाद्यन्तमपश्यम् । मया तस्य वाणिज्यमूलो वेतरविधो वा कोऽपि लाभः सम्भाव्यते स्म । तथाप्यहं तत्सङ्गेन गाढमैत्रीसुखमन्वभूवम् । तदानीमहं निरुद्योगन्यायवादी स्थितः । तथापि तत्सन्निहितेन मया सर्वदा धर्ममाहात्म्यसम्बन्धिनीः कथाः स करोति स्म । यद्यप्यहमन्धकारेऽद्यापि क्लिश्यन्नवस्थितो यद्यपि धर्मजिज्ञासायां मे न तावदुत्कटं कुतूहलं तथापि रायचन्दभाईमहाशयेन कृता धर्मोपन्यासा मदीयं मनः समाकर्षन् । ततः परं धर्माचार्यान्मतप्रमुखांश्च बहूनहं व्यलोकयम् । अन्यमतावलम्बिनां गुरवोऽपि यत्नतो

मया दृष्टाः। किन्तु न कोऽपि तेषां रायचन्दभाईमहाशयवन्मम हृदयमकार्षत्। अस्य वचनान्यव्याहतगत्या हृदयमवगाहन्ते स्म। यथास्य नीतिश्रद्धा तथास्य कुशाग्रधिषणापि गौरवमादरं च समपादयत्। तस्मादहं यत्किमप्याध्यात्मिकसङ्कटं प्राप्तस्तमेव शरणमगच्छम् ॥

यद्यपि रायचन्दभाईमहाशयः परं मे मान्योऽभवत्तथापि मदीयहृदयमण्डपे न हि तं गुरुपीठमारोपयम्। तत् स्थानमद्याप्यनधिष्ठितं भवति। अद्याप्यहं गुरुमन्वेषयमाणः स्थितोऽस्मि ॥

आत्मसाक्षात्कारमुद्दिश्य गुरुपदगुरूपदेशयोर्हिन्दुधर्मेण यन्महत्त्वं प्रदिष्टम् तत्र मे श्रद्धा विद्यते। गुरुं विना तत्त्वज्ञानं न लभ्यत इत्यस्मिन्वचने सत्यांशो महान्विद्यत इत्यहं मन्ये। ऐहिकज्ञानमुपार्जितुकामस्य पूर्णयोग्यताविहीनोऽपि शिक्षकः सह्यो भवति। आध्यात्मिकशिक्षणे तु नेदं सम्भाव्यते। अधिगततत्त्व एव गुरुपदमर्हति। अत एव सम्पूर्णज्ञानसिद्धये नैरन्तर्येण प्रयत्न आवश्यकः। शिष्यो हि स्वयोग्यतानुरूपमेव गुरुं लभते। सम्पूर्णताप्राप्तिकामः सर्वोऽपि जनः प्रयत्नमनन्तं कर्तुमधिकारी भवति। तत्प्रयत्नस्य प्रतिफलं स्वप्रयत्न एव। शेषमखिलं भगवदायत्तम् ॥

यद्यपि रायचन्दभाईमहाशयो मदीयहृदयमण्डपे गुरुत्वेन न प्रतिष्ठितस्तथाप्ययं मे यथा मार्गदर्शकः सन्नवलम्बनप्रदोऽभूदित्येतदग्रे निरूपयिष्यते। एतत्कालिकास्त्रयः पुरुषा मदीयजीवनपथमेकान्ततः परिवर्त्य मदन्तरात्मानं परवशीचक्रुः —— यथा रायचन्दभाईमहाशयः स्वजीवितसंसर्गात् टॉल्स्टॉयमहाशयः स्वकीयात् ‘ धि किङ्गडम ऑफ हेवन ईझ विधिन् यु,’ (स्वाराज्यं तव हृदये विद्यते) इत्येतदाख्यग्रन्थात् रस्किन्महाशयश्च ‘ अण्टु धिस लास्ट ’(सर्वोदयः) इत्येतदाख्यप्रबन्धात्। इमे वृत्तान्ता यथास्वं वर्णयिष्यन्ते ॥

द्वितीयोऽध्यायः

संसारप्रवेशः

मम ज्येष्ठाग्रजो मयि महतीमास्थामबध्नात्। स किल नितरां वित्तयशोगृध्नुरधिकारलोलुपश्चासीत्। किं चायमुदारहृदयः। तदीयमौदार्यं विवेकसीमामप्यत्यवर्तत। तदेतद्गुणातिशयादात्मन ऋजुस्वभावाच्च बहूनि मित्राण्ययं समपादयत्। तत्साहाय्येन व्यवहारा बहवो मामुपनमेयुरिति तस्य प्रत्याशा। मदीयन्यायवादिकृत्यमूर्जितं प्रचलिष्यतीति तस्य प्रत्ययः। एवंविधप्रतीक्षया मदग्रजो गृहव्ययमवर्धयत्। अपि च न्यायवादिकृत्यस्य निरातङ्कप्रचलनाय यथाशक्ति सर्वप्रयत्नानकरोत्।

मदीयविदेशप्रस्थाननिमित्तमस्मत्कुले समुत्थितपूर्वः कोलाहलो नाद्यापि प्रशान्तोऽभवत्। बन्धुमध्ये द्वैधमुदपादि। द्वयोः पक्षयोरेकः सद्य एव मां जात्यां प्रावेशयत्। द्वितीयस्तु मत्प्रवेशं साग्रहं न्यषेधत्। प्रथमपक्षीयाणां परितोषाय मदग्रजो मां नाशिकक्षेत्रं नीत्वा तत्र पवित्रनद्यां

कृतस्नानं राजकोटमनयत् । ततस्तत्र बन्धूनां समाराधनमकारयत् । तदेतत्सर्वं न मेऽभिमतमासीत् । परन्तु मदग्रजो मय्यपरिमेयवात्सल्ययुक्तोऽभवत् । तस्मिन्नहं तत्प्रीत्यनुरूपभक्तिमानासम् । तस्मादहं तदिच्छामेव तदाज्ञां मन्यमानो यन्त्रवत्तदीयच्छन्दानुवर्ती प्रावर्तिषि । इत्थं मे स्वजातिस्वीकारविचारः पर्यवसानमगमत् ॥

बहिष्कारदायकपक्षं प्रवेष्टुं न कदापि मया प्रयत्नोऽकारि । तत्पक्षस्य प्रमुखान्प्रति मन्मनसि क्रोधोऽपि नाजायत । तेषां मध्ये मम द्वेष्टारोऽपि केचिदविद्यन्त । अहं त्वेषां मनागपि सन्तापमजनयन् परं जागरूकः स्थितः । जातिबहिष्कारसम्बन्धिषु कुलनियमेष्वहमत्यन्तमवहितोऽभवम् । एतन्नियमानुरोधेन मदीयबन्धुजनस्य — श्वशुरस्य वा श्वश्रूजनस्य वा ज्येष्ठस्वसुर्वा श्यालकस्य वा — गृहेषु मम प्रवेशो न्यषिध्यत । तन्मया तदीयगृहे पानीयमपि न पीयते स्म । यद्यप्येते बहिष्कारनियममुल्लङ्घ्य परोक्षे पानीयं मे प्रदातुं सज्जस्थितास्तथापि सर्वलोकप्रत्यक्षे यदकार्यत्वेनागृह्यत तस्य पुनः प्रच्छन्नमनुष्ठानं न मेऽभिमतमासीत् ॥

इत्थमप्रमादिन्या मम प्रवृत्त्या कुलजनात्क्लेशसम्भवः प्रत्यरोधि । न केवलमेतावदेव परन्त्वद्याप्येकपक्षीया यद्यपि नियमेन मां बहिष्कृतं मन्यन्ते तथाप्यमीभिर्मां प्रत्यौदार्यमादरश्च सर्वदा प्रादर्शि । तैः किल मत्सकाशात्प्रतिफलमनपेक्षमाणैर्मदीयकार्येष्वसकृत्साहाय्यमकारि । इदं मदीयतितिक्षाया मनोज्ञं फलमिति भावये ॥

अहं सर्वथा जातौ स्वीकार्य एवेति यद्यहं प्रयत्नकलापमचालयिष्यं यदि चास्य कृते स्वकुलं बहुधा भेदयितुमयतिष्ये तदास्मत्कुलजनो मयैवं प्रधर्षितः सन्निश्चितमेव प्रतीकारमकरिष्यत् । एतेन विदेशात्परावृत्तस्य मम स्वास्थ्यवर्तनकथा तावदास्तां परन्तु प्रयत्नकलापावर्ते संलग्नस्य बहुशः कपटवृत्त्या व्यवहर्तव्यमापतिष्यत् ॥

भार्यां प्रति मदीया मनःप्रवृत्तिर्नाद्यापि सुव्यवस्थिताभवत् । कृतप्रवासेनाप्यसूया तद्विषयिणी मया नाद्यापि पर्यत्याजि । अल्पाल्पविषयेष्वपि तत्सम्बद्धेषु संशयालुत्वं मम नाद्यापि न्यवर्तत । तस्मान्मदीयमनस्युत्पन्नाः प्रत्याशा न सिद्धिमीयुः । भार्या विद्यावती करणीया तत्पाठलेखनाभ्यासे तस्याः सहायकेन मया भवितव्यमित्यहं समकल्पयम् । किन्तु मदीयविषयासक्तिवशादिदमशक्यमभूत् । मदीयदोषैः सा कष्टभाजनी कृता । एकदाहमेनां मातृगृहं प्राहैषम् । पुनस्तत्स्वीकरणात्पूर्वं महान्तमस्याः सन्तापमजनयम् । सैषा मम मूर्खतेति पश्चादहमज्ञासिषम् ॥

बालकानां शिक्षाक्रमः सुव्यवस्थापनीय इत्यहमचिन्तयम् । मम ज्येष्ठाग्रजस्य पुत्रा आसन् । मम विदेशप्रस्थानकाले गृहे स्थितो यः शिशुः स मे कुमारः साम्प्रतं चतुर्वर्षदेशीयोऽभवत् । निश्चितपूर्वं हि मया यदेते बालका व्यायामाभ्यसनेन दृढकायाः कर्तव्याः सहैव संवर्ध्याभ्युदयं प्रापणीयाश्चेति । तदेतदनुमोदितं मम ज्येष्ठाग्रजेनापि । प्रायेणाहमस्मिन्विषये सिद्धमनोरथोऽभवम् । बालकानां गोष्ठी ममातीव प्रियाभूत् । अद्यापि तैः सह परिहासक्रीडाभ्यासो मम रूढिमागतः । बालकानामहं सच्छिक्षको भवितास्मीति तदाप्रभृति मया व्यचिन्ति ॥

Funding by IKS-MoE

आहारविषये सुधारणस्यावश्यकर्तव्यता मया स्पष्टमवगताभूत्। 'टी–कॉफी'ति द्वयमप्यास्माकमन्दिरं प्रागेव प्रविष्टमासीत्। यावदहं विदेशात्प्रतिनिवृत्तस्तावदास्माकीनमन्दिरेऽपि विदेशीयवातावरणस्य प्रायिकस्थितिमिच्छन्मदीयाग्रजः पुरा कादाचित्कोपयोगीनि चैनभाजनानि साम्प्रतं नित्योपयुक्तान्यकल्पयत्। यानि मत्कृतानि सुधारणानि तानि तद्वायुमण्डलस्य परिवर्तनं समग्रतामापादयन्। यवगोधूमाद्यवागूर्निष्पादनीया। 'टी–काफी'त्येतद्द्वयस्य स्थाने 'कोको'पेयमेकमुपयोक्तव्यमित्यहमबोधयम्। एतेन 'टी–कॉफी-कोको'पेयानां त्रयाणामपि पानमस्माभिरारभ्यत। ऐरोप्यपादरक्षाविशेषा मन्दिरे दृश्यन्ते स्म। अहमप्यैरोप्यवेषधारणेन मन्दिरस्यैरोप्यसंविधानं पर्यपूरयम्॥

इत्थं व्ययः क्रमादवर्धत। दिने दिने नवनवानि वस्तूनि गृहे सम्भृतान्यभूवन्। गृहस्य पशुशालायां गजस्तावदबन्धि। कथं पुनराहारस्तदर्थे सम्पादनीयः। राजकोटे न्यायवादिकृत्यसमारम्भं सहसाकरिष्यं यदि सर्वथा हास्यास्पदमभविष्यम्। तत्रत्यन्यावादिसदृशानुभवज्ञानशून्योऽपि ततोऽपि दशगुणं पारितोषिकं लिप्सुरभविष्यम्। तथा हि स्थिते मयि को वा मूर्खो व्यवहार प्रदित्सया मत्पार्श्वमुपागच्छेत्। कदाचिदुपागतेऽपि तस्मिन्कथं वा मदीयेनाज्ञानेन सह प्रतारणामौद्धत्यं च संयोज्य जगतो मदीयमृणित्वं परं वर्धयेयम्॥

अथ मित्राण्यवोचन्–यत्कियन्तमपिकालं मोहमयीनगरे स्थित्वातत्रत्यप्रधानन्यायसभायामनुभवं सम्पाद्य सुशिक्षितहिन्दुधर्मशास्त्रेण मया व्यवहारोपार्जने वरं प्रयत्नः कर्तव्य इति। एतदनुरोधेनाहं मोहमयीनगरमागतः॥

तत्र वसतिं गृहीत्वा सूदमेकं पाककर्मणि न्ययोजयम्। मदीयकार्ये मम यावत्पटुत्वं तदीयकार्ये तस्य तावदेवासीत्। स च ब्राह्मणः। तमेनमभृतकं मन्यमानोऽहं गृहजनमिवापश्यम्। स किल यद्यपि निजशरीरस्योपरि जलमपातयत्तथाप्यङ्गानि नैव प्रमार्जयते स्म। किञ्चायं मलिनवासाः कच्चरयज्ञोपवीतश्च। शास्त्रगन्धस्य तु सुतरामजिघ्रः। तथापि तदपेक्षया प्रशस्यतरः सूदः क्व वा लभ्यः॥

तमेनमहमपृच्छम् — भो रविशङ्कर (तदेवास्य नाम) भवान्पाकक्रियायामविचक्षण इत्येतदास्ताम्। तथापि सन्ध्यावन्दनज्ञेन भवता भाव्यं किलेति॥

स च प्रत्यवादीत् — मदीयसन्ध्यावन्दनं स्वामिन् किमु जिज्ञास्यते। श्रूयतां तर्हि। लाङ्गलमेव मदीयं सन्ध्यावन्दनम्। कुद्दाल एव मदीयमौपासनम्। मम तावद्ब्राह्मण्यमेतादृशम्। उदरम्भरणं च भवदीयकृपायत्तम्। असन्तोषे तु कृषिरवस्थितैवेति॥

तस्मान्मे रविशङ्करस्य शिक्षकत्वं वोढव्यमापतितम्। तदर्थमवकाशोऽपि महानासीत्। अर्धपाको मयैव निष्पाद्यते स्म। विदेशेऽनुष्ठितचराणि शाकाहारसम्बद्धानि शोधनान्यहं कर्तुमारब्धवान्। अङ्गारधानीमेकां क्रीत्वा रविशङ्करद्वितीयः पौरोगवत्वमवाक्षम। तेन सह भोजनाय मे न कोऽप्यासीदन्तरायः। क्रमशः क्रमशः प्रतिबन्धकानि तस्यापि तिरोदधत। तस्मादावां

सुसखायावभूव । एकमात्रं तु प्रतिबन्धकमवस्थितं यद्रविशङ्करो मलिनिमासख्यमहं नैव त्यजेयं पाकं च निर्मलं नैव स्थापयेयमिति शपथमकार्षीदिव ॥

किन्तु मोहमयीनगरे चतुःपञ्चमासेभ्य ऊर्ध्वं न हि स्थातुमपार्यत । यतो द्रव्यागमे निरुद्धेऽपि व्ययस्तावदवर्धतैव ॥

एष हि मै कुटुम्बनिर्वाहोपक्रमः । ब्यारिस्टर्कृत्यं ममातीव क्लिष्टतरमलक्ष्यत । बाह्याडम्बरो महान् । आन्तरिकं ज्ञानमत्यल्पम् । मदीयकार्यभारो मम दुर्वहोऽभवत् ॥

तृतीयोऽध्यायः

मम प्राथमिको व्यवहारः

मोहमयीनगरमधिवसन्नहमेकतो धर्मशास्त्रमध्येतुं प्रावर्तिषि । अन्यतश्चाहारविषयकशोधनानि कर्तुमुपाक्रमे । एतेषु मदीयसुहृद्वीरचन्दगान्धिश्च मया सहामिलत । अत्रान्तरे मदग्रजोऽपि मदर्थे व्यवहारसम्पादनाय यथाशक्ति प्रयतते स्म ॥

हिन्दुस्थानस्य शासननियमानामध्ययनमतीव निर्वेदकरमासीत् । ‘सिविल प्रोसिजर कोड’ इत्येतदाख्यं व्यवहारचालनक्रमप्रतिपादकं शासनं तु न मे बुद्धिमारोहत् । किन्तु ‘एविडन्स अेक्ट’ इत्येतदाख्यं साक्ष्यसम्बद्धशासनं न तादृशमासीत् । वीरचन्दगान्धिः ‘सोलिसिटर’परीक्षार्थमधीते स्म । स च ब्यारिस्टर्न्यायवादिसम्बन्धिनीः कथा बह्वीरकथयत् । तेनोक्तम्—

‘फिरोजशामहाशयो व्यवहारशास्त्रीयनियमानामगाधज्ञानसम्पत्त्यैव न्यायवादिप्रवरो भवति । ‘एविडन्स अेक्ट’ शासनस्य वाङ्मयसर्वस्वं तस्य जिह्वाग्रे तिष्ठति । द्वात्रिंशं निबन्धनमुपजीव्य-प्रवृत्तमखिलमपि व्यवहारजातं स जानाति । बदरुद्दीनमहाशयः प्राड्विवाकान्निजवादकौशल्येन मुग्धस्तब्धान्करोतीति ॥

एतादृशप्रसिद्धपुरुषाणां कथाः शृण्वतो मम त्रस्नुता भृशमवर्धत ।

अथासौ स्वमतमेवमाचष्ट—

ब्यारिस्टर्वृत्तिमुपाश्रितो जनः पञ्चपवत्सरान् यावत्तूष्णीं न्यायसभायामुपवेशमुपवेशमुद्विजत इत्येतन्न बहु । अत एवाहं सोलिसिटरपदवीलिप्सया प्रवृत्तोऽस्मि । वर्षत्रयाभ्यन्तरे स्वकुटुम्बकं निर्वाहयितुं यदि भवान् शक्नुयात् तदा भवानेव कृती वक्तव्य इति ॥

मासे मासे व्ययो वृद्धिमगात् । ‘ब्यारिस्टर्’ इति नाम बहिः प्रख्याप्यान्तरथापि तत्कार्यशिक्षाप्रसङ्गित्वं मदीयमनसो नाभिमतमासीत् । तदेवं पर्याकुलीभूतस्य ममाध्ययनं न सम्यक्

प्राचलत् । 'एविडन्सअेक्ट'विषये तावदभिरुचिरुदपादि । मेइनमहाशयस्य हिन्दुशास्त्रग्रन्थं महता कुतूहलेनाध्यैषि । किन्तु व्यवहारचालनधैर्यं मे नासीत् । एषा निस्सहायता ह्यानिर्वचनीयाभवत् । मदीयावस्था श्वश्रूमन्दिरे प्रत्यग्रविन्यस्तपादायाः स्नुषाया दशामन्वहरत् ॥

अत्रान्तरे ममीबाईनामकस्य व्यवहारमहमग्रहीषम् । स च 'स्मॉलकॉझ'न्यायसभायां प्रवेशनीयोऽभवत् । गुप्तसम्पादकस्य (टाउट इति प्रसिद्धस्य) द्रव्यं प्रदेयमिति बोधितः संस्तदेतदशक्यं ममेत्यवोचम् ।

" त्रिचतुरसाहस्ररूप्यकाणामर्जयितारः 'क्रिमिनल'न्यायवादिनोऽप्येवं सम्भावनां प्रयच्छन्ति । "

" तत्सदृशो भवितुं नाहमिच्छामि । प्रतिमासं त्रिशतरूप्यकाणां लाभे परं सन्तुष्येयम् मम पित्रा ततोऽप्यधिकं न लभ्यते स्म । "

" ननु व्यतीतस्तादृशः कालः । मोहमयीनगरे व्ययोऽद्य दशगुणो भवति । भवद्भिः कालानुगुण्येन वर्तितव्यम् । "

अथाप्यहं वज्रमनस्कः स्थितः । नैकामपि काकिणीमुत्कोचमदाम् । तथापि ममीबाईव्यवहारो मत्सकाशमागतः । स च सुलभ आसीत् । त्रिंशद्रूप्यकमात्रं पारितोषिकत्वेन मया स्वीकृतम् स हि व्यवहार एकाहमात्रनिर्वर्त्योऽभवत् ॥

'स्मॉल्कॉझ'न्यायसभायामयमेव मम प्राथमिकः प्रवेशः । प्रत्यर्थिपक्षपोषकत्वान्मया प्रतिप्रश्नाः प्रष्टव्या आपतन् । अहमुत्थाय स्थितः । तदनु मदीयधैर्यसर्वस्वं प्रणष्टमासीत् । मम शिरो घूर्णितुमारभत न्यायसभा मां परितो भ्राम्यन्तीवादृश्यत । प्रष्टव्यस्फूर्तिरेव लुप्ताभवत् । सर्वमिदं प्रेक्षमाणेन प्राड्विवाकेन तदा सञ्जातहासेन भवितव्यम् । न्यायवादिभिश्च प्राप्तविनोदैर्भाव्यम् । किन्त्वेतत्किमपि मया न लक्षितम् । अहमुपविष्टोऽभवम् । अथ व्यवहारसम्पादकमवोचम् — नाहमेतद्व्यवहारचालने शक्तोऽस्मि । दीयतामयं पटेलमहाशयाय । मया स्वीकृतं द्रव्यं प्रत्यर्पयिष्यामीति । ततः पटेलमहाशय एकपञ्चाशद्रूप्यकैर्व्यवहारं ग्राहितोऽभवत् । तस्यैतद्व्यवहारचालनं बाललीलासदृशमासीत् ॥

अथाहं सद्य एव ततो निष्क्रान्तः । मदीयकार्यिको जयमापद्वा पराजितो वा न जाने । अहमतीव व्रीडितोऽभवम् । यावदहं न पर्याप्तधैर्यसम्पन्नस्तावद्व्यवहारं न ग्रहीष्य इति निश्चयमकार्षम् । वस्तुतो दक्षिणाफ्रिकागमनपर्यन्तं नाहं पुनर्न्यायस्थाने पादं न्यक्षिपम् । सैष निश्चयो मदीयशौण्डीर्यद्योतको न भवति । किन्त्वेवं निर्धारणेऽहमभावविरक्तिमानिवासम् । को वा मूर्खो वृथा निजव्यवहारं नाशयितुं मत्पार्श्वमुपसर्पेत् ॥

किन्तु मोहमयीनगर्यां मत्पार्श्वमुपेष्यन्नन्य एको व्यवहारः स्थितः । स च प्रार्थनपत्रिकालेखनरूपः । पोरबन्दरपुरे मुसलमानजातीयस्य कस्यचिद्दीनजनस्य क्षेत्रं राजस्वीभूतमासीत् । स च ज्ञातमत्पितृसौजन्यस्तत्पुत्रेण मयापि तत्सदृशगुणेन भवितव्यमिति मत्वा मत्समीपमागमत् । तस्य पक्षो दुर्बल इत्यहमचिन्तयम् । तथापि तस्य प्रार्थनपत्रिकां विलिख्य प्रदातु-

Funding by IKS-MoE

मूरीकृतवान् । तन्मुद्रापणव्ययस्तेनैव वोढव्य इति निरणायि । प्रार्थनपत्रं विलिख्य मदीयमित्रवर्गस्य पुरस्तादवाचयम् । सुसङ्गतमस्तीति ते प्राहुः । प्रार्थनापत्रलेखनपटुत्वं ममास्तीति ततो धैर्यमजनि । तावन्मात्र योग्यताविशिष्टत्वं मम वास्तवमेवासीत् । द्रव्यादानमन्तरेण प्रार्थनापत्राण्यलेखिष्यं यदि प्रकाममेव कार्याणि मामुपानंस्यन् । किन्त्वेवं विधास्यतः कथमुदरम्भरणं सिध्येत् । अतोऽहमुपाध्यायवृत्तिः कुतो नाश्रयणीयेत्यचिन्तयम् । सुशिक्षिता मया ह्याङ्ग्लभाषा । यत्र क्वापि पाठशालायां मेट्रिक्युलेषन्वर्गस्थितानां वालकानामाङ्ग्लभाषाशिक्षणमङ्गीकर्तुं मम मनो हृष्यति स्म । एतदुद्योगालम्बनेन प्रायो जठरमाप्यायेत ॥

क्वचित्सुप्रसिद्धोच्चविद्यालयाधिकारिभिर्वृत्तपत्रेष्वेका प्रकटना प्रकाशिताभूद्यथा—‘आङ्गलभाषाशिक्षक एकोऽस्माभिरपेक्ष्यते । दिनस्यैकहोरामात्रमध्यापनम् । वेतनं पञ्चसप्ततीरूप्यका इति । तामेतामालोक्य तदुद्योगाभीप्सया प्रार्थनापत्रं व्यसर्जयम् । शालामुख्याध्यापको द्रष्टव्य इत्युत्तरमागतम् । महतोत्साहेन तत्र गतोऽभवम् । किन्तु बि. ए. परीक्षायामहं नोत्तीर्ण इति यावन्मुख्योपाध्यायोऽजानात् तावदेनमुद्योगं भवते न दातुं शक्यत इति मां सानुकम्पमवोचत् ॥

“ अहं लण्डनमेट्रिक्युलेषन्परीक्षायामुत्तीर्णः । लॅटिनभाषा मम द्वितीया भाषासीत् । ”

“ नूनमेवं स्यात् । परन्तु बि. ए. परीक्षायामुत्तीर्ण एकोऽस्माभिरपेक्ष्यते । ”

लिप्सितं पदमलभ्यमासीत् । नैराश्येन विक्लवोऽभवम् । मदग्रजोऽपि परं चिन्तयाक्राम्यत् । इतः परं मोहमयीनगरवासेन कालातिवाहनं निरर्थकमतो राजकोटं गत्वा तत्रैव मया स्थितिर्ग्रहीतव्येत्युभावपि निरचेष्व । ममाग्रजोऽपि लघुन्यायवाद्यासीत् । अतः प्रार्थनापत्रलेखनादिकार्यं किञ्चित् किञ्चिन्मह्यमपि प्रदातुं शक्यमभूत् । किञ्च मोहमयीमन्दिरं परित्यज्य राजकोटे स्थितिग्रहणेन महान्व्ययो रक्षितः स्यात् । इत्थमनुंसन्धाय षण्मासवासादनन्तरं मोहमयीनगरनिवासो मया पर्यत्याजि ॥

मोहमयीनगरस्थितोऽहमनुदिनं प्रधानन्यायस्थानमगच्छम् । किन्तु किमपि तत्र मया शिक्षितमिति वक्तुं न शक्नुयाम् । न हि तावच्छिक्षितुमभिज्ञोऽभवम् । अनेकशो व्यवहारगतिमबुध्यमानस्य मम निद्रा समायाति स्म । निद्रालुभिरन्यमित्रैः सह ममाप्यवस्थानाल्लज्जा वापमानो वा न हि भृशं मयान्वभावि । एवं गच्छत्सु दिवसेषु न्यायसभायामुपविश्य निद्रया घूर्णनमप्येको विलास इत्यज्ञासिषम् । अस्मात्कारणाद्भूतपूर्वो मदीयव्रीडालवोऽपि शनैस्तिरोहितोऽभवत् ॥

अधुनापि मोहनमयीनगर्यामहमिव निरुद्योगा ब्यारिस्टिर्युवकाः सन्ति चेत्तेषामेकं जीविकानिर्वाहसम्बद्धं लघुसूत्रमहं सूचयितुमिच्छामि । मदीयवसतौ ‘गीरगाम’स्थले विद्यमानायामपि पुष्यरथेन वा वैद्युतयानेन वा मया गमनमतीव विरलमासीत् । गृहात्प्रधानन्यायस्थानं प्रति पादचारेणैव गन्तव्यमिति नियमो मयावलम्बितः । एवं परिक्रमाय त्रिपादहोरामितः कालोऽपेक्ष्यत । ततः प्रत्यागमनं च पादचारेणैव निरवर्त्यत । आतपो मध्याह्ने प्रचण्डोऽभवत् । किन्तु तत्सहनं मयाभ्यस्तम् । एवंविधाचरणेन न केवलं बहुशो द्रव्यमरक्षि परन्तु मदीयमित्रेष्वने-

Funding by IKS-MoE

केष्वसकृद्रोगपीडितेष्वपि नाहमेकदाप्येवमुपतापमन्वभूवम् । अर्थार्जनोपक्रमादनन्तरमपि पादचारेणैव मदीयकार्यालयं प्रति गमनागमनाभ्यासो मया न परित्यक्तः । एतेनाद्यापि मे बहूपकृतं भवति ॥

चतुर्थोऽध्यायः

प्रथम आघातः

मोहमयीनगरे नैराश्यं प्राप्य राजकोटमहमागतः । तत्र स्वकीयं कार्यालयं पर्यकल्पयम् । कार्यं च नात्यल्पमुपानमत् । प्रार्थनापत्रादिलेखनेन प्रतिमासं त्रिंशतीरूप्यकाणामुत्तिष्ठति स्म । एवं मे कार्यलाभो न तावन्मदीयकार्यकौशलनिमित्तः परन्तु मदीयहितैषिणां प्रयत्नविशेषमूल एवासीत् । मदग्रजेन सह भागमादाय कर्मकुर्वतां न्यायवादिनामितोऽप्यधिका व्यवहारा नियमेन मिलन्ति स्म । अग्रजः स्वहस्तमागतानां प्रार्थनापत्राणां यानि मुख्यानि – यानि वा मुख्यत्वेन तेन सम्भावितानि – तानि सर्वाण्यपि महाव्यारिस्टर्जनसकाशं प्रैषयत् । यान्यस्य दीनव्यवहारिणामर्थे लेखितव्यानि तानि मदीयांशत्वेनोपानमन् ॥

व्यवहारसम्पादकमध्यस्थानां नैव किंचिदपि प्रदास्य इति मोहमयीनगरे यो नियमो मयैकान्ततोऽनुष्ठितः सोऽत्र मया नानुवर्तित इत्यभ्युपेतव्यम् । उभयत्रापि स्थलीया परिस्थितिः केवलं भिद्यत इति मां प्राहुः । तद्यथा – मोहमयीनगरे गुप्तसम्पादकस्य यथा द्रव्यं प्रदीयते तथात्रापि सर्वैरपि व्यारिस्टर्जनैर्निरपवादमेव प्रतिशतमियत्ता नियमेन स्वलब्धपारितोषिकद्रव्याद्व्यवहारसम्पादकानां न्यायवादिनां भागः प्रदीयत इति । अस्य मदग्रजोक्तसमाधानस्य प्रत्युत्तरं दातुं नाहमशकम् । स पुनः प्राह– अहमन्य न्यायवादिद्वितीयः कार्यं चालयिष्यामीति त्वया ज्ञातमेव । द्वयोरुपनमत्सु व्यवहारेषु ये तव प्रदातुं शक्यास्तानहं तुभ्यमेव प्रदित्सामि । यदि त्वं मदीयसहभागिनो जनस्य द्रव्यांशं न प्रयच्छेस्तदाहं परं क्लेशभाजनीकरिष्ये । किं च सहकृत्वनोरावयोर्यद्द्रव्यं प्रदीयेत तदर्धमवश्यं मामेवोपगमिष्यति । एतेन मदीयसहभागिन्यायवादिनः को वाधिको लाभः । स चेद्व्यवहारानेतानन्यस्मै व्यारिस्टर्जनाय प्रयच्छेत्तदा स्वीयभागं न किं स लभत इति ॥ ईदृशेन वादेनाहममुह्यम् । व्यारिस्टर्कार्यप्रसक्तेन द्रव्यांशप्रदाननियमः सन्दर्भेष्वीदृशेषु परिहातव्य एवेति मयाप्यनुमोदितम् । इत्थमहं मे मनः समादधि । अथ वा स्पष्टोक्तिभिर्विवक्षायामित्थमहं मे नेत्रयोः स्वयमेव धूलीप्रक्षेपमकुर्वीति वक्तव्यम् । परन्त्वेतद्व्यवहारजातादन्यत्र मया कदाचिदपि द्रव्यांशप्रदानं नाम न मे स्मृतिपथे विद्यते ॥

Funding by IKS-MoE

इत्थमहं पर्याप्तं धनमुपार्जयम् । किन्त्वस्मिन्नेवावसरे मदीयः प्रथम आघातो मदनुभवगोचरमागतः । आङ्ग्लेयाधिकारिणां प्रवृत्तिर्यादृशीति ममाद्यावधि श्रोत्रप्रत्यक्षमासीत् । किन्तु चक्षुषा तत्प्रत्यक्षीकरणसन्दर्भो नैतावत्पर्यन्तमुपस्थितोऽभूत ॥

पोरबन्दरसंस्थानस्य पूर्वतन‘राणा’प्रभो राजपीठारोहणात्पूर्वं मदग्रजस्तस्य मन्त्री–कर्तव्योपदेशकश्चासीत् । एवं तत्साचिव्यं कुर्वाणस्तं राणाप्रभुमसदुपदेशान्ग्राहयामासेति मदग्रजस्योपरि प्रवादोऽस्मिन्त्समये समुत्थापितोऽभूत् । स च प्रवादः ‘पोलिटिकल एजेण्ट’ इत्येतदाख्यराजकीयप्रतिनिधिं यावत्प्रसृत्य मदग्रजे तस्य दुरभिप्रायमुदपादयत् । ममायं विदेशे परिचितपूर्वः प्रायेण तत्र मित्रवन्मयि वर्तते स्म । एतत्परिचयबलादनेन सम्भाष्य स्वगतस्तस्य दुरभिप्रायो मया दुरीकर्तव्य इति मदग्रजेन व्यचिन्ति । ममेदं मनागप्यभिमतं नासीत् । विदेशे सञ्जातसकृत्परिचयादत्र प्रयोजनावाप्तये न खलु प्रयतितव्यमित्यहमचिन्तयम् । मदग्रजः परमार्थेन दोषी यदि स्यात्तदानया प्रशस्तिवाचा किमिव हि प्रयोजनम् । अथायमनपराधी तदा नियमानुरोधेन प्रार्थनापत्रमुपस्थापयितव्यम् । स्वयं निर्दोषित्वश्रद्धया निर्भयेन सता भवितव्यता प्रतीक्षणीया । एतत्सर्वं ममाग्रजस्य न किल समञ्जसमलक्ष्यत । स मामित्थमवादीत्—

“ अनभिज्ञस्त्वं काठियावाडविषयस्य । प्रापञ्चिकज्ञानमद्यापि त्वया सम्पादनीयम् । विना प्रशस्तिघोषणेन न किञ्चिदिह सिध्यति । त्वत्परिचितस्याधिकारिणोऽग्रे मामुद्दिश्य द्वित्रप्रशंसावचनोपन्यासाय साम्प्रतमवसरः प्राप्तः । तथापि त्वं मदनुजोऽपि भूत्वा सुसमयेऽस्मिन्यदि विकल्पसे तर्हि नूनं नैष तव धर्मः ” इति ॥

अग्रजस्य वाक्यं निराकर्तुमहं नाशकम् । ततोऽहं मदिच्छाविरोधेनापि ‘ पोलिटिकल-एजेण्ट’दर्शनाय प्रस्थितः । ममैतत्सम्यग्विदितमासीद्यदस्योपसर्पणे नासीन्ममाधिकारस्तथा तदुपसर्पणं मदीयगौरवहानिप्रदं चेति । तथापि तं दर्शनावसरं प्रार्थयम् । निर्दिष्टवेलायाममुं द्रष्टुमगच्छम् । पूर्वपरिचयं मया स ज्ञापितः । किन्तु विदेशकाठियावाडदेशयोरस्ति व्यत्यास इति सद्योऽभिव्यक्तमासीत् । अधिकारपीठमध्यासीनव्यक्तेरुद्योगाद्विश्रान्ताधिकारिणश्च वैलक्षण्यमस्तीत्यवागम्यत । पूर्वपरिचयस्मृतिमसावसूचयत् । किन्त्वनेन स्मरणेन तस्य दर्पोऽवर्धतेव । स किल निरूप्यमाणः ‘ तत्परिचयादद्य प्रयोजनं लिप्सुर्ननु त्वं नागतः ’ इति मामभिदधान इवालक्ष्यत । अयमेवार्थस्तदीयमुखमुद्रायामपि चित्रित इवादृश्यत । तथाप्यहं स्वकथामाख्यातुमुपाक्रमे । असहिष्णुः सोऽधिकारी मामवोचत्—

‘ भवदग्रजो दोषकारी । अलमलं तत्कथां श्रुत्वा । अवकाशो मे न विद्यते । भवदग्रजः किमपि वक्तुकामश्चेदुचितरीत्या प्रार्थनापत्रमर्पयतु ’ इति ॥

एतदुत्तरमेव पर्याप्तमासीत् । प्रायशस्तदेतन्न्याय्यमेवाभवत् । किन्तु स्वार्थी दृष्टिशून्यो भवति । स्वकथाप्रसङ्गान्नाहं व्यरंसिषम् । सोऽधिकारी समुत्थाय त्वयाद्य निर्गन्तव्यमिति मामगर्दयत् ॥

ननु श्रूयतामान्तं मदीयवचनमित्यहमवोचम्। एतेन तस्य क्रोधः समुत्कटोऽभवत्। भृत्यं स आहूय ‘अयं बहिर्नीयता’मित्यादिशत्। अथाप्यनिश्चितोऽहं तत्रैव स्थितोऽभवम्। तावच्च भृत्यः समुपेत्य मम भुजोपरि हस्तमाक्षिप्य कोष्ठाद्बहिर्मां निरकालयत्॥

अधिकारी च निर्गतः। भृत्योऽपि निर्गतः। दुःखेन च रोषेण च क्वथ्यमानहृदयोऽहं प्रतिन्यवर्तिषि। तत्कालमेव पत्रमेकं लिखित्वा व्यसर्जयम्। तस्य तात्पर्यं यथा—

“भवन्तो मामपमान्य भृत्यहस्तेन मदीयशरीराक्रमणमकुर्वत। यदि भवद्भिर्मम क्षमा नाभ्यर्थ्यते तर्हि व्यवहारेण युष्मानभियोक्ष्य इति।”

अचिरादेव तदश्वारोहः प्रत्युत्तरमानैषीत्। यस्यायमक्षरार्थः—

“असभ्यरीत्या भवन्तो मयि व्यवाहरन्। गम्यतामित्युक्ता अपि न भवन्तो निरगच्छन्। तस्मान्निर्गमनद्वारं वो दर्शयेति भृत्यं प्रति वक्तव्यमापतितम्। अथ गम्यतामिति भृत्येन बोधिता अपि भवन्तो न चलिताः तस्मात्तेन युष्मान्द्वाराद्बहिष्कर्तुं यावद्बलमावश्यकं तावन्मात्रमुपयोक्तव्यमासीत्। स्वच्छन्देन व्यवहर्तुं भवन्तः स्वतन्त्राः” इति॥

एतत्प्रतिवचनं कञ्चुककोशे निधाय म्लानमुखः सन्गृहमागमम्। अखिलमपि वृत्तं मदग्रजाय न्यवेदयम्। स नितरां व्यषीदत्। किन्तु मामसौ कथं वा समाधत्ताम्। स्वमित्रन्यायवादिभ्योऽपि कथमेतामाचष्ट। यदमुष्याधिकारिण उपरि व्यवहारेणाभियोगक्रमं नाहमज्ञासिषम्। एतत्कालमेव कमपि व्यवहारमुद्दिश्य सरफिरोजशामहेतामहाशयो राजकोटमागच्छत्। परन्तु मत्सदृशेन ब्यारिस्टर्जनेन कथमसौ द्रष्टव्यः। अतोऽहं तदाव्हायकन्यायवादिद्वारा प्रकृतसम्बद्धानि लेख्यपत्रादीनि तस्मै प्रेष्य बुद्धिवादं प्रार्थयम्। अथैवं मे तेन सन्दिष्टम्।

‘एवमिदं बहुभिर्न्यायवादिभिर्ब्यारिस्टर्जनैश्चानुभूतचरमिति बोध्यतां गान्धिः। सोऽयं विदेशतः प्रत्यग्रमागतः। अपरं च ज्वलत्प्रकृतिः। अद्याप्यनभिज्ञोऽयमाङ्ग्लाधिकारिणां स्वभावस्य। यद्ययं कमपि द्रव्यकरणमुपार्ज्य सुखी बुभूषति तदा तत्पत्रमुत्पाट्य स्वापमानस्तेन विस्मर्तव्यः। व्यवहाराभियोगेन परमनर्थापत्तिरेव न पुनः कोऽपि लाभो भविता। जीवनानुभवस्तेनेतोऽप्यधिकः सम्पादनीय इति कथ्यतामसाविति’॥

यद्यप्येषा बुद्धिवादगुलिका तदानीं विषवत्तिक्तसंवेदनामजनयत्तथापि तन्निगिरणमन्तरा मम गत्यन्तराभावादपमानस्तावन्मया सोढ एव। परमिदमुपकारकं मे संवृत्तम्। यदहमात्मानमात्मनैवाबोधयम्—

“इतः परं न कदाप्यहमात्मानमीदृग्दशां नेष्ये। नेतः परं स्नेहं निमित्तीकृत्य प्रयोजनमधिगन्तुं यतिष्ये” इति। नियमोऽयमद्यावधि मया नोल्लङ्घितः। एतदाघातवशान्मदीयजीवनपद्धतिरन्यथा पर्यणंसीत्॥

Funding by IKS-MoE

पञ्चमोऽध्यायः

दक्षिणाफ्रिकाप्रस्थानसज्जीकरणम्

मया तदाधिकार्युपसर्पणं सर्वथा दोष एव। परन्तु तदीयाग्रहक्रोधगर्वानपेक्ष्य मदीयोऽपराधस्तावदत्यल्प आसीत्। न खल्वयं बहिर्निष्कालनमार्हीत्। पञ्चनिमिषाधिकः कालस्तदीयो मया न क्षपितः। तथापि मद्वचनोपन्यास एव तस्य दुस्सहोऽभवत्। गम्यतामिति सभ्यरीत्या वक्तव्यमुचितमासीत्। किन्तु तस्याधिकारदर्पोऽत्यारूढ स्थितः। क्षमायास्तस्मिन्नामापि न श्रूयते स्मेति पश्चादवगतोऽस्मि। स्वपार्श्वमुपागतानां यदवहेलनं तत्किल तस्य साधारणो विषयः। अणुमात्रविपर्ययेणाप्यसौ रोषेण ज्वलति स्म ॥

प्रायेण मम कार्याणां भूयिष्ठोंऽशस्तदीयन्यायसभायामेव परीक्षणीयोऽभवत्। न्यायतस्तस्याधिकारिणः समाधामकरणं ममाशक्यमासीत्। तस्य प्रसादनाय नीचैः प्रह्वताश्रयणं न मेऽभिमतमासीत्। किं बहुना। व्यवहारेण त्वामभियोक्ष्य इति प्रथममेनं भीषयित्वा पश्चात्तष्णीमासिका न मे समञ्जसा प्रत्यभासीत् ॥

अत्रान्तरे तत्रत्यराजकीयप्रपञ्चस्य कार्यगतिविशेषाणामनुभवो मया बहुशः समपादि। काठियावाडदेशस्य प्रायेणाल्पाल्पराज्यभूयिष्ठतया स्वभावादेव तत्र राजनीतिकुशलैर्भूयोभिर्भवितव्यम्। संस्थानानां मध्ये परस्परं कूटनीतिप्रचारः सेवकजनानामप्यधिकारप्रेप्सयान्योन्यद्रोहचिन्तनमित्येतत्तदानीं सुप्रचरितमासीत्। राजानश्च मधुरवाचां कर्णेजपानां वचनमाकर्ण्य पराधीनप्रवृत्तयोऽभवन्। मुख्याधिकारिणः सेवकजनोऽपि लोकैः परितोषयितव्य आसीत्। तदीयनियुक्तानां प्रधानः शिरस्तदारापराख्यः प्रागलभ्यतः स्वामिनमप्यशेत। यतः स एव निजस्वामिनश्चक्षुः। स एव तस्य श्रोत्रम्। स एव तस्य मुखम्। तस्येच्छैव सर्वनियामिका। तस्य द्रव्यादायः स्वामिनो द्रव्यायतेरप्यधिकतरः। नन्वत्र क्वचिदतिशयोक्तिः स्यात्। परन्तु तस्य वेतनादप्यधिक आसीत्तदीयव्यय इत्यत्र न कोऽपि सन्देहः ॥

वातावरणमिदं विषमयमलक्ष्यत। एतदीयसंस्पर्शं कथं वा परिहरेयमित्येषैव मे सार्वदिकी चिन्ताभवत् ॥

एतेनाहं परं खेदमवापम्। इदं ममाग्रजोऽलक्षयत्। यत्र क्वाप्युद्योगलाभे तदङ्गीकरणेन मयादितः प्रपञ्चाद्विमुक्तिः स्यादित्युभावचिन्तयाव। किन्तूपप्रदानं विना प्रधानसाचिव्यं वा न्यायाधीशपदं वा कथं लभ्येत। मुख्याधिकारिणा सह कलहप्रसङ्गान्मम व्यवहारेषु हानिरुदपद्यत ॥

तदानीं पोरबन्दरसंस्थानमाङ्ग्लसाम्राज्येन नियमितस्याधिकारिणः शासने स्थितम्। तत्रत्यराणाप्रभोरधिकारवृद्धये मया प्रयत्नः करणीय आपतितः। मेराख्येभ्यस्तत्रत्यकृषीवलेभ्योऽत्यधिकः करो गृह्यते स्म। अस्मिन्विषयेऽपि मया (ॲडमिनिस्ट्रेटर इत्येतदाख्यः) शास्तिकर्ता द्रष्टव्योऽभवत्। सोऽधिकारी देशीयोप्याङ्ग्लाधिकारिणं दर्पतोऽतिशयान इवालक्ष्यत। स च स्वकार्ये विचक्षणः परन्तु तदीयकार्यकौशलात् कृषिकाणां न कोऽपि लाभः समजनि। राणाप्रभोरधिकारस्य क्वचिद्वृद्धिप्रापणे मम प्रयत्नः सफलोऽभवत्। किन्तु कर्षकसार्थस्य भारो न लघूकृतः। तदीयकष्टविचारो यथावदधिकारिणा न पर्यशोधीति मन्ये॥

एवं च प्रसक्तविषये श्रमानुरूपं फलं मया न लब्धम्। मदीयकार्यिणां च न्यायलाभो नासिध्यत्। तदर्थे न्यायसम्पादनाय यत्किमपि साधनं मयि नासीत्। बहुकृत्य 'पोलिटिकलएजेण्ट'-इत्येतदाख्यराजर्कीथप्रतिनिधेर्वा 'गवर्नर' इत्येतदाख्यराजप्रतिनिधेर्वा सन्निधाने प्रार्थनापत्रं समर्पणीयमासीत्। एवं कृतेऽपि 'वयमत्र प्रस्तावे न हि प्रवेक्ष्यावः' इति तेनाधिकारिणा विलिख्य प्रार्थनापत्रं निरकासयिष्यत। एवंविधार्थनिर्णयः कमपि शासननियमं प्रमाणीकृत्य यदि क्रियते तदा स साधुरेव स्यात्। परन्त्वत्र तस्याधिकारिणः स्वेच्छैव नियामिकाभवत्। ततो विनष्टक्षान्तिरहं संवृत्तः॥

अत्रान्तरे पोरबन्दरवर्ती वणिक्सार्थ एको मदग्रजस्य पत्रमेवं व्यलिखत्—

"वयं दक्षिणाफ्रिकादेशे वाणिज्यकर्तारः। अस्मदीयो व्यापारः परमूर्जितो भवति। तत्रास्माकमेको महाव्यवहारः प्रवर्तते। चत्वारिंशत्सहस्रसुवर्णमुद्रासाध्यकोऽयं व्यवहारस्तत्रत्यन्यायसभायां प्रवेशितोऽस्माभिः। स च बहुभिर्दिनैः प्रचलति। परमघटका न्यायवादिनो ब्यारिस्ट-जनाश्च तदर्थेऽस्माभिः स्थापिता भवन्ति। भवदीयमनुजं यदि भवन्तः प्रेषयेयुस्तदा नस्तेन बहूपकृतं स्यात्। सोऽप्यानुकूल्यमाप्स्यति। स खल्वस्मदपेक्षया व्यवहारसम्बद्धान्विषयानस्मदीयन्यायवादिभ्यः स्पष्टतरं व्याख्यायात्। कि चास्य नवीनदेशदर्शनं च सेत्स्यति नूतनपरिचयश्च सम्पत्स्यत इति॥

अस्य कृते मदग्रजो मया साकममन्त्रयत। प्रस्तुतोऽर्थो न हि मया स्पष्टमबोधि। व्यवहारमधिकृत्य न्यायवादिषु विषयनिरूपणमात्रं मया कर्तव्यमुताहो न्यायसभापि मयोपस्थातव्येत्यहं नाज्ञासिषम्। तथापि गमनोत्साहो मामग्रहीत्॥

'दादा'अबदुल्ला-वाणिज्यशालाव्यवस्थापकानामेकतमं शेठ-अबदुल-करीम-झवेरीमहाशयं मदग्रजो मां पर्यचाययत्। स च श्रेष्ठी मह्यमित्थं न्यवेदयद्यथा—

'भवद्भिस्तावदतिश्रमो न वोढव्यो भवति। सन्ति नः सुहृदो महान्त ऐरोप्यजनाः। तैः सहापि परिचयो वः सम्पत्स्यते। अस्मद्विपणिकार्येऽपि साहाय्यं कर्तुं भवतामवकाशो भविष्यति। अस्मदीयलेख्यपत्राणां भूयिष्ठो भाग आङ्ग्लभाषामयो वर्तते। तत्सम्बद्धकार्येष्वस्माकं भवद्भिरुप-

कर्तुं शक्यते। युष्मन्निवासायास्मदीयहर्म्यान्तर एव वसतिः परिकल्प्यते। तस्माद्वसतिनिमित्तव्ययभारो युष्मदुपरि न पतिष्यतीति ॥

अथाहमपृच्छम्—

' कियन्ति दिनानि मया वः सेवा कर्तव्या। कियद्वेतनं मे प्रदीयत इति।'

" समयस्तावदेकवत्सरं नातिवर्तेत। युष्मदीयगतागतस्य प्रथमश्रेणीभाटिका प्रदीयते। किञ्च भोजनोपहारव्ययेन सह पञ्चोत्तरशतं सुवर्णमुद्राश्च प्रदीयन्ते "।

तदेतदुद्दिष्टं मदीयगमनं न खलु न्यायवादिकार्यार्थमिति वक्तुं शक्येत। तद्धि केवलं तदीयविपण्यां भृत्यत्वस्वीकारार्थमेवेति स्पष्टम्। परं तु यथा कथा वा हिन्दुस्थानाद्बहिर्गन्तुमिच्छा मां नुदति स्म। गमनान्न केवलं नवीनदेशदर्शनं नवनवानुभवश्च सिध्यतः परन्तु मदग्रजस्य कुटुम्बव्ययार्थे पञ्चोत्तरशतं सुवर्णमुद्राः प्रेषयितुं शक्यं भविष्यति। तस्मात्किञ्चिदप्यविब्रुवंस्तदुक्तवेतनेन तदीयकार्यमनुष्ठातुं प्रतिपद्य दक्षिणाफ्रिकादेशं प्रति प्रस्थातुं सज्जोऽभवम्॥

षष्ठोऽध्यायः

नातालदेशप्राप्तिः

इङ्लेण्डदेशं प्रस्थितेन मया यदनुभूतचरं वियोगदुःखं तन्मे दक्षिणाफ्रिकादेशं गमिष्यतो मम नोदपद्यत। तदानीं मे जननी न हि जीवन्ती स्थिता। न केवलमहं लौकिकज्ञानसम्पन्नोऽपि तु प्राप्तदेशान्तरप्रयाणानुभवश्चासम्। राजकोटान्मोहमयीनगरं प्रति गतागतं नाम सामान्यो विषय आसीत् ॥

इदानीं मे भार्या वियोगः केवलं मम व्यथाहेतुरासीत्। विदेशात्प्रत्यागतस्य मम द्वितीयः पुत्रोऽजनिष्ट। यद्यप्यावयोर्दाम्पत्यप्रीतिरत्यन्तमेव निर्विकारा नाभवत् तथापि कालक्रमेण सा नैर्मल्यातिशयमाप्नुवन्ती स्थिता। विदेशतः परागमनोत्तरमावयोः सहावस्थितिकालोऽत्यल्पः। शिक्षणं तावद्यथा वा भवतु परमहं स्वयमेव भार्यायाः शिक्षकोऽभवम्। किञ्चास्याः कतिपयसुधारणानां सिद्धये स्वयं साहाय्यकृदासम्। यावदेतानि परिवर्तनानि सुनिष्पन्नानि स्युस्तावदप्यावयोः सहावस्थितिरावश्यकीत्यावामचिन्तयाव। परन्त्वाफ्रिकादेशाभिमुखं मम प्रसरिसृप्यमाणमनस्कतया वियोगो न दुस्सहोऽभवत्। एकवत्सरान्ते पुनरावामवश्यमेव मिलिष्यावहे इति भार्यां सान्त्वयित्वा राजकोटान्मोहमयीनगरं प्रायासिषम्॥

अथ तन्नगरमासेदुषा मया तत्रत्यदादा–अब्दुल्ला–कम्पनी–प्रतिनिधिद्वारा प्रयाणानुज्ञापकपत्रमानाययितव्यमासीत्। प्रतिनिधिस्तु नौकायां स्थलाभावं मे न्यवेदयत्। यद्यहं प्रयाण-

Funding by IKS-MoE

सत्यक्षं तदा बद्धहस्तेन मया मोहमयीनगरे तूष्णीमुपवेष्टव्यमापतिष्यत्। अथ प्रतिनिधिः प्राह – प्रथमश्रेण्यां युष्मदर्थे स्थलं सम्पादयितुमहं सर्वात्मना यत्नमकरवम्। तथापि प्रयाणपत्रं नालभ्यत। यदि नौकाबाह्यशालामध्यासितुं भवन्तोऽनुमन्यन्ते तर्हि शोभनमेव संवृत्तम्। भोजनाय ‘सलून’ शालायामेव स्थलं कल्पयितुं शक्यत इति। तदानीं हि मया प्रथमश्रेण्यामेव प्रयाणं क्रियते स्म। स्वयं ब्यारिस्टर्जनो भूत्वा नौकाबाह्यशालायां कथं वा पथिकत्वमङ्गीकुर्वीय। तस्मादहं नान्वमंसि। तस्य प्रतिनिधेर्वाक्यं यथार्थं वा मृषा वेति संशयोऽप्यजनि। न हीदं मे श्रद्धेयमासीद्यत्प्रथमश्रेण्यामपि स्थलमलभ्यं पथिकस्येति। अथास्यानुमतिं प्राप्य स्थलान्वेषणाय स्वयमहं प्रास्थिषि। नौकामारुह्य तन्मुख्याधिकारिणमद्राक्षम्। स च पृष्टस्सन्नार्जवेन मामकथयद्यथा — “अन्यदात्रैतावाञ्जनसम्बाधो न विद्येत। मोझाम्बिकादेशस्य राजप्रतिनिधिरनयैव तरण्या प्रयास्यतीति निरवकाशा हि नौः संवृत्ता” – इति ॥

यथाकथंचिदास्पदं मम किं न देयं स्यादित्यहमपृच्छम्। अधिकारी तु मामाशिरा पादाङ्गुष्ठं निभाल्य स्मयमानः प्राह—

अस्य किलैक एवोपायो विद्यते। मदीयकोष्ठेऽन्यस्यैकस्यास्पदमस्ति। तच्च प्रायेण पथिकाक्रम्यं न भवति। तथापि भवद्भ्यस्तत्प्रदास्यामीति ॥

अहं प्रमुदितोऽभवम्। बहूपकृतोऽस्मि श्रीमद्भिरित्येनमभिधाय प्रतिनिधये यथावस्तु तन्निवेद्य प्रयाणपत्रमानीनयम्। त्रिनवत्युत्तराष्टशताधिकैकसहस्रतमस्य क्रैस्तशकाब्दस्य चतुर्थमासे निजभाग्यपरीक्षणाय दक्षिणाफ्रिकादेशं प्रति महीयसोत्साहेन प्रायासिषम् ॥

अस्माभिः प्रथमं लामुनामकं नौकाबन्धनस्थानमासादितम्। तत्प्राप्तुमुपत्रयोदशदिवसा व्यपेक्ष्यन्त। अत्रान्तरे नौकामुख्याधिकारी मम परमः सखा संवृत्तः। तस्य चतुरङ्गक्रीडा स्पृहणीयाभवत्। किन्त्वस्यास्तेनाऽपि प्रत्यग्रशिक्षितत्वेपि ततोऽप्यनभिज्ञतरेण मया सह तस्य क्रीडितव्यमापतितम्। अतः स मां खेलितुमाह्वयत्। यद्यपीयं क्रीडा मया नाभ्यस्तपूर्वा तथाप्यत्र बुद्धिकौशलप्रदर्शनायास्पदमस्तीति क्रीडितॄणां मुखादाकर्णितम्। तां मुख्याधिकारी मां शिक्षयितुमन्वमंस्त। अहं चास्य सच्छिष्योऽभवम्। अपरिमेया हि मे क्षान्तिशीलता। वारंवारमहमेव पराजयमवापम्। अत एव मां शिक्षयितुमस्योत्साहः परमवर्धत। एतत्खेलने ममाप्यभिरुचिः समजनि। किन्तु सैषाभिरुचिस्तरण्यामेवान्तमगमत्। क्रीडाकुशलता च मदीया राजराज्ञीप्रभृत्यक्षाणां चालनक्रमाववोधमात्रे विश्रान्ताभवत् ॥

लामुनाम्नि बन्धनस्थाने नौका त्रिचतुरहोरापर्यन्तमस्थात्। ग्रामावलोकनकौतुकेनाहमवातरम्। मुख्याधिकारी प्रागेवावतीर्य स्थितः। स च मां प्राबोधयत्—स्थानेऽस्मिंश्चिरावस्थानं नाति श्रद्धेयम्। अतो झटिति परावर्तध्वमिति ॥

अत्यल्पोऽयमासीद्ग्रामः। तत्रत्यपत्रप्रेषणाधिकरणमन्दिरमगच्छम्। तत्रत्यलेखकं भारतीयमालोक्य परमहृष्यम्। तेन साकं कथालापमकरवम्। तत्राफ्रिकादेश्यानपि जनानपश्यम्।

तदीयरीतिनीतिपरिज्ञानाय प्रयत्नमकार्षम् । तत्र मे परं कौतूहलमासीत् । सर्वस्यास्यकृते कियानपि कालो गतः ॥

मम परिचिताः केचन नौकाबाह्यशालाश्रयिणः पथिकाः पूर्वमवतीर्णाः स्वतः पाकं निष्पाद्य कृताहाराः शनैस्तरणिमुपगन्तुं सज्जीभवन्ति स्म । अहमेतानवलोक्य तैरेव साकं द्रोणीमारुह्य प्रास्थिषि । नौकाबन्धनस्थाने जलधिरत्यारूढोऽभवत् ! अस्मद्द्रोण्यां भारस्तद्द्रोणीयोग्यतामतिक्रम्य स्थितः । द्रोणीरज्वा नौकाधिश्रयिणीं बन्धयितुं प्रवाहरभसादशक्यमभूत् । यावद्द्रोणी निश्रेणिकामुपासर्पत्तावत्प्रवाहस्तां दूरमपाकर्षत् । अथ वृत्तं प्रस्थानसूचकं प्रथमशिञ्जितं च । अहमुद्भ्रान्तोऽभवम् । उपरिष्ठान्मुख्याधिकारी परिस्थितिमस्मदीयां प्रेक्षते स्म । स च पञ्चनिमिषकालमात्रं नौकाविधारणमाज्ञापयत् । निकट एवान्या द्रोणी स्थिता । तामेनां मदर्थे सुहृदेको दशरूप्यकैर्भाटयित्वा स्वीकृतवान् । मामस्यां दुर्वहभारवाहिन्या द्रोण्या अवातारयन् । तावच्चोपरिष्ठान्नौकाधिरोहिणी समुद्धृत्यापनीताभवत् । तस्मादहं रज्ज्वालम्बनेनोपर्याकृष्टोऽभवम् । तत्क्षणमेव नौका प्रचलिता । इतरे पान्थाः पश्चादवास्थिषत । प्राङ्मुख्याधिकारिणा कृतस्य प्रबोधनस्य रहस्यमिदानीं मया विदितमासीत् ॥

लामुग्रामान्मो‘म्वासां’ ततो ‘झांझीबार’स्थलं च क्रमेणासादयाम । इह चिराय — अष्टादशदिवसपर्यन्तं — स्थातव्यमभूत् । इतश्चान्येन नौकायानेन प्रायासिषम् ॥

मुख्याधिकारिणोऽहमतिशयितप्रेमपात्रमासम् । परन्त्वेतदसाधुरूपमालम्बत । स किल मामाङ्ग्लमित्रमेकं च स्वेन सह विहरणाय समाह्वयत् । त्रयो वयं मुख्याधिकारिणो द्रोणीमारुह्य तीरमासादयाम । तदेतद्विहाररहस्यस्याहमत्यन्तमनभिज्ञोऽभवम् । अहं तावदीदृग्विषयस्फूर्तिशून्य इति कथं वा मुख्याधिकारी जानीयात् । कश्चन माध्यस्थकारोऽस्मान्नीग्रोस्त्रीमन्दिरमेकमनैषीत् । तत्र च प्रति स्वमेकमेकं कोष्ठं प्रावेशयत् । अहं लज्जया विषादेन च तूष्णीमस्थाम् । हन्त सा वराकी तरुणिः कीदृशं मा मन्यतेति भगवानेव जानाति । मुख्याधिकारिणा पुनराहूतमात्र एव यथा मयान्तर्गतं तथैव बहिर्निरगच्छम् । स हि तदा मदीयसात्विकत्वमजानात् । अहमादौ मृशमवमानितमात्मानममंसि । इदं च स्मारं स्मारमहं जुगुप्सामगम् । एतेन मदीयचारित्रस्यावमानकरत्वभावना प्रमृष्टनष्टाभवत् । एनां सहोदरीं दृष्ट्वा मम मनसि विकारलेशस्याप्यनुदयाद्भगवन्तमहमस्तौषम् । आत्मनो मनोदौर्बल्यमनुचिन्तयतः स्वस्मिन्नेव कुत्सा समजनि । आहूयमानः कोष्ठान्तर्न हि प्रविशामीति वक्तुमधीरोऽहमासमिति स्वयमात्मनोऽनुकम्पनीयोऽभवम् ॥

मम जीविते तृतीयवारमित्थमहं दैवेन परीक्षितः । एवं मृषालज्जया बहुभिर्निष्कलङ्कैरपि युवकजनैरुत्पथमाकृष्टैर्भवितव्यम् । मम तावदुन्मार्गगमनान्निवृत्तिर्न खलु पुरुषप्रयत्नात् । कोष्ठाभ्यन्तरे नाहं गमिष्यामीति यदि निश्चितमेवाहमवक्ष्यं नूनं तदा दुर्मार्गपतनात् स्वप्रयत्नेनैवात्मानमहमरक्षमिति कथनीयं स्यात् । करुणामयो भगवानेव मां पापादभ्यरक्षदिति वक्तव्यम् ।

न केवलमेतद्वृत्तादीश्वरे मम श्रद्धा दृढत्वमापन्नापितु मृषाह्रियः परित्यागं बहुशोऽहमशिक्षिषि ॥

अस्मिन्नौकानिवेशस्थले सप्ताहपर्यन्तमवस्थातव्यत्वाद् ग्रामस्यान्तरेकं मन्दिरं भाटकेनाग्रहीषम्। नगरे तत्परिसरप्रदेशे च सम्यक् परिक्रम्यावैक्षिषि । झांझीबारनगरवर्तिनां समृद्धसस्यादीनां रामणीयकमभ्यूहितुं सन्दृष्ट'मलबार'पत्तनानामेव जनानां शक्यं स्यात्। तत्रत्यद्रुमाणां महत् परिमाणं बृहन्ति फलानि चावलोकयतो ममाश्चर्यमजायत ॥

ततः प्रस्थाय 'मोझांबिका'स्थलं प्राप्य 'मे' मासान्ते नातालदेशमासादयाम ॥

सप्तमोऽध्यायः

केचिदनुभवाः

'**डुरबन**' इति नातालदेशे समुद्रतीरोपनिविष्टमेकं नगरम्। इदं जनाः 'पोर्ट नाताल' इत्यपि कथयन्ति। मां नेतुमबदुल्लाशेठमहाशयो नौकानिवेशस्थानमागमत्। नौकायां बन्धनमण्डपं प्रापितायामहं स्वस्वमित्राणां निनीषया नौकामारुह्योपसर्पतो जनानवलोकयन्निहस्थभारतीयैः सह लोका गौरवेण न व्यवहरन्तीत्यज्ञासिषम्। न किल मयेदं न प्रत्यक्षीकृतं यदबदुल्लाशेठमहाशयस्य परिचितास्तत्सन्निधावात्मनः प्रकृष्टं मन्यतामिवाविष्कुर्वन्तः स्थिता इति। इदं मे मानसमव्यथयत्। शेठमहाशयस्य तु स्वात्मानं प्रत्यन्येषामेवंविधा प्रवृत्तिरभ्यस्तचरी। मत्प्रेक्षकाः कुतूहलविशेषं प्रदर्शयन्ति स्म। मदीयवेषकलापो हीतरभारतीयानां वेषेण सदृशो नासीत्। तदानीमहं विदेशीयह्रस्वकवचं वङ्गीयकटाहनिभमुष्णीषं चाधारयम् ॥

अबदुल्लाशेठमहाशयो मां स्वकीयविपणिमन्दिरं नीत्वा स्वकोष्ठपार्श्वस्थिते मदर्थसज्जीकृते कोष्ठागारे वसतिमग्राहयत्। आवामन्योन्यभाषानभिज्ञा बभूव। स्वानुजेन मम हस्ते प्रेषितानि लेख्यपत्राणि वाचयित्वा स भूयो विस्मितोऽभवत्। ममेह प्रेषणं नाम गृहे पूजार्थमवस्थापनायैकगजस्य प्रेषणमिवास्यालक्ष्यत। मदीयो वेषो मदीया जीवनरीतिश्चैरोप्यजनस्येव बहुव्ययकरौ तस्य प्रत्यभाताम्। मद्योग्यो नियोगः कोऽपि सद्यः प्रदेयो न स्थितः। तदीयव्यवहार'ट्रान्स्वाल'देशे प्रचलति स्म। तत्र सद्य एव मत्प्रेषणं न सङ्गतमासीत्। मम योग्यता प्रामाणिकता च कीदृशीति ननु प्रागवगन्तव्यम्। मदीयचर्यापर्यवेक्षणाय राजधान्यां प्रिटोरियानगरे मदर्थमावासपरिकल्पनं निवार्यमासीत्। तन्नगरमेव हि प्रत्यर्थिनां निवासः। यद्यमी कदाचिन्मामनुप्रविश्य वशीकुर्युस्तदा किं करणीयम्। प्रसक्तव्यवहारभारो न चेन्मयि निवेश्येत तदा कुत्र वान्यत्र कर्मण्यहं नियोक्तव्यः। लेखकास्तावदितराणि

कार्याणि मदपेक्षया सम्यक्तरामनुष्ठातुमक्षमन्त। प्रमादकरणे तेषु दण्डनिपातः शक्य आसीत्। मया तु कृते प्रमादे किं नु खलु कर्तव्यम्। एवं गते वस्तुनि व्यवहारसम्बद्धकार्येष्वनियुक्ते मयि मदवस्थापनं निरर्थकमेव स्यात्॥

अक्षरज्ञानहीनोऽप्यबदुल्लाशेठमहाशयः सुतरामनुभवज्ञानसम्पन्नोऽभवत्। कुशाग्रबुद्धिरसौ स्वशक्तिं स्वयमवेदीत्। आङ्ग्लभाषाज्ञानमपि संव्यवहाराय यावदावश्यकं तावदनेनाभ्यासबलात्सम्पादितमासीत्। तावतानुगृहीतः सन्नर्थनिक्षेपस्थानेषु ‘बेन्क’ इत्यादिषु नियुक्तैस्तत्कार्यनिर्वाहकैः सह द्रव्यादानप्रदानादि व्यवहारानैरोप्यवणिग्भिः सह क्रयविक्रयादि व्यापारान् न्यायवादिभिः सह व्यवहारविषयप्रस्तावांश्चेत्येतदादीनि समस्तान्यपि कार्याण्यसौ निरवर्तयत्। भारतीयास्तं महता गौरवेण पश्यन्ति स्म। तस्यापणो भारतीयजनस्यापणेषु महत्तमः। अथवा महत्तमानां तदीयापणानामयमेकतमः। एवंविधानुकूल्यसम्पत्तियुक्तस्यापि तस्य शेठमहाशयस्य दोष एको वक्तव्यः। स हि परं संशयालुप्रकृतिरासीत्॥

स किल ‘इस्लाम’मताभिमानी। तन्मत धर्मस्य व्यतिक्रमानुद्दिश्य कथालापप्रसङ्गस्तस्य बहु प्रियः। अरबीभाषानभिज्ञोऽप्ययं ‘कुरान’वेदशास्त्रे प्रायेणेस्लाममतधर्मसम्बद्धनिखिलसाहित्येऽपि सुश्लाघ्यपरिश्रमोऽभूत। दृष्टान्तास्तु तदीयजिह्वारङ्गे नर्तनमकुर्वन्। तत्सङ्गादहमिस्लाममतीयव्यावहारिकज्ञानं बहुधा सम्पादितवान्। सञ्जातसम्यक्परिचययोरावयोरत्यायता धर्मजिज्ञासाः प्रचलन्ति स्म॥

डरबननगरप्राप्त्यनन्तरं द्वितीये तृतीये वा दिवसे स मां तत्रत्यन्यायसभामनैषीत्। तत्र मां कतिपयजनैः परिचाय्य स्वकीयन्यायवादिनः पार्श्वे समुपावेशयत्। न्यायाधिपतिर्मामेवाभिलक्ष्यन्नपनीयतामुष्णीष इत्याज्ञापयत्। तथाकर्तुमहमनिच्छन्न्यायसभां विहाय निरगच्छम्॥

अत्रापि कलहप्रसङ्गो मदीयभाले लिखितः। केचिद्भारतीयाः किमित्युष्णीषापनयनमित्यमादिश्यन्त इत्यबदुल्लाशेठमहाशयो मे न्यवेदयत्। परिहित‘मुस्लीम’वेषाणां ‘मुस्लीमशिरोवेष्टनधारणमनिषिद्धम्। परन्तु भारतीयैरन्यैर्न्यायसभां प्रविष्टमात्रैरेव शिरोवेष्टनमपनेतव्यमेवासीत्॥

एतत्सूक्ष्मभेदस्य तत्त्वावबोधनात्पूर्वं केचिद्वृत्तान्ताः सविस्तरमुपवर्णयितव्या भवन्ति। तत्रत्यभारतीयाः पृथक्पृथक्पक्षानाश्रित्य स्थिता इति द्वित्रैरेव दिवसैरहमज्ञासिषम्। ‘मुसलमान’-वणिजां पक्षस्तावदेकः। तेऽमी किलात्मानं‘अरब’ न्यपादिशन्त। द्वितीयस्तु तल्लेखकानां पक्षः। पारसीलेखकानां च पक्षस्तृतीयः। हिंन्दुलेखकैरवश्यमेवारबीयैः सह मिलितव्यमासीत्। अन्यथामीषामुभयतो भ्रंशः प्रसज्यते स्म। पारसीलेखकाः स्वयमात्मानं ‘पर्शियन’जातीयानख्यापयन्त। इमे त्रयः पक्षा बहुशः सुपरिचिताः संव्यवाहरन्। अस्मात्पक्षत्रयादपि महीयानेकः पक्ष आसीत। स च द्राविडान्ध्रोत्तरहिन्दुस्थानीयकर्मकराणां समवायः। तेषां कर्मकराणामेके

Funding by IKS-MoE

प्रतिज्ञाबद्धा अन्ये प्रतिज्ञाबन्धमुक्ताः । प्रतिज्ञाबद्धा नाम पञ्चवत्सरपर्यन्तं भृतिकर्मकर्तुं ‘ ॲग्रीमेण्ट’ इत्यपराख्यां प्रतिज्ञामङ्गीकृत्य नातालदेशमुपगताः कर्मकराः । ‘ ॲग्रीमेण्ट ’ इत्याङ्ग्लशब्दस्यापभ्रंशो ‘ गिरमीट ’ इति । अत एवैषां कर्मकराणां ‘ गिरमीटिया ’ इत्याख्या प्रसिद्धाभवत् । एतैः सह पूर्वोक्तत्रैपक्षिकाः कार्यवशादेव केवलं व्यवहरन्ति स्म । न पुनरन्यविधं कमपि सम्बन्धमघटयन् । आङ्ग्लेयजनाः कर्मकरानेतान् ‘ कुली ’ इति व्यपादिशन् । किञ्चैषामितरभारतीयापेक्षया समधिकसङ्ख्याकत्वादखिलानपि भारतीयान्निर्विशेषमेव ‘ कूली ’ इति ‘ सामी ’ इति समबोधयन् । बहूनां द्राविडनाम्नामन्ते ‘ सामी ’ इति पदनिवेशस्य कारणमेतदेव । इदं सामीपदं स्वामीति संस्कृतशब्दस्य रूपान्तरम् । स्वामिशब्दस्यार्थस्तु स्वत्वोपेतः पुरुष इति । ‘ सामि ’ इति सम्बोध्यमानश्चतुरः कोऽपि भारतीयस्तेन क्रुद्धश्चेदेवं प्रतिब्रूते स्म । यथा – भवन्तो मां सामीति सम्बोधयन्ति । तस्य शब्दस्यार्थो यजमान इत्येतत्कथं भवद्भिर्विस्मृतम् । न खल्वहं वो यजमान इति । एतदाकर्ण्य केचिदैरोप्या वैलक्ष्यमाप्नुवन् । केचिदन्ये क्रोधपरास्तं नितरामशपन् । अपरे तु सति सम्भवे तमताडयंश्च । सामीपदं हि तेषां मतेत्यन्ततिरस्कारद्योतकमासीत् । यजमान इति तस्यार्थकल्पने सम्बोधयिता सुतरामवमानितः स्यात्खलु ॥

एभिः कारणैरहं ‘ कूलीब्यारिस्टर् ’ इति ख्यातिमागतः । वणिजः सर्वेऽपि ‘ कूलीवणिज ’ इत्याहूयन्ते स्म । एवं कुलीपदं मूलार्थलोपं प्राप्य तत्रत्यानामखिलभारतीयानां साधारण्येनैव सम्बोधनार्थकमकल्प्यत । मुसलमानजातीयो वणिगेवं केनापि सम्बोधितश्चेदसौ क्रुद्धः सन्नाहमस्मि ‘कुली’ परन्तु‘अरबीय’ इति वा वाणिजोऽहमिति वात्मानं ख्यापयति स्म । आङ्ग्लजनस्तथासम्बोधयिता विनयसम्पन्नश्चेत् क्षमामभ्यार्थयत । एवमुष्णीषधारणवृत्तान्तः परं महत्त्वमापत् । अपनीते शिरोवेष्टने मानभङ्गः सोढव्य एवापतेत् । तस्मादहमचिन्तयम् — देशीयमुष्णीषं बहिष्कृत्याङ्ग्लशीर्षकस्य स्वीकारेण न केवलं मानहानिप्रसङ्गो न सम्भवेदपि तु तन्मूलकलहो विवादश्च परिहार्यौ भविष्यत इति ॥

किन्त्वेतदबदुल्लाशेठमहाशयो नान्वमोदत । स किलेत्थमवादीत् — एवंविधा भवदीयप्रवृत्तिरनर्थहेतुरेव स्यात् । देशीयशिरोवेष्टनस्यैव धारणे बद्धाभिनिवेशानां गतिः कष्टा भविष्यति । भवतां देशीयोष्णीष एव शोभते । यद्याङ्ग्लशीर्षकं भवन्तो धारयेयुस्तदा प्रेक्षकाः सर्वेऽपि युष्मानाङ्ग्लेयविश्रान्तिगृहनियुक्तं ‘ व्वेटर ’ इति प्रसिद्धं परिचारकं मन्येरन्निति ॥

अस्यां सूचनायां लौकिकज्ञानं स्वदेशाभिमानः क्वचित्सङ्कुचितदृष्टिप्रसङ्गश्च द्योतन्ते स्म । तद्गतं लौकिकज्ञानं तु सुदर्शमेव । देशीयोष्णीष एव धारणीय इत्याग्रहोक्तिर्देशाभिमानमन्तरा न किल सम्भाव्येत । परिचारकानधिकृत्य तिरस्कारवचनेन तस्य विशालहृदयाभावो व्यक्त आसीत् । भारतीयगिरमीटियेषु हिन्दुमुसलमानक्रैस्तभेदेन विभागत्रयमवर्तत । क्रैस्तमतावलम्बिनां गिरमीटियानामपत्यानि चरमविभागप्रविष्टानि बभूवुः । त्रिनवत्युत्तराष्टशताधिकसहस्रतमे क्रैस्तशकाब्देऽपि तेषां सङ्ख्या सुबहुलैव स्थिता । एते सर्वेऽप्याङ्ग्लरीतिमेवानुसृत्य कवचादिनेपथ्यमधारयन् ।

एषां भूयांसो जना अतिथिमन्दिरेषु सेवावृत्तिमाश्रित्य काष्ठेन जीवन्ति स्म । एतानेव मनसि कृत्या-बदुल्लाशेठमहाशय आङ्लशीर्षकधारणं प्रकृत्य व्याख्यामुदटङ्कयत् । अतिथिगृहे सेवावृत्त्यवलम्बनं न गौरवायेत्यगण्यत । अद्यापि बहूनां मनस्ययमेवाभिप्रायो निरूढो भवति ॥

अबदुल्लाशेठमहाशयस्य बुद्धिवादो मम सर्वथानुमोदनीयोऽभवत् । मदीयशिरोवेष्टनमधिकृत्य न्यायसभायां यत्संवृत्तं तदखिलं वृत्तपत्रिकासु प्राकाश्यं नीत्वा स्वस्य निरपराधितामहं समर्थितवान् । तासु किलायं प्रश्नो बहुतरं चर्चितोऽभवत् । वृत्तपत्रिका मामनिष्टागन्तुकोऽयमित्याख्यापयन् । इत्थमहं दक्षिणाफ्रिकादेशेऽवतीर्णः स्वल्पेनैव कालेन प्रख्यातिमागतः । केचिन्मदीयपक्षमवालम्बन्त । अपरे केचिन्मां धूर्त इति बलवदनिन्दन् ॥

मदीयशिरोवेष्टनं दक्षिणाफ्रिकादेशे यावदहं स्थितस्तावन्मन्निकट एव प्रायेण स्थितमभूत् ' कदा वा किं निमित्तं वा तस्य धारणं तद्देशे परित्यक्तमित्येतदग्रे स्पष्टीभविष्यति ॥

अष्टमोऽध्यायः

प्रिटोरियानगरं प्रति गमनम्

डरबननगरवर्तिभिः क्रैस्तमतावलम्बिभिर्भारतीयैः सह शीघ्रमेव मे परिचयोऽजायत । तत्रत्यन्यायसभाद्विभाषिणः पॉलमहाशया 'रोमनकॅथलिक'सम्प्रदायानुवर्तिन आसन् । तत्परिचयं 'प्रोटेस्टण्टमिशन'शालाशिक्षकाणां सुभान–गॉडफ्रेमहाशयानां परिचयं च समपादयम् । एषां पुत्रो जेम्स–गॉडफ्रेमहाशयो व्यतीतवत्सरे हिन्दुस्थानमागत्य दक्षिणाफ्रिकादेशे भारतीयप्रतिनिधीनामेकतमोऽभूत् । एवं तत्कालमेव पारसी रुस्तमजी-आदमजीमियाँखान-इत्याख्ययोः पुरुषयोरपि परिचयो जातः । एतानि मित्राणि कार्यवेलां विना नान्यदा क्वापि परस्परममिलन्त । तेषामन्योन्यसमागमः क्रमेण यथा समवर्ततेत्यग्रे निरूपयिष्यते ॥

इत्थमुपचीयमानपरिचये मयि दादाअबदुल्लाकम्पनीसङ्घस्य न्यायवादिनः सकाशादेकं पत्रमागतम् । तत्र ह्येवं निरूपितमासीद्यद्व्यवहाराय युष्माभिः सज्जीभवितव्यम् । अबदुल्लाशेठमहाशयेन वा तदीयप्रतिनिधिना वा प्रिटोरियानगरमागन्तव्यमिति ॥

अबदुल्लाशेठमहाशयस्तत्पत्रं वाचयितुं मे प्रदाय किं प्रिटोरियानगरं भवन्तो गच्छन्तीति मामपृच्छत् । अथाहमवोचम्——व्यवहारविषयं तावद्भवत्सकाशादवबुध्य प्रतिब्रूयाम् । न खल्विदानीं जाने यन्मया तत्र गतेन कर्तव्यमिति । ततोऽसौ व्यवहारविस्तरो वर्ण्यतामिति निजलेखकमाज्ञापयत् ॥

व्यवहारविषयमवबोद्धुं प्रवृत्तस्य ममैतद्विदितमासीद्यन्मया 'श्रीगणेशाय नमः' इत्युपक्रम्य शिक्षाद्यापि प्रारम्भणीयेति । यदाहं झांझीबारनगरे कियन्तं कालमवात्सं तदैकस्मिन्दिने

तत्रत्यन्यायसभायां प्रचलन्तं कार्यकलापमत्रेक्षितुमगच्छम्। तत्र कश्चनपारसीन्यायवादी साक्षिणमेकमायव्ययगणनालेख्यमादाय प्रतिप्रश्नान् पृच्छति स्म। तदेतन्न किञ्चिदप्यहं ग्रहीतुमशकम्। न खलु मया पाठशालायां वा विदेशावस्थितिकाले वायव्ययगणनाप्रसङ्गो मया शिक्षितः॥

दक्षिणाफ्रिकादेशे मत्कर्तव्यतया यन्निर्दिष्टं व्यवहारकृत्यं तदखिलमप्यायव्ययगणनासम्बद्धमेवासीत्। तादृशगणनाभिज्ञा एव तद्व्यवहारतत्त्वमवगन्तुं बोधयितुं चाक्षमन्त। आयोऽयं व्ययोऽयमिति यथा यथा लेखको मे न्यवेदयत्तथा तथा मदीया बुद्धिरमोमुह्यत। ‘पि.नोट’ इत्येतदर्थस्याहमनभिज्ञ आसम्। सैष शब्दः शब्दकोशे न हि मया दृष्टः। मदीयामज्ञतां लेखकाय न्यवेदयम्। ‘पि.नोट’ इत्येतत् ‘प्रॉमिसरीनोट’ इत्यस्य संक्षिप्तरूपम्। तस्यार्थश्च वाग्दानपत्रमिति तन्मुखादज्ञासिषम्। आयव्ययगणनानिरूपकं पुस्तकमेकं क्रीत्वापठिषम्। ततश्चत्मनि मनागिव श्रद्धा समजनि। व्यवहारवस्तुनः स्वरूपमग्रहीषम्। अब्दुल्लाशेठमहाशयो यद्यपि गणनालेख्यस्वरूपानभिज्ञस्तथाप्यायव्ययसम्बद्धानतिजटिलानप्यर्थान् स्वस्य व्यावहारिकज्ञानसम्पत्त्या विशदीकर्तुमशक्नोदिति मया प्रत्यक्षीकृतम्। अथाहमेनमवोचम्—प्रिटोरियानगरं गन्तुमहं सज्जोऽस्मीति। तत्र भवद्भिः कुत्र स्थीयत इति शेठमहाशयो मामपृच्छत्। यत्र मया स्थातव्यमिति श्रीमद्भिरुद्दिष्टं तत्रेत्यहमवोचम्। अथासौ पुनराह स्म—बाढम्। अस्मदीयन्यायवादिने पत्रमेकं लेखितास्मि। स च भवतां तत्र निवासं कल्पयिष्यति। प्रिटोरियास्थमदीय‘मेमण’मित्राणामपि लेखिष्यामि। परन्तु तत्सहवासो भवतामनुचित इति मे प्रतिभाति। प्रतिपक्षीयाः प्रिटोरियानगरे प्रबला भवन्ति। अस्मदीयान्येकान्तलेख्यपत्राणि यदि कदाचित्तेषां यस्य कस्यापि हस्ते निपतेयुस्तदास्माकव्यवहारस्य महाननर्थः सम्भवेत्। तस्माद्दूरं भवद्भिस्तैः साकमतिपरिचयः परिहर्तव्य इति॥

ततोऽहमवोचम्—

युष्मदीयन्यायवादिना यत्र मे वसतिः परिकल्प्येत तत्राहं निवत्स्यामि। अथवा स्वयमेव स्थलमन्विष्य वसतिं ग्रहिष्ये। भवन्तोऽत्र निश्चिन्ता भवन्तु। द्वयोरावयोर्यद्रहस्योऽर्थस्तं खलु न कस्यापि प्राणिनः प्रकाशयिष्ये। किन्तु प्रतिपक्षीयाणां परिचयमहं सम्पादयितुमिच्छामीत्येतत्सत्यमेव। तैः सह मैत्रीमपि कलयितुमिच्छामि। सति सम्भवे न्यायस्थानाद्बहिरेव व्यवहारं व्यवस्थापयितुं यतिष्ये। ननु तैयबशेठमहाशयो भवतां बन्धुरेवेति॥

प्रत्यर्थी दिवङ्गत शेठतैयब-हाजी-खानमहमदमहाशयः श्रीमदब्दुल्लाशेठमहाभागस्य समीपसम्बन्ध्यासीत्॥

सन्धानवचनोपन्यासं मदीयमाकर्ण्य शेठमहाशयः किञ्चिदुद्भ्रान्त इवालक्ष्यत। किन्तु डरबननगरमागतस्य मम षट्सप्तदिनानां व्यतीतत्वादन्योन्यस्वभावपरिज्ञानमावयोः क्रमेण जायते स्म। नाहमिदानीमलङ्कारगज आसम्॥

Funding by IKS-MoE

अथ शेठ महाशयेनोक्तम् —

हा....आ....आ। सन्धानापेक्षया प्रशस्यतर उपायः कोऽपि नास्ति । किन्त्वावयोः समीपबान्धव्यवशादन्योन्यचित्तपरिज्ञानं सम्यगस्ति। तैयबशेठोऽयं न खलु सन्धानं झटित्यङ्गीकुर्यात्। अपि चास्मासु मनाक् प्रमत्तेषु सर्वप्रकारैरस्मदनुमतिं सम्पाद्य पर्यन्तेऽस्मानेव गर्ते निपातयेत्। अतो भवद्भिः सर्वकार्येष्वपि द्विरालोच्य प्रवर्तितव्यमिति ।।

ततोऽहं प्रत्यवोचम्—

अलं विचिन्त्य। व्यवहारमधिकृत्य तैयबशेठमहाशयेन वा केनाप्यन्येन वा विशेषभाषणप्रसङ्गस्तावत् कोऽपि नास्ति। एतावन्मात्रमहं तस्य सूचयितुमिच्छामि यदन्योन्यमेव स्वयं सन्धिमाकलय्य न्यायवादिनां घस्मरमुखेषु द्रव्याहुतिक्षेपो वरं वः परिहर्तव्य इति ।।

आगमात्सप्तमे वाष्टमे वा दिवसे डरबननगरादहं निर्गतोऽभवम्। मदर्थे प्रथमश्रेणीप्रयाणपत्रमेकं क्रीतस्थापितमासीत्। शयनीयापेक्षायां तदर्थमन्यदनुज्ञापकपत्रं शिलिङ्गपञ्चकेन क्रेतव्यमासीत्। अवदुल्लाशेठमहाशयस्तादृशपत्रसम्पादनाय मां बलवदुपारुधत्। परन्तु स्वाभिनिवेशाच्च दम्भादधिकव्ययं कर्तुमनिच्छया च मया नेदमङ्गीकृतम्। अथ शेठमहाशयो मामेवं प्राबोधयत्—

'इह तावन्निरूप्यताम्। नेदं हिन्दुस्थानम्। देशस्यास्य रीतिरन्यादृशी। भगवदनुग्रहात्सम्पन्नसर्वसमृद्धिना न खलु कार्पण्यमाश्रयणीयम्। यद्यदावश्यकं तत्तदवश्यमेव ग्रहीतव्यमिति ।।

अहमस्य मदीयकृतज्ञतामाविष्कृत्य 'अलं चिन्तया' इत्यवोचम् ।।

धूमशकटी नातलदेशस्य राजधानीं मॅरित्सबर्गनगरं रात्रौ नवघण्टावादनवेलायामासदत्। अत्र हि पथिकेभ्यः शयनीयानि दीयन्ते स्म। धूमशकटाधिकरणनियुक्तः कश्चन पुरुषो मामुपेत्य 'अपि शयनीयमपेक्ष्यते' इत्यपृच्छत्। 'मा तावत्। अस्ति मन्निकटे' इत्यहमचकथम्। सोऽपि निर्गतः। अत्रान्तरे पान्थः कश्चिदुपेत्य मय्येव बद्धदृष्टिर्मामैक्षत। "विवर्णोऽयं जन" इति च मामवगत्यायमपरितुष्टोऽभवत्। अथ स बहिर्गत्वा द्वित्रानधिकारिण आनयत्। तेषां नैकोऽपि मामाभाषयत्। अन्यः कश्चिदधिकारी मत्पार्श्वमुपेत्य 'बहिरेहि। चरमशकटं प्रतिगच्छेः' इत्यवोचत्। मन्निकटे प्रथमश्रेणीप्रयाणपत्रमस्तीत्यहमवोचम्। अथ सोऽब्रवीत्—'तत्तावदस्तु नाम। त्वया तु पृष्ठस्थशकटे गन्तव्यम्' इति। 'डरबननगरे शकटमेतदारूढं मां न कोऽपि न्यरुधत्। अहमस्मिन्नेव शकटे प्रयातुमिच्छामि' इत्यहमचकथम्। अथ सोऽधिकारी मां प्राह—'खलूक्त्वा। इतस्त्वया शकटादवतरीतव्यम्। नो चेद्राजभटमाहूय त्वामवतारयिष्ये' इति। ततोऽहमवदम्—सोऽयमाहूयतां तर्हि। स्वयमेवाहं नैवावतरिष्यामीति। अथ राजभट आगतः। स मां हस्तग्राहं गृहीत्वा बहिराकृष्य निरकालयत्। मदीयवस्तून्यपि बहिः प्राक्षेपयत्। नाहमितः शकटान्तरं गमिष्यामीत्यवोचम्। प्रचलिता धूमशकटी। अहं पथिकमण्डपं

गत्वा तत्रोपाविशम् । मदीया हस्तपेटी मन्निकट एव स्थिता । इतराणि तु मदीयवस्तूनि नाहमस्पृशम् । धूमशकटाधिकरणनियुक्तास्तानि स्वायत्तीचक्रुः ॥

तदानीं शैशिरः कालः । दक्षिणाफ्रिकाखण्डस्योन्नतप्रदेशेषु शिशिरऋतौ शीतमतिमात्रमुल्बणं भवति । उन्नतप्रदेशवर्तिनि मॅरित्सबर्गनगरे शीतं दुस्सहमासीत् । मम दीर्घकवचः सम्भारान्तरमध्यगतोऽभूत् । तं मार्गितुमधीरोऽभवम् । मा कश्चिन्मे भूयोऽप्यपमानं कार्षीदिति । तदहं शीते कम्पमान उपाविशम् । तस्मिन् कोष्ठे दीपो न स्थितः । अर्धरात्रे पान्थः कश्चिदागमत् तस्मिन्मया साकमालपितुकामेऽपि मदीयमनसः परिस्थितिस्तदनुकूला नाभवत् ॥

अहं मदीयामितिकर्तव्यतां प्रत्यालोचयितुं प्रावर्तिषि । स्वाधिकारसमर्थनाय किमहं विवदेय किमुवा हिन्दुस्थानं प्रति निवर्तेयाहोस्विदपमानमुत्कटमपि सोढ्वा प्रिटोरियानगरं प्रति निवृत्य समाप्तव्यवहारकृत्यः स्वदेशं परावर्तेय । व्यवहारकृत्यं परित्यज्य पलायनं नाम भीरुक लक्षणं स्यात् । मया प्राप्तः क्लेशः सर्वोऽपि बाह्यव्रण इव स्थितः । वस्तुतस्तु स एवान्तः प्रच्छन्नस्य वर्णद्वेषव्याधेर्बाह्यलक्षणमासीत् । वर्णद्वेषनिरसनाय मया यावच्छक्ति प्रयसितव्यम् । तत्प्रयत्नवशात्कदाचित्क्लेशसम्भवेऽपि स क्लेशः सोढव्यः । एतादृग्व्याधिनिवारणाय यावदावश्यकं तावन्मात्रमन्यायनिवृत्तये मया प्रयसितव्यम् । अत एवानन्तरगामिन्या धूमशकटया मया प्रस्थातव्यम् इत्यहं निश्चयमकार्षम् ॥

परेद्युः प्रातरयोध्वकार्यनिर्वाहकाय मुख्याधिकारिणे सविस्तरं तन्त्रीवृत्तान्तं प्राहैषम् । अबदुल्लाशेठमहाशयं च तन्त्रीद्वारा विदितोदन्तमकार्षम् । स च तत्क्षणमेव गत्वा मुख्याधिकारिणमपश्यत् । स तु धूमशकट्यधिकरणसेवकानां पक्षमेव पर्यपोषयत् । किन्तु यथाहं मदीयगन्तव्यस्थलमनुपद्रुतः प्राप्नुयां तथा संविधातव्यमित्ययोऽध्वनिकेतनस्वामी समादिष्टो भवतीत्यसावकथयत् । अबदुल्लाशेठमहाशयो मम यथावत्पर्यवेक्षणाय मेरित्सबर्गनगरस्थभारतीयवणिग्जनानितरस्थलवर्तिनः सर्वांश्च तन्त्रीद्वारा समबोधयत् । मेरित्सबर्गनगरस्था वणिजः शकटीस्थानमागत्य मामपश्यन् । तेऽमी स्वीयकष्टान्यखिलान्युपवर्ण्य मम यत्संवृत्तं तदेतन्नाश्चर्यमिति ब्रुवाणा मां सान्त्वयितुमयतन्त । किं च प्रथमद्वितीयश्रेण्योः प्रयातृभिर्भारतीयजनैरयोध्वःकिङ्करेभ्यो गौराङ्गपथिकेभ्यश्चावश्यमेवोपद्रवः प्रतीक्षणीय इति न्यवेदयन् । इत्थमेतदनिष्टकथाश्रवणप्रसङ्गेनैवाहः समाप्तिमगात् । अथ सायन्तनधूमशकटी समागता । तस्यां मदर्थे स्थलमेकं निश्चितमासीत् । डरबननगरात्प्रयास्यता यद्यपि न चिक्रीषितं शय्यासम्पादकं पत्रं तथाप्यधुना मया तदेतदक्रायि । धुमशकटी मां ' चार्ल्सटाउन'नगरमनीनयत् ॥

नवमोऽध्यायः

अतिशयितक्लेशपरम्परा

धूमशकटी चार्ल्सटाउननगरं प्रातरासादयत्। तन्नगराज्जोहानिसबर्गपुरीमुपस्थायिनी धूमकशटी तदानीं न चलति स्म। सामान्येनाश्वरथेन प्रयाणं निर्वर्त्यमासीत्। आश्वरथप्रयाणानुज्ञापकं पत्रमेकं मन्निकटे स्थितम्। मॅरित्सबर्गनगर्यामेकाहविलम्बसम्भवेऽपि तदेतदप्रचर्यं नाभवत्। किं चाबदुल्लाशेठमहाशयेन चार्ल्सटाउननगरस्थोऽश्वाधिकारी विलम्बनिमित्तं तन्त्रीद्वारा पूर्वमेव निवेदित आसीत्॥

किन्तु सोऽधिकारी मदुच्चाटनाय व्याजमेकमन्विष्यति स्म। अपरिचितोऽहं कश्चिदागन्तुक इति मामवगत्य भवदीयप्रयाणानुज्ञापकपत्रमिदानीं निषिद्धप्रचारं भवतीति मामवादीत्। तस्याहं समञ्जसमुत्तरमदाम्। तदीयमनोगतं कारणं न खलु शकटे स्थलाभावः। मदीयप्रयाणानुज्ञापकपत्रस्याप्रचर्यताख्यापने तस्याभिप्रायस्तावदन्य एव। पथिकैः सर्वैरपि शकटाभ्यन्तर एवोपवेष्टव्यमासीत्। परन्तु मामयमधिकारी 'कुली'जनमपरिचितं च मन्यमानो गौराङ्गैरध्वनीनैः सह मदुपवेशनं कथमपि निवारयितुकामोऽभवत्।

'अग्रेसर' इत्ययमधिकारी व्यपदिश्यते स्म। प्रयाणकार्यदर्शित्वमेवास्यकृत्यमासीत्। रथवाहकस्य पार्श्वयोः पथिकद्वयस्योपवेशस्थलमासीत्। एकत्रायमधिकारी पूर्वमुपविशति स्म। तस्मिन्दिने तु शकटाभ्यन्तरे स्वयमुपविश्य निजं बाह्यपीठं मह्यमदात्। इदमत्यन्तमन्याय्यमपमानकरं चेत्यहमज्ञासिषम्। तथापि वरं सोढव्योऽयमपमान इत्यात्मानमबोधयम्। बलादन्तःप्रवेशो न हि सम्भाव्यते स्म। कलहप्रसङ्गे तु रथो मां परित्यज्य प्रचलित एव स्यात्। एतेन परमेकं दिनं व्यर्थमतिवाहयितव्यमापतेत्। परेद्युः किं वा सम्भवीति भगवदेकवेद्यं भवेत्। इत्थमनुसन्धाय जाज्वल्यमानहृदयोऽपि विवेकशाली पुरुष इव शकटवाहकस्य पार्श्वे तूष्णीमुपविष्टोऽभवम्॥

त्रिघण्टावादनवेलामश्वरथः 'पारडीकोप'स्थलमुपासदत्। तदानीमयमग्रेसरो मयाध्यासितं स्थलमाक्रमितुमभ्यलष्यत्। स किल धूमवर्तिसेवनाय सञ्जातकामोऽभवत्। प्रायेण निर्मलवायुसेवनाभिलाषुकेणापि तेन भवितव्यम्। तदसौ शाकटिकादेकं मलीमसं स्थूलशाटकमादाय पादविन्यासफलकस्योपरि तमास्तीर्य मामब्रवीत्—'सामी' (दास इत्यर्थे प्रयुज्यमानः शब्दः) त्वमस्योपर्युपविष्टो भव। रथवाहकस्य पार्श्वेऽहमुपवेष्टुमिच्छामीति। सैषावमानना न मे मर्षणीयाभवत्। अथ भयेन कम्पमानोऽहमवोचम्—त्वमेव मामत्र समुपावेशयः। न्यायतः शकटाभ्यन्तरे मम स्थलं प्रदेयमासीत्। तथाप्यवमानोऽयं मया सोढः। त्वमिदानीं वहिरुपविश्य धूमवर्तिसेवनकामस्त्वदीयपादमूले मामुपवेशयितुमिच्छसि किल। नाहमिदं सर्वथा मृष्येयम्। यदि तावन्मन्यसे तदाहमभ्यन्तर एवोपवेक्ष्यामीति॥

असमाप्तवचस्येव मय्यसौ निकटमुपेत्य बलवच्चपेटप्रहारं मे दत्वा हस्तग्राहं मामधस्तान्निष्कालयितुं प्रायतिष्ट। मदीयपीठाभ्यर्णवर्तिनीरारकूटमयीः शलाकाः सुदृढमहमग्रहीषम्। करास्थिभङ्गेऽपि मुष्टिबन्धं नैव शिथिलयिष्यामीति मनस्यकरवम्। इतरे पथिका दृश्यमिदं प्रेक्षन्ते स्म। स तु मामाक्रोशमाक्रोशं कर्षं कर्षं च प्राहरत्। तथाप्यहं तूष्णीमेवास्थाम्। स तावद्बलवानासीत्। अहं पुनर्निर्बलो जनः। अथ जातानुकम्पाः केचित्पथिकास्तमबोधयन्—हन्त भो मुच्यतामयम्। न हि किञ्चिदपराद्धमनेन। स किल यथार्थमाह। यद्ययं तत्रोपवेष्टुं नानुमन्येत तदास्मत्पार्श्वेऽयमुपविशतु इति। तदेतन्नैव सम्भवतीति स उच्चैरक्रोशत्। तथाप्यसौ मनाक् सञ्जातमुखभङ्ग इवालक्ष्यत। ततस्ताडनाद्विरम्य मम हस्तममुञ्चत्। अथ भूयोऽपि मां शपन्नपरपार्श्वे समुपविष्टं "होटेण्टोट" इति व्यपदिश्यमानं दासमेकं स्वपादनिक्षेपस्थान उपवेष्टुमादिश्य तदीयस्थले स्वयमुपाविशत्॥

पथिका अन्तरुपाविशन्। सीत्कारशिञ्जनमश्रावि। रथश्च सनिर्घोषं प्राचलत्। मम हृदयं धड्धडिति प्रस्पन्दते स्म। अपि नाम गन्तव्यस्थलमहं जीवन्नवाप्नुयामिति चिन्ताकुलोऽभवम्। स पुरुषः पदे पदे क्रोधमयीं दृष्टिं मयि विकिरन् तर्जनीं प्रदर्श्य जागृहि जागृहि 'स्टेंडरटन' नगरमासेदुषस्तत्र किं करिष्यामीति ततो व्यक्तीभविष्यतीति वदन्मामतर्जयत्। अहन्तु जोषमासीनः पाहि मां परमात्मन्निति भगवतः प्रार्थनामकरवम्॥

प्रदोषानन्तरं स्टेंडरटननगरं वयमासादयाम। तत्र केषांचिद्भारतीयानां मुखान्यवलोक्य दीर्घनिश्वासममुचम्। ततोऽवतीर्णं मामुपेत्य ते सुहृदः प्राहुः— वयमीसाशेठमहाशयानामापणं वो नेतुमिहागताः स्मः। तथा हि तन्त्रीसन्देशोऽस्माभिरबदुल्लाशेठमहाशयेभ्यः प्राप्त इति। अहं भृशमहृष्यम्। वयमीसा-हाजी-सुमारशेठमहाशयस्यापणमगच्छाम। तत्र शेठमहाशयस्तदीयलेखकाश्च मां पर्यवारिषुः। मयानुभूतमखिलं तेभ्यो न्यवेदयम्। तदाकर्ण्य ते सुतरां विषण्णाः स्वैरप्यनुभूतचराणि सङ्कटानि सङ्कीर्त्य मामसान्त्वयन्॥

तत्रत्यप्रयाणशकटीसङ्घस्याधिकारिणं विदिताखिलवृत्तं विधातुमिच्छन् तत्सर्वं सविस्तरमुपन्यस्य तदीयकिङ्करेण कृतं तर्जनमप्यावेद्य परेद्युः प्रातः प्रयास्यन्तं शकटाभ्यन्तर एवान्यैः पथिकैः सहोपवेशयितुं प्रतिज्ञातव्यमिति पत्रमलेखिषम्। स चाधिकारी प्रत्यवोचत्— स्टेंडरटननगरादेका महाशकटी प्रसर्पति। शाकटिकादिपरिकरस्सर्वोऽप्यन्यः। भवद्भिः ख्यापितो दुर्वृत्तः किङ्करः श्वो न ह्युपतिष्ठति। पान्थैरन्यैः सह भवतामुपवेशनाय यथावत्संविधानं कृतं भवतीति। एतदवगत्य मम चिन्ता लघ्वी समपद्यत। मदवस्कन्दी स आङ्ग्लो व्यवहारेणाभियोक्तव्य इति नाभून्ममाभिलाषः। तदयं कलहाध्यायस्तावतैव समाप्तिमगमत्॥

ईसाशेठमहाभागस्य भृत्यः प्रातर्मां शकटीपार्श्वमनैषीत्। स्थलं मया प्रशस्तमवाप्तम्। सुरक्षितस्तद्रात्रौ 'जोहानिसबर्ग' नगरमासदम्॥

Funding by IKS-MoE

स्टेंडरटननामैकोऽल्पग्रामः । जोहानिसबर्गइत्येतदेकं महानगरम् । अबदुल्लाशेठमहाशयेन जोहानिसबर्गनगरं प्रत्यपि पूर्वमेव तन्त्रीसन्देशः प्रेषित आसीत् । अपि च तत्रत्यानां महमद-कासम-कमरुद्दीन–महाशयानामापणस्य नामधेयं तदीयावासस्थानादिनिरूपकं बाह्यनाम च प्रादायि । तदीयः कश्चन पुरुषो मां नेतुं शकटस्थानमागत्य स्थितः । परन्तु नाहमेनमपश्यम् । सोऽपि मां नाभ्यजानात् । ततोऽहं कमप्यतिथिमन्दिरं गन्तुं निरचेषि । ज्ञातपूर्वाणि हि मया चतुःपञ्चविश्रान्तिगृहाणां नामधेयानि । अथ शकटमेकं भाटयित्वा ग्रेंड-नेशनल-होटेल-इत्याख्यमतिथिमन्दिरं प्रति रथं वाहयितुं शाकटिकमाजिज्ञपम् । तत्रासाद्य तद्व्यवस्थापकं दृष्ट्वा वस्तुं देहीत्यपृच्छम् । स च मां क्षणं वीक्ष्य “ किं करोमि । अत्रत्याः कोष्ठाः सर्वेऽप्याक्रान्ताः ” –इति सविनयमावेद्य मां व्यसर्जयत् । ततोऽहं महमद-कासम–कमरुद्दीनमहाशयानामापणं प्रति रथं वाहयेति शाकटिकमवोचम् । तत्राबदुलगनीशेठमहाशयो मदागमनप्रतीक्ष एव स्थितः । स च मां स्वागतेनाभ्यनन्दत् । अतिथिमन्दिरे स्थलाभावशंसिनीं मदीयकथामाकर्ण्य स भृशं विहस्य प्राह – अहो अतिथिमन्दिरे प्रवेशलाभः कथं वा भवद्भिर्निरीक्षित इति ॥

कुतो ह्ययमसम्भाव्य इत्यहमपृच्छम् । दिनचतुष्टयमात्रमिह भवद्भिः स्थीयते यदि तदा सर्वं स्पष्टीभविष्यति । देशेऽस्मिन्नस्मद्विधानामेव केवलं निवासः शक्यः । वयं हि द्रव्यार्जनप्रवृत्ताः । तदर्थमपमानमपि तूष्णीं सहिष्यामहे–इति ॥ ततश्चासौ दक्षिणाफ्रिकादेशे भारतीयैरनुभूयमानानां क्लेशपरम्पराणामितिहासमवर्णयत् । अस्य महाशयस्य सम्यक्परिचयोऽस्माकमग्रे क्रमेण सम्पत्स्यते ॥

स पुनर्मामकथयत्—

देशोऽयं युष्मादृशानां न योग्यः । पश्यन्तु भवन्तः । श्वः किल भवद्भिः प्रिटोरियानगरं गन्तव्यम् । तदा तृतीयश्रेण्यामेव प्रयाणमङ्गीकर्तव्यमापतिष्यति । ‘नाताल’देशापेक्षया ‘ट्रान्सवाल’देशस्य परिस्थितिरतिमात्र शोचनीया । अत्र हि भारतीयानां प्रथमद्वितीयश्रेण्योः प्रयाणानुज्ञापकपत्राणि नैव दीयन्ते इति ॥

“अस्य कृते प्रयत्नो युष्माभिः प्रकामं नैव कृतः स्यादिति मन्ये ।”

“ननु कृत एवास्माभिः पत्रव्यवहारः । परन्तु प्रायशोऽस्मदीयाः प्रथमद्वितीयश्रेण्योः प्रयाणं नैव चिकीर्षन्ति ।”

अथाहमयोमार्गनियमावलिप्रबन्धमानाय्य समवालोकयम् । तत्र निस्तारमार्गो मया लक्षितः । ‘ट्रान्सवाल’देशस्य प्राचीनशासनान्येव न खलु सूक्ष्मदृष्ट्या न्यबध्यन्त । एषामयोमार्गनियमानां तु का कथा ॥

शेठमहाशयमवोचम्–प्रथमश्रेण्यामेव प्रयातव्यमिति मदिच्छा । यद्येतदशक्यं स्यात्तदा प्रिटोरियानगरमश्वरथेन प्रयातास्मि । इतः किल सप्तत्रिंशत्पाषाणदूर एव तद्वर्तते–इति ॥

एतेन कालविलम्बो द्रव्यनाशश्च यथा सम्भविष्यत इति शेठमहाशयो मे प्रादर्शयत् । तथापि मया चिकीर्षितं प्रथमश्रेण्यां प्रयाणं तस्याप्यभिमतमेवासीत् । तस्मादयोऽध्वनिकेतनस्वामिनं प्रति पत्रमेकं विलिख्य प्राहैषम् । तत्र हि मया न्यरूपि-अयमस्मि ब्यारिस्टर्‌जनः । सर्वदापि प्रथमश्रेण्यामेव प्रयाता । प्रिटोरियानगरं त्वरितमेव मया प्राप्तव्यम् । अतो भवत्सकाशाल्लिखितमुत्तरं प्रतीक्षितुमवकाशाभावात् स्वयमेव श्रीमतां निकेतनमुपेत्य प्रत्युत्तरं ग्रहीष्ये । प्रथमश्रेणीप्रयाणानुज्ञापकं पत्रं प्राप्स्यत इति प्रत्येमि — इति ॥

प्रतिवचनस्य समक्षप्राप्तिनिरूपणं तु प्रयोजनगर्भितमिति नेदं पृथग्वक्तव्यम् । तथा हि । निकेतनस्वामिना प्रत्युत्तरे लेखितव्ये प्रथमश्रेणीपत्रं सर्वथा नैव दास्यत इत्येव लेखितव्यं स्यात् । अपि चायं 'कुलीब्यारिस्टर्' इति व्यपदिश्यमानं मां प्रति किमपि विलक्षणाभिप्रायवान्भवति । तदहं निरवद्येनाङ्ग्लवेषेण भूषितः सन्नुपस्थाय तमाभाषयिष्ये । ततश्च प्रथमश्रेणीप्रयाणपत्रं मे प्रदातुमसौ बहुशोऽनुमन्येत । इत्थमालोच्य ह्रस्वकवचकण्ठग्रन्थ्याद्याकल्पालङ्कृतस्सन्नयोऽध्वनिवेशनमगच्छम् । तस्याग्रे सुवर्णमुद्रामेकां निधाय प्रथमश्रेणीप्रयाणपत्रमेकं दीयतामित्यपृच्छम् ॥

' क्व भवद्भिरेवायं लेखो मे प्रेषितः ।'

" अथ किम् । स एवायमस्मि । ईप्सितपत्रदाने भवद्भिर्बहूपकृतं स्यात् । अद्यैव हि प्रिटोरियानगरमहं प्राप्तुकामोऽस्मि ।"

स च सस्मयमानः सानुकम्पमाह—

नाहं ट्रान्सवालदेशस्थः किन्तु ' हॉलेण्ड'देशाभिजनोऽस्मि । जाने भवतां मनोगतम् । अस्ति मे सहानुभूतिर्युष्मद्विषये । ईप्सितं प्रयाणपत्रं भवद्भ्यो दातव्यमित्येव ममाप्यस्ति काङ्क्षा । परन्तु प्रदानस्य सामयिकत्वमिष्यते । स च समयो यथा — मार्गे धूमशकटीनायको भवतः कदाचिदवतार्य तृतीयश्रेण्यां यद्युपवेशयेत् तदा नाहं तत्र वाच्यो भवितास्मि । तथा चायोध्वसङ्गस्योपरि व्यवहारो भवद्भिर्नोत्थापनीय इति । शिवाः सन्तु वः पन्थान इत्यहमाशंसे—इति ॥ इत्थमभिधाय स मे प्रयाणानुज्ञापत्रमदात् । अहं च धन्यवादमुक्त्वा यथोक्तमाचरिष्यामीति प्रत्यजानि ॥

अबदुल—गनी—शेठमहाशयः प्रस्थानोद्यतं मामाप्रष्टुमयोध्वनिकेतनमागमत् । एतद्वृत्तमाकर्ण्य प्रहृष्टश्च विस्मितश्चाभवत् । अथायमेवं मां प्राबोधयत्—प्रिटोरियानगरं यदि भवन्तः प्राप्स्यथ तदा खल्वहं निश्चिन्तो भवेयम् । शङ्के धूमशकटीनायकः प्रथमश्रेण्यां भवतः स्वस्थमुपवेष्टुं न मुञ्चतीति । कदाचिदनेन मुक्तानपि पथिका न हि मोक्ष्यन्तीति ॥

अहं प्रथमश्रेण्यामुपाविशम् । चलिता च धूमशकटी । ' जर्मिस्टन 'पुरे शकटीनायकः प्रयाणानुज्ञापकं पत्रमीक्षितुमागतः । दृष्टमात्रे मयि क्रुद्धस्सन्नङ्गुलिसंज्ञया स मामादिशत्—तृतीय-

Funding by IKS-MoE

श्रेणीं प्रति निर्याहीति । तदाहं मन्निकटस्थितं प्रथमश्रेणीपत्रं तस्मा अदर्शयम् । स तु प्राह–अस्तु नाम । तृतीयश्रेणीमितश्चल–इति ॥

अस्यां शकट्यामेकएवाङ्ग्लपथिकः स्थितः । स च शकटीनायकमचकथत्–सद्गृहस्थमेनं कुतो भवान्बाधते । तदीयहस्तगतं प्रथमश्रेणीप्रयाणपत्रं न किं भवतो दृष्टिगोचरः । इहोपविष्टादस्मान्न मे कापि बाधा–इति ॥ स एवमुक्त्वा मामभिवीक्ष्य जोषमास्यतामित्यवादीत् ॥

यदि 'कुली'जनेन सहोपवेष्टुमुत्सुको भवान् तदा का हि मे क्षतिरिति प्रजल्पन् धूमशकटीनायको निरगात् ॥

रात्रावष्टघण्टावादनसमये धूमशकटी प्रिटोरियानगरं प्रापत ॥

दशमोऽध्यायः

प्रिटोरियानगरे प्रथमदिनम्

प्रिटोरियानगरस्यायोऽध्वनिकेतनं प्रति दादा-अबदुल्लामहाशयानां न्यायवादिनः सकाशान्मम प्रत्युद्गमनाय केनापि जनेनागतेन भाव्यमित्यहमचिन्तयम् । भारतीयास्तु नैवागता इति मे विदितमेव । मया हि पूर्वमेव प्रतिज्ञातं यत्कस्यापि भारतीयस्य गृहे नाहं वसतिं ग्रहीष्य इति । न्यायवादिना तु न कोऽपि जनः प्रेषितः । तद्दिनस्य भानुवारत्वात् प्रयासबाहुल्यं विनान्यत्र जनप्रेषणं न शक्यमासीदिति मया पश्चादवगतम् । इतिकर्तव्यतामूढः सन् क नु गन्तव्यमिति चिन्तयन्नतिष्ठम् । क्वचिद्विश्रान्तिगृहेऽपि दुर्लभः स्यान्मम प्रवेश इति मया पर्यशङ्कि ॥

प्रिटोरियानगरस्यायोऽध्वनिकेतनं त्रिनवत्युत्तराष्टशताधिकसहस्रतमे क्रैस्तशकाब्दे यादृशमासीत्तादृशात्परं वैलक्षण्यमापन्नं चतुर्दशोत्तरनवशताधिकसहस्रतमेऽब्देदृश्यत । दीपा मन्दप्रकाशाः प्रज्वलन्ति स्म । अत्यल्पा पथिकसङ्ख्या । यावत्सर्वे पान्था निर्गतास्तावदहं तूष्णीमासम् । इत्थमचिन्तयं च यथा–प्रयाणपत्रसङ्ग्राहकेऽधिकारिणि लब्धावकाशे सति मदीयप्रयाणपत्रं तस्मै प्रदाय विश्रमितुं भोजनशालिका वासस्थलमन्यद्वा किमिह लभ्यत इति तं पृच्छामि । यद्यसौ क्वापि वसतिं दर्शयेत्तदा तत्र गमिष्यामि । नो चेद्रात्रिमिहैवाध्वनिकेतने गमयिष्यामीति । परन्त्वपमानभयादेवं प्रष्टुमपि ममोत्साहो नासीत् ॥

अध्वनिकेतनात्पथिकाः सर्वेऽपि निर्गताः । अहमपि प्रयाणपत्रसङ्ग्राहकाय मदीयपत्रं दत्त्वा तं प्रष्टुमारब्धवान् । स च मदीयप्रश्नानामुत्तराणि सविनयमदात् । किन्त्वस्मादधिकं साहाय्यं न मे भविष्यतीत्यहमजानि । तन्निकट एवामेरिकादेशीयो 'निग्रो'जनः कश्चिदतिष्ठत् । सैष मया सह कथालापं कर्तुमारभत ॥

Funding by IKS-MoE

स एवं मामकथयत्—

मन्ये भवन्तोऽत्र सुहृद्विहीना नवागन्तुका इति । मया सह भवद्भिरागम्यते यदि तदा वः स्तोकामेकां भोजनशालां नेष्यामि । तस्या व्यवस्थापको ह्यमेरिकादेशीयः । स च सम्यक्परिचितो मे । शालायां भवतः प्रवेशयेदिति प्रत्येमीति ॥

ईदृशसाहाय्यलाभे त्वहं सांशयिक एवासम् । तथाप्यस्मै मदीयकृतज्ञतां प्रख्याप्य तत्कृतां सूचनामहमङ्गीकृतवान् । स मां जॉन्स्टनमहाशयस्य ‘फॅमिलीहोटेल’इत्याख्यं विश्रान्तिगृहमनैषीत् । वसतिकोष्ठक एव भोक्ष्य इति समयं ग्राहयित्वा स जॉन्स्टनमहाशयो मामेकामेव रात्रिं तत्रावासयितुं प्रत्यपद्यत ॥

किं चायमाह—गौराङ्गोऽयं कृष्णाङ्गोऽयमिति मे भेदकल्पना मनागपि नास्ति । किन्तु ममातिथयः सर्वेऽप्यैरोप्याः । अमी किल सहोपवेशितान् भवतोऽवलोक्य परं क्रुध्येयुः । अथवा स्थलमिदं परित्यज्यान्यत्र गच्छेयुः – इति ॥

अथाहमवोचम्—

रात्रिमेनामिहैव वस्तुं भवद्भिरदायि । इयतापि बहूपकृतोऽस्मि । स्थलीयपरिस्थितेः शनैः शनैर्मयावगम्यमानत्वाद्भवदीयकष्टमप्यहं जाने । मदीयकोष्ठ एव भोजने परिवेष्यमाणेऽपि नाहमेतदन्यथा ग्रहीष्ये । श्वः प्रातरन्यत्र क्वापि संविधातुं शक्नुयामित्यास्था वर्तते—इति ॥

एकः कोष्ठो मह्यमदायि । आहारप्रतीक्षस्तत्राहमुपाविशम् । एकान्तस्थितत्वादालोचनापरश्च सम्पन्नः । अतिथिगृहे भूयांसोऽतिथयो नाविद्यन्त । तस्मात्सेवकः शीघ्रमेवाहारमानेष्यतीति निरीक्षमाणोऽहमवस्थितः । अत्रान्तरे जॉन्स्टनमहाशयः स्वयमेवागमत् । अकथयच्च यत्—कोष्ठेऽस्मिन् भवद्भिर्भोक्तव्यमित्युक्तवतो मे लज्जा समजनि । ततोऽहमितराभ्यागतेभ्यो वृत्तमेतन्निवेद्य तानपृच्छम् किं युष्माभिरन्यथा मन्यते यद्यसावपि भोजनगृह एव भोक्तुमासीतेति । तेऽप्यवदन्—तदेतद्वयं नैव निषेधामः । यावत्पर्यन्तमिहस्थातुमसावभिलष्येत् तावद्दिनं यथेष्टमास्तामिति । तस्माद्भवन्तो भोजनशालामेवागन्तुमर्हन्ति । अपि चात्र स्थीयतां यथेष्टकालमिति । भूयोऽपि तस्मै मम कृतज्ञतामावेद्य भोजनगृहे भोक्तुमगच्छम् ॥

परेद्युः प्रातरहं न्यायवादिनो मन्दिरं गतः । तस्य नाम ‘ए. डब्ल्यु. बेकर’ इति । अयं सर्वात्मना मामुपाचरत् । अबदुल्लाशेठमहाशयान्मया तन्न्यायवादिनः सौगुण्यं पूर्वमेव श्रुतमासीत् । अतस्तत्कृतोपचारेण नाहं विस्मयमापम् । स मामादरेण महताभिनन्द्य कुशलमपृच्छत् । मद्गतं वृत्तान्तमखिलं तस्मै न्यवेदयम् । स च मामब्रवीत् – ब्यारिस्टर्वृत्तिमनुरुध्य भवद्भिरिह कर्तव्यं किमपि नास्ति । अस्य व्यवहारस्य कृते न्यायवादिकण्ठीरवा अस्माभिर्नियुक्ताः सन्ति । चिरन्तनोऽयं व्यवहारः परं जटिलश्च । अतो जिज्ञास्यविषयनिवेदनमात्रे कर्मणि भवतो नियुञ्ज्महे । युष्मदागमनेन कार्यिकैः सह पत्रव्यवहारचालनाय भूयः सौकर्यमिदानीं नः

Funding by IKS-MoE

संवृत्तम् । इतः परं तत्सकाशाद्बोद्धव्यमखिलमपि युष्मद्द्वारैव सङ्ग्रहीष्यामहे । युष्मदर्थे नाद्यापि मया वसतिरन्विष्टा । वरं भवदागमनोत्तरं तदन्वेषणमिति मया चिन्तितम् ॥

वर्णद्वेषः प्रातिभूमिं गतः । अतो युष्मादृशानामिह स्थलान्वेषणं न सुकरम् । अहं तावदेकां दीनामबलां जानामि । सा हि कस्यचिदपूपकारस्य भार्या । स्वगृहे युष्मानावासयितुं सानुमन्येत । तेन हि तदीया द्रव्यायतिः वृद्धिमुपैष्यति । आगम्यताम् । तद्गृहं गमिष्याम इत्येवमुक्त्वा तत्र मामनैषीत् । तत्र मद्विषये कंचित्कालमेकान्तालापमकरोत् । प्रतिसप्ताहं मत्सकाशात्पञ्चत्रिंशत ‘शिलिंग’मितं द्रव्यं स्वीकृत्य भोजनवसती मे प्रदातुं सा प्रत्यपद्यत ॥

बेकरमहाशयो न केवलं व्यवहारोपजीवी अपि तु श्रद्धालुर्लौकिकधर्मोपदेष्टा च । अद्याप्ययं जीवति । स किल परित्यक्तन्यायवादिवृत्तिरिदानीं क्रैस्तधर्मोपदेशमात्रे प्रवृत्तो भवति । अपि च धनाढ्यः सुखी च वर्तते । अद्याप्ययं मया सह पत्रव्यवहारं करोति । तस्य लेखेषु प्रस्तूयमानो विषयः सर्वदा त्वेक एव । स खलु क्रैस्तधर्म एव परमोत्तमो धर्म इति नैकविधप्रमाणैरुपपादयन् क्रिस्तस्य भगवदेकमात्रपुत्रत्वे मनुष्योद्धारकत्वे च लोको यावन्न विश्वसिति तावदस्य शाश्वती शान्तिर्दुरापेति प्रतिपादयति ॥

प्रथमदर्शन एव बेकरमहाशयो धर्मविषये मदीयमतं यादृशमित्यवागच्छत् । अहमेनमित्थमवोचम् । जन्मनाहं हिन्दुमतावलंबी । तथापि तद्धर्मज्ञानमपि मम विशेषतो नास्त्येव । इतरधर्माणां परिज्ञानं तु ततोऽप्यल्पीयः । न खलु लेशतोप्यहं जाने कीदृशी मे धार्मिकी परिस्थितिः कीदृशी मे श्रद्धा किं वा मया श्रद्धातव्यम् । स्वधर्मं तावत् सम्यगवबोद्धुमिच्छामि यथासंभवमितरधर्मानपि जिज्ञासिष्य इति ॥

बेकरमहाशयः सर्वमेतदाकर्ण्य प्रमुदितान्तरंगो मामकथयत् । दक्षिणाफ्रिकादेशवर्तिन्याः ‘ साउथ-आफ्रिका-जनरल-मिशन’ इत्याख्यायाः सुवार्ताप्रचारकसभायाः कार्यदर्शिनामहमेकतमः । अस्त्येकः स्वतो द्रव्यव्ययेन निर्मापितः क्रैस्तदेवालयः । तत्र हि मया नियमेन तत्तदवसरेषु धर्ममधिकृत्य व्याख्यानानि उपन्यस्यन्ते । नाहं वर्णभेदमङ्गीकरोमि । सन्ति मे सहोद्यमिनः केचन सुहृदः । वयं प्रतिमध्याह्नं एकघण्टावादनवेलां मिथः संभूय स्वात्मशांतिप्रकाशोपलब्धये कंचित्कालं भगवत्प्रार्थनां कुर्महे । तत्र भवदागमनमहमभिनन्देयम् । तेषां च परिचयं वः संपादयिष्यामि । युष्मत्संगेन ते च संतोक्ष्यन्ति । तत्र भवन्तोऽपि प्रीता भविष्यन्तीत्यास्ति मे विश्वासः । किं च धर्मप्रतिपादकान् कतिचनग्रन्थानध्येतुं भवद्भ्यः प्रदास्यामि । तेषां सर्वोत्तमो बाइबलनामकः पवित्रो ग्रन्थ इत्येतन्न खलु पृथग्वक्तव्यम् । स एष भवद्भिः सर्वथा पठितव्य इति साग्रहमहं ब्रवीमीति ॥

बेकरमहाशयस्यानुग्रहं स्वीकृत्य प्रार्थनार्थं प्रतिदिवसमहं यथाशक्ति नियमेन तन्मण्डल्या सह मिलिष्यामीति प्रत्यज्ञासिषम् ॥

बेकरमहाशयोऽवादीत्——यद्येवं तर्ह्यहमेकघण्टावादनवेलामिह भवतामागमनं प्रतीक्षमाणः स्थास्यामि । सहैव प्रार्थनामन्दिरं गमिष्याव इति । अथावामन्योन्यमभिवन्द्य यथायथं निरगाव ॥

Funding by IKS-MoE

दीर्घविमर्शाय न लब्धो मयावकाशः। ब्यारिस्टर्महाशयस्य समीपमहं गत्वा मया देयमर्थं तस्मै वितीर्य नूतनावासमुपेत्य भोजनं निरवर्तयम्। गृहस्वामिनी परं सज्जना ह्यासीत्। तया मत्कृते शाकाहारपाको निष्पाद्य स्थापितोऽभूत्। अचिरेणैवाहमस्मिन् कुटुम्बे सुघटितप्रेमवृत्तिरासम्॥

दादा-अबदुल्लामहाशयेन कस्यचिन्मित्रस्य लेखमेकं विलिख्य मम हस्ते दत्तमासीत्। भुक्तोत्तरं तन्मित्रमहं द्रष्टुमगच्छम्। दक्षिणाफ्रिकावर्तिनां भारतीयानां क्लेशवृत्तान्तः सविशेषं तन्मुखादवगतः। स च मां स्वेन सह निवस्तुं निरबध्नात्। परन्त्वहं तस्य मदीयकृतज्ञतामाख्याय पृथक् निवासः पूर्वमेव मया परिकल्पित इति तस्मै न्यवेदयम्। स च जिज्ञासितविषयो मां द्रष्टुं सर्वथा संकोचो न कर्तव्य इति साग्रहमवादीत्॥

तावच्च प्रदोषवेला समुपस्थिता। अहं च कृताहारः स्वकोष्ठं प्रविश्योपविष्टः सन् विचारसागरे निमग्नोऽभवम्। मम सद्योऽनुष्ठेयकार्यं किमपि नासीत्। तदेतदबदुल्लामहाशयाय न्यवेदयम्। बेकरमहाशयेन सह सख्यबन्धः किमर्थः। तस्य धर्मबन्धुभिः मम को वा लाभः। क्रैस्तधर्माध्ययनं यथावदुपलब्धुं कियन्पर्यन्तं शक्यते वा। हिन्दुधर्मसाहित्यं कुतो वा प्रापणीयम्। तज्ज्ञानादृते क्रैस्तधर्मस्वरूपं यथावत्कथमवगन्तव्यमित्यादि प्रश्नपरंपरा मन्मनसि प्रादुरभूत्। तस्य निष्कर्षस्तावदेक एव संभाव्यते स्म। तद्यथा – एतदधिकृत्य मयाध्येतव्यमपि निःपक्षपातेनाध्येतव्यम्। ततः परमेश्वरप्रेरणानुरूपं बेकरमहाशयादिजनसमुदाये मया प्रवर्तितव्यम्। यावन्मया स्वधर्मः समग्रतया न विज्ञातः तावदन्यधर्मस्वीकारो नाम मनसापि न चिन्तनीय इति ध्यायं ध्यायमहं निद्रावशं गतः॥

एकादशोऽध्यायः

क्रैस्तमतेन संपर्कः

परेद्युरहमेकघण्टावादनसमये बेकरमहाशयस्य प्रार्थनासभामगमम्। तत्र ‘ मिस हेरिस–मिस गेब-मि. कोट्स ’-इत्येतेषां जनानां परिचयो मे जातः। जानुभ्यां स्पृष्टभूतलाः सर्वेऽपि प्रार्थनोद्यन्ता उपाविशन्। अहमपि तानन्वकरवम्। निजनिजाभीष्टसिद्धये भगवन्तं प्रार्थयन्तः “ एतद्दिनं शान्तिमयं प्रयातु। देवोऽस्मदन्तःकरणानां द्वाराण्यपावृणोतु ” इत्येषः तेषां प्रायिकः प्रार्थनाक्रमोऽभूत्॥

अद्यत्वे तु मम क्षेमलाभार्थमन्याप्येका प्रार्थना संयोजिताभवत्। सा च यथा – अस्माभिः सह मिलितस्य सहोदरस्य’ सन्मार्गं दर्शय। अस्मभ्यः प्रदत्तां शान्तिमस्मै च प्रदेहि। अस्मदुद्धारकः क्रिस्तदेवः एनमप्युद्धरत्विति वयं प्रार्थयामह इति॥

Funding by IKS-MoE

एतासु सभासु भगवद्कीर्तनादिकं न प्रचलति स्म । प्रतिदिनं यत्किमपि सविशेषं प्रार्थ्य प्राप्तायां माध्याह्निकोपहारवेलायां तद्गुपसेवनार्थं यथायथमस्माभिर्गम्यते स्म । प्रार्थना च प्रायेण पञ्चनिमिषाधिकं कालं नापैक्षत ॥

' मिस हेरिस—मिस गेब-' इत्येतेऽनूढे प्रौढमहिले । कोट्समहाशयः ' क्वेकर ' संघपक्षीयः । उभेऽपि ते स्त्रियावेकत्रकृतनिवासे आस्ताम् । ते इमे प्रतिभानुवासरं चतुर्घण्टावादनसमये 'टी'पानाय मां प्रार्थयेताम् ॥

प्रतिभानुवासरमहं कोट्समहाशयेन मिलितः सन् सप्ताहान्तःपातिनीं मदीयदैनंदिनधर्मचर्यामस्मै न्यवेदयम् । ये च ये च मया पठिता ग्रन्था यादृशं परिणाममेते मन्मनस्यजनयन् इत्यादि विषयांश्चर्चयन्तौ कथालापमकुर्वहि । ते भगिन्यौ स्वानन्दानुभवानाचक्षाणे स्वलब्धां शान्तिमधिकृत्योपन्यास्यताम् ॥

कोट्समहाशयः सरलहृदयो दृढमनस्कश्च युवकः। उभावप्यावां बहिर्विहारायागच्छाव । स च स्वकीयक्रैस्तमित्राणां समीपं मां नयति स्म ॥

यथा यथावयोर्मैत्री गाढगाढा समपद्यत तथा तथासौ पठ्यग्रन्थविशेषानन्विष्य मह्यं प्रेषयति स्म । एतैः पुस्तकैः पेटिका मे समपूर्यत । मदुपर्यसौ पुस्तकानां भारमारोपयदितिवचनमप्युपपद्येत । पुस्तकान्यहं श्रद्धया पठिष्यामीति मया तस्य पुरतः प्रतिज्ञातम् । यथा यथा ग्रन्था अपठ्यन्त तथा तथा तद्विषयिणी चर्चा प्रवर्तते स्म ॥

त्रिनवत्युत्तराष्टशताधिकसहस्रतमेऽब्दे बहूनीदृशान्ग्रन्थानहमपठिषम् । तेषां सर्वेषामपि नामानि न स्मर्यन्ते । किन्त्वेषां मध्ये ' सिटि-टेम्पल ' इत्याख्यं क्रैस्तदेवालयमधिकृत्य डा. पारकरमहाशयेन प्रणीतव्याख्यानमेकं पियर्सनमहाशयेन विरचितं ' अनेकस्वतःसिद्धप्रमाणानि ' इत्याख्यं पुस्तकमेकं बटलरमहाशयकर्तृकः ' साम्य ' (एनेलॉजी) नामकः प्रबन्ध एक इत्येवं पुस्तकत्रयमासीत् । तत्र कियानप्यंशो मया न विज्ञातः । तस्य केचिदंशा मम प्रतिकूला आसन् । कतिपयभागा मदीयमनसः समंजसा अभूवन् । मदभिप्रायानप्रच्छादयन्नेवाहं कोट्समहाशयाय न्यवेदयम् । ' अनेकस्वतःसिद्धप्रमाणानि ' इत्याख्ये ग्रंथे क्रैस्तवेदोक्तधर्माणां समर्थनाय ग्रंथकर्त्रा यथाशक्ति प्रमाणान्युपन्यस्तानि । अनेन ग्रन्थेन मम चित्ते न कोऽपि जनितः परिणामः । पारकरमहाशयेन प्रणीतस्य व्याख्यानस्य नीतिपोषकत्वेऽपि प्रचलितक्रैस्तमते श्रद्धाशून्यस्य जनस्य तेन न कोऽपि लाभः स्यात् । बटलरविरचितः ' एनेलॉजी ' नामको ग्रन्थस्तु परमगंभीरः कठिनश्च मे प्रत्यभात् । तस्य सम्यक् ग्रहणाय चतुःपञ्चवारं पठितव्यमापतितम् । मन्ये ग्रन्थोऽयं नास्तिकमास्तिकीकर्तुकामेन व्यरचीति । ईश्वरास्तित्वसमर्थनाय तत्र कृतेन प्रमाणोपन्यासेन न मे कार्यमासीत् । तदानीं हि नास्तिकसीमामतीत्याहं स्थितः । किन्तु क्रिस्त एव देवावतारः तच्छरणागतिरेव देवसान्निध्यप्रापिणीति प्रतिपादयितुमिच्छता यानि समर्थकवचनानि तस्मिन्नुपन्यस्तानि तानि मदीयबुद्धौ नैवाक्रमन्त ॥

Funding by IKS-MoE

परन्तु कोट्समहाशयः न खलु स्वापजयं झटित्यङ्गीकरिष्णुः पुरुषः । स किल मय्यातिशयप्रेमवान् । स कदाचिन्मदीयकण्ठस्थं तुलसीमणिहारमपश्यत् । तमेनं मूढभक्तिचिह्नं मत्वा स परं दूयमानः प्राह — मूढभक्तिरियं भवतो न योग्या । इतस्तावदुत्पाटयामस्तं हारमिति । मा तावत् । स किल मज्जनन्या प्रदत्तः पवित्रः पदार्थ इत्यहमवोचम् ॥

अथास्मिन्वः श्रद्धा वर्तते ।

अस्य गूढार्थो मे न विदितः । अधृते तस्मिन्ननिष्टमापतिष्यतीति नाहं भावये । परन्तु प्रेमपूर्वकमयं मे हितैषिण्या जनन्या धारणार्थमदायीत्यहमेनं नानपेतुमुत्सहे । श्वोभूतेस्मिन् जीर्णविच्छिन्ने सति न मे हारान्तरधारणलोभो जायेत । अतो हारमेनं नाहमुत्पाटयिष्ये ॥

अस्मदीयधर्मासहनः कोट्समहाशयः तर्कमेनं नारोचयत् । अज्ञानकूपादहमुद्धर्तव्य इत्यासीत्तस्याशयः । तस्मादयं मामेतदाद्यङ्गीकारयितुं वाञ्छति स्म । अथायमाह — इतरमतेषु सत्यांशस्य विद्यमानत्वेपि किं तावता । पूर्णसत्यात्मकं क्रैस्तधर्ममनङ्गीकुर्वाणस्य मोक्षः सर्वथा दुर्लभः । अपि च क्रिस्तस्य माध्यस्थ्यं विना पापापनोदनं सर्वथा दुष्करम् । सत्कर्माणि तावन्निरर्थकानि — इति ॥

कोट्समहाशयः पुस्तकानां बहूनां मे यथा परिचयमापादयत्तथैव स्वमतानुकूलं क्रैस्तमते दृढश्रद्धाजुषां केषांचित् सुहृदां परिचयं मे समपादयत् । एवं संजातपरिचयेषु ‘ प्लीमथ ब्रधरन ’ इत्याख्यक्रैस्तसंप्रदायानुवर्ति कुटुम्बमेकमासीत् ॥

कोट्समहाशयेन परिचायितेषु भूयांसः सद्गृहस्था अभवन् । तेषामपि बहवो दैवभक्तिसंपन्ना इवादृश्यन्त । किन्तु तेषामेकः पूर्वोक्तकुटुम्बेन संजातसंस्तवं मामित्थमवादीत् —

“ अस्मदीयमतस्य विशिष्टता भवद्भिर्न ज्ञायते । युष्मत्कथालापादहमेवं तर्कये यद्युष्माभिः निरन्तरमेव निजापराधजातमनुध्यायद्भिः तत्समीकुर्वद्भिः तस्य प्रायश्चित्तमाचरद्भिश्च स्थीयत इति । अविश्रान्तमिदं कर्मचक्रं कथंकारं वो मुक्तिं संपादयेत् । युष्माकं शांतिः सर्वथा दुर्लभा । सर्वे वयं पापिन इत्यभ्युपगम्यते भवद्भिः । निरूप्यतां तावदस्मन्मतस्य परिपूर्णता । इमे प्रयत्नाः सर्वेऽपि निष्फलाः । तथाप्यस्माभिरवश्यमेव भक्तिरपेक्ष्यते । पापभारः किमस्माभिर्नित्यं वोढुं शक्येत । स किल भारः क्रिस्तस्योपरि निक्षेप्तव्यः । स खल्वीश्वरस्यैकमात्रो निष्पापः पुत्रः । यो मयि विश्वासी स नूनमनन्तजीवी भविष्यतीति तेन कृतं हि वाग्दानम् । सेयमगाधकरुणा परमेश्वरस्य यतो वयं क्रिस्तमुखेन पापनिवृत्तिं प्रतीमः । ततोऽस्मान्निजपापान्यपि न हि प्रसरन्ति पापकर्मानुष्ठानमस्माकमपरिहार्यम् । पापमकुर्वन्नस्मिन् जगति को वा जीवितुं प्रभवेत् । अत एव मनुष्यवर्गस्य निखिलपापानामप्येकदैव क्रिस्तः प्रायश्चित्तं चकार । तेन कृते महाबलिदाने यः श्रद्धीत स एवानन्तशान्तिमाप्तुं पारयेत् । तत्तादृशशान्तेरनवकाशप्रदं क्व वो जीवनं क्व वास्माभिरुपलब्धं शान्तिवरप्रदानमिति ॥

Funding by IKS-MoE

एतादृशवादश्रवणाय नाहं सज्जस्थितः। वादोऽयं मम हृदयं सर्वथा नान्वरंजयत्। तदहं नम्रतापुरःसरमेवं प्रत्यवोचम्—

"यद्येष सर्वैः क्रैस्तजनैरनुगृहीतो धर्मः तर्हि अयं मे मा तावदस्तु। पापस्य परिणामान्नाहमात्मानं मोचयितुमिच्छामि। या किल मामकी पापवृत्तिः या वा पापकर्माणां निमित्तभूता मनोवृत्तिः तामेवाहं परिजिहीर्षुरस्मि। लक्ष्यमेतद् यावन्मया साध्यते तावन्मदीया शान्तिरेव मे तृप्तिकरी भविष्यति"—इति॥

स च मामब्रवीत्—

'भवदीयः प्रयत्नो निष्फल एवेति निश्चितमहं ब्रवीमि। मत्कृतोऽयमुपन्यासः स भूयो भवद्भिर्विमर्शनीय इति॥

स किल स्वेनोपन्यस्तं स्वस्य चारित्रेणैव न्यदर्शयत्। बुद्धिपूर्वमधर्ममनुष्ठाय ततो निश्चिततया पुरुषः स्वस्थचित्तो भवेदिति किलानेन प्रादर्शि॥

किन्त्वनेन मित्रेण सह मदीयपरिचयात् पूर्वमेव ममैतद्विदितमासीत्। यत् सर्वेऽपि क्रैस्तमतीयाः पापनिवृत्तिविषये न हि श्रद्धामीदृशीं बिभ्रति स्मेति। कोट्समहाशयः स्वयमीश्वरे भव्यभक्तिविशिष्टो वर्तते। तस्य हृदयं निर्मलमासीत्। स किल आत्मशुद्धीकरणं शक्यमिति श्रद्धामधत्त। तयोर्युवत्योरपि तादृशप्रत्यय एवासीत्। मदीयहस्तमुपागतेषु पुस्तकेषु कानिचिद्भक्तिपरिप्लुतान्यासन्। प्लीमथब्रधरसंघपक्षीयस्योपदेशादहमप्यन्यथाभवमिति मन्वानो यद्यपि कोट्समहाशयः सुतरामुद्भ्रान्तोऽभवत् तथापि प्लीमथब्रधरमहाशयस्यानुचिताभिप्रायो मयि क्रैस्तधर्मस्य विषयेऽनादरं नोत्पादयेदित्युक्त्वा तस्य समाधातुं शक्यमासीत्॥

मम सन्देहास्तावत् बाइबलविषये एवं च तस्य गृहीतरूढार्थ आसन्॥

द्वादशोऽध्यायः

भारतीयैः सह परिचयः

क्रैस्तमतीयैः सह मदीयपरिचयमधिकृत्य विशेषलेखनात्पूर्वमितरेऽनुभवा मदीया वर्णनीया भवन्ति। नातालपत्तने दादाअबदुल्लामहाशयो यादृशं स्थापनमध्यास्त प्रिटोरियानगरे शेठ-तैयब-हाजी-खानमहमदमहाशयः तादृशं स्थानमध्यतिष्ठत्। अथ तमन्तरेण न किमपि सार्वजनिकं कार्यं तत्र प्रचलति स्म। प्रथमसप्ताह एवास्य परिचयं संपाद्य प्रिटोरियावर्तिभिः सर्वैरपि

Funding by IKS-MoE

भारतीयैः सह मे परिचिकीर्षामस्मै न्यवेदयम् । तत्रत्यानां भारतीयजनानां परिस्थितिं जिज्ञासुरहं तस्य साहाय्यमपैक्षिषि । सोऽपि संतोषेण प्रत्यपद्यत ॥

तत्रत्यान्भारतीयानखिलानपि संघट्य ट्रान्सवालदेशे यादृशी तदीया परिस्थितिरिति तेभ्योऽहमवर्णयम् । इदमेव मयाङ्गीकृतमादिम कार्यम् । इयं सभा शेठ-हाजी—महमद-हाजी-जुसब-महाशयानां मन्दिरे संमेलिताभवत् । एतं शेठमहाशयं प्रति परिचयपत्रमेकं मया नीतमासीत् । तत्र बहुशः 'मेमण'व्यापारिणः समागताः । हिन्दुजनाश्च केचिदासन् ॥

मम जीवमाने मया चतुर्णां जनानामग्र उपन्यासकरणं तावदिदं प्रथममेवेति वक्तुं शक्यम् । अहं भाषणाय सज्जीकृत्य गतः । व्यापारे सत्येन वर्तनं भाषणस्यास्य विषयः । अनेकशः श्रुतं मया यद् व्यापारे वणिजः सत्येन वर्तितुं न शक्नुवन्तीति । ते खलु वादं कुर्वन्ति यथा— व्यापारो नाम व्यवहारविषयः । सत्यं धार्मिको विषयः । व्यवहारोऽन्यः । धर्मोऽन्यः । व्यवहारे शुद्धसत्यं न कदापि चलति । यावत्साध्यं सत्यं वक्तुं शक्यमिति ॥

मम भाषणेऽहमेतानभिप्रायान् बलवद्विरुध्य तेषां कर्तव्यं तैर्गणनीयमिति तान् प्रत्यादिश्य तद् द्विगुणमस्तीति प्रादर्शयम् । यस्मात्ते परदेशमागताः तस्मात्तेषां प्रतिवक्तव्यता समधिकाभूत् । यत एषां स्वल्पसंख्याकजनानां वर्तनं लक्ष्यीकृत्य हिन्दुस्थानस्य कोट्येतरप्रजानां योग्यतां तत्रत्याः परिमिमत इत्यवेदयम् ॥

समन्ताद्वर्तिभिरांग्लेयैस्तुलनीकृत्य परीक्ष्यमाणेऽस्मज्जीवनरीतौ मालिन्यस्याधिकमवकाश आसीदिति प्रत्यभात् । विषयमेनमहं तेषामवधानमानैषम् । तेषु वर्तमानं हिन्दु-मुसलमान-पारसी-ईसायी अथवा गुजराती-पंजाबी-मद्रासी-सिन्धी-कच्छी-सुरती इति नैकविधं तारतम्यं विस्मर्तव्यमिति साग्रहमवोचम् ॥

तत्रैकः संघो निर्मातव्यः । तस्य द्वारा भारतीयानां क्लेशविचारः तत्रत्याधिकारिभ्यो निवेदनीय इत्यसूचयम् । अपि च मम विरामकालेषु संघस्यास्य कार्यं करिष्यामीत्यवोचम् ॥

मदुक्तं तत्रत्यानां मनसि निरूढमिति मे प्रत्यभात् ॥

मम भाषणे समाप्ते सति चर्चा प्रारभत । कतिपयास्तत्रत्यां परिस्थितिमधिकृत्य विषयान् मह्यं निवेदयितुं सन्मतिं चक्रुः । अहमेतेन प्रोत्साहित इव । दृष्टं मया यत् सभावर्तिषु केवलं स्वल्पजनानामाङ्ग्लभाषा विदितेति । तस्मिन्देश आङ्ग्लभाषाज्ञानेनाधिकसाहाय्यं भविष्यतीति मत्वा प्राप्तविरामाः भवेयुः तैः सा शिक्षणीयेत्यसूचयम् । वयसि प्राप्तेऽपि भाषाशिक्षणं साध्यमित्युक्त्वा तथाकृतशिक्षणानां दृष्टान्तानदाम् । तान् शिक्षयितुमेकवर्गप्राप्तानामहमेव पाठयेयम् । अथवा शिक्षितुकामानां शिक्षणं सुकरमित्यवेदयम् । वर्गसंमेलनं न कृतम् । परंतु त्रिभिर्बालकैर्निवेदितं यदहमेव तद्गृहं गत्वा यदि पाठयेयं तदा शिक्षेरन्निति । तेषां द्वौ 'मुसलमानौ' । एको नापितः । अन्यः 'गुमास्तः' (लेखनजीवी) । तृतीयः आपणजीवीहिन्दुजनः । एषां सर्वे-

षामनुकूलो समभवम् । पाठनशक्तिर्ममासीदिति मम नासीदल्पोप्यविश्वासः। मम शिष्याणामरोचकत्वेऽपि नाहमरोचये। कदाचिदहं तत्पार्श्वं गतः। तदा ते स्वकार्यप्रसक्ता बभूवुः। इदं द्रष्टुमेव मदीयगमनं भवति स्म । तथापि नाहं क्षमामतिक्रान्तः । तत्र न कोऽपि आंग्लभाषां शिक्षितुमिच्छालुरासीत्। प्रायोऽष्टमासाभ्यन्तर आंग्लभाषायां कथालापं कर्तुं योग्यतामापुरिति वक्तुं शक्यम्। द्वौ गणितकुशलौ सामान्यतः पत्रव्यवहारं कर्तुं लेखितुं च पर्याप्तामाङ्ग्लभाषामज्ञासिष्टाम्। स्वकीयग्राहकैः सह पर्याप्तामाङ्ग्लभाषां शिक्षितुं नापितस्याभिलाष आसीत्। परंत्वेवंविचित्रशिक्षया शिष्याणां द्वौ संपादनशक्तिं लेभाते ॥

अहं सभाजनितफलेन तृप्तोऽभवम् । यावदहं स्मरामीयं सभा प्रतिमासं प्रतिसप्ताहं वा मिलेदिति निश्चितमासीत्। इयं सभा प्रायः क्रममाश्रित्य मिलति स्म। एवं मिलितायामस्माभिरस्मदभिप्रायाः स्वतंत्रैः परस्परं निवेद्यन्ते स्म। इतः संजातं फलं यथा प्रिटोरियानगरे ममापरिचितः कोऽपि भारतीयो नासीत्। प्रत्येकस्य परिस्थितिमधिकृत्य ममाविदितो विषयो नासीत्। एतेन मम तत्रत्येन 'ब्रिटिश-एजंट -- मि. जेकोब्स-डि-वेट'महाशयस्य परिचयं कर्तुमिच्छा समजनि। अहं गत्वा तमपश्यम्। तस्य भारतीयानां विषये सहानुभूतिरासीत् । परंतु तेन यत्किमप्यधिकं कर्तुमशक्यमासीत्। तथाप्ययं यावच्छक्यं साहाय्यं करिष्यामीति संमेने यथेच्छया तं द्रष्टुमनुज्ञा मे दत्ता॥

इदानीमहं 'रेल्वे' अधिकारिभिः प्रयाणविषये भारतीयानामुपरि कार्यतया निवेशितानि निबंधनानि 'रेल्वे' शासनानुसारमपि नहि न्याय्यानीति प्रपद्य पत्रव्यवहारमकरवम्। अस्य प्रतिवचनरूपेण ये भारतीयाः समीचीनवेषधारिणः तेषामुपरितनश्रेणी'टिकिट'प्रदेयं भवतीति पत्रमागतम्। एतेन संपूर्णतया समाहितमिति वक्तुमवकाशो नासीत्। यतः सम्यग्वेषधारी न वेति निर्धारणं 'स्टेशन् मास्टर'स्य हस्तगतमासीत् ॥

'ब्रिटिश एजंट' स्ववशे स्थितानि भारतीयानां संबद्धपत्राणि मम प्रादर्शयत्। तैयबशेठमहाशयेन ममेदृशानि पत्राणि दत्तान्यासन्। एतैर्मम विदितमासीत् यद् भारतीया 'ऑरेंजफ्रि-स्टेट'तः बहिः महता क्रौर्यैण निष्कासिता आसन्निति ॥

समग्रतयावलोक्यमाने प्रिटोरियानगरे ममावस्थानं ट्रान्सवाल–ऑरेंज्फ्रि-स्टेटयोर्भारतीयानामार्थिकसामाजिकराजनैतिकपद्धतिं सम्यगवगन्तुं शक्यमासीत्। एतद्विदित्वा ममाग्रे मूल्यं साहाय्यं भविष्यतीति तदानीं नाज्ञासिषम्। यतोऽहं वर्षानन्तरमथवा व्यवहारसमाप्तौ ततः पूर्वमेव हिन्दुस्थानं प्रति निवर्तितव्यमिति कृतसमालोचन आसम् ॥

परंतु दैवसंकल्पोऽन्योऽभवत् ॥

त्रयोदशोऽध्यायः

‘कुली’ स्थितेरनुभवः

ट्रान्सवाल-ऑरेंजफ्रीस्टेटवर्तिनां भारतीयानां परिस्थितिं विस्तरेण वर्णयितुं नेदं स्थानम् । एतज्जिज्ञासुभिः मया प्रणीतदक्षिणाफ्रिकासंबन्धी सत्याग्रहेतिहासः पठनीयः । परन्त्वत्र तद्विषयं संक्षेपेण वर्णयितुमावश्यकम् ॥

ऑरेंजफ्रीस्टेटस्थलेऽष्टाशीत्युत्तराष्टशताधिकसाहस्रमिते वर्षेऽथवा तत्पूर्वमेव वा शासनमेकं परिकल्प्य तत्रत्यभारतीयानामाधिकारमशेषमपजह्रुः । भारतीयास्तत्रावस्थातुमनिच्छन्तो भोजनालयेषु ‘वेटर’ (परिवेषकः) अथवा तद्विधहीनकार्येषु वर्तितुमशक्नुवन् । तत्रत्या वणिजः स्वैरनुभूतनष्टं समीकर्तुं यत्किञ्चित् पणकं दत्त्वा ततस्ते निष्कासिताः । एते वणिजः प्रार्थनापत्राणि चक्रुः । परन्तु तेन न किञ्चित्फलमासीत् ॥

पञ्चत्रिंशदुत्तराष्टशताधिकसहस्रमिते वर्षे एकं कठिनं शासनं प्रचलितमासीत् । तदनुसारेणैतद्देशान्तः प्रविशन् प्रत्येको भारतीयः प्रायः पञ्चचत्वारिंशद्रूप्यकान् (‘पाउण्डत्रयम्) शिरःकररूपेण दद्यादिति निश्चितमासीत् । यद्येते भूमिं चिकीर्षवस्तदा नियतस्थानेषु एव क्रेतुं शक्यमासीत् । तदानीमपि भूमिं प्रति पूर्णोऽधिकारी नासीत् । एतेषां तत्रत्यशासनसभानां स्वकीयप्रतिनिधीन् वरयितुमधिकारो नासीत् । सर्वाण्येतानि शासनान्येशियानिवासिनां केवलं कल्पितान्यासन् । एतेषां तत्रत्यकृष्णवर्णानां जनानामप्यनुयान्ति स्म । एतदनुसारेण भारतीयानां पादाध्वना गन्तुमधिकारो नासीत् । रात्रौ नववादनात्परमनुज्ञापत्रं विना न बहिः संचरितव्यम् । अयमन्तिमो नियमो भारतीयानां विषये नाधिकमुपयुज्यते स्म । आत्मानं ये ‘ आरब ’ इत्याह्वयन्ति तेषामुपरि निबन्धनमिदं न प्रयुज्यते स्म । अयमेक उपकार इति गण्यते स्म । एष उपकारः स्वभावतो नगररक्षकेच्छा निर्धारितोऽऽसीत् ॥

अनयोर्नियमयोः प्रभावो मदनुभूतिपदमागतः । अहमनेकशः कोट्समहाशयद्वितीयो रात्रौ पर्यक्रमिषम् । दशमघण्टात्ययात्प्रागेव गृहं प्रत्यागमनमपूर्वमासीत् । एतन्मध्ये पुररक्षिभिरवष्टब्धश्चेत् किमु । अत्र मदपेक्षया कोट्समहाशयोऽप्यधिकचिन्तापरोऽभवत् । रात्रिसंचाराय स्वकीयत ‘निग्रो’सेवकेभ्योऽनुज्ञापत्रं प्रदेयमासीत् । किन्तु मह्यं कथं तदनुज्ञापत्रं देयम् । अनुज्ञापत्रप्रदानविषये स्वाम्येव स्वभृत्यमात्रेऽधिकारी । मया कदाचिदनुज्ञापत्रं प्रार्थितं सत् कोट्समहाशयो यद्यपि तां दातुमनुमन्येत तथापि तां दातुमप्रभुरासीत् । निषिद्धप्रदानं हि प्रतारणा स्यात् ॥

तस्मात्कोट्समहाशयो वा तस्य कश्चित् सखा वा (न हि सम्यक् स्मर्यते) राजकीयन्यायवादिनो डॉ. क्राउझेमहाशयस्य संनिधिं मामनैषीत् । आवामुभावप्येकपाठशालायाः

Funding by IKS-MoE

समुत्तीर्णौ ब्यारिस्टर्जनावित्यबोधि । नवमघण्टात्यये निशाविहाराय मयाज्ञा पत्रं प्राप्तव्यमिति । दुःसहं वचनमाकर्ण्य मद्विषये स्वीयां सहानुभूतिं व्यक्तीकुर्वाणः पुररक्षिभिरनुपद्रुतोऽयं स्वेच्छया विहर्तुमहतीति पत्रमेकं विलिख्य मह्यमदात् । बहिः संचरमाणेन पत्रमेतत् सर्वदा सहैव नीयते स्म । तदुपयोगावसरस्तु कदापि मया न प्राप्तः । परन्त्वयं कश्चिदाकस्मिको योग इति वक्तव्यम् ॥

डॉ. क्राउझेमहाशयः स्वमन्दिरमागन्तव्यमिति मां न्यमन्त्रयत् । उभयोरपि मैत्रीक्रमेणोदपद्यत । मया तत्सकाशमसकृद् गम्यते स्म । तन्मुखेनैव ततोऽपि सुप्रसिद्धस्य तदीयाग्रजस्य परिचयोऽपि मे जातः । स किल जोहानिसबर्गे नगरे राजकीयन्यायवाद्यासीत् । असौ ‘ बोअर ’ युद्धसमये जोहानिसबर्गवर्तिनः कस्यचिदांग्लाधिकारिणो वधाय प्रच्छन्नसहकार्यभूदिति सैन्यशासनरीत्या व्यवहारेणाभियुक्तः सन् सप्तवर्षावधिकेन कारागृहवासेन दण्डितोऽभवत् । ततो न्यायवाद्यधिकारपट्टादपि वियोजितोऽभूत् । समरावसाने ट्रान्सवालदेशवर्तिनो न्यायवादिनः स्वागतेन तं संमान्य स्वीचक्रुः । अयं तत्रैव भूयोऽपि न्यायवादिकृत्ये व्यापृतोऽभवत् ॥

परिचयोऽयमग्रे मम सार्वजनिककार्येषूपकारकोऽभूत् । अनेन मयानुष्ठेयानि बहूनि कार्याणि सुकराणि समपद्यन्त ॥

पादाध्वक्रमणनियामकशासनादधिकं मे क्लेशः संवृत्तः । मया सर्वदा ‘ प्रेसिडेंट स्ट्रीट ’ इत्याख्यवीथिंना कंचिदनावृतदेशं प्रति परिक्रमाय गम्यते स्म । तस्यामेव वीथ्यां ‘प्रेसिडेंट-क्रुगर’ महाशयस्य गृहमासीत् । तद्गृहं निराडंबरच्छायं परितश्च निरारामशोभम् । संनिहितगृहकदंबाद्विशेषसंस्थानम् । एतन्मन्दिरापेक्षया परमसुन्दरतराणि समन्तादारामपरिशोभितानि प्रिटोरियानगरस्य लक्षाधिपतीनां बहूनि भवनान्यत्रवर्तन्त । वस्तुतः प्रसिद्धोऽभूदनाडंबरः ‘ प्रेसिडेंट क्रुगर’महाशयस्य । गृहस्य पुरस्तादेकस्य पुररक्षिणो राजपुरुषस्य परिसर्पणादनेन कस्याप्यधिकारिणो गृहेण भाव्यमिति विज्ञायते स्म । अस्य राजभटस्य समक्षं मया निराबाधमेव सर्वदा पर्यक्रामि ॥

राजभटाः काले काले पर्यायशो गृहमरक्षन् । एकस्मिन्दिने कश्चिद्भटः प्रागेव मामप्रबोधयननावेदयंश्च पादाध्वनः परित्याजयितुमकस्मादेव मां ताडयित्वा घण्टापथे निरफालयत् । ततोऽहं विस्मितो दुःखितश्च चिन्तयितुं प्रवृत्तः । किंनिमित्तमहं ताडित इति यावद्राजभटमहमपृच्छं तावदकस्मात्तस्मिन्नेव घण्टापथेऽश्वचर्यां कुर्वाणः कोट्समहाशयो मां शब्दापयन्नित्थमवादीत् —

गांधि सर्वं मया लक्षितम् । भवद्भिरसौ व्यवहारेणाभियोक्ष्यते यदि तदा नूनमहं न्यायसभायां तस्योपरि संतोषतः साक्ष्यं वदिष्यामि । विषण्णोऽस्मि खलु तदत्याचारेणेति ॥

मया कथितम्—

‘ अस्य कृते भवद्भिर्विषादो न कर्तव्यः । हन्त राजभटोऽयम् । किं नाम क इति जानीयात् । तस्य किल कृष्णवर्णा मनुष्याः सर्वेऽपि समानाः । मन्निर्विशेषमेव ‘ निग्रो’जनेऽप्ययं

प्रवर्तत इत्यत्र सन्देहः कोऽपि नहि । अङ्गीकृतं खल्वयं नियमो मया यदात्ममात्रसंबद्धमन्यायमुद्दिश्य न्यायसभां नहि प्रविशामीति । ततोऽहमेनं नाभियोक्तुमिच्छामीति ॥

स पुनः प्राह—

'भवत्स्वभावानुरूपमेव भवद्भिः कथितम् । तथापि पुनर्विमृश्यताम् । इतरे जनाः सद्बुद्धिं शिक्षणीया एवेति । एवमुक्त्वा स राजभटं निरभर्त्सयत् । तयोः संवृत्तः कथालापो मया नाज्ञायत । तस्य 'बोअर'राजभटत्वात् 'डच'भाषया संवादः कृतः । भटो मां क्षमामभ्यर्थयत् । एवमभ्यर्थना न खल्वावश्यक्यासीत् । यदसौ मया पूर्वमेव अक्षमि ॥

ततः परं नाहं तस्यां वीथ्यामगमम् । मया हि चिन्तितम्—

अन्ये राजभटा यद्यागच्छेयुः न खलु तेषामयं वृत्तान्तो विदितः स्यात् । अविज्ञातवृत्तान्तत्वात्तेऽप्येवमेव वर्तेरन् । वृथैव भूयोभूयः किमिति यत्र मया ताडनमाप्तं तत्र गन्तव्यमिति । इत्थमालोच्य संचारमार्गमन्यमन्विष्य स्वीकृतवान् ॥

अनया घटनया तत्र बद्धस्थितीनां भारतीयानां विषये मम सहानुभूतिर्भूयोऽवर्धत । शासनमेतदधिकृत्यांग्लेयप्रतिनिधिना सह कृतसंवादोऽहं शासनन्यायान्यायनिर्णयार्थमेको व्यवहारो युष्माभिरुपस्थापनीय इति भारतीयैः सह चर्चामकरवम् ॥

अहमेवं रीत्या न केवलं पठनश्रवणद्वारापि तु स्वानुभवेनापि तत्रत्यभारतीयानां कृच्छ्रदशामज्ञासिषम् । दक्षिणाफ्रिका नाम न खलु भाविनः कस्यापि भारतीयस्य निवासयोग्यो देश इत्यहमचिन्तयम् । एतादृशी परिस्थितिः कथं समीकर्तव्येति भूयोऽनुसंधानपरोऽभवम् ॥

परन्तु तदानीं मम दादा-अबदुल्ला-व्यवहारकृत्यमेव प्रधानकर्तव्यमासीत् ॥

चतुर्दशोऽध्यायः

व्यवहारस्यकृते सज्जीकरणम्

प्रिटोरियानगरे मयातिवाहित एकवत्सरे यावज्जीवं पूजनीयः परमोत्तमोऽनुभवः संपादितः । अत्र हि मया सार्वजनिककार्याणां निर्वाहरीतिमवबोद्धुमवकाशो लब्धः । अत्रैव हि मया सेवायोग्यतापि संपादिता । अत्रैव मदीया धर्मासक्तिरपि शनैः शनैस्तीव्रसंवेगा समजनि । न्यायवादिकृत्यस्य तात्त्विकं ज्ञानमहमत्रैव समपादयम् । नूतनन्यायवादी प्रशस्तानुभवशालिनो न्यायवादिनः कार्यालयं प्रविश्य यावच्छिक्षितुं शक्नुयात्तावदिहैव मया सर्वमशिक्षि । न्यायवादिपदस्य नाहमयोग्य इत्यात्मविश्वासोऽपि अत्रैव मया समपादि । न्यायवादियशः संपादनरहस्यमप्यत्रैवाहमुपालप्सि ॥

दादा-अब्दुल्ला-महाशयस्य व्यवहारो न खलु साधारणः । स किल षट्लक्षरूप्यकपरिमित (चत्वारिंशत्सहस्रपाउण्डात्मकः) इति । तस्य वाणिज्यमूलत्वादसौ जटिलतरैर्गणनाविशेषैः परिप्लुतोऽभूत् । व्यवहारस्य केचिदंशाः स्वीकृता वाग्दानपत्रनिबन्धनाश्वासन् । प्रत्यर्थिना तु तान्येतानि पत्राणि वञ्चनया लेखितानि न चात्र लिखितरीत्या साकल्येन प्रतिफलमदायीति । विवादः प्रवर्तितोऽभूत् । अस्मिन्नेव व्यवहारे चर्चास्पदीभूता विषया गहनाः । शासनिकविषयाश्च बहवोऽविद्यन्त ॥

उभयपक्षीयैरपि परमोत्तमा न्यायवादिनः स्वीकृताः । एतेन द्वयोरपि पक्षयोः कार्येष्वनुभवसंपादनाय सदवकाशो मया लब्धः । वादिस्थापितन्यायवादिनामर्थे वादिपक्षीयलेख्यपत्राणां सज्जीकरणं व्यवहारसंबन्धिविषयाणां परिशोधनं च मदीयकर्तव्यतया निर्दिष्टमासीत् । एवं मया सज्जीकृतविषयेभ्यः कार्यग्राहकेण (सोलिसिटर) कियन्तः स्वीक्रियन्ते तथा च तेन स्वीकृत्योपन्यस्तेभ्यः कियन्तो न्यायवादिभिः परिगृह्यन्त इत्यादिवस्तुनिरूपणमात्रेणापि महती व्युत्पत्तिः साधनीयाभवत् । एतद्व्यवहारकर्मणि मम ग्रहणशक्तेर्गृहीतविषयाणां च सुव्यवस्थितरूपेण क्रोडीकरणशक्तेरियत्तावधारणं सुकरमित्येव मे स्पष्टमासीत् ॥

व्यवहारेऽस्मिन्महती श्रद्धा वोढा । किं बहुना । अहं तन्मयोऽभवम् । तत्संबद्धलेख्यपत्राणि समस्तान्यपठिषम् । अस्मदीयकार्यिकस्य निरवधिकविश्वासपात्रमासम् । स किल महाप्राज्ञोऽऽसीत् । अत एव मदीयकार्यं सुकरं संवृत्तम् । आयव्ययगणनारहस्यमवेदिषम् । भूयिष्ठानां लेख्यपत्राणां गुजरातीभाषामयत्वात् तेषामांग्लभाषया परिवर्तनमावश्यकमासीत् । अनेन मे भाषान्तरीकरणशक्तिः साधीयसी संपन्ना ॥

अहं पूर्वोक्तरीत्या यद्यपि धर्मजिज्ञासया सार्वजनिककार्यव्यासङ्गे च कियन्तमपि कालमत्यवाहयं तथापि तदेतत्कार्यं प्रधानतया नाहमग्रहीषम् । व्यवहाराय सज्जीकरणमेव मदीयमादिमं कर्तव्यमित्यहमगणयम् । यदा तत्संबन्धशासनादिके पठितव्यमापतितं तदा पूर्वमेव तत्कार्यं निरवर्तयम् । एतेन किं .तावत्प्राप्तमिति चेत् व्यवहारसंबद्धा विषयाः वादिप्रतिवाद्यपेक्षया मयैव सम्यक्तरामज्ञायन्त । लेख्यपत्राण्युभयपक्षीयान्यपि मन्निकटे स्थितानि ॥

व्यवहारबलभूयस्त्वं व्यवहारवस्तुनिबन्धनमिति दिवंगतस्य पिंकटमहाशयस्य बुद्धिवादो मम स्मृतिमागतः । अयमेव बुद्धिवादो दक्षिणाफ्रिकादेशस्य प्रसिद्धन्यायवादिना लॅनर्डमहाशयेनार्वाक् समर्थितः । मया स्वीकृते कस्मिंश्चित् व्यवहारे यद्यपि मदीयकार्यिकस्य पक्ष न्यायः स्थितः तथापि धर्मशास्त्रं तस्य प्रतिकूलमिति मयावैक्ष्यत । जये निराशः सन् लॅनर्डमहाशयात्साहाय्यमिच्छुस्तत्समीपमगमम् । सोऽपि लेख्यपत्राणां बलभूयस्त्वमवेक्ष्य व्यवहारमस्माकमनुकूलममन्यत । किं च मामब्रवीत्– गांधे, इदं तावदेकं सम्यगहं जाने । व्यवहारविषयाः सम्यक् परिशील्य गृह्यन्ते यदि तदा तदुपकारकं धर्मशास्त्रं स्वयमेवोपधावतीति । तस्मादेतद् व्यवहारवृत्तान्तः सम्यक्तरामवबोद्धव्यः । एवं कृत्वा भवान्पुनरागत्य मां द्रष्टुमर्हतीति । व्यवहारविषयाः

Funding by IKS-MoE

पुनर्विमृश्यमाना ममान्यथा प्रत्यभासन्त । अपि च स्वपक्षानुकूलः प्रमाणतया समुदाहरणीयो दक्षिणाफ्रिकान्यायसभया निर्णीतपूर्वः प्राचीनव्यवहारोऽप्येको लब्धः । एतेन मे परमानन्दः समजनि । लॅनर्डमहाशयस्य पार्श्वमुपेत्य तस्मै सर्वमेतदन्यवेदयम् । सोऽपि हृष्टः प्रावोचत् — बाढम् । इदानीमस्मिन् व्यवहारे जयो नः सिद्धः । परंतु द्रष्टा यः प्राड्विवाकः तद् विषये मनागप्रमत्तैर्भाव्यमिति ॥

दादा-अब्दुल्लामहाशयस्य व्यवहाराय सज्जीकुर्वाणस्य मम सामान्यविषयावबोधस्य महत्त्वं न सम्यग्विदितमासीत् । व्यवहारविषया नाम भूतार्थाः । भूतार्थत्वं च सत्यविषयत्वम् । सत्यस्य परिग्रहे शासनं तावत्स्वयमेवोपकर्तुमायाति । दादा-अबदुल्लामहाशयस्य व्यवहारे विषयाणां स्वपक्षानुकूलत्वात् धर्मशास्त्रमप्यवश्यमस्माननुग्रहीष्यतीत्यवेदिषम् । किन्तु व्यवहारेऽस्मिन् विवदमानौ द्वावपि समीपबंधू एकत्रवासिनौ चास्ताम् । अनुपशान्तेऽस्मिन् विवादे द्वयोरपि निःस्वताप्राप्तिरपरिहार्येति मम व्यक्तमासीत् । व्यवहारश्च कदा समाप्तिमेष्यतीति केनापि वक्तुं न शक्यते स्म । विवादे न्यायसभायामेव निर्णयाय मुक्तश्चेदनंतकालमसौ प्रचलेत् । तेन नैकतरस्यापि पक्षस्य लाभः स्यात् । तस्माज्झटिति व्यवहारोऽयमन्तं गमयितव्य इत्युभयोरप्यासीत्प्रत्याशा ॥

अहं तैयब-शेठ-महाशयस्य समीपं गत्वोभाभ्यां मिलित्वा पञ्चानामग्रे मम विवादो व्यवस्थापनीय इत्यसूचयम् । स च निजन्यायवादिनो मतमवगन्तुमिच्छामीत्यवादीत् । उभयोरपि प्रत्ययिता अन्तरस्थाः स्वीकृताश्चेदचिरेणैव व्यवहारोऽन्तं गमिष्यतीत्यहमब्रवम् । न्यायवादिभ्यः प्रदेयं द्रव्यं तथाधिकाधिकमजायत यथा महावणिजोऽप्यायसर्वस्वमेतदेकमेव ग्रासितुमलमभूत । उभावप्येतद्व्यवहारचिन्तया कार्यान्तराक्षमावभूताम् । एतन्मध्ये तयोर्वैमनस्यं वर्धते स्म । न्यायवादिकृत्यादहं निर्विण्णोऽभवम् । स्वस्वपक्षप्रसिद्ध्ये धर्मशास्त्रीयतन्त्राणामन्वेषणमुभयपक्षीयन्यायवादिनामपि कार्यमभूत् । किं च प्राप्तजयेन पक्षेणापि व्ययीकृतद्रव्यं साकल्येन न कदापि प्रतिलभ्यत इति मया तत्कालमेव प्रत्यग्रमवागम्यत । न्यायवादी न्यायतः स्वेन स्वीकर्तव्यादप्यधिकतरमर्थं गृह्णाति स्म । इदं मे दुःसहमासीत् । उभयपक्षयोरपि मैत्रीमुत्पाद्य बन्धुसंघटनमेव मम धर्म इत्यहमचिन्तयम् । द्वयोः संधिकरणे विश्वप्रयत्नमकार्षम् । पर्यन्ते तैयब-शेठ-महाशयः स्वानुमतिमदात् । विवादनिर्णयाय मध्यस्थो निश्चितः । तस्याग्रे व्यवहारः प्राचलत् । दादा-अबदुल्ला-महाशयो जयं प्राप ॥

किन्तु नाहमियतैव पर्यतुष्यम् । तैयब-शेठमहाशयस्य माध्यस्थ्यविहितद्रव्यमशेषमप्येकदैव प्रदातुमशक्यमासीत् । दक्षिणाफ्रिकावर्तिनां पोरबंदरपुरीयाणां वणिजां मध्ये धर्मशास्त्रवदनुल्लंघनीया निःस्वताख्यापनाद्वरं मृत्युरेवेति पद्धतिः प्रचलितासीत् । तैयब-शेठमहाशयः सप्तत्रिंशत्सहस्र 'पाउण्ड' मुद्राणां (५५५००० रूप्यकाणां) एकदैव प्रदाने न शक्तोऽभूत् । एकामपि काकिणीमन्यूनीकृत्य समग्रमेव तत्प्रदातव्यमिति निश्चित्य स्थितः । निःस्वताख्यापनमस्य नाभिमतमासीत् । अथैक

Funding by IKS-MoE

एवोपायः स्थितः । स च प्रदेयार्थस्य अबदुल्लामहाशयेन खण्डशः स्वीकरणम् । सोऽप्यौदार्यं प्रदर्शयन् ऋणापकरणाय दीर्घकालमवधिमदात् । मध्यस्थनिर्णयेन व्यवहारव्यवस्थापनाय द्वयोः पक्षयोः संमतिग्रहणापेक्षया प्रदेयद्रव्यस्य खण्डशः स्वीकरणायानुमतिसंपादनं दुष्करमभवत् । परन्तु कृतसंधानावुभावप्यमोदेताम् । एतेन तयोर्लोकमान्यताप्यतिशयमागमत् । मदीयसंतोषस्तु निरवधिरासीत् । एतद्व्यवहारप्रसङ्गादहं न्यायवादिकृत्यस्य नैजमार्गमवबुद्धवान् । मानुषस्वभावस्य सदंशमन्विष्य हृदयानुप्रवेशनरीतिर्मम विदिताभवत् । द्वेषवशाद्विभिन्नयोरुभयोः पुनर्यत्संघटनं तदेव न्यायवादिनः पारमार्थिककर्तव्यमित्यज्ञासिषम् । इदं ज्ञानं मयि तथा रूढमूलमभवद्यथाहं न्यायवादिवृत्तिमवलंब्य विंशतिवर्षपर्यन्तं प्रवर्तमानपरस्परव्यवहारेषु संधानप्रसङ्गैरेव समधिकं कालमत्यवाहयम् । एतेन मे न कापि अर्थहानिरजायत । मदीयान्तरात्मनस्तु न कापि हानिः संवृत्तेति किमु वक्तव्यम् ॥

पंचदशोऽध्यायः

धार्मिकमथनम्

उक्तपूर्वं हि मया यत् क्रैस्तमतीयैः सह सम्बन्धमकल्पयमिति । तदेतदधिकृत्य पुनरुपन्यासायेदानीमवसरः प्राप्तः ॥

बेकरमहाशयो मम निःश्रेयसमुद्दिश्य भूयो भूयश्चिन्तयाक्रम्यत । स मां 'वेलिंग्टन कन्वेन्शन' इत्येतदाख्य क्रैस्तमतीयजनकूटमेकमनयत् । 'प्रोटेस्टन्ट' संघप्रविष्टाः क्रैस्तमतीयाः स्वधर्मोद्बोधनाय स्वात्मशुद्धिप्राप्तये वा कतिपयवत्सरैरेकैकवारमेवंविधकूटानि परिकल्पयन्ते । तदेतत्कार्यं क्रैस्तधर्मस्य पुनःप्रतिष्ठेति वा पुनुरुद्धार इति वा व्यपदेशमर्हति । 'वेलिंग्टन कन्वेन्शन' अपि एतादृशकूटमेवासीत् । तत्रत्यप्रख्यातधर्मनिष्ठः 'पूज्य ॲन्ड्रू मरे' महाशयोऽस्य संमेलनस्य सभापतिरासीत् । तस्य संमेलनस्य धार्मिकवातावरणं तत्रागत्यमिलितानां धर्मोत्साहः श्रद्धा च सर्वथा मां क्रैस्तमतावलंबिनं कुर्वीरन्निति बेकरमहाशय आशंसत् ॥

किन्तु बेकरमहाशयस्य पूर्वोक्तप्रत्ययः प्रार्थनायाः शक्तिमवष्टभ्य स्थितः । स किल परमभक्त्या विहिता या भगवत्प्रार्थना सा भगवतः श्रोत्रकुहरं सर्वथा प्रविशत्येवेति निश्चलां श्रद्धामधत्त । ऐहिकार्थसाधनायापि प्रार्थनायामेव कृतप्रत्ययं मुलराख्यं ब्रिस्टोलनगरवर्तिनं कंचित्प्रसिद्धक्रैस्तजनं दृष्टान्ततयोपन्यस्य तथाविधानितरानप्युदाहरत् । प्रार्थनागुणानवगीयमानानहं निष्पक्षपातेन सावधानमश्रौषम् । अन्तरात्मनः संमतौ क्रैस्तमतावलम्बनं मे निर्बाधकं भविष्यतीत्यवोचम् । अन्तरात्मनश्चोदनामतिवर्तितुं चिराय मयाभ्यस्तत्वात् एवंविधप्रतिज्ञाकरणे निर्विकल्पोऽ-

Funding by IKS-MoE

हमासम् । अन्तरात्मानुरोधिनी प्रवृत्तिः प्रमोदकरी ममासीत् । तत्प्रतिकूलवृत्तिस्तु क्लिष्टतरा संतापकरी चाभवत् ॥

वयं वेलिंग्टननगरमगच्छाम । मादृशं ‘ विवर्णपुरुषं ’ सहचरीकृत्य संचरणं बेकरमहाशयस्य दुष्करमभूत् । अयमनेकशः केवलं मत्कृते क्लेशभाजनमासीत् । प्रयाणान्तःपातिनि भानुवासरे क्वचित् अस्माभिरवस्थातव्यमापतितम् । बेकरसंघस्य हि भानुवासरे प्रयाणं निषिद्धमासीत् । स्थलीयविश्रान्तिगृहस्वामी विवादोत्तरं मम वसतिप्रदानमङ्गीकुर्वाणोऽपि भोजनशालायां मम प्रवेशं सर्वथा न्यषेधत् । बेकरमहाशयस्तु स्थिरानुबन्धः सननुमतप्रवेशानामतिथीनामधिकारबलात्सहचरस्य ममापि प्रवेशमङ्गीकार्यमिति वादमकरोत् । परन्तु विदितो मया तस्य क्लेशः । वेलिंग्टननगरेऽप्यहं सहैव तेन स्थितः । तत्रास्य क्लेशा यत्नेन प्रच्छाद्यमाना अपि मदीयदृष्टिगोचरे न्यपतन् ॥

इयं सभा भक्तिशीलानां क्रैस्तजनानां संमेलनमासीत् । तदीयधर्मश्रद्धामवेक्ष्य संजातहर्षोऽभवम् । मया पूज्यमरेमहाशयस्य दर्शनं प्राप्तम् । मम श्रेयःप्राप्तये प्रार्थयमानान् बहूनहमपश्यम् । तेषां प्रार्थनागीतिषु भूयस्यो मम संमता आसन् । अमूः किल मधुरमधुरा अवर्तन्त ॥

सभा दिनत्रयी प्रचलिता । तत्रागतानां भक्तिर्मदीयमानसमगाहत । ममापि सा प्रशंसनीयाभवत् । परन्तु स्वप्रतीतधर्मस्य परिवर्तनाय न कोऽपि हेतुर्दृष्टः । क्रिस्तमतालम्बनेनैव स्वर्गप्राप्तिर्मोक्षलाभश्चैतदविश्वसनीयं ममासीत् । तदेतन्मदीयमतं कतिपयक्रैस्तमित्राणामग्रे निर्व्याजमेवाहमकथयम् । तदाकर्ण्य ते सुतरां विषण्णविस्मिताः समजायन्त । परंत्वेतदपरिहार्यमासीत् ॥

विषयेऽस्मिन्मम क्लेशा इतोऽप्यगाधतरायां चित्रभूमौ स्थिताः । क्रिस्तस्तावदेक एव देवस्य स्वात्मरूपः पुत्रस्तदेकश्रद्ध एव मुक्तिं भजत इत्येतन्मदीयविस्रंभसीमानमतिक्रान्तमासीत् । देवः पुत्रवांश्चेद् वयं सर्वेऽपि तस्य पुत्राः । क्रिस्तस्येश्वरसमानत्वस्य वा तत्स्वरूपत्वस्य वाभ्युपगमे मनुष्याः सर्वेऽपीश्वरसमानास्तत्स्वरूपा वा भवितुमर्हन्ति । क्रिस्तस्य मरणेन तस्य रक्तेन च जगतः पापसंघातो विध्वंसत इत्येतत्पदशः प्रत्येतुं मदीयबुद्धिर्नान्वमन्यत । तदेतद्रूपकालंकारत्वेन गृह्यमाणं कदाचिद्याथार्थ्यप्रत्यायकं स्यात् । किं च मनुष्यमात्रस्यात्मास्तित्वमितरप्राणिनां तु तदभावं तच्छरीरपातसमकालमेव तद्विनाशं च प्रतिपादयन् यः क्रैस्तधर्मोपदेशः स किल मन्मतस्य विरुद्धोऽभूत् । ममैतावन्मात्रमभ्युपेयमासीत्क्रैस्तो धर्मस्य कृते प्राणांस्तत्याज । स च त्यागी महात्मा देवांशसंभवो धर्मोपदेशकश्चेति । किन्तु परमेष्ठिनः सृष्टावयमेव पुरुषोत्तम इति मया नाङ्गीकृतम् । असौ शूलारोपितः सन्मृत्युमापेत्येतदादर्शप्रायमस्ति जगत इत्यविवादम् । परन्त्वस्मिन्कर्मणि गूढगुणस्य वा दैविकप्रभावस्य वा विद्यमानत्वं यदन्तरात्मना नोररीकृतम् । इतरधर्मावलम्बिनो पवित्रजीवनेष्वपरिदृश्यमानो गुणः क्रैस्तभक्तानां जीवनेषु न कोऽपि मया परिदृष्टः । एषां जीवने यानि श्रुतानि परिवर्तनानि तान्येवेतरेषां जीवनेऽपि प्रत्यक्षीभवन्ति स्म । दार्शनिकदृष्ट्या परीक्ष्यमाणेषु क्रैस्ततत्त्वेषु न कोऽपि

Funding by IKS-MoE

विशेषो मयादृश्यत । त्यागदृष्ट्या निरूप्यमाणेषु तत्र हिन्दुजनाः क्रैस्तमतीयानत्यशेरत इत्यवगतम् । क्रैस्तमतं निरवद्यमिति वा सर्वोत्कृष्टमिति वा विश्वसितुं नाहमशकम् ॥

मम मनसि परिवर्तमानमिदं मथनं तत्तदवसरेषु मदीयक्रैस्तमित्रेभ्यो न्यवेदयम् । किन्तु तदीयप्रत्युत्तरैर्नाहमतृप्ये ॥

यथा क्रैस्तधर्मो मया न श्रद्धितस्तथा हिन्दुधर्मस्यापि समग्रतां सर्वश्रेष्ठतां च नाहं श्रद्धातुमशकम् । हिन्दुधर्मस्य व्रणच्छिद्राणि चक्षुर्विध्यन्तीव स्पष्टमलक्ष्यन्त । अस्पृश्यता हिन्दुधर्मस्याङ्गत्वे नूनं तर्हि तदङ्गेन निरर्थकेन व्रणितपूतेन च भाव्यम् । हिन्दुजनेषु विद्यमानस्य नानाजातिसंप्रदायविशिष्टत्वस्य गूढार्थो मया न विज्ञातः । वेदानामीश्वरसंभूतत्वस्य को वार्थः । अस्य यथार्थत्वे सति 'कुरान–बाइबल'इत्येताभ्यामपि तथाभूताभ्यामेव कुतो न भाव्यम् ॥

यथा क्रैस्तसुहृदः स्वमतप्रवेशनाय मां प्रति यत्नमकुर्वत तथा मुसलमानमित्राण्यपि मां स्वमतं प्रवेशयितुमयतन्त । अब्दुल्लाशेठमहाशयोऽपि मामिस्लाममताध्ययनाय सर्वदा प्रेरयति स्म । स्वमतगुणप्रशंसनाय तु तस्य नित्यदावकाशः समुपस्थितः ॥

इमान्मदीयक्लेशानधिकृत्य रायचन्दभाईमहाशयं प्रति पत्रमलेखिषम् । हिन्दुस्थानवर्तिनामितरधर्माचार्याणामपि मया लिखितानि पत्राणि । तेभ्यः प्रत्युत्तराण्यप्यागमन् । रायचन्दभाईमहाशयस्य लेखतः शांतिरीषल्लब्धा । मया क्षमावता भाव्यम् । हिन्दुधर्मश्चेतोऽप्यधिकयत्नेन परिशीलनीय इति तेनाभ्यधायि । तैर्लिखितस्यैकवाक्यस्य भावार्थो यथा—निष्पक्षपातेन विहितजिज्ञासोत्तरमिदं खलु मया निःसंदिग्धमवगतं यदस्मिन् हिन्दुधर्म इवेतरधर्मेषु तत्त्वविचारसौक्ष्म्यं तद्विचारमहत्त्वमात्मवैभवदर्शनमौदार्यं च क्वापि न विद्यन्तेति ॥

अहं शेठमहाशयेन विरचितं कुरानग्रन्थस्यानुवादं क्रीत्वा पठितुं प्रावर्तिषि । इस्लामधर्मसंबद्धा इतरग्रन्था अपि मया संपादिताः । अथाहमांग्लदेशवर्तिभिर्मदीयक्रैस्तमित्रैः सह पत्रव्यवहारमकार्षम् । तेषामेको मां 'एडवर्ड मेटलेंड'महाशयस्य परिचयमकारयत् । तेनापि पत्रव्यवहारमकरवम् । स च 'ॲना किंग्सफर्ड' इत्येतदाख्यमहिलासहकारेण स्वप्रणीतं 'सर्वोत्तमो मार्गः' इत्येतदाख्यं प्रबन्धं मे प्राहैषीत् । स च प्रबन्धः प्रचलितक्रैस्तधर्मखंडनात्मकः । साधुरयं "क्रैस्तवेदस्य नवीनार्थः" इत्येतदाख्यं पुस्तकं मम प्रैषयत् । एतद्द्वयमपि मह्यमरोचत । हिन्दुमतमनेन ग्रन्थद्वयेन समर्थितमिव । टॉल्स्टॉयमहाशयेन प्रणीतः 'ईश्वरसाम्राज्यं तव हृदये स्थितम्' इत्येतदाख्यः प्रबन्धो मां मुग्धमिवाकरोत् । एतत्प्रबन्धपठनेन स्थिततया संस्कारमुद्रा मन्मनसि प्रत्युप्ता । अस्माद् ग्रन्थात्प्रकाशमागतानां तत्त्वान्वेषणस्वातंत्र्यप्रौढता सत्यपरायणतादीनां पुरतः कोट्समहाशयप्रदत्तपुस्तकानि निस्तेजस्कतामगमन् ॥

एवं क्रैस्तमित्रैरभीप्सितमार्गेण मदीयमध्ययनं प्रवृत्तम् । एडवर्ड-मेटलेंडमहाशयेन सह पत्रव्यवहारो भूयस्त्वमापद्य बहुनि दिनानि यावत्प्राचलत् । रायचन्दभाईमहाशयेन तु तस्य जीवितावधिपर्यन्तं प्रचलति स्म । तत्प्रेषितानि कानिचित्पुस्तकान्यहमपठिषम् । तेषु 'पञ्चीकरणं'

'मणिरत्नमाला' 'योगवासिष्ठस्य मुमुक्षुप्रकरणं' 'हरिभद्रसूरेः षडदर्शनसमुच्चयः' इत्येते ग्रन्था अप्यवर्तन्त ॥

एव मदीयक्रैस्तमित्रैरुद्दिष्टमार्गमनुवर्तमानोऽप्यहं तत्सङ्गेन धर्मजिज्ञासायामुद्बोधं प्राप्तः। चिरमहमृणी संवृत्तोऽस्मि। तत्संगस्मृतिर्मयि नित्यस्थायिनि वर्तते। एतन्मधुरपवित्रसम्बन्धदार्ढ्यं कालक्रमेण वृद्धिमगान्न किल पुनः पर्यहीयत ॥

षोडशोऽध्यायः

मनुष्यस्य प्रयत्नस्तावदेकश्चेत् दैवेच्छान्या

व्यवहारस्यावसितत्वात् प्रिटोरियानगरे मदवस्थानं निर्हेतुकं संवृत्तम्। तस्मादहं 'डरबन' नगरं गत्वा हिन्दुस्थानं प्रत्यावर्तनाय संनाहमकार्षम्। अब्दुल्लाशेठमहाशयः संमाननां विना मां विसर्जयितुं नैच्छत्। स किल स्वमित्रमण्डलीमामंत्र्य 'सिडनहेम' नगरे तत्समेतं मां विभवोत्तरमभोजयत् ॥

तद्दिनमशेषं तत्रैवातिवाहयितव्यमिति सूचितमासीत्। मन्निकटे बहूनि समाचारपत्राणि पतितस्थितानि। तान्यहं पठितुं प्रावर्तिषि। पाठं पाठमहं तेषामेकतमस्य कोणप्रदेशे 'भारतीयानां मताधिकारः' (न्यायविधायकसभां प्रति स्वकीयप्रतिनिधिप्रेषणाधिकारः) इति शीर्षकस्याधोवर्ति लेखनमेकमद्राक्षम्। अस्य सारांशस्तु नातालदेशस्य न्यायविधायकसभायाः सदस्यत्वेन स्वप्रतिनिधीनां नियोजने भारतीयाः स्वाधिकारं परित्याजयितव्या इति। एतन्निश्चितमेव निर्मितमेकं शासनं तदानीं तत्सभाग्रे समुपस्थापितमासीत्। शासनमिदं मया न विज्ञातम्। न चापि तत्रत्यानामितरेषामस्य वृत्तान्तो विदितः ॥

कीदृशोऽस्यवृत्तान्त इत्यहमब्दुल्लाशेठमहाशयमपृच्छम्। स च प्रत्यवादीत्—अनभिज्ञाः खलु वयमीदृशानां व्यतिकराणाम्। वणिग्व्यापारसंबन्धिनोऽर्थाः केवलमस्माभिरवबोध्यन्ते। विदितमेवेदं भवतां यदा 'ऑरेंज फ्रीस्टेट' प्रजाधिपत्ये वाणिज्यमस्मदीयमवसन्नप्रायं भवतीति। अस्य कृतेऽस्माभिरङ्गीकृतो यत्नकलापः फलकारी नाभवत्। अनक्षराः किल वयं गतिविकला मन्तव्याः। वृत्तपत्राण्यस्माभिरपि तावत्पठ्यन्ते। परंत्वेतदर्घाणामारोहावरोहमात्रविज्ञानाय। शासननियमं निबन्धनानि नाम कथंकारमस्माभिरवगम्येरन्। अस्मदाङ्ग्लन्यायवादिन एव अस्माकं चक्षुःश्रोत्रमिति ज्ञायताम् ॥

अथाहमपृच्छम् —

इहैव संजातसंवृद्धशिक्षिता नवयुवका भूयांसोऽत्र विद्यन्ते । किमेते वः साहाय्यं नाचरन्तीति ॥

अब्दुल्लाशेठमहाशयो नैराश्यं सूचयन्नाह हन्त भोः। अमी युवका नास्मानुपसर्प्तुमिच्छन्ति। यत्सत्यमेतानस्मदीयानपि वयं नास्मदीयान्मन्यामहे। ते सर्वेऽपि ख्रैस्तमतीयाः। अतस्ते मतोपदेशकानां मुष्टिगता भवन्ति। ख्रैस्तमतोपदेष्टारस्त्वाङ्ग्लजना अतो राजकीयैर्नियंत्रिता वर्तन्त इति ॥

अहमेतदाकर्ण्य चक्षुरुदमीलयम्। इमे युवकाः सर्वथास्मदीयाः कतर्व्याः — इत्यचिन्तयम्। ख्रैस्तधर्मस्य किमयमेवार्थः। ख्रैस्तमतीया अपि न किं भारतीयास्ते ॥

किन्तु हिन्दुस्थानं प्रति गन्तुमुद्यतत्वान्मदीयमनोगतानर्थान्प्रकाशयितुमहमशंकिषि । तथाप्यब्दुल्लाशेठमहाशयं तावदवोचम् — शासनमिदं प्रचारं गमिष्यति चेद् युष्मदीयावस्था कृच्छ्रतरा संपत्स्यते। भारतीयानां जन्मनिर्मूलनायाङ्गीकृतः प्राथमिकोऽयं पदविन्यासः। अयमेवास्मदात्मगौरवस्य मूलकुठार इति ॥

स्यादेवैतद्वृत्तान्तस्य वयमनभिज्ञाः स्थिताः । अस्मदीयन्यायवादिराष्ट्रानामेकतमः श्रीमान् 'एस्कूंब' महाशयस्तमस्मभ्यो न्यवेदयत्। तदेतदेवं संवृत्तं यथा — स किल पराजयं प्राप्य तूष्णीं नैव तिष्ठेत्। सोऽत्रत्यनौकानिवेशस्थानस्य शिल्पाधिकारिणा सह सहृदयतां नाकलयत्। तेन हि शङ्कितं यदयमधिकारी कदाचित् सदस्यत्वानुमोदकाञ्जनान् स्वपक्षीकृत्य तं पराजयेतेति। तदसावस्मानविज्ञातनिजस्थितीनकरोत्। तेनोपदर्शितरीत्या वयमस्मन्नामानि मताधिकारिसूचीपत्रे व्यलेखयाम। अदाम च स्वानुमतिं, तत्सदस्यत्वाङ्गीकाराय। एतेन भवद्भिः सम्यगवगम्येत यदास्माकं मताधिकारो नहि तथा पूज्यो भवति यथैनं भवन्तो मन्यन्ते तथापि युष्मद्वाक्यं वयं जानीमहे। भवतु। किमिदानीमुच्यते ॥

तत्रस्था इतरेऽतिथयः संवादमेनं सावधानमाकर्णयन्ति स्म। अथ मामेकः प्राह — किमिदानीं कर्तव्यमित्यहं ब्रूयाम्। अनया नौकया प्रयाणमकृत्वा भवद्भिरेकमासपर्यन्तमिहैव स्थातव्यम्। भवदाज्ञानुवर्तिनो वयं संग्रामयिष्याम इति ॥

अन्ये सर्वेऽप्यवदन् — सत्यम्। सत्यम्। एतदेवमुच्यते। (शेठमहाशयस्याभिमुखीभूय) आर्या गांधिभाईगमनं भवद्भिर्वारणीयमिति ॥

अबदुल्लाशेठमहाशयः परं चतुरः। स तानब्रवीत् — तेषामितः प्रस्थानं निरोद्धुं नाहमधिकारी। अथवा यावानत्र ममाधिकारस्तावान्युष्माकमप्यस्त्येव। किं च युष्मद्वाक्यं मयानुमोदितम्। परन्तु न्यायवादिन एव ते। ननु प्रदेयमेभ्यः पारितोषिकम् ॥

अयं पारितोषिकप्रस्तावो मां विषण्णमकरोत्। अथाहमवोचम् —

आर्या अबदुल्लाशेठमहाशया अत्र पारितोषिकवार्ता न हि संगच्छते। सार्वजनिकसेवायाः किं वा पारितोषिकम्। अहमत्र स्थास्यामि चेत् परं सेवको भूत्वा तिष्ठेयम्। इमे सुहृदो यथ

भवता विदितास्तथा न मे परिचिता भवन्ति। एते मिथः संभूय प्रयसिष्यन्तीति यदि भवन्तो विश्वसेयुस्तदाहमेकमासमिह स्थातुमनुमोदिष्ये। परन्तु वक्तव्यांश एको विद्यते। न मे किमपि प्रदेयमित्येतद्यद्यपि सत्यं तथाप्येतादृशकार्यसंदर्भेषु द्रव्यलेशं विना प्रवेशो न संभाव्यते। ननु क्वचित्तन्त्रीसंदेशः प्रेषणीयः स्यात्। किमपि मुद्रापणीयं स्यात्। क्वचिद्गतागतमङ्गीकर्तव्यमापतेत्। अत्रत्यन्यायवादिनामभिप्रायो ग्रहीतव्यः स्यात्। युष्मदीयशासननियमादीनामनभिज्ञत्वान्मया धर्मशास्त्रपुस्तकानि कदाचिदवलोकयितव्यानि भवेयुः। सर्वमेतन्नहि द्रव्यं विना शक्यते कर्तुम्। एतादृशकार्याणि बहूनां साहाय्यमपेक्षन्त इति॥

एतन्निशम्यैककण्ठ्येन बहवः प्रापुः। देवो महान्करुणामयश्च। सर्वथा द्रव्यसंचयस्तु भवेत्। सहकारिणो जनाश्च बहवो मिलिष्यन्ति। इहावस्थानं तावदनुमोद्यतां भवद्भिः। सर्वं सुसंपत्स्यत इति॥

एवं भोजनसंतर्पणावसरे मिलितानां संघः कार्यकारिस्वरूपमभजत। भोजनाद्युपचारं निर्वर्त्य शीघ्रमस्माभिर्गृहं गन्तव्यमित्यहमसूचयम्। भावि कार्यक्रमं मनस्येवाचित्रयम्। यश्च यश्च प्राप्तमताधिकार इत्यादिकं विचार्य ज्ञातार्थः सन्नेकमासमुषित्वा ततः प्रस्थातव्यमिति निरचेषि॥

एवं दक्षिणाफ्रिकादेशे मदीयचिरनिवासस्य मूलाधारो दैवेन कल्पितः। एवं भारतीयानामात्मगौरवरक्षायोधनस्य च बीजमुप्तम्॥

सप्तदशोऽध्यायः

नातालदेशे निवासः

त्रिनवत्युत्तराष्टशताधिकैकसहस्रतमे क्रैस्तशकाब्दे नातालदेशवर्तिषु भारतीयेषु शेठहाजीमहमद – हाजीदादामहाशयावग्रगण्यावास्ताम्। श्रीमत्वदृष्ट्या यद्यपि ‘शेठ अबदुल्लाहाजीआदम.’ महाशयः प्रथमस्तथापि सार्वजनिककार्येषु शेठहाजीमहमदमहाशय एवाग्रस्थानमध्यास्त। तस्मादस्याध्यक्षतायामबदुल्लाशेठमहाशयस्य मन्दिरे मिलिता सभा मताधिकारनियामकं शासनं प्रत्यवस्थातव्यमिति निरणैषीत्॥

नातालदेशे प्राप्तजन्मानः क्रैस्तभारतीययुवकाः प्रत्याहूयन्त। ‘डरबन’ नगरन्यायस्थानद्विभाषी श्रीमान् पॉलमहाशयः तत्रत्यक्रैस्तमिशनूशालामुख्योपाध्यायः श्रीमान् सुभानगॉडफ्रेमहाशयश्च समागतौ। एतावेव बहूनां क्रैस्तयुवकानामागमनस्य हेतुभूतावास्ताम्। इमे सर्वेऽपि स्वयंसेवका अभवन्। तत्रत्या बहवो वणिजश्च प्रविष्टाः। तेषु मुख्यानां नामानि यथा—‘दाउदमहमदशेठ आदमजीमियांखान ए. कोलंदावेन्लुपीले सी. लछीरामरंगसामी पडियाचिआमदजीवा’ इति।

Funding by IKS-MoE

पारसीरुस्तमजीमहाशयस्तु स्थित एव । लेखकजनेषु दादाअबदुल्लाप्रभृतीनां महापणेषु नियुक्ताः माणेकजीजोशी–नरसीरामप्रभृतयश्च प्राविशन् । सार्वजनिककार्येषु भागिनो भूत्वा ते सर्वेऽपि मुदिता विस्मिताश्चाभवन् । तेषां किलैवंविधमाह्वानं स्वजीवने नूतनोऽनुभवः । स्वसमुदायस्य समापतितामापदं ध्यायं ध्यायमयं कनीयानयं स्वाम्ययं भृत्योऽयं हिन्दुजनोऽयं मुसलमानोऽयं पारसीकोऽयं क्रैस्तोऽयं गुर्जरोऽयं मद्रदेशीयोऽयं सिंधुदेश्य इत्याद्यनन्तभेदकलापं व्यस्मरन् । ते किल सर्वेऽपि निर्विशेषतया भारतजनन्याः पुत्रा मातृभूमेः सेवकाश्चेत्यात्मानममन्यन्त ॥

तस्य शासनस्य द्वितीयचर्चा निरवर्तत । संमतिश्च प्रदत्ताभवत् । चर्चा च समाप्तप्रायासीत् । तस्यां धारासभायां सदस्यैः कृतभाषणेषु तत्तादृशकठिनशासनं प्रति तत्रत्यभारतीयानां प्रत्यवस्थानत्वाभावादमी मताधिकारं नार्हन्तीति वादः कृतोऽभूत् ॥

अथ वर्तमाना परिस्थितिस्तत्र मिलितेभ्यो मया व्याख्यायत । अस्य शासनस्य चर्चा दिनान्तरे स्थापनीयेति धारासभाध्यक्षं प्रति तन्त्रीसन्देशमादौ प्राहैष्म । तथा च प्रधानामात्यं सर-जॉन्-रोबिनसनमहाशयं धारासभाध्यक्षः शासनचर्चादिनद्वयव्यवधानेन पुरश्चालितं भवतीति सद्यः प्रत्युत्तरं प्रादात् । एतेन वयं प्रमोदामहि ॥

धारासभायाः पुरः स्थापयितुं प्रार्थनपत्रिका सज्जीकृताभूत् । तस्याः प्रतिरूपकाणि त्रीणि समपैक्षन्त । किं च वृत्तपत्रिकासु प्रचारं करणाय प्रतिरूपकं चतुर्थमपि सज्जीकरणीयमासीत् । सर्वमेतत् कार्यमेकस्यामेव रात्रौ निर्वर्तनीयमासीत् । आङ्ग्लभाषाज्ञाः स्वयंसेवका इतरे च केचिदेतत्कार्यमुद्दिश्य सर्वामपि रात्रिमजागरुः । सुन्दराक्षरलेखी श्रीमान् ‘आर्थर’ नामा वृद्धः प्रतिरूपकमलिखत् । एकेन कथितमन्ये लिखन्तः प्रतिरूपकाणीतराणि च व्यलेखिषुः । एवं पञ्चप्रतिकृतयः समकालमेव सज्जीकृताः । स्वयंसेवका वणिजः प्रार्थनपत्रिकां जनैः स्वाक्षरीकर्तुं स्वयानैर्वा स्वव्ययेन भाटितयानैर्वा संचरितुं प्रावर्तन्त ॥

झटिति कार्यमेतन्निर्वर्त्य प्रार्थनापत्रं प्राहिणुम । तदेतदस्मदनुकूलैर्व्याख्यानैर्वृत्तपत्रिकाः प्रकटीचक्रुः । अनेन धारासभोपर्यपि कश्चित्परिणामोऽजायत । तत्रेदं चर्चापदवीमवतीर्णम् । प्रार्थनपत्रिकायां शासनप्रतिकूलतया निरूपितहेतून् प्रतिन्यायविधायकाः किमपि समाधानमाचक्षत । तदेतत्सुस्पष्टमेव निराधारमासीत् । तथापि शासनं धारासभायामन्वमोद्यत ॥

इत्थमेतत्परिणंस्यतीति वयमविद्म प्रागेव । किन्तु यत्नकलापोऽयं भारतीयेषु किमपि नूतनं चैतन्यमुदपादयत् । इदं च तेषां मनसि निरूढिमापन्नं यदेते वयमेकं समाजं प्रविष्टाः समाजाद्बहिर्वर्तनमस्मासु कस्याप्यशक्यम् । यथा वाणिज्यसंबन्धिनामधिकाराणां प्राप्तयेऽस्माभिः प्रयतनं कर्तव्यं तथैवास्मद्राजकीयाधिकाराणां कृते परिश्रमो वोढव्य इति ॥

अस्मिन्नवसरे लॉर्डरिपनप्रभुरांग्लेयस्वास्थ्यानामध्यक्षसचिवोऽभूत् । परः सहस्रप्रजाभिः स्वाक्षरीकृतं प्रार्थनापत्रमेकं तदग्रे स्थापनीयमिति निरणायि । कार्यमेतत्सुकरं नाभवत् । एका-

Funding by IKS-MoE

ह्मात्रेण नेदं निर्वर्तनीयमासीत् । अस्य कृते स्वयंसेवकाः संघटिताः । ते सर्वे स्वस्वकार्याणि समग्रमन्वतिष्ठन् ॥

एतत्प्रार्थनापत्रस्य सज्जीकरणाय मया भूयान्परिश्रमो वोढः । एतत्संबद्धवृत्तं यावल्लभ्यं तावदपठिषम् । मताधिकारप्रदानं न्याय्यं युक्तं चेति हेतुद्वयमाश्रित्य मया वादः कृतः । तथाहि हिन्दुस्थाने भारतीयानामस्ति मताधिकारविशेषः । तदत्रापि तेषामधिकारप्रदानं न्याय्यम् । किन्तु मताधिकारप्रयोजकानां भारतीयानामिह स्वल्पैव संख्या । तदेषामधिकाररक्षणं युक्तम् । इत्यहं प्रत्यपादयम् ॥

प्रार्थनापत्रं सप्ताहद्वयमात्रेण दशसाहस्रजनैः स्वहस्तचिह्नितमभूत् । एवंविधकार्यानुभवशून्यैः स्वयुवकैः देशस्याखिलविभागेभ्य एतावतां जनानां हस्ताङ्कनसंग्रहो नाम न खलु सुकरो व्यापारः । असम्यग्विदितप्रार्थनापत्राभिप्रायाः स्वकं हस्तचिह्नं न कारयितव्या इति कृतनिश्चयत्वात् विशेषयोग्यतासंपन्ना एव स्वयंसेवका विचेतव्या अभूवन् । ग्रामा अन्योन्यविप्रकृष्टाः स्थिता बहवः स्वयंसेवका एकान्ततत्परतया यद्यस्मिन्कर्मणि प्रवर्तेरन्तदा नियतकालमिदं कार्यं समाप्तिमुपेयात् । एवं स्थिते सर्वेऽपि श्रद्धया स्वस्वकार्याणि यथावदुत्साहेन निरवर्तयन् । किन्तु 'शेठदाउदमहमद रुस्तमजी आदमजीमियांखान् आमदजीवा' इत्येते पुरुषाः वाक्यान्येतानि लिखतो मम स्मृतिमुपयान्ति । एतैर्हि हस्तचिह्नानां भूयिष्ठो भागः संग्राहितोऽभूत् । दाउदशेठमहाशयस्तावदादिनान्तं स्वशकट्या संचरते स्म । सर्वमेतत्परमप्रीत्यानुष्ठितं कार्यमासीत् । तेषामेकोऽपि व्ययार्थद्रव्यमपि नाजिघृक्षत । दादाअब्दुल्लामन्दिरमेव प्रसर्पकाणां निवाससत्रमेतद्यत्नकलापस्य कार्यालयश्च समजनि । मम साहाय्यकारिणो विद्यावन्तः सुहृदोऽन्ये च बहवस्तत्रैवाभजन्त । इत्थमस्मिन् कर्मणि साहाय्यं कृतवतः सर्वस्याप्यधिको व्ययः संवृत्तः ॥

पर्यन्ते प्रार्थनापत्रं समर्पितमभूत् । जनेषु तस्य पृथग्विभजनाय प्रसिद्धिकरणाय चास्माभिरेकसहस्रप्रतिरूपकाणि मुद्रापितानि । एतेन नातालदेशस्य परिस्थितिं हिन्दुदेशवर्तिनो भारतीयजना इदं प्रथमतयाबुध्यन्त । अहमेतत्प्रार्थनापत्रस्य प्रतिकृतिमखिलवृत्तपत्रिकाभ्यः प्रचारकेभ्यश्च प्राहैष्म ॥

एतद्विषयमधिकृत्य प्रवृत्ते प्रधानलेखने 'टाइम्स ऑफ इन्डिया' पत्रिका भारतीयानामधिकारं पर्यपोषयत् । इङ्ग्लेण्डदेशे तत्तद्राजकीयपक्षपरिपोषके वृत्तपत्रिकाभ्यस्तत्तत्प्रचारकेभ्यश्च प्रतिरूपकाणि प्राहैष्म । लंडननगरस्य 'टाइम्स' पत्रिकयास्मदनुकूलं व्यलेखि । शासनं निष्कासितं भवेदित्याशा समङ्कुरिताभूत् ॥

इदानीं मम नातालदेशं परित्यज्य गमनमशक्यमासीत् । मदीयभारतीयमित्राणि मां परिवृत्य सर्वथात्रैव मया स्थितिर्ग्रहीतव्येति निरबध्नन् । मदीयक्लेशानहं तेभ्यो न्यवेदयम् । अन्यैः संगृह्य प्रदीयमानद्रव्यबलाजीविकां न साधयिष्यामीति पूर्वमेव मया निश्चितमासीत् ।

पृथक्कुटुंबनिर्वाह आवश्यक इत्यचिन्तयम् । मन्दिरेण प्रशस्तस्थानवर्तिना स्वयं प्रशस्तेन च भाव्यमित्यभ्यलक्षयम् । स्वजनस्य गौरवप्राप्तिमिच्छुर्ब्यारिस्टर्जनयोरया जीवनरीतिर्मया प्राप्याश्रयणीयेत्यचिन्तयम् । अन्यूनत्रिशतसुवर्णमुद्रां वार्षिकव्यये कुटुंबनिर्वाहः शक्य इत्यहममंसि । अतस्तत्रत्यास्मदीयजनेभ्यस्तावद् द्रव्योत्पादकं व्यवहारं जातं नियमेन मिलेद्यदि तदा तत्र स्थास्यामीति निश्चयं मदीयं तेभ्यो न्यवेदयम् ॥

तेऽकथयन् —

सार्वजनिककार्यमुद्दिश्य द्रव्यमेतत्स्वीक्रियते यदि तेन वयं संतुष्यामः । तदर्थमस्माभिः द्रव्यसङ्ग्रहोऽपि सुकरः स्यात् । न्यायवादिकृत्यप्रसंगादुपलभ्योऽर्थस्तु पृथगेवेति ॥

अहमवोचम् —

सार्वजनिककार्यमुद्दिश्य युष्मभ्यस्तथा द्रव्यं नहि स्वीकार्यम् । अस्मिन्कार्ये न्यायवादित्वमाश्रित्य सविशेषबुद्धिमत्त्वमुपयोक्तव्यं न भवति । युष्मदीयहस्तेन कार्यनिष्ठापनं मुख्यं मदीयकर्तव्यम् । अस्य कृते कथमहं वेतनं स्वीकरवै । अपि च तत्तदवसरेषु तत्कार्यमुद्दिश्य युष्मत्सकाशात्द्रव्यं प्रार्थयितव्यं भवेत् । वेतनस्वीकारे निःसंकोचमेव तद्द्रव्यमार्जितुं न शक्येत । पर्यन्ते कार्यमेव विघातमाप्नुयात् । किं च सार्वजनिककार्यार्थे त्रिशतसुवर्णमुद्राधिकं द्रव्यमस्मदीयैः संग्रहीतव्यमित्यहमिच्छामीति ॥

"नूनं भवदीयस्वभावं कतिपयदिनेभ्यो वयं जानीमहे । इदं च नः सम्यग्विदितमेव यदावश्यकमपि वित्तं किमपि भवन्तो न जिघृक्षन्त इति । अपि च भवतामिहावस्थानं स्वयमिच्छद्भिरस्माभिः स्वयमेव भवदीयव्ययोऽपि सोढव्य इत्येतन्ननूपपद्यत एव ॥

"युष्मदीयप्रेमोत्साहविशेष एव युष्मानेवंवादिनः करोति । स एष प्रेमोत्साहस्य निरपायिनौ स्थास्यत इति कथमस्माभिर्वेदितव्यम् । युष्मन्मित्रत्वसेवकत्वधर्मानुरूपं क्वचिदवसरेषु मया परुषोक्तिः प्रयोक्तव्या स्यात् । तदानीमपि युष्मत्प्रेमपात्रता मम तिष्ठेद्वा न वेति भगवानेव जानाति । किंत्वत्रायं विशेषेण भवद्भिरवधेयः । तत्सार्वजनिककार्यमुद्दिश्य मया वेतनं सर्वथा न स्वीकर्तव्यमिति । युष्मन्न्यायसभासु प्रचलिता ये व्यवहारास्तत्प्रदानप्रतिज्ञाया वः कृती स्याम् । तदापि युष्माकं दुष्करं परिणमेत् । न खल्वहं श्वेतवर्णो न्यायवादी । तस्मात्प्राड्विवाका मयि सहृदया वर्त्स्यन्तीति को विश्वासोऽपि च न्यायवादिकृत्यनिर्वाहेषु मदीयकौशलं कीदृशं भविष्यतीति वक्तुं शक्यते वा । एवं स्थिते युष्माभिर्मे न्यायसभाव्यवहारप्रदानप्रतिज्ञापि वो धैर्यं सूचयति । इदमपि मम सार्वजनिककार्याणां प्रतिफलत्वेन ग्रहीतव्यम् ॥"

एवं जिज्ञास्य किं तावत्प्राप्तमिति चेत् प्रायेण विंशतिः वणिजो मह्यमेकवत्सरपर्यन्तं न्यायसभासु निर्वर्तनीयकार्याणि मे प्रदातुमन्वमन्यन्त । दादाअब्दुल्लामहाशयेन मम प्रस्थानावसरे यन्मे प्रदित्सितं द्रव्यं तेन गृहसंभारानसौ मदर्थे क्रीत्वा मम प्रादात् ॥

एवं मया नातालदेशे निवासोऽङ्गीकृतः ॥

Funding by IKS-MoE

अष्टादशोऽध्यायः

वर्णद्वेषः

न्यायाधिदेवतामविषमतुलाधरीं निष्पक्षपातिनीमन्धामपि कुशलां वृद्धवनितां सांप्रदायिकाश्चित्रयन्ति। न खलु मनुष्याणां मुखदर्शनेन परन्तु पारमार्थिकयोग्यतानुगुण्येन न्यायनिर्णयो देय इति बोधयितुमेव दैवेन सा दृष्टिविधुरा न्यधायि। नातालदेशस्य न्यायवादिसभा यथा तत्रत्यन्यायस्थानमेतत्तत्प्रतिकूलमाचरेत्तथा कारयितुं प्रवृत्ता ॥

तस्मिन्न्यायस्थाने मया न्यायवादित्वेन प्रवेशो लिप्सितः। मन्निकटे मोहमयीनगरस्योच्चन्यायस्थानेन प्रदत्तं प्रमाणपत्रं स्थितम्। तत्र न्यायवादित्वेन प्रवेशावसरे विदेशलब्धं प्रमाणपत्रमर्पणीयमासीत्। नातालदेशे न्यायसभां प्रविविक्षुणा प्रार्थनापत्रेण सह चारित्रप्रशंसापत्रद्वयमवश्यमेव प्रेषयितव्यमासीत्। तदेतदैरोप्यजनप्रदत्तं चेत् प्रशस्यतरमित्यालोच्य शेठअबदुल्लामहाशयद्वारा कृतपरिचयाभ्यामैरोप्यजनाभ्यां प्रमाणपत्रं समपादयम्। प्रार्थनापत्रं च केनापि न्यायवादिना मदर्थे समुपस्थापनीयमासीत्। प्रायशः प्रार्थनापत्राण्येवंविधानि राजकीयमहान्यायवादिनैव (ॲटर्नी जनरल) विनार्थग्रहणं समर्प्यन्ते स्म। एस्कूंबमहाशयस्तदानीं तत्पदमध्यास्त। स किल दादा-अबदुल्ला-कंपनीपक्षेऽपि न्यायवाद्यभूत्। स एव मया दृष्टः। सोऽपि मम प्रार्थनापत्रिकां समर्पयिष्यामीति हर्षुलः प्रतिज्ञातवान् ॥

अत्रान्तरे न्यायवादित्वेन मम प्रवेशं प्रत्यवतिष्ठमानन्यायवादिसभायाः सकाशात्सूचनापत्रमेकमागतम्। प्रत्यवस्थानहेतुश्च मम प्रार्थनापत्रेण सहाङ्ग्लविदेशीयलब्धं प्रमाणपत्रं न प्राहायीति। किन्तु प्रधानहेतुरन्योऽभूत्। पुरा खलु न्यायवादिप्रवेशनियामकशासनस्य निर्माणकाले कृष्णवर्णा वा हरिद्रवर्णा वा मनुष्या न्यायवादित्वाङ्गीकाराय प्रार्थनापत्राण्येवं समर्पयेरन्निति केनापि स्वप्नेपि न चिन्तितम्। नातालदेशो हि श्वेतजनानां साहसेनैवाभिवृद्धिमागतः। अतस्तत्रत्यन्यायसभासु प्राधान्यमैरोप्याणामेव रक्षणीयम्। कृष्णवर्णेषु प्रवेशितेषु शनैः शनैराङ्ग्लेयानां प्राधान्यमल्पीभूय स्वात्मरक्षापि तेषां दुष्करा स्यात् ॥

एतदर्थं न्यायवादिसभया कश्चित्प्रख्यातन्यायवादी नियुक्तः। स च दादा-अबदुल्ला-कम्पनीजनैः कार्यवान्। तस्मादयमबदुल्लाशेठमहाशयद्वारा मामाकार्य प्रस्तुतार्थमधिकृत्य मया सह निर्व्याजस्पष्टमभाषत। तस्मै मदीयपूर्वचरित्रजिज्ञासवे सर्वं न्यवेदयम्। अथ सोऽब्रवीत् – भवत्प्रतिकूलतया वक्तव्यं किमपि नास्ति। अत्रैव लब्धजन्मनां धूर्तानामेकतमैर्भवद्भिर्भवितव्यमिति मे शङ्का। किं च भवता प्रार्थनापत्रस्य मूलप्रमाणपत्राहित्यात् स संशयो बलवत्तरोऽभूत्। अन्यदीयप्रमाणपत्रयोजका जना न किलात्र दृश्यन्ते। ऐरोप्यजनसकाशादानी-

तत्प्रशंसापत्रद्वयमहमकिंचित्करं मन्ये। भवद्विषयमेतौ किं वा विधाताम्। तयोर्भवत्परिचयोऽपि कीदृशो वा स्यादिति ॥

अहमवोचम् – अत्र सर्वेऽपि मम नूतना एव। अबदुल्लाशेठमहाशयस्य परिचयोऽपि मे प्रथमं जात इति। तेन पुनः कथितम् —

उक्तपूर्वं हि भवद्भिः यदबदुल्लाशेठमहाशयो भवन्तश्चैकस्थलादागता इति। तत्र भवत्पितरि प्रधानसचिवे सति नूनमबदुल्लाशेठमहाशयेन युष्मत्कुटुम्बपरिचयवतैव भाव्यम्। तत्सकाशाद्भवद्भिः प्रशंसापत्रमानीयते यदि न मे किंचित्प्रतिबंधकं तिष्ठेत्। अथाहमपि भवत्प्रवेशं प्रतिरोद्धुं न शक्नुयामिति न्यायवादिसभां प्रति सप्रमोदं लिखेयमिति ॥

अहमेतदाकर्ण्य क्रोधमूर्च्छितोऽभवम्। परन्तु मया निगृहीतः स कोपः। अथाहमात्मन्येवाचिन्तयम्। अबदुल्लाशेठमहाशयादेव यद्यपि प्रशंसापत्रमानेष्यत तथाप्यांग्लमहापुरुषात्पत्रमेतदानेतव्यमित्यवदिष्यन्। मदीयन्यायवादित्वांगीकारस्य मदीयजन्मचरित्रयोश्च कः संबन्धः। दारिद्र्याद्वा दुश्चरित्राद्वा लब्धजन्मा भवत्वयं जनः। तदेतत्कथमप्रतिकूलतया प्रयुज्यत इति। किन्तु सर्वमेतन्निगीर्य प्रत्यवोचम् – यद्यप्येनमर्थविस्तरं न्यायवादिसभा जिज्ञासितुमधिकारिणीति नाहमङ्गीकरोमि तथापि भवदपेक्षानुसारेण प्रशंसापत्रमेकं अबदुल्लाशेठमहाशयादानेतुं सज्जोऽस्मि स्थित इति ॥

अथाबदुल्लाशेठप्रदत्तं प्रमाणपत्रं तस्मै न्यायवादिने प्रादायि। तेन चाङ्गीकृतम्। परंत्वेतन्न्यायवादिसभायै नारोचत। तत्सदस्या मम प्रवेशयोग्यतां प्रति प्रत्यवातिष्ठन्त। प्राड्विवाकश्च श्रीएस्कूंबमहाशयस्य प्रत्युत्तरमशुश्रूषुरेव प्रार्थनापत्रं निरकासयत् ॥

ततः प्रधानप्राड्विवाकेनेत्थमभ्यधायि। प्रार्थयिता मूलप्रमाणपत्रं नोपस्थापितवानिति फल्गुरयं वादः। यद्यनेन प्रेषितं प्रमाणपत्रं मृषात्मकं स्यात् तदासौ व्यवहारेणाभियुक्तः सन्निर्णीतस्वापराधश्चेत् न्यायवादिवर्गान्निष्कासनमर्हति। धर्मतः परीक्ष्यमाणे कृष्णो जनः श्वेतो जन इति भेदो न ग्राह्यः। न्यायवादित्वेन श्रीगांधेः प्रवेशं निरोद्धुं न्यायसभा नाधिकारिणी। तस्य प्रार्थनापत्रमङ्गीक्रियतेऽस्माभिः। गांधिमहाशय क्रियतामद्यप्रमाणवचनव्याहार इति ॥

ततोऽहमुत्थाय 'रजिस्ट्रार' इति व्यपदिश्यमानं न्यायाधिकरणकार्यदर्शिनमुपसृत्य प्रमाणवचनोच्चारमकार्षम्। अवसितेऽस्मिन्कर्मणि न्यायाधीशो मामाहूय प्राह – भवतः शिरोवेष्टनमिदानीमपनीयताम्। न्यायवादिभिर्धार्यवेषसंबन्धिनो नियमा भवताप्यनुवर्तनीया इति ॥

अथ मया निरूपिता तादात्विकी मदीयपरिस्थितिः। डरबननगरस्य न्यायसभायां यदेव शिरोवेष्टनं नापनेष्यामीति बद्धाग्रहोऽभवं तदेवात्राहमपनीतवान्। नैवापनेष्य इत्यभिनिवेशबंधस्यात्रापि न किल कारणानि नाविद्यन्त। किंत्वेतदपेक्षया महत्तरायोधनसमुद्यमाय मामकी शक्ती रक्षितव्याभवत्। शिरोवेष्टनधारणाभिनिवेशमात्रे न खलु युद्धाभियोगकुशलता व्ययीकर्तव्या। तत्कौशलप्रयोगाय प्रशस्यतरः समयः प्रतीक्षणीयः ॥

Funding by IKS-MoE

एवंविधा मदनुमतिः (मदीयनिर्बलता वा) अबदुल्लाशेठप्रभृतिमित्राणामनभिमताभवत्। न्यायवादिना मया शिरोवेष्टनधारणाधिकारो न परित्याज्य इति तेऽमन्यन्त। अहमेतान्बोधयितुं प्रवृत्तः। देशानुरूपवस्त्रपरिधानमावश्यकमिति तेभ्यो न्यवेदयम्। पुनरप्येतानवोचम्—हिन्दुस्थाने यूयमांग्लेयाधिकारिभिर्वा प्राड्विवाकैर्वा शिरोवेष्टनापनयनमाज्ञप्ताश्चेदवश्यमेव युष्माभिः प्रत्यवस्थातव्यम्। किन्तु नातालसदृशविदेशवर्तिनीन्यायसभाकृत्यकारिणो मम न्यायसभासंप्रदायविरूद्धमाचरणं न खल्वनुमोदनीयमित्यादिसयुक्तिकवादैः मदीयमित्राण्यहं समादधि। किन्तु विषयस्तावदेकोऽपि संदर्भभेदात् भिन्नदृष्ट्यावेक्षणीय इति यत्तत्त्वं तदत्र प्रसंगेऽप्युपयोक्तव्यमित्युपदेशो मदीयस्तेषां हृदयंगमोऽभूदिति वक्तुं न शक्यते। अन्याभिप्राये सहिष्णुतामूलं यत्सुखं तन्मदीयजीवने सत्यानुवर्तिनो मम सम्यग्विदितमभूत्। तदेतत्तत्त्वं सत्याग्रहस्य जीवितमित्यनुभवसिद्धमासीत्। ईदृशाक्षमावृत्तिवशादनेकशो मम प्राणापायः सुहृदसंतापश्च समजनि। परन्तु सत्यं वज्रकठोरं कमलवत्कोमलं च भवति॥

एवं न्यायवादिसभया प्रत्यवस्थितोऽहं भूयः ख्यातिमगमम्। बहूनि वृत्तपत्राणि न्यायवादिसभयानुष्ठितमकृत्यमसूयानिमित्तकमिति च प्राहुः। किं च व्याख्यानटीकादिभिरीदृशैर्मम कार्यं भूयः सुकरमासीत्॥

एकोनविंशोऽध्यायः

नातालभारतीयराष्ट्रमहासभा

न्यायवादिकृत्यं प्रधानकार्यत्वेन मया गणयितुं नाशक्यत। नातालदेशे मम निवासस्य सार्थक्यापादनाय सार्वजनिककार्येषु बद्धलक्ष्येण मया भवितव्यमासीत्। अस्मदीयमताधिकारनिर्मूलनशासनमधिकृत्य प्रार्थनापत्रप्रेषणमात्रेण चारितार्थ्यं न सिध्येत्। अयमर्थः स्वास्थ्यविचारकसचिवस्य यथा मनोऽवगाहेत तथा निरन्तरप्रयत्नकलापोऽवश्यं प्रवर्तनीयः। अस्य कृते स्थायिनीमेकां कार्यमण्डलीं प्रतिष्ठापयितुमावश्यकमित्यालोचयाम। तस्मादबदुल्लाशेठप्रभृतिमित्राणामभिप्रायोऽन्विष्टः। अथ शाश्वती सार्वजनिकमण्डल्येका प्रतिष्ठापनीयेति सर्वमतेन निश्चितमभूत्॥

अस्या नूतनमण्डल्या नामकरणं मम दुष्करो व्यापारः संवृत्तः। तन्नाम्ना किल संघान्तरपक्षपातित्वात्तु मापकेन न भवितव्यम्। ममैतद्विदितमासीत्। यदाङ्ग्लविदेशवर्तिप्राचीनताप्रेमिपक्षीयानां राष्ट्रमहासभेति संज्ञा नाभिमताभूदिति। तथापि भारतवर्षस्य चैतन्यसर्वस्वमपि तत्सभायत्तमासीत्। तस्याः शक्तिः सर्वथा वृद्धिं गमयितव्यैव। प्रस्तुतमण्डलीं तन्नाम्ना

Funding by IKS-MoE

निर्देष्टुं न शंकितव्यमित्यहमालोचयम् । अतोऽहं कारणानि समग्रमावेद्य मण्डली नातालभारतीयराष्ट्रमहासभेति संज्ञया व्यवहर्तव्येत्यसुसूचम् । एवमाङ्ग्लपञ्चममासस्य द्वाविंशे दिने सा सभा स्थापिताभूत् ॥

तस्मिन् दिने दादाअब्दुल्लामहाशयस्य विशालकोष्ठशालाजनैरतीव संबाधाभवत् । तत्र मिलिताः सर्वेपि परमोत्साहेन नवीनमण्डलीनिर्माणमभ्यनन्दन् । तन्मण्डलीकार्यनिर्वाहक्रमस्तु सरलः । तदर्थंप्रदेयं पोषकद्रव्यमधिकमासीत् । मासि मासि पञ्चशिलिंगमितद्रव्यप्रदातारःसदस्यत्वमर्जयन्त । आढ्यजनान्यावच्छक्यमधिकोऽर्थः प्रदेय इति प्रैरयाम । अब्दुल्लाशेठमहाशयः प्रतिमासं सुवर्णमुद्राद्वयप्रदानं प्रतिपद्य प्रदातृपङ्क्तिकायां प्रथमोऽभवत् । अन्यौ द्वौ सुहृदौ तावदेव पोषकद्रव्यं दातुमन्वमन्येताम् । मयाप्यस्मिन् विषये नोपेक्षितव्यमित्यालोच्य प्रतिमासमेकसुवर्णमुद्राप्रदानं प्रतिपन्नम् । न खल्विदं मे सुकरमासीत् । परन्तु स्वजीविकानिर्वहणक्षमत्वे सति तावतः प्रदानं न मे शक्तिमतिक्रान्तमित्यहमचिन्तयम् । दैवानुकूल्यमप्यधिगतम् । प्रतिमासमेकसुवर्णमुद्राप्रदातॄन् बहून् सदस्यानमेलयाम । अर्धसुवर्णमुद्राप्रदातॄणां संख्यापि इतोऽपि महती । किं चान्येऽपि धर्मार्थंद्रव्यमदुः । तदप्यस्माभिः कृतज्ञतया स्वीकृतम् ॥

पृष्ठमात्रः कोऽपि स्वेन प्रदेयं द्रव्यं न प्रयच्छतीत्यनुभवादज्ञायत ।' डरबन ' नगराद्बहिर्निवसतः सदस्यान् द्रष्टुमसकृद्गमनमशक्यमासीत् । पूर्वक्षणे दृष्ट उत्साहो नोत्तरक्षणे दृश्यते स्म । ' डरबन ' नगरान्तर्वर्तिभ्योऽपि सदस्येभ्यो मासिकद्रव्यमसकृदुपसर्पणमन्तरा नालभ्यत ॥

मासिकशुल्कद्रव्यसंग्रहणभारः कार्यदर्शिना मयैव वोढव्य आसीत् । गत्वा गत्वा मम लेखकेनादिनान्तमदत्तशुल्कसंग्रहप्रसंगेनैव कालोऽतिवाहयितव्योऽभवत् । स चानेन निर्विण्णो जातः । अस्य दुःस्थितेः परिहाराय शुल्कप्रदानं प्रातिवार्षिकं कृत्वा वर्षारंभ एव तस्य स्वीकाराय संविधानं कर्तव्यमित्यहमालोचयम् । एतदर्थं राष्ट्रियमहासभा संमिलिताभूत् । शुल्कप्रदानस्य मासिकत्वं मुक्त्वा वार्षिकत्वमङ्गीकरणीयं वत्सरारंभ एव सुवर्णमुद्रात्रयं दातव्यमिति सूचितोऽर्थः सर्वैरन्वमोदि । इत्थं द्रव्यसंग्रहः पूर्वापेक्षया सुलभतरः संपन्नः ॥

विदितपूर्वमेव हि मया यद्द्रव्यमृणीकृत्य सार्वजनिककार्याणि न चालयितव्यानीति । अर्थादन्यत्र लोकप्रतिश्रुतं वचनं श्रद्धेयं स्यात् । प्रतिज्ञातद्रव्यस्य शीघ्रप्रदानं नाम न कदापि मदनुभवे दृष्टम् । नातालदेशवर्तिनां भारतीयानां प्रवृत्तिरप्येतदनुभवसदृश्यासीत् । नातालराष्ट्रियमहासभा द्रव्याभावे किमपि कार्यं नाङ्गीकरोति स्म । अत एव सा न कदापि ऋणस्थाभवत् । मदीयसहोद्यमिनः परमोत्साहेन नवनवानेव सदस्यान् सममेलयन् । ते किलास्मिंन्कर्मणि साभिरुचयोऽमूल्यानुभवं समपादयन् । वहवो तत्कालमेव द्रव्यं प्रदाय सदस्यतामापुः । देशाभ्यन्तरभागे दूरदूरस्थितेषु ग्रामेषु कार्यं दुष्करमासीत् । जनाः किल सार्वजनिककार्यस्य स्वरूपानभिज्ञा आसन् । अथापि दूरस्थलं प्रत्यस्मदागमनं प्रार्थयन्ते । स्थले स्थले प्रधानवणिजोऽस्मान् सादरमभ्यनन्दन् ॥

Funding by IKS-MoE

इत्थमटाट्यमानानामस्माकमेकदा स्थितिः कष्टतराभवत् । वयं कस्यचिद्वणिजो मन्दिरे वसतिमग्रहीष्म । सुवर्णमुद्राषट्कमितं शुल्कं स प्रयच्छतीति निरीक्षितमस्माभिः । परन्तु मुद्रात्रयाधिकं तु प्रदानमसौ नान्वमन्यत । तावतैव चेद्वयं समतोक्ष्याम तदा प्रदातारोऽन्येऽपि तत्कृतमन्वकरिष्यन् । एतेन द्रव्यसंग्रहकार्यमवसन्नमभविष्यत् । महती रात्रिवेला समजनि । वयं सर्वेऽपि क्षुधिताः स्थिताः । किन्तु नियमेन जिघृक्षितमर्थमप्राप्य कथं नु भुज्यताम् । तेनेदमङ्गीकारयितुमस्माभिः कृतः प्रयत्नः सर्वोऽपि निष्फलोऽभूत् । स किल वज्रमनस्क इवालक्ष्यत । इतरेऽपि तत्रत्या वणिजस्तं मार्गमानेतुमयतन्त । स च वयं चोभयेऽपि प्रादेशमात्रमपि न चलितव्यमिति बद्धग्रहाः सर्वामपि निशामजागृम । मत्सहचरेषु भूयिष्ठो जनः क्रोधेन प्रज्वलन्नपि क्रोधमन्तर्निगीर्यातिष्ठत् । पर्यन्ते प्रत्युषस्येव स वणिक् पराजितमात्मानं निरूप्य षट्सुवणमुद्राः प्रदाय महार्हभोजनेनास्मान् समतर्पयत् । सैषा घटना टोंगाटग्रामे संवृत्ता । किन्त्वस्य परिणामः प्रसृमरः सन्नुत्तरतीरोपनिविष्ट‘स्टेंगर’स्थलपर्यंतमाभ्यन्तरप्रवेशवर्ति ‘चार्ल्स टाउन’ नगरपर्यन्तं च व्याप्तिमगच्छत् । एतेन द्रव्यसंग्रहव्यापारोऽस्मदीयः शीघ्रतरमचलत् ॥

परन्तु कार्यमस्मदीयं द्रव्यसंग्रहमात्रविश्रान्तं नाभवत् । वस्तुतः कार्यनिर्वहणाय यावानर्थोऽपेक्षितः तावतः समधिकमस्मन्निकटे न खलु स्थापनीयमिति तत्त्वमेतदवबुद्धपूर्वम् ॥

मण्डली प्रतिमासं वा सति संभवे प्रतिसप्ताहं वा सभाममेलयत् । पूर्वसभानिर्णीतवृत्तान्तानामुपन्यासानन्तरं नानाविषयाणां जिज्ञासा प्रावर्तत । जनास्तावदेवं सभायां चर्चयितुं समंजसतया संक्षिप्तभाषणं कर्तुमप्यनभ्यासिनोऽभवन् । उत्थाय भाषितुं सर्वोऽप्यशङ्कत । एतादृशसभास्वनुवर्तनीयानां नियमानां व्याख्यानमकार्षम् । तेऽपि तदनुरोधेन प्रावर्तन्त । इदमप्येकं शिक्षणमिति तैरबोधि । एतावत्पूर्वं चतुर्णां जनानामग्रे भाषितुमशङ्कत त एव बहवोऽद्य सार्वजनिकतायां सम्यगालोच्य सभायामुपन्यसितुमभ्यासिनोऽभवन् ॥

सार्वजनिककार्येष्वितराल्पव्यय एव बहुलमर्थं ग्रसत इति मयावबुद्धत्वादादौ स्वीकृतिपत्रपुस्तकान्यपि न मुद्रापयितव्यानीति प्रागेव निर्धारितमभूत् । मदीयकार्यालयस्थिते प्रतिकृतीकरणयंत्रे स्वीकृतिपत्राणामावेदनपत्राणां च प्रतिरूपकाण्यचीकरम् । राष्ट्रियमहासभाकोशो यदा पुष्कलद्रव्येणापूर्यत यदा च सदस्यसंख्या कार्यं चाभिवृद्धिमगात्तदाहमीदृशार्थानां मुद्रापणमङ्गीकृतवान् । सर्वास्वपि संस्थास्वीदृशो मितव्यय आवश्यकः । तथापि संस्थाचालकाः सर्वथा बद्धमुष्टयो न भवन्तीत्यहं जाने । अत एव मया बालसंस्थायाः शनैः शनैरभिवृद्धिमुपेत्य प्रौढिमानमागतायाः पूर्वदशासम्बन्धिनोऽर्था अल्पाल्पा अपि व्याख्याताः ॥

प्रदत्तद्रव्यस्य स्वीकारपत्रप्राप्तौ निरादरोऽभूज्जनः । परन्तु गृहीतद्रव्येण स्वीकृतिपत्रमवश्यंदात्रे प्रदातव्यमिति नियम आसीत् । इत्थं प्रतिकाकिणिगणना रक्षिताभूत् । अद्यापि नातालभारतीयराष्ट्रियमहासभालेख्यपत्रेषु चतुर्णवत्युत्तराष्टशताधिकसहस्रतमाब्दस्यायव्ययगणना-

Funding by IKS-MoE

समग्रं मिलतीत्यहं ब्रूयाम्। अप्रमादेन गणनास्थापनं सर्वसंस्थानामत्यावश्यको विषयः। अनेवं प्रवर्तिनी संस्था नूनमपकीर्तिं यास्यति। यथावद्गणितरक्षणाभावे ह्यखंडितसत्यरक्षा दुःशका भविष्यति ॥

किं चैषा मण्डली तादृशाभिजनानां सुशिक्षितभारतीयानां सेवामप्यङ्गीकृतवती। ‘धि कोलोनियल बोर्न इन्डियन् एज्युकेशनल ॲसोसिएशन्’ इत्येतदपराख्यस्वास्थ्याभिजातभारतीयविद्यावर्धकसंघनाम्नी राष्ट्रियसभाव्यपाश्रयिणी एका संस्था प्रतिष्ठापिता। तत्सदस्येषु भूयिष्ठाः सुशिक्षिता इमे युवकाः। नाममात्रमेभिः शुल्कं प्रदेयमासीत्। निजक्लेशान्स्वाभीप्सितार्थांश्च प्रकाशयितुं निजामालोचनाशक्तिमभिवर्धयितुं भारतीयवणिजां परिचयं संपादयितुं सार्वजनिकसेवावकाशं प्रापयितुं च संघोऽयमेषामुपकारकोऽभूत्। अयमेकश्चर्चासंघविशेष आसीत्। सदस्या नियमेन मिलित्वा विविधविषयानधिकृत्य भाषणान्यकुर्वत। अथवा प्रबन्धानवाचयन्। एतत्संस्थासंबन्धी पुस्तकसंग्रहालयश्चैकः प्रतिष्ठापितोऽभवत् ॥

इङ्ग्लेण्डदक्षिणाफ्रिकादेशवर्त्याङ्ग्लेयजनेभ्यः भारतवर्तिजनेभ्यश्च नातालदेशस्य यथार्थपरिस्थितिनिवेदनं मण्डल्याङ्गीकृतं तृतीयं कार्यमासीत्। अहमस्य कृते लघुग्रन्थद्वयमरचयम्। तयोः प्रथमस्य नाम दक्षिणाफ्रिकावर्तिष्वशेषाङ्ग्लेयजनेषु विज्ञप्तिरिति। अस्मिन् ग्रन्थे नातालदेशवासिनां भारतीयानां सामान्यपरिस्थितिरुपावर्णि। द्वितीयग्रन्थस्य नाम ‘भारतीयमताधिकार एका विज्ञप्ति’ इति। अत्र भारतीयमताधिकारस्य संक्षिप्तचरितं तत्संबद्धवृत्तान्ताः संख्याश्च प्रत्यपादिषत। एतत्संबद्धविषयाणां पठनमननसंधानैरतीव परिश्रम्य पुस्तकद्वयमिदं मया प्रणीतम्। तत्परिश्रमानुरूपं च फलमवापम्। तत्किल बहुभिर्जनैरपठ्यत ॥

प्रस्तुतयत्नकलापादस्माभिर्दक्षिणाफ्रिकादेशे बहुनां व्यपाश्रयो हिन्दुस्थानं सर्वपक्षाणां कार्यरूपा सहानुभूतिश्च प्राप्यत। एतेनाग्रे दक्षिणाफ्रिकादेशवर्तिभिर्भारतीयैरूरीकरणीयः कार्यक्रमः स्पष्टमालोकगोचरोऽभवत् ॥

विंशोऽध्यायः

बालसुन्दरमः

शुद्धान्तःकरणेन मनःपूर्वकमभीप्सितोऽर्थः सर्वथा सेत्स्यति। उक्तनियमस्य व्यापरः स्वानुभव एवानेकशो मया दृष्टः। दीनजनसेवैव मदन्तरात्मनो लालसा। इयामेव लालसा मां सर्वदा दीनजनैः संघट्य तत्सहवृत्तिताक्षमं कृतवती ॥

Funding by IKS-MoE

यद्यपि तद्देशाभिजनाः भारतीया लेखकवर्गीयाश्च नातालदेशस्य राष्ट्रियमहासभायाः सदस्या आसन् तथापि सामान्यकर्मकरैः प्रतिज्ञाबद्धकर्मकरैश्च तद्बहिरेवास्थीयत । महासभा नाद्यापि तदीयाभवत् । न किल ते नियतशुल्कप्रदानेन सदस्यत्वमाप्तुमशकन् । महासभायास्तु तत्सेवया तत्प्रीतिसंपादनं शक्यमासीत् । एतदर्थं मया वा महासभया वा न यावद्यत्नः कृतः तावत्तदर्थकारी कश्चिदवसरः स्वयं प्राप्तोऽभूत् । न्यायवादिकृत्यमनुतिष्ठतो मम नाद्यापि त्रिचतुरमासा अपि व्यतीयुः । महासभा चाद्यापि शैशवेऽवर्तत । तदैकस्मिन्दिने कश्चन द्राविडः पटच्चरधारी शिरोवेष्टनं हस्ते गृहीत्वा रुदितकंपमानः संमुखमुपेत्य स्थितः । भग्नाग्रदन्तद्वयस्य तस्य मुखाद्रक्तमुत्स्रवति स्म । स किल निजस्वामिनः प्राप्तबलवत्प्रहारः । मम लेखकोऽपि द्राविड आसीत् । तन्मुखेन वृत्तान्तमखिलमवेदिषम् । बालासुन्दरमो (इदं हि मन्निकूटमागतस्य नाम) डरबननगरवर्तिनः कस्यचित्प्रसिद्धांग्लेयपुरुषस्य समीपे प्रतिज्ञाबद्धकर्मकरोऽभूत् । तस्य स्वामी क्रोधावेगसंमोहितः तं बालासुन्दरमं बलवत्प्रहारेण भग्नदन्तद्वयमकार्षीत् ॥

तमहं कस्यचिद् भिषजः समीपं प्रैषयम् । तदानीमांग्लेयवैद्या एव मिलन्ति स्म । बालासुन्दरमस्य प्राप्तक्षतस्य स्वरूपद्योतकं वैद्यादेकं निर्णयपत्रमावश्यकमासीत् । तदेतत्प्राप्य तं लब्धक्षतं दण्डाधिपस्य समीपं नीत्वा प्रमाणवचनान्वितामभिशंसनपत्रिकां तदग्रे न्यवेशयम् । दण्डाधिपस्तां वाचयित्वा क्रोधेन स्वामिनं प्रत्याह्वानपत्रं प्राहिणोत् ॥

नाहं स्वामिनं दण्डभाजनीकर्तुकाम आसम् । तस्य हस्ताद्बालासुन्दरमो मोचयितव्य इत्येतावदेव ममोद्देश्यम् । प्रतिज्ञाबद्धकर्मकरत्वसंबन्धिशासननियमानहमपठिषम् । साधारणः कर्मकरः पूर्वमनावेद्य परित्यक्तकर्मा निर्गच्छेद्यदि ‘सिविल’ न्यायस्थाने व्यवहारेणाभियोक्तव्यः स्यात् । प्रतिज्ञाबद्धकर्मकरस्य तु विषयोऽन्यः । स किल सदृशसंदर्भे ‘क्रिमिनल’ न्यायस्थाने व्यवहार्योऽभवत् । निर्णीतापराधश्चेत् बन्धने स्थाप्यते स्म । अत एव सर-विलियम-विल्सन-हंटरमहाशयः प्रतिज्ञाबद्धकर्मकरत्वे प्रायेण दास्यवदेवानर्थप्रदमित्याह । यथा दासस्तथा प्रतिज्ञाबद्धकर्मकरोऽपि स्वामिनः स्वं किलासीत् ॥

बालासुन्दरमस्य विमोचनाय मार्गद्वयमेव स्थितम् । प्रतिज्ञाबद्धकर्मकराभिरक्षकव्यपदेशिनमधिकारिणं प्रार्थ्य स्वाम्यन्तरप्रतिपादनरूपं तद्विमोचनं वा तदभावे बालासुन्दरमस्य स्वामिनैव स्वयं विमोचनमित्यहं तत्स्वामिनः पार्श्वमुपेत्याचकथम् । नाहं भवतामुपरि व्यवहारं प्रवर्तयितुकामोऽस्मि । भवत्कृते नास्य मनुष्यस्य बलवत्तानेन युष्मदीयमनो दूयत इत्यहं जाने । अयमन्यस्मै कर्मकरत्वेन समर्प्यते यद्यलं तावतैति । तदेतत्क्षणमेव स प्रत्यपद्यत । ततो मयाभिरक्षको दृष्टः । अन्यः कश्चन स्वामी तद्ग्राहको निश्चितश्चेदस्त्वेवमित्यसावन्वमोदत ॥

अथाहमेनमन्यत्र कर्मकरत्वाय स्थापयितुं प्रस्थितः । भारतीयानां प्रतिज्ञाबद्धकर्मकरस्थापनाधिकारो नाविद्यत । तस्मादस्य नवीनस्वामिनाङ्ग्लेयेनैव भवितव्यमासीत् । तदानीं मे

परिचिताः केचिदेवाङ्ग्लेयजना अविद्यन्त। तेषामेको मया दृष्टः। स च तं कर्मकरत्वेन स्थापयितुमादरेण प्रत्यपद्यत। इत्थमुपकृतोऽहं तस्मै कृतज्ञतां व्यक्तीकृतवान्। दण्डाधिपो बालसुन्दरमस्य स्वामिनमपराधिनं निर्णीय दत्तामस्यानुमतिं निर्णये लिलेख॥

बालसुन्दरमव्यवहारः सर्वस्यापि प्रतिज्ञाबद्धकर्मकरस्य श्रोत्रमगाहत। ते कर्मकराः स्वमित्रं माममन्यन्त। अहमनेन संबन्धेन मुदितोऽभवम्। एतत्कर्मकरप्रवाह एव मदीयकार्यालयं प्रति स्यन्दितुं प्रावर्तत। एतेन तदीयसुखदुःखपरिज्ञानाय मयात्युत्तमोऽवकाशो लब्धः॥

एतद्व्यवहारप्रथा दूरवर्ति मद्रासनगरीपर्यन्तं प्रसृताभूत्। तत्प्राप्य नानाप्रदेशेभ्यः समागच्छद्भिः प्रतिज्ञाबद्धकर्मकरैरेतद्व्यवहारवृत्तान्तो निजवयस्यमुखादवागम्यत। अस्मिन्व्यवहारो यद्यप्यसाधारणो विषयः कोऽपि नाविद्यत तथापि नातालदेशेऽस्मिन्नस्मदीयपक्षमवलंब्य सर्वसमक्षमस्मदभ्युदयाय प्रयस्यन्नहो पुरुषः कश्चिदस्तीति तेषां प्रतिज्ञाबद्धकर्मकराणामाश्चर्यमानन्दो धैर्यं च समजायन्त॥

उक्तपूर्वं हि मया यद्बालासुन्दरमः स्वहस्ते शिरोवेष्टनमादाय मदीयकार्यालयं प्रविष्ट इति। न केवलमयमतिमात्रमनोव्यथाहेतुर्विषयः परन्त्वनेनास्मदीयावनतस्थितिरपि व्यक्तीभवति स्म। मदीयोष्णीषापनयनाज्ञामधिकृत्य प्रागेव मयोपन्यस्तम्। ऐरोप्यजनं दिदृक्षुभिः प्रतिज्ञाबद्धकर्मकरैरागन्तुकभारतीयैश्च शीर्षकधारिभिरुष्णीषधारिभिर्वस्त्रवेष्टितशिरोभिर्वा तत्र शीर्षकोष्णीषशीरोवेष्टनानि सर्वथापनेतव्यानीत्यनुल्लंघ्यः कश्चिन्नियमो रूढमूलः। करौ संपुटीकृत्य नमस्कारोऽपि न पर्याप्तोऽभूत्। मदग्रेप्ययमभ्यासोऽनुवर्तनीय इति बालासुन्दरमोऽमन्यत। इदं प्रथममेवेदृग्विषयो मदनुभवगोचरः संवृत्तः। अनेनापमानसंतापग्रस्तोऽहमुष्णीषं धारयस्वेति तमवोचम्। स च मनाक् संकोचमनुभवन्नेव यथोक्तमकार्षीत्। किन्त्वयमनेन प्रमोदमापेति तन्मुखावलोकनाद्विदितमभूत्। स्वनिर्विशेषं मानुष्यकमाप्तानामितरेषामवहेलनया स्वगौरवमुच्छ्रायमाप्नोतीति जनः कथं वा मन्येतेत्ययं मे रहस्यः सर्वथा दुःखगम्योऽर्थः॥

एकविंशोऽध्यायः

त्रिसुवर्णमुद्राशुल्कम्

बालसुन्दरमव्यवहारेण प्रतिज्ञाबद्धकर्मकराणां भारतीयानां परिचयो मे जातः। तेभ्यः प्रतिस्विकं शुल्कमादातुं तत्रस्थश्वेतजनैः कृतः संनाहः कर्मकराणां परिस्थितिं सम्यक् परिशील्यावबोद्धुं मां प्रैरयत्॥

तस्मिन्वत्सरे तथा च चतुर्णवत्युत्तराष्टशताधिकैकसहस्रतमेऽब्दे नातालराज्यभारः प्रतिज्ञाबद्धकर्मकराणामुपरि पञ्चविंशतिसुवर्णमुद्रामितं वार्षिकं शुल्कमारोपयितुमुद्यतोऽभूत्। अहमिदं दृष्ट्वा विस्मितोऽभवम्। विषयमेनं राष्ट्रियमहासभायां चर्चापदं नीतवान्। तत्क्षणमेव प्रत्यवस्थानाय यथावत् संविधातव्यमिति निश्चयः कृतः ॥

आदौ करस्यास्य मूलं संक्षेपादुपवर्ण्यते ॥

प्रायः षष्ठ्युत्तराष्टशताधिकैकसहस्रतमे वत्सरे नातालदेशस्थायिन आङ्ग्लेयास्तत्रेक्षुव्यवसायं साधयितुमस्ति प्रशस्तोऽवकाश इति मत्वा कृष्यारंभाय कर्मकरानपैक्षन्त। इक्षुव्यवसायः शर्करानिष्पादनं च श्रमाधिक्यं विना न शक्यमासीत्। नातालदेशवर्ती जूलुजनः तत्कार्यक्षमो नाभवत्। तस्मान्नातालराज्यभारो हिन्दुस्थानराज्यभारेण कृतपत्रव्यवहारो हिन्दुस्थानात्कर्मकरानानाययितुमनुज्ञामवाप। एतदनुसारेण कर्मकरैर्नातालदेशे पञ्चवर्षाणि यावत् भृतिकर्म करिष्याम इति प्रतिज्ञाकरणं लेखितव्यम्। पञ्चवर्षात्यये च तत्रैव निवासबन्धाय स्थिरस्वस्वीकरणाय च तैरधिकारवद्भिर्भवितव्यम्। इत्यासीन्नियमः कर्मकराणां प्रलोभनाय प्रदर्शितेयमाशा। समाप्ते हि प्रतिज्ञावधौ कर्मकराणामेषां परिश्रमेण फलितव्यवसायस्याभिवृद्धिः सुकरा भविष्यतीति तत्रत्यश्वेतजना निरीक्षां चक्रिरे ॥

परन्तु भारतीयाः चिन्तितादधिकं साधयामासुः। ते किल शाकानि प्रकाममरोहयन्। न केवलं स्वदेशीयशाकानि तैस्तत्रारोप्यतापि तु तत्रत्यानि शाकानि महार्घतामनीयन्त। किं च देशेऽमुष्मिनाम्रसस्यारोपणं तैरेवारभ्यत। एतेषां साहसं व्यवसायमात्रविश्रान्तं नाभूत्। ते किल वाणिज्येऽपि प्रवृत्ताः। मन्दिरनिर्माणाय भूस्वमक्रीणत। एतेषां भृतकवृत्तयोऽपि बहवो गृहक्षेत्रारामस्वामिनो बभूवुः। हिन्दुदेशस्य वणिजोऽप्येतानुसरन्तो वाणिज्याय स्थितिं तत्रैव जगृहिरे। दिवंगतोऽबुबकर आमद-शेठमहाशयस्तेषां प्रथमः। शेठवाणिजानां व्यापारः सर्वत्र शीघ्रं व्यानशे ॥

इदमालोक्य श्वेतवाणिजो भीतिमापुः। पुरा हिन्दुदेशीयकर्मकराणामागमनमिच्छद्भिरेतैर्वाणिज्यकौशलं तदीयं न पर्यगण्यत। स्वतंत्रव्यवसायस्तदीयो यद्यपि श्वेतजनानां सहनीयः स्यात्तथापि वणिज्यायां परिस्पर्धा दुःसहाभवत् ॥

तदेतद्भारतीयान् प्रति द्वेषस्य बीजमुवाप। अन्ये च बहवोऽर्थास्तदभिवर्धनाय सहकारिणोऽभवन्। आवयोर्जीवनरीतिवैलक्षण्यमस्मदार्जवमल्पलाभेनापि संतुष्टिरारोग्यशौचयोरस्मदश्रद्धा परिसरप्रदेशस्य नैर्मल्यरामणीयकतापादनेन यथावदभिरक्षणेऽस्मदौदासीन्यं मन्दिराणां सौदार्ढ्यस्य रक्षाविधानेऽस्मदीयकार्पण्यमेतैः सहावयोर्भूतभेद इत्यादिसर्वमेतत्संभूय द्वेषज्वालां समधुक्षयन् ॥

Funding by IKS-MoE

अयं द्वेषो भारतीयानामधिकारापरिहाराय प्रवृत्तशासनरूपेण प्रतिज्ञाबद्धकर्मकरेभ्यः शुल्कावग्रहणाय प्रवृत्तशासनरूपेण च स्वात्मानमाविश्चकार। अपि चान्यविधा अप्युपद्रवाः प्रागेव प्रादुरासन्॥

भारतीयकर्मकरान् बलात्स्वदेशं प्रतिनिष्काल्य तदीयप्रतिज्ञावधिस्तत्रैव यथा समाप्येत तथा संविधातव्यमिति प्रथमसूचना प्रवृत्ता। हिन्दुस्थानराज्यभारस्तामेतां नानुमोदेतेति द्वितीया सूचना समुपस्थापिताभूत्। सा यथा—

(१) समाप्ते प्रतिज्ञावधौ कर्मकरेण हिन्दुस्थानं प्रति गन्तव्यम्। अथवा

(२) प्रतिवर्षद्वयं नूतनप्रतिज्ञालेख्यं प्रदेयम्। प्रत्येतदवसरं भृतिवृद्धिः करिष्यते॥ किं च

(३) हिन्दुस्थानं प्रति परागन्तुमिच्छुर्वा नूतनप्रतिज्ञाकरणमप्रतिपद्यमानो वा कर्मकरः प्रतिवत्सरं पञ्चविंशतिसुवर्णमुद्रामितं शुल्कं प्रदद्यात्॥

तामेनां सूचनां प्रति हिन्दुदेशराज्यभारस्यानुमतिप्रेप्सया नातालराज्यभारः 'सर–हेन्री बीन्स श्री मेसन' इत्येतदाख्यौ प्रतिनिधी प्रजिघाय। तदा हिन्दुस्थाने लॉर्डएल्गिनमहाशयो राजप्रतिनिधिरासीत्। यद्यप्यसौ पञ्चविंशतिसुवर्णमुद्राशुल्कग्रहणं नानुमेने तथापि प्रातिस्विकत्रिसुवर्णमुद्राशुल्कप्रदेयतामङ्गीचकार। अयं हि राजप्रतिनिधेर्महान् कर्तव्यलोप इत्यहं तदानीमचिन्तयम्। इदानीमपि तथैव मन्ये। अनुमतिमीदृशं ददानस्यैष नूनं भारतदेशस्य श्रेयो मनसि नैवाकलयत्। एवं नातालदेशस्थायिनामाङ्ग्लेयानामानुकूल्यकल्पनं सर्वथा तस्य कर्तव्यं नाभवत्। इतस्त्रिचतुरवत्सरान्ते सर्वेणापि प्रतिज्ञाबद्धकर्मकरेण तस्य भार्यया षोडशवर्षातीतपुत्रेण त्रयोदशवर्षातीतदुहित्रा च शुल्कमेतत्प्रदेयमासीत्। गृहे स्वामिना प्रतिमासं संपाद्यमानेऽर्थे चतुर्दशशिलिंगपरिमितद्रव्यादनधिकोऽपि चतुर्भिर्जनैः दंपतीभ्यां पुत्राभ्यां च समन्वितकुटुम्बाद्द्वादशसुवणमुद्राशुल्कग्रहणमत्यन्तमन्याय्यमासीत्। ईदृशो न्यायो जगति कुत्रापि न दृश्यते स्म॥

वयमेतच्छुल्कविरोधेन प्रचण्डयत्नकलापं व्यदध्महि। विषयेऽस्मिन्नातालभारतीयराष्ट्रमहासभा तूष्णीमवत्स्यद्यदि राजप्रतिनिधिः प्रायेण पञ्चविंशतिसुवर्णमुद्राशुल्कग्रहणमभ्युपागमिष्यत्। पञ्चविंशतिसुवर्णमुद्राभ्यो मुद्रात्रयं प्रत्यवरोहस्य महासभा प्रवर्तितो यत्नकलाप एव बहुशः कारणमासीत्। किन्त्वेवं मया यदवबुद्धं तद्यथास्थितमपि स्यात्। महासभा तावत् प्रत्यवतिष्ठतां वा न वा हिन्दुस्थानराज्यभारस्तु पञ्चविंशतिसुवर्णमुद्राशुल्कग्रहणमनङ्गीकृत्य स्वयमेव त्रिसुवर्णमुद्राः शुल्कत्वेन निर्णीतवान् स्यात्। इदमस्तु यथा कथं वा। हिन्दुस्थानराज्यभारस्तु वैयक्तिकशुल्कग्रहणमनुज्ञाय विश्वासघातमाचरत्। हिन्दुस्थानस्य श्रेयोऽर्थमधिकृतेन राजप्रतिनिधिना क्रूरशुल्कस्यानुमतिर्न प्रदातव्यासीत्॥

पञ्चविंशतिसुवर्णमुद्राभ्यः त्रिसुवर्णमुद्रात्वेन शुल्कस्य न्यूनीकरणाय महासभया कृतः प्रयत्नो न तावन्महत्कार्यमिति गणयितुमर्हमासीत्। कर्मकराणामापतितो यः सौख्यभङ्गस्तस्य

साकल्येन निवृत्तिरसंवृत्तेति भीतिरवस्थितैव । करोऽयमत्यन्तमेवापसारणीय इत्येतन्महासभाया नित्यध्येयमासीत् । किन्तु मनोरथस्यास्य सिद्धये विंशतिवर्षाण्यपैक्ष्यन्त । सा सिद्धिर्न केवलं नातालदेशावस्थितभारतीयानामपि तु दक्षिणाफ्रिकाखण्डवर्तिनिखिलभारतीयानामपि परिश्रमात्फलिताभूत् । दिवंगतगोखलेमहाशयाय प्रदत्तवाग्दानभङ्ग एव चरमयुद्धस्य हेतुरासीत् । संघर्षेऽस्मिन् कर्मकरैर्निजभारः समग्रमूढः । तेषु केचिद्राजकीयशतघ्नीप्रहारेण प्राणानत्यजन् । शतसहस्राधिकाः कारालयस्य वासमन्वभूवन् ॥

किन्तु पर्यन्ते सत्यस्यैव जयोऽभवत् । तत्सत्यं भारतीयैरनुभूतदुःखसंकटरूपेण मूर्तिमदासीत् । किन्तु निर्विकल्पश्रद्धा निरवधिकताया निरन्तरप्रयत्नानामभावे सत्यस्य जयो नाभविष्यत् । अस्मत्पक्षीयाः समरादपासरिष्यन्यदि राष्ट्रियसभा च युद्धाद्विरम्य शुल्कप्रदानमिदं सर्वथा परिहार्यमिति शिरो वानमयिष्यत् यदि तदा प्रतिज्ञाबद्धकर्मकरैः संतापकरोऽयं व्यक्तिशुल्को न केवलमद्यावधि प्रादास्यत । अपिं तु दक्षिणाफ्रिकाखण्डवर्तिभारतीयानां हिन्दुस्थानभारतीयानां चापमानो ध्रुवस्थायी समपद्यत ॥

द्वाविंशोऽध्यायः

तुलनात्मकदृष्ट्या धर्मज्ञानलाभः

जनसेवायामहमेकान्ततो निमग्नः खलु । तत्कारणं चात्मसाक्षात्कारलिप्सैव । सेवापुरःसरमेव भगवत्सांनिध्यलाभः शक्य इति मन्वानोऽहं सेवाधर्ममेव स्वधर्मतयाग्रहीषम् । मम दृष्ट्या सेवा नाम भारतदेशसेवा । सेवा मम निसर्गसिद्धाभवत् । अहं काठियावाडदेशस्य कुतन्त्रेभ्यो दूरीभवितुमिच्छुः स्वजीविका संपिपादयिषया च दक्षिणाफ्रिकादेशं गतोऽभवम् । किन्तु पूर्वोक्तरीत्या भगवदन्वेषणे स्वात्मसाक्षात्कारसाधने चाहं समुद्यतः स्थितः ॥

ज्ञानार्जनतृषा मदीया मम क्रैस्तसुहृद्भिः शमयितुं नाशक्यत । यद्यपि कदाचिन्मया ज्ञानार्जनासक्तिः परित्यक्ता स्यात् तथाप्यमी न मामसक्तं मुञ्चेयुः । डरबननगरे दक्षिणाफ्रिकावर्ति 'जनरलमिषन्'संघप्रधानः स्पेन्सर-वॉल्टननामा मयि दृष्टिमक्षिपत् । अहमपि तदीयकुटुंबस्यैकतम इव संवृत्तः प्रिटोरियानगरे क्रैस्तमतीयैः सह संपर्क एवास्य परिचयस्य हेतु इति पृथग्वक्तुमावश्यकम् । वॉल्टनमहाशयस्य रीतिरेवान्यादृशी । क्रैस्तमतं मयावलम्बनीयमिति तेन कदाप्युपदिष्टं न स्मरामि । परन्तु स्वजीवनमखिलं विवृतपत्रमिवासौ मदग्रे प्रादुरकरोत् । तस्य वाक्कायकर्मणि यथा लक्ष्येत तथा स्वयमाचरत् । तस्य भार्या सौम्यप्रकृतिः कुशला च । ममानयोर्दम्पत्योः प्रवृत्तिरभिनन्द-

नीयाभवत् । आवयोर्मुख्यांशेषु यो मतभेदः सोऽस्माकं विदित आसीत् । स तु निरवधिकजिज्ञासयापि प्रमार्जितुमशक्योऽवर्तत । सहनौदार्यसत्यसंनिधाने भेदा अप्येतादृशा उपकरिष्यन्ति । अनयोर्दम्पत्योर्नम्रता कर्मश्रद्धा सहिष्णुता च मम संतोषमजनयन् । सर्वदा वयममिलामहि ॥

एषा मैत्री मदीयधर्मासक्तिमपारं हीयमानामरक्षत् । प्रिटोरियानगर इव नात्र धर्मजिज्ञासावकाशो लभ्यते स्म । तथापि लब्धमल्पमवकाशमहं यदावदुपायुञ्जि । धर्मविषयकः पत्रव्यवहारो मदीयोऽद्यापि प्राचलत् । श्रीमान्रायचंदभाईमहाशयो मम मार्गं दर्शयति स्म । कश्चित्सखा नर्मदाशंकरप्रणीतं धर्मविचाराख्यं प्रबन्धं मे प्रैषयत् । तद्गता पीठिका मम बहूपकारिणी जाता । श्रुतपूर्वो हि मयानवस्थितमटाट्यमानस्य तस्य जीवनवृत्तान्तः । स्वीयधर्माभ्यासेन तस्य जीवनमन्यथा परिवृत्तमिति तत्पीठिकाया यदुपपादितं तन्मदीयं मानसमाकर्षत् । ग्रन्थेऽस्मिन् जाताभिरुचिः सावधानमेनमामूलान्तमपठिषम् । मेक्समूलरप्रणीतं 'भारतवर्षम्-अनेन किमस्माभिः शिक्षणीयं' इत्येतदाख्यं पुस्तकं ब्रह्मज्ञानमंडल्या (थियॉसोफिकल सोसायटि) प्रकाशितमुपनिषद्भाषान्तरं च तत्परतयापठिषम् । सर्वमेतन्न केवलं हिन्दुधर्मे ममाभिमानमवर्धयदपि तु तद्धर्मसौन्दर्यं मे शनैः शनैर्व्यक्तमकरोत् । किन्त्वनेन मतान्तरतिरस्कारबुद्धिर्मे न जाता । वॉशिंग्टन-अरविंगप्रणीतं "'महमद' तदुत्तराधिकारिणश्च" इत्येतत्पुस्तकं कार्लाइलविरचिता महमदप्रशंसा च मयापाठि । एताभ्यां पुस्तकाभ्यां महमदे मम सदभिप्रायोऽजायत । किं च जरथुस्तवचनानि इत्येतदाख्यो ग्रन्थोऽपि मया पठितः ॥

इत्थमहं तत्तद्धर्माणां ज्ञानमधिकाधिकमुपार्जयम् । अनेन न केवलमात्मपरामर्शदार्ढ्यमजनि परन्त्वेतदभ्यासिनो मम यद्यन्निर्दोषतया ग्राह्यमस्फुरत्तत्तत्स्वयमनुष्ठाय प्रदर्शयितुं प्रावर्तिषि । इत्थं मार्गग्रन्थानधीयानो यथाशक्ति योगाभ्यासमनुष्ठातुमारप्सि । किन्त्वस्मिन्मार्गे नाहमतिदूरं प्रयातुमशकम् । अतोऽहं निरचेषि यन्मया हिन्दुस्थानं प्रति निवृत्य योगतत्त्वाभिज्ञानां साहाय्येन पुनरभ्यसितव्यमिति । किन्त्वेष मनोरथो नाद्यापि सिद्धः ॥

टॉलस्टॉयमहाशयस्य ग्रन्थानप्यापाततोऽहमपठिषम् । 'क्रिस्तस्योपदेशानां सारांशः' 'किं कर्तव्यम्' इत्यादिपुस्तकान्यतिमात्रहृदयंगमान्यासन् । विश्वप्रीतेरमेयशक्तिः शनैः शनैर्मया सम्यगवोध्यत । प्रायोऽस्मिन्नेवावसरे मयान्येन क्रैस्तकुटुम्बेन संपर्कः संवृत्तः । तद्वाक्यानुरोधेन प्रतिभानुवासरमहं 'वेस्लियन'प्रार्थनामन्दिरमगच्छम् । तेषु दिवसेषु तद्गृह एव भोक्तुमामन्त्रितोऽभवम् । प्रार्थनामन्दिरविषये सदभिप्रायो मे न जातः । तत्र क्रियमाणा उपन्यासाः स्फूर्तिकरा नाभवन् । तत्र मिलन्तो जना धर्मविषये नहि श्रद्धालवोऽदृश्यन्त । न किल सा भक्त्युपेता मण्डली । ते जना मनःक्लान्तिपरिहाराय संप्रदायानुवर्तनाय च प्रार्थनामन्दिरं जिगमिषवो लौकिकमनस इवालक्ष्यन्त । तत्र क्वचिदवसरे निद्रापरवशोऽभवम् । एतेन मे लज्जा समजनि । किन्तु परितो वर्तिनां केषांचिज्जनानां समवस्थां मदीयसदृशीमेवावलोक्य मंदीभूतव्रीडः संवृत्तः । चिरायैवं वर्तितुं न शक्यमभूत् । कतिपयैरेवाहोभिस्तत्रगमनाद्व्यरंसिषम् ॥

Funding by IKS-MoE

प्रतिभानुवासरं मयोपस्थीयमानेन कुटुम्बेन मदीयसम्बन्धः सहसा विजघटे। वस्तुतो मदागमनं तैर्निषिद्धमित्येव वक्तव्यम्। तदेवं संवृत्तम्। तद्गृहस्वामी सरलस्वभावः सज्जनश्च। परन्तु मनाक् क्षुद्रहृदयः। आवां सदा धर्मजिज्ञासामकुर्महि। तदानीं 'आर्नोल्ड' प्रणीतस्य 'एशियाज्योतिः' नामकग्रन्थस्य पठनावृत्तिः क्रियते स्म। एकदा क्रिस्तबुद्धयोर्जीवनमधिकृत्य परस्परं तुलनामकुर्महि। अथाहमवोचम्—गौतमस्य दयालुतां पश्यत। न खलु सा मनुष्यमात्रे विश्रान्ता। परन्तु सकलजीवजन्तुव्यापिनी बभूव। तदीयस्कंधोपरि सानन्दमुपविष्टश्छागपोतो यदि स्मरणपदवीं नीयते तदास्मदीयहृदयं ननु प्रेमरसपरिपूरवाहि संपद्यते। सर्वप्राणिगोचर ईदृशः प्रेमबन्धो न किल क्रिस्ते दृश्यत इति। इमां तुलनामाकर्ण्य सा व्याकुलाभवत्। तस्याश्चित्तवृत्तिर्मया ज्ञाता। तत्कथालापादहं व्यरंसिषम्। वयं भोजनशालामगच्छाम। ऊनपञ्चवर्षदेशीयः यत्तस्याः सुन्दरः कुमारोऽपि सहास्माभिः स्थितः। बालगोष्ठीगतस्य मे यादृगानन्दस्तादृगन्यदा मया कदापि नानुभूयते। अहं बालश्च बहोः कालात्सुहृद् बभूव। अहं तदीयशरावगतमांसं तुच्छीकृत्य मदीयशरावस्थितं शेषफलमतीव प्राशंसिषि। तदेतन्मुग्धबालस्य मनसि रूढमूलमासीत्। सोऽपि मया सह फलं प्रशंसितुं प्रवृत्तः॥

किन्तु तन्माता शङ्किताभवत्। अहं प्रबोधमापम्। तत्कथां विरमय्य प्रस्तावान्तरमकरवम्। भाविनिवारे यथापूर्वं तदीयगृहमगच्छम्। मनस्तु न कातरमासीत्। तथापि गमनवैमुख्यं नेप्सितम्। नचैवं पराङ्मुखत्वमुचितमलक्ष्यत। परन्तु सा मदीयमार्गं सुगममकल्पयत्॥

सा प्राह—गांधिमहाशय भवत्संगान्मम कुमारस्य श्रेयो न हि भविष्यतीत्युक्तिं मदीयामाकर्ण्य भवता नान्यथा मन्तव्यम्। स किल प्रतिदिनं भवदुपन्यस्तकारणान्येवोक्त्वा मांसाशनतः शङ्कमानः फलं चिस्वादिषुर्मां पृच्छति। नाहमिदं सहितुमुत्सहे। मांसवर्जनादस्वास्थ्याभावेऽपि तस्य शक्तिः परिहीयेत। इदमहं कथं सहेयम्। इतः परं जिज्ञासितुकामैः प्रौढैरस्माभिर्जिज्ञास्यताम्। एवंविधा जिज्ञासा सर्वथा बालकानामनर्थप्रदा स्यादिति॥

अहं प्रत्यवोचम्—भवति विषण्णोऽस्मि। ममापि पुत्रवत्त्वाज्जाने खलु पुत्रस्य कृते भवत्याश्चिन्तनम्। अस्या दुःस्थितेः परिहारं सुकरमहं मन्ये। अस्य शिशोमद्वाक्यश्रवणापेक्षया मदीयभोज्याभोज्यस्वीकारवर्जनक्रियावलोकनेन दृढतरः परिणामो मनसि जायेत। तस्मादिहागमनाद्विरमणमेव प्रशस्यतमोपायः। अनेनावयोर्मैत्र्या न कापि क्षतिः स्यादिति॥

सद्य एव स्पष्टमुपलक्ष्यमाणमनोनिर्वृत्तिः सा प्रावोचत्। अहं वः कृतज्ञास्मीति॥

त्रयोविंशोऽध्यायः

गृहे याजमन्यम्

संसारप्रतिष्ठापनं तावन्ममासीन्नूतनोऽनुभवः । किन्तु मोहमयीलण्डननगरयोः कुटुम्बनिर्वाहापेक्षयात्र तन्निर्वाहे विशेष आसीत् । अत्र ह्यात्मगौरवरक्षार्थमधिको व्ययः समपद्यते । नातालदेशे भारतीयन्यायवादिनां भारतीयप्रतिनिधेश्च मम योग्यतानुरूपं तन्त्रयितव्यमिति मया व्यचिन्ति । अतः शोभने प्रदेशे दर्शनीयमेकमल्पमन्दिरं निवासायाग्रहीषम् । तदुचिताश्च संभाराः समपाद्यन्ते । यद्यपि वयं सामान्याहारमगृह्णीमहि तथाप्याङ्ग्लेयमित्राणां भारतीयसहचराणां च तत्तदवसरेषु मया भोक्तुमामन्त्र्यमाणत्वात् तन्निमित्तो व्ययः सर्वदाधिकमासीत् ॥

सद्भृत्यः प्रतिकुटुम्बमावश्यकः । किन्तु भृत्यवत् कमपि गणयितुं ममाभ्यासो नास्त्येव ॥

मम वयस्यः साहायकृच्च सुहृदेकः कौटुम्बिकजनवदेव स्थितः । सूद एकश्चास्ताम् । मम कार्यालयलेखका मया सहैव भुञ्जानाः गृहे प्रत्यवसन् । अस्मिन्कुटुम्बनिर्वाहप्रयत्ने मम प्रायः प्रयोजनलाभे दृष्टेऽपि जीवनस्य कटुफलमपि न किल न दृष्टम् ॥

मम वयस्यः परं बुद्धिमान् । स च प्रामाणिक इत्यपि मया चिन्तितम् । परन्त्वत्राहं वञ्चितोऽभवम् । स किल मत्सहवर्तिन्येतस्मिन्लेखकेऽसूयां दधान तद्विषयिणीं कथां तथोपपादयद्यथाहमेनां श्रुत्वा लेखकं प्रति संशयग्रस्तोऽभवम् । स एष लेखकः परं स्वतंत्रप्रकृतिरात्मानं संशयभाजनीभूतमवगतमात्र एव गृहं स्वोद्योगं च समं परित्यज्य निरगात् । एतेन मे संतापो जातः । मयास्य कदाचिदन्याय्यमनुष्ठितं स्यादिति चिन्तया सदा मे हृदयमदूयत ॥

अत्रान्तरे कतिपयदिनानि विश्रान्तिमपेक्ष्य वा कारणान्तरेण वा न जाने मम सूदो गतः । अतस्तस्याः संनिधावन्यः कश्चिदन्विष्य नियुक्तोऽभवत् । स च (द्वितीयसूदः) सुतरामयोग्य इति पश्चादज्ञासिषम् । किन्तु पर्यन्ते तथोपयुक्तोऽभवद्यथाहमेनं मम श्रेयोऽर्थमेवागतं देवदूतममंसि ॥

असौ निजागमनात् द्वित्रदिवसैरेव मत्परोक्षं मदीयगृह एव प्रचलन्तीरक्रमघटनाः काश्चित्प्रत्यक्षीकृत्य तद्विषये मां प्रबोधयितुं कृतनिश्चयोऽभवत् । सहसा प्रत्यर्थशीलोऽप्यहं निश्चितस्वभावो मनुष्य इति लोको मामन्यत । अतस्तस्य तत्प्रत्यक्षीकरणकथा भूयो भयंकरी समलक्ष्यत ॥

मया मध्याह्ने प्रतिदिनं एकघंटावादनसमये भोजनाय कार्यालयाद् गृहं प्रति गम्यते स्म । एकदा प्रायो द्वादशवादनवेलायामयं सूदो मत्पार्श्वमेकोच्छ्वसेन प्रधावितः सन्नकथयत् । झटिति गृहं गम्यताम् । आश्चर्यमस्त्येकमिति ॥

अहमपृच्छम्– किमिदं ब्रूषे । कथ्यतां किं वृत्तमिति । तदवलोकितुमिदानीं कार्यालयं विसृज्य कथमागच्छेयमिति ॥

अनागमने पश्चात्तापो भविष्यति। विशेषाद्वक्तुं नोत्सहे ॥

तदीयभङ्गिमालोक्य तद्वचनं यथार्थमित्यहमचिन्तयम् । लेखकमेकं सहादाय गृहं प्रति प्रास्थिषि। सूदोऽस्मदग्रे गतः । स मामट्टालिकोपरि नीत्वा मदीयमित्रस्य कोष्ठं प्रदर्शयन् तत्कोष्ठद्वारं तावदुद्घाट्य निरूप्यतामित्यवादीत् ॥

तदाहि मया ज्ञातम्। द्वारमहं करतलेनास्फालयम्। न हि प्रतिवचनम्। भित्तिकंपं बलवत् द्वारमघट्टयम्। द्वारमपाव्रियत। अन्तरेका वेश्या स्थिता ॥

तामवोचम्—भगिनि त्वमितोपसर। इतः परं अत्र मा ते पादं निधा इति ॥

अथ वयस्यमगादिषम्—अद्य प्रभृत्यावयोर्न कोऽपि संबन्धः। अहमतिमात्रवंचितात्मा बुद्धिशून्योऽस्मि। त्वयि बद्धविश्वासस्य मे नन्वयमेव त्वया कृत उपकार इति ॥

वयस्यस्तु प्रबोधमनवाप्य गर्वान्धः सन् त्वामहं प्रकाशं नेष्यामीति मामतर्जयत् ॥

तदाहमवोचम्—निगूहितव्यं नाम वृत्तं मयि किमपि नास्ति। यत्किमप्यस्ति चेत्तदवश्यं प्रकाश्यताम्। किन्तु त्वया नन्वेतत्स्थानादेवापक्रमितव्यमिति ॥

एतदाकर्ण्य वयस्यस्याविवेकः परां कोटिमारोहत्। अत्र नासीत्कोऽप्यभ्युपायः। तदहमधःस्थितं लेखकमित्थमबोधयम्—'पोलीससुपरिन्टेन्डन्ट' इत्यस्याधिकारिणः समीपं गत्वा मदीयवंदनानि तस्मै निवेद्य ब्रूहि मत्सहवर्ती कश्चिन्मनुष्यो दुष्कृत्यकारीति मया स्वगृहे स्थापयितुं नेष्यते। स तु याहीत्युक्तोऽपि न गमिष्यामीति हठात् तिष्ठति। अतो भवन्तः साहाय्यमत्र कर्तुमर्हन्तीति ॥

इदं श्रुत्वा मद्वाक्यं वृथा बिभीषिका न भवतीत्यसाववुध्यत। आत्मानमपराधिनं मन्वानः शिथिलग्रहोऽभवत्। अथ क्षमाभिक्षुर्नगररक्षिणामाह्वानं न कर्तव्यमिति मामभ्यर्थयमानः तत्क्षणमेव गृहं त्यक्तुमन्वमन्यत। तथा तत्परित्यज्य निरगात् ॥

अहमेतद्वृत्तान्तेन काले प्रबोधमापम्। अयं वयस्यो मम व्यामोहकोऽनर्थहेतुरभूदिति स्पष्टमिदानीं मयावगम्यत। तस्याहमाश्रयं ददानः सदर्थप्रेप्सुरप्यसत्साधनमुपायुञ्जि। मया किल निंबद्रुमादाम्रफलप्राप्तिरपेक्षिताभूत्। वयस्यस्य चारित्रदोषमभिजानन्नप्यमुं विश्वसनीयमकलयम्। तत्समीकरणप्रयत्ने स्वयं विनाशोन्मुख आसम्। हितैषिणां वादो मया न लक्षितः। मोहेन गजनिमीलिकां प्राप्तोऽभवम् ॥

पूर्वोक्तरीत्या मदीयचक्षुर्दैववशादुन्मीलितं नाभविष्यद्यदि नूनमहं सत्यांशं नैवाज्ञास्यम्। अपि च वयस्येन वश्यतां नीतः सन्नुपक्रान्तं संगरहितजीवनं निर्वाहयितुं नाहमशक्ष्यम्। तस्य कृते सर्वदाहं कालमक्षिपम्। स किल मामन्धकारे निपात्य दुर्मार्गमाक्रष्टुं समर्थ आसीत् ॥

श्रीरामो यथापूर्वं मामरक्षत्। शुद्धान्तःकरणवत्त्वात् सदोषोऽप्यहं निस्तारमवापम्। कारुण्यानुभवोऽयं मां समग्रमुदबोधयत् ॥

Funding by IKS-MoE

सूदो देवेनोपसृष्टो दूत इति वक्तव्यम्। स किलानभिज्ञः पाकविधानस्य। अतस्तेन मद्गृहे सूदवृत्त्या स्थितिर्न संभाव्यते स्म। किन्तु तं विना नान्येन मदीयचक्षुरुन्मीलितं कर्तुं शक्यमासीत्। मदगृहं प्रति तद्वारयोषिदानयनस्य नायमेव प्रथमोऽवसर इति पश्चादहमवेदिषम्। सा किल ततः पूर्वमनेकशः समागतवती। परन्तु सूदवद्धैर्यशाली न कोऽप्यासीत्। अहं किल वयस्येऽस्मिन्नंधवद्विश्वासभागिति सर्वलोकविदितोऽयमर्थः। ममैतावदुपकर्तुमेव सूदोऽयं लब्ध इति वक्तव्यम्। कुत इति चेत्तत्क्षणमेवासौ मदीयं गृहं परित्यज्य गन्तुमनुज्ञां मामपृच्छत्॥

निर्गमिष्यंश्च मामवोचत् 'युष्मद्गृहेऽवस्थातुमहं शक्नोमि। अक्लेशेनैव भवन्मानसं विकारस्य गमनीयं भविष्यति। नायं मम योग्यः प्रदेश इति। तिष्ठेति नाहमेनं निरबध्नाम्॥

अद्य खलु मया ज्ञातं यन्मदीयवयस्येनैव लेखकस्योपरि मम शङ्का जनितेति। तस्य लेखकस्य कृतमन्यायं समीकर्तुं मया महान्प्रयत्नः कृतः। तथाप्येनं साकल्येन समाधातुं नाहमशकम्। एतद्धि मे सदा विषादं जनयति। भग्नो मणिकः सम्यगेव संधीयतां नाम। तथाप्यसौ भग्नमणिक एव किल॥

चतुर्विंशोऽध्यायः

स्वदेशयात्रा

अत्रान्तरे दक्षिणाफ्रिकादेशे कृतनिवासस्य मम त्रीणि वर्षाणि व्यतीयुः। मम च तत्रत्यानां च परिचयो जातः। इतोऽपि बहूनि दिनानि दक्षिणाफ्रिकादेशे मया स्थातव्यमिति ज्ञात्वा हिन्दुस्थानगमनाय षण्मासान्यावद्विश्रान्तिमपैक्षिषि। मम न्यायवादिकृत्यमूर्जितं प्रचलति स्मेति वक्तव्यम्। तत्र मदवस्थितिरावश्यकीति लोकमतं स्पष्टमुपालक्ष्यत। अतोऽहं सदारापत्यो दक्षिणाफ्रिकादेशमागम्य कुटुम्बसमेतो वत्स्यामीति निरचिन्वि। किं च हिन्दुस्थानं प्रति गमनेन तत्रत्या जना दक्षिणाफ्रिकावर्तिनां भारतीयानां परिस्थितौ यथा समधिककुतूहलाः संपद्येरन् तथा लोकमुद्बोधयितुं शक्नुयामित्यचिन्तयम्। त्रिसुवर्णमुद्राशुल्कं तु रुजद्व्रणमिव स्थितम्। तद्व्रणं यावन्न रोहेत्तावत् शांतिप्रतिष्ठा दुःशकाभवत्॥

किन्तु मदसन्निधौ राष्ट्रियमहासभायाः शिक्षामण्डलानां च कार्यभारः केन वोढव्यः। मदीया दृष्टिर्द्वयोरुपर्यापतत्। तौ च आदमजीमियांखान-पारसीरुस्तमजीमहाशयौ। इदानीं वणिग्वर्गे कार्यनिर्वहणाय बहवो जना अलभ्यन्त। किन्तु कार्यदर्शिनानुष्ठेयकृत्यानां नियमेन निर्वहणदाक्ष्यसंपन्नेषु स्थलीयभारतीयाभिमतेषु द्वाविमावग्रगण्यावास्ताम्। कार्यदर्शिनो जनस्याङ्-

Funding by IKS-MoE

ग्लभाषायाः सामान्यज्ञानमावश्यकमासीत् । एतत्कार्यार्थमहमादमजीमियांखानमहाशयस्य नामधेयं धारासभायाः पुरतः स्थापितवान् । सदस्यास्तस्य कार्यदर्शित्वमंगीचक्रुः । अस्मिन्कार्ये तस्य नियोजनमत्यन्तमुचितमिति भाविनोऽनुभवाद्विस्पष्टमभूत् । अयं आदमजीमियांखानमहाशयो निजौदार्यमाधुर्यक्षमाश्रद्धागुणसंपत्त्या निखिलानप्यानन्दयन् कार्यदर्शिकृत्यनिर्वाहाय न खलु न्यायवादिना ब्यारिस्टर्जनेन वांग्लभाषापाण्डित्यसंपन्नेन वा भवितव्यमिति लोकेभ्यो न्यदर्शयत् ॥

प्रायः षण्णवत्युत्तराष्टशताधिकैकसहस्रतमस्य क्रैस्तशताब्दस्य मध्यभागे 'पोंगोला'नामकनौकायानेन स्वदेशं प्रति प्रयाणमङ्गीकृतवान् । एषा तरणिः कलकत्तानगरगामिन्यासीत् ॥

अस्यां नौकायां केचिदेव पान्था अविद्यन्त । तेषामांग्लाधिकारिणौ द्वावास्ताम् । ममैताभ्यामधिकपरिचयो जातः । अनयोरेकेन सह चतुरंगक्रीडया प्रत्यहमेकहोराकालमत्यवाहयम् । नौकायां वैद्यमहाशयो मे द्राविडभाषास्वयंबोधिनीमदात् । तत्पुस्तकेन तामिलभाषां शिक्षितुमुपाक्रमे । मुसलमानजनैर्निकटसम्बन्धाधिगमायोर्दूभाषाशिक्षणं तथा च मद्रासप्रदेशवर्तिनां भारतीयानां स्नेहसंपादनाय तामिलभाषाशिक्षणं चावश्यकमिति नातालदेशे मदनुभवाद्विदितमासीत् ॥

उर्दूभाषां मया सह शिक्षमाणेनाङ्ग्लेयमित्रेणानुबोधितः सन्नौकाबाह्यशालामध्युषितेषु पथिकेषूर्दूमहापण्डितमेकमन्विष्याग्रहीषम् । आवयोरध्ययनव्यासङ्गः सम्यगेव प्राचलत् । अधिकारी मदपेक्षया प्रकृष्टतरमेधाशक्तिमानभूत् । सकृदवलोकनादसौ नैकमप्युर्दूशब्दं व्यस्मरत् । मम तावदक्षरपाठ एवानेकशः क्लिष्टतरोऽलक्ष्यत । तदपेक्षया भूयः प्रयस्यन्नपि नाहं तत्समानकोटिमारोढुमशाकम् ॥

द्राविडभाषाभ्यासो मे प्रचलति स्म । अभ्यासेऽस्मिन्न किमपि साहाय्यं मयालभ्यत । किन्तु मन्निकटस्थिता 'तामिलस्वयंबोधिनी' समीचीनं पुस्तकमासीत् । अतः साहाय्यान्तरं नात्यन्तमावश्यकमासीत् ॥

स्वदेशं प्राप्तेनाप्यभ्यासोऽस्मिन् प्रौढिमाधिगन्तव्य इत्यासीत्प्रत्याशा । किन्तु नेदं शक्यमभूत् । त्रिनवत्युत्तराष्टशताधिकैकसहस्रतमाब्दान्मम व्यासङ्गः कारालयेष्वेव प्रवृत्तः । तत्र कार्यालयेष्वनयोर्भाषयोर्मम व्युत्पत्तिरीषदभिवृद्धिं प्रापिता । तामिलभाषायां दक्षिणाफ्रिकाकार्यालयेषूर्दूभाषायां 'येरवडा'बन्धनालये च । परन्तु तामिलभाषया संभाषणव्यवहारो मया नैव शिक्षितः । पठितमल्पस्वल्पमप्यभ्यासविरहान्मालिन्यमुपगच्छतीव ॥

द्राविडभाषाया आंध्रभाषाया वा ममानभिज्ञत्वात् संभवदानुकूल्यमद्यापि गोचरीभवति । दक्षिणाफ्रिकावर्तिभिर्द्राविडैर्मदुपरि वर्षिता वात्सल्यवृष्टिरद्यापि प्रतिक्षणं मे स्मृतिमुपैति । तामिलानांध्रान् वा सुहृदः प्रत्यक्षीकुर्वतो मम दक्षिणाफ्रिकादेशवर्तिनां बहूनां तज्जनानामुद्योगशीलताश्रद्धाविश्वासस्वार्थत्यागादिगुणजातं न किल स्मृतिपथं नोपयाति । किन्तु परीक्ष्यमाणेषु तेषु भूयिष्ठाः खलु पुरुषा वा स्त्रियो वा पठनलेखनशक्तिविधुरा आसन् । दक्षिणाफ्रिकादेशे

Funding by IKS-MoE

प्रवृत्तं युद्धमपि तदर्थमेव । तद्युद्धप्रवर्तकाश्चैत एव निरक्षरा योधाः । युद्धमिदं दीनजनप्रधानम् । तत्र दीनाः सर्वात्मना निजं भारमवहन् ॥

एषां साधुजनानां सरलहृदयापहारे मम तद्भाषानभिज्ञता कमपि प्रतिबन्धं नाचरत् । ते किल छिन्नभिन्नया हिन्दुस्तानीभाषयांग्लभाषया वा व्यवहर्तुमशक्नन् । अलं तावतास्मदीयकार्यमचलत् । परंत्वेभिर्मयि निवेशितां ममतामहं बहुमन्वानो द्राविडान्ध्रभाषे शिक्षितुमकामये । पूर्वोक्तरीत्या द्राविडभाषां यत्किंचिदशिक्षिषि । आंध्रभाषां तु हिन्दुस्थानं प्रत्यागतः शिक्षितुं प्रावर्तिषि । परंत्विदं शिक्षणमक्षरयोजनाभ्यासमतीत्य नाचलत् । द्राविडान्ध्रभाषयोराशा मया परित्यक्ता । अतस्तद्भाषाव्यवहारिणो जना हिन्दुस्तानीभाषां शिक्षेरन्नित्यहमातिष्ठे । दक्षिणाफ्रिकास्थितेषु द्राविडेष्वाङ्ग्लभाषानभिज्ञाः प्रायेण हिन्दीभाषां हिन्दुस्तानीभाषां वा जानन्त्येव । सर्वोऽप्ययं क्लेशः शिक्षिताङ्ग्लभाषाणां जनानामेव । तदेतदनुध्यायन्नाङ्ग्लभाषाज्ञानमस्मदीयभाषाशिक्षणस्य महानन्तराय; किं नु वा स्यादिति चिन्तये ॥

आस्तामथ विषयान्तरप्रस्तावः । मदीयप्रयाणवृत्तान्त समापयिष्यामहे ॥

अथेदानीं पाठकाः पोंगोलाख्यनौकाप्रवहणस्य मुख्याधिकारिणः परिचयं कारयितव्याः । आवयोर्मैत्री परस्परं समवर्धत । आसीदयं प्लीमथभ्रातृसंप्रदायानुवर्ती । अस्मदीयकथालापविषयस्तु न तावज्जलयानविद्याज्ञानं यावदाध्यात्मिको विचारः । स किल नीतिधर्मश्रद्धयोर्भेदं प्रत्यपादयत् । तदीयदृष्ट्या क्रैस्तवेदोपदेशो लेशतोऽपि क्लिष्टवाङ्मयो नाभूत् । तस्य सौन्दर्यं नाम तद्गता सरलता आबालस्त्रीपुरुषमखिलजनैरपि क्रैस्ते तन्महाबलिदाने च यदि विश्वासः क्रियते नूनं तर्हि तत्पापानां परिहारो भविष्यतीति कथयति स्म । तमेनमनुचिन्तयतो मम प्रिटोरियाभ्रातरः स्मरणमागताः । नीतिनियमोपेताः सर्वेऽपि धर्मास्तस्य नीरसा अभूवन् ॥

अस्याः सर्वस्या अपि धर्मचर्चाया मदीयशाकाहारित्वमेव हेतुरासीत् । कुतो मांसं भवता न भक्षणीयम् । गोमांसभक्षणे को दोषः । यथा सस्यवृक्षादयः फलमूलादयश्च मनुष्योपभोगायैव देवेन निर्मितास्तथापि ननु हीनजातयः सर्वेऽपि प्राणिनो मनुष्यजातेरुपभोगायैव सृष्टोः । एवंविधा प्रश्नमाला आध्यात्मिकवार्ताप्रवेशमपरिहार्यमकरोत् ॥

आवयोरभिप्रायसांगत्यं नैवासिध्यत् । धर्मनीत्योर्नास्ति पारमार्थिको भेद इत्यभिप्रायो मयि दार्ढ्यमापद्यत । किन्तु मुख्याधिकारी तद्विरुद्धं निजाभिप्रायमेव निःसंशयेन संगतममन्यत ॥

गतेषु चतुर्विंशतिदिनेषु प्रमोदावहमिदं समुद्रयानं समाप्तिमगमत् । हुगलीनदीसौन्दर्यावलोकनेनानन्दमनुभवन् कलकत्तानगरे नौकायानादवतीर्य तस्मिन्नेव दिने धूमशकट्या मोहमयीनगरं प्रायासिषम् ॥

Funding by IKS-MoE

पञ्चविंशोऽध्यायः

हिन्दुस्थाने

मोहमयीनगरगामिनि मार्गे धूमशकटी पञ्चचत्वारिंशन्निमिषकालं प्रयागनगरे तिष्ठति स्म।

इयति काले पुष्यरथमारुह्य भ्रमता तन्नगरमवलोकनीयमिति निश्चयमकार्षम्। किं चौषधालये मया कतिचिदौषधानि क्रेतव्यान्यासन्। आपणिकस्तावदर्धनिद्रामग्नः सन्नौषधप्रदानं नितरामचिरयत्। औषधमादाय यावदयोऽध्वनिवेशनमहं प्राप्तस्तावदेव धूमशकटी प्रचलिता। तन्निकेतनस्वामी मदर्थे धूमशकटीमेकनिमिषपर्यन्तमस्थापयत्। तथापि मामनुपस्थितं मत्वा मम संभारान् यत्नतो बहिरुद्धार्य स्थापितवान्॥

अहं 'केलनर' विश्रान्तिमन्दिरेऽवतीर्य तत एव मत्कार्योपक्रमायानन्तरमेवाकार्षम्। तन्नगरात् प्रचरन्त्याः 'पायोनियर'पत्रिकायाः ख्यातिर्मया श्रुतपूर्वा। तद्वृत्तपत्रं भारतीयाकांक्षाप्रतिकूलमवर्ततेत्यहमज्ञासिषम्। तत्कालं (कनीयान्) चेझमहाशयस्तत्पत्रिकासंपादकोऽभूदिति स्मरामि। सर्वपक्षाणामपि साहाय्यं मया संपादयितव्यमासीत्। तस्माच्चेझमहाशयायानाप्तधूमशकटीकमात्मानमावेद्य परेद्युः प्रस्थानाविघातेन दर्शनावकाशो देय इति लेखमलिखम्। सोऽपि सद्य एव मां द्रष्टुमन्वमन्यत। एतेन मे संतोषः समजनि। अपि चायं सावधानं मद्वाक्यमशृणोत्। अथ च मामवादीद्यदि भवद्भिः किमपि लिख्यते तदा स्वपत्रिकायामेव तदवश्यं समालोचयिष्यामि। किन्तु दक्षिणाफ्रिकास्थभारतीयैः कांक्षितमधिकारसर्वस्वमपि परिपोष्य लेखिष्यामीति नाहं प्रतिजाने। मया हि स्वकर्तव्यपरामर्शिना तत्रत्यानामांग्लजनानामभिप्रायमप्यादाय तत्सदृशं गौरवं च प्रदेयं भविष्यतीति॥

अहमवोचम्—

एतत्समस्याविचारमवबुध्य भवद्भिः पत्रिकायां चर्चा विधास्यते यदि तावतैवाहं संतुष्येयम। न्यायमेकं विना नान्यत्किमपि मया मृग्यते न चापेक्ष्यत इति॥

तद्दिनावशेषमखिलं भव्यत्रिवेणीसंगमावलोकनेन भाविकार्यविचारपर्यालोचनया चात्यवाहयम्॥

इत्थमकस्मात्संवृत्तपायोनियरपत्रिकासंपादकघटनाश्रेणिर्नातालदेशे ममांग्लजनैरवष्टंभ्य प्रहरणे पर्यवास्यत्॥

मोहमयीनगर्यामनवस्थाय राजकोटं गत्वा दक्षिणाफ्रिकाभारतीयानां परिस्थितिमभिकृत्य लघुप्रबन्धरचनाय सज्जीकर्तुमुपाक्रमे। तस्यास्य लेखनप्रकाशनादिकं प्रायेणैकमासमपैक्षत। एतन्मुलपृष्ठस्य हरिद्वर्णतया प्रबन्धोऽयं हरितपुस्तकमिति पश्चात्प्रथामगच्छत्। अस्मिन् ग्रन्थे बुद्धिपूर्वमेवाहं दक्षिणाफ्रिकाभारतीयानां दुःस्थितिं मन्दमचित्रयम्। पूर्वोक्तरीत्या नातालदेशे प्रणीतयोर्ग्रन्थयोर्यादृशो

भाषाप्रयोगस्तदपेक्षयास्मिन्प्रबन्धे सौम्यतरा वाणी प्रायुज्यत । मया किलैतद्विदितं यदल्पाल्पविषया अपि दूराच्छृण्वतां महत्तराः प्रतिभान्तीति ।।

अस्य हन्त पुस्तकस्य दशसाहस्रसंचिका मुद्राप्य भारतदेशस्य निखिलसमाचारपत्रेभ्यः सर्वपक्षप्रमुखेभ्यश्च प्राहायिषत । इतरपत्रिकाभ्यः पूर्वमेव पायोनियरपत्रिका स्वटीकामलेखीत् । तट्टीकायाः सारांशो 'राइटर' तन्त्रीवृत्तान्तद्वारेणेङ्ग्लण्डदेशमवापयत् । तत्र लण्डननगरस्य राइटरकार्यालयद्वारा तन्त्रीसंदेशतो नातालदेशमगमत् । स एष तन्त्रीसंदेशो मुद्राक्षरात्मकपंक्तित्रितयाधिको नाभवत् । नातालदेशभारतीयानां परिस्थितिमधिकृत्य यन्मयोपनिबद्धं तदेतदेतादृशलघुस्वरूपेण पर्यणंसीत् । नेदं किल मदीयभाषात्मकं किन्तु मल्लेखनस्यात्युक्तिस्वरूपमासीत् । नातालदेशे यादृशोऽस्य परिणामः संवृत्त इत्यग्रे निरूपयिष्यते । अत्रान्तरे प्रधानपत्रिकाः सर्वा अप्येतत्प्रश्नमधिकृत्य महामहाव्याख्यानान्यलिखन् ।।

एतेषां पुस्तकानां पत्रप्रापणाधिकरणद्वारा प्रेषणाय सज्जीकरणं न सुकरमासीत् । यदि द्रव्यं प्रदाय कार्यमिदं कार्येत तदा बहुद्रव्यं व्ययीकर्तव्यं भवेत् । अतो मया सुलभोपाय एकोऽन्विष्टो मदभितो वर्तिनो बालकांस्तत्र मेलयित्वा सत्यामिच्छायां प्रातःशालाविरामकाले द्वित्रहोरापर्यन्तं कार्यमनुष्ठातव्यमित्यबोधयम् । ते च हृष्टास्तथाकर्तुं प्रत्यपद्यन्त । मया संगृह्य स्थापितानि सकृदुपयुक्तानि पत्रप्रेषणाधिकरणीयशुल्कपत्राणि च मदाशिषश्च तेभ्यो बहुमानं दास्यामीति प्रत्यजानि । ते च मदीयकार्यमक्लेशेन निरवर्तयन् । बालकान् स्वयंसेवकत्वेन संघट्य तैर्मया कार्यानुष्ठापनस्यायमेव प्रथमोऽवसरः । तेषां बालकानां द्वाविदानीं मम सहचरौ स्तः ।।

एतत्कालमेव मोहमयीनगरे ग्रन्थिज्वरः प्रादुरासीत् । तन्निमित्तोद्भ्रांतिश्चतुर्दिकं प्रासरत् । राजकोटेऽप्ययं संक्रमेदिति शंकाबाधत । आरोग्यरक्षाधिकरणे मत्तोऽपि काचिदुपकृतिः स्यादिति मन्वानः सेवां कर्तुमहं सज्जोऽस्मीति राज्यभाराधिकारिभ्यो न्यवेदयम् । तेऽपि मदीयसेवां स्वीकृत्य सेवासमितेर्मामपि सदस्यमकुर्वन् । मलमोचनस्थलानां नैर्मल्यरक्षणमावश्यकमित्यहमसूचयम् । सामितेयाः प्रतिवीथिं गत्वा तानि स्थलानि द्रष्टुं निश्चयमकार्षुः । दीनगृहेषु गत्वा मलखातकानि परीक्षितुं न किमपि प्रतिबन्धकमासीत् । एतावदेव न । ते किल यथोक्तरीत्या तानि समीकुर्वते स्म । परन्तु राजकीयाधिकारिणः स्वमन्दिराणि द्रष्टुमुपगतानां मलमोचनस्थलपरीक्षणायाप्यनुज्ञां नाददत । आस्तां पुनस्तत्समीकरणकथा । अस्मदनुभवे श्रीमतां मन्दिरेषु यानि मलमोचनस्थलानि तान्यतिमात्रमशुचीन्यभवन् । अंधकारमयानि कच्चरकृमिकीटपूर्णानि च । तत्र गमनं नरकप्रवेशसमानमासीत् । तेभ्योऽस्माभिः सूचितानि सुधारणानि परं सुकराण्यभूवन् । तत्रोदाहरणं यथा मलमोचनस्थलेषु मलस्य भूतलस्पर्शवर्जनाय कण्डोला वा मणिका वा स्थापयितव्याः । मूत्रं भूम्यन्तर्यथा न गच्छति तथा कटाहेषु संग्रहीतव्यम् । कच्चरागारबहिःकुड्ययोर्मध्यप्रदेशं विभेद्य कच्चरशोधकस्य यथा स्थलमुपेत्य सम्यक् प्रक्षालयितुमनुकूलं स्याद्यथा च कच्चरागारान्तर्वायुः सूर्यप्रकाशश्च प्रविशेत्तथा परिकल्पनीयम् । इमामन्तिमसूचनां

Funding by IKS-MoE

प्रत्यवतिष्ठमानाः श्रीमन्तो बहून्व्याजानाचक्षत । तेषु भूयिष्ठो जनो नास्मदीयसूचनामन्ववर्तत ॥

समित्या पञ्चमानां वसतयोऽपि परीक्षितव्या आसन् । सदस्येष्वेक एव मया सह तत्रागन्तुमन्वमन्यत । अपरे तु कथं नाम तत्र गच्छेयुः । तत्रापि तत्रत्यकच्चरागाराणि तैः कथमहो द्रष्टव्यानि । किन्त्वहं तावत्तद्वसतिदर्शनेन विस्मितप्रमुदितोऽभवम् । पञ्चमानां वीथ्यां गमनस्यायमेव मे प्रथमोऽवसरः । तत्रत्याः पुरुषाः स्त्रियश्चास्मान् दृष्ट्वाचिन्तयन् । तदीयकच्चरागाराणि द्रष्टुमहमनुज्ञामपृच्छम् । ते अकथयन् कुतो नः कच्चरागाराणि नाम ग्रामबाह्यवर्ती विशालः प्रदेश एवास्मदीयकच्चरागारम् । कच्चरागाराणि नाम युष्मादृशां महापुरुषाणामेवेति ॥

अहं पुनरपृच्छं बाढं यदि तावद्युष्मदीयगृहाणि वयं किमवलोकयेमेति ॥

अवश्यमेव स्वामिन् । यथेष्टं गत्वावलोक्यताम् । अस्मद्वसतयः कथं गृहाणीत्युच्यताम् । ताः खलु बिलानि ॥

अहमन्तः प्राविशम् । गृहस्याङ्गणानां च नैर्मल्यं सानन्दमालोकयम् । अङ्गणं निरवकरं शोधितमासीत् । भूतले सर्वत्र सम्यग्गोमयेनोपलिप्तमासीत् । स्थिता द्वित्रमणिकशरावा अपि निर्मलाश्चकासति स्म । अत्र व्याधिप्रसरणभयं नासीत् ॥

श्रीमज्जने गृहाणामेकस्मिन्नस्माभिः परीक्षितकच्चरागारमवश्यं मया विस्तरेणैव वर्णयितव्यम् । तत्र प्रतिकोष्ठमेकं जलवाटमवर्तत । तच्च मूत्रविसर्जनाय हस्तपादप्रक्षालनायोपयुज्यते स्म । तस्मात्प्रायेण गृहे दुर्गन्धमुक्तः प्रदेशः क्वचिदपि नासीत् । तेषां हर्म्याणां एकस्याट्टालिकायां वासगृहान्तर्वर्तिजलवाटं मलमूत्रविसर्जनार्थमुपायुज्यत । तन्मलमूत्रमेकया वाटान्तनलिकयाधस्तात्स्रवति स्म । तस्मिन्कोष्ठे स्थातुमप्यसह्यमासीत् तत्र । गृहजनाः कथं शेरते स्मेति पाठकैरेवाभ्यूह्यताम् ॥

सामितेयास्तत्रत्यं हवेल्याख्यमुख्यवैष्णवदेवालयमपि पर्यैक्षन्त । अस्मद्गृहजनस्य देवलकस्यापि चिराय मैत्री समवर्तत । अतोऽस्माभिस्तत्र गत्वा परीक्षितुं यथाभिमतसुधारणानि सूचयितुं च स प्रत्यपद्यत । तस्मिन् देवालये तेनाप्यदृष्टचरो भागः कश्चिदासीत् । यत्र कुड्याद् बहिरुच्छिष्टभोजनपत्राणि प्रक्षिप्यन्ते स्म । काका गृध्राश्च सर्वदा तत्रामिलन्त । मलमोचनस्थलानि तु परमकच्चराण्यासन् । सूचितसुधारणानुसारेण देवलकः कीदृग्व्यवस्थामकरोदिति न मया प्रत्यक्षीकृतम् । अहं हि राजकोटे न तावन्तं कालं स्थितः ॥

एतावदशुचित्वं देवालये दृष्ट्वा विषादमगमम् । पवित्रस्थानमिति प्रतीतिमागतेषु स्थलेषु लोका आरोग्यनियमाननुवर्तन्त इति स्वभावतोऽस्माभिर्निरीक्ष्यते । बाह्यशुद्धिरन्तःशुद्धिश्च द्वे अत्यावश्यक इति स्मृतिकाराः प्राहुः । अयमर्थस्तस्मिनवसरेऽपि न मे ध्येयवर्ती नासीत् ॥

Funding by IKS-MoE

षड्विंशोऽध्यायः

राजनिष्ठा रोगिशुश्रूषा च

आंग्लेयप्रभुत्वे मम यादृशी राजभक्तिरासीत्तादृशभक्तिसंपन्नः पुरुषो न कोऽपि मया दृष्ट इत्यहं ब्रयाम्। मम राजनिष्ठाया मदीयसत्यप्रियत्वमेव मूलमासीदित्यहमिदानीं जाने। आत्मनः राजनिष्ठां वा गुणमन्यं वा व्याजेन प्रदर्शयितुं न कदाप्यशकम्। नातालदेशे मयोपस्थीयमानासु सर्वास्वपि सभासु 'देवो रक्षतु राजानम्' इत्यादिकांग्लराष्ट्रगीता नियमेन गीयते स्म। तदा ममापि तज्जिज्ञासा समजनि। न खलु मया तदानीमप्यांग्लेयराज्यभारे दोषा न लक्षिताः। परन्तु समष्ट्या विमृशन् राज्यभारोऽयं स्पृहणीय इत्यकलयम्। समष्टिपरामर्शः श्रेयस्कर इति श्रद्धा तात्कालिकी ममावर्तत॥

दक्षिणाफ्रिकादेशे मया प्रत्यक्षीकृतो नीतिविरोधीयो वर्णद्वेषः स तावदाङ्ग्लेयसंप्रदायविरुद्धः क्षणिकः स्थानिकश्चेति प्रत्ययो ममासीत्। ततोऽहं राजनिष्ठायामांग्लेयानप्यतिशेतुमयतिषि। श्रामं श्राममांग्लराष्ट्रगीतामुचितरागेण गातुमशिक्षिषि। प्रतिसभं गीयमानायामस्यामहमपि नियमेन सहैवागायम्। किं च निराडंबरेण राजभक्तिप्रदर्शनसंभवेषु प्राप्तेष्वहमपि सहकार्यभूवम्॥

मदीयजीवमाने न कदाप्यहं राजभक्त्या स्वप्रयोजनमसाधयम्। तदवलंबेन स्वकार्यसाधनेच्छा न मे जाता। राजनिष्ठया वर्तनं मम कर्तव्यमिति विभाव्य प्रतिफलमनपेक्षमाणस्तत्कर्तव्यं निरवर्तयम्॥

हिन्दुस्थानमहं यदा प्राप्तस्तदा श्रीविक्टोरियामहाराज्ञ्या वज्रमहोत्सवाख्यभीमरथशांतिप्रयुक्तः सन्नाहः प्रवर्तते स्म। राजकोटे तदर्थपरिकल्पितां सभां सदस्यतया प्रवेष्टुमहमामन्त्रितोऽभवम्। मया च तदङ्गीकृतम्। किन्तूत्सवोऽयं प्रायेणाडंबरप्रधान इति मम संशय आसीत्। तत्र भूयिष्ठो भागः परेषां नयनेषु धूलीप्रक्षेपार्थमङ्गीकृत इत्येतत्साक्षात्कृत्य दुःखितोऽभवम्। ईदृगवस्थाप्रसङ्गे तत् सभायां मम सदस्यतया वर्तनस्य युक्तायुक्ततामालोचयन् पर्यन्ते निश्चयमित्थमकार्षम्। यन्मदीयकर्तव्यानुमात्रेण मया संतोष्टव्यमिति॥

एषु प्रस्तुतकार्येषु वृक्षारोपणमप्येकम्। तत्र कैश्चिदाडम्बराचारप्रीत्या कैश्चिदधिकारिवर्गपरितोषणाय च वृक्षारोपणोत्सवोऽयं बहुभिरङ्गीकृत इति मया प्रत्यक्षीकृतम्। वृक्षारोपणमिदं नहि कस्यापि बलात्कारः। यस्य तावदिष्टं तस्येदं कर्तव्यम्। करिष्यामीति मनःपूर्वकमनुष्ठेयम्। अन्यथा नैव क्रियतामिति तान् बोधयितुं मया यत्नः कृतः। ममाभिप्रायानाकर्ण्य लोका मामुपाहसनिति क्वचिद्ज्ञप्तिरस्ति। मया स्वीकृतं वृक्षमहं तत्परतयारोप्य यत्नेन जलसेचनैस्तमवर्धयमिति स्मरामि॥

Funding by IKS-MoE

अस्मद्गृहबालकानप्यांग्लगीतामहमशिक्षयम् । तत्रस्थशिक्षणमहाविद्यालय (ट्रेनिंग कालेज) वर्तिनोपि बालकास्तां मया शिक्षिता इति ज्ञप्तिरस्ति परन्त्वेतत्तन्महोत्सवसमये या 'सप्तम-एडवर्ड'प्रभो राज्याभिषेकसमये वेति विस्मृतं भवति । गच्छत्सु दिवसेषु गीतिरियं मे कर्कशकर्कशा प्रत्यभासीत् । अहिंसातत्त्वं मया यथा हृदये वृद्धिमागतं तथा तथाहं निजानुसंधानकथालापेषु परं जागरूकः । संवृत्तः तद्गीतेः 'शत्रून् विद्राव्य सक्तानुशक्त तान् विनिपात्य चाशिथिलीकृत्य वर्तनं तद्राज्यशासनस्य निबंधनम् । तदीयानि कुतन्त्राणि निभिन्द्धि परमेश्वर' इति पादैर्गीयमानोऽर्थो मम हिंसातत्त्वविरुद्धः प्रत्यभासत । तमेनं मदीयमभिप्रायं डॉ. बूथमहाशयाय न्यवेदयम् । सोऽप्याह साप्रत्ययेन पुरुषेणेयं न गातव्येत्यभिप्रेतवान् । अहमप्यवोचम् । यान् किल वयं शत्रून् व्यपदिशामहे ते कुतन्त्रकारिण इति कथं मन्तव्याः । शत्रुत्वव्यपदेशमात्रे वा तेषामपराधित्वं कथमस्माभिर्वक्तुमुचितम् । परमेश्वराधिगमाय केवलमस्माभिः प्रार्थना संभाव्यत इति । डॉ. बूथमहाशयः सर्वानिमान्मदभिप्रायानङ्गीकृत्य स्वमंडल्याः कृते नूतनं संकीर्तनमरचयत् । परंत्वस्य डॉ. बूथमहाशयस्य वृत्तान्तमग्रे निरूपयिष्यामि ॥

यथा राजभक्तिस्तथा रोगिशुश्रूषापि मम स्वभावमवगाह्यात्यन्तरूढमूलाभवत् । रोगिणस्तावन्मदीयबान्धवो वापरे वा भवन्तु । तदुपचारो ममातीव प्रियः ॥

राजकोटे दक्षिणाफ्रिकावृत्तमधिकृत्य प्रबन्धरचनोद्यतस्य मम मोहमयीनगरं प्रति शीघ्रप्रयाणमुपस्थितम् । प्रधाननगरेषु सभाः परिकल्प्य लोकमतं कार्योन्मुखं करणीयमिति ममोद्देश्यमासीत् । एतदर्थमादौ मोहमयीनगरं मयोपस्थितम् । तत्र तावन्न्यायाधीशरानडेमहाशयो मया दृष्टः । स च मद्वाक्यं सावहितमाकर्ण्य सरफिरोजशहामहेतामहाशयस्य दर्शनं कर्तव्यमित्यसूचयत् । अथाहं न्यायाधीशं बदरुद्दीनतैयब्रजीमहाशयमपश्यम् । सोऽपि तामेव सूचनामकरोत् । एवमकथयच्च । अहं वा रानडेमहाशयो वा भवतां विशेषेणोपकर्तुं न शक्नुवः । विदितैव भवतामास्माकी स्थितिः । वयं राजकीयविचारेषु न हि प्रवेशं कुर्वीमहि । तथाप्यस्मदीयं चेतः सर्वात्मना वः साहचर्यं न मुञ्चति । भवतां यथावन्मार्गदर्शी फिरोजशामहाशय एवेति ॥

सरफिरोजशामहाशयस्य दिदृक्षा मम प्रागेवासीत् । किन्त्वेतन्महाजनद्वयमुखात्तद्दर्शनाय प्रेरितः सन् प्रजानामुपरि यादृशस्तस्य प्रभाव इत्यहं सम्यगवेदिषम् ॥

अथ गत्वा मया सरफिरोजशामहाशयो दृष्टः । तत्संनिधौ मम भयभक्तिसमुद्रेको भविष्यतीति मया निरैक्षि । श्रुतपूर्वा हि मया तस्मै लोकैः प्रदत्ता बिरुदावलिः । द्रष्टव्यो हि मया मोहमयीनगरकंठीरवः । मोहमय्याधिपत्यस्यानभिषिक्तो नरेश एव । किन्त्वयं 'नरेशो' मां भयाकुलं नाकरोत् । यथा ममताभिः पूर्णः पिता प्रबुद्धवयसं निजकुमारं पश्यति तथायं मामपश्यत् । स मया तदीयकार्यालये दृष्टः । तस्यानुयायिनः सुहृदश्च तं पर्यवारयन् । तन्मध्ये श्रीमान्वाच्छामहाशयः कामामहाशयश्चास्ताम् । अनयोः परिचयमहं कारितः । वाच्छामहाशयस्य

Funding by IKS-MoE

नामधेयं तु मया पूर्वमेव श्रुतम्। स किल सरफिरोजशामहाशयस्य दक्षिणबाहुरित्यवागम्यत। तत्कथालापे वीरचंदगांधिनाप्यसौ देशस्य स्थितिगतीनां सूक्ष्मवेदीति मह्यमावेदि। वाच्छामहाशयः प्राह–गांधे पश्चादहं वो द्रष्टुमिच्छामीति ॥

सर्वोऽप्ययमभिज्ञानपरिचयादिकलापो निमिषद्वयमपि नापैक्षत। सरफिरोजशामहाशयो मदुक्तं सावधानमशृणोत्। वृत्तं न्यायाधीशयो रानडेतैयब्रजीमहाशययोर्दर्शनं तस्मै न्यवेदयम्। स चाह–गांधे तवाहमुपकर्तुमिच्छामि। अत्रैका सार्वजनिकसभा मेलयितव्या –इति ब्रुवाणो निजसहायकं मुनशीमहाशयमभिवीक्ष्य सभाचालनाय दिनमेकं निश्चीयतामित्याचष्ट। किं च सभामेलनात्पूर्वदिने त्वयाहं द्रष्टव्य इति मामुक्त्वा व्यसर्जयत्। अस्य दर्शनान्मम भीतिर्निःशेषमस्तमगात्। प्रमुदितान्तरङ्गः सन् गृहं प्रति न्यवर्तिषि ॥

मोहमयीनगरे वर्तमानोऽहं तत्रैव रुग्णशयितं मम भगिनीपतिं द्रष्टुमगमम्। नायमिभ्यो जनः। एकाकिनी मम ज्येष्ठभगिनी (तस्य भार्या) तदौषधपथ्यविधाने न समर्थाभवत्। जाड्यमुल्बणमासीत्। तावुभावप्यहं राजकोटं नेष्य इति भगिनीपतिमब्रुवम्। तेन च प्रतिपन्नत्वात्ताभ्यामहं स्वपुरं प्रत्यागमम्। व्याधिनिरीक्षितात् दीर्घतरकालं तमशीशयत्। तमहं मदीयकोष्ठागारे स्थापयित्वा रात्रिंदिवं तन्निकट एवाहमासम्। मया रात्रावपि चिराय जागरितव्यमासीत्। तदा तं शुश्रुषमाणोऽहं दक्षिणाफ्रिकासंबंधिकार्यमप्यचालयम्। पर्यन्ते स स्वर्गस्थोऽभवत्। किन्तु तस्यावसानदिनेषु मम तत्सर्वावकाशलाभः सुतरां मदीयमनः समाधायको विषय आसीत् ॥

शुश्रूषाकर्मणि ममेयमभिरुचिः शनैः शनैस्तथावर्धत यथा तत्कृतेऽहमितरकार्याणि पर्यत्यजमनेकशश्च न केवलं मम भार्यामपि तु सर्वानपि गृहजनमस्मिन् कर्मणि न्ययोजयम् ॥

कार्यमेतदभिरुचिमूलमिति ब्रवीमि। कुत इत्युक्तौ तत्कर्तुः संतोषाभावे कार्यं न चलति। आडम्बरार्थिना प्रवादभीरुणा वा यदि शुश्रुषा कृत्यमङ्गीक्रियते तदा तन्न केवलं मनुष्यस्योत्साहो मन्दीभविष्यत्यपि तु तस्य हृदयं संकुचिष्यति। प्रेमवर्जमनुष्ठितसेवया सेवाकर्तुर्वा सेवितजनस्य वा न कोऽपि लाभः। परं तु सहृदयतया प्रेमपुरःसरमनुष्ठितायाः शुश्रूषायाः पुरतो भोगैश्वर्यं यत्तुच्छं प्रतिभाति ॥

सप्तविंशोऽध्यायः

मोहमयीनगरे प्रचलितसभा

मम भगिनीपतेर्मरणात् परेद्युरेव मया मोहमयीनगरं प्रति प्रयातव्यमासीत्। सार्वजनिकसभायां यो भाषणीयोऽर्थस्तस्य पर्यालोचनाय मया नावसरोऽलाभि। दिवानिशं

Funding by IKS-MoE

जागरणच्चिन्तया च ममालस्यं समवर्तत। कण्ठो गर्गरायते स्म। भगवान् कथमपि मां निस्तारयिष्यतीति श्रद्धाय मोहमयीनगरमगच्छम्। मदीयभाषणं लेखितव्यमिति स्वप्नेऽपि मया न दृष्टम् ॥

सरफिरोजशामहाशयस्याज्ञानुरोधेन सभायाः पूर्वदिने पञ्चघण्टावादनकाले तस्य कार्यालयमगच्छम्। स मामपृच्छत् गांधे त्वदीयभाषणं सज्जस्थितं न वेति। भयेन कंपमानोऽहमवोचम्--न हि। तत्रैव भाषणं कर्तुमिच्छामीति ॥

मोहमयीनगरे तन्न चलति। अत्र वृत्तपत्रिकाजना भाषणानि यथावन्न लेखयन्ते। अनया सभयास्माभिः प्रयोजनं यदि लिप्स्यते तदा भाषणं पूर्वमेव लेखितव्यम्। किं चानेन प्रागेव प्रभातान्मुद्रापयितव्यम्। ननु रात्रेः पूर्वं त्वदीयभाषणं लेखितुं पारयसे ॥

अहमुद्भ्रान्तोऽभवम्। तथापि करिष्य इत्यहं प्रत्यजानि ॥

एवं तर्हि त्वदीयलेखनमानेतुं मुनशीमहाभागः कदा तव समीपमायात्विति ब्रूहि ॥

अद्य रात्रावेकादशवादनघण्टावेलामिति प्रावोचम् ॥

फिरोजशामहाशयकृता सूचना कियत्प्रयोजनकरीति परेद्युः सभागतस्य मे विदितमासीत्। 'फरामजी कावसजी इन्स्टिट्यूट' इत्येतदाख्यशालायां सभा प्रचलिता। श्रुतपूर्वं हि मया यत्सरफिरोजशामहाशयेन कृतोपन्यासे सभासु सर्वास्वपि तिलप्रक्षेपस्याप्यवकाशो दुर्लभ इति। ता इमाः सभाः सरफिरोजशामहाशयोपन्यासश्रवणकुतूहलिभिर्विद्यार्थिभिः पूर्णा बभूवुः। एतादृशसभादर्शनस्यायमेव प्रथमोऽवसर आसीत्। मम कंठध्वनिः कस्यापि श्रव्यो भविष्यतीति नाहमज्ञासिषम्। कंपमानः स्वभाषणं पठितुमारम्भि। सरफिरोजशामहाशयस्तु ततोऽपि किंचिदुच्चैस्तरामिति वदन्नुत्तेजनं मे यच्छति स्म। यथा यथाहमुत्तेजितस्तथा तथा मम ध्वनिरवसन्नोऽभूदिति स्मरामि ॥

मदीयपूर्वमित्रश्रीकेशवरावदेशपांडेमहाशयो मम साहाय्यं कर्तुमागतः। मदीयभाषणमहं तस्य हस्ते न्यक्षिपम्। तस्य ध्वनिस्तत्कार्यसदृशोऽभवत्। परंतु ते सभिका न श्रोतुमिच्छन्ति वाच्छा वाच्छेति घोषेण सभाभवनं प्रतिध्वनितमभूत्। वाच्छामहाशयः समुत्थाय देशपांडेमहाभागाद्भाषणमादाय स्वयमवाचयत्। कृतं मत्कार्यम्। सभिकाः सद्य एव शांता भूत्वा तत्तदुचितावसरेषु धिग्धिग् लज्जावहमिदमिति चाक्रुश्यमानाः करतालं देदीयमानाश्च भाषणमान्तमक्षरशोऽशृण्वन्। अहं संतुष्टोऽभवम् ॥

सरफिरोजशामहाशयो मदीयभाषणमश्लाघत। गंगास्नान इव सानन्दोऽभवम् ॥

सभाफलमिदमागतं यद् देशपाण्डेमहाशय एकः पारसीगृहस्थश्च मदीयमतावलम्बिनावभूताम्। अयं पारसीगृहस्थ इदानीमधिकारिपदमलङ्करोत्यतस्तस्य नाम प्रकटीकरणे शिथिलप्रयत्नोऽस्मि। तस्य निश्चयं प्राड्विवाकः खुरशेदजीमहाशयः शिथिली-

Funding by IKS-MoE

चकार। अत्रैका पारसीवनिता कारणम्। उद्वहेद् वा दक्षिणाफ्रिकादेशमागच्छेदिति। स उद्वोढुमधिकं योग्यमित्यमन्यत। किन्तु अस्य पारसीसुहृदः कृते पारसीरुस्तमजीमहाशयः स्वयं प्रायश्चित्तं चकार। एवं च पारसीवनितायाः कृतेऽन्याः पारसीस्त्रियः 'खादी'व्रतमङ्गीकृत्य सेविका भूत्वा प्रायश्चित्तं कुर्वन्ति। अतोऽहं दम्पतीं कृतक्षमोऽस्मि। देशपाण्डेमहाशयस्य उद्वहनप्रलोभनं नासीत्। परं स नागतः। तस्य प्रायश्चित्तं स्वयं करोति। प्रत्यागमनाध्वनि झांझीबारनगरं स्थितम्। तत्र कंचित् 'तैयब्जी'महाशयं मीलितवान्। सोऽपि आगन्तुकामः परं कथं स दक्षिणाफ्रिकादेशमागच्छेत्। अनागमनस्येतस्य प्रायश्चित्तं अब्बास-तैयबजीमहाशयः करोति स्म। ब्यारिस्टर्मित्राणि दक्षिणाफ्रिकादेशमागन्तुं प्रलोभनाय सर्वे प्रयत्ना मदीया निष्फला संवृत्ता ॥

अत्र पेस्तनजी-पादशाहमहाशयं स्मरामि। तेन साकं मदीयो मधुरः परिचय आङ्ग्लदेशादेव। पेस्तनजीपरिचयस्तु लण्डननगरस्थशाकाहारभोजनालये सम्पन्नः। तस्य भ्राता:वरजोरजीमहाशयोऽसाधारणचेता इति ख्यातिरहमश्रृणवम्। परं तं न प्रत्यक्षमदर्शम्। परं मित्रमंडले तस्य 'बुद्धिहीनः' इति ख्याति। अश्वकारुण्यान्न 'ट्राम' इति अश्वकर्षितयानं उपविशति स्म। शतावधानशक्तिमानिव स्मरणशक्तियुतोऽपि न पदवीलिप्सुः। बुद्धिस्वातन्त्र्यात् सर्वैरप्यापरिभूतः। 'पारसी' गृहस्थस्सनपि शाकाहारी। पेस्तनजी सर्वथा न तादृश एव परं बुद्धया प्रख्यातः। तदाङ्ग्लदेशेऽपि विदितम्। किन्तु अस्मद्परिचयमूलं तु शाकाहारनिमित्तम्। बुद्धिशक्तौ तमतिशेतुं नाहमशकम् ॥

अहमेनं मोहमयीनगरं प्रत्यभिज्ञातवान्। स किल तत्रत्यप्रधानन्यायस्थाने प्रोथोनोटरीति व्यपदिश्यमानोऽधिकार्यासीत्। अयं मया गुजरातीमहाशब्दकोशप्रणयने सामग्रीसंग्रहपरो दृष्टः। न खलु कोऽप्यस्ति स्निग्धो जनो यमहं दक्षिणाफ्रिकादेशकार्ये साह्यकरणाय न प्रार्थितवान्। पेस्तनजीमहाशयस्तु न केवलं मे साहाय्यं न करिष्यामीत्यवोचदपि तु ममापि दक्षिणाफ्रिकादेशगमनं निषेधयनित्थमबोधयत् यथा–मया तत्र किं नाम साहाय्यं स्यात्। दक्षिणाफ्रिकादेशगमनं त्वदीयं न मे रोचते। स्वदेश एव कर्तव्यमनल्पं ननु विद्यते। स्वभाषाभ्युदयः कर्तव्यः किमल्पीयसी सेवा। विज्ञानविषयकं राष्ट्रं मया ह्यन्वेष्टव्यम्। परंत्वस्मदीयकर्तव्यकार्याणामियमेका शाखा। देशस्य दारिद्र्यं विमृश्यताम्। दक्षिणाफ्रिकावर्तिनो मदीया जनाः कृच्छ्रपतिता भवन्तीति यद्यपि सत्यं तथापि भवादृशैस्तदीयकार्ये शक्तिसर्वस्वोपयोगो न मे रोचते। वयमत्र स्वराज्यं संपादयामहे। तदा खलु तत्रत्यानामस्मज्जनानां स्वतः साहाय्यमुपनंस्यति। त्वामेतदङ्गीकारयितुं न शक्नोमीत्यहं जाने। किन्तु त्वया सह त्वादृशानामितरेषां प्रेषणे नाहं भागी भवितुमिच्छामीति ॥

एषा बोधना यद्यपि मे नारोचत तथाप्यनया पेस्तनजीपादशाहमहाशये

Funding by IKS-MoE

संमाननावर्धत । तस्य देशवात्सल्यं भाषावात्सल्यं च ममाश्चर्यमजनयताम् । आवयोः प्रेमबन्धनमेतत्प्रसंगेन भूयो दार्ढ्यमाप्नोत् । अहमपि मदीयदृष्ट्या विलोकितुं क्षमः संपन्नः । परंतु दक्षिणाफ्रिकादेशकार्यपरित्यागकथामपास्य तत्कार्यसाधने दृढतरसंकल्पोऽभवम् । देशवात्सल्यविशिष्टो जनः प्रायेण देशसेवाया नैकमप्यङ्गमुपेक्षते । मम तावद्गीताश्लोकोऽयं प्रत्यक्षवर्ती स्फुरति स्म । यथा –

श्रेयान्स्वधर्मो विगुणः
परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः
परधर्मो भयावहः ॥ इति ॥

अष्टाविंशोऽध्यायः

पूनायां मद्रासनगरे च

सरफिरोजशामहाशयेन मम मार्गः सुगमः कृतोऽभूत् । अहं मोहमयीनगरात् पूनापुरीमगच्छम् । तत्र पक्षद्वयमवर्तत । सर्वपक्षाणामपि सहकारो मयापेक्षितः । प्रथमतोऽहं तत्रभवतो लोकमान्यतिलकस्य दर्शनमकार्षम् । स मामित्थमब्रवीत् – सर्वपक्षाणामपि साहाय्यं संपादनीयमिति यद्भवतोद्दिष्टं न तु तद् युज्यते । दक्षिणाफ्रिकासमस्यामधिकृत्य भिन्नाभिप्रायो जनः संभाव्यते । किन्तु युष्मत्सभायामग्रासनमध्यासितुमनुभयपक्षीयो जनः कश्चिदन्वेष्टव्यः । प्रोफेसरभांडारकरमहाशयं गत्वा द्रष्टुमर्हति भवान् । स किल दिवसेष्वेतेषु सार्वजनिकयत्नकलापे क्वचिदप्यकृतप्रवेशस्तिष्ठति । अयं प्रश्नः कदाचिदेनं बहिराकृष्य व्यापारयेत् । कृततद्दर्शनेन भवता तत्प्रतिवचनं मह्यमावेद्यताम् । यावच्छक्यमहं भवतः साहाय्यं चिकीर्षुरस्मि । यदा यदा वापि स्वच्छंदतो भवान् मत्समीपमागन्तुमर्हतीति ॥

इदमेव मे लोकमान्यप्रथमदर्शनम् । जनानामस्मिन्नसाधारणप्रीतिः किं निमित्तेत्यहं तत्क्षणमेवावेदिषम् ॥

ततोऽहं गोखलेमहाशयस्य संनिधिमगाम् । स हि तदा फरग्युसनविद्यालये स्थितः । स मे परमवात्सल्येन स्वागतमकरोत् । तत्प्रीतिसाक्षात्कारक्षणमेव तत्परवशोऽहं संवृत्तः । इदमेव मे तस्य प्राथमिकं दर्शनम् । तथाप्यावयोः समागमोऽयं चिरप्रेमविशिष्टयोः पुनरन्योन्यदर्शनमिवाभवत् । सरफिरोजशामहाशयो मम हिमालयसदृशोऽलक्ष्यत । लोकमान्यस्तु समुद्रसदृशः । गोखलेमहाशयस्तु गंगासमानः । सर्वोऽपि किल गङ्गां सानन्दमवगाहेत ।

सर्वस्यापि किल गंगा सुखावगाह्या वर्तते। हिमालयः पुनः दुरारोहः । समुद्रेऽवतरणं तु भयङ्करं भवति। परंतु गंगा निजाङ्कोपरि क्रीडितुं जनमाह्वयति। गङ्गायां हि द्रोणीचलयनानंदमनुभवेल्लोकः। यथा शिक्षकः पाठशालां प्रविविक्षुर्बालकानेव पुरा परीक्षते तथा मां गोखलेमहाशयः सूक्ष्मतया पर्यैक्षत। कश्च कश्च मया द्रष्टव्यः कया रीत्या च द्रष्टव्यमित्यादि मामबोधयत्। मदीयभाषणमसौ द्रष्टुमैच्छत्। महाविद्यालयस्य व्यवस्थां प्रादर्शयत्। भवतः साहाय्यमाचरितुमहं सर्वदा सज्जोऽस्मि स्थितः। डॉ. भांडारकरमहाशयस्य प्रत्युत्तरं मे निवेदयितुमर्हसीति प्रीतिवचनैः प्रकामसुखितं मां विधाय व्यसर्जयत्। गोखलेमहाशयो राजकीयक्षेत्रवर्ती स्वजीवितकाले मम हृदये यत्स्थानमाक्रमत तत्स्थानमेव स्वजीवितोत्तरकालेऽप्याक्रम्य तिष्ठति ॥

रामकृष्णभांडारकरमहाशयः प्रेम्णा पुत्रनिर्विशेषं मामभ्यनन्दत् । तमहं मध्याह्ने द्रष्टुमगच्छम्। तस्यां वेलायामपि कार्यव्यासंगिनं मां दृष्ट्वैव निरंतरपरिश्रमेणाप्यनिर्वेदशीलोऽयं मनीषी संतुष्टोऽभवत् । अनुभयपक्षीयेण तटस्थेनैव जनेन सभाध्यक्षेण भवितव्यमिति मद्वाक्यमाकर्ण्य तत्क्षणमेव तदेव युक्तं तदेव युक्तमिति वदन्नात्मनो मनःसंमतिं व्यक्तीचकार ॥

अथ समाप्तवचने मयि तेन कथितम्—अन्ये ये केऽपि व्यापृच्छन्ताम् । अहमर्वाग्राजकीयव्यापारेभ्यो निवृत्त इत्येतत्सर्वे वदन्ति तथाप्यहं भवद्वाक्यं न खलु निराकर्तुं शक्नुयाम् । भवद्भिः परिगृहीतः पक्षः परं बलवान्। भवदीय उद्यमश्च परं श्लाघ्यः। अतोऽहं भवदीयसभां नागमिष्यामीति वक्तुं नोत्सहे । भवद्भिस्तिलकगोखलेमहाशययोर्दर्शनान्ते प्रशस्तमेव कृतम्। उभयपक्षाभ्यां संभूय प्रवर्त्यमानायां सभायामध्यक्षतामहं सानन्दमंगीकरिष्यामीति ताभ्यां निवेदयत। सभा कदा मेलयितव्येति नाहं प्रष्टव्योऽस्मि। द्वयोः पक्षयोरपि यदानुकूलं स्यात् तदा ममाप्यनुकूलमेव। इत्येवमाख्याय मम धन्यवादमुक्त्वा लब्धाशिषं मां व्यसर्जयत् ॥

निरट्टहासं निराडम्बरं च क्वचित्सामान्यं गृहसभां चालयित्वा स्वार्थत्यागिनां विदुषां सज्जनानामेषां मण्डलीमानन्दपरवशं विधाय व्यसर्जयत् ॥

ततोऽहं मद्रासनगरं गतः। तन्नगरं परमोत्साहेन सोन्मादमिवाभवत्। बालासुंदरमव्यवहारः सभाजनानां मनसि स्फूर्तिमदात्। मदीयभाषणं तदेतन्मुद्रापितमासीत्। दीर्घ उपन्यास इत्येव वक्तव्यम्। परन्तु सभिकास्तं पदशः सावधानमशृण्वन्। सभाविसर्जनात्पूर्वं हरितपुस्तकानि लुठितानीव क्षणाद्विक्रीतान्यासन्। पुनः संशोध्य मद्रासनगरे दशसाहस्रप्रतिरूपकाण्यहं मुद्रापितवान्। तानि च उष्णपिष्टका इव व्यक्रीयन्त। परन्तु तावत्संख्याकानां प्रतिरूपकाणां मुद्रापणमनावश्यकमासीदिति पश्चादवगतम् । अत्युत्साहवशादिति हि मया गोपिता तद्विक्रयिकता। मदीयभाषणं केवलमांग्लभाषाभिज्ञानामेव हृदयमस्पृशत्। मद्रासनगरे तद्विधा एव दशसाहस्रक्रेतारो नाविद्यन्त ॥

Funding by IKS-MoE

तत्र मे दिवंगत 'जी. परमेश्वरन्–पिल्लै' महाशयात्सर्वाधिकं साहाय्यमलभ्यत । स किल 'मद्रासस्टँडर्ड' वृत्तपत्रिकायाः संपादकोऽभूत् । तेन दक्षिणाफ्रिकादेशीयसमस्यासंबद्धविषयाः परमेकान्ततत्परतया संगृह्यावबद्धाः । सोऽयमनेकशो मां स्वकार्यालये समाहूय मदीयकार्ये मार्गदर्शकोऽभवत् । 'हिन्दु' पत्रिकासंपादको 'जी. सुब्रह्मण्यम्' महाशयोऽपि मया दृष्टः । स च 'डॉ. सुब्रह्मण्यम्' महाशयसमेतः सहानुभूतिं महतीं प्रादर्शयत् । किन्तु 'जी. परमेश्वरन्-पिल्लै' महाभागेन ममास्य कार्यस्य कृते स्वकीयसमाचारपत्रिकामुपयोक्तुं पूर्णमवकाशमदात् । मयापि सा स्वैरमुपयोजिता । यथाहमिदानीं स्मरामि तथा 'पाच्याप्पा' शालायां 'डॉ. सुब्रह्मण्यम्' महाशयस्याध्यक्षतायां सभा प्राचलत् ॥

मद्रासनगरे भूयांसो जना ममोपरि प्रेमवृष्टिमवर्षयन् । तदीयोत्साहस्तथातिशयितोऽभूद्यथाहमनन्यगत्यांग्लभाषयैव व्यवहरन्नपि मदीयगृहजनैर्मिलित इवाजीगणम् । न हि प्रेमबलेनानिर्मोचनीयं किमपि बन्धनमस्ति ॥

एकोनत्रिंशोऽध्यायः

' झटिति निवर्तस्व '

मद्रासपत्तनादहं कलकत्तानगरीमगच्छम् । तत्र मे दुरन्ताः क्लेशाः समुपनताः । तत्रत्येन केनाप्यपरिचितत्वात् तत्रस्थे 'ग्रेट इस्टर्न होटेल' नामकविश्रांतिमन्दिरेऽहमवातरम् । अत्र 'डेलि टेलिग्राफ' नामकवृत्तपत्रिकाप्रतिनिधेः 'एलरथॉर्प' महाशयस्य परिचयो मे जातः । स च 'बंगाल क्लब' मंदिरे प्रतिवसति स्म । तत्रागन्तव्यमिति अयमामन्त्रयत । तन्मन्दिरस्य महाशालायां न कोऽपि भारतीयः प्रवेशयितव्य इति नियमस्तेन नाज्ञायि । स्वकोष्ठागारं नीत्वा भारतीयेषु तत्रत्यानामांग्लेयानामनादरं प्रतिविषण्णः सन् न लब्धमहाशालाप्रवेशं मां क्षमामभ्यर्थयत ॥

वंगानां पूजाविग्रह इति ख्यातिमागतः सुरेंद्रनाथबॅनरजीमहाशयो मयावश्यं द्रष्टव्य आसीत् । तदवलोकनाय प्राप्ते मयि तद्दर्शनार्थमागता बहवोऽन्ये जनास्तं पर्यातिष्ठन् । अथ बॅनरजीमहाशयो मामकथयत्—

भवदीयकार्ये लोकास्तावदकुतूहलिन इत्यहं शङ्के । आस्माकाः क्लेशा बहवो भवन्तीति भवतामप्येतद्विदितमेव । तथापि भवद्भिः सर्वथा यावच्छक्ति प्रयतितव्यम् । अस्मिन् कर्मणि महाराजानां सहानुभूतिः संपादनीया । 'ब्रिटिश इंडियन ॲसोसियेशन' संघस्य

प्रतिनिधयो द्रष्टव्या इत्येतन्न विस्मरणीयम्। राजा सर-प्यारीमोहन-मुकरजी महाशयस्य महाराजटागोरमहाशयस्य च द्वयोरपि दर्शनमावश्यकम्। इमौ सज्जनावुदारहृदयौ। किं च सार्वजनिककार्येष्वेतौ प्रवर्तिष्येत इति ॥

अहमेतौ सद्गृहस्थावपश्यम्। किमु प्रयोजनं ततः किमपि नालभे। द्वावपि मामुदासीनभावेन दृष्ट्वा कलकत्तानगरे सार्वजनिकसभाप्रचालनं नाम खलु सुकरो व्यापारः। यदि कदाचिदवश्यमेव सा प्रचलितव्या तर्हि तत्सर्वमेतत्सुरेंद्रनाथबॅनरजीमहाशयायत्तमित्यवोचताम् ॥

मदीयकार्यक्रमः कठिनकठिनः संपद्यमानो मया दृष्टः। अहममृतबझारपत्रिकाकार्यालयमगच्छम्। तत्र ये गृहस्था मामैक्षन्त ते किल किंचिद्याचकं भिक्षुकं वामन्यन्त। "बंगवासी" जना ममेतोप्यधिकां संमाननामकुर्वन्। तत्पत्रिकासंपादको मामेकहोरापर्यन्तं व्यलंबयत्। नूनमेनं द्रष्टुमनेके जना उपस्थिताः। किन्तु सर्वैस्तैः कृतभाषणस्यापि तस्य दृष्टिर्ममोपरि नापतत्। एकहोरां यावत् प्रतिपाल्य यावदहं धैर्यमवष्टभ्य स्वकार्यमस्मै निवेदयितुमुपाक्रंसि तावदयमब्रवीत्–यथा कियत्कार्यव्यापृतोऽहमिति किं न पश्यति भवान्। भवानिवास्मत्पार्श्वे परिसर्पकाणां नास्त्यादिर्नान्तः। अपसर्पतु भवान्। एतदाकर्ण्य क्षणमहं क्रोधसंकटे व्याकुलोऽभवम्। किन्तु शीघ्रमेव तदीयस्थितिमज्ञासिषम्। श्रुतपूर्वा हि मया बंगवासीप्रख्यातिः संपादकं प्रति गतागतां कुर्वतां जनानां प्रवाहश्च दृष्टः। ते जनाः सर्वेऽपि संपादकस्य परिचिता आसन्। तत्पत्रिकायां चर्चनीयविषया नाल्पा अविद्यन्त। दक्षिणाफ्रिकादेशस्य नामापि तत्काले जनानामविदितमासीदिति वक्तुं शक्येत ॥

कस्यचित्पुरुषस्य संकटं निजदृष्ट्या महत्तरमेवास्तु। तथापि तद्वदेव स्वस्वदुःखनिवेदनाय संपादकस्य कार्यालयमुपधावतां परःशतजनानां ‘मध्ये नन्वयमप्येकतमः। संपादकस्त्वेषां सर्वेषामपि किं नाम कुर्यात्। यद्यप्येते दुःखिनः संपादकं देशनायकं मन्यन्ते तथाप्ययं संपादकः स्वकार्यकलापं निजकोष्ठागारदेहल्या अर्वाग्वर्तिनं मन्यते। तथापि नाहमधीरः संवृत्तः। इतरपत्रिकाणामपि संपादकानपश्यम्। तथा चांग्लेयपत्रिकासंपादकाश्च मया दृष्टाः। ‘ स्टेट्समेन् ’ ‘ इंग्लिशमेन ’ इतीमे पत्रिके प्रश्नस्यास्य महत्त्वमवबुध्येताम्। एतत्प्रश्नविचारानहं सविस्तरमाभ्यामावेदयम्। ते पत्रिके समग्रमेतदप्रकटयताम् ॥

‘ इंग्लिशमेन ’ पत्रिकासंपादकः साँडर्समहाशयः मां स्वकीयमकरोत्। स्वकार्यालयं स्वपत्रिकां चोपयोक्तुं मह्यमवकाशमदात्। एतत्प्रश्नमधिकृत्य स्वेनलिखितप्रधानलेखनादर्शं मत्सकाशं प्रेष्य तत्र चेत् किमपि शोधयितुमिष्टं स्यात्तर्हि तद् भवतैव संशोध्यतामिति च मम स्वातंत्र्यमदात्। आवयोरुभयोरपि सख्यमवर्धतेत्युक्तिर्नातिशयोक्तिकोटिमवगाहेत्। यावच्छक्ति सहाय्यं करिष्य इति मे वाग्दानमकरोत्। एवं दत्तवचनमक्षरशः पर्यपालयत्। अपि च यावदतीवरुग्णतामापन्नः तावदसौ मया सह पत्रव्यवहारमकरोत् ॥

Funding by IKS-MoE

मम जीविते बहव एतादृशा मधुरसंबन्धाः परमकस्मादघटिषन् । मम सत्यपरायणता मया कृतमतिशयोक्तेरत्यंतदूरीकरणं तद् द्वयमपि सॉंडर्सेमहाशयस्य परितोषहेतुरासीत् । सहानुभूतिप्रदर्शनात्पूर्वमसौ मां सूक्ष्मतया परीक्षणीयतामनयत् । तत्परीक्षायामनेन प्रत्यक्षीकृतं यदहमत्यन्तमविशंकितस्वरूपः दक्षिणाफ्रिकादेशस्थायिनां श्वेतजनानां पक्षमपि निःपक्षपातिन्या दृष्ट्या प्रकाशयन् तदियत्तां च यथावदवधारयन् परं परिश्रममवाक्षम् ॥

इदं हि मदनुभवे दृष्टं यदस्मत्प्रतिपक्षेऽस्माभिर्न्यायेन वर्तनमेवातिशीघ्रं स्वपक्षस्य न्यायसंपादनमार्गः ॥

इत्थमकस्मात् सॉंडर्सेमहाशयादुपलब्धसहायस्य कलकत्तानगरीसार्वजनिकसभामेलनाय करिष्यमाणप्रयत्नः साफल्यमुपेयादित्याशा समुदपद्यत । तावच्च डरबननगरात्तन्त्रीप्रवृत्तिरागता यत्रैवं संदिष्टमासीत् न्यायविधायकसभा ‘जान्युआरी’मासे मिलति । झटिति प्रस्थातव्यमिति ॥

अतोऽहं कलकत्तानगरी यच्छीघ्रं परित्यज्य निर्गन्तुं कारणं पत्रमेकं लिखित्वा वृत्तपत्रिकासु तल्लेखनं प्रकटीकृत्य मोहमयीनगरं प्रति प्रास्थिषि । प्रस्थानात्पूर्वं दादा-अबदुल्लामहाशयस्य तन्नगरवर्तिनः प्रतिनिधेस्तन्त्रीसंदेशमेकं प्राहैषम् । दक्षिणाफ्रिकादेशगामिन्यामव्यवहितोत्तरनौकायां प्रयातुमानुकूल्यं विधातव्यमिति । तत्कालमेव दादा-अबदुल्लामहाशयः ‘ कुरलँड ’ नामकतरणिमेकामक्रैषीत् । स कुटुम्बेन मया तन्नौकायानेन निःशुल्कं प्रयातव्यमिति मामुपारुधत् । तदभिप्रायमभिनंद्य डिसेंबरमासस्य प्रारंभे मम भार्यामपत्यद्वयं भगिन्या एकपुत्रं च सहादाय तस्यां नौकायां द्वितीयवारं दक्षिणाफ्रिकादेश प्रति प्रयाणमहमङ्गीकृतवान् । तया सहैव ‘ नादरी ’ संज्ञिकान्यातरणिडरबननगरं प्रति प्रायात् । तस्या दादाअब्दुल्लाकंपनीजनो माध्यस्थ्यमग्रहीत् । नौकाद्वये संभूयाष्टशतं वा सहस्रं वा भारतीयप्रायाणिका अवर्तन्त । तेषामर्धजनः ‘ ट्रान्सवाल ’ देशगामी ॥

इति श्री गांधिमहात्मनः
सत्यशोधनाख्यायामात्मकथायां
द्वितीयो भागः
समाप्तः

तृतीयो भागः

प्रथमोऽध्यायः

चण्डमारुतसूचना

दारापत्यसमेतेन मया कृतस्य समुद्रयानस्यायमेव प्रथमोऽवसरः । अस्यामात्मकथायामनेकशो हि मया निरूपितं यन्मध्यवर्तियेषु हिन्दुजनेषु बाल्यविवाहप्रचारात्तेषां भूयांसः पुरुषा विद्यावन्तः स्त्रियस्तु निरक्षराश्च वर्तन्ते । तस्मात्तेषां दम्पतीनां जीवने परस्परं महतोऽन्तरस्य विद्यमानत्वात् पत्या भार्याशिक्षकत्वमवश्यमङ्गीकरणीयं भविष्यतीति । तदेवं मदीयदारापत्यैः स्वस्ववेषभाषाहारस्थितिगतिषु यथा वर्तितव्यमिति मयैष चिन्तनीयमासीत् । तदीयनवीनावरणस्थितिसमुचिता रीतिनीतीस्ते परिशिक्षयितव्या इत्यापतितम् । कांश्चित्तदानींतनान्वृत्तान्तानिदानीं स्मरतो मम हासो जायते । हिन्दुकुलस्त्रीजनः किलैकाग्रतः पतिवाक्यानुरोधेन वर्तनमात्मनः परमो धर्म इति मन्यते । हिन्दुपतिस्तु स्वभार्यायाः शासकोऽहं प्रभुरिति तयापि सर्वदा परिचर्यया तदेकानन्यपरायणया भवितव्यमिति च मन्यते । नागरिकत्वख्यातिकामेन निजनेपथ्यविधौ बहिर्व्यवहारे च यथाशक्यमैरोप्यजनवद्वर्तितव्यमित्यासीत्तदा मे मनीषा । तथाविधया हि प्रवृत्त्या गौरवप्राप्तिर्भविष्यतीति तथा च लोकमान्यतामसम्पाद्य देशसेवा दुःशका भविष्यतीति तदाहमचिन्तयम् ॥

अत एव भार्यापुत्राणामाकल्पविधानं स्वयमेव निरचेषम् । असांप्रतं खल्वमीष काठियावाडवणिग्जनवत्प्रदर्शनम् । तदात्वे निखिलभारतीयेषु पारसीजना एव परमनागरिकत्वेन पर्यगण्यन्त । तस्मादैरोप्यनेपथ्यानुकरणं समग्रतया यत्र यत्र संभवि न स्यात्तत्र तत्र पारसीवेषनिधानमेवास्माभिरङ्गीकृतमभूत् । मम भार्यायाः पारसीजनैः परिधेयमन्तरीयं दारकाणां च पारसीकवचाप्रपदीनानि चानीय प्रायच्छम् । ' बुट्स 'नामकोपानद्विशेषाः पादप्रसेवाश्च सर्वैरप्यवेक्षिता एव । मम भार्यायाः कुमाराणां च तद्धारणाभ्यासो न चिराय साध्योऽभवत् । उपानहश्चरणं दशन्ति स्म । पादप्रसेवाः प्रस्वेददुर्गन्धिनोऽभवत् । पादाङ्गुलीषु क्षतानि जायन्ते स्म । ईदृशाखिलक्लेशानां कृते समाधायकं प्रतिवचनं सर्वदा मदीयमुखे सज्जस्थितमासीत् । परंतु तादृशप्रतिवचनगौरवापेक्षया मदधिकारबलमेव तेषां प्रवर्तकमासीदिति मे प्रतिभाति । ते किल गत्यन्तराभावादेतन्नूतनवेषमङ्गीचक्रुः । नितान्तमसन्तुष्टा अप्यनेनैव कारणेन ते भोज्यपदार्थग्रहणोपयोगिनीश्छुरिका अपि प्रयोक्तुमारभन्त । यदा मे नागरिकलक्षणेषु नामैतेषु भ्रमो न्यवर्तत तदा तेऽपि तासामुपयोगमजहुः । आदौ तदभ्यासस्तेषां यथा क्लेशप्रदोऽभूत् तथा तदन्यूनमेवाचिरा-

भ्यस्तपरित्यागोऽपि सर्वथा क्लेशावहः समजनीति मन्ये। किन्तु यदेतत् सुधारणाडम्बरस्य तिलाञ्जलिरस्माभिरदायि तदस्माकमिदानीं जीवनं प्रकामसरलं लघुतरं च संवृत्तमित्यनुभूयते ॥

तस्मिन्नेव नौकाप्रवहणे मदीयाः केचिद्बन्धवः परिचिताश्चावर्तन्त । सा च नौका मदीयकार्यैकजनस्य मित्राणां स्वमासीत् । अतोऽहं तस्याः सर्वेष्वपि प्रदेशेषु स्वैरविहरणाय लब्धावकाशस्तांश्च नौकाबाह्यशालपथिकांश्च सर्वदादर्शम् । असक्तमेव नातालदेशं गमिष्यन्ती तरणिरियमष्टादशदिवसमात्रेण निर्वर्तनीयप्रयाणाभवत् । किन्तु पुरस्तादाफ्रिकाभूमिखण्डे समुपनंस्यन्तं महाक्षोभं पिशुनयन्निव, त्रिचतुरदिनावशेषे प्रयाणे महांश्चण्डमारुतः सागरे समुदभवत् । भूमण्डलस्य दक्षिणार्धगोले डिसेम्बर–इत्यांग्लद्वादशमासे निदाघकालो भवति । अतस्तत्रत्येषु जलराशिषु लघुर्वा कठोरो वा चण्डमारुतो बहुशः समुदेत्येव । इदानीं पुनरुत्थितो यः प्रचण्डवातः स नितान्तभीषणो भूत्वा चिराय प्रावासीत् । तस्मादध्वनीनकदम्बकमुद्भ्रान्तमभूत् । तदानींतनं दृश्यमतिगम्भीरमासीत् । विपदः सर्वेऽपि समगोष्ठन्त । मुसलमाना हिन्दवः क्रैस्तजनाश्च विस्मृतान्योन्यभेदाः परमेश्वरं ध्यातुमारभन्त । तस्य केचिदुपहारप्रतिज्ञामकुर्वत । नौकामुख्याधिकारी प्रार्थनाप्रसङ्गे सर्वैर्मिलित्वा पथिकानामित्थं समाधानमाचष्ट । "चण्डमारुतोऽयमनपायकारीति यद्यपि न शक्यते वक्तुं तथाप्यनेकशो मयास्मादप्यधिकभयानकाः प्रवाता दृष्टाः । प्रवहणं चेद्बलवद् दृढतरं स्यात्तदा कठोरमपि चण्डमारुतं तत् प्रधर्षयेदिति ॥"

एतेन तदीयक्षोभो न शान्तिमगमत् । अनुक्षणमुज्जृम्भमाणमहानिर्घोषश्रवणेन प्रवहणं भज्येत वा च्छिद्रितं वा स्यादित्यमी व्यभावयन्त । परिदोधूयमानमेतदवलोक्य ते क्षणे क्षणे तस्य विपर्यासमशङ्कत । एतादृशेऽवसरे तरणेर्बाह्यशालायामवस्थानं कस्य वा शक्यं स्यात् "दैवेच्छा प्रभवतु" इति वचनोद्गारमेकमन्तरेण नान्यत्किंचनवचः श्रूयते स्म । यथाहं स्मरामि तथा वयमेवंविधचिन्तयाक्रान्ताश्चतुर्विंशति होरायतं कालमयापयाम । अथान्ते कादम्बिनी विजघटे। भगवान्सूर्यनारायणो दर्शनमदात् । विरतश्चण्डमारुत इति नौकाधिकारी न्यवेदयत् । लोकानां मुखाच्चिन्ता व्यपगताभूत् । तया सहैव तन्मुखतः पुरोच्चार्यमाणभगवन्नामाप्यस्तमगात् । गानविनोदाः खादनपानसंभ्रमाश्च यथापुरं व्यजृम्भन्त । मृत्युभीतिस्तिरोऽभवत् । तत्कालमात्रं भगवद्ध्याननिरता या चित्तवृत्तिः सा पुनर्मायावरणेन प्रतिच्छन्नाभवत् । यद्यपि यथापुरं नमस्याभजनानि च प्राचलन् तथापि भयंकरे तत्तादृशेऽवसरे ये दृष्टचरे श्रद्धागाम्भीर्ये ते क्वापि पलायितेऽभूताम् ॥

किन्तु चण्डमारुतोऽयं मे पथिकैराप्तसम्बन्धमघटयत् । अहं चण्डमारुतोदये निराकुल एव स्थितः । मया हि तादृगनुभूतपूर्व एव समुद्रयानं मम समीभूतमिति वक्तुं शक्नुयाम् । नौकायां मे वमनं न भवति । शिरो न घूर्णति । तदहं पथिकानां मध्ये निःशङ्कमेव गतागतं

कुर्वाणस्तांस्समादधानश्च प्रतिहोरं मुख्याधिकारिणः सकाशात् प्रवृत्तिमादाय तेभ्यो निवेदयितुमवकाशमापम् । एवं सम्पादितः प्रणयः ममाग्रे बहूपाकरोत् ॥

वयं डिसेम्बरमासस्य द्वादशतमे वैकोनविंशतितमे वा दिने डरबननगरस्य नौकानिवेशस्थानमासादयाम । 'नादरी'नाम्नी तरणिरपि तस्मिन्नेव दिने तत्र प्रापत् ॥

किन्तु पारमार्थिकश्चण्डमारुतोऽद्याप्युदयिष्यमाणः स्थितः ॥

द्वितीयोऽध्यायः

चण्डमारुतः

निरूपितपूर्वं हि यन्नौकाद्वयी प्रायेण डिसेम्बरमासस्याष्टादशतमे दिवसे डरबननगरोपकण्ठमाप्नोदिति दक्षिणाफ्रिकाखण्डस्य नौकाबन्धनस्थानेषु पथिकानामसम्यग्परीक्षितनिजनिजारोग्यस्थितीनामवतरणं निषेधन्ति । यः कोऽपि तेषां सांक्रामिकव्याधिसंपृष्टश्चेत् पथिकाधिष्ठितामेव तां नौकां तीरतो बहिष्कृत्य विविक्ते स्थापयन्ति । अस्मदीयस्थानकाले मुम्बापुर्यां ग्रन्थिज्वरस्य विद्यमानत्वादास्माकी तरणिः कंचित्कालं प्रतिरुध्येतेति नः शङ्कावर्तत । निवेशमुपप्राप्ते प्रवहणे हारिद्रीपताका समुत्थापनीयेत्यस्ति नियमः । अवसितपरीक्षस्य भिषक्पतेरनुज्ञामवाप्यैव ध्वजोऽयमवरोपयिष्यते । तदनु पान्थानां सुहृद्बन्धुवर्गं नौकामारोढुमनुजानन्ति ॥

प्रचरितसंकेतानुरोधेनास्माकतरणेरुपरि पीतध्वजः समारोपित आसीत् । ततो भिषगुपागत्यास्मान्परीक्ष्य पञ्चाहपर्यन्तमियं नौका बहिष्कार्येत्यभ्यधात् । यदस्य मते ग्रन्थिज्वरकृमीनां संपूर्णवृद्धये त्रयोविंशतिदिनान्यपैक्ष्यन्त । तन्मोहमयीनगरतः प्रस्थानप्रभृत्यात्रयोविंशतिदिवसं नौका बहिःस्थापनीयेति निरणायि । किन्त्वेतदाज्ञाप्रवर्तको हेतुरारोग्यमात्रसंबद्धो नाभवत् ॥

डरबननगरनिवासिभिर्गौराङ्गैरस्मत्परावर्तनाय प्रयत्नकलापः पुरैव समाश्रितोऽभूत् । सैव कलापश्च तदाज्ञायाः कारणमासीत् ॥

नगरान्तःप्रचलतोऽस्य यत्नकलापस्य वृत्तान्तः प्रतिदिनमस्मत्सकाशं दादा-अबदुल्ला-कंपनीनियोगिजनद्वारा समागच्छति स्म । तत्रस्थाः गौराङ्गाः सभा महतीरकारयन् । दादा-अबदुल्ला-कंपनीजनान्नानाप्रकारैरभीषयन् । कदाचित्तदीयानुमतिप्रेप्सया तानाशाप्रदर्शकैर्वाक्यैः प्रालोभयन् । युष्माभिरेषा नौकाद्वयी परावर्त्यते यदि तदा वः संभवन्नष्टं वयं सोढुं सज्जस्थिताः स्म इत्यवोचन्त । परन्तु कंपनीजनाः कस्यापि बिभीषिकया न हृत्कम्पमापुः । तत्कालं शेठ-अबदुल्ला-करीम-हाजी-आदममहोदयः कंपनीप्रबन्धकर्तासीत् । तेन हि द्रव्यहानेर्महत्याः संभवेऽपि तरणिद्वयं निवेश-

Funding by IKS-MoE

स्थानमागमय्य पथिकाः समवतारणीया एवेति शपथो न्यधायि। किं चासौ प्रत्यहं नः पत्राणि विस्तरेण विलिख्य प्रेषयति स्म। सुदैवविपाकादस्मिन्नेवावसरे मनसुखलाल-हीरालाल-नाजरमहोदयो मां द्रष्टुं डरबननगरमागमत् । स किल कार्यदक्षो निर्भयश्च । स एव भारतीयानामग्रेसरोऽभूत्। तथा स इव तेषां न्यायवादी लॉटनमहाशयोऽपि धीर आसीत् । तेन हि खण्डिता गौराङ्गानां प्रवृत्तिः । तेन किलास्मिन्नवसरे परं भारतीयानां हिताकांक्षिणा मित्रेणेव कर्तव्योपदेशः कृतो न पुनः पारितोषिकमादाय कार्योपदेशं कुर्वता न्यायवादिनेव ॥

एवं डरबननगर्यामुभयपक्षयोरसमं द्वन्द्वयुद्धं प्रावर्तत । एकतः कतिपये कैश्चिदांग्लमित्रैः समेतास्तपस्विनो हिन्दुजना अन्यतो धनबलेन बाहुबलेन विद्याबलेन संख्याबलेन च संपन्ना गौराङ्गाः स्थिताः । एवं स्वतःप्रबलानां प्रतिपक्षीयानां राज्याधिकारबलस्य प्राप्तिरप्यासीत् । यतो नातालराज्याधिकारः प्रकटमेव गौराङ्गानां साहाय्यमकरोत् । मन्त्रिमण्डले सर्वाग्रगण्यो हॅरी-एस्कम्बमहाशयः सर्वसमक्षमेव गौराङ्गानां सभास्वात्मनः सहकारित्वं प्रादर्शयत् ॥

तस्मात् पञ्चदिनानि यावदस्मद्विधारणं न खल्वारोग्यसम्बन्धिनां नियमानामनुरुरुत्सया कृतम् । तस्य तावदयं वास्तवो हेतुर्यद्यया कयापि विधयास्मान् कम्पनीजनान्वा भीषयित्वा पथिकाः परावर्तयितव्येति कम्पनीप्रतिनिधिः पूर्वमेव संतर्जितोऽभूत् । इदानीं पुनरस्मान् वित्रासयितुमारभन्त । तथा च ते प्राहुः यदि यूयमिदानीं न परावर्तध्वे तदा नूनमम्भोधौ मज्जनं वः समापतिष्यति । परावर्तितुमनुमन्यमानास्तु प्रतिमार्गस्य भाटकमपि लभेध्वमिति ॥ अहमध्वगानां मध्ये धैर्यमाचक्षाणः सर्वदा पर्यक्रामिषम् । नादरीसंज्ञकनौकायानवर्तिनामध्वन्यानामपि धैर्यसंदेशमहं प्राहैषम् । सर्वेऽपि शान्ता अविक्लवाश्चासन् ॥

पथिकानां विनोदाय तरण्यामुच्चावचाः खेलालीलाः संन्यदध्महि । अथ क्रिस्तजयन्तीमहोत्सवः समागमत् । तस्मिन्दिने नौकामुख्याधिकारी प्रोच्चकक्ष्या प्रयाणिकानखिलानपि भोजनाय न्यमन्त्रयत । एषामहं मम कुटुम्बजनाश्च मुख्यप्राघुर्णिका अभूम । भुक्तोत्तरं भाषणानि प्रवर्तन्ते किल । तत्प्रसङ्गे पाश्चात्यनागरिकत्वमधिकृत्याहमभाषिषि । एतादृशसंदर्भेषु गभीरभाषणानि न क्रियन्त इति यद्यपि मे विदितं तथापि विधानान्तरमाश्रित्य भाषणाय नावकाशोऽभूत् । सर्वेष्वेतेषु,विनोदेषु'यद्यप्यहं प्रासजं तथापि मदीयहृदयं डरबननगरे प्रवर्तमानं युद्धमेवोपधावति स्म ॥

तन्निमित्तं चैतदासीद्यदहमेव तस्मिन्नायोधने केन्द्रस्थानमभूवम् । ममोपरि द्विविधो दोषः समारोप्यत । तद्यथा—

(१) मया हिन्दुस्थाने नातालनिवासिनो गौराङ्गाः वृथा दूषिता इति ।

(२) नातालदेशं हिन्दुजनैः पूरयितुकामेन मया तरणिद्वयसंभृतो भारतीयजनसार्थो नातालदेशे स्थितिं ग्राहयितुमेव समानीत इति ।

आत्मीयामनुयोज्यतामहमवेदिषम् । अज्ञासिषं च यन्मत्कृते दादा-अब्दुल्ला-महाशयो महति संकटे लग्नः पथिकानां जीवितं गण्डान्तरग्रस्तमिव वर्तते मया सहानीय कुटुम्बकं क्लेशे निपातितमिति च ॥

परमहं निर्दोषी स्थितः । न खलु मया नातालदेशं प्रत्यागमनाय कश्चिदपि प्रेरितोऽभूत् । नौकामारोहतां पथिकानां परिचयोऽपि मे नासीत् । मदीयद्वित्रबन्धून्विना तत्रत्यानां परःशताधिकानां मध्ये नैकस्यापि नामधेयं वा निवासस्थानादिकं वा मयाबोधि । नातालदेशवर्तिनामैरोप्याणां विषये तस्मिन्देशे यन्मयोद्घाटितं तद्व्यतिरेकेण भारतवर्षे मया न किंचिदुपन्यस्तम् । किं च मदुक्तयः सर्वा अपि प्रमाणानुगता एवासन् ॥

तस्माद् या नाम नागरिकता नातालदेशवर्तिभ्य ऐरोप्यजनेभ्योऽस्वजीवितं समर्पितवती या चास्मांस्तदीयाचरणमङ्गीकार्य तदवलम्बनं नः संपादितवती तामहं नितान्तमन्वशोचिषम् । एतत्सभ्यताविचारः सदा मे मनसि स्थितोऽभूत् । अतोऽहमस्य लघोर्जनकूटस्याग्रे तां प्रकृत्य मामकीनं मतं प्राचकाशम् । तत्र मिलिता नौकामुख्याधिकारिप्रभृतयो मदुपन्यासं सावधानमाकर्ण्य यादृशभावेनैतानभिप्रायानहं व्याकार्षं तादृशभावेनैव तानग्रहीषुः । न जाने मदुक्तार्थग्रहणात्तेषां जीवनक्रमे या काचित्परिवृत्तिः फलिता न वेति । किमु ततः परमनेकशोऽहं 'कॅप्टन' प्रभृतिभिरधिकारिभिः सह पाश्चात्यनागरिकतामधिकृत्य चिराय कथालापानकरवम् । तत्र पाश्चात्यसभ्यतामूलं पाशवबले निरूढम् । पौरस्त्या नागरिकता त्वहिंसायां प्रतिष्ठितेति मदीयभाषणे मया प्रत्यवादि । प्रष्टरो मदीयसिद्धान्तस्यैव मामबध्नन् । तेषामेको (स च नौकामुख्याधिकारीति स्मर्यते) मामपृच्छत् – यदि गौराङ्गास्तर्जनानुरूपमेव युष्मान् हिंसयेरंस्तदा भवन्तः स्वकीयमहिंसासिद्धान्तं कथं पालयिष्यन्तीति । अथाहम् प्रत्यवोचम् – यथा वयं तेषु क्षमां कुर्मो यथा च तत्प्रतीकारं परिहरामस्तथा नो भगवान् बुद्ध्या धैर्येण चानुग्रहीष्यतीत्यहमाशंसे । तेभ्योऽहं न कुप्यामि । परमहं दूये तदीयमज्ञानं संकुचितदृष्टिं च ध्यायं ध्यायम् । तेऽमी स्वप्रवृत्तिं यथार्थतो न्याय्यां समुचितां च प्रतियन्तीत्यहं जाने । तस्मादहेतुकी स्यान्मदीया तेषां क्रोधप्रवृत्तिरिति ॥

प्रष्टा मन्दमन्दमस्मेष्ट । मदुक्तमश्रद्धेयमिति प्रायो मन्यमानः ॥

एवं दिनानि शनैर्व्यतीयुः । कियच्चिरमस्मान् विधारयिष्यन्तीत्यद्याप्यनिश्चितमभूत् । अथात्र पृष्टोऽधिकारी प्राह —— अयमर्थो मदीयहस्तादपगतः । राज्याधिकारान्निदेशप्राप्तिसमनन्तरमेव पथिकानवतरीतुमनुज्ञातोऽस्मीति ॥

पर्यन्ते मम च मदीयसहचारिपथिकानां चान्तिमप्रबोधना प्रादायि । तत्र हि भर्त्सिता वयं यदस्माभिर्जिजीविषुभिस्तद्वाक्यमङ्गीकरणीयमिति । अथास्माभिः पथिका वयं नातालनौकानिवेशस्थानेऽवतरीतुमधिकारिणः स्म इति प्रतिपाद्य यदस्तु महाक्लेशसंभवेऽपि वयमवतीर्य नातालविषयं प्रवेक्ष्याम इति दृढसंकल्पा भवाम इति प्रतिवचनमलेखि ॥

पर्यन्ते त्रयोविंशतितमे दिने नौकायाननिवेशस्यान्तःप्रवेशायानुज्ञा समागता । पथिकाश्चावतरीतुमन्वज्ञायन्त ॥

तृतीयोऽध्यायः

परीक्षा

नौकानिवेशस्थानं प्रविष्टयोस्तरण्योः पथिकास्ततोऽवतरितुमुपाक्रमन्त। किन्तु एस्कम्बमहाशयो नौकामुख्याधिकारिणे संदेशमेवं प्रैषयत्। यद्गौराङ्गाः गांधिमभिक्रुद्धा भवन्ति। तस्येदानीं प्राणसंशयो वर्तते। तस्माद्वरं तेन प्रदोषतिमिरेऽवतीर्य नौकानिवेशस्थानविचारकैः टॅटममहोदयैरभिरक्षितेन प्रयातुमिति। अहमप्यवगमितवाचिकार्थस्तथैव कर्तुमन्वमंसि। तदनु होरार्धान्तरे लॅाटन्महाशयो नौकामुख्याधिकारिणः पार्श्वमुपेत्य प्राह — श्रीगांधिमहाशया न चेदन्यथा मन्यन्ते तदाहमेतान्मया सह निनीषुरस्मि। एस्कम्बमहाशयेन यत्संदिष्टं तदनुविधानमनावश्यकं भवतीति दादा-अब्दुल्ला-कम्पनी-न्यायवाद्यहं ब्रवीमीति। तदनु मत्समीपमासाद्य स मामित्थमिवाभ्यधात्॥

न चेद्भीरवो भवन्तस्तर्हि श्रूयतां यद्ब्रवीमि। भवतां कलत्रं दारकाश्च रुस्तमजीमहाशयस्य मन्दिरं यानेन गच्छन्तु। वयमन्वक् पादचारेण गच्छामः। भवद्भिः रात्रौ स्तेनवन्नगरप्रवेशं सर्वथाहं न रोचये। अन्यैर्भवतामुपद्रवस्य नावकाशमिहोपलक्षये। अस्त्यधुना सर्वमुपशान्तम्। समवेता ये गौराङ्गास्ते व्यपगताः। तत्तु यथा वास्ताम् परं भवद्भिर्नगरे न हि चौर्येण प्रवेष्टव्यमिति सोपरोधं ब्रुवे॥

इदं मया सद्यः प्रतिपन्नम्। भार्या कुमाराश्च रुस्तमजीगृहं निरातङ्कमापुः। अथ नौकामुख्याधिकारिणमापृच्छ्य लॅाटनमहाशयेन साकमहमगातरम्। रुस्तमजीमहाशयस्य गृहं नौकानिवेशस्थानाद्द्विपाषाणदूरेऽभवत्॥

अवतीर्णमात्रं मां केचिद्बालकाः प्रत्यभिज्ञाय गांधी-गांधी-इत्याक्रोशन्। षटसप्तजनाः प्रधाव्य स्वयमपि तैः सहाक्रोष्टुमारभन्ता संमेलवृद्धिमाशङ्क्य लॅाटनमहाशयो 'रिक्षा'रथं (मनुष्यवाह्यं यानं) आकारयत्। तदारोहणं मे न रोचते स्म। तद्दिनमेव प्रथमो तस्यानुभवः स्यात्। परन्तु बालकास्तत्र नौ प्रवेशं न्यरुधन्। रथवाहकस्तैर्हृदयभेदं भर्त्सितः पलायितोऽभूत्। प्रकाम्यतोरावयोर्जनास्तथा संन्यपतन् यथान्ते पुरःपादविन्यासोऽपि दुष्करोऽभवत्। ते तावल्लॅाटनमहाशयमपाकृष्यावां दूरतो व्यजीघटयन्। तदनु ममोपरि प्रस्तराणामिष्टकानां च शकलानि पूताण्डानि च प्राक्षिपन्। केचिन्मदीयमुष्णीषमुपाहरन्। अपरे मां ताडयितुं मुष्टिभिः प्रहर्तुं च प्रावर्तन्त। अहं मोहमापद्य कस्यचिन्मन्दिरस्य शलाकावरणघटनामवष्टभ्य विश्रमितुमतिष्ठम्। परमिदं न शक्यमासीत्। ते किल मां ताडन्ताडमभ्यवास्कन्दन्। नगररक्षापर्यवेक्षकस्यालेकझांडरमहाशयस्य सहधर्मचारिणी (मम परिचिता) तत्रैव गच्छति स्म। सा वीरवनिता तदानीमनातपेऽपि

निजातपत्रमुद्घाट्य मम च जनस्यान्तरा परापतत् । तामेनामहिंसित्वा मां प्रहर्तुमेषां दुश्शकतया मदुपरि जनकूटस्य रोषप्रतीकाराय प्रतिप्रबन्धकमजनि ॥

अत्रान्तरे दृष्टव्यतिकरः कश्चिद्भारतीययुवकः पुररक्षिस्थानं प्रधावितोऽभूत् । अलेक्झांडरमहाशयो रक्षादलमेकं मां परिवार्य गन्तव्यस्थलं प्रापयितुं मत्सकाशं प्राहिणोत् । तद्दलं काले समागच्छत् । पुररक्षिस्थानमस्मन्मार्ग एवासीत् । तत्र प्राप्तं मां रक्षिपर्यवेक्षी प्राह — भवद्भिरस्मिन्नेव स्थाने रक्षिभिः परिरक्ष्यमाणैः स्थातव्यमिति । तेन दित्सितं साहाय्यं कृतज्ञतापुरःसरमङ्गीकृत्याहमवोचम् विज्ञातनिजदोषास्ते स्वयमेव विरमन्तीति न सन्देहः । अहं तेषां न्यायपक्षपातित्वे दृढप्रत्ययोऽस्मीति । रक्षिजनपरिवृतोऽहं क्लेशान्तरमनवाप्य रुस्तमजीमहाशयस्य मन्दिरमासादयम् । सर्वाङ्गनिर्लेखितस्यापि मम क्षतमेकमेवासीत् । तत्प्रदेशवर्ती नौकाभिषक्प्रवरो डा. दादी-बरजोरमहाशयः स्वशक्त्यनुरूपं मम साहाय्यमकरोत् ॥

मन्दिरान्तः सत्यामपि शान्तौ तस्य बाह्ये गौराङ्गा गृहं परिवृत्यातिष्ठन् । रात्रिः प्रत्यासीदति स्म । क्षोभको जनः “वयं गान्धिमिच्छामः” इति चाक्रुश्यमानः स्थितः । सूक्ष्मदृष्ट्या पर्यवेक्षकोऽधिकारी क्षोभकजनस्तोममुत्साहवचनैर्न पुनर्भीषणोक्तिभिः स्ववशे स्थापयितुमयतत । तथापि तस्य चिन्ता न साकल्येन निवृत्तिमयासीत् । अतोऽयं मामवोचत् — यदि भवन्तो मित्रगृहं मित्रस्वं निजकुटुम्बकं च रक्षितुकामास्तर्हि मदुक्तरीत्या वेषमास्थाय गृहादस्मादपवार्य निर्गन्तुमर्हन्तीति ॥

इत्थहमेकस्मिन्नेव दिने विरुद्धप्रवृत्तिमशिश्रियम् । संशयिते प्राणापाये लॉटनमहाशयो मामशेषलोकप्रत्यक्षमेव मया निर्गन्तव्यमित्यवोचत् । मया तत्प्रतिपन्नम् । तदनु प्रत्यक्षस्थितेऽपाये सुहृदन्यस्तद्विरुद्धमबोधयत् । तथापि मया प्रतिपन्नम् । केन वा तद्वक्तुं शक्यते यदहं प्राणसंशयेऽस्थितः तथान्वतिष्ठमुताहो मित्रस्य जीवितस्वं वा मदीयदारापत्यजीवितं वापायाद्रक्षितुकामस्तथा समाचारमिति । यदाहं तुमुलजनकूटात्संत्रस्य धैर्येण प्राक्रमिषं यदा च वेषान्तरमास्थाय स्वात्मापहारमकार्षं तयोर्द्वयोरवसरयोर्मामकीना प्रवृत्तिः सुसमञ्जसेति निश्चयेन वक्तुं को वा प्रभवेत् ॥

अतीतव्यतिकराणां युक्तायुक्ततानिर्णयोद्यमस्तावदकिंचित्करः । परन्तु वृत्तार्थानुभवेन जागर्तिमधिगम्य सति संभवे भाविनीप्रवृत्तिरनुरूपं यदि नियम्येत तदा हि प्रयोजनमवाप्येत । अमुकस्यामुकसन्दर्भेषु प्रवृत्तिरित्थंभवित्रीति निश्चयेन वक्तुं दुष्करम् । किं च पुरुषस्य बाह्यप्रवृत्त्या तदीययोग्यतावधारणं नाम परं संदिग्धाभ्यूहमूलं भवतीत्युपलक्ष्यते । यतः सोऽभ्यूहः पर्याप्तप्रमाणानुगतो न भवति ॥

यथा वा तदास्ताम् । आत्मानमपवाहयितुं संनह्यमानेन स्वक्षतानि विस्मृतान्यभवन् । नगररक्षापर्यवेक्षकस्य बोधनामनुस्मृत्य भारतीयरक्षापुरुषसदृशं कञ्चुकाद्याकल्पमामुच्य शरावमेकं

मद्रपूरीवस्त्रेण संवेष्ट्य शीर्षकप्रतिरूपकमात्मनः शिरसि न्यदधि। द्वौ प्रणिधी मामन्वगच्छताम्। तयोरेको भारतीयवदात्मानं दर्शयितुं वर्णेनोपलिप्तमुखो भारतीयवणिग्वेषमधारयत्। द्वितीयस्य वेषो मया विस्मृतः। वयं केचित्संधिद्वारा पार्श्वस्थितमापणं प्रविश्य तत्र भाण्डागारे संभृतस्थितानां प्रसेवानां मध्ये प्रक्रम्य निषद्याद्वारेण बहिरागतास्तुमुलजनमध्यान्निर्गत्य वीथ्यन्ते मत्प्रतीक्षयेवस्थितां शकटीमासादयाम। तदनु तत्रोपविश्य पुरा मद्रक्षणार्थं 'अलेक्झांडर'महाशयो यस्मिन्रक्षिवर्गाश्रयस्थाने मम प्रच्छन्नस्थितिमुपादिशत्तत्स्थानमगाम। तत्राहं 'अलेक्झांडर'महाशयं गूढचारौ च कृतोपकारानवंदिषि॥

इत्थमात्मानमपवाह्य प्रक्रामति मयि तुमुलजनसंघस्य पुरस्ताद् 'अलेक्झांडर'महाशयस्तिष्ठन् 'गान्धिरुद्बध्यतामांम्लवेतसभूमीरुहे द्रुतं' इति गानेन जनान् विनोदयनस्थापयत्। अथ मां सुरक्षितं प्राप्तरक्षिस्थानमुपलभ्य क्षोभकानवोचत्—'–युष्माभिर्दण्डनीयतया समुद्दिष्टः पुरुषः पार्श्वगतनिषद्याद्वारेणात्मानमपवाह्य निर्गतो भवति। यूयमिदानीं गृहाणि गच्छत' इति॥

तेषां केचिदकुप्यन्। केचिदहसन्। परे केचिद् एनं वृत्तान्तं न हि व्यश्वसन्॥

तदा पर्यवेक्षकस्तानवोचत् बाढं तर्हि। यदि मे वचो युष्माकमश्रद्धेयं स्यात् तदा युष्मन्मध्याद् द्वौ जनौ निश्चिनुत। तानहं गृहाभ्यन्तरे नेतुं सज्जस्थितोऽस्मि। ताभ्यां गान्धिर्लभ्यते चेन्नूनमहं संतोषतस्तं युष्मदीयहस्ते प्रदास्यामि। अथ निष्फले तदन्वेषणे युष्माभिरितो निर्गन्तव्यं जाने खल्वहं यद् रुस्तमजीमहाशयस्य गृहं नाशयितुं वा गांधेर्दारापत्यानि विप्रकर्तुं वा नैव समुद्यता यूयमिति॥

अथ क्षोभका गृहान्तरान्वेषणाय निजकूटात् प्रतिनिधी प्रैषयन्। तौ शीघ्रमेव प्रत्यागच्छताम्। श्रुतवृत्तान्तास्तत्र मिलिता जना भग्नाशा बभूवुः। तेषां भूयिष्ठाः प्रकृतसंभवे नगररक्षाधिकृतेन प्रदर्शितं चातुर्यं श्लाघमानाः केचिद्रोषेण क्रुध्यमानाश्च सर्वे प्रचेलुः॥

तदानीं ब्रिटिशस्वास्थ्यानां यो मन्त्री श्रीमान् चेम्बरलेनमहोदयः मद्धिंसका व्यवहारेणाभियोक्तव्या इति नातालराज्याधिकारं तन्त्रीद्वारा समादिशत्। एस्कम्ब्रमहाशयो मामाकार्य मयानुभूतहिंसायाः कृते स्वविषादं व्यक्तीकृत्य मामवोचत्॥

नातिमात्रमुपद्रुतं भवदीयशरीरमित्येतन्न मेऽभिनन्दनीयम्। लॅाटनमहाशयस्य सूचनामङ्गीकृत्य तदनुबन्धिनीं कष्टपरम्परामनुभवितुमधिकारो भवतामासीदेव तथापि मदीयसूचना यदि स्वीकृताभविष्यत् तदा नैता विषादकर्यो घटनाः समवर्त्स्यन्निति निश्चितं ब्रवीमि। यदि हिंसका भवद्भिः प्रत्यभिज्ञायेरन् तदा तानासाद्य व्यवहारेणाभियोजयितुं सज्जोऽस्मि। चेम्बरलेनमहाशयो मामेवं कर्तुमिच्छतीति॥

अहं तावदित्थं प्रत्यावोचम्–कमपि व्यवहारेणाभियोक्तुं नाहं रोचये। हिंसकानां मध्यादेकं वा द्वौ वा प्रत्यभिज्ञातुं शक्येत। परंतु तद्दण्डने किं वा प्रयोजनं भविता। अपि च मम

हिंसकान्नाहं अपराधिनो मन्ये । अहं हिंसास्थाने नातालदेशवर्तिनां गौराङ्गानां दोषं दशगुणीकृत्य व्याख्याय तानदूषयमिति तैरश्रावि । प्रतीततद्वृत्तान्तानां मे तादृग्बोधोदयो नाम नह्याश्चर्यविषयः । अत्र हि प्रमुखा अपराध्यन्ति । अथवा भवन्त एवेत्यहमनुज्ञातो ब्रूयाम् । भवन्तः किल जनानां सन्मार्गप्रदर्शने प्राभवन् । तथापि भवन्तो 'रॉइटर'वृत्तान्तं यथार्थं विश्वस्याहमतिशयोक्तिमालम्ब्य भाषणमकार्षमिति निर्विमर्शेन प्रत्यैत । नाहं कमपि दण्डे पातयितुमिच्छामि । अवगतभूतार्थास्ते निजाचरितमनुशोचिष्यन्तीत्यहं जाने ॥

अथ मामेस्कम्बमहाशयः प्राह —'इदं भवन्तः पत्रमारोप्य प्रदातुमर्हन्ति । मया हि चेम्बरलेनमहोदयं प्रति भवद्वाक्यं तन्त्रीद्वारा प्रेषणीयं भवति । भवद्भिस्त्वरया नाहं कमपि वाङ्मयं दीयमानमिच्छामि । यदि वो रोचते तर्हि लॅाटनमहाशयेन भवदीयैरन्यैः सुहृद्भिश्च संमन्त्र्य कर्तव्यता निश्चीयताम् । परन्तु हिंसकाभियोगस्वातन्त्र्यं यदि भवद्भिः परित्यज्यते तदा शान्तिप्रतिष्ठापनाय तदेतन्मम बहूपकरिष्यति भवदीयं यशश्च प्रसृमरं जायत इति मयावश्यमभ्युपेतव्यमिति ॥

तदनु मयाभ्यधायि —"अहं श्रीमत्सुकृतज्ञोऽस्ति । न हि मे केनापि मन्त्रणीयमस्ति । भवत्संनिधिं प्रत्यागमनात्पूर्वमेव तदेतन्मया निश्चित्य गृहीतम् । हिंसका नाभियोक्तव्या इति मे दृढः प्रत्ययः । मदीयनिश्चयमेतत्क्षणमेव पत्रमारोप्य समर्पयितुं सज्जस्थितोऽस्मीति । इत्यभिधाय तदपेक्षितं वाङ्मयं लिखित्वा प्रादाम् ॥

चतुर्थोऽध्यायः

चण्डमारुतविरामोत्तरकालीना शान्तिः

तदनु दिनद्वयानन्तरं (तदा पुररक्षिस्थानमद्यापि मया न परित्यक्तमासीत्) एस्कम्बमहाशयं द्रष्टुमहमनायिषि । तदानीं यद्यपि जागर्तिरनावश्यकी तथापि मदात्मरक्षणाय द्वौ राजपुरुषौ प्राहीयेताम् ॥

नौकावतरणदिवसे पीतपताकासमवरोपणोत्तरं 'नाताल एडवरटाइझर' इत्याख्य—वृत्तपत्रिकाप्रतिनिधिर्मया सह कथालापं कर्तुमागमत् । सुबहून्प्रश्नान्मामपृच्छत् । तेषामहमुत्तरं ददानः स्वस्थोपरिकृतानि दोषारोपणानि सर्वाण्यपि खण्डयितुमशकम् । सर-फिरोजशा-महेता-महाशयेन बोधितोऽहं भाषणात्पूर्वं मदीयभाषणानि लिखितस्थापितान्यकरवम् । मत्समीपे तेषामितरलेखनानां च प्रतिरूपकाण्यवर्तन्त । तानीमानि प्रतिनिधये प्रदाय दक्षिणाफ्रिकाखण्डे मया प्रबलतरोक्तिभिर-

प्रतिपादितोऽर्थः कोऽपि मया भारतवर्षे नोपन्यस्त इति प्राददर्शम्। अपि च कुरलेण्डनादरीति नौकाद्वयादवतीर्णानामध्वनीनानां दक्षिणाफ्रिकाखण्डं प्रत्यानयनेनाहं सहकार्यभूवमिति स्पष्टीकृतवान्। बहवस्तेषां पूर्वमेव दक्षिणाफ्रिकाभूमौ वद्धस्थितयोऽभवन्। भूयिष्ठो जनस्तत्र नातालदेशे निवासग्रहणमनिच्छुः ट्रॅन्सवाल'देशं गन्तुमुद्यतोऽभवत्। तत्कालमर्थोपार्जनाय प्रवृत्तानामाशापूर्तये ट्रान्सवालदेशे हि भूयानवकाश आसीन्न पुनर्नातालविषये। अत एव भारतीयेषु बहवस्तत्रैव गमनमरोचयन्त ॥

एतत्संवादप्रकाशनान्मार्द्दिंसकानामुपरि व्यवहाराभियोगनिराकरणाच्च महानगाधः परिणामः समजनि। तथा हि डरबन्नगरवर्तिनो गौराङ्गाः स्वीयप्रवृत्तिमनुचिन्त्य नितरामजिह्युः। वृत्तपत्राणि मम निर्दोषित्वं प्रतिपाद्य क्षोभकजनानखण्डयन्। एवं मद्धिंसनं मम — ममेति मत्साधनीयोद्देशस्य यशस्करं पर्यत्रास्यत्। एतेन दक्षिणाफ्रिकावर्तिनां भारतीयानां गौरवमुच्छ्रायमापत्। मदीयकार्यं च सुकरं संवृत्तम् ॥

त्रिचतुरैरहोभिरहं स्वगृहमागाम्। पूर्ववत्प्रतिष्ठां साधयितुं चिरकालो नापैक्ष्यत। पूर्वोक्तघटनया मदीयन्यायवादिकृत्यमुर्जितत्वमाप ॥

नूनमेतेनास्मदीयजनगौरवमुन्नतिं प्रापत्। परमुन्नतिप्राप्तिरेषा द्विषां दुराग्रहज्वलने सर्पिषक्षेप इवाचरत्। भारतीया वीरयुद्धक्षमा इति यदा सुव्यक्तमभूत्तदा गौराङ्गास्तान्निजपथे कंटकायमानानमन्यन्त। नातालदेशस्य न्यायविधायकसभायां शासनद्वयमुपस्थापितम्। तत्रैकं भारतीयवणिजां प्रतिकूलम्। द्वितीयं च तद्देशे स्थितिग्रहणार्थमाजिगिमिषूणां भारतीयानामागमननिरोधोद्देश्यकम्। भाग्यवशात्सदस्यन्वाधिकारमुद्दिश्य प्रवृत्तपूर्वमायोधनं भारतीयानामनुकूलनिर्णये पर्यवास्यत। तथाहि तत्रैवं निरणायि। यद् भारतीयानां भारतीयत्वमात्रेण किमपि शासनं तद्विरुद्धं न प्रचारयितव्यम्। शासनदृष्ट्या वर्णभेदो वा जातिभेदो वा नहि विद्यत इति। पूर्वोक्तशासनद्वयी यद्यप्यक्षरशः सर्वसमानान्वयिनी तथाप्युद्देशतो निःसंदिग्धमेव नातालदेशवर्तिनां भारतीयनिवासिनामधिकबन्धसमारोपणायैव निरमीयत ॥

एतच्छासनोदयान्न केवलं मम सार्वजनिककार्यमधिकीभूतमपि तु लोकाः स्वकर्तव्यं प्रति नितरामजागरुः। शासनं भारतवर्षस्य भाषाभिरनूद्य तद्गतः सूक्ष्मोऽर्थो यथा लोकबुद्धिगोचरः स्यात्तथा व्याख्यायि। अस्मिन्विषये स्वास्थ्यमन्त्री च विरुष्टः। परन्तु स्वप्रवेशमप्रतिपद्यमाने तस्मिन् शासनद्वयं प्रचारमागमत् ॥

इदानीं सार्वजनिककार्यं मदीयकालस्य भूयिष्ठांशं ग्रसते स्म। पूर्वोक्तरीत्या मनसुखलालनाजरमहाशयो डरबन्नगरे वासार्थं मत्समीपमागतः। तेन च स्वकालं सार्वजनिककार्येषु विनियुञ्जानेन मदीयभारो बहुशो लघूकृतः ॥

मदसन्निधौ शेठ-आदमजी-मियांखान-महाशयः स्वकार्यमतीव श्लाघ्यतया निरवर्तयत् । तेन हि सदस्यानां संख्यां बहुलीकृत्य नातालराष्ट्रमहासभायाः कोशे सहस्रसुवर्णमुद्रामितं स्वापतेयं समग्राहि ॥

शासनप्रचारनिमित्तया जागर्त्या पथिकविरोधिना यत्नकलापेन च लब्धावकाशः सदस्यसंख्यावृद्धये द्रव्यसंग्रहाय जनान् प्रार्थयिषि । ततो राष्ट्रमहासभाकोशे सुवर्णमुद्राणां पंचसाहस्री संग्रहीताभवत् । शाश्वतिकं भाण्डबलं संपाद्य तेन राष्ट्रमहासभायाः कृते स्थिरस्वं क्रीत्वा तन्मूलकेनादायेन सभाकार्यं निवर्तितव्यमित्यासीन्ममाभिलाषः । सार्वजनिकसंस्थायाः कार्यनिर्वाहे ममायमेव प्राथमिकोऽनुभवः । मदीयमहोद्यमिनः सूचनामिमां बोधिताः सादरमङ्गीचक्रुः । अथ क्रीतं स्थिरस्वं मान्येभ्यो भाटकाय प्रादायि । तस्मादुत्पद्यमानं भाटकद्रव्यं राष्ट्रसभायाः साधारणव्ययार्थे पर्याप्तमासीत् । स्थिरस्वं विश्वासगौरवपात्राणां केषांचिद्धर्मदर्शिनां वशेऽन्यस्यत । अद्यापि तत्तत्रैव वर्तते । परन्तु सांप्रतमदः प्रभूतस्यान्तः कलहस्य हेतुभूतं तिष्ठति । अत एव तत्स्थिरस्वादायो न्यायसभायामिदानीमुपचीयमानो वर्तते ॥

एषा विषादकरी दशा दक्षिणाफ्रिकादेशपरित्यागोत्तरं यद्यपि समभवत् तथापि शाश्वतिकभाण्डबलमधिकृत्य मदभिप्रायस्तत्कलहोदयादपि पूर्वमेव संजातपरिवृत्तिरासीत् । सांप्रतं हि निर्व्यूढानेकसार्वजनिकसंस्थाकार्येण संप्राप्तपरमानुभवेन मया सम्यगवबद्धं यत्तादृशकोशबलमाश्रित्य सार्वजनिकसंस्थाकार्यनिर्वाहो नाम सर्वथा न प्रशस्य इति । संस्थायाः शाश्वतधने तन्नीतिपतनस्य बीजं वरीवर्ति । सार्वजनिकसंस्था नाम सार्वजनिकसंमत्या सार्वजनिकसाहाय्येन च प्रवर्तमाना संस्था । सा यदि सार्वजनिकसाहाय्यं हापयेत्तदा स्वीयमधिकारमेव हारयिष्यति । शाश्वतिकधनसाहाय्येन प्रचलन्त्यः संस्थाः सार्वजनिकं मतमनेकशस्तीरस्कुर्वन्तीति नः प्रत्यक्षमेव । तन्मतविरुद्धान्येव कार्याणि ता असकृत्समाचरन्ति । तदेतदस्माकीनदेशे प्रतिपदमस्मदनुभूतिपदमायाति । धर्मार्थं प्रतिष्ठापिता इति ख्याप्यमानाः कतिपयसंस्था आयव्ययगणनामेव न स्थापयन्ति । धर्मदर्शिन एव स्वस्य स्वामिनः संवृत्ताः । तेऽमी न कस्याप्यनुयोज्या भवन्ति । सार्वजनिकसंस्थानां प्रकृतेरिवाहन्यहनि कालक्षेपः प्रशस्यतम इति बाढं सन्दिहे ॥

जनसामान्यादुपष्टम्भमप्राप्ता या संस्था सा किल संस्थात्वेन वर्तितुं नाधिक्रियते । तस्याः प्रामाणिकतायाः प्रीतिपात्रतायाश्च तदीयवार्षिकद्रव्यसंग्रह एव निकषायते । सर्वाभिरिमां परीक्षामुत्तीर्णाभिर्भवितव्यमिति ममाशयः ॥

किन्तु मा कोऽपि मदीयवाक्यमन्यथा विदांकरोतु । एतद्वाक्यं स्वभावतः स्वीयमन्दिराणि विना याः संस्था प्रचलितुं न शक्नुवन्ति ता न परामृशन्ति । इदं हि मया विवक्षितं यत्तदीयः साधारणो व्ययः प्रतिवत्सरं संगृह्यमाणेन द्रव्येणैव निर्वाह्य इति ॥

Funding by IKS-MoE

एषामभिप्रायाणां तात्त्विकत्वं दक्षिणाफ्रिकासत्याग्रहावसरे समर्थितमभूत् । षड्वर्षाणि प्रवृत्तं तन्महायोधनं लक्षान्तररूप्यकव्ययसाध्यमपि शाश्वतधनं विनैव प्राचलत् । अलभ्ये द्रव्यसंग्रहे परेद्युः किं करणीयमिति प्रतिपत्तिमूढतामुत्पादितवन्तः तत्तादृशाः सन्दर्भाः स्मृतिमिदानीमुपयान्ति' । किन्तु भाविन्यो घटना नेदानीमुपवर्ण्यन्ते । उक्ताभिप्रायसमर्थनं वक्ष्यमाणकथायां पाठका एव ज्ञास्यन्ति ॥

पञ्चमोऽध्यायः

बालकविद्याभ्यासः

सप्तनवत्युत्तराष्टशताधिकैकसहस्रतमे क्रिस्ताब्दे प्रथममासे डरबन्नगर्यामवतीर्णेन मया सह मम कनिष्ठभगिन्या दशवर्षदेशीयः कुमार एको नवपञ्चवर्षदेश्यौ मदीयौ कुमारौ चावर्तन्त । एते कुत्र पाठयितव्याः ॥

ऐरोप्यबालकानां पाठशालां प्रति तान्प्रेषयितुं शक्यमासीत् । परन्त्वेतन्मदर्थमेव केवलं कृतः कश्चिदुपकार इव गण्यते स्म । तत्र हि भारतीयबालका न प्रावेश्यन्त । तेषामर्थे क्रैस्तमतप्रचारकाणां शालाः स्थिताः । किन्तु मदीयबालकांस्तत्र प्रवेशयितुं नाहं सज्जोऽभवम् । तत्र प्रवर्तमानं विद्याभ्यासक्रमं नाहमरोचयम् । तत्र हि केवलमांग्लभाषया वा कदाचिदशुद्धहिन्दीतामिलभाषाभ्यां वा पाठमध्यापयन् । अत्र प्रवेशोऽपि प्रयासमन्तरा न सुलभः । सर्वस्यास्य क्लेशस्य सहनं ममाशक्यमासीत् । अत्रान्तरे स्वयमेव तानध्यापयितुमयतिषि । नूनमिदं यद्यपि प्रशस्यं तथापि नियमेन नाचलत् । मयाभिमतः कोऽपि गुजरातीशिक्षको नालभ्यत ॥

अहं दिङ्मोहमुपगतः । मयानुमोदितक्रमेण बालकानध्यापयितुमेक आंग्लोपाध्यायोऽपेक्ष्यत इति प्रकटतामकार्षम् । बालकान्क्रमानुसारेण स एवोपाध्यायः पाठानध्यापयतु । शेषे मयैव यथावसरं प्रतिपाद्यमानमल्पशिक्षणं तेषामलमिति निरचैषम् । अथाहमेकामांग्लमहिलां सप्तसुवर्णमुद्रामितेन मासिकवेतनेन न्ययोजयम् । इत्थमयं रथः कियद्दूरमचलत् । परन्तु नाहमेतेन परितुष्टः । बालकैः सह कथालापः केवलं गुजरातीभाषया प्राचलत् । एतेन यत्किंचिद्गुजरातीभाषाज्ञानं तैः समपादि । नाहमेतान् हिन्दुस्थानं प्रेषयितुमैच्छम् । यतो बालकुमाराणां मातापितृभ्यां पृथङ्निवासो न युक्त इति तदानीमपि ममाभिप्राय आसीत् । सुव्यवस्थितसंसारे बालकानां स्वभावतो लभ्यं यच्छिक्षणं तत्तेषां छात्रालयेषु दुर्लभं भवति । तस्मादहमेतान् सहैव मया स्थापितवान् । मम कनिष्ठभगिन्याः कुमारो मदीयज्येष्ठपुत्रश्च कतिपयमासान्यावत्

Funding by IKS-MoE

हिन्दुदेशवर्तिनस्तत्तत् छात्रालयान्प्रति प्रेषिताविति यद्यपि सत्यं तथाप्यचिरेणैव तौ पुनरानायिषाताम् । तदनु मम ज्येष्ठकुमारः प्रबुद्धवयः प्राप्तेर्बहोः कालादनन्तरं दक्षिणाफ्रिकादेशं विहाय स्वयमहं ‘अमदाबाद’ नगर्यामुच्चविद्यालये प्रवेशमिच्छुर्हिन्दुस्थानमगमत् । मत्स्वश्रियो मत्सकाशादधिगतशिक्षणेनैव विश्रान्तविद्याभ्यासोऽभवतिति स्मृतिमायाति । दुर्दैववशात्कियन्तं कालमुपतप्तः पूर्णयौवने मृत्युवशमगात्। त्रयोऽपि मे पुत्राः सार्वजनिकशालां न कदाप्यगमन्। आफ्रिकाखण्डे सत्याग्रहिणां बालकानां कृते मया प्रतिष्ठापितासु शालासु ते क्वचिन्नियमेन शिक्षणमलभन्त ॥

मम प्रयत्नाः सर्वेप्यपूर्णा एव स्थिताः। बालकानामध्यापनाय यथेप्सितोऽवकाशो मया न लभ्यते स्म। अस्मात्कारणादितरप्रतिकूलसंयोगाच्च स्वमनोरथानुरूपमक्षरज्ञानं तेषामुत्पादयितुमशक्यमभूत् । अस्मिन्विषये मम पुत्राः क्वचिद्दोषान्मय्यापादयन्ति। यतस्ते ‘बी. ए. परीक्षां वा ‘एम्. ए.’ परीक्षां वा तदापाये ‘मेट्रिक्युलेशन’ परीक्षां वा समुत्तीर्णानां कदाचित्कथाप्रसङ्गे पाठशालायामात्मनोऽनध्ययनमनुध्यायन्तस्तन्निमित्तं किमपि वैकल्यमिव प्राप्तमात्मानमाकलयन्ति ॥

यद्यप्येवं ते मन्येरंस्तथापि स्वीयो ममाभिप्रायोऽन्यः । तथा हि। यद्येते सार्वजनिकशालासु कथमप्यध्येतुं निरभन्त्स्यन्त । तदा ते स्वानुभवाद्वा मातापित्रोः सहवासमात्राद्वा प्राप्यं यच्छिक्षणं तच्छिक्षणं नैवालप्स्यन्त। तेषां कृते यथाहमिदानीं निश्चिन्तोऽस्मि तथा वर्तितुं मे नैव शक्यमभविष्यत्। एते मत्तः पृथग्भूयेंग्लंडदेशे वा दक्षिणाफ्रिकादेशे वावस्थाय तत्र प्रतिपाद्यमानं कृतकशिक्षणं यद्यलप्स्यन्त तदाधुना स्वजीवने परिदृश्यमानां सरलतां सेवाप्रवणवृत्तिं च तेन शिक्षणेन नैवाध्यगमिष्यन्। अपि च तदीयं कृतकजीवनं मम सार्वजनिककार्याणां प्रतिबन्धमाचरिष्यत्। तस्मान्मदिष्टानुरूपं वा तदिष्टानुरूपं वा तेषां विद्याभ्यासं कारयितुमशक्यमभूत्। तथापि व्यतिक्रान्तव्यतिकराः स्मर्यन्ते यदि तेषामभ्युदयाय स्वकर्तव्यमहं नान्वतिष्ठमिति वक्तुं न शक्नुयाम्। सार्वजनिकशालां ते न प्रवेशिता इति नाहमनुतप्ये। किं च मदीयज्येष्ठकुमारे परिदृश्यमानमनिष्टलक्षणजातं परामृशतो ममैवं सदा प्रतिभाति यदेतत्सर्वमपि तात्कालिकस्य ममैवाशिक्षितस्यापक्वजीवनस्य प्रतिबिम्बमिति। सोऽयं मे जीवितकालो ममार्धप्रबोधकालो भोगलालसकालश्चेति तर्कयामि। तत्कालमस्य बालवयसः स्वभावे तत्कालीना मदीयस्थिती रूढमूलाभवत्। स कालो मदीयमूढत्वव्यामोहशीलत्वकाल इत्यसौ स्वभावादेव नाङ्गीकरोति। स एषः कालो मदीयजीवनान्तराले नितान्तशोभनः कालस्तदुत्तरकालीना परिवृत्तिस्तु न हि ज्ञानोदयः परं भ्रान्तिरेवेति तस्य प्रत्ययः। तदेतन्न किंचिदाश्चर्यम्। अत्र मम मित्राण्यनेकशः प्रश्नानकार्षुः । यथा स ते पूर्ववयसः काल एव ज्ञानोदयकालस्तदुत्तरकालीनपरिवर्तनदिनानि तवाज्ञानाहंकारदिनानीति कस्मात्तैर्न मन्तव्यम् । तव कुमारेषु विद्यामध्यापितेषु

का वा क्षतिरभविष्यत् । तदीयपक्षपुङ्खच्छेदने को वा तवाधिकारः । महापदवीमारुरुक्षूणां स्वजीवितं निविवाहयिषूणाममीषामन्तरायः कुतस्त्वया कृत इत्यादि ॥

तानीमानि वचनानि नितान्तफल्गूनीत्यहं मन्ये । अहं हि बहुभिर्विद्यार्थिभिः कृतसम्बन्धोऽस्मि । इतरबालकानां विद्याभ्यासेऽपि मदीया उन्मत्ताभिप्राया यथा प्रविशेयुस्तथा स्वयमेवान्यमुखेन वा संविधाय तत्परिणामोऽपि मया परीक्षितः । मत्पुत्राणां सवयसो युवकानहं बहूञ्जानामि । तेऽमी मत्कुमारापेक्षया मानुष्यके प्रशस्यतरा इति वा तेभ्यः शिक्षितव्यं यत्किंचिदस्तीति वा न मे प्रतिभाति ॥

किन्तु ममैषां प्रयत्नानामन्तिमः परिणामो भविष्यत्यर्थे निगूढस्तिष्ठति । अस्य विषयस्य जिज्ञासाया इदं हि ममोद्देश्यं यन्मानवीयनागरिकताचरित्रमधिजिगांसुभिः प्रशस्तगृहशिक्षण-पाठशालाशिक्षणयोर्वैलक्षण्यं मातापित्रोर्जीवनक्रमगतव्यत्यासैस्तदपत्येषु जनिष्यमाणः परिणामश्च सम्यग्विमृश्यतामिति । इदं हि चास्य प्रकरणस्योद्देश्यं यत्सत्यशोधकः स्वशोधनैः कियद्दूरमाकृष्यते । किं च स्वातन्त्र्यदेवताया उपासकेन तस्याः कठिनहृदयाया देव्याः कृते कियन्तो भोगाः परिव्यक्तव्या इति सम्यक् प्रदर्शनीयमिति । यद्यहमात्मगौरवं निगीर्य बालकान्तराणां दुर्लभं विद्याभ्यासं मदीयकुमारा न कारयिष्यं तदा नूनमेतेषामक्षरव्युत्पत्तिरभविष्यत् । परन्तु तैरधुना शिक्षितः स्वातन्त्र्यस्वाभिमानपाठः सर्वथा तद्बुद्धिगोचरो नाभविष्यत् । यदि स्वातन्त्र्याक्षरज्ञानयोरेकतरं वरणीयं तदाक्षरज्ञानापेक्षया स्वातंत्र्यमेव सहस्रगुणमधिकं वस्त्विति को वा न ब्रूयात् ॥

विंशत्युत्तरनवशताधिकैकसहस्रतमे क्रिस्ताब्दे नवयुवकानुद्दिश्य मया बोधनाकारि यथा—
“दासताया मातृगृहायमाणाः पाठशालामहाविद्यालयांश्च परित्यज्यागच्छत । दास्यशृङ्खलाभिः बद्धैर्वरं मार्गे प्रस्तरभेदनं न 'पुनरक्षरज्ञानलाभ इति । तद्बोधनायाः मूलमिदानीं प्रायशस्तेषां सुवेद्यं भवति ॥

षष्ठोऽध्यायः

सेवावृत्तिः

मदीय उद्योगः सम्यक् प्रचलति स्म । तथाप्यात्मा नैव पर्यतुष्यत् । मदीयजीवनेन भूयोऽपि सरलतरेण भाव्यम् । मदभितो वर्तिनां जनानां कापि सेवा करणीयेत्ययं भावः सर्वदा मन्मनसि समुदेति स्म । एवं स्थिते कदाचिदेकः कुष्ठरोगी मदीयगृहद्वारमागमत् । तमेनं भोजनमात्रेणोपचर्य विसर्जयितुं नाहमतृप्यम् । तदेक-

स्मिन्कोष्ठे तमावास्य तस्य क्षतानामौषधिमर्पयित्वा तं शुश्रुषितुमुपाक्रंसि । परन्तु बहूनि दिनान्येवंरीत्या निर्वाहयितुमशक्यमासीत् । कमपि नियममन्तरेण तं मदीयगृहे स्थापयितुं ममाप्युचितमानुकूल्यं नासीत् । न चैवं कर्तुं धैर्यमाकलयम् । तस्मादमुं कर्मकराणामर्थे स्थापितां राजकीयवैद्यशालां नीत्वा तत्र व्यसर्जयम् । तथापि न मे मनःशान्तिरभूत् । ईदृशीमातुरशुश्रूषामहं सर्वथा कर्तुमरोचयम् । डा० बूथमहाशयः ‘सेन्ट अॅडम्स मिशन’ संस्थायाः प्रमुख आसीत् । स च दयालुः । स्वपार्श्वमुपगताय रुग्णवर्गाय धर्मार्थमौषधं प्रयच्छति स्म । तदधीना लघ्वी धर्मवैद्यशाला पारसी-रुस्तमजीमहाशयस्य वादान्यकेन प्रतिष्ठापिता भवत् । तत्र शुश्रूषाकृत्यं विधातुं मम प्रबलेच्छा समजनि । तत्रौषधानां संविभजनं प्रत्यहमेकद्विहोराकालमपैक्षत । अतोऽहमेवं निश्चेषि यदस्यां वैद्यशालायामौषधागारे तदेतत्कार्यं मयानुष्ठातव्यं तदर्थमवकाशश्च मदुद्योगाद्विच्छिद्य संपादनीय –इति । मम व्यवहारसमुद्योगे भूयिष्ठः कालः कार्यालये मया समुपविश्य व्यवहारिणां बोधनाभिः करणानां लेखनाभिः पंचायतनप्रसङ्गैश्चातिवाह्यते स्म । मेजिस्ट्रेटन्यायसभायां कतिपये व्यवहारा मदीया अविद्यन्त । किन्तु तेषां बहवः प्रत्यवस्थानशून्या आसन् । मया सह दक्षिणाफ्रिकादेशमागत्य सहावस्थितः खानमहाशयो मत्सन्निधौ व्यवहारचालनभारमवहत् । इत्थं मे लघुवैद्यशालायां कार्यावसरो लब्धः । तत्र तत्कार्यं गतागतकालं मिलित्वा प्रायो होराद्वयमपैक्षत । अनेन कार्येण मम मनाङ्मनःशान्तिरुत्पन्ना । रोगिणां व्याधिं विचारेणावगत्य भिषजे तं निवेद्य तेन दित्सितमौषधं निष्पाद्य रोगिभ्यः प्रदानं मदीयकार्यमासीत् । अनेन मे भारतीयैस्तत्रक्लेशमनुभवद्भिः परिचयो गाढः समजनि । भूयांसस्तेषामान्ध्रा द्राविडा औत्तराहा वासन् ॥

बोअरयुद्धावसरे स्वयंसेवामङ्गीकृतवतो मम पूर्वोक्तोऽयमनुभवस्तत्र लब्धक्षतानां योधानामुपचरणे रोगिणां शुश्रूषणे च बहूपकारकः संवृत्तः । शिशुरक्षणविचारस्तावन्मन्मनसि स्थितः । दक्षिणाफ्रिकादेशे ममान्ये द्वे पुमपत्ये समजायेताम् । तयोः पालनपोषणसंवर्धनकर्मणि मम वैद्यशालानुभवः साहाय्यमकरोत् । मदीया स्वातंत्र्यशीलता मामतीव क्लेशभाजनं व्यधात् । भार्यायाः प्रसवकाले भिषक्प्रवरमेकमत्युत्तमां गर्भग्राहिकां च संनिधापयितुं निरचेष्म । किन्तु काले तयोरसंनिधौ का गतिः । गर्भग्राहिकया च भारतीयमहिलयैव भाव्यम् । किन्तु हिन्दुस्थान एव सुशिक्षितगर्भग्राहिकाजने दुर्लभे सति दक्षिणाफ्रिकादेशस्य स्थितिः सुवितर्क्या भवति । तस्मान्मया सुखप्रसवसंपादका विषयाः पाठेनावगताः । ‘डॉक्टर त्रिभुवनदास’ महाशयप्रणीतं ‘माने शिखांमण’ (मातुर्बुद्धिवादः) इति ग्रन्थमपठिषम् । यथासंभवं स्वानुभवानुरूपपरिवर्तनानि कुर्वाणस्तद्ग्रन्थोपदिष्टनियमानेवानुसृत्य चरमे द्वौ शिशू स्वयं समरक्षयम् । धात्री द्वयोरपि कालयोः कतिपयाहमात्रं मासद्वयमनतीत्य स्थापिताभवत् । एतच्च परं मम भार्या शुश्रूषणार्थमेव न पुनः शिशुरक्षणार्थम् । तत्पोषणं कृत्स्नशो मयैव स्वयमकारि ॥

Funding by IKS-MoE

कनिष्ठकुमारस्य प्रसवकाले ममात्यन्तकठिणा परीक्षा समुपानमत् । प्रसूतिवेदना हि सहसा प्रवृत्ता । वैद्यो गृहे न स्थितः । गर्भग्राहिकानयनप्रसङ्गे न मम कियान् कालो व्यत्ययात् । संनिहितायामपि तस्यां प्रसवकाले तया किमपि साहाय्यं न संभाव्यते स्म । तत्कालोचितमशेषकृत्यं मयैवानुष्ठेयमासीत् । अयमर्थो 'डॉक्टर त्रिभुवनदास' महाशयस्य 'माने शिखामण' इति ग्रन्थात्सम्यक्परिशील्य समग्राहि । तदेतदस्मिन्नवसरे परमोपकारकं संवृत्तम् । तत्कालमहं लेशतोऽपि वैक्लव्यं नाध्यगच्छम् ॥

निजापत्यानां पालनपोषणार्थे मातापितृभ्यामर्भकशुश्रूषाद्यधिकृत्य सामान्यज्ञानमधिगन्तुमावश्यकमिति दृढमहं प्रत्येमि । एतद्विषयकेन तात्त्विकज्ञानेन लभ्यं प्रयोजनं मया पदे पदे प्रत्यक्षीकृतं भवति । तादृशज्ञानविहीनः सन्नहमनुपयोगी यद्यभविष्यं तदा मम कुमारैरिदानीमुपभुज्यमानमारोग्यं ते नाध्यगमिष्यन् । आपञ्चवर्षं शिशुना शिक्षितव्योऽर्थो न कोऽपि विद्यत इति मूढभावना काचिदस्मासु दृश्यते । किन्तु वस्तुतो विचार्यमाणे शिशुराजन्मतः पंचवर्षान्तरे यद्यत्स्वबोधविषयीकुर्यात्तत्तदनन्तरजीवितकाले सर्वथा न शिक्षिष्यते । निजानुभवादहमेवं ब्रवीमि यथा — शिशोः शिक्षणं जननीगर्भगतस्यैव तस्य प्रारभ्यते । गर्भाधानकाले मातापित्रोर्यादृशी शारीरिकी मानसिकी च स्थितिः सैषा शिशौ प्रतिबिंबिता भवति । ततश्च गर्भवासे जनन्याश्रित्तवृत्तिदोहदप्रकृत्याहारविहारानुरूपं संस्कारमधिगत्य शिशुर्जन्म गृह्णाति । जातश्च पित्रोरनुकरोति । अनेकवर्षपर्यन्तमस्य विकासः पितृमूल एव भविष्यति ॥

विज्ञाततात्त्विकार्थौ दंपती केवलं पुत्रकाम्यन्तौ संगच्छेते न पुनर्विषयोपबुभुक्षया । निद्राहारवदैन्द्रियिकं सुखमप्यावश्यकं स्वतन्त्रं च सुखमिति यन्मन्यते तदेतद्घोरमज्ञानमिति मे प्रतिभाति । जगतो हि सत्ता जननक्रियायामायतते । जगच्चेश्वरस्य लीलास्थानं तन्महिम्नः प्रतिविम्बश्च जगतः सुव्यवस्थिताभिवृद्धिरेव जननक्रियाया उद्देश इति ये जना अवबुध्यन्ते ते खलु महद्भिरपि प्रयत्नैः स्वविषयलालसामवरुध्य निजसंततेः शारीरिकमानसिकाध्यात्मिकाभ्युदयार्थमावश्यकं ज्ञानमधिगम्य ततः संपादितेन श्रेयसा मानुष्यकं योजयन्ति ॥

सप्तमोऽध्यायः

ब्रह्मचर्यम् — १

ब्रह्मचर्यव्रतस्य संकल्पकालः कथायामस्यां निरूप्यते । आविवाहादेकपत्नीव्रतं मम हृदये प्रतिष्ठितम् । भार्यां प्रत्यद्रोहो मदीयसत्यव्रतस्याङ्गमासीत् । किन्तु भार्यां प्रत्यपि ब्रह्मचर्यपालनस्य महिमा प्रथमतो मे दक्षिणाफ्रिकादेशे गोचरोऽभवत् । येन संभवेन येन वा पुस्तकेन मानसं मदीयमाकृष्यतेति वक्तुमिदानीं न शक्नुयाम् । तथाप्येतावदहं स्मरामि यदितः पूर्वमेव पाठकानां परिचायितस्य श्रीरायचन्दभाईमहोदयस्य प्रभाव एव मुख्यो हेतुरासीदिति । अहमेकदा ग्लॅडस्टनमहाशये तस्य भार्यायाः प्रेमातिशयं नितरामश्लाघिषि । मयेदं क्वचिदपाठि यत् ‘ इंग्लंड ’ देशे न्यायविधायकसभायां (पार्लमिन्ट) प्रचलन्त्यामपि स्वयमेव सा भर्तुरर्थे ‘टी’पेयं निष्पाद्य प्रयच्छति स्म । नियमानुसारेण जीवनं निर्वहतोरनयोर्दम्पत्योरयमप्येको नियम एव संवृत्त इति । एतदहं दम्पतिप्रेम श्लाघमानः कविप्रवराय (श्रीरायचन्दभाईमहाशयाय) कथितवान् । स मामित्थमवोचत्—अनयोर्भवतः कतरा गरीयसी किमनया पतिबुद्ध्या तस्मिन्निवेशिता प्रीतिः किं वा तत्संबंधमविभाव्य क्रियमाणा प्रीतिपुरःसरी सेवा । सा कदाचित्तस्य कनीयसी भगिनी वा तस्य प्रत्ययिता किंकरी वा भूत्वा तथैव यदि श्रद्धया तमसेविष्यत् । स्निग्धयोर्भगिन्योः सेवकयोर्वा निदर्शनं किं न लभ्यते । कदाचिदीदृशी प्रेमसेवा क्वचित्पुरुषे भवता यदि प्रत्यक्षीकृता स्यात्तदा किं भवानित्त्थमेव समतुष्यत् । मदुक्तमेतद्विमृश्यतामिति ॥

श्रीरायचन्दभाईमहाशयो विवाहित आसीत् । तत्कालमस्य वचनानि निष्ठुराणि यद्यपि प्रत्यभासन्त तथापि तानि पश्चान्मम हृदयं बलवदगृह्यन्तेति स्मरामि । अथाहमचिन्तयम्—ईदृशी भृत्यस्य प्रीतिः पत्न्याः प्रीतिमपेक्ष्य सहस्रगुणाधिकं श्लाघनीया । दम्पत्योरैक्यसंभवात् पत्यौ भार्या स्निह्यतीत्येतन्नैवाश्चर्यम् । परमेतन्नैसर्गिकम् । किन्तु स्वामिभृत्ययोरीदृशः प्रेमबन्धः प्रयत्नविशेषेणैव साध्य इति कवेरुक्तिः क्रमेण मे मनसि मूलमबध्नात् ॥

अहमात्मनात्मानमपृच्छं यथा — एवं तर्हि भार्यया सह मया कीदृशः संबन्धः कलनीय एकपत्नीव्रतं नाम किं भार्या मदीयविषयासक्तेरूपकरणीभाव इति । यावदहं विषयासक्तस्तावद्भार्याविषयिणी मम प्रीतिरकिञ्चित्करी । अत्रेदं वक्तव्यं यन्मे भार्या मम व्यामोहनाय न कदाचित्प्रवृत्तेति । तस्मान्निजकल्पमात्रेण ब्रह्मचर्यव्रताचरणस्य सुकरत्वं सिद्धम् । तत्र हि संकल्पदार्ढ्याभावो विषयासक्तिरूप एव प्रतिबन्ध आसीत् ॥

Funding by IKS-MoE

एवं समुदितसद्विवेकोऽप्यहं द्विः पराजितोऽभवम्। मम प्रयत्नेषु तीव्रसंवेगाभाव एव मत्पराभवहेतुः। बहुसन्तानप्राप्तिपरिहार एव मम मुख्योद्देश आसीत्। सन्ततिनिग्रहमधिकृत्य किञ्चिदपाठि। 'डॉक्टर ॲलिन्सन' महाशयेनात्रविषये कृतः प्रचारः शाकाहाराध्याये पूर्वमेव निरूपितो भवति। यद्यप्येतत् क्षणिकानुमतिं मदीयामलभत तथापि हिल्समहाशयेन कृतं प्रत्यवस्थानं मनोनिग्रह एव संयम एव श्रेयानिति तदीयं मतं च हृदयस्पृगासीत्। प्रायेणायमभिप्रायः स्वानुभवाद्दार्ढ्यमापत्। ततः परं मम संताननिरपेक्षत्वान्मनोनिग्रहाभ्यासं कर्तुमहं प्रवृत्तः। तत्र मामापतितानामन्तरायाणामन्त एव नास्ति। आवामुभावपि पृथक्शयनयोः शयितुमुपाक्रमावः। निर्वृत्तनैत्यकव्यापारेण परिश्रान्तेनैव शयनमाश्रयणीयमिति निश्चैषम् किन्तु प्रयत्ना इमे निष्फला इति मे प्रययात्। तथापि तात्कालिकीमवस्थामनुसंदधानस्तैरेव प्रयत्नैर्ममान्तिमः संकल्पो वार्यवत्तरोऽभूदिति भावये॥

एनमन्तिमं संकल्पं षडुत्तरनवशताधिकैकसहस्रतमाब्दात्पूर्वं न कर्तुमशकम्। तदानीं हि सत्याग्रहो नाद्याप्युदयं प्राप्तः। मम स्वप्नेऽपि तस्या चिन्ता नासीत्। बोअरप्रधनात्परमल्पीयसैव कालेन 'झुलु' जनस्य द्रोहमुत्थितः। तदानीमहं जोहानिसबर्गनगरे न्यायवादि कृत्यमचालयम्। तस्मिन्नवसरे नातालराज्याधिकारस्य स्वयंसेवामर्पयितुमरोचयम्। सा तद्राज्याधिकारेणाङ्गीकृता। वृत्तान्तोऽयमग्रे वर्णयिष्यते। सेवाकार्यमिदं मनोनिग्रहाध्याने माज्जयत्। तदेतन्मदीयपद्धत्यनुसारेण मामकैः सहचरैः सहाचर्यम्। प्रजोत्पादनं तत्फलीभूतशिशुपालनं च सार्वजनिकसेवां चिकीर्षोरन्तरायभूतमित्यबोधि। तस्मिन् जनद्रोहसमुत्पन्नावसरे सेवाविधित्सया जोहानिसबर्गनगरवर्तिनो मदीयमन्दिरस्य द्वारं मया पिधातव्यमापतत्। सेवाङ्गीकारादेकमासाभ्यन्तर एव तत्तादृशेन महता समवधानेन सज्जीकृतं मन्दिरं परित्यक्तव्यमासीत्। दारापत्यादीनि 'फिनिक्स' इति संज्ञे मदीयाश्रमे विसृज्य नातालसैन्यानुगामिभारतीयशुश्रूषादलमादाय प्रस्थातव्यमुपानमत्। एतद्व्यतिकरे कठिनानि प्रयाणानि कुर्वाणस्य मम हृदये स्फूर्तिरासीद्यथा – लोकसेवायां तन्मयीभावमापित्सुना मया पुत्रैषणा वित्तैषणा च परित्यक्तव्येति। अपि च वानप्रस्थाश्रमः स्वीकार्यः। तथा च संसारभारशून्यस्य जीवनं समाश्रयणीयमिति। जनोत्थानव्यतिकरे मम सेवाकार्यं सार्धैकमासं यावदचलत्। तथापि तत्सप्ताहषट्कं मम जीविते परमोत्तमः काल आसीत्। व्रतग्रहणमहत्त्वं मया तदानीं पूर्वापेक्षया सम्यक्तरां प्रत्यक्षीकृतम्। एवं व्रताङ्गीकरणं स्वातन्त्र्यस्य मार्गो न पुनर्बन्धनायेत्यबोधिषम्। अद्यावधि मम प्रयत्नाः न साफल्यमापद्यन्त। तत्र कारणानि संकल्पदार्ढ्याभावः स्वात्मविस्रंभराहित्यमीश्वरानुग्रहश्रद्धाविरहश्च। अत एव मदीयमानसमुच्चावचविचारतरङ्गव्याघातैः परवशीभूय संराधाम्भोनिधौ पोप्लूयते स्म। व्रतनियमानां निराकरिष्णुः पुरुषो मोहवशं गमिष्यति व्रतनियमस्वीकारश्च व्यभिचारत्यागपुरःसरं एकपत्नीग्रहणमिवेति मम स्पष्टमभासत। आत्मनः प्रयत्ने ममास्ति विश्वासो

व्रतनियमपारवश्यं न मे रोचत' इति व्याहार: परं नैर्बल्यलक्षणम् । तत्र ह्यनिष्टस्यापि भोगेच्छा सूक्ष्मतयान्तर्भूता दृश्यते । अन्यथा त्याज्यवस्तुन: सर्वथा परित्यागे को वा क्लेश: । मामयं सर्पो दंक्ष्यतीति जानन्नहं तं सर्पं दूरीकृत्य सद्य: पलायिष्ये एव न पुन: पलायितुं यतमानस्तथैव तूष्णीमवतिष्ठेयम् । ज्ञातं हि मया यद्यतमानेन तूष्णीमवस्थिती मृत्यु: संभवेदेवेति । प्रयतमानास्तिष्ठासव: सर्वे विषमस्तीति नहि स्पष्टमवबुध्यन्ते । इत्थं च यत्र क्वापि कार्ये परमहं यत्नं करिष्यामीति यो ब्रूयात्तस्य तत्कार्यसाह्यस्यावश्यकता न स्पष्टमवभातेति वक्तव्यम् । केचिदेवं शङ्कन्ते यद्यात्मनोऽभिप्राय: कदाचिदग्रे परिवृत्तो भवेत् । दृग्व्यक्तनियमानां स्वीकार: किमुचित: स्यान्नवेति । एवं विकल्पमाना वयमनेकशो व्रतग्रहणाद्बिभीम: । एषा शङ्कैव वस्तुनस्त्याज्यत्वेऽस्माकं विश्वासदार्ढ्यस्य राहित्यं सूचयति । अत एव श्रीनिष्कुलानंदो गायति –

वैराग्यरहितं विद्धि
त्यागमङ्ग ! विनश्वरम् । इति ।

तस्मादेषणापगमे त्यागक्रमं स्वतो निष्प्रतिबन्धं प्रवर्तते ॥

अष्टमोऽध्याय:

ब्रह्मचर्यम् — २

परं जिज्ञास्य सावधानं विमृश्य पर्यन्ते षोडशोत्तरनवशताधिकैकसहस्रतमेऽब्देऽहं ब्रह्मचर्यव्रतमगृह्णे । व्रतग्रहणात्पूर्वमिदं मे भार्यायै नाहमवेदयम् । व्रतं गृह्णानेन मया तन्मतमजिज्ञासि । तया मदीयनिश्चयं लेशतोऽपि न प्रत्यवास्थितम् । परन्तु पर्याप्तशक्त्यभावान्ममैव तद् ग्रहणमतीव कठिनमासीत् । भार्यया सह विषयसुखसंबन्धस्य :परित्यागो नाम तदानीं मे नवीन: कोऽपि विषय इव प्रतिभाति स्म । तथापि परमेश्वरे भावं निवेश्य सर्वात्मना व्रतमग्रहीषि ॥

अथ व्यतीतेषु विंशतिवत्सरेषु इदानीमेतद्व्रतस्मरणमाश्चर्यमानन्दं च जनयति । यद्यप्यहमेकोत्तरनवशताधिकसहस्रतमादब्दत: प्रभृति संयममपालयं तथापि गृहीतव्रतेन मयाभूतपूर्वं सुखं स्वातन्त्र्यं चान्वभावि । पुरा हि मम वासनाबद्धतया तत्परवशीभाव: सर्वदा संभाव्यते स्म । इदानीं तु व्रतं मां भोगतृष्णावशादरक्षत् । ब्रह्मचर्यस्य महिमानमहमनुदिनमधिकाधिकमज्ञासिषम् । तदेतद्व्रतं फीनिक्सग्रामवर्तिना मयाग्राहि । अवसिते लब्धक्षतानां शुश्रूषणे फीनिक्सग्राममगच्छम् । ततश्च मया जोहानिसबर्गनगरं प्रति निवर्तितव्यमासीत् । मदीयगमनादेकं साभ्यन्तर एव सत्याग्रहयुद्धस्य बीजमवापि । एतदर्थे ब्रह्मचर्यव्रतं मां जोषमेव संनाहयति स्म । सत्या-

ग्रहस्य कल्पनापि मे न भूतपूर्वा । सा निरायासमेव मदिच्छामन्तरेणैव समभूत् । किन्तु मया यत्पूर्वमाचरितं तत्सर्वमपि मामेतन्मार्गमाकर्षति स्मेत्यहमवागमम् । जोहनिसबर्गनगरे गृहव्ययमल्पीकृत्य ब्रह्मचर्यव्रतग्रहणायैव फीनिक्सग्रामो मयाश्रीयते ॥

ब्रह्मचर्याभिरक्षणात्संपाद्यं ब्रह्मसंदर्शनाख्यं ज्ञानं मया शास्त्रतो नाधिगतम् । इदं क्रमश क्रमशः स्वानुभवादसिध्यत् । तन्निरूपकाणि शास्त्रवाक्यान्यहं पश्चादपाठिषम् । ब्रह्मचर्यादात्मरक्षणं बुद्धिरक्षणं देहरक्षणं च सिध्यन्तीति व्रतग्रहणादनन्तरं मे दिने दिने विशेषतो मदनुभवगोचरो भवत् । ब्रह्मचर्यमिदानीमात्मनः कठिनतपोभावं विहाय शान्तिमयज्ञानं दमनं च प्रत्यभात् । अनुदिनमिदं नवं नवं सौन्दर्यमाविरकरोत् ॥

इत्यस्मादधिकाधिकमानन्दमनुभवतो मम न कोऽपि क्लेशः समजनीति मा स्म विचिन्ति । षट्पंचाशद्वर्षदेशीयोऽपि तस्य कठिनतामद्याप्यहमनुभवामि । यदेतद्व्रतपालनं तदपि धाराप्रक्रमणः तुल्यमिति प्रतिदिनं प्रतिभाभाति । प्रतिक्षणमत्र प्रमादाभावस्यावश्यकता मे प्रत्यक्षीभवति ॥

ब्रह्मचर्यं विपालयिषुणा जिह्वा तावज्जेतव्या । रुचे निग्रहे सति ब्रह्मचर्यमतीव सुलभमित्यनुभवादवेदम् । अत एवाहमाहारविषयकशोधनानि न केवलं शाकाहारदृष्ट्यापि तु ब्रह्मचर्यदृष्ट्या च कर्तुमुपाक्रंसि । तेभ्यः शोधनेभ्यो मयोपलब्धं यद्ब्रह्मचारिभिः सेव्यमानेनाहारेण कृतेन साधारणेनोपस्करशून्येन सति संभवेऽपक्वेन च भवितव्यमिति ॥

वृक्षोपरिस्थितं पक्वं फलमेव ब्रह्मचारिणः प्रशस्त आहार इति मया षड्वर्षाणियावद्विहितेभ्यः शोधनेभ्योऽहमज्ञासिषम् । वानफलानि सामान्यफलानि वाभ्यवहरता मया यादृशी निर्विकारावस्थानुभूयते स्म तादृशी कृताहारपरिवर्तनेन नान्वभावि । दक्षिणाफ्रिकादेशवर्तिनः फलाहारिणो मम ब्रह्मचर्यसाधनं नैव क्लेशावहमासीत् । यदा प्रभृति दुग्धपानमहमाप्सि तदारभ्य प्रयत्नो महान् विधेयः संवृत्तः । फलादिकं विहाय क्षीरं कुतः सेवितव्यमासीदित्येतद्यथावसरं वर्णयिष्यामि । दुग्धस्य ब्रह्मचर्याचरणप्रतिबन्धकत्वे मम नास्ति लेशतोऽपि संदेह इत्यत्र निरूपणमलं भवति । एतेन ब्रह्मचारिभिः सर्वैरपि क्षीरं परित्याज्यमिति न मन्तव्यम् । तत्तदाहारसेवनेन ब्रह्मचर्यस्योपरि यादृशः परिणामो जायत इत्येतद्बहुभिः शोधनैरेवावगन्तव्यम् । दुग्धवत्पुष्टिकरं सुजार्यं फलमद्यापि मयालब्धम् । भारतीयेनाङ्ग्लेन महमदीयेन वा न केनापि भिषजा तादृशं फलं मे प्रादर्शि । अतोऽहं क्षीरमीषद्विकारजनकः पदार्थ इति जानन्नपि तत्परित्यक्तव्यमिति सद्यः कमपि बोधयितुं न शक्नोमि ॥

ब्रह्मचर्यपालनाय बाह्योपकरणत्वेन मितप्रशस्त आहारो यथावश्यकस्तथोपवासोऽप्यावश्यकः । इन्द्रियग्रामो ह्यतीव बलवान् । सोऽयमूर्ध्वतोधस्तात्सर्वतश्च समावृत्य निग्रहीतव्यः । आहारं विना तानि नैव प्रभवन्तीति सर्वस्यापि विदितोऽयं विषयः । तस्मादिन्द्रियदमनार्थमिच्छापूर्वकमाचरित उपवासो बहूपकरिष्यतीत्यत्र न मे सन्देहः । केषां-

चिदुपोषणं निष्फलमेव पर्यवस्यति । तत्रायं हेतुः — उपोषणमात्रेण कृतार्थतां मन्वानास्ते यद्यपि जठरे न किमपि प्रवेशयन्ति तथापि मनसा परःशतान्भोगानुपभुञ्जते । अपि चान्तरान्तरा पारणाविधानमनुध्यायन्तः पेयभोज्यादिकं मनसा समास्वादयन्ते । एतदुपवासस्तेषां जिह्वानिग्रहे विषयवासनाप्रतिबन्धे वा नोपकारको जायते । यतो यथावदुपवासफलप्राप्तये शरीरमनसोः सहप्रवृत्तिरावश्यकी । सहप्रवृत्तिर्नाम शरीरेण त्यक्तेषु पदार्थेषु मनसोऽपि विरक्तभावः । इन्द्रियसुखस्य मूलं मनस्येव प्रतिष्ठितम्। उपवासादिसाधनानामौपयिकत्वे सुमहत्यपि तस्य परिमितिरल्पैव । उपवस्तावपि किल विषयासक्तो भवेत् । किन्तु विषयासक्तेरुन्मूलनमुपवासमन्तरा न शक्यते । अत एवोपवासो नाम ब्रह्मचर्यव्रतस्यापरिहार्यमङ्गमिति वक्तव्यम् । ब्रह्मचर्यपालनाय प्रयतमाना बहवः स्वप्रयत्नेषु पराभवं प्राप्नुवन्ति । यतस्ते भोजनाभ्यवहारादिषु ब्रह्मचारिवन्न प्रवर्तन्ते । तेषां किल प्रयत्नस्तपन्निदाघमध्ये प्रगाढशैत्यानुभवमिच्छोः प्रयत्नमनुहरति । संयमिस्वच्छन्दिनोर्योगिभोगिनोर्जीवने वैलक्षण्येनावश्यमेव भाव्यम् । तयोः साम्यं तु केवलमापातदृश्यमेव । भेदश्चाह्नः प्रकाश इव स्पष्टः । तथा हि-उभौ चक्षुषा पश्यतः । ब्रह्मचारी स्वचक्षुषा भगवद्दर्शनं करोति । भोगी तु नाट्यपरिहासप्रसङ्गी भवति । उभौ श्रोत्रेण श्रुणुतः । एको भगवन्नाम निशमयति । अन्यस्तु शृङ्गारगीतिकाश्रवणमग्नो भवति । उभौ चिराय रात्रौ जाग्रतः । एको जाग्रदवस्थायामात्मनो हृदयमन्दिरे विराजमानं श्रीरामचन्द्रं भजते । अन्यस्तु नाट्यविलासप्रयुक्तमदेन 'परवशीकृतो निद्रां जहाति । उभावप्याहारं स्वीकुरुतः । ऐको देवालयस्यास्य शरीरस्य रक्षणार्थं यावदावश्यकं तावन्मात्रमुपादत्ते । अन्यस्तु जिह्वाचापल्येन स्वदेहमुच्चावचैर्वस्तुभिः ,संपूर्य तं पवित्रघटं दुर्गन्धितं करोति । इत्थमनयोरन्तरं विद्यत एव । तच्च कालक्रमेणोपचीयते न पुनरपचीयेत सर्वथा ॥

ब्रह्मचर्यं नाम मनोवाक्कायकर्मभिः सर्वेन्द्रियाणां निग्रहः । एतत्संयमसिद्ध्ये पूर्वोक्तनियमानामावश्यकता दिने दिने मम स्पष्टतरमुपलक्ष्यते । यथा ब्रह्मचर्यस्य महिमा निरवधिकस्तथा त्यागस्य प्रभावोऽप्यपरिमेयो भवति । ईदृशं ब्रह्मचर्यं नाल्पेन यत्नेन साध्यम् । परःकोटिजनानामिदमादर्शमात्रं कल्पते । पूर्णब्रह्मचर्यसाधकः सदा स्वदोषान्स्मरन् :हृदयान्तरे प्रच्छन्नस्थितान्विकारानन्विष्य तत्परिहाराय यतते । मनसा तथा दृढेन भवितव्यं यथा नियमेनेच्छापूर्वक एव भावः समुदियात् । यावदीदृशं स्थैर्यं नाधिगम्यते तावत्पूर्णब्रह्मचर्यं न सिध्यति । अनिच्छापूर्वको मनोभावोऽपि विकारविशेषः । भावानां वशीकार एव मनोनिग्रहः । स च वायोर्निग्रहादपि दुष्करस्तथाप्यन्तरात्मनः प्रभावादयं साधनीयः । दुःसाधत्वमात्रेण न कोऽप्यसाध्यमेतदिति मन्यताम् । अयमेव परमार्थः । परमार्थमुद्दिश्य परमः प्रयत्नो यद्यावश्यकस्तत्र किमाश्चर्यम् ॥

हिन्दुस्थानं प्रति मम प्रत्यागमनोत्तरमेव मयावगतं यद्ब्रह्मचर्यं मानुषप्रयत्नादेव केवलमसाध्यमिति । तदवधि फलाहारेण विकारजातस्य समूलनाशो भविष्यति । नान्यत्किमपि कर्तुमावश्यकमिति स्वाभिमानाद्विश्वस्य तद्विश्वासमायायां लग्नोऽभवम् ॥

एतद्वृत्तान्तनिरूपकं प्रकरणमग्रे वर्तते । अद्य पुनरेतावन्मात्रं स्पष्टीकर्तव्यं यन्मोक्षसाधनाय ब्रह्मचर्यं रिरक्षिषुभिः स्वप्रयत्ने यावान् विश्वासो निधीयते तावान्भगवत्यपि निवेश्यते यदि प्रेप्सितभंगो नैव शङ्कनीयः । तथाहि भगवदुक्तिः —

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्ज रसोऽप्यस्य परं दृष्ट्वा निवर्तने ॥ भ. गी. २,५६

अत एव मुमुक्षोः श्रीरामनामैव श्रीरामकृपैव परमाश्रयः । भरतखण्डं प्रत्यागतस्यैव ममेदं तत्त्वं बुद्धिगोचरोऽभवत् ॥

नवमोऽध्यायः

सरलजीवनम्

मया तावदारब्धो भोगप्रधानो जीवनक्रमः । परंतु चिराय सैष नहि प्राचलत् । मन्दिरं महतावधानेन मया सज्जीकृतमासीत् । किन्त्वेतन्मदीयमानसं न ह्यकर्षत् । अथाहं गृहव्ययमल्पयितुं प्रवृत्तः । रजकाय प्रदेया भृतिर्वर्धते स्म । स तावद्वसनानि कालेनोपाहरत् । तस्माद्विंशत्यां त्रिंशत्यां वा कंचुकेषु गलपट्टकेषु स्थितेष्वपि न पर्याप्नुवन् । गलपट्टिकाः प्रतिदिनं आन्तरकंचुका एकाहव्यत्यासेन वा परिवर्तनीया ह्यासन् । एतेन मे द्विगुणो व्ययः संवर्तते स्म । ममैतन्न समञ्जसमित्यहमचिन्तयम् । तद् व्ययं रिररिक्षुः स्वयमेव वस्त्रक्षालनमारप्सि । क्षालनविधानं कुतश्चित्पुस्तकादवबुध्य भार्यामप्यशिक्षयम् । एतेन यद्यपि कार्यस्य बाहुल्यमुपजातं तथापि तस्य नूतनोपक्रमादावयोरेतद्विनोदकरमेवासीत् ॥

गलपट्टिकायाः स्वयं निर्णेजनव्यतिकरः कदाप्यविस्मरणीयो भवति । मया किल सात्याधिककांजिकेन योजिताभवत् । घट्टन (परिष्करण) यन्त्रं प्रकामतापितं नासीत् । दहनशङ्कया गलपट्टिका सम्यक्घट्टिता नाभूत् । एतेन दृढस्तब्धापि पट्टिका सर्वदा कांजिकपिष्टं मुञ्चति स्म । ईदृशीमहं प्रतिमुच्य न्यायसभां गतः सहस्थितानां ब्यारिस्टरजनानामुपहास्यतामगमम् । तस्मिन्नपि काले परिहाससहनशक्तिर्ममासीत् ॥

Funding by IKS-MoE

अहमवोचम् — स्वयं गलपट्टिकाक्षालनस्यायमेव मे प्रथमोऽवसरः । अत एव कांजिकाधिक्यात् पिष्टमुद्गीर्यते किन्त्वनेन मम क्लेशः कोऽपि नास्ति । परं भवतां विनोदप्राप्तिरप्येको लाभ इति ॥

तत्रैकः सुहृदपृच्छत् – किमत्र रजका दुर्लभा इति ॥

अहमवोचम् —

इह निर्णेजकाय प्रदेयं द्रव्यं ह्यत्यधिकं मे प्रतिभाति । यावत् पट्टिकामूल्यं तावन्निर्णेजकव्ययो भविष्यति । किन्तु रजकस्याश्रयणं पदे पदे प्रसज्यते । तन्मन्ये स्ववस्त्राणां स्वेनैव क्षालनं वरमिति ॥

एतत्स्वावलंबनस्वारस्यं मदीयमित्राणि ग्राहयितुं नाशकम् । अथ क्रमेण कृतहस्तस्य रजकस्येव स्वकर्माणि नैपुण्यमहमध्यगच्छम् । रजकानुष्ठितकार्यापेक्षया मदीयकार्यं न पर्यहीयत । दृढत्वे भास्वरत्वे च मदीयगलपट्टिका निर्णेजकधौतपट्टिकाभ्यः कथमपि नावरा अभूवन् ॥

दक्षिणाफ्रिकादेशमागतस्य गोखलेमहाशयस्य निकटे महादेव-गोविंद-रानडे-महोदयैः प्रदत्तमेकमुत्तरीयं स्थितम् । तदेतद् दातुः प्रज्ञापकं गोखलेमहाशयो यत्नेन नाभ्यरक्षत् । अपूर्वसंदर्भेष्वेव च तदुपायुंक्त । जोहानिसबर्गवर्तिभिर्भारतीयैस्तत्संमाननार्थमवकल्पितं भोजनसंतर्पणमप्येको विशिष्टावसर आसीत् । तदानीमेतदुत्तरीयं तैर्धारणीयमापतितम् । पुटितपुटितस्थितत्वात्तन्निर्णिज्य तत्प्रघट्टनेन परिष्करणीयमासीत् । रजकमाकार्य निर्णेजयितुमवकाशो नाविद्यत । स्वकौशलमुपयुञ्जानस्तत्कार्यमहं करिष्यामीत्यवोचम् । तदा गोखलेमहाशयोऽकथयत् । यथा —

" न्यायवादिकृत्यं भवद्भिः सम्यगनुष्ठीयत इत्यस्ति मे विश्वासः । किन्तु वो निर्णेजनपाण्डित्ये नाहं श्रद्धालुः । दूषितेऽमुष्मिन् का गतिः । उत्तरीयमिदं मया कियन्मूल्यवद्गण्यत इति ज्ञायते वेति ॥ "

एवमाख्याय बहुमानत्वेन यथा बहुमानत्वेन तद्वस्त्रलाभः समुपानमत्तत्कथां परमोत्साहेन मह्यमुपावर्णयत् । तथाप्यहं यथावत्कार्यं करिष्यामीति सविनयं प्रतिज्ञाय तापनेन वस्त्रं परिष्कर्तुमनुज्ञामापम् । कृतकार्यश्च श्लाघावचनैरभ्यनन्दिषि । इदानीमखिलं जगदेव यद्यपि मदीयकौशलं नाङ्गीकुर्यात्तदा मे का वा क्षतिः ॥

यथाहं रजकाश्रयात्तथा नापितावलंबनादप्यात्मानं व्यमोचयम् । आंग्लविदेशं गन्तुमुद्यताः सर्वेऽपि स्वयं क्षौरविधानं शिक्षन्ते । तथापि स्वयं लोमलुञ्छनस्य शिक्षिता जनो नाद्यापि मया दृष्टः । मया तदपि शिक्षणीयमासीत् । अहमेकदा प्रिटोरियानगरे कस्यचिदांग्लनापितस्य कार्यालयमागच्छम् । मम केशलुञ्छनं न करिष्यामीति सोऽब्रवीत् । एवं प्रतिब्रुवाणेन प्रदर्शिता त्ववज्ञा वर्णयितुमशक्या भवति । अहं परमखिद्ये । तत्क्षणमेव विपणिं गत्वा केशलुञ्छनयन्त्र

क्रीत्वा दर्पणस्याग्रे स्थितः । स्वशिरोग्रभागस्य केशानलुप्सि । किन्तु चरमभागस्य केशलुञ्छनं दुष्करमासीत् । तदेतन्नैव सुनिष्पन्नम् । न्यायसभायां सुहृदो मामवलोक्य परिहासमग्ना अभवन् । ननु गांधिमहाशय किं वृत्तं भवतः केशानाम् । तान्मूषकाः किमलुंपन् ॥

नहि गौरनापितः कृष्णशीर्षं मदीयं कथं वा स्प्रष्टुमर्हेत् । 'अतोऽहमसमीचीनतामनादृत्य स्वयमेव तानलुञ्चिषम् । प्रत्युक्तिरेषा न मे सुहृदामाश्चर्यमजनयत् । केशान्न लुञ्चिष्यामीति वदता नापितेन किमपि नापराद्धम् । कृष्णाङ्गानां केशलुञ्चने तस्य वृत्तिरेव विनाशमुपेयात् । न खलु वयमस्मदीयक्षौरकैः पंचमानामुपसर्पणमनुजानीमहे । ईदृग्भावनायाः फलं न तावत्सकृदेव परमनेकशोऽन्वभावि । अस्मदीयपापानामिदं प्रायश्चित्तमिति मन्वानो विषयेऽस्मिन्न तदानीं क्रोधमाकलयम् ॥

सरलतास्वावलंबनयोर्ममादरः शनैः शनैस्तीव्ररूपमापद्यतेति यथावसरं वर्णयिष्यते । किन्तु पूर्वमेवास्य बीजमवापि । तच्च रूढमूलं पुष्पितुं फलितुं च जलसेचनमात्रमप्यैक्षत जलसेचनं च काले प्राप्तमेव ॥

दशमोऽध्यायः

बोअर-युद्धम्

आसप्तनवत्यधिकाष्टशतोत्तरसहस्रतमादानवनवत्याधिकाष्टशतोत्तरसहस्रतमं वत्सरं मदनुभवगोचरीभूतान् बहून्विषयान् विसृज्य सांप्रतं बोअरयुद्धस्य वृत्तान्त उपवर्णनीयो भवति । एतदायोधनस्य प्रारंभकाले बोअरजनैरेव सर्वात्मना सहानुभूतिरस्माकमासीत् । किन्तु स्वाभिप्रायानुसारेण वर्तितुमद्याप्राप्तोऽहमिति ममासीत्तदानीं मनीषा । इदं दक्षिणाफ्रिकासत्याग्रहेतिहासेऽनुज्झितहृदयसूक्ष्मपरामर्शेन मया सर्वमुपावर्णि । तस्मादस्य पुनर्निरूपणमत्र निरवकाशं भवति । एतद्वृत्तान्त बुभुत्सुभिः स एवेतिहासो द्रष्टव्य इति बोधयामि । इह तावदियन्मात्रमिदानीं वक्तव्यं यथा — आंग्लसाम्राज्यं प्रति ममासीद्यादृशी स्वामिभक्तिः सा तस्मिन्नायोधने ममाङ्ग्लपक्षमाश्रित्य प्रवर्तनाय बलवत्प्रैरयत् । आंग्लराज्यप्रजाधिकारोऽयं मया संपिपादिषितस्तदांग्लप्रजावदेव ममापि तद्राज्यरक्षणे प्रवृत्त्याश्रयणं धर्म्यमित्यहमचिन्तयम् । तत्कालमहं हिन्दुस्थानस्य पूर्णस्वातन्त्र्यावाप्तिः ' ब्रिटिश ' चक्राधिपत्य एव स्थित्वा तच्चक्राधिपत्यद्वारैव साध्येत्यभिप्रायवानासम् । अत एव यथाशक्यं मित्राणि संघट्य लब्धक्षतानां योधानां शुश्रूषणाय सेवादलमेकं पर्यकल्पयम् । एतद्दलस्य सेवां राज्याधिकारिणः स्वीकारयितुं महान् प्रयास आस्थेयोऽभवत् । तदा किल तत्रत्या आंग्लेयाः प्रायेण भारतीयान्सर्वानपि कष्टभीरुकान् स्वार्थैकपरायणांश्चामन्यन्त । अत एव

बहवो माङ्ग्लेयसुहृदः प्रयत्नं मदीयमनभिनन्दन्तो मां निरुत्साह्यांचक्रुः । डॉ. बूथमहाशयस्तावदेक एव सर्वात्मना मामपोषयत् । परिक्षतयोधानां शुश्रूषणस्य विधानमस्मानशिक्षयत् । एतत्कार्यनिर्वाहोचितशरीरदार्ढ्यसंपन्ना वयमिति भिषक् सकाशाद्योग्यतापत्रिकां वयं समपादयाम । एस्कम्बमहाशयो लॅटनमहाशयश्च प्रयत्नमेनं सोत्साहमन्वमोदेताम् । अथान्ते वयं युद्धे सेवां करिष्याम इति राज्याधिकारं प्रति विज्ञप्तिमकुर्महि । राज्याधिकृताश्च तद्विज्ञप्तिहेतोः स्वकृतज्ञतां प्रख्याप्याधुनैव सेवया न कार्यमित्यस्मानवेदयन् ॥

किन्तु तदनङ्गीकारवाक्येन नाहं परितुष्य जोषमवास्थिषि । डॉ. बूथमहाशयस्य साहाय्यमुपलभ्य नातालदेशवर्तिनं क्रैस्तमताचार्यमदर्शम् । आस्माकसेवादले बहवो भारतीया क्रिस्तमतावलंबिनोऽवर्तन्त । ममोपदेशमाकर्ण्य मताचार्यः परं समतुष्यत् । राज्याधिकारेणास्मदीया सेवा यथा स्वीक्रियेत तथाहमुपकरिष्यामीति च प्रत्यजानीत ॥

एतन्मध्ये कालस्याप्यनुकूलसंयोगोऽस्माभिर्लब्धः । बोअरयोधा अवितर्कितं धैर्यं स्थैर्यं विक्रमं च प्रादर्शयन् । अथ राज्याधिकारोऽस्मदीयसेवाया आवश्यकतामपश्यत् ॥

आस्माकसेवादलमेकशतोत्तरसहस्रसंख्याकमासीत् । तत्र नेतार उपचत्वारिंशज्जनाः । त्रिशतं स्वतंत्रभारतीयाः शेषाः प्रतिज्ञाबद्धकर्मकराः । डॉ. बूथमहाशयोऽपि सहास्माभिरेव स्थितः । सेवादलं स्वकार्यं श्लाघ्यतया निरवाहयत् । यद्यप्यस्मदीयकार्यं शतघ्नीप्रहारक्रान्तिविदूरे प्रदेशे निर्वर्तनीयमासीत् । यद्यपि वयं 'रक्तस्वस्तिक' (रेड क्रॉस) बन्धेन समरक्षिष्महि तथापि प्रतिबद्धसंधिमार्गे समयेऽस्माभिराग्नेयगुलिकापातस्थल एव सेवाकृत्यमनुष्ठेयमित्यादिक्ष्महि । गुलिकपातस्थलप्रवेशनिषेधको यो नियमः सोऽस्मदिच्छया न प्रयुक्तः किन्तु राज्याधिकारनिदेश एव तादृशोऽभूत् । तथापि स्पियांकोपे पराजयप्राप्त्यनन्तरं परिस्थितिरन्यथा समजनि । तथाहि सेनापतिर्बुलराभिधानः संदेशं व्यसृजद्यथा—यद्यपि यूयं विपद्गोचरे स्थातुमनर्हाः तथापि समराङ्गणं प्रविश्य परिक्षतयोधानानयथ चेत्तदा राज्याधिकारस्य महती युष्माभिरुपकृतिर्विहिता स्यादिति । विपद्गोचरीभवितुं वयं सज्जा एव स्थिताः । तस्मात् स्पियांकोपयुद्धे शतघ्नीप्रहारान्तःपातिषु प्रदेशेषु गत्वा कार्यं कर्तुमारभ्महि । एषु दिवसेषु परिक्षतान्योधान् वीवधैर्वहन्तो वयं विंशत्या पंचविंशत्या वा पाषाणैर्दवीयसः प्रदेशानत्यलंघयामहि । इत्थमस्माभिरपोढानां योधानां मध्ये जनरलवुडगेटप्रभृतयो जना अविद्यन्त ॥

सप्ताहषट्कं यावत्कृतायां सेवायामस्मदीयदलो व्यसर्जि । स्पियांकोपवालक्रान्झस्पथलयोर्लब्धपराजयाः प्रधाना आंग्लसेनापतयो बोअरजनावस्कन्दात् लेडीस्मिथप्रभृतिस्थलानां सद्यो

Funding by IKS-MoE

विमोचनप्रयत्नं विहाय हिन्दुस्थानादांग्लविदेशाच्च सैन्यागमं प्रतीक्षमाणैरस्माभिः समुद्योगो विलंबनीय इति निश्चैषुः ॥

इमामल्पामपि सेवां तस्मिन्नवसरे बहु प्राशंसिषुः । भारतीयेषु माननावृद्धिमापत् । ‘ सर्वेषामपि नः समा हि मतिता साम्राज्यसत्पुत्रता ’ इति पल्लवीयुतानि प्रशंसनपद्यानि सर्वतः प्राचकाशन् ॥

बुलरमहाशयः सेनापतिलेखनद्वारास्मदीयदलस्य सेवाकार्यमस्तौषीत् । दलनायकेभ्यः समरबिरुदमुद्रा अपि प्रादायिषत् ॥

भारतीयः समवायः परंतु संघटितः समवर्तत । प्रतिज्ञाबद्धकर्मकरान् भारतीयानहं सम्यक्तरां पर्यचैषम् । तेषामतिशयिता जागर्तिरुदपद्यत् । हिन्दुमुसलमानक्रैस्तमद्रासीगुजरातीसिंधीजनाः सर्वेऽपि भारतीया एव सर्वे च मातृभूमेर्भरतवर्षस्य पुत्रा इति भावना बलवत् दृढमूलभवत् । भारतीयानां क्लेशाः सर्वेऽपि सर्वथा दूरीभविष्यन्तीति सर्वोऽप्यमन्यत । गौराङ्गानां वर्तनमपि परिवृत्तिमागतमिव स्पष्टमलक्ष्यत । युद्धकाले गौराङ्गैः सह घटितः संबन्धोऽपि मधुर एवासीत् । परःसहस्रैरांग्लयोधैः सह सङ्गो नः समजनि । तेऽस्मासु केवलं मित्रभावेनावर्तन्तापि तु तत्सेवार्थमागता वयमित्यस्मदीयामुपकृतिं संस्मरन्ति स्म ॥

विपत्सु मानुषी प्रकृतिः यथा परमोत्कर्षमाविष्करोतीति निदर्शनार्थमेका मधुरसंस्मृतिरिहावश्यमुपन्यसितव्या भवति । चीवलीसंज्ञकं सेनानिवेशस्थानमस्माभिर्गम्यते स्म तत्रैव लॉर्डरॉबर्ट्समहाशयस्य ,कुमारो ‘ लेफ्टनन्ट रोबर्ट्स ’ नामा मृत्युसंनिभेनाग्नेयगुलिकाप्रहारेण पञ्चतामगात् । प्रेतकार्यनिर्वहणसंमानोऽस्मानुपनतः । अस्मदीयप्रयाणदिवसे नैदाघमौज्वल्यं समधिकमासीत् । वयं सर्वेऽपि तृष्णार्दिता अभूम । मार्गे क्षुल्लका स्रोतस्विनी काचिदलक्ष्यत । जलपानेन पिपासोपशमनं सुकरमासीत् । किन्तु प्रथमं केन पातव्यम् । आंग्लयोधेषु पीततृप्तेषु वयं च पास्याम इत्यस्माभिः सूचितम् । परंतु ते प्रथमं पातुमप्रतिपद्यमानाः पूर्वमस्मानेव पानाय निरबध्नन् । कंचित्कालमित्थं पौर्वापर्यजिज्ञासा प्रावर्तत ॥

एकादशोऽध्यायः

नैर्मल्यसुधारणं क्षामनिवारणं च

समाजाङ्गस्यानुपयुक्तस्थितिनिरूपणं सर्वदा मे दुस्सहं भवति । जनतादोषनिगूहनं वा तद्दोषापनयनमन्तराधिकारप्राप्तये संघर्षणं वा नाहं मोचयामि । अत एवाहं नातालदेशे स्थितिग्रहणादारभ्य दक्षिणाफ्रिकानिवासिषु भारतीयेष्वारोपितं दोषं (एतदारोपणमीषत्सत्यां-

Funding by IKS-MoE

शोपेतमासीत्) अपाकर्तुमुद्यतोऽभवम् । एवं हि प्रवादः श्रूयते स्म । यथा – " भारतीया अलसाः । ते स्वकीयगृहद्वाराणि निर्मलानि न हि स्थापयन्ति । श्वपचा एते " इति ॥

एतत्कलंकनिर्मूलनोद्देश्यतयास्मदीयजनप्रमुखानां गृहेषु पूर्वमेव सुधारणमारब्धमासीत् । किन्तु डरबननगरे ग्रन्थिज्वरप्रसरेणाशंका यदा समुदैत्तदा प्रतिगृहं परीक्षितुमुपाक्रंस्महि । पौरसभासदस्यैः सह संमन्त्र्य प्राप्तानुमतिभिरस्माभिः कार्यमारंभि । ते किलास्मत्सहकारमपैक्षन्त । अधिगतास्मदीयसहायानां तेषां कार्यं सुकरमजनि । आस्माकं (भारतीयानां) क्लेशास्तानचमापद्यन्त । यतो ग्रन्थिज्वराद्युपद्रवेषु समुत्थितेष्वधिकारिणः प्रायेणास्तमितक्षमागुणाः सुदुर्घटान्सन्नाहानावचय्य निजक्रोधपात्रीभूताञ्जनान् दण्डयन्ति । अस्मदीयास्तु स्वयं परिक्रम्य नैर्मल्यकार्यं निर्वाह्य संकटादात्मानमरक्षन् ॥

मदीयानुभवेषु सर्वं न मधुरमासीत् । तत्रत्यराज्याधिकारात्स्वाधिकारप्रार्थनाय भारतीयानां साहाय्यमवाप्तुं सुकरमासीत् । तथापि स्वकर्तव्यस्य स्वयं विधानप्रसङ्गे तत्साहाय्यं दुर्लभमलक्ष्यत । ते मां क्वचिदपामानयन् । क्वचित्सविनयमौदास्यमदर्शयन् । स्वमभितःस्थलस्य निर्मलीकरणक्लेश एव तेषां दुस्सहोऽभूत् । तस्मात्का कथा प्रसक्तकार्यस्य कृते द्रव्योत्सर्जनस्य । जनैः किमपि कार्यं कारयितुकामेन निरवधिकक्षमासंपन्नेन भवितव्यमित्युपदेशो मदनुभवैरेतैः सम्यञ्ज्ञया शिक्षितोऽभूत् । सुधारणसिद्धिसमुत्सको जनः सुधारक एक एव । तेन च समाजद्वेषापमानप्राणान्तिकहिंसाः फलत्वेन प्रतीक्षणीयाः । न पुनरन्या कापि प्रत्याशा मनसि निधेया । सुधारको यद्यपि सुधारणं प्राणवत्प्रियं मन्यते तथापि समाजेन व्यतिक्रमोऽयमिति कुतो न मन्तव्यम् ॥

अथाप्येतत्प्रयत्नकलापाद्यः फलितोंऽशः स कथ्यते । तत्रत्या भारतीयाः स्वगृहद्वारादिकस्य स्वच्छतयावस्थापनमावश्यकमित्यज्ञासिषुः । अधिकारिणां मयि गौरवमुपाचीयत । ते किलाभ्यजानत यदहं बहिरस्मदीयन्यूनातिरिक्तानि प्रकाश्य स्वाधिकारस्य कृते यथैकान्ततो युध्यमानः स्थैर्यमवलम्ब्य स्थितस्तथैवान्तः सुधारणस्य कृतेऽपि स्थैर्योत्साहसंपन्नोऽभूवमिति ॥

किन्तु कार्यमन्यदवाशिष्यत । तच्च तत्रस्थानिनां भारतीयानां निजमातृभूमिं प्रति स्वकर्तव्योपदेशः । भरतवर्षमनाढ्यभूमिः । भारतीया अर्थार्जनाय दक्षिणाफ्रिकादेशं गताः । एवमर्जितादर्थात्कियतोऽप्यंशस्य विपन्नमातृभूम्यै प्रदानं तेषां कर्तव्यम् । सप्तनवत्युत्तरोष्टशताधिकसहस्रतमे क्रैस्ताब्दे नवनवत्युत्तराष्टशताधिकसहस्रतमेऽपि वत्सरे च घोरक्षामरूपया विपदा भरतखंडमाक्रम्यत । द्वयोरप्यवसरयोर्दक्षिणाफ्रिकादेशात्साहाय्यमुपानमत् । प्रथमक्षामे संग्रहीतद्रव्यापेक्षया द्वितीयवारमधिकतरं द्रव्यं समग्राहि । तत्कालमाङ्ग्लेभ्योऽपि साहाय्यममृगयामहि । तस्मादर्थसञ्चयः प्रभूतोऽभवत् । गिरिमिटियाख्याः प्रतिज्ञाबद्धकर्मकराश्च स्वदेयांशमददुः ।

इत्थमनयोर्दुष्कालयोरारब्धोऽयमभ्यासोऽद्यावधि स्थायी वर्तते । भारतवर्षे सार्वजनिकसंकटप्राप्तौ दक्षिणाफ्रिकावासिभारतीयेभ्यः साहाय्यं प्रकाममुपनमत्येव ॥

दक्षिणाफ्रिकादेशे भारतीयसेवासमुद्यतस्य मम सत्यमहिमा पदे पदे प्रत्यक्षीभवति स्म । सत्यमेको विशालस्तरुः । स च प्रकामपोषितः सन् प्रकामं फलिष्यति । सत्यखनौ यथा यथान्तरवतीर्यते तथा तथा महार्हरत्नानि हस्तमुपागच्छन्ति सेवाया विविधोऽवकाशश्चोपलभ्यते ॥

द्वादशोऽध्यायः

हिन्दुस्थानं प्रति निवृत्तिः

युद्धव्यतिकरान्निवृत्तोऽहमचिन्तयम् । यदितः परं मम कार्यं स्वदेशे वर्तते । न तु दक्षिणाफ्रिकादेश इति । एतच्च दक्षिणाफ्रिकादेशे कर्तव्याभावान्न । परन्तु द्रव्यार्जनमेव मम मुख्योद्योगो माभूदिति ॥

भरतखंडवर्तिनो मे सुहृदः प्रत्यागमनाय मां निरबध्नन् । तत्र मदीयगमनेनाधिकप्रयोजनलाभः स्यादित्यहमप्यचिन्तयम् । दक्षिणाफ्रिकादेशे कार्यनिर्वहणाय खानमहाशयो मनसुखलाल-नाजर-महाशयश्च स्थितावेव । अतोऽहं प्रस्थानाय मदीयसहचरानपृच्छम् । तदनुमतिप्राप्तिस्तु बहुप्रयाससाध्याभवत् । मम प्रस्थानादेकवत्सराभ्यन्तर एव पुनरागमनं जनैरपेक्ष्यते यदि तदा सद्यः प्रत्यागन्तुं सज्जस्थितेन मया भवितव्यमिति समयपूर्वकगमनमन्वज्ञासिषुः । समयबन्धोऽयं मम कठिनः प्रत्यभात् । तथापि प्रेमपाशबद्धोऽहमिमं प्रत्यपत्सि ॥

गोवर्धनधरेणाहं स्वामिना प्रेमसूत्रतः नीतास्मि बन्धनं यस्माद्दासी तस्यास्मि सर्वदा—इति श्रीमत्या मीराबाईमहाशयाः वाचौपम्यं मदीयस्थितेः समञ्जसमासीत् । प्रजावाण्येव हि पारमेश्वरी वाक् । मम मित्रवाक्यमनिराकरणीयमासीत् । अतोऽहं समयमङ्गीकृत्य हिन्दुस्थानं प्रयातुमनुज्ञामवापम् ॥

अस्मिन्नवसरे परं नातालदेशेन मम निकटसंबन्ध आसीत् । तत्रत्या भारतीयाः प्रेमामृते मामाप्लावयन् । स्थले स्थले ममापृच्छनाय सभा हि मिलिताः । महार्हाश्चोपदा मे प्राददुः ॥

पुरा षण्णवत्युत्तराष्टशताधिकसहस्रतमेऽपि वर्षे हिन्दुस्थानं प्रस्थास्यमानेनैवंविधा प्रीतिदाया मयालभ्यन्त । परन्त्ववसरेऽस्मिन्विसर्जनसमारंभो महत्तर आसीत् । प्रीतिदायेषु न केवलं सौवर्णराजताश्च पदार्था अपि तु वज्रघटितान्यपि वस्तून्यविद्यन्त ॥

एतानि वस्तूनि स्वीकर्तुं को वा ममाधिकारः। तानि मया स्वीक्रियन्ते यदि प्रतिफलमन्तरेण लोकसेवां चिकीर्षोर्मम कथं वा चेतः समाधीयेत। मदीयव्यवहारिलोकैर्वितीर्णान्प्रीतिदायान्मुक्ताः शेषाः सर्वेऽपि प्रजासेवार्थमेव प्रदत्ता आसन्। किं च व्यवहारिणामितरमित्राणां च भेदमाकलयितुं नावकाश आसीत्। यतो मदीयकार्यिकाः सर्वेऽपि सार्वजनिककार्येषूपकर्तार एवासन्॥

एतेषां प्रीतिदायानां मध्ये पंचाशद्गिनी (अष्टशतरूप्यक) मूल्यः सौवर्णहार एकः कस्तुरबाईमहाशयार्थे वितीर्ण आसीत्। किन्तु तस्यापि मदीयसार्वजनिक सेवासंबंधवशादेवोपलब्धत्वादितरेभ्यः पृथक्कर्तुं नायुज्यत॥

बहुमानप्राप्तिदिवसे रात्रौ नाहं न्यद्रासिषम्। योचनापरवशः सन् इतस्ततः कोष्ठे गतागतमकरवम्। तथापि प्रतिपत्तिमूढोऽस्मि स्थितः। परःसहस्ररूप्यकमितमुपहारं दुस्त्यजमलक्ष्यत। तस्य स्थापनं तु ततोऽपि दुष्करं प्रत्यभात्॥

अहं तावदमूनि वस्तूनि स्ववशे स्थापयेयम्। परं मदीयदारापत्यानां का गतिः। अमी हि सेवयैव जीवितं यापयितव्यमिति मया शिक्ष्यन्ते स्म। सेवाया इतर प्रतिफलाभावस्तदीयबुद्धिगोचरी क्रियते स्म॥

अस्मद्गृहे महार्हवस्तूनि नैव स्थितानि। अस्मदीयजीवितमंजसा सरलसरलं समपद्यत। एवं स्थितेऽस्माभिः सुवर्णघटिकायंत्राणि कथं धारणीयानि। आभरणभ्रान्तिर्दूरीकरणीयेति तदानीमपि लोको मया बोध्यते स्म। मया प्राप्तै रत्नाभरणवस्तुभिः किं करणीयम्॥

इमानि वस्तूनि सर्वथा न परिग्रहितव्यानीति निश्चैषम्। लोकानां कृते तद्रक्षणाय पारसीरुस्तमजीप्रभृतीन् लोकान् धर्मदर्शित्वेन नियुज्य लेख्यमकरवम्। श्वो भूते भार्यापुत्रांश्च संमेल्य तैर्मन्त्रयित्वा चिन्ताभारनिर्मुक्तोऽभवम्॥

प्रस्तावेऽस्मिन्भार्या संमतेः दुर्ग्रहत्वं कुमाराणामप्रतिबन्धवत्वं च मम विदितमेवासीत्। तस्मादिमे बालका मत्पक्षवादिनः कर्तव्या इति निरचैषि॥

बालका मदीयसूचनां सद्य एवाङ्गीचक्रुः। तेह्यवोचन्—

एतैर्महार्हबहुमानैर्न हि नः कार्यमस्ति। तानि प्रदातृजनेभ्यः' प्रत्यर्पणीयानि। यदि तावदीदृशि वस्तून्यपेक्ष्यन्ते तदा स्वयं तानि क्रीणीमहीति॥

अहं सन्तुष्टस्तानपृच्छम्—एवं तर्हि युष्मदीयमाताप्येतदङ्गीकार्या नन्विति॥

ते प्राहुः—अवश्यमेव। तदभ्युपगमनभारस्तावदस्माकमस्तु। किमेतान्याभरणानि तथा धारयितव्यानि। सा किलास्मदर्थमेव तेभ्यः स्पृहयते। अस्माभिरेतेषु निहासितेषु किमित्यनया तत्परिग्रहेऽभिनिवेष्टव्यमिति॥

Funding by IKS-MoE

परमेतत्सुवचं न तावत्सुकरमासीत् ॥

मम भार्यावादीत्—भवतस्तावदिदं न स्पृहणीयं स्यात् । भवदीयकुमाराश्च नेदमपेक्षेरन् । ते प्रोत्साहिता भवद्वाक्यमनु नरीनृत्यन्ते । मयापि न धारणीयमित्यस्यार्थमप्यहं जानीयाम् । परं मम स्नुषाणां का गतिः । तासामप्येतदनपेक्षणीयं वा । श्वस्तावत्किं नु भावीति को हि विद्यात् । एतादृशान् प्रीतिदायान्नाहं सर्वथा प्रत्यर्पयेयमिति ॥

एवं वाग्धारा तदनु पोषिणी नेत्रांबुधारापि च प्रावहत् । तथापि बालका, वज्रमनस्काः स्थिताः । अहं तु निष्कम्प एव ॥

अथैवं मृदूक्तिभिस्तामवोचम्—युज्यते । पुत्राणां विवाहः कार्य एव । परन्तु बालवयसस्तान्विवाहयितुं नाहमिच्छामि । वयः प्राप्य तदेतत्सर्वं स्वयमेव ते निर्वोढारः । किं च रत्नाभरणगृध्नूः कन्यास्तदर्थे वयं न वृणीमहे । अथ कियन्तिचिदाभरणानि अवश्यमेव कारयितव्यानि चेत्तदा त्वहं पलायिष्ये । त्वं मां प्रक्ष्यस्येवेति ॥

भार्या प्रत्यवोचत्——

किं नाम प्रष्टव्यम् । न खलु भवान्मे न विदितः मदीयमाभरणसर्वस्वं भवता विनाशितम् । मया तद्धारणमसहमानो भवान् ननु स्नुषाणां पुनस्तान्युपहरिष्यति । अद्यप्रभृत्येव बालकानवधूतान्कर्तुं व्यवसितो भवान् । ननु सर्वथा नाहमाभरणानि प्रत्यर्पयिष्ये । मम हारस्योपरि भवतः को वाधिकार इति ॥

अथाहमपृच्छम् —

हारोऽयं भवत्कृतायाः सेवाया कृते प्रादायि किं वा मत्कृतसेवाया इति ॥

" तत्तावद्युज्यते । भवत्कृतसेवाया मयापि सेवा कृता स्यादिति मन्ये । भवतः कृते रात्रिंदिवं मया यत्परिश्रान्तम् । तद्भवत्कृतसेवा ते न गणनामर्हति तदानीममुकामुकान् स्वैरमेव गृहमानयन् मां रोदं रोदं परिश्रमय्य च परं प्रैष्यमकारयद्भवान् । हन्त सर्वस्यास्य गणना कुतः संभवेदिति ॥

इमे बाणास्तीक्ष्णा अभवन् । तेषां केचिद्दलवन्मां प्राहरन् । तथापि रत्नाभरणानां प्रत्यर्पणस्य मया पूर्वमेव निश्चितत्वात्कथंकथमपि भार्यामसान्त्वयम् । यानि मया षण्णवत्युत्तराष्टशताधिकसहस्रतमे वत्सरे लब्धानि रत्नाभरणवस्तूनि तानि प्रत्यार्पयम् । धर्मदर्शिलेख्यमेकं कृत्वा वा धर्मदर्शिनां वा लेख्यानुसारेण सार्वजनिककार्येषु यथासंभवं तेषां विनियुज्यतां नियम्य क्वचिद्द्रव्यनिक्षेपालये तान्यक्षेपयम् । अनेकशः सार्वजनिककार्येष्वावश्यकतां प्राप्य यद्यप्यहमेतानि वस्तूनि विक्रीतुं सज्जस्थितस्तथापि तन्निरपेक्ष एव पुष्कलधनं संग्रहीतुमशकम् । अद्यापि तदेवापद्धनं तिष्ठति । अपि चैतदुपचीयमानं वर्तते ॥

एवं कृतवतो मम न कदाप्यनुत्साहोऽजनि । गच्छत्सु दिवसेषु मम भार्यापि तदौचित्यमजानात् । इदमस्मान् बह्वीभ्यो दुराशाभ्यस्समरक्षत् ॥

सार्वजनिकसेवासमुद्यतैर्महार्हबहुमानानि नैव स्वीकर्तव्यानीति दृढं मे मतम् ॥

त्रयोदशोऽध्यायः

पुनश्च हिन्दुस्थाने

इत्थमहं स्वदेशं प्रति प्रस्थितः । मार्गे ‘ मोरीश्यस’–द्वीपः प्राप्यत । तत्र नौकायानस्य चिरायावस्थानादवकाशमुपलभ्यावतीर्णस्तद्द्वीपस्य स्थितिगतीः प्रायः सम्यगेवाज्ञासिषम् । तत्रत्यराजकीयप्रतिनिधेः ‘ सर चार्ल्स ब्रस ’ महोदयस्य प्राघुणीभूय रात्रिमेकामत्यवाहयम् ॥

हिन्दुस्थानं प्राप्य कतिचिद्दिनानि देशपर्यटनेनायापयम् । तदानीमेकोत्तरनवशताधिकसहस्रतमो वत्सरः । तद्वर्षस्य राष्ट्रमहासभा कलकत्तानगरेऽधिनिवेष्टन्यभूत् । दीनशा-एदलजीवाच्छा (इदानीं ‘ सर ’ बिरुदधारी) महाशयेनाध्यक्षतापदमास्थेयमासीत् । अहमपि महासभामगच्छमिति न पृथग्वक्तुमावश्यकम् । अयमेव मे महासभायाः प्रथमोऽनुभवः । मोहमयीनगरात् सर-फिरोजशा-महेता-महाशयेनोपस्थितधूमशकट्यैवाहमपि प्रास्थिषि । यतस्तेन सह दक्षिणाफ्रिकादेशस्य स्थितिमधिकृत्य वक्तव्यं स्थितम् । स तावत् पृथगेकां शकटीं भाटयित्वा प्रयाणमकरोत् । राजवैभवेन जीवनमसौ निर्वाहयति स्मेति मम विदितमासीत् । प्रयाणमध्ये कंचित्कालं तदीयशकटीं प्रविश्य मया संभावितव्यमिति प्राप्तानुज्ञस्तदनुरोधेन तन्निर्दिष्टे लोहाध्वनिवेशने तस्य शकटीं गत्वा तमवालोकयम् । तदानीं वाच्छा-महाशयः श्रीमान् (अद्य ‘सर’ बिरुदधारी) चिमनलाल-सेतलवाड-महाशयश्च तेन सहोपविष्टावास्तम् । सर्वेऽप्येते राजकीयप्रस्तावांश्चचयन्ति स्म । सरफिरोजशामहाशयो दृष्टमात्रं मामकथयत् । गान्धे तव कार्यमुद्दिश्य न किंचित्कर्तुं शक्यत इति प्रतिभाति । त्वदिष्टानुरोधेन प्रस्तावं तावदङ्गीकुर्महे । किन्तु स्वदेशेऽप्यस्माकं कियानधिकारः । स्वविषय एव यावदधिकारोऽस्माकं न चलति तावत्स्वास्थ्यवर्तिनामस्मदीयानामवस्थापरिवर्तो दुर्लभ इति । अहमेतेन विस्मितानुतप्तोऽभवम् । अयमाशयः सेतलवाडमहाशयस्याभिमत एवालक्ष्यत । वाच्छामहोदयः सानुकम्पां दृष्टिं मयि व्यकिरत् । सरफिरोजशामहाशयं मदीयमतमङ्गीकारयितुमहं प्रायतिषि । नामतो राजत्वाभावेऽपि कार्यतो मोहमयीनगरस्य परिवृढत्वमधिगतस्य तस्याङ्गीकृतिं मादृशो जनः कथं संपादयेत् । तदहं महासभायां मदीयप्रस्तावोपस्थापनं तेनाभ्यनुज्ञातस्तावतैव समतुष्यम् ॥

प्रस्तावपत्रमारोप्य मे प्रदर्शयन्तु भवन्त इति वाच्छामहोदयो ममोत्तेजनप्रदित्सयाकथयत् । तस्मादहं मदीयकृतज्ञतां प्रख्याप्याव्यवहितोत्तरलोहाध्वनिवेशनस्थितायां धूमशकट्यां ततोऽवितीर्य स्वशाकटीमगच्छम् ॥

अथ कलकत्तानगरं वयमासादयाम । सभाध्यक्षः स्वागतमण्डल्या विभवोत्तरवसतिमनायि । मया कुत्र गन्तव्यमिति स्वयंसेवकमहमपृच्छम् । स मां रिपनमहाविद्यालयमनैषीत् । तत्र हि बहूनां प्रतिनिधीनां वसतिः परिकल्पितासीत् । मयाध्युषितविभाग एव मदीयभाग्यवशात्तत्रभवान् लोकमान्योऽप्यवर्तत । स च मदागमनादेकदिनोत्तरं तत्र प्राप्त इति स्मरामि ॥

निसर्गतो लोकमान्यस्य संनिधौ जनास्थानी सर्वदा वर्तते स्म । स च प्रदेशस्तत्रोपविष्टजनसमाज इत्येतत्सर्वं स्फुटं मे स्मृतिपथे वर्तते । यद्यहं चित्रकरोऽभविष्यं तदा मंचोपविष्टं तत्रभवन्तमचित्रयिष्यम् । तद्दर्शनार्थमागतेष्वसंख्येषु जनेष्वेकस्यैव नाम मयाद्य स्मर्यते । स च “ अमृत बझार ’ पत्रिकासंपादको मोतीलालघोषमहाशयः । लोकमान्यस्य ‘ हा हा ’ प्रहासा राज्याधिकृतानामन्यायवर्तनमधिकृत्य प्रवृत्तस्तयोरालापश्च दुर्विस्मरो भवति ॥

अथ तत्रत्यानि संविधानानि सविस्तरं परिशीलयिष्यामः । स्वयंसेवकाः परस्परं प्रतिबन्धमाचरन्ति स्म । कश्चिदेकस्मिन्कर्मणि नियुज्यमानःसद्य एवापरमाह्वयत् । स चान्यं स चान्यम् । एतन्मध्ये हन्त प्रतिनिधीनामवस्था त्वनिर्वचनीयासीत् ॥

कतिभिश्चित्स्वयंसेवकैरहं मैत्रीमकलयम् । तेभ्यो दक्षिणाफ्रिकासंबन्धिनः कांश्चिद्वृत्तान्तान् न्यवेदयम् । एतेन ते मनागजिह्युः । सेवायास्तत्त्वमेतान् बोधयितुमयतिषि । ते च तत्प्रायेणाबुध्यन्तेव । तथापि सेवा पानके निक्षिप्य प्राशयितुं न शक्यते । प्रथमं तावदिच्छा ह्यावश्यकी । ततोऽभ्यासः । ऋजुचेतसामेषामिच्छा प्रकाममासीत् । परं शिक्षणमभ्यासश्च कुतो लभ्येत । महासभा प्रतिवत्सरं त्रीणि दिनानि प्रचल्य ततो निद्रामभजत् । दिनत्रयं प्रचलति वार्षिकोत्सवे कियन्मात्रं ज्ञानमुदियात् । प्रतिनिधयोऽपि स्वयंसेवकानुरूपा एवासन् । तैर्लब्धं शिक्षणमपि तत्सदृशमेव तात्कालिकमेव च । ते स्वयं न किञ्चिदकुर्वन् । इदं कुरु – अदः कुर्विति सर्वदा स्वयंसेवकानाज्ञापयन्ति स्म ॥

अत्राप्यस्पृश्यतायाः साम्राज्यविलासः प्रत्यक्षीभवति स्म । द्राविडानां पाकशाला शालान्तरेभ्यो दवीयसिप्रदेशे संनिविष्टाभूत् । इमान्प्रतिनिधीन् दृष्टिदोषः स्पृशति स्म । (द्राविडदेशजा ब्राह्मणाः भोजनवेलायां इतरवर्णैर्दृष्टमात्रा अपि मालिन्यमाप्नुवन्ति । अत एव ते स्वगृहेषु बद्धकवाटा भुञ्जते ।) तस्मादेषां कृते महाविद्यालयस्यावरणान्तरे किलिंजकभित्तिभिः संवृता भोजनशाला पृथक्कल्पनीया भवेत् । सा च श्वासप्रतिरोधिना धूमजालेन परिपूर्णाभूत् । सैव पाकशाला सैव भोजनशाला सैव मज्जनशाला च । ततो बहिर्निर्गन्तुमवकाश एव नासीत् । सर्वमेतत्पश्यतो ममैते वर्णाश्रमधर्ममुपहसन्त इव लक्ष्यन्ते स्म । नानादिग्भ्यः समागत्य महासभायां

मिलत्सु प्रतिनिधिष्वेवैतादृगस्पृश्यताप्रसंगो यदि दृश्येत तदा तान्वृत्वा प्रेषितवत्सु जनेषु तया कियन्मात्रतया भवितव्यमित्यात्मन्येवाचिन्तयम् । इदं च स्मारं स्मारमहं दीर्घनिश्वासममुचम् ॥

मलीमसत्वं तु दुरन्तमासीत् । परीक्ष्यमाणे सर्वतः कच्चरमेव । मलागाराण्यल्पान्येवाविद्यन्त । दुर्गन्धं स्मरतो ममाद्यापि रोमहर्षो जायते । इदमहं स्वयंसेवकेभ्यः प्रादर्शयम् । ते तु विहस्य निःसंकोचमवदन्तदेतन्मलशोधकस्य कार्यं न पुनरस्माकमिति । एका शोधनी मे प्रदीयतामित्यहमपृच्छम् । ते मन्मुखमपश्यन् । अहमेकां मार्जनीं संग्रथ्य मलागारमशोधयम् । किं तु मय्येव तद्विश्रान्तिमगच्छत् । जनस्तोमस्यातिबाहुल्यान्मलागाराणामत्यल्पीभवनाच्च तानि वारं वारं संमार्जनीयान्यासन् । इदं मदीयशक्तिमतिक्रान्तमासीत् । तस्मान्मया स्वानुकूल्यमात्रमवेक्ष्य संतोष्टव्यमापतितम् । शेषास्तदशुचित्वं दौर्गन्ध्यं च नालक्षयन्त ॥

परं नैतावदेव । केचित्प्रतिनिधयः स्वकोष्ठस्य बहिर्वेदिकामेव रात्रौ मलविसर्जनस्थानं निःशङ्कमकुर्वत । प्रातरिदं स्वयंसेवकेभ्यः प्रादर्शयम् । शुचीकर्तुं न कोऽपि सज्जस्थितः । अहमेक एव तन्निर्मलीकरणमानपात्रमासम् । इदानीमत्रविषये महती व्यवस्थितिर्दृश्यते । तथाप्यद्यापि महासभामण्डपं स्वच्छन्दतो मलमूत्रादिना दूषयन्तो निर्विचाराः प्रतिनिधयो न किल न विद्यन्ते । न च सर्वे स्वयंसेवकाः शोधयितुं सदा सज्जस्थिता भविष्यन्ति ॥

महासभा तत्तादृशामेध्यमध्ये ततोऽप्यधिकदिनानि प्रचलेद्यदि व्याधिप्रसरणं निष्प्रतिबन्धं स्यादिति अहमलक्षयम् ॥

चतुर्दशोऽध्यायः

लेखको भृत्यश्च

महासभादिनद्वयात्परं मेलनीयाभवत् । तत्कार्यालये मदीयसेवा यदि स्वीक्रियेत तदा तत्र कार्यमनुतिष्ठतानुभवः संपादनीय इति निरचैषम् ॥

तस्मात्कलकत्तानगरप्राप्तिदिवसमेव स्नानादिकं निर्वर्त्य महासभायाः कार्यालयमगच्छम् । श्री. भूपेन्द्रनाथ-वसु-महाशयः श्री. घोषाल-महाशयश्च कार्यदर्शिनावभूताम् । आर्यभूपेन्द्रमुपेत्य मम सेवाभिलाषुकत्वमवेदयम् । स च मामभिवीक्ष्याकथयत्—मन्निकटे भवतानुष्ठेयं न किंचित्कार्यमस्ति । किं तु घोषालमहाशयः किमपि ते प्रयच्छेत् । तत्पार्श्वं याहीति ॥

श्रीघोषालमहाशयस्य पार्श्वमहमगच्छम् । स मामाशिरोऽङ्गुष्ठं बद्धदृष्टिरवलोक्यापृच्छत् । तवाहं परं लेखकोद्योगं प्रयच्छेयम् । अपि त्वमेनं कुर्या इति ॥

अहं प्रत्यवोचम्—अवश्यमेव करिष्ये । मदीयशक्तिमनतिक्रान्तमुद्योगं सर्वमपि चिकीर्षुः संनिधिमागतोऽस्मीति ॥

सैव खलु साध्वी भावनेति घोषालमहाशयोऽकथयत् । परितः स्थितान् स्वयंसेवकानभिवीक्ष्याब्रवीत्—ननु श्रुतमनेन युवकेनोक्तमिति । तदनु मामवोचत्— यदि तावन्निरूप्यतामत्र भूयांसि पत्राणि पतितस्थितानि । तानि सर्वाणि परीक्षेथाः । पश्य तत्रैवासंदी वर्तते । तामालभ्य कार्यमुपक्रमस्व । इह मत्पार्श्वमागच्छतः परःशताञ्जनान्ननु पश्यति भवान् । अहं किं कुर्वीय । किमहमेतानाभाषयेयमुताहो पत्रपुंजेषु मां निमज्जयतामेषां निरुद्योगिनां जनानामुत्तराणि लिखेयम् । कार्यमेतद्विधातुं मन्निकटे नैकोऽपि लेखको वर्तते । एषु पत्रेषु भूयिष्ठानि नैव मुख्यानि भवन्ति । तथापि त्वं सर्वाणि परीक्षस्व । यस्य यस्य पत्रस्य प्राप्तिः सा लेखतो निवेदयितव्येति मन्यसे तस्य तस्योत्तरं प्रेष्यताम् । यत्र पर्यालोच्य प्रतिवचनं देयं तन्मे विदितं कुर्विति । एतद्विश्वासेन ममानिर्वचनीयः प्रमोदः समजनि ॥

अस्मिन्कर्मणि मां नियुञ्जानस्य श्रीघोषालमहाशयस्य मत्परिचयो नासीत् । मन्नामप्रत्यभिज्ञादिकं तेन पश्चादबोधि ॥

मम कार्यं तल्लेखराशिपरीक्षणं मम सुकरमलक्ष्यत । प्रथमराशिरचिरेणैव समापितः । श्रीघोषालः सुतरामतुष्यत् । कथालापप्रसंगो हि तस्य स्वाभाविकः । अविच्छिन्नकथालापेनैव पंचषा होरास्तेन याप्यन्ते स्म । मत्सकाशान्मदीयचरित्रविस्तारमुपलभ्य स्वनियोगेन लेखकोद्योगे व्यापारितं च मां चिन्तयमानो मनागलज्जत । परमस्मिन्विषये तमेनमहं निश्चिन्तमकार्षम् । तथाहि मयोक्तम्—

अलं विचार्य । क्व यूयं क्व वाहम् । महासभासेवयैव वार्धक्यमाप्ता भवन्तः । अतो मे गुरुसमानाः । अयमस्मि परमनुभवशून्यः कनीयान् । अस्मिन् कर्मणि मां नियुञ्जानैर्भवद्भिर्बहूपकृतं मे । मम हि महासभाकार्यचिकीर्षा वर्तते । तत्कार्यकलापं विस्तरेणावगन्तुमपूर्वोऽवकाशः किल भवद्भिरदायीति ॥

श्रीघोषालमहाशयोऽचकथत् —

यत्सत्यमियमेव साध्वी वृत्तिः । आधुनिका युवकास्तु नैवं गृह्णते । आ तज्जन्मप्रभृति महासभामहं जाने । किं वहुना । अस्याः प्रतिष्ठापनप्रसङ्गे श्रीह्यूममहोदयेन मम सहभागित्वं विद्यत इति ॥ इत्थमावयोरुभयोरपि मैत्री समवर्धत । मध्याह्ने कमप्यभ्यवहारं सहैव करिष्यावह इति मामुपारुधत् ॥

श्रीघोषालमहाशयस्य भृत्यो निजस्वामिन आंतरकंचुकस्य बन्धनं घटयति स्म । तद्दृष्ट्वा तस्य कार्यमहमेवाकरवम् । ममेदमिष्टमासीत् । मम हि सर्वदा ज्येष्ठेष्वादरो महानभूत् । विज्ञातमदीयहृदयोऽयमात्मनोऽल्पसेवां कर्तुमवकाशं मे प्रयच्छति स्म । कंचुकस्य बन्धनं

Funding by IKS-MoE

घटयन्तं मां सास्मितमवादीत्—ननु प्रेक्ष्यताम् । महासभाकार्यदर्शी स्वकंचुके बन्धनं घटयितुमप्यवकाशं न लभते । सर्वदा यत्र क्वापि कर्मणि व्यापृतो भवतीति ॥

तस्यार्जवमनुध्यायतो मम यद्यपि हासोऽजायत' तथापि तत्सेवायामीषदप्यनादरो मम नोदपादि । एतत्सेवया कलितो लाभः परममूल्यो भवति ॥

कियद्भिरेव दिवसैर्मम महासभायाः कार्यचालनस्य मर्म हृद्गतमासीत् । भूयिष्ठानां नेतॄणामहं दर्शनमकरवम् । गोखले—सुरेन्द्रनाथ-प्रभृतीनां योधानां प्रवृत्तीरदर्शम् । कालं वृथाक्षिप्यमानमपश्यम् । अस्मदीयकार्येष्वाङ्ग्लभाषायाः प्रामुख्यतामालोकयम् । एतेन परं विषण्णोऽभवम् । शक्तिर्वृथाक्षिप्यते स्म । एकेन निर्वर्त्यं कर्म बहवोऽन्वतिष्ठन् । बहूनि महत्त्वपूर्णानि कार्याणि न कस्यापि कार्याण्यासन् ॥

मदीयमानसं यद्यपि दोषानिमान् सूक्ष्मतया न्यरूपयत् तथापि प्रकामोदारमासीत् । तस्मादहमात्मानमित्त्थमबोधयं यद्यथाकार्यं प्रचलति स्म ततोऽपि साधीयसा मार्गेण तच्चालयितुमशक्यं स्यादिति । इत्त्थमनुसंधानवशात्कार्यस्य कस्यापि न्यक्कृतिभावनाया नावकाशोऽभवत् ॥

पंचदशोऽध्यायः

महासभायाम्

अथ महासभामिलत् । रमणीयतया सज्जीकृतं महामण्डपं विभवोत्तरमाबद्धव्यूहं स्वयंसेवकगणं वेदिकामध्यासीनाञ्ज्येष्ठपुरुषांश्च निशामयन्नाश्चर्यचकितोऽभवम् । अस्मिन्महति समाजे क्वाहमिति विस्मयोऽजायत ॥

सभाध्यक्षस्य भाषणं तावदेकं पुस्तकमेवासीत् । तत्कालमस्यामूलान्तं वाचयितुमशक्यत्वादितः किञ्चित् ततः किंचिदुपादाय सभायां तदपाठि ॥

तदनु विषयानिर्धारिणीसमितेः सदस्यानां वरणं समवर्तत । गोखलेमहाशयो मां समितिकूटाननयत् ॥

सरफिरोजशामहाशयेन तावन्मदीयं प्रस्तावमङ्गीकर्तुं प्रतिपन्नमासीत् । किन्तु तेन स प्रस्तावो विषयसमितेः पुरो नेतव्यः कदा—इति चिन्तयन्नहमुपविष्टोऽभवम् । प्रतिप्रस्तावं दीर्घभाषणं चलति स्म । तच्च पुनराङ्ग्लेयभाषया । प्रतिनिर्णयमुपष्टंभको यः कोऽपि प्रख्यातनायकः पश्चादवतिष्ठते स्म । एतादृशभेरीनिर्घोषमध्ये मम शिञ्जनं कः शृणुयात् । यथा यथा निशामुखं प्रत्यासदत् तथा तथा मे हृदयं वेगेन धडधडायितुं प्रावृतत् । यथाहमिदानीं स्मरामि

Funding by IKS-MoE

तथा प्रस्तावा चरमगृहीता विद्युद्वेगेन व्यद्राव्यन्त । सर्वोऽपि ततो निर्गन्तुमुद्यतो भवति स्म । अथ रात्रावेकादशहोरावादनवेला समुपस्थिता । अहं वक्तुमधीरः स्थितः । प्रागेव मया दृष्टेन गोखलेमहाशयेन प्रस्तावो मदीयः पठित आसीत् । अहं तस्य पीठमुपसृप्य शनैरवोचम् । ,यथा कथापि भवद्भिरहमुपकर्तव्योऽस्मीति । स मामाह स्म । तव प्रस्तावो मया न विस्मृतः । इहत्यः संभ्रमो ननु प्रत्यक्ष एव । तथापि प्रस्तावमेनं विस्मर्तुं नाहमवकाशं दास्य इति ॥

अथ सरफिरोजशामहाशयोऽब्रवीत्—अद्यतनः कार्यकलापः समाप्तिमागतः खलु । तदनु गोखलेमहाशयः प्रोच्चैरघोषयत्—ननु दक्षिणाफ्रिकाप्रस्तावोऽद्यापि तिष्ठति । आर्यो गान्धिः कियता कालेन समीक्षमाणः स्थित इति ॥

अपि प्रस्तावोऽयं भवता दृष्ट इति सरफिरोजशामहाशयोऽपृच्छत् ॥

अथ किम् ॥

तमत्रभवान् कच्चित्संगतं मन्यते ।

संगतमस्ति ॥

यदि तावद्वाच्यतामिदानीं गान्धे ।

अहं कम्पमानस्तमवाचयम् ॥

अथ सर्वैरुद्घुष्टं सर्वसंमत्या स्वीकृतोऽयमिति ।

वाच्छामहाशयो मामवादीत्—गांधे इतःपरं सभायां भाषितुं तव निमिषपञ्चकमवकाशो विद्यत इति ॥

कार्यक्रमोऽयं न मां पर्यतोषयत् । प्रस्तावमर्थतो ग्रहीतुं न केनापि प्रायासि । सर्वोऽपि निर्गमनाय त्वरते स्म । गोखलेमहाशयेन प्रस्तावो दृष्ट इति हेतोरन्यैस्तस्य पठनमवबोधश्च नावश्यक इति बतामन्यत ॥

अथ निशा प्रभाता । तद्दिने मया भाषितव्यमधिकृत्याहमचिन्तयम् । पञ्चभिर्निमिषैः किं भाषितव्यम् । सम्यग्गृहीतविषयस्यापि यथोचितशब्दानां न स्फूर्तिरासीत् । भाषणं विलिख्य न पठितव्यं किन्तु तत्रैव स्थित्वा भाषितव्यमिति पूर्वमेव निश्चयोऽकारि :। परंत्वसक्तमुपन्यासितुं दक्षिणाफ्रिकादेशे यथा यः कृतोऽभ्यासः सोऽत्र विलुप्तिं गत इवालक्ष्यत ॥

उपनते मदीयप्रस्तावसमये वाच्छामहाशयो मन्नामधेयमघुषत् । अहमुत्थाय स्थितः । मम शिरो घूर्णति स्म । कथं कथमपि प्रस्तावमवोचयम् । तत्र कश्चित् स्वप्रणीतं पद्यप्रबन्धमेकं मुद्रापयित्वा प्रतिरूपकाणि प्रतिनिधिभ्यः संव्यभाजयत् । स च विदेशयानसमुद्रलंघनप्रस्तावको ग्रन्थः । अहमेकं पद्यं वाचयित्वा दक्षिणाफ्रिकादेशेऽस्मदीयजनानां क्लेशजातमुद्दिश्य द्वित्रवचनान्यब्रवम् । तत्कालमेव वाच्छामहाशयो घण्टामवादयत् । भाषमाणस्य ममाद्यापि पञ्चनिमिषा न व्यतीता इत्यहं दृढमवदम् । शिष्टेऽपि निमिषद्वये प्रागेव मम प्रबोधनाय घण्टा

वादितेति न मे विदितमासीत् । अन्येषु होरार्धकालं पादोनहोराकालं च भाषमाणेष्वपि घण्टा न वाद्यते स्मेति मया प्रत्यक्षीकृतमासीत् । तस्मादहं विषण्णो घण्टावादनोत्तरक्षणमेवोपविष्टोऽभवम् । तथापि मदीया बालबुद्धिस्तत्पद्यमेव सरफिरोजशामहाशयस्य प्रत्युत्तरमासीदित्यमन्यत । महासभया प्रस्तावस्य स्वीकृतिप्रकारं प्रति किमु वक्तव्यम् । तदात्वे प्रतिनिधीनां प्रेक्षकाणां च भेदबाहुल्यं नादृश्यत । सर्वेऽपि हस्तमुदयच्छन्त । सर्वेऽपि प्रस्तावा ऐकमत्येन स्वीचक्रिरे । मदीयप्रस्तावस्यापि गतिरभिन्नैवासीत् । तस्मान्मदीयदृष्ट्या प्रस्तावस्य महत्त्वं सर्वमप्यस्तमितमेव । तथापि महासभया स्वीकृत इत्येतावदेव ममानन्दमुत्पादयितुं पर्याप्नोत् । महासभायाः संमतिर्नाम निखिलभारतवर्षस्य स्वीकारचिह्नमित्येषा भावना कस्य वा प्रमोदं न जनयेत् ॥

षोडशोऽध्यायः

लॉर्डकर्झनराजास्थानम्

महासभामेलनं तावदवसितमासीत् । किन्तु दक्षिणाफ्रिकादेशार्थे मया व्यापारमण्डली (चेम्बर आफ् कामर्स) प्रभृतयः संस्था द्रष्टव्या अभूवन् । इदमुद्दिश्य कलकत्तानगरेऽहमेकमासमतिष्ठम् । अस्मिन्नवसरेऽहमतिथिमन्दिरे स्थितिमगृह्णनावश्यकं परिचयं प्राप्य 'इंडिया क्लब' इत्यत्र कोष्ठमेकं यत्नतः समपादयम् । अस्याः संस्थायाः सदस्येषु केचन प्रमुखा भारतीया आसन् । तत्परिचयं संपाद्य दक्षिणाफ्रिकादेशस्य कार्यमुद्दिश्य तेषु किंचित्कुतूहलमुत्पादयितुमाशा मनस्यासीत् । एतत् 'क्लब्-मन्दिरं' गोखलेमहाशयो 'बिलियर्ड' क्रीडार्थमायच्छति स्म । कलकत्तानगरे मया कियन्तं कालं स्थीयत इति ज्ञात्वा स्वमन्दिर एव वस्तुं मामामन्त्रयत् । तदामन्त्रणमहं कृतज्ञतापूर्वकमङ्गीकृतवान् । किं तु स्वयमेव तत्र गमनं मे नारोचत । स च मामेकाहं वा दिनद्वयं वा प्रतीक्ष्य स्वयमेवागत्य गृहमनैषीत् । मदीयसंकोचप्रकृतिमवबुध्य सोऽभ्यधात् । तथा आर्या गांधिमहाशयाः भवद्भिरस्मिन्नेव देशे किल स्थातव्यम् । तस्मादेवंविधः संकोचो न युज्यते । यावद्भिः शक्यं तावद्भिर्जनैः सह संबन्धो भवद्भिर्घटनीयः । महासभायाः कार्यं भवद्भिः करणीयमित्यस्ति ममाभिलाष इति ॥

गोखलेमहाशयेन सह ममावस्थितिं प्रकृत्य वृत्तान्तो यावन्न वर्ण्यते तावन्मम 'इंडिया क्लब' मन्दिरे संवृत्तः कश्चिदनुभवो निगद्यते ॥

प्रायोऽस्मिन्नेव समये चक्रवर्तिप्रतिनिधिना लॉर्डकर्झनमहोदयेन कल्पिता राजसभा प्राचलत् । तदर्थमाहूताः कतिपये राजानो महाराजाश्चैतत् 'क्लब् मन्दिरं' अध्यवसन् । तत्र-

स्थितैरेतैः सुन्दरं वंगदेशीयमन्तर्नेपथ्यकवचप्रावारकं धार्यमाणं मया प्रत्यक्षीक्रियते स्म । राजसभोपस्थानदिवसे भरण्यभुज इवाप्रपदीनायुष्णीषान् विराजमानचार्मणपादूश्च तेऽधारयन्त । इदमालोकमानस्य मम विषादोऽजायत । तेषामेकमहमपृच्छम् — कुतोऽयं वेषपरिवर्तनमिति ॥

स च प्रत्यवादीत् – यथास्मदीयदुःखमस्मद्वेद्यमेव । स्वविभवबिरुदसंरक्षणाय कियन्तो वापमानाः सोढव्या इत्यन्ये कथं जानीयु इति ॥

“परमेतानि भुजिष्यधार्याणि शिरोवेष्टनानि तद्योग्याः पादुकाविशेषाश्च कुतो धार्या ते।”

भुजिष्याणामस्माकं च वैलक्षण्यमस्तीति किं भवन्तो मन्यन्ते । यथामी गृहे नः किंकरास्तथा वयं च लॉर्डकर्झनस्वामिनः किंकराः स्मः । यद्यहमेतस्यां सभायां न संनिधास्ये तदा तत्फलं मयानुभवितव्यं स्यात् । सामान्यवेषधारी यद्यहमुपतिष्ठेयं तथापि दोषत्वेन गण्यते । अथ चैवात्मानं संनह्य तत्रोपसृप्तवतः कर्झनप्रभुणा सहालपितुमवकाशो लभ्यत इति किं भवन्तो मन्यन्ते । लेशतोऽपि न हीति ॥

ऋजुहृदयमित्रस्य दशां दृष्ट्वा मम कारुण्यमुदपद्यत ॥

एतदुपोद्घातादीदृशस्यैवान्यस्य राजास्थानस्य स्मृतिरायाति ॥

लॉर्डहार्डिंगमहोदयेन यदा काशी-हिन्दु-विश्वविद्यालयस्य प्रतिष्ठा कृता तत्कालं तदास्थानमचलत् । तदानीमपि राजमहाराजकदंबकं मिलितमासीत् । मयापि तत्र संनिधातव्यमिति भारतभूषणश्रीमालवीयमहाशयैः सोपरोधमामंत्रितः सन्नहमप्यगच्छम् ॥

परं वनिताजनयोग्यवेषधारिणो महाराजांश्च वीक्ष्य विषादमगमम् । अहो कौशेयाप्रपदीनं कौशेयदीर्घकवचः उरसि वज्रमौक्तिकहाराः बाह्वोरंगदबन्धा उष्णीषोपरि वज्रमौक्तिकस्तबकाः । एतैः सह सौवर्णकोशनिविष्टाः खड्गलताः कटिबंधतोऽप्यालम्बन्त ॥

एतानि न तेषां राज्याधिकारस्य चिह्नानि परं तदीयदासत्वस्य बहल्लाञ्छनानीत्यहमवेदिषम् । तेऽमी निजनैर्बल्यचिह्नानि एतानि स्वच्छन्दतः पर्यगृह्णन्तेति ममासीन्मनीषा । परंतु पश्चादवगतं मया यदेवंविधेषु संमेलनेषु राजभी रत्नभरणान्येतानि अवश्यमेव प्रतिमोक्तव्यानीति नियमो विद्यत इति । अन्यच्च मया विज्ञातं यदेवं भूषणैरात्मनः परिष्कारः केषांचिन्नितान्तमसह्यमासीत् तैश्चाभरणान्येतादृशेष्वेव संदर्भेष्वधार्यन्त न पुनरन्यदेति ॥

एतद्वचनं कियत्सत्यतामालंबत इत्यहं न जाने । परन्तु तैरेतदाभरणजातमन्यदा धार्यतां न धार्यतां वा तथापि सार्वभौमप्रतिनिधेरास्थाने महिलाजनयोग्यैर्भूषणैरात्मानमलंकृत्य तैः संनिधातव्यमिति नियमो न किं नितान्तविषादकरः ॥

अहो धनसंपत्तिप्रभुत्वमहत्त्वाभिमानैर्मनुष्यः पापानर्थरूपं कियच्छुल्कं प्रदाप्येत ॥

सप्तदशोऽध्यायः

गोखलेमहाशयेन सहैकमासः (१)

गोखलेमहाशयः स्वगृहे मदागमनप्रथमदिनात्प्रभृति यथा मम पारक्या बुद्धिर्न संभवेत्तथा संव्यधात्। कनीयसि भ्रातरीव मय्यवर्तत। मदपेक्ष्यमखिलं ज्ञात्वा तदनुकूलसंविधानान्यकारयत्। भाग्यवशान्मदपेक्ष्यमत्यल्पमेवासीत्। स्वकार्याणि स्वयमेव कर्तुमभ्यस्ततया ममान्यसेवासापेक्षता प्रायो नासीत्। मदीया स्वावलंबनता मदीयमङ्गशौचं वस्त्रशौचं च मदीय उद्यमो नियमाचरणं चैतत्सर्वं तस्य मनागाहत। एतदवलोक्य मम विस्मयं जनयन् परं मामश्लाघत ॥

सर्वमात्मगतं मयि विस्रंभेण प्राकाशयत्। स्वसंनिधिमागतानां प्रमुखपुरुषाणां परिचयं मामकारयत्। तेषां जनानामिदानीं डाक्टर (अद्य 'सर' विरुदधारी) प्रफुल्लचन्द्र-रॉयमहाशयः सुस्पष्टं मे स्मृतिमायाति। स हि गोखलेभवनस्य समीप एव कृतनिवासः सर्वदा तत्रागच्छति स्म। तस्य परिचयं मामेवं बोधयन्नकारयत् —

“इमे खलु प्रतिमासमष्टशतरूप्यकाणामर्जितारोऽपि स्वकीयव्ययार्थं परं चत्वारिंशद्रूप्यकान्निक्षिप्य शेषमखिलं सार्वजनिककार्येषु विनियुञ्जानाः प्रोफेसररॉयमहाभागाः। अनूढा इमे। न च विवाहयितुमिच्छन्तीति ॥”

अभ्याद्यतनरॉयमहाशयस्य तदानींतनाध्यापकरॉयमहाशयस्यापि न कोऽपि भेदो दृश्यते। पूर्वं यथा साधारणं नेपथ्यमपोषयत् सांप्रतमपि तथैव सामान्योऽस्य वेषः। परमिदानींतनं 'खादीवास' इति विशेषः। पूर्वमेभिः खादीवसनं न धार्यते स्म परं स्वदेशशिल्पालयोत्पन्नं वासः। गोखले-डाक्टर-रॉय-महाशयोः कथालापेन नाहमतृप्यम्। स हि कथालापो देशसंबन्धिनां वा विषयाणां चर्चाज्ञानमधिकृत्य वा जिज्ञासा समासीत्। कांश्चिद्विषयानाकर्णयतो मम दुःखं च जायते स्म। ते हि विषया नेतॄणां दोषोद्घाटनरूपा अभूवन्। यानहं महायोद्धृनगणयं तेऽमी क्षुल्लका इति मे बुद्धिरुदेतुमारभत ॥

गोखलेमहाशयस्य कार्यानुष्ठानरीतिर्यथा प्रमोदकरी तथा शिक्षाप्रणयिनी च। असौ नैकमपि क्षणं वृथाक्षपयत। तस्य कथालापस्य संबन्धाः सर्वेऽपि देशकार्यार्थमेव। तद्वाक्यमसत्यस्य छायामपि कार्पण्यस्य चिह्नमपि नाविरकरोत्। हिन्दुस्थानस्य पारतन्त्र्यं दारिद्र्यमित्यादिकमेव सर्वदा तस्य चिन्ताहेतुरासीत्। कार्यान्तरेषु तं प्रवर्तयितुं बहवो जनास्तमुपसर्पन्ति स्म। ते सर्वेऽप्येकमेवोत्तरमलभन्त। तद्यथा—

“एतत्कार्यं युष्माभिरेव क्रियताम्। मत्कार्यमनुष्ठातुं मां मुञ्चत। देशस्य स्वातन्त्र्यसंपादनं तावन्मयापेक्षितम्। तस्मिन् प्राप्ते कार्यान्तरं मे बोधयत। अद्य पुनरेतत् कार्यैकव्यवस्य मम क्षणमात्रमवकाशो वा एकश्वासशक्तिर्वा नावशिष्यत इति ॥”

Funding by IKS-MoE

रानडेमहाशये तस्य गौरवं तु वाचि वाचि प्रत्यक्षीभवति स्म । तथाहि । रानडेमहाशयाः प्राहुरिति वाक्यं तस्य वेदोक्तिरासीत् । तदेतत्परमप्रमाणतया तेनोपन्यस्यते स्म । तत्र स्थिते मयि रानडेमहाशयस्य जयन्ती (पुण्यतिथिर्वा न सम्यक् स्मरामि ।) समागता । अयमुत्सवो गोखलेमहाशयेन नियमेन निरवर्त्यत । तस्मिन्नवसरे तदीयसुहृदौ प्रोफेसर-काथवटे-महाशयोऽन्यः कश्चन प्राड्विवाकश्च (सबजज) जयन्त्युत्सवार्थमामन्त्रितौ संन्यधिषाताम् । तदानीं रानडेमहाशयमधिकृत्य निजस्मृतिपथवर्तिनः कांश्चिद्वृत्तान्तान् गोखलेमहाशयोऽवर्णयत् । रानडे-तेलंग-मंडलिक’ इति त्रयाणां पुरुषाणां परस्परं तारतम्यमदर्शयत् । तेलंगमहाशयस्य मनोहरां भाषणशैलीमश्लाघत । मांडलिकं सुधारकदृष्ट्या प्राशंसत । व्यवहारिजनं प्रति तस्य कर्तव्यपालनं दृष्टान्तयितुमेकां लघ्वीं कथामकथयत् । तथाहि । तद्दिनस्य धूमशकटी तदागमनात्पूर्वमेव प्रचलिता । ततो यां स्वकार्यिकस्य व्यवहारमुद्दिश्य काले न्यायसभां जिगमिषुः पृथग्धूमशकटीमेकां भाटयित्वा प्रस्थित इति । अथ रानडेमहाशयस्य सर्वतोमुखीनां शक्तिमुपवर्ण्य यथासौ महापुरुषस्तत्कालीनसर्वनायकानप्यत्यशेतेति प्रादर्शयत् । रानडेमहाशयो न केवलं परमनिष्णातः प्राड्विवाकोऽभूदपि तु प्रगल्भतमोऽयमितिहासकृदर्थशास्त्रवेत्ता सुधारकश्चासीत् । असौ राजकीयाधिकारी भवन्नपि धीरस्वभावः प्रेक्षको भूत्वा महासभामागच्छति स्म । तदभिज्ञतां प्रति सर्वोऽपि तथा व्यश्वसीद्यथास्य निर्णयः समस्तैरपि निर्विवादमङ्गीक्रियते स्म । एवं स्वगुरोः समवायिनीं बुद्धिशक्तिं हार्दिकगुणसंपत्तिं च वर्णयतो गोखलेमहाशयस्यानन्दो नात्मनि प्राभवत् ॥

तत्कालं गोखलेमहाशयस्तुरंगरथमेकमस्थापयत् । तद्रक्षगमस्य कथमावश्यकं संवृत्तमिति न मे विदितमासीत् । अस्मिन्विषये मदीयमसंतोषं तस्मै न्यवेदयम् । स मयाप्रच्छि । विद्युद्यानेन (ट्राम) भवद्भिः कुतो न गन्तव्यं एवं कृते नायकानां गौरवं किं परिहीयेतेति ॥

इदं श्रुत्वा स मनाग्विषण्णः प्रत्यवादीत्—

भवानपि मे हृदयमवगन्तुं किं न शक्नोति । न्यायविधायकमंडलात्प्राप्तं यद्धनं तत्स्वार्थे न व्ययिष्यामि । विद्युद्यानेन गच्छतो युष्मानवलोकमानस्य ममासूया जायते । किन्तु स्वयमपि तथा कर्तुं न शक्नोमि । अहमिव भवानपि यदि सार्वजनिककार्येषु तीव्रकुतूहली स्यात् तदा भवतोऽपि विद्युद्यानेन प्रयाणं न संभाव्येत । पर्यन्ते कष्टमप्यनुभवितव्यम् । नायकैर्यद्यत्क्रियते तत्सर्वं तत्सुखार्थमेवेति भावना निराधारा । भवदीयमार्जवं मन्मनः प्रीणयति । यावच्छक्यमहमपि सरलतां पालयामि । परमस्मादृशानां बहवो व्यया अनिवार्या भवन्तीति । एवं मदसमाधानकारणमेकं स न्यवर्तयत् । परमन्यत्तथापनेतुं नाशकत् ॥

अथाहमपृच्छम्—

“ ननु विहारार्थमपि भवन्तो न गच्छन्ति । एवं स्थिते भवतामस्वास्थ्यप्राप्तौ किमाश्चर्यम् देशकार्यव्यग्राणां भवतां व्यायामार्थमप्यवकाशः किं दुर्लभ इति ॥ ”

Funding by IKS-MoE

विहाराय लब्धक्षणोऽहं किं भवता कदापि दृष्ट इत्युत्तरमागतम् ॥

गोखलेमहाशयं प्रति ममादरो गौरवं च तथाभूते यथास्य प्रत्युत्तरं मया न दीयते स्म । उपरिनिर्दिष्टेन तस्य वाक्येन यद्यपि न मे मनः समाधीयत तथाप्यहं तूष्णीमभवम् । कार्यबाहुल्ये सत्यपि यथा वयं भोक्तुमवकाशं लप्स्यामहे तथैव व्यायन्तुभ्यमप्यवकाशोऽस्माभिरवशेषणीय इत्यहममंसि । अधुनापि तथा मन्ये । एतेन हि कार्यशक्तिरभिवर्धते । न पुनरपक्षीयत इति ममाशयः ॥

अष्टादशोऽध्यायः

गोखलेमहाशयेन सहैकमासः (२)

गोखलेगृहमधिवसता मया सर्वोऽपि कालो गृहान्तरेव न यापितः । प्रतिज्ञातपूर्वं हि मया दक्षिणाफ्रिकानिवासिभ्यः क्रैस्तमतेभ्यो यदहं हिन्दुस्थानवर्तिभिः क्रिस्तमतावलंबिभिर्मिलितः संस्तदीयस्थितिगतीः परिचेष्यामीति । श्रुतपूर्वं च मया बाबुकालीचरणबॅनरजीमहोदयस्य नाम । स मे परं गौरवास्पदमासीत् । स किल महासभायां मुख्यपात्रं वहति स्म । सामान्यतो हिन्दुस्थानवर्तिनः क्रैस्तमतीया महासभामप्रविशन्तो हिन्दुमुसलमानजनान् दूरीकुर्वन्ति स्म । तस्मादमीषु यथा मे भयसंशयास्तथा श्रीकालीचरणमहाशयेनासीत् । तमेनं द्रष्टुमिच्छामीति गोखलेमहाशयमवेदयम् । स चाकथयत्—' तदुपसर्पणेन किमिव हि प्रयोजनम् ' । नूनमसौ साधुजनः । तथापि त्वामयं न परितोषयेदिति मन्ये । तमहं सम्यग्जाने । असौ सर्वथा द्रष्टव्य एव चेदवश्यं दृश्यतामिति ॥

बॅनरजीमहाशयस्य दर्शनार्थे विज्ञाप्तिर्मया प्रेषिता । सद्य एव तेनापि तत्प्रतिपन्नम् । तत्पार्श्वमुपगते मयि तद्भार्या मुमुर्षुश्शयितेत्यवेदिषम् । तस्य मन्दिरं निराडम्बरमासीत् । महासभायां यः कवचाप्रपदीनधारी दृष्टस्तमेवाद्य गृहे बङ्गीयवसनाङ्गीकाधरं साक्षात्कृत्य प्रमुदितोऽभवम् । यद्यपि तदानीमहं पारसीकवचाप्रपदीनधारी तथापि तदीयं सरलजीवनं मे नितान्तमरोचत । कमप्युपोद्घातमन्तरेणैव मम क्लेशानवर्णयम् । स मामपृच्छत्—दुरितभारभृत एव वयं जन्म गृह्णीम इति भवद्भिः किं श्रद्धीयते । अहं श्रद्दध इत्यवोचम् । अथ सोऽब्रवीत् । एवं तर्हि तस्यास्य मूलपापस्य निवृत्तिर्हिन्दुधर्मे न दृश्यते । क्रैस्तधर्मे तु तन्निवृत्तिमार्गो दर्शितः । पापस्य प्रायश्चित्तं मरणम् । तथाहि बाइबलवचनम्—क्रिस्तप्रपत्तिरेकैव मुक्तेर्मार्ग इति ॥

Funding by IKS-MoE

श्रीभगवद्गीतासु प्रतिपादितं भक्तिमार्गमहं न्यरूपयम् । परमिदं निष्प्रयोजनमासीत् । तस्य सौजन्याय तमहमवन्दिषि । यद्यपि सर्वात्मनाहं न परितुष्टस्तथापि तद्दर्शनान्मम लाभ एवासीत् ॥

आमासान्तमहं कलकत्तानगरे वीथ्यां वीथ्यामचारिषम् । संचारो भूयसा पादचारेणैव निरवर्त्यत । एतत्कालमेव जस्टिसमित्रमहाशयस्य सरगुरुदासबॅनरजीमहाशयस्य च दर्शनं मयाकारि । दक्षिणाफ्रिकादेशकार्यस्य कृते तयोः साहायकं ममावश्यकमासीत् । अस्मिन्नेव समये सरप्यारीमोहनमुकरजीमहाशयं चाहमदर्शम् ॥

कालीचरणबॅनरजीमहाशयः कालिकादेवालयमधिकृत्य पुरा कथालापमकार्षीत् । तद्देवालयदिदृक्षा मम तीव्राभवत् । तद्विषयको वृत्तान्तः पुस्तकेषु मया पठितपूर्व आसीत् । तस्मादहमेकदा तत्रागमम् । न्यायमूर्तिमित्रमहाशयस्य मन्दिरं तस्यामेव वीथिकायामवर्तत । अतोऽहं तद्दर्शनदिवस एव कालिकादेवालयमुपागच्छम् । कालिकाया उपहारीकर्तुं वृन्दशो नीयमानानवीनवालोकयम् । देवस्थानवीथ्यां वनीपकव्यूहः पङ्क्ति बध्वा व्यतिष्ठत । तत्र धार्मिकभिक्षुका विरागिजनप्रभृतयोऽप्यविद्यन्त । तदा हृष्टपुष्टानां याचकानां भिक्षाप्रदानं सर्वथा दोष एवेति तदानीमप्यहममंसि । एषामेकः संघातो मामन्वागच्छत् । तन्मध्यादेकः प्रधानभिक्षुस्तत्रोपविष्टो दृष्टः । अये वत्स क्व गन्तासीति स मामपृच्छत् । अहमुत्तरमदाम् । सहचरद्वितीयं मामसावुपविश्यतामित्यगादीत् । वयं तथैवाकुर्महि ॥

अस्याविकवृंदस्योपहारीकरणं किं धर्म्यं मन्यन्ते भवन्तः इत्यहमप्राक्षम् । प्राणिनां हिंसनं धर्म इति को वा मन्यत इति । स प्रत्यवोचत् ।

“ यदि तावदधर्मोऽयमिति कस्माद्भवद्भिर्लोका न बोध्यन्ते ।

“ तदेतदस्मत्कार्यं न भवति । भगवद्भजनं खलु नः कार्यम् । ”

“ भगवद्भजनाय स्थानमन्यत्किं न विद्यते । ”

“ अस्माकं सर्वेऽपि प्रदेशाः समानाः । लोकास्तावदविवृन्दसदृशाः यत्र महद्भिः कृष्यन्ते तत्र ते प्रसर्पन्ति । न खलु तत्कार्यमस्माकं साधूनाम् ॥

अस्याश्चर्चाया विरम्य देवस्थानमत्रजाम । अस्मत्पुरस्ताच्छोणितनिर्झरः प्रवहति स्म । नाहं तत्र स्थातुमशकम् । क्वथ्यमानचेतसो मम चित्तभ्रांतिरजनि । तद्दर्शनमिदं नाद्यापि विस्मृतम् ॥

सायं तस्मिन्नेवदिने कतिपयवंगमित्रैः सह भोजनायाहं निमन्त्रितः । तत्राहमेकेन सख्या नृशंसमिदं पूजाविधानमधिकृत्यालापिषम् । स चाचकथत् । तत्र किल भेर्यः प्रहण्यन्ते । दंध्वन्यमानेषु तेषु न हि वेदनामवयः संविदत इति ॥

एतत्प्रतिवचनं न मे गलस्याधस्तादवातरत् । यद्यावयो भाषितुमशक्ष्यंस्तदा तत्कथा ह्यन्यैवा भविष्यदित्यहं मित्रमवोचम् । नृशंसोऽयमाचारः प्रतिरोद्धव्य इत्यहममंसि । भगवतः बुद्धदेवस्य पुरातनी कथा मम स्मृतिमागात् । किन्तु कार्यमेतन्मदीयशक्तिमतिक्रान्तमित्यहमवेदिषम् ॥

पुरा किल यथाहममंसि तथैव संप्रत्यपि मन्ये । न खलु मनुष्यप्राणापेक्षया अवेः प्राणा निकृष्टा भवितुमर्हन्ति । नरदेहस्य कृतेऽवेः प्राणहिंसनं नाहमनुमोदे । एते प्राणिनो मानुषक्रौर्यस्य विषयीकृता यथा शरणविधुरा भवन्ति तथा मनुष्येण सनाथीकृतास्ते सर्वदा रक्षणीया इति ममाभिप्रायः । किन्तु तादृशसेवायोग्यताविहीनः पुरुषः स्वाश्रयमप्येतादृशं तेषां प्रदातुमनर्हः । अवीनामिदं निकुरंबं पापपरिप्लुतादस्माद्बलिविधानाद्रक्षितुं मत्तः समधिका त्यागसंपत्तिरात्मशुद्धिश्चावशक्यौ भवतः । अद्यत्वेऽहमेतयोरात्मशुद्धित्यागयोः कृते परं चाक्रंद्यमानो मुमूर्षुरिवास्मि स्थितः । मानवकोटिमस्मान्महापातकात्समुद्धृत्य निर्दोषिणो जनान्परिपाल्य देवालयान्पवित्रीकुर्वन्महाकारुण्यशाली तेजस्वी कश्चनपुरुषधौरेयः काचन साध्वीमणिर्वावतरत्विति निरन्तरमहं प्रार्थये । प्राज्ञा बुद्धिकुशला प्रेममयी बंगमाता कथमिदं सहेत ॥

एकोनविंशोऽध्यायः

गोखलेमहाशयेन सहैकमासः (३)

धर्मोपदेशेन काल्यै प्रदीयमानं घोरबलिं निशम्य बंगानां जीवनरीतिमवगन्तुमाकांक्षा ममोदपद्यत । ब्रह्मसमाजवृत्तान्तः प्रागेव मया बहुशः पठितः श्रुतपूर्वश्च । प्रतापचंद्रमजुमदारस्य जीवनचरितं भूयसाहमवेदम् । श्रुतपूर्वाश्च केचित्तदीया उपन्यासाः । तेन प्रणीतं केशवचन्द्रसेनस्य जीवनकथापुस्तकं संपाद्य महतोत्साहेन तत्पठित्वा साधारणब्रह्मसमाजस्यादिब्रह्मसमाजस्य च भेदमग्रहीषम् । पंडितशिवनाथशास्त्रिणोऽहमदर्शम् । अध्यापककाथवटेद्वितीयोऽहं महर्षिदेवेन्द्रनाथ-ठाकूरमहाशयस्य दर्शनार्थमगमम् । तदानीं तं द्रष्टुमवकाशो न दीयते स्म । अतस्तद्दर्शनमशक्यमासीत् । तथापि तत्र प्रचलति ब्रह्मसमाजोत्सवे आवामामंत्रितावभूवे । तत्र नौ मनोहरबंगसंगीतश्रवणसौभाग्यमुपानमत् । तदाप्रभृत्यहं बंगसंगीतप्रियोऽस्मि ॥

प्रायः परिशीलितब्रह्मसमाजवृत्तस्य मम श्रीविवेकानन्दस्वामिनां दर्शनमकृत्वा तूष्णीमवस्थानं न शक्यमासीत् । तस्मादहं महतोत्साहेन बेलूरमठं प्रत्यशेषमध्वानं वा तदध्वनो भूयिष्ठभागं वा नेदानीं स्मर्यते — पादचारेणागच्छम् । जनसामान्यक्षुण्णमार्गाद्दवीयसि प्रदेशे संनिविष्टोऽयं

Funding by IKS-MoE

मठो मदीयमानसमप्रीणयत् । स्वामिनामस्वस्थतया तद्दर्शनस्य दुर्लभत्वं तत्कालमेषां स्वकीये कलकत्तामन्दिरे चावस्थानमाकर्ण्य मम दुःखमाशाभङ्गश्च जायेताम् ॥

तदनु श्रीमत्याः भगिनीनिवेदिताया मन्दिरमन्विष्य तां चोरंघीवीथ्यां क्वचिद्दिव्यभवने साक्षादकरवम् ॥ समन्तात्तदीयवैभवमालोक्य मम विस्मयोऽभूत् । आवयोः कथालापेषूभयसामान्यो भागः ,स्वल्प एवासीत् । कृतैतत्प्रस्तावं गोखलेमहाशयो मामवादीत् यदस्याश्चंचलप्रकृतेस्तव च सामान्यत्वाभावो नाम न मे विस्मयावह इति ॥

तामहं पुनः श्रीपेस्तनजी-पादशाहस्य भवनेऽपश्यम् । यावत् सा पादशाहस्य वर्षीयस्या ,जनन्या सहालपितुमुद्यता तावदहं तत्रोपस्थितः । ततोऽहमनयोर्द्विभाषित्वमशिश्रियम् । यद्यपि तदभिप्राया मम नानुमोदनीया आसंस्तथापि तां हिन्दुधर्मे प्रेमवृष्टिमापातयन्तीमवशः सन्नस्तौषम् ॥

प्रतिदिनमहं दक्षिणाफ्रिकादेशव्यतिकरमुद्दिश्य कलकत्तानगरस्य प्रमुखान् दर्शं दर्शं तत्रत्या धार्मिकसार्वजनिकसंस्थाः परीक्ष्य तद्वृत्तांतान् ज्ञायं ज्ञायं कालमत्यवाहयम् । एकदा डा. मालिकमहाशयस्याध्यक्षतायामहं हिन्दुस्थानीयशुश्रूषादलेन बोअरयुद्धे कृतां सेवामधिकृत्य व्याख्यानमेकमदाम् । अस्मिन्नवसरेऽपि मम 'इंग्लिशमॅन' पत्रिकया सह भूतपूर्वः परिचयः साहाय्यमकरोत् । सॉण्डर्समहाशयश्च रुग्णशयितोऽपि षण्णवत्युत्तराष्टशताधिकैकसहस्रतमे वत्सरे तेन यावत्साहाय्यमकारि तावत्साहाय्यमद्याप्यकरोत् । गोखलेमहाशयस्तमेनं मदीयमुपन्यासमश्लाघत । डा. रायमहाशयेन च स्तूयमानमाकर्ण्य नितान्तममोदत ॥

इत्थं गोखलेभवनवासो मम कलकत्तानगरे निर्वर्तनीयं कार्यं नितरां सुगममकार्षीत् । वंगप्रमुखानां कुलैः परिचयसंपादनायावकाशमदात् । बंगदेशेन सह मदीयनिकटसंबंधप्ररोहस्य वीजमवाप्सीत् ॥

स्मरणीयस्यास्य मासस्य बह्व्यः स्मृतयोऽत्र परित्यक्तव्याः । अथाहमिदानीं त्वरयालोर्मम ब्रह्मदेशगमनं तत्र फुंगीसंज्ञकानां भिक्षूणां दर्शनं चोपवर्णयिष्यामि । तेषामलसत्वमालोकयन्नहमदूये । तत्र मया सुवर्णदेवालयो दृष्टः । तत्र प्रज्वलतः संख्यातिगान्दीपान्विलोक्य न मे संतोषः समजनि । गर्भागारे चंक्रम्यमाणान्मूषकान्विलोकमानस्य मोरबीक्षेत्रे दयानन्दस्वामिनामनुभवो मे स्मृतिमागतः । ब्राह्मदेशे स्त्रीणां स्वातंत्र्यता चटुलता च मां मुग्धमकुरुताम् । जनानामलसभावं पश्यतो मे खेदः समजनि । अल्पकालमपि तत्रावतस्थुषा मयेदं प्रत्यक्षीकृतं यद्यथा हिन्दुस्थानं मोहमयी (मुंबई) नगरं नानुकरोति तथा ब्राह्मदेशोऽपि रंगूननगरीमिति । यथा च हिन्दुस्थाने वयमांग्लेयवणिग्भिर्मध्यस्थाः कृतास्तथा ब्राह्मदेशे साङ्ग्लैरस्माभिर्ब्राह्मीया मध्यस्थाः कृता इति ॥

ब्रह्मदेशात्प्रतिनिवृत्तोऽहं गोखलेमहाशयस्यानुज्ञां प्राप्य ततो निरगच्छम् । तेन वियोगो दुःसहोऽभूत् । तथापि बंगेषु (अथवा कलकत्तानगरे) मदीयकार्यस्यावसितत्वात्तत्र पुनरवस्थानं निर्हेतुकमासीत् ॥

क्वचिदेकत्र स्थितिबन्धात् पूर्वं हिन्दुस्थानस्य लोहपथसंचारिणीषु धूमशकटीषु तृतीयश्रेण्यां प्रयाणमङ्गीकृत्य तच्छ्रेणीगतानां पथिकानां क्लेशा अवगन्तव्या इत्यालोचयम् । तथा च गोखलेमहाशये तत्प्रस्तावमकरवम् । स तावन्मामुपाहसत् । अथ मदीयमुद्देश्यं मया सविस्तरमुपवर्णितमवगत्य सप्रमोदमन्वमोदत । अहमादौ काशीं गत्वा तत्र रुग्णशयितां श्रीमतीं बेसन्टमहाशयां दृष्ट्वा कृतप्रणामः परापतिष्यामीति निरचैषि ॥

तृतीयश्रेण्यां प्रयियासुना मया प्रत्यग्रमेव परिकरः सज्जीकरणीय आसीत् । गोखलेमहाशयो मोदकपूरिकाभिः संभृतामेकां लौहीं फलाहारमंजूषां मह्यमदात् । अहं द्वादशाणकमूल्यमितं वालकंकोशमेकमक्रैषम् । छायोर्णामयी(छायेति पोरबंदरसंस्थानगतमौर्णवासोभिः प्रसिद्धं स्थलम्)मेकामायतांगिकामकारयम् । एकांगिका, एकमुत्तरीयं, एकं चतुष्कांबरं, एक आन्तरकवच इत्येभिर्वस्तुभिः कोशः संभरणीय आसीत् । एका जलस्थाली, प्रावरणाय कंबलमेकं, मन्निकट एवास्ताम् । एवं परिकरं सज्जीकृत्य प्रस्थानोन्मुखोऽभवम् । गोखलेमहाशयो डॉ. रॉयमहाशयश्च मामाप्रष्टुमयोध्वनिकेतनमागमताम् । आगमपरिश्रमो भवद्भिर्न वोढव्य इत्यावेदितावपि तौ साभिनिवेशमागतावेव । किं च गोखलेमहाशयः प्राह स्म । भवद्भिः प्रथमश्रेण्यां यदि प्रयाणमकरिष्यत तदा नैवाहमत्रागमिष्यामीति ॥

निकेतनं प्रविशन्तं तं गोखलेमहाशयं न कोऽपि न्यरुधत् । स किल तदानीं कौशेयोष्णीषं कवचमुत्तरीयं चापोषयत् । डॉ. रॉयमहाशयस्तु बंगीयनेपथ्यधारी स्थितः । तमेनं प्रयाणानुज्ञापकपत्रपरीक्षकोऽधिकारी न्यरुधत् । किं त्वयं मे मित्रमिति गोखलेमहाशयेन बोधितस्तं निरमुचत् ॥

विंशोऽध्यायः

काश्याम्

एतत्प्रयाणं कलकत्तानगराद्राजकोटं यावद्द्राघणीयमासीत् । आग्रा-काशी-जयपुर-पालनपुर-इत्येतेषु स्थाय स्थायं राजकोटं जिगमिषुरासम् । इतोऽपि भूयांसि स्थलानि वीक्षितुं मम नावकाशोऽविद्यत । एतेषु स्थलेष्वेकैकं दिनमहमतिष्ठम् । ऋते पालनपुरादन्यत्र सामान्ययात्रिक-

वदहं धर्मशालायामर्चकगृहेषु वावातरम् । यथाहमिदानीं स्मरामि तथा मम प्रयाणव्ययो धूमशकटीव्ययं मिलित्वा एकत्रिंशद्रूप्यकेभ्योऽधिको नासीत् ॥

तृतीयश्रेण्यां प्रयानप्यहं प्रायेण पत्रवाहिनीः (मेइल) शकटीं वर्जयित्वा सामान्यशकट्या प्रायासिषम् । विदितं हि मया यत्पत्रवाहकधूमशकटी परं जनसंकुला भवतीति । किं चास्याः भाटकाधिक्यं चान्यः' प्रतिबन्धः ॥

तृतीयश्रेणीशकट्यामशुचित्वं मलागारेषु कच्चरत्वं च यथापुरमेव तिष्ठति । प्रायशोऽधुना मनाग्विशेषो दृश्येत । परन्तु तृतीयश्रेणीपथिकानां प्रथमश्रेणीपथिकानां च कृते यद्यत्सौकर्यं परिकल्पितं तदन्तरं तत्तच्छ्रेणीपथिकैः प्रदेयभाटकान्तरापेक्षयात्यधिकं भवति । तृतीयश्रेणीपथिकाः पशुवद्गण्यन्ते । तदर्थमुपकल्पितानि सौकर्याणि च पशुमात्रयोग्यानि । युरोपखंडे प्रयाणमहं सर्वदा तृतीयश्रेण्यामेवाकरवम् । अनुभवेप्सया सकृदेव प्रथमश्रेण्यां प्रायासिषम् । किन्तु प्रथमतृतीयश्रेण्योर्नाहमेतादृशमन्तरमलक्षयम् । आफ्रिकादेशे तृतीयश्रेणीपथिकस्तोमो 'निग्रो'जनभूयिष्ठो भवति । तथापि तत्र तृतीयश्रेणीशकटीषु जनानामानुकूल्यमसंबाधाश्रयश्च परं लभ्येते । तत्र क्वचित्प्रदेशेषु तृतीयश्रेणीपथिकानां शयनार्थमपि व्यवस्था दृश्यते । आसनानि सोपबर्हाणि भवन्ति । प्रतिशकटं नियतसंख्याधिकानां जनानां प्रवेशो नियमतो निरुध्यते । अस्मिन्देशे पुनः तत्संख्यानियमातिक्रम एव प्रायिको दृश्यते ॥

तृतीयश्रेणीप्रयाणिकानामानुकूल्योपकल्पनविषये लोहाध्वसंचालकानामौदासीन्यं पथिकानां श्वपचाचारस्तेषामन्येष्वश्रद्धा चेति सर्वाणीमानि संभूय शौचसंपन्नजनानां तृतीयश्रेणीप्रयाणं नाम प्रायश्चित्तरूपो दण्ड इव प्रतिभाति । अभितो वर्तिनां सुखदुःखे लेशतोऽप्यविगणय्य शकटे कच्चरकाष्ठप्रक्षेपः देशकालावनादृत्य स्वैरमेव धूमवर्तिसेवनं तमाखुताम्बूलादिकं चर्वयित्वा सर्वतः शकटे निष्ठीवनं क्रोशनं चाक्रंदनं दुरुक्तिभाषणमित्यादीनि सामान्यतः पथिकानां दुरभ्यासा भवन्ति । द्वयधिकनवशतोत्तरसहस्रतमे वत्सरे मम यादृशोऽनुभवस्ततश्च पंचशतोत्तरनवशताधिकसहस्रतमात्प्रभृत्येकोनविंशत्युत्तरनवशताधिकसहस्रतमपर्यन्तमविच्छिन्नं मया कृतात्तृतीयश्रेणीप्रयाणाद्यादृशोऽनुभवस्तयोरन्योन्यमन्तरम् किमपि मया न दृष्टम् ॥

मन्ये दुःसहपरिस्थितेरीदृशाया भेषज्यमेकमेवास्तीति । तथाहि । सुशिक्षितैर्जनैस्तृतीयश्रेण्यामेव प्रयाणमङ्गीकर्तव्यम् । दुष्टाः प्रयाणिकानां पद्धतयः समीकर्तव्याः । सति संभवे लोहमार्गधिकारिणो बोधं बोधं बद्धहस्तैर्यथा तैर्न स्थीयते तथा संविधातव्यम् । स्वानुकूल्यसंपादनार्थमुत्कोचप्रदानेन केनापि प्रवर्तितव्यम् । किं च शासनातिक्रमात् सर्वोऽपि वारणीयः । एतेन सुमहती व्यवस्था भविष्यतीत्यहं स्वानुभवादाचक्षीय ॥

अष्टादशोत्तरनवशताधिकसहस्रतमोत्तरमेकवत्सरान्तराले मया रुग्णपतितत्वात्तदाप्रभृति तृतीयवर्गे प्रयाणं हातव्यमापतितम् । एतेन मम सर्वदा व्रीडा विषादश्च जायेते । तत्रापि

संयोगवशात् यावत्तृतीयश्रेणीप्रयाणिकानां क्लेशदूरीकरणार्थं मया क्रियमाणः प्रयत्नः सम्यक् चलितुमारब्धस्तावन्मयैव तृतीयश्रेणीप्रयाणं त्यक्तव्यमापतितम् । धूमशकटीषु बाष्पयानेषु च प्रयातृणां दीनपथिकानां यानि कष्टानि यानि चैषामनानुकूल्यानि ये च भूयोऽनर्थप्रदास्तेषां दुरभ्यासाः यानि च राज्याधिकृतैरन्यायतो विदेशीयवणिजामुपकल्पितानि सौकर्याणि तानीमान्यस्मदीयाद्यतन-सार्वजनिकजीवने महाप्रश्नरूपमापन्नानि भवन्ति । अस्मिन्नर्थे द्वित्राः प्राज्ञा उत्साहिनः सत्पुरुषा यद्यपि स्वेषां सर्वमपि कालं विनियुञ्जिरंस्तदा नैतद्बहु स्यात् ॥

अथेदानीं तृतीयश्रेणीपथिकानां प्रस्तावं विरमय्य काश्यां मे संवृत्तमनुभवं वर्णयिष्यामि । अहं महति प्रत्यूषे काशीं प्राप्तः । पण्डस्य कस्यचिद्गृहे वसतिर्ग्रहीतव्येति मया व्यचिन्ति । धूमशकटादवतीर्णमात्रं मां बहवो ब्राह्मणाः पर्यवारयन् । तेभ्यामेकमितरापेक्षया समधिकशौचसंपन्नं साधीयांसं च मत्वा तस्य मन्दिरमगच्छम् । मया कृतं तद्वरणं संगतमेवासीत् । गृहाङ्गणे गौरेका बद्धस्थिता सौधोपर्येकस्मिन्कोष्ठे स मां वसतिमग्राहयत् । यथाविधि गंगास्नानं यावत्करिष्यामि तावन्निराहारः स्थास्यामीत्यहं निरचेषि । एतदर्थं पण्डमिश्रेण सर्वं सज्जितमभूत् । स किल मया प्रागेव बोधितोऽभूत् यत्सपादरूप्यकादधिकां दक्षिणां नैव प्रदातुमहं शक्नुयामतस्तदनुरूपमेव सर्वं सज्जीकरणीयमिति ॥

पण्डमिश्रस्तामेतां मदीयविज्ञप्तिं निर्विवादमेवांगीकृतवान् । अकथयच्च — यात्रिकास्तावदाढ्या वा दीना वा भवन्तु । अस्माभिः कार्यमाणं तु पूजाविधानमुभयोः समानमेवेति । मन्ये पण्डमिश्रेण मद्विषये पूजादिकं नैव संकोचितमिति । अथवा द्वादशघंटावादनवेलायां समाप्तपूजः काशीविश्वनाथदेवालयं दर्शनार्थमगमम् । तत्र प्रत्यक्षीकृतं विमृशतो मम महद्दुःखमभूत् । एकोत्तरनवत्यधिकाष्टशतोत्तरसहस्रतमे वत्सरे मोहमयीनगरे यदाहं न्यायवादिवृत्तिमुपजीव्य स्थितः तदा काशीयात्रामधिकृत्य प्रार्थनासमाजमन्दिरे प्रवृत्तमेकमुपन्यासं श्रोतुमगमम् । एतेन किंचिदिवाशाभङ्गमनुभवितुं सज्जस्थितेऽपि मया तस्मिन्दिने मम संवृत्त आशाभङ्गो वितर्कपदवीमत्यक्रमीत् ॥

देवस्थानमतिसंकटपिच्छिलेन संधिमार्गेण गन्तव्यमासीत् । तत्र शान्तेर्नामापि नाभूत् । दंशमशकानां सैन्यं यात्रिकैरापतितैश्च क्रियमाणश्च कलकलश्च दुःसहेऽभूताम् ॥

यत्र मनुष्यो ध्यानमीश्वरप्रणिधानं च कर्तुमिच्छति तत्र तत्कर्तुमशक्यमासीत् । दिध्यासोर्जनस्य स्वीयोऽन्तरात्मैवान्वेष्टव्योऽभवत् । अभितः समुज्जृम्भमाणं कलकलमचेतयमाना भगिन्यस्तत्र नूनमदृश्यन्त । किन्तु तत्कीर्ति देवालयस्य व्यवस्थापकान्नोपातिष्ठत । काशीविश्वनाथदेवालयस्य परिसरे यथा निर्मलं मधुरं शान्तिमयं च (बाह्यमांतरिकं च) वातावरणं रक्ष्येत तथा व्यवस्थापकैः संविधातव्यम् । प्रत्युताकुशला व्यापारिणो गुडपिष्टं नवनवानि क्रीडनकानि च विक्रीणानाः प्रत्यक्षीकृताः ॥

Funding by IKS-MoE

देवालयोपकंठमुपसर्पन् द्वाराग्रे पोपूयमानस्थितं दुर्गन्धिकुसुमानां राशिमवालोकयम्। अंतरेका सुन्दरामृतशिला स्तीर्णाभवत्। किन्तु सा केनापि कलागन्धशून्येनांधश्रद्धोपेतेन भक्तेन रूप्यकाकारैश्चित्रैः प्रत्युप्तासीत्। तानि रूप्यकचित्राणि मलस्य परमाश्रयभूतान्यासन्॥

अथाहं ज्ञानवापीपार्श्वमगच्छम्। अत्र मया भगवतोऽन्वेषणमकारि। स पुनर्न लब्धः। अनेन मदन्तरात्मा ज्वलति स्म। ज्ञानवापीमभितः कच्चरमपश्यम्। दक्षिणाप्रदानं सर्वथा मे नारोचत। तस्मादहमेकां काकिणीं तत्र न्यक्षिपम्। तत्रत्य पण्डमिश्रस्य क्रोधो नात्मनि प्राभवत्। पादानकमुद्धृत्य स तं व्यपाक्षिपत्। अथ मामाक्रुश्य त्वया मे कृतोऽयमपमानस्त्वामंजसा नरकनिपातं प्रापयतीत्यभ्यधात्॥

अहं शान्त एव स्थितः। तदनु मयाभ्यधायि ‘ स्वामिन् मम यद्भाव्यं तद्भविष्यत्येव। किंतु भवादृशानां मुखादीदृग्वाचो विसर्गे न हि शोभते। सति संतोषे गृह्यतामियं काकिणी। नो चेत्तामपि भवन्तो हापयिष्यन्तीति॥

स चाकथयत्—अपेहि रे अपेहि। न कार्यं भवतः काकिण्या इति। तदन्वसौ ममोपर्याक्रोशवचनानि पर्जन्यवर्षमपातयत्॥

अथाहं तां काकिणीमादाय तदनङ्गीकारेण पण्डमिश्रस्य संवृत्तां हानिं मम संवृत्तं लाभं च गणयन् यथागतं प्रास्थिषि। परन्तु पण्डमिश्रो नाष्टिको भवितुं नारोचयत्। स मां पुनराहूय प्राह स्म। भवतु। काकिणीमत्र निक्षिप्य याहि। तव शीलमनुकर्तुं नाहमिच्छामि। मयास्याः काकिण्या अपरिग्रहे तवैवारिष्टं भवितेति॥

तूष्णीमहं तस्मै काकिणीं प्रदाय दीर्घं निश्वासमुत्सृज्य तस्मादपासरम्॥

तदनु द्विवारं काशीमहं गतोऽस्मि। परन्त्वेतन्मम महात्मताख्याति प्राप्तेरनन्तरम्। तत्तादृशस्य कथं वा ममेदृशोऽनुभवः सुप्रापः स्यात्। मद्दर्शनार्थमागच्छन्तो जनाः कथं मे भगवद्दर्शनस्यावकाशं दद्युः। महात्मनो दुःखानि महात्मनो नाम मादृशस्यैव वेद्यानि। इमं विशेषमन्तरेण तत्र कच्चरावकरादिकं यथापूर्वमेवासीत्॥

परमेश्वरस्यापारकरुणां प्रति ये केचित्संशयालवः सन्ति त ईदृशानि तीर्थक्षेत्राणि गत्वा प्रेक्षन्ताम्। अयं महायोगी स्वनामापदेशेन प्रचलन्ति कियन्ति कपटानि कियतो डंभाचारान् कियतश्चाधर्मान्त्सहेत। अथाप्ययमुदासीनः पश्चादवतिष्ठते। तथाहि—गीतायां तदुक्तिः—

ये यथा मां प्रपद्यन्ते।
तांस्तथैव भजाम्यहम्॥ इति॥

[ये मां यथा रीत्या प्राप्तुं यतन्ते तेषामहं तथैव रीत्या स्वागतं दास्यामि।]

यद्बीजमुप्तं तद्बीजसदृशं फलमश्नुते॥

Funding by IKS-MoE

कर्मणः फलमन्यथा कर्तुं को हि शक्नुयात् । तस्मादत्र भगवतः प्रवेशेन किं कार्यम् । अत एवायं लोकयात्रानियमान् विधाय स्वयमपसृत्य तूष्णीमुदास्त इति ॥

एवं दृष्टदेवालयोऽहं बेसंटमहाभागां द्रष्टुमगमम् । सा किल तत्कालमेवोल्लाघतां प्राप्य स्थिता । मन्नामांकितं पत्रखण्डमन्तः प्राहिणवम् । तत्क्षणमेव सा समुपागात् । तद्दर्शनमात्रं मया लिप्सितमासीत् । तस्मादहमवोचम्—अस्वस्था भवतीत्यहं जाने परं श्रीमत्या दर्शनं चिकीर्षुरागतोऽस्मि । अस्वस्थयापि भवत्या यदात्मा मम दर्शनपथं नीतः तदहं कृतज्ञोऽस्मि । नाहमितोऽधिकं श्रीमतीमुपरोद्धुमिच्छामीति । एवमुक्त्वा तत्सकाशादहमपासरम् ॥

एकविंशोऽध्यायः

मोहमयीनगरे स्थितिग्रहणम्

आसीत्किल प्रबलोऽभिलाषः श्रीमतो गोखलेमहाशयस्य यन्मया मोहमयीनगर्यामेव स्थितिमता न्यायवादिवृत्त्युपजीविना सार्वजनिकसेवायामात्मनः सहकारिणा भाव्यमिति । तदानीं सार्वजनिकसेवा नाम महासभायाः सेवैवासीत् । तेन प्रतिष्ठापितायाः संस्थायास्तदेव मुख्यं कार्यं यदस्या महासभाया कार्यस्य प्रचालनं नाम ॥

गोखलेमहाशयस्य सूचनामहमरोचयम् । परंतु न्यायवादिवृत्तिः सूपजीव्या भविष्यतीति मम नासीद्विश्वासः । पूर्वानुभूतमद्यापि न किल विस्मृतमासीत् । किं चात्मश्लाघनया कार्यिकाणामाकर्षणं नाम विषवज्जुगुप्स्यं मम प्रत्यभासीत् ॥

तदहमादौ राजकोट एव कार्यमुपक्रमणीयमिति निश्चयमकार्षम् । तत्र मम हितैषी विदेशं प्रति मम गमनहेतुभूतः केवलराममावजीदवेमहाशयः स्थितः । स मह्यं त्रीन् व्यवहारान्समपादयत् । तेषां द्वौ काठियावाडदेशस्य 'जुडिशियल असिस्टंट' इत्यधिकारिणो न्यायसभायामवेक्षणीयौ प्रतिविमर्श (अपील) रूपावास्ताम् । तृतीयस्तु जामनगरे प्रवर्तमान एको मूलव्यवहारः । एषां प्रचालनेऽहं शक्तः स्यां न वेति संशयाकुलं मां केवलरामदवेमहाशयोऽवादीत्—अलं पराजयशङ्कया । यावच्छक्यं भवद्भिः प्रयत्यताम् । अहमिह स्थितोऽस्मि खलु भवतां साहाय्यकर्तेति ॥

अस्मिन्व्यवहारे दिवंगतसमर्थमहाशयो मम प्रतिपक्षवादी स्थितः । मयापि भूयसा प्रयत्नेन सम्यक् सज्जीभूय स्थितम् । न खलु हिन्दुस्थानस्य शासननियमानामहं परमाभिज्ञ आसम् । परंतु केवलरामदवेमहाशयेन व्यवहारस्यास्य विस्तरमखिलं बोधितोऽभवम् । श्रुतं हि मित्रमुखान्मया दक्षिणाफ्रिकादेशं प्रति गमनात्पूर्वं यत् सरफिरोजशा-महेता-महाशयेन

साक्ष्यसंबंधिशासनस्य नियमावलिः कंठे कृतासीत् । तदेतदमुं जयशीलमकरोदिति । इदं मनसिकृत्य समुद्रयानेऽहं 'इंडियन एविडेन्स अेक्ट' पुस्तकं सव्याख्यानं सम्यगपठिषम् । अपि च दक्षिणाफ्रिकादेशे न्यायवादिवृत्तिवशात्संपादितोऽनुभवश्च ममासीत् ॥

जितो मया व्यवहारः । एतेन मम कियानप्यात्मविस्रम्भः समजनि । प्रतिविमर्शव्यवहारद्वयं प्रत्यादितः प्रभृत्यहं निश्चिन्त एवासम् । तदपि मया जितम् । सर्वमेतद्विभावयतो मम मोहमयीनगर्यां स्थितिग्रहणेनापि चिन्ताया न कोऽपि स्यादवकाश इत्याशा समुदेति स्म ॥

किन्तु मोहमयीनगरं प्रति गन्तव्यनिश्चयो यथा मयाङ्गीकृतः इत्यस्य वर्णनात्पूर्वमांग्लाधिकारिणमविचारमज्ञानं चाधिकृत्य मदीयमनुभवं वर्णयिष्ये । जुडिशियल 'ॲसिस्टंट' इति व्यवहारद्रष्टाधिकारी कदापि नैकत्रातिष्ठत् । किन्तु सर्वदा संचरमाण एव स्थितः । यत्र यत्र तेन वसतिरग्राहि तत्र तत्र न्यायवादिनः कार्यिकाश्च तमन्वसरन् । न्यायवादिनः परस्थलगमनप्रसंगे स्वकीयस्थले गृह्यमाणादभ्याधिकं पारितोषिकद्रव्यमजिघृक्षन्त । एतेन कार्यिकाणां द्विगुणो व्ययः समापतत् । क्लेशोऽयं प्राड्विवाकप्रभोर्हृदयं नैवास्पृशत् ॥

प्रसक्त एष व्यवहारो वेरावल-ग्रामे द्रष्टव्योऽभवत् । तत्कालं तत्र ग्रन्थिज्वरो भयंकरः प्रसरति स्म । पंचशतोत्तरपंचसहस्रप्रजासंख्याके तस्मिन् ग्रामे प्रतिदिनं पंचाशज्जना व्याधिना स्पृश्यन्तेति ज्ञप्तिरस्ति । ग्रामः—सर्वोऽपि शून्यप्राय आसीत् । ग्रामस्याहमदूरवर्तिन्यामेकस्यां निर्जनायां धर्मशालायां वसतिमग्रहीषम् । व्यवहारिजनैस्तु कुत्र वस्तव्यम् । ते पुनरनाढ्याश्चेत्तेषां परमात्मैव गतिः ॥

वेरावले ग्रन्थिज्वरप्रसारात्तत्स्थलं परित्यज्य क्वापि स्थलान्तरे व्यवहारदर्शनाय प्राड्विवाकः प्रार्थयितव्य इति मदीयः कश्चनसुहृत् स्वयं व्यवहारवान् मां प्रति तंत्रीसंदेशं प्राहिणोत् । मम प्रार्थनापत्रमवलोक्य प्राड्विवाको मामप्राक्षीत्—किं भवान् भीरुक इति ॥

मया प्रत्यवाचि—अहं भीरुको वा न वेति न खलु प्रकृतः प्रश्नः । अहं तावद्यथाकथा वा निर्वहेयम् । परन्तु व्यवहारिणामेषां का गतिरिति ॥

प्राड्विवाकः प्राह—ग्रन्थिज्वरोऽयं भारतवर्षे निजमंदिरीकृत्य विजृम्भते किमर्थमिदानीं ततो भेतव्यम् । इह निरूप्यतां यादृशो वायुगुण इति यथा च स्पृहणीयो भवतीति (अयं प्राड्विवाकः ग्रामाद्विप्रकृष्टे समुद्रतीरोपरिष्टे राजमंदिरप्रख्ये वस्त्रशिबिरे गृहीतवसतिरासीत्)। एवं हि जनाः ग्रामबाह्ये निराकुलप्रदेशे निवस्तुं शिक्षयितव्या इति ॥

अस्य वेदान्तस्य किमुत्तरं मया दातव्यम् । प्राड्विवाकः स्वकीयं नियोज्यप्रधानमाकार्य तमवादीत्—गांधिमहाशयैरुक्तं मनसि निधाय न्यायवादिनः कार्यिका वा यदि क्लेशबाहुल्यमश्नुयुस्तदाहमत्र बोधनीय इति ॥

Funding by IKS-MoE

प्राड्विवाकस्तावन्निर्वचनया स्वबुद्ध्या यन्न्यायतया गृहीतं तदकरोत्। परं वस्तुतो दीनभारतवर्षक्लेशास्तस्य कथं वा वेद्याः स्युः । दीनजनानामस्माकमावश्यकताभ्यासो विचित्रतापद्धतयश्चेत्यादिकं कथं स जानीयात् । सर्वदा सुवर्णमुद्राभिर्व्यवहरन्मनुष्यः कथमेकपदे ताम्रकाकिणीभिर्गणनां कर्तुमुत्सहेत । यथा हस्ती पिपीलिकां नानुचिन्तयेत्तथा हस्तिवन्महोन्नतसौकर्यगृध्नुराङ्ग्लेयस्तथा पिपीलिकेवात्यल्पमिच्छुं भारतीयं नानुचिन्तयति न च तद्विषयकाणि शासनानि कर्तुं प्रभवति ॥

इदं तावदास्ताम् । अथास्मदीयकथां प्रति निवर्त्स्यामः । उपरि निरूपितरीत्या प्राप्तजयेनापि मया दिनकतिपयान् राजकोट एव स्थातव्यमिति व्यचिन्ति । अत्रान्तर एकस्मिन्दिने केवलरामो मत्पार्श्वमुपेत्यावोचत् । गांधे भवन्तमिह मुधा स्थातुं नानुमंस्यामहे । भवता मोहमयीनगर्यामेव निवासः समाश्रयणीय इति ॥

अहं तमपृच्छम् — तत्र मां को वावेक्षते । मदीयव्ययः किं भवता प्रदीयत इति ॥

"अवश्यमेव भवतो व्ययमहं दास्यामि । कस्यापि व्यवहारस्य हेतोर्भवन्तमुत्तरवादिनां प्रवरमिहानेष्यामहे । व्यवहारपत्रिकादीना लेखनाय व्यवहारान् भवत्सकाशमेव प्रेषयिष्यामः । उत्तरवादिनामुच्चैरारोपणमधस्तादवतारणं च न्यायवादिष्वस्मास्वेवायतेते । जामनगरे वेरावले च भवता प्रदर्शितां योग्यतामवलोक्य भवद्विषये नाहमीषदपि चिन्ता वहामि । सार्वजनिककार्यं निर्वोढुमेव भवान् गृहीतजन्मा भवति । काठियावाडदेश एवात्मानं प्रयासयितुं भवन्तं नानुमन्यामहे । अथ ब्रवीतु भवान् कदा मोहमयीनगरमुपगन्तेति ॥

"नातालदेशाद् द्रव्यागमं प्रतीक्षमाणः स्थितोऽस्मि । तत्प्राप्तिसमनंतरमेवं प्रयास्यामि ॥"

सप्ताहद्वयान्तरे तद् द्रव्यमागमत् । अहं मोहमयीनगरमगच्छम् । तत्र 'पेईन, गिलबर्ट ॲण्ड सयानी' इत्येषां कार्यालये कोष्ठमेकं भाटकेनाग्रहीषम् । अथेदानीं मदीयजीवनं स्थिरीभूतमिव मे प्रत्यभात् ॥

द्वाविंशोऽध्यायः

धर्मसंकटम्

मोहमयीनगरस्य दुर्गाख्यविभागे कल्पितकार्यालयोऽहं गिरगांवप्रदेशे क्वचिदेकं गृहमन्विष्य तत्र वसतिमग्रहीषम् । किन्तु भगवान् तत्र निवस्तुं मां नान्वगृह्णात् । गृहमागतस्य मम चत्वारि दिनानि यावन्न व्यतीतानि तावन्मे द्वितीयकुमारो मणिलाल उल्बणव्याधिना शयनपतितोऽभवत् । विषमशीतज्वरेणाक्रान्तस्य तस्य श्वासकोशौ दूषितावभूताम् । रात्रिवेलायां संनिपात-

Funding by IKS-MoE

वशात् विभ्रमोऽप्यजायत । स किल कतिपयवत्सरेभ्यः पूर्वं स्फोटकोपद्रवेन बलवदुपसृष्टः पश्चात्स्वास्थ्यमापन्नो बालः ॥

अथ भिषग्वरमानैषम् । सोऽवादीत् — इदानीमौषधेनास्य न किमपि' प्रयोजनं भवति । संप्रत्ययं कुक्कुटशावकसारमण्डं चावश्यमेव प्राशयितव्यः । तदेतदुपकरिष्यतीति ॥

मणिलालस्तदानीं दशवर्षदेशीयः स्वस्येच्छां प्रति नायमनुयोगार्ह आसीत् । तद्रक्षकस्य ममोपर्येव तन्निर्णयभारोऽपतत् । भिषग्वरः परमसांधुः कश्चन पारसीदेशीयः । तमेनमपृच्छम् — भिषग्वर, इमे वयं शाकाहारिणः । अनयोर्वस्तुनोर्नैकतरमपि बालायास्यै प्रदेयं भवति । यः कश्चिदन्य आहारो भवता निर्दिश्यतामिति ॥

भिषगवोचत् —

इदानीं वः कुमारः प्राणसंशये वर्तते । सोदकं दुग्धं यद्यपि सेवनीयं तथापि तेनास्य प्रकामपुष्टिर्न जायते । बहुषु हिन्दुकुटुम्बेषु चिकित्सामहं करिष्यामीत्येतद्भवतां विदितमेव । ते जनां यत्किमप्यौषधं मया दत्तं स्वीकुर्वते । तस्माद्वरं मन्ये भवद्भिः :पुत्रविषये हठोऽयमनास्थेय इति ॥

सत्यमाह भवान् । भिषजा सतेत्थमेव खलु भवता वक्तव्यम् । परं ममानुयोज्यता महती वर्तते । यद्ययं प्रबुद्धवया अभविष्यत्तदा तदिष्टानुसारेण प्रवृत्तिराश्रयणीया भविष्यत् । किंत्विदानीं मया स्वयमालोच्य निर्णेतव्यं भवति । मन्ये पुरुषस्य या धर्मश्रद्धा सा किलावसरेष्वीदृशेषु वस्तुतः परीक्ष्यते । मनुष्येण मांसाहारादिकं न भोक्तव्यमिति यः सिद्धांतः स तावत्संगतो वा न वा भवतु मया पुनः स्वधर्मस्याङ्गतया गृहीतः । प्राणत्राणकराणि साधनान्यपि परिच्छेद्यान्येव भवन्ति । प्राणसंशयेऽपि कियन्ति चित् कार्याणि परिवर्ज्यान्येव भवन्ति । एवं गते यथाहं जानामि तदा मदर्थं वा मदीयानां कृते वा मांसादिकस्य प्रयोगो न मे धर्म्यः प्रतिभाति । तस्माद्भवता शङ्क्यमानमपायमनुभवितुं मया सज्जेन भवितव्यम् । किन्तु भवत्सकाशे विज्ञप्तिमेकां करिष्ये । भवतोपदिष्टमौषधोपचारं कर्तुमशक्तोऽहं मया ज्ञातां जलचिकित्सां कर्तुमिच्छामि । किं तु बालस्यास्य नाडीहृदयश्वासकोशादीनि परीक्षितुं नाहं जाने । यदि भवानिह सकृत्सकृदागत्य तदीयशरीरस्थितिं परीक्ष्य मह्यमावेदयेत्तदा कृतज्ञो भविष्यामीति ॥

सज्जनोऽयं भिषङ्मदीयकष्टं सद्यो विज्ञाय मत्प्रार्थनानुरूपं मणिलालस्य परीक्षणाय गतागतं कर्तुमन्वमन्यत । निजाभिप्रायप्रकाशने तत्कालमनभिज्ञाय मणिलालाय भिषजा सह संवृत्तं कथालापमावेद्य तदीयमतमपृच्छम् । स चावोचत — जलचिकित्सा प्रारभ्यताम् । नाहमण्डं कुक्कुटपोतसारं च भक्षयिष्यामीति ॥

तत्पदार्थद्वये मया प्रदत्ते सति नैष तद्भक्षयेदेवेति यद्यपि मे विदितं तथापि प्रतिवचनं तस्य निशम्य हृष्टोऽभवम् ॥

Funding by IKS-MoE

क्युनीभिषग्वरस्योपचारक्रममहमवेदिषम् । तदनुसारेणोपचारो मया कृतपूर्वश्च । ज्ञानं च मया यद् रोगनिवर्तकसाधनेषूपवासश्च लाभकर इति । क्युनीमहाशयस्योपचारपद्धतिमनुसृत्य मणिलालं कटिस्नानं कारयितुमुपाक्रमे । निमिषत्रयादूर्ध्वमसौ स्नानभाण्डे न निवेश्यते स्म । त्रीणि दिनानि तस्मै नारंगफलरसं सोदकं प्रायच्छम् । एतदतिरिक्तो न कोऽप्याहारस्तस्मै प्रादायि ॥

किन्तु ज्वरो न शान्तः । चतुरधिकशतांशपर्यन्तमौष्ण्यमारोहति स्म । रात्रिवेलायां संनिपातविभ्रमः प्रादुरभूत् । अहमुद्भ्रान्त इवाभवम् । लोकः किं मां प्रवदेत् । मदग्रजः किं ब्रूयात् । अन्यो भिषक् किमिति नानीयते । आयुर्वेदवैद्यानामानयनं किमशक्यम् । स्वोन्मादानां कृते निजापत्यानि बलीकर्तुं मातापित्रोः को वाधिकारः । एवंविधा विकल्पा मदीयं मनः प्राविशन् किंत्वेतान्प्रतिरुध्य हृदयस्यान्तरादियं वाणी श्रूयते स्म । यथा हे जीव स्वयं तत्समानदशां गतेन त्वया यथात्मोपचयेत तथैनं बालकमप्युपचरिष्यतः तव भगवान्प्रसीदत्येव । यथा तव जलचिकित्सायां विश्वासः तथा वैद्यस्यौषधे स नास्ति । वैद्यः प्राणरक्षणं न हि प्रतिजानीते । तेन हि प्रयत्नमात्रं क्रियते । जीवसूत्रं परमात्मनो हस्ते तिष्ठति । भगवति भारं निक्षिप्य तत्स्मरणपूर्वकं श्रद्धामास्थाय यथाशक्ति शुश्रूषा कुतः खलु न कर्तव्येति ॥

एवमनेकविकल्पजालेन परस्परविरोधिना मामथ्यमानहृदयः सुतरामशान्तिमगमम् । अथ रात्रिरागता । अहं मणिलालस्य शय्यायां तस्य पार्श्व एव शयितोऽभवम् । आर्द्रवाससा तं वेष्टयितुं निश्चयमकरवम् । तदनु समुत्थाय निशारमेकमार्द्रीकृत्य जलं निष्पीड्य तेन मणिलालं कंठादङ्गुष्ठपर्यन्तमावेष्ट्य बहिः शिरोमात्रदृश्यमेनं कंबलद्वयेन प्रावारयम् । आर्द्रवासः खंडेन तस्य शीर्षमबन्धयम् । तस्य शरीरं चुल्लिकोपरिस्थकंदुरिव तप्यते स्म । सर्वं शुष्कमासीत् । अस्तमिता स्वेदप्रवृत्तिः ॥

अहमतिश्रान्तोऽभवम् । मणिलालं तस्य मातुर्वशे विसृज्य होरार्धकालं विशिश्रमिषुश्चौपाटीपार्श्वमभ्यगमम् । रात्रौ तदानीं प्रायो दशघंटावादनवेला । जनसंचारो विरल आसीत् । परं कुतो मे स्मृतिर्विचारसागरे संनिमग्नस्य । भगवन्मदीयमानरक्षणं त्वदायत्तमित्यात्मनात्मानमबोधयम् । मम मुखाद्रामनाम निरंतरं निःसरति स्म । कंचित्कालं कृतपरिक्रमो धडधडायमानहृदयः सदनमुपागमम् ॥

गृहान्तःप्रविष्टमात्रमेव मणिलालोऽप्राक्षीत् । ‘ बापु ’ प्रत्यागतोऽसीति । आगतोऽस्मि वत्स । “ अहमिदानीं ननु बहिरुद्धर्तव्यः । अहो दह्ये दह्ये । ”

“ वत्स मणिलाल, किमङ्ग स्विद्यसे ।”

“ अहो स्वेदस्नातोऽस्मि । ननु प्रावरणं झटित्यपनीयताम् ॥”

Funding by IKS-MoE

अहं मणिलालं फालस्पर्शं न्यरूपयम् । तत्र सर्वतो मौक्तिकानीव स्वेदबिंदवः स्थिताः । ज्वरः प्रशाम्यति स्म । (ज्वरोऽवरोहति स्म) । दीर्घमहं निश्वस्य भगवते धन्यवादं समार्पयम् ॥

मणिलाल इतः परं तव ज्वरः पलायत इत्यवेहि । इतोऽपि किंचित्प्रवृत्ते प्रस्वेदे तवाच्छादनमपनेष्यामि । मैवं 'बापु' अद्यैव मां चुल्लिकोदरादुद्धरत । अन्यदा पुनः परीक्षामहे ॥

एवं कथाप्रसंगेन कंचित्कालमयापयम् । यथास्थितस्यास्य ललाटपट्टात् स्वेदधारा प्रावहत् । निशारकमपनीय तस्याङ्गं प्रामार्जयम् । अथावां पितापुत्रौ एकशयनेऽस्वपिव ॥

उभाभ्यामपि गाढनिद्रासुखमन्वभावि । प्रातर्मणिलालस्य ज्वरो भूयसा प्रशान्त इवासीत् । सोदकं दुग्धं फलरस इत्येताभ्यामेव चत्वारिंशद्दिनानि स वृत्तिमकरोत् । ततो मे भयं निःशेषमपासरत् । ज्वरःस्थायित्वेऽपि चिकित्सावशं प्रपन्नः ॥

सांप्रतं मम पुत्रेषु मणिलाल एव सर्वाधिकदार्ढ्यसंपन्नो भवति । एवमुल्लाघताप्राप्तिः श्रीरामप्रसादात् उत जलचिकित्साबलादाहोस्वित्पथ्यशुश्रूषाभ्यामिति वक्तुं को नाम शक्नुयात् । निजनिजश्रद्धानुरूपं सर्वोऽपि निर्णेतुमर्हति । अहं तावज्जगदीश्वरेण मम मानो रक्षित इति दृढं व्यश्वसिषम् । अद्यापि तथैव विश्वासः ॥

त्रयोविंशोऽध्यायः

दक्षिणाफ्रिकादेशं प्रति पुनर्गमनम्

मणिलालस्तावदुल्लाघः संवृत्तः । किन्तु गिरगांवस्थले गृहं वासयोग्यं न भवतीति मयावगतम् । तद्गृहं न केवलमनूपप्रदेशे निविष्टमपि तु भूयसा निषिद्धसूर्यप्रकाशमासीत् । तस्मादहं रेवाशंकरजगजीवनमहाशयस्य सूचनामङ्गीकृत्य मोहमयीनगरस्य बाह्यवसतिप्रदेशे हर्म्यमेकं भाटिकया ग्रहीतुं निरचैषम् । 'बांद्रा–सांताक्रूज' इत्यनयोः नगरविभागयोः वसत्यर्थमन्वेषणमकार्षम् । बांद्रास्थले गोघ्नकौठिकापणस्य विद्यमानत्वात्तत्र नो वसतिग्रहणं नारोचत । घाटकोपरप्रभृतिस्थलानि समुद्रादतिदूरवर्तीनि मे प्रत्यभात् । पर्यन्ते सान्ताक्रूजविभागे रमणीयमेकं हर्म्यमलभ्यत । आरोग्यदृष्ट्या तदत्युत्तमं मन्वाना भाटकेनाग्रहीष्म ॥

सान्ताक्रूज्स्थलाच्चर्चगेटलोहाध्वनिकेतनं गन्तुं प्रथमश्रेणीप्रात्याहिकप्रयाणानुज्ञापत्रमक्रैषम् । अनेकशो धूमशकट्याः प्रथमश्रेण्यामहं एक एव स्थित इति मम कोऽप्यभिमानो जायते स्मेति स्मरामि । वांद्राप्रदेशाच्चर्चगेटनिकेतनं प्रति निःसत्कमभिचलंत्या धूमशकट्या प्रयातुमिच्छुरनेकशः सान्ताक्रूज्स्थलाद्वांद्रायोध्वनिकेतनं पादचारेणैवागमम् ॥

मम व्यवहारवृत्त्युपजीवनं निरीक्षितादत्यधिकतरसंमृद्ध्युपेतमासीत् । दक्षिणाफ्रिकादेश्या मदीयव्यवहारिणो बहुशः कार्याणि मत्सविधं प्रैषयन् । एतानि मम जीविकासिद्धये पर्याप्नुवन् ॥

प्रधानन्यायसभायां चालनीयं कार्यमद्यापि मे नामिलत् । तथापि तत्र प्रचलतां चर्चनीयविषयोपन्यासानां श्रवणाय मया गम्यते स्म । तत्र गोष्ठ्यां प्रवेष्टुं न मे धैर्यमासीत् । तत्र जमियतरामनानाभाईमहाशयः प्रमुखपात्रं वहति स्मेति मम ज्ञप्तिरस्ति । यथान्य उत्तरवादिनस्तथाहमपि व्यवहारगतिं दिदृक्षुर्न्यायसभामगमम् ॥

तत्र मया ज्ञानमर्जितुं न गम्यते स्म । परंतु सागरादुपस्यन्दमानस्य सुषुप्सामुत्पादयतो मन्दमारुतस्य सेवनेनानंदमनुभवितुमिति वक्तव्यम् । ईदृक्सुखमनुबुभूषुर्नाहमेक एवेत्यवगतवतो मम न लज्जा समजनि । एवं घूर्णमानेन तत्रोपवेशः कश्चिद्विलासो न तु लज्जाकर इत्यहमचिन्तयम् ॥

प्रधानन्यायस्थानस्य पुस्तकालयमुपयोक्तुमहं प्रवृत्तः इतरैर्बहुशः परिचयं समपादयम् । अचिरेणैव प्रधानन्यायसभायां व्यवहारं चालयेयमित्याशा मे समजनि ॥

इत्थमेकतो न्यायवादिवृत्तिं प्रति निश्चिन्ते मय्यन्यतो गोखलेमहाशयस्य दृष्टिर्मयि जागर्ति स्म । स किल निरन्तरमायत्यां यन्मया कर्तव्यं तस्यानुसंधानपरोऽभवत् । प्रतिसप्ताहं द्वित्रवारं मम कार्यालयमागत्य मदीययोगक्षेमं पृच्छति स्म । कदाचिन्मित्रैः सहागम्य तत्परिचयं मामकारयत् । स्वस्य कार्यविधानरीतिं च मामुपादिशत् ॥

किन्तु भविष्यं प्रति मया मनस्याकलितानां मनोरथानामेकस्यापि, सिद्धिं मां भगवान्न प्रापयेदितिवचनमयथार्थं न भवेत् । ते किल सर्वेऽपि तदिच्छानुरूपमेव पर्यणमन्त ॥

यावदहं तत्रैव स्थिरवासं निश्चित्य स्वास्थ्यमीषत्प्राप्तुकामः स्थितः तावद्दक्षिणाफ्रिकादेशादतर्कितमेवागमत्तंत्रीसंदेशो यथा — "इह 'चेम्बरलेन' मन्त्री समागन्ता । एतत्क्षणमेव प्रस्थाय भवद्भिरागंतव्यमिति" कृतां प्रतिज्ञामहं व्यस्मार्षम् । तथा च तंत्रीप्रतिवचनं मया प्राहायि । यावत्पणं मां प्रापयिष्यथ तावदितः प्रस्थातुं सज्जस्थितोऽस्मीति । तत्क्षणमेव ते पणं प्राहैषुः । अथाहं कार्यालयं बद्धकवाटं विधाय दक्षिणाफ्रिकादेशमगमम् ॥

मदीयकार्यमन्यूनमेकवत्सरमपेक्षत इति मत्वा गृहमत्यजन् भार्यापत्यादिकुटुम्बं तत्रैवावासयम् ॥ ये तु स्वदेशेऽनधिगतयोग्यवृत्तयः साहसिका युवकास्ते विदेशाः समाश्रयणीया इति तदानीं ,मदीयमतमासीत् । इदानीमप्यसौ तथैव वर्तते । तत्र पूर्वपद्धतिं विहाय विदेशगमने धीरमनसो ये युवकास्तेषामन्वेषणे ममासीदभिलाषः । मम पित्रा बहवो राजकीयोद्योगे प्रावर्त्यन्त । ते सर्वेऽप्येवंविधात्सेवावृत्तिरूपान्मायाजालान्मोचयितव्या इति ममाशयोऽभूत । वृत्त्यन्तरं प्रापयितुं मम सामर्थ्यमासीदिति न खलु मे विवक्षा । अथ सत्यामपि शक्तौ तदेतन्नमे रोचते स्म । तैः स्वावलंबिभिर्मान्यमिति हि ममाभिलाषः ॥

यथा यथा ममादर्शाः सिद्धिपथमागतास्तथा तथाहमेषां युवकानामादर्शानपि यथावत्परिवर्तयितुमयतिषि । एतेषां मगनलालगांधौ मम यत्नो भूयसा साफल्यमगात् ॥

भार्यापत्यानां परित्यागः व्यवस्थितकुटुंबस्य विभजनं निश्चितावस्थितिं विहायानिश्चितायामवस्थायां प्रवेश इत्येतत्सर्वं मां क्षणमात्रमव्यथयत् । किन्त्वहमनिश्चितजीवनाभ्यासे परिक्षुण्णोऽभवम् । अस्मिन् जगति तमेकं विना—स तावदीश्वर इति वा सत्यमिति वा व्यपदिश्यताम्—निश्चितस्वरूपं न किंचिदस्ति । इह निश्चितत्वप्रेप्सापि दोष एवेति मन्ये । अद्यास्मान्परितः परिदृश्यमानं प्रवर्तमानं च सर्वमप्यनिश्चितमनित्यं च । किन्तु सर्वान्तर्यामितया गूढं परमतत्वमेकं निश्चितरूपेण तिष्ठति । तत्प्रकाशस्य मयूख एकस्मिन्नस्मदुपरि पतिते सति तत्रास्मदात्मनः समर्पणं कृत्वा जीवितसार्थक्यमाप्स्यामः । तस्य सत्यस्यान्वेषणमेव परमः पुरुषार्थः ॥

डरबननगरमहं नियतकालादेकाहपूर्वमपि नासादयम् । तत्र यावदहं गतस्तावन्मां कार्यं प्रतीक्षते स्म । हिन्दुजनप्रतिनिधिभिश्चेम्बरलेनमहाशयस्य दर्शनाय दिवसात्प्रागेव स्थापितं तदग्रे यद्वाचयितव्यं तत्प्रार्थनापत्रं सज्जीकृत्य मया दर्शनार्थिभिः प्रतिनिधिभिः सह गन्तव्यमासीत् ॥

इति श्रीगांधिमहात्मनः
सत्यशोधनाख्यायामात्मकथायां
तृतीयो भागः
समाप्तः

चतुर्थों भागः

प्रथमोऽध्यायः

कृतं सर्वं वृथां जातम्

चेम्बरलेनमहाशयो दक्षिणाफ्रिकादेशात्सुवर्णमुद्राणां सार्धकोटित्रयस्य दानं प्रतिगृह्य गन्तुमागतोऽभूत्। किं चाङ्ग्लेयानां सति संभवे 'बोअर' जनानां च मनःसंवननमपि तस्योद्देश्यमासीत्। अत एव हिन्दुजनप्रतिनिधयस्तस्माच्छुष्कमेव प्रतिवचनमलभन्त ॥

तेन किलैवं प्रत्यवाचि –

विदितमेव खल्विदं वो यत्स्वतंत्रस्वास्थ्यानामुपरि साम्राज्याधिकृतानामधिकारो नाम नाममात्रत एवेति। युष्मदीयानि संकटानि तावत्पारमार्थिकानि प्रतिभान्ति। यावच्छक्यमहं करिष्ये। किन्तु यूयं गौराङ्गानां मध्ये तिष्ठासवश्चेद्युष्माभिरमी यत्नतः परितोषणीया–इति ॥

प्रत्युत्तरमिदं सद्यः प्रतिनिधीनां मुखेषु शीतोदकप्रक्षेप इवाचरत्। अहमपि निराशोऽभवम्। अनेनास्मन्नेत्रबंधो मोचितोऽभवत्। लक्षितं च मया यदादितः प्रभृति कार्यमिदं प्रारम्भणीयमिति ॥

चेम्बरलेनमहाशयस्य प्रतिवचने वा को दोषः। तेन हि यथास्थितमेव वस्तु वर्णितम्। तच्च नः शोभनमेव वस्तु संवृत्तम्। बाहुबलमेव न्यायस्य मूलम्। अथवा दण्डकाष्ठस्य प्रयोग एव सर्वार्थसाधक इतीदं तत्त्वमसौ मधुरोक्तिभिरस्मद्बुद्धिगोचरमानयत् ॥

किंत्वस्माकं दण्डकाष्ठस्य लाभः कुतः संभवी। दण्डप्रहारसहनशक्तिरप्यस्माकं नासीत् ॥

दक्षिणाफ्रिकादेशे सप्ताहमात्रमेव स्थातव्यमिति चेम्बरलेनमहाशयेन निश्चितमासीत्। दक्षिणाफ्रिकादेशो नाम न खल्वल्पमितः प्रदेशः। स एको महान् विषयः। श्रीनगरात्कन्याकुमार्या यद्येकोनविंशतिपाषाणदूरं तर्हि 'डरबन' नगरात् 'केपटाउन'पत्तनमन्येनेकादशपाषाणदूरे वर्तते। तन्मध्यगतो विस्तारः सर्वोऽपि चेंबरलेनमहाशयेन वायुवेगतः संचरितव्य आसीत् ॥

असौ नातालदेशात् ट्रान्सवालदेशं प्रति प्रातिष्ठत। तत्कालं मयापि तत्र गत्वा तत्रत्यानां भारतीयानां कृते तस्याग्रे भाषणं कर्तव्यमासीत्। किन्तु प्रिटोरियानगरं मया कथमासादनीयम्। तत्र सकालमुपस्थातुमावश्यकी या व्यवस्था तां निर्वोढुमशक्ता आसन्नस्मदीया जनाः। युद्धोत्तरकाले ट्रान्सवालदेशो निर्जनारण्यमिवादृश्यत। अशनवसनार्था सामग्री तत्र दुर्लभासीत्। युद्धकाले शून्यीकृतापिहितद्वारा वा निषद्यास्ताः पुनरुद्घाटनीया आसन्। तदेतत्कार्यं तु कालक्रमेण निर्वर्तनीयं न पुनरेकदैव साध्यमासीत्। गृहादिकं परित्यज्य पलायितानामपि स्वस्वगृहप्रापणं तदापणेषु संभारप्रापणोत्तरमेव कर्तव्यमासीत्। अत एव ट्रान्सवालवासिना सर्वेणापि प्रतिस्वमेकैकमनुज्ञापत्रं संपादनीयमासीत्। तच्च गौराङ्गाः क्लेशं विनैवालभन्त। भारतीयानां तु तदतीव दुर्लभमासीत् ॥

Funding by IKS-MoE

हिन्दुस्थानात् ‘ लंका ’द्वीपाच्च युद्धाय दक्षिणाफ्रिकामागता अधिकारिणः सैनिकाश्च बह्वोऽविद्यन्त । तेषु यश्च यश्च तत्रैव निवासग्रहणमरोचयत्तस्य तस्य तत्रैवं निवासायाङ्ग्लाधिकारिभिः समुचिता व्यवस्था कर्तव्याभवत् । अधिकारिणां नवीनमण्डलमेकं तदानीमवश्यमेव प्रतिष्ठापयितव्यमासीत् । तदर्थमेषामनुभवशालिनामधिकारिणां संनिधिः परमुपकारक एव संवृत्तः । तैश्च तीव्रबुद्धिबलेनैका नूतना कार्यनिर्वाहशाखैव निरमीयत । इदं तदीयचातुर्यमपि प्राकाशयत् । आसीत्किल ‘ नीग्रो ’जनार्थे पूर्वमेवैका कार्यनिर्वाहशाखा । तस्मादेशियाखण्डवासिनामर्थेऽप्येतादृशेनैकेन विभागेन कुतो न भाव्यम् । तर्कस्यास्य नासीत्कोऽपि प्रत्यवस्थाता । यावदहं तत्र प्राप्तस्तावदयं विभागो निर्मितः स्थितः । किं चायं स्ववागुरां शनैः प्रकाशयति स्म । देशभ्रष्टेभ्यः पुनः स्वदेशे प्रवेशमिच्छद्भ्यो यैरधिकारिभिरनुज्ञा दीयते स्म तैरेव सर्वेभ्योऽपि निर्विशेषमनुज्ञाप्रदानं सुकरमासीत् । परन्तु नव्यशाखाया माध्यस्थ्यमन्तरेण कथमेते ‘ एशिया ’वासिभ्योऽनुज्ञां दातुं शक्नुयुः । नव्यशाखया कृतस्य प्रशस्तिवचनस्य बलादनुज्ञा यदि दीयेत तदा स्वेषामनुयोज्यता स्वल्पी भवेत् । कार्यं च लघु संपद्येतेति हि तैर्वितर्कितम् । भूतार्थस्त्वन्यः । नव्यशाखायाः किल यत्किमपि कार्यमावश्यकम् । तच्छाखाप्रविष्टानामपि द्रव्यमावश्यकम् । कार्याभावे तु निरर्थकोऽयं विभाग इत्यात्मविनाशः संभवेत् । अत एव तच्छाखीयाः स्वकार्यं स्वयमेवेत्थमकल्पयन् ॥

अनुज्ञाप्राप्तये भारतीयैः सैषा शाखा प्रार्थनीयाभवत् । प्रार्थनापत्रस्य तु बहोः कालादुत्तरमायाति स्म । ट्रान्सवालदेशं प्रति जिगमिषूणां संख्या महत्यासीत् । अतो माध्यस्थ्यकाराणां संघ एकः ‘समुद्भूयाधिकारिवर्गमनुप्रविश्य दीनभारतीयेभ्यः परःसहस्ररूप्यकान् लुंठयन्ति स्म । प्रशस्तिं विनानुज्ञापत्रस्य दुर्लभत्वं कदाचित्सत्यामपि प्रशस्तौ परःशतानां सुवर्णमुद्राणामवश्यप्रदेयत्वं च मामचकथन् । एवं स्थिते कार्यगतिः सर्वतः प्रतिबद्धालक्ष्यत ॥

अथाहं मदीयपूर्वमित्रं रक्षिजनपर्यवेक्षकमुपसृत्य व्यजिज्ञपम्—अनुज्ञाप्रदातॄणामधिकारिणां परिचयं मे संपाद्य मह्यमेकमनुज्ञापत्रं दापयितुमर्हन्ति भवन्तः । विदितमेव भवतां यदहं ट्रान्सवालदेशे स्थितपूर्वो जन इति । तत्क्षणमेवासौ शिरसि शीर्षकं निधाय मया सह प्रस्थितो मह्यमनुज्ञापत्रमदापयत् । धूमशकटीप्रस्थानात्पूर्वमेकहोरावकाशोऽपि नालभ्यत । किंत्वहं प्रास्थानिकं पूर्वमेव सज्जीकृत्य स्थितः । अथाहं रक्षिपर्यवेक्षकाय मदीयकृतज्ञतां निवेद्य प्रिटोरियानगरं प्रास्थिषि ॥

अचिरात्संभाविनः क्लेशास्तदानीं मे स्पष्टतया बुद्धिगोचरमवतीर्णाः प्रिटोरियानगरं प्राप्य प्रार्थनापत्रमेकमलेखिषम् । डरबननगरे भारतीयैः स्वप्रतिनिधीनां नामानि पूर्वमेव निवेदयितव्यानीति विद्यमानं कमपि नियमं नाहं स्मरामि । तथाप्यत्र नवीनशाखा स्वकार्यं निर्वहन्ती पूर्वमेव प्रतिनिधीनां नामानि व्यचारयत् । प्रिटोरियावर्तिनां भारतीयानां प्रागेव विदितमासीत्

यदेतेऽधिकारिणः चेंबरलेनमहाशयेन मम संसर्गं निवारयितुमैच्छन्निति। विषादकार्येपि विनोदावहेयं कथा प्रकरणान्तरे निरूपणीया भवति॥

द्वितीयोऽध्यायः

एशियाखंडादागता निरङ्कुशाधिकारिणः

नवशाखाया मुख्याधिकारिणः कथमहं ट्रान्सवालदेशं प्रविष्ट इत्यस्य मर्म नावेदिषुः। स्वसंनिधिमुपसर्पतो भारतीयानभ्यपृच्छन्। किन्तु तत्सकाशाद्वास्तवो वृत्तान्तस्तैर्नावगतः। अतस्ते व्यतर्कयन्त – अनेन पूर्वपरिचयबलादनुज्ञापत्रमन्तरेणैव ट्रान्सवालदेशं प्रविष्टेन भाव्यमिति। ऊहस्यास्य सत्यत्वे सति नूनमहं व्यतिक्रमस्य कृते निरोद्धव्यः स्याम्॥

महायुद्धावसानोत्तरं कियन्तमपि कालं राज्याधिकृतानामधिकारविशेषप्रदानसंप्रदायः सर्वत्र प्रचरति। दक्षिणाफ्रिकादेशेऽप्येवमेव संवृत्तम्। शान्तिप्रतिष्ठापनाय राज्याधिकारेण कश्चिन्नियमः प्रचारितोऽभूत्। तन्नियमानुरोधेन ट्रान्सवालदेशे येऽनुज्ञातप्रवेशास्तेऽवष्टभ्य बंदिनः क्रियेरन्। तथा चाहमासेद्धव्य इति चर्चा प्रवृत्ता। किंत्वनुज्ञापत्रं दर्शयेति मां प्रष्टुं न कोऽपि धैर्यमकरोत्॥

अधिकारिभिस्तन्त्रीसंदेशः पूर्वमेव डरबननगरं प्रति प्रेषित आसीत्। किन्तु लब्धानुज्ञ एवाहमिति ज्ञात्वा भग्नाशा बभूवुः। तथापि तावतैव पराजयमङ्गीकर्तुं न तेऽरोचयन्त। यद्यप्यहं ट्रान्सवालदेशप्रदेशे जयमापं तथापि चेंबरलेनमहाशयस्य दर्शनान्मां वारयित्वा पराजितं कर्तुं शक्नुयुः किल॥

अत एव प्रतिनिधित्वमङ्गीकृत्य, चेंबरलेनमहाशयस्य संनिधिं जिगमिषूणां नामानि ते पूर्वमेवापृच्छन्। वर्णद्वेषो दक्षिणाफ्रिकादेशे यद्यपि सर्वतः प्रत्यक्षीभवति स्म तथापि हिन्दुस्थान इवात्राप्यधिकारिवर्गो नीचां गुप्तगतिमवलम्ब्य प्रवर्तत इति नाहमाकलयम्। दक्षिणाफ्रिकादेशे कार्यशाखाः प्रजाक्षेमाय प्रतिष्ठापिताभूवन्। किं च लोकमतेन नेतव्यासन्। अत एव तत्रत्यानामधिकारिणां वर्गे कापि सभ्यवृत्तिर्नम्रता च दृश्येते स्म। अनेन न केवलं गौरांगा अपि त्वन्येऽपि जना यथार्हतो लाभमाप्नुवन्। एशियाखंडादागतैरधिकारिभिः सहैव तेषां निरंकुशाधिकारो विशृंखलाः प्रवृत्तयश्चात्रापि पदमकुर्वन्। दक्षिणाफ्रिकादेशे प्रजाप्रतिनिधिप्रभुत्वविशेषः कश्चिदासीत्। परंत्वेशियाखंडादमीभिरानीतः संभारः केवलं निरंकुशप्रभुत्वमेव। यदेशियावर्तिषु जनेषु नहि प्रजाप्रतिनिधिप्रभुत्वमासीत्। ते किल विदेशीयैः शास्यन्ते स्म।

Funding by IKS-MoE

दक्षिणाफ्रिकावर्तिनो ये गौराङ्गास्ते देशान्तरादागत्य तत्र बद्धस्थितयोजनाः। ते च तस्य देशस्य प्रजा भूत्वा राजकीयानधिकारिणो नियमयन्ति स्म। यदा पुनरेशियाखंडान्निरंकुशप्रभव आगत्य स्वागमनेन देशमन्वगृह्णस्तदाप्रभृति भारतीयानां स्थितिरेकतो भूसर्पस्यान्यतो जलनक्रस्य च मध्ये क्लिश्यतो मंदभागस्योभयसंकटग्रस्ततामनुहरति ॥

अस्य निरंकुशवर्तनस्य प्रभावो यथांशं मामप्याक्रमीत्। मया पूर्वं तच्छाखामुख्याधिकारी (अयं लंकाद्वीपादागतः) द्रष्टव्य इत्याज्ञा प्रावर्तत। आज्ञेति यत्पदं मया प्रयुक्तं तदुत्प्रेक्षात्वेन मा स्म ग्राहीति प्रकृतमर्थं इतोऽपि स्पष्टतरमभिधास्ये। आज्ञा तावत्पत्रमारोप्य न मे प्रेषिताभूत्। भारतीयप्रमुखैरेतच्छाखाधिकारिणां दर्शनमसकृत् क्रियते स्म। तेषु तैयब-हाजी-खानमहमद-शेठ-महाशयोऽप्येकः। मामुद्दिश्य शाखामुख्याधिकारी तमपृच्छत्—कोऽयम्। किं निमित्तमिहागत इति ॥

तैयबशेठः प्राह—अयमस्मदीयो मन्त्रालोचकः। अस्माभिराहूतत्वादिहागतो भवतीति ॥

अथ पुनः स प्रभुरपृच्छत्। यद्येवं तर्हि किमर्थमेते वयमत्र स्थिताः। ननु युष्मद्रक्षणायैव वयं नियोजिताः स्मः। अत्रत्याः स्थितिगतीर्गान्धिः किं वा जानीयादिति ॥

तैयबशेठमहाशयश्चास्याक्षेपस्य यथावत्समाधायकं प्रत्युत्तरमदाद्यथा—भवन्तस्तावन्नूनमत्रस्थिताः। तथापि गांधिरस्मदीयः। जानात्ययमस्मदीयां भाषाम्। जानात्यस्मदीयं मनः। भवन्तस्तावदधिकारवर्गे प्रविष्टा इति। आनीयतामयमस्मत्समक्षमित्यधिकारी तैयबशेठमहाशयमाज्ञापयत्। तैयबशेठमहाशयेनेतरैश्च साकमहं तत्समीपमगमम्। उपविश्यतामित्यपि नास्मानयमवादीत्। वयं सर्वेऽपि स्थिता एव ॥

इह त्वं किमर्थमागतोऽसीति स प्रभुर्मामपृच्छत्। तदाहमवोचम्—मदीयैर्भारितीयैः सहोदरैराहूतः सन् तेभ्यः कार्यगतिप्रदर्शनपूर्वकं साहाय्यं चिकीर्षुरिहागतोऽस्मीति ॥

अथासौ मामकथयत्—ननु त्वमिहागन्तुमनधिकारीति किं न वेत्सि। तव प्रदत्तमनुज्ञापत्रमदेयमपि बुद्धिदोषात्प्रदत्तं भवति। त्वमत्रत्यो भारतीय इति गणयितुं न शक्यते। त्वया परावर्तितव्यम्। त्वया चेंबरलेनमहोदयो न द्रष्टव्यः। भारतीयानां रक्षणार्थमेवैशियाशाखात्र प्रतिष्ठापिता भवति। स्वस्ति गम्यतां तर्हीति। एवं ब्रुवाणः प्रत्युत्तरस्याप्यवकाशमदत्त्वा मां व्यसर्जयत्। मत्सहागतास्तु स्थापयित्वा बलवत्तानुपालभ्य सर्वथा परावर्त्यतामयमित्यबोधयत् ॥

अधोमुखास्ते प्रतिन्यवृत्तन्। इत्थमस्मानतर्कितैका घटना समुपानमत् ॥

Funding by IKS-MoE

तृतीयोऽध्यायः

अपमाननिगिरणम्

अनेनापमानेन परमहं दुःखितोऽभवम् । किन्तु तादृशापमानस्य पूर्वमसकृन्मया निगीर्णत्वात्तत्सहनमिदानीमभ्यासबलात्सुकरमासीत् । अपमानमेनं निगीर्य प्रसङ्गेऽस्मिन्निष्पक्षपातदृष्ट्या सूच्यमानं कर्तव्यमार्गमनुसरेयमिति निश्चयमकार्षम् ॥

पूर्वोक्तादधिकारिणः सकाशादेकं पत्रमप्यागतम् । तत्रैवं लिखितमासीद्यथा—आर्येण गांधिना पूर्वमेव डरबननगरे दृष्टः सतः प्रतिनिधीनां श्रेण्यास्तन्नामधेयमवश्यं निष्कासनीयं मन्यामह इति ॥

पत्रमिदं मदीयसहचराणां दुःसहमासीत्। प्रतिनिधयो नैव प्रेषणीया इत्यमी स्वाभिप्रायमवदन् । तदनु मयास्मदीयजनानां कष्टा परिस्थितिस्तेभ्य उपावर्णि । अथ च प्रावोचम्—यदि यूयं चेंबरलेनमहाशयं न द्रक्ष्यथ तदात्र युष्माकं न किमपि कष्टं विद्यत इत्यसौ मन्येत। अपि च यावद्विवक्षितं तावल्लिखित्वैव प्रदातव्यम् । तच्च सज्जस्थितमेव। तदेतन्मया किं पठितव्यमन्येन वेत्ययं विचारो न मुख्यः । चेंबरलेनमहाशयस्तावद्विषयमिमं सहास्माभिर्न चर्चयिष्यते । मद्विषयोऽपमानः सोढव्योऽस्माभिरिति मे प्रतिभातीति ॥

असमाप्तवचन एव मयि तैयबजीमहाशयोऽब्रवीत् । ननु भवद्विषयोऽपमानः सर्वेषां नः समान एव । भवानस्मत्प्रतिनिधिरिति कथं वा विस्मरणीयमिति ॥

अहमवोचम्—भवद्भिरुक्तं संगतमेव । किन्तु तादृशोऽपमानोऽस्मत्पक्षीयैरपि निगरीतव्यः । नन्वत्र किमुपायान्तरमस्तीति ॥

अथ तैयबशेठमहाशयोऽपृच्छत् । यद्भवतु बोधं बोधं कुतोऽस्माभिः स्वयमेवात्मन्यपमानो भूयः पातयितव्यः । अस्मदीया परिस्थितिरद्यत्वापेक्षया निकृष्टतरा न खलु संपद्येत। अधिकारस्तावत्को वास्माकमिदानीं विद्यते यस्यापहारं वयं शङ्केमहीति ॥

आवेशपूरितमिदमुत्तरं मे संमतमासीत् । किंत्वेतदकिंचित्करमिदानीमिति च मया सम्यग्ज्ञातम् । अस्मदीयपक्षस्य योग्यतापरिमितिः किल मे सम्यगनुभवसिद्धा । अतोऽहं सुहृदः समाधाय मदीयस्थाने जॉर्जगॉडफ्रेमहाशयो नेतव्य इत्यसूचयम् । जॉर्जगॉडफ्रेमहाशयस्तावदेको भारतीयब्यारिस्टरमहाशयः ॥

गॉडफ्रेमहाशयः प्रतिनिधीनामग्रेसरो भूत्वा चेंबरलेनमहाशयस्य संनिधिमगमत् । प्रतिवचनप्रसंगे चेंबरलेनमहाशयो मद्विषयकं प्रवेशनिषेधमधिकृत्य एवं किल बभाषे—वारंवारं एकस्यैव प्रतिनिधेः परिग्रहापेक्षया नवनवैर्जनैः समागमः प्रशस्तः किलेति । एवमादिभिर्वाक्यैर्मदपमानक्षतसंतापं शमयितुमसौ यत्नमकरोत् । किंत्वेतेनास्मत्समाजस्य मम च कार्यं न तावत्समाप्तं परमितोऽप्यधिकमजनि । यतः पुनरादितः प्रारंभणीयमासीत् ॥

Funding by IKS-MoE

भवदाज्ञानुरोधेनैव अस्मदीयजना युद्धे साहाय्यं चक्रुः। इदानीं परीक्ष्यमाणे तस्य परिणामोऽयं किल जातः। एवं रीत्या मां कतिपये निनिन्दुः। परन्तु मामेतन्नैवास्पृशत्। तत्कृते नाहमिदानीं विषीदामि। युद्धे मेलनाद्वयं साधु कृत्यमकार्ष्मेत्यद्यापि साधयामि। तेनास्माभिरस्मत्कर्तव्यं कृतं न किञ्चिदन्यत्। अस्मत्कार्यफललाभेन खलु प्रत्याशा धारणीया। किन्तु सत्कार्यस्य फलं सदेव जायत इत्यस्ति मे दृढः प्रत्ययः। अपि च व्यतीतविषयाणामालोचनापेक्षया भाविकर्तव्यं किमित्यालोचयितुमावश्यकं भवति। तस्मादागम्यताम्। एतद्विचारमेवालोचयाम इत्यहमवोचम्॥

अस्य सर्वेऽपि स्वसंमतिं ददुः। अहं पुनरुक्तवान् यथा—सम्यक्परिदृश्यमाने यत्कार्यमुपदिश्य यूयं मामिहाहूतवन्तः तत्कार्यमिदानीमवसितमित्येव वक्तव्यम्। किन्तु यूयं ममाज्ञादायिनोऽपि यावच्छक्यमहं ट्रान्सवालपत्तनं परित्यज्य न गन्तव्यमिति विश्वसिमि। इतः परं मया मदीयकार्यं नातालपेक्षयेत एव चालनीयम्। हिन्दुस्थानं प्रति वर्षाभ्यन्तरे निवर्तनविचारं परित्यज्यात्रैव न्यायवादिकार्यं कर्तुमनुज्ञापत्रमधिगन्तुं प्रयतितव्यम्। एतां नवीनसंस्था प्रतिभटीकर्तुं श्रद्धा ममास्त्येव। यद्यस्माभिर्न प्रत्यवस्थीयेत तदास्मदीयजनानितो निष्कास्येतापि च लुंठयेत। प्रतिदिनमस्मदीयसमाजस्थजनानां नवं नवमपमानं प्राप्य तत्परिस्थितिरितोऽपि हीयते। चेंबरलेनमहाशयस्य मां द्रष्टुं निराकृतिस्तदधिकारिणा कृतो ममापमान एतत्सर्वमल्पं भाविनोऽपमानस्याग्रतः। गौरांगानामिच्छानुरोधेन कार्यं हेयजीवनं सोढुमशक्यमिति॥

इत्थमहं कथालापं कर्तुं प्रारभ्य प्रिटोरिया-जोहानिसबर्गप्रदेशयोर्मुख्यमुख्यभारतीयैः सह चर्चयित्वा पर्यन्ते जोहानिसबर्गनगरे कार्यालयं प्रतिष्ठापयितुं निश्चयमकार्षम्॥

ट्रान्सवालदेशे न्यायवादिकार्यार्थेऽनुज्ञापत्रप्राप्तिः संशयिताभूत्। किन्तु तत्रत्या न्यायवादिमंडली मम प्रार्थनपत्रिकां न प्रत्यवातिष्ठत। तत्रत्यं मुख्यन्यायस्थानं ममानुज्ञां ददौ। भारतीयानां कार्यालयस्यार्थे साधुप्रदेशे मंदिराधिगमोऽपि दुर्लभ आसीत्। श्री. रीचमहाशयस्तत्र वाणिज्यकर्ता मम सम्यक् परिचित आसीत्। तस्य विदितस्य कस्यचिद्गृहप्रापकस्य मुखेन साधुप्रदेशे मन्दिरमेकं मम कार्यालयार्थे संपाद्य न्यायवादिकार्यं मया प्रारब्धमासीत्॥

चतुर्थोऽध्यायः

कार्यविधानशीघ्रभावः

ट्रान्सवालप्रदेशे हिन्दुनिवासिनां स्वाधिकाररक्षणायैशियासंबन्धिसंस्थया सह क्रियमाणकार्यार्थं च यः कोलाहलः कृतस्तद्विषयकाभिधानात्पूर्वमेव मदीयजीवनस्य कतिचिदंशान्प्रति दृष्टिर्देया भवति॥

Funding by IKS-MoE

एतावत्पर्यन्तं मय्यभिलाषः संकीर्ण आसीत्। यत्किंचिद्भविष्यलाभे दृष्टिं रक्षित्वा सोऽभिलाषो मन्दीकृतोऽभूत्। परमार्थेन सह स्वार्थोऽपि मिलितोऽभूत्। मोहमयीनगरे यदाहं कार्यालयं प्रतिष्ठाय स्थितवान् तदामेरिकादेशात् सौम्यदृष्टिः साधुजिह्वश्चैकः 'इन्स्युरन्स-एजन्ट' पुरुषः समागतोऽभूत्। पुराणः सुहृदिव मया सह भाविनं योगक्षेमं विचारितवान्। अमेरिकानिवासिनो भवादृशाः सर्वे जीवितरक्षार्थं यत्नमकार्षुः। भवानपि भविष्यदृष्ट्या रक्षां कर्तुं युज्यते खलु। विनश्वरमिदं जीवितम्। अमेरिकादेशः सर्वोऽपि भविष्यरक्षां स्वधर्मं मन्यते। भवानप्येकमल्पं रक्षापत्रं ग्रहीतुं योग्य एव॥

अद्यपर्यन्तं दक्षिणाफ्रिकाहिन्दुस्थानयोर्ये 'इन्स्युरन्स-एजेंट' नामकाः मया दृष्टास्तेष्वहमुदासीनप्रायः समभवम्। यतः 'इन्स्युरेन्स' नाम भयं भगवत्यविश्वास इत्यमंसि। किन्तु सांप्रतं अमेरिका 'एजन्ट'स्य प्रेरणया वशीकृतः पर्यालोचयं यथा—मम मानस्यां दृष्टौ भार्यापुत्राणां चित्रं प्रादुरासीत्। आत्मानमवोचम्—मानवभार्यायाः सर्वाणि भूषणानि विक्रीतवानसि। यदि किञ्चित्तव संभवेत्तस्याः पुत्राणां च संरक्षणभारस्तव भ्रातुरुपरि पतिष्यति। स खलु पितृस्थानमास्थाय स्थितः। मन्यस्व कथमेतत्तवोपरि स्यात्। एभिरात्मानुवादप्रवादैरात्मानं समाधाय दशसाहस्ररूप्यकाणां पत्रमेकमग्रहीषम्॥

किन्तु दक्षिणाफ्रिकायां यदा मे जीवनप्रकारो भिन्नभिन्नोऽभूत्तदा मम दृष्टिश्च भिन्नासीत्। आधुनिकविचारकाले मया ये तु क्रमा अङ्गीकृतास्ते सर्वे भगवन्नामविश्वासेन तत्सेवार्थं च कृता आसन्। दक्षिणाफ्रिकादेशे कियच्चिरं मया स्थातव्यमिति नाहमशासिषम्। हिन्दुस्थानं प्रति न पुनरहं गच्छेयमित्यपि भयाकुलोऽभवम्। अतो मे भार्यां पुत्रांश्च मत्समीप एव स्थापयित्वा तद्रक्षणपर्याप्तं धनमर्जयितुं निरचैषम्। एवं निश्चिते 'इन्स्युरन्स पोलिसी' ग्रहणं मे नैव समुचितमासीदिति विचिन्त्य 'इन्स्युरन्स-एजन्टे'न प्रसारितवागुरायामहं पतित इति लज्जितोऽभवम्। आत्मनः स्वयमवोचम् यथा भ्राता नूनं यदि पितृस्थाने स्थितस्तदा यदि मे भार्या विधवा भवेत्तदा तस्यास्तत्पुत्राणां च रक्षणं नायं भारं मन्येत। केन कारणेनेतरेभ्यः पूर्वमेवाहं मृत्युवशो भविष्यामीति चिन्तनीयम्। वस्तुतः संरक्षको भगवान्। न चाहं न च मे भ्राता। 'इन्स्युरन्स'पत्रग्रहणेन भार्यायाः पुत्राणां च स्वाधीनचित्तता मया चोरिता भूत्। कस्मात्त एवात्मरक्षणं न कुर्युः। प्रपंचे निःसंख्यान्यकिंचनानि कुलानि विद्यन्ते। तेषां किं जातम्। तेषां मध्येऽहमप्येकोऽस्मीति कस्मान्न चिन्तनीयम्॥

ईदृशा बहवश्चिन्ता मनस्युदभवन्। किन्तु तत्क्षणमेवाहं न किंचिदकार्षम्। दक्षिणाफ्रिकादेशे सकृद्'इन्स्युरन्स'प्रदेयं धनं दत्तवानिति स्मरामि॥

बाह्याः संभवा अपीदृशचिन्तापथस्यानुकूला एवासन्। दक्षिणाफ्रिकादेशे मम प्रथमागमे ख्रिस्तानुयायिसंबन्ध एव मम धार्मिकीं बुद्धिमुज्जीव्यास्थापयत्। इदानीं पुनस्तस्य भागवतैः संबन्धो

बलं ददौ। रीचमहाशयः स्वयं भागवत आसीत्। स खलु मां जोहनिसबर्गप्रदेशीयभागवतसंघेन परिचितिमकारयत्। किन्तु तत्राहं सांघिको नाभवं यतो ममाभिप्राया भिन्नभिन्ना आसन्। परन्तु मे प्रायः समस्तभागवतजनैः संपर्को लब्धः। प्रतिदिनं तैः सह धर्मविषयं प्रति विचारो मे प्रवृत्तः। भागवताः स्वग्रन्था-पठन्ति स्म। कदाचिन्ममापि सभायां भाषणं कर्तुमवसरः समजनि। परस्परभ्रातृभावमास्थाय तस्य संवृद्धिकरणमेव भागवतधर्मस्य मुख्यो विषयः। एतदुद्देश्य बहवो विचाराः कृताः। सांघिकानां मतं स्वधर्मप्रतिकूलमदृश्यत यदा तदाहं सांघिकानां दोषानुदधाय्यम्। एतच्च सफलमासीत्। यतः स्वात्मविचारे तन्मनः समाचकर्षत्॥

पञ्चमोऽध्यायः

आत्मविचारफलम्

त्रिनवत्यधिकाष्टादशशतमिते (१८९३) वत्सरे क्रिस्तमतानुयायिना सुहृज्जनेन सह परमसख्योपसंपर्को यदागतस्तदाहं केवलनूतन आसम्। ते सर्वेऽपि क्रैस्तमतमवलंबयितुं मां बहुधा प्रायतन्त। मया तावत्सर्वं विनीततया गौरवेण च विश्रुतमासीत्। तस्मिन्काले यावच्छक्यं हिन्दुमतं परिशीलयन्नितरेषां धर्मानवगन्तुं यत्नमकार्षम्॥

त्र्यधिकोत्तरोनविंशतिशतमिते (१९०३) वत्सरे परिस्थितिर्भिन्नाभूत्। भागवतमित्राणि निश्चितं मां स्वमतान्तराकृष्टुमयतन्त। किन्तु 'हिन्दुमतस्थान्मत्सकाशाद्यत्किंचित्संपादयितुं तथाकुर्वन्। भागवतधर्मसाहित्ये हिन्दुधर्मविषयाः संपूर्णाः सन्ति। अत एवैतेऽमन्यन्तोपयुक्तोऽहं भवेयमेतेषामिति। अहं स्पष्टमवोचम्—संस्कृताभ्यासो ममात्यल्पः। हिन्दुमूलग्रन्थानहं नापठिषम्। तेषां भाषान्तरावलोकनमप्यल्पिष्टमिति। पूर्वसंस्कारेषु पुनर्जन्मनि च श्रद्धालवस्ते। यत्किंचित्साहाय्यं मत्तो भवेदिति तेषां विश्वासः। अल्पमत्स्यानां मध्येऽहमेकः सामुद्रिको देवोऽस्मीत्यभावयम्। एभिर्मित्रैः सह स्वामिविवेकानन्दस्य राजयोगं पठितुं 'एम. एम. द्विवेदि' महाशयस्य राजयोगमन्यैः सह पठितुं च प्रारब्धवान्। पातञ्जलयोगसूत्रमेकेन भगवद्गीतां चान्यैः सह पठितुमुद्युक्तवान्॥

वयमन्वेषकसमितिं विधाय तत्र पठनानि क्रमेणाकार्ष्म। गीताग्रन्थः पूर्वमेकः समाकर्षति स्म। आसीदत्र मे महती श्रद्धा। इदानीं तत्र निमज्जनमावश्यकमिति मे विदितमासीत्। मन्निकटे एकद्विभाषान्तराण्यासन्। यान्याश्रित्य मूलसंस्कृतार्थमवगन्तुमैच्छम्। प्रत्यहमेकं वा द्वौ वा श्लोकान्कण्ठे कर्तुमुद्युक्तवान्। एतदर्थं प्रातःस्नानादिकस्य वेलामुपयोजित-

Funding by IKS-MoE

वान्। दंतधावनाय पंचदशनिमेषा: स्नानाय विंशतिरिति पंचत्रिंशन्निमेषकाल अस्मद्यापारे निरगात्। पूर्वतरं कार्यं पाश्चात्यरीत्या स्थित्वा कृतम् । अग्रेतनायां भित्तौ गीताश्लोका लिखिता आसन्। मम ज्ञापकशक्तिमुत्तेजयितुं तानपश्यन्। प्रात्याहिकं शिक्षाविभागं बुद्धिमारोप्य शिक्षितश्लोकानावर्तयितुमेतावान्कालः पर्याप्तोऽभूत् । इत्थं त्रयोदशाध्यायाः कण्ठे कृता इति स्मरामि ॥

किन्तु कार्यान्तरेण गीताशिक्षा त्याज्याप्यासीत्। सत्याग्रहविधानं तत्पोषणं च सर्वकालमग्रहीन्मनःप्रवृत्तिम्। द्वितीयमद्यापि चलत्येव ॥

किं फलमेष गीतापाठो मित्राणामदादिति त एव वक्तुं समर्थाः। मम तावदेषा गीता निर्दोषनीतिमार्गशिक्षणी प्रात्यहिकशब्दकोषश्च। यथा यथाज्ञातशब्दानामर्थविज्ञानायाङ्ग्लशब्दकोशं पश्यामि तथा तथा सर्वक्लेशसंकटानां परिहारायेमां नीतिमार्गप्रदर्शिनीमवलोकये ॥

अपरिग्रहसमभावरूपाः शब्दाः मे मनसि निरूढिमागताः। कथमीदृशः समभावोऽभ्यसनीयः। कथं च रक्षणीय इति प्रश्नः प्रत्युत्तरणीयः। कथं निन्दकाः शोचका धनग्रहीतारश्च पुरा सहकारिणो भूत्वेदानीं पुनर्निरर्थकप्रतिरोधकर्तारश्च सर्वदा साधवः पुरुषाश्चेमे सर्वेऽपि कथं समभावेन गणनीयाः। कथं वा सर्वस्वपरित्यागः क्रियेत। न किं देह एवात्मनः स्वं भवति। भार्या पुत्राश्च न किं स्वं भवन्ति। मत्समीपस्थितपुस्तकभंडाराणि किं सर्वाणि विनाशनीयानि। मदीयमखिलं परित्यज्य स भगवाननुगन्तव्यः। अस्य प्रत्युत्तरमेकदा स्फुरति। मम सर्वस्यापि परित्यागं विना तमनुसर्तुं शक्यम्। आङ्ग्लन्यायशास्त्राभ्यासो मम साहाय्यमदात्। स्नेलमहाशयस्य न्यायचर्चा मम मानसमागता। 'ट्रस्टी'पदस्यार्थं गीतावचनैः प्रकाशितं पूर्वापेक्षया स्पष्टतरमज्ञासिषम्। आङ्ग्लन्यायशास्त्रे मम गौरवं ववृधे। तस्मिन् किल धर्ममालोकयम्। गीतास्वपरिग्रहो नाम 'ट्रस्टी'वद्वर्तनम्। मोक्षकामिनस्तथा भवेयुः। यद्यपि 'ट्रस्टी' सर्वपदार्थान्स्ववशे स्थापयति तथा च नियमाननुसृत्य पालयति किं तु तत्र न किञ्चिदपि स्वकीयं मन्यते। अपरिग्रहसमभावौ हृदयपरिवर्तनं मनःपरिशीलनं च पूर्ववर्तिनौ स्त इति दिवसप्रकाश इव मे स्पष्टमासीत्। रेवाशंकरभाईमहाशयं प्रत्यलिखं यज्जीवितरक्षापत्रमपयातु। यत्किंचिदितः प्राप्यं यदि लभ्यतां नो चेत्सकृद्दत्तं धनं नष्टं मन्यामहे यतो मदीयभार्यापुत्रान्योऽसृजत् स एवास्मद्रक्षणं करिष्यतीति। पितृस्थानस्थितं भ्रातरं प्रत्यलिखं यावदन्तिमक्षणपर्यन्तं संपादितस्थितं तावन्मया सर्वं तवार्पितम्। इतः परं किञ्चिदपि प्रदेयं नैव स्यात्। यतो भविष्यन्त्यर्जनानि यदि तावद् भवेयुस्तानि जनसमाजाय प्रदेयानि। भ्रातरं प्रति सौलभ्येनैतद्विदितं कर्तुं नाशकम्। स किल परुषया वाचा स्वं प्रति मम कर्तव्यमवोचत्। यथास्मत्पितुरपेक्षया बुद्धिमत्तरानात्मानं नैव मन्येत। संसाररक्षणमहमिव त्वं कुर्याः। यथास्मत्पिता करोति स्म तथैवाहं कुटुंबरक्षणं

करिष्यामि । कुटुंबशब्दस्यार्थविस्तरः कर्तव्यः । तदा मया कृतस्य कर्मणा बुद्धिमत्त्वं स्पष्टीभविष्यति ॥

भ्राता मां पर्यत्यजत् । पत्रव्यवहारानवर्जयत् । अहं नितरां विषण्णोऽभवम् । किन्त्विदं मे कर्तव्यमिति निश्चित्य प्रवर्ते । तत्परित्यागाद्द्विगुणतरं विषादमकरिष्यत् । किंत्वहं तावत्स्वल्पतरमङ्गीकृतवान् । तथापि मे भक्तिस्तस्मिन्निर्मला सातिशया च स्थिता । तस्य संकटस्य मयि तस्य महती प्रीतिरेव मूलम् । मम धने तावदसौ नैच्छत् । किन्तु कुटुंबस्य ममाचारेण साधुना भवितव्यमित्येतावदेव । तस्य जीवितान्ते ममाभिप्रायं युक्तं मन्वानो मृतप्रायः शयानो मयाकृतमेव समुचितमिति विदित्वा करुणापूर्णमेकं मम लेखमलिखत् । पिता चेत्पुत्रं क्षमां मार्गेत् मार्गतु । तथाप्ययं स्वपुत्रान्मत्संरक्षणीयान्कृत्वा यथा मे रोचेत तथा तान् शिक्षयितुमिच्छामीत्युक्त्वातिशीघ्रमेव मां द्रष्टुमिच्छामीत्यवदत् । दक्षिणाफ्रिकादेशमागन्तुमिच्छामीत्यलिखत् । आगम्यतामित्यहं प्रतिवचनमदाम् । तथाप्येतन्न हि संभवि स्यात् । तस्य पुत्रविषयिणीच्छापि पूर्तिं नागच्छत् । यतस्तेषां व्यवहाराः पुराणास्तेषां जीवनक्रमो विलक्षणश्च । तानहं मत्पार्श्वमाक्रष्टुं नाशकम् । नायं तदीयो दोषः । स्वकीयप्रकृतेरुद्गमं प्रति एतावदेव दूरं नातः परमिति को वा वक्तुं शक्नुयात् । जन्मन्यागतान्पूर्वसंस्कारान्विलोपितुं कः समर्थः । एकपुरुषस्य पुत्रा इतरे रक्षणीयाश्च तस्य पुरुषस्य मार्गानवश्यमवलंबंत इति को वा निरीक्षेत ॥

एतत्खलु प्रदर्शयति कियन्नियमपरतन्त्रं पितृस्थानमिति ॥

षष्ठोऽध्यायः

शाकीययज्ञः

यथा यथा यज्ञप्रसादः सरलता च मम प्रात्याहिकजीवने स्वानुभवमागता यथा च धार्मिकी बुद्धिरुत्तेजिताभूत् तथा तथा सर्वजनोपयोगी शाकाभिलाषो वर्धमान आसीत् । जानाम्यहमेकविधामेव केवलं ज्ञानोत्पादनरीतिं स्वयमेव वा ज्ञानान्वेषकैः सह वा ॥

जोहानिसबर्गप्रदेशे शाकाहारिणां भोजनालयः क्युनीमहाशयस्य जलचिकित्सायां बद्धश्रद्धेन केनचिज्जर्मनपुरुषेण संचाल्यते स्म । भोजनालयमहमेव गत्वा कैश्चिदाङ्ग्लमित्रैः सह साहाय्यमकार्षम् । किन्त्विदं मे विदितमासीद्यदयं सर्वदा द्रव्यसंकटे पतितश्चिरं न जीवेदिति । यावदहं तस्य साहायतां प्रतिपाद्य किंचिद्धनमपि तदर्थं व्ययीकृतवान् । किन्तु पर्यन्ते स विरतव्यापारः संजातः ॥

Funding by IKS-MoE

भागवताः ‘थियोसोफिस्ट’मतानुयायिनः सर्वे प्रायः शाकाहारिणः । तत्संघीया महोत्साहशालिनी काचित् स्त्री शाकाहारिणां भोजनालयमस्थापयत् । तस्याः कलाप्रीतिरासीत् । सातिव्ययकारिणी आयव्ययनियमेषु मुग्धा । सा प्रारंभे स्वल्पेषणा स्थिता । पश्चात्प्रकोष्ठान्महतो गृहीत्वा बहुलीकर्तुमिच्छन्ती साहाय्यार्थं मामपृच्छत् । समीपमागताया आयव्ययविचारं न किंचिदहमज्ञासिषम् । तदीयगणना प्रायः समीचीना भवेदिति विभाव्य तस्याः साहाय्यं कर्तुमुद्युक्त इवासम् । मम व्यावहारिका मत्समीपे द्रव्यराशीन्निक्षिपन्ति स्म । तेषामेकस्य संमतिं लब्ध्वा एकसहस्रपौंडमितं द्रव्यं तदीयत्वेन प्रादाम् । सोऽयं मे व्यवहारो महोदारः श्रद्धालुश्च । दक्षिणाफ्रिकादेशं पुरा कर्मकरो भूत्वागतः । तेनोक्तं दीयतां धनम् । एतद्विषये न किंचिदहं जानामीति । जानाम्यहं भवन्तमेकमेव । तन्नाम ‘बद्री’ति । पश्चादयं सत्याग्रहे मुख्यभागमूढ्वा कलागारेप्यवसत् । अतोऽहमेकसहस्रदान एषा संमतिः पर्याप्तेति मत्वा प्रादाम् ॥

द्वित्रमासाभ्यन्तरे ज्ञातमासीद्दत्तं धनं पुनर्नागच्छतीति । एतावन्नष्टं सोढुमहं न शक्तः । एतद्धनं व्ययीकर्तुमासन्बहला उद्देशाः । उद्धारद्रव्यं नैव पुनरागतम् । कथं श्रद्धालुर्बद्रीमहाशयो नष्टं सहेत । मामेकमेव जानाति । अतस्तस्मा अहमेव दत्तवान् । एतद्व्यवहारमुद्दिश्य निवेदितः कश्चन सुहृन्मम मूर्खतामनिन्दत् । प्राह च—भ्रात (महात्मेति पितेति वा नाहं तदा दक्षिणाफ्रिकादेशे ख्यातः) एतन्न ते कर्तव्यम् । अनेकविषयेषु भवत्परतन्त्रा वयम् । धनं पुनर्नागमिष्यति । ब्रद्रीमहाशयो न हि दुःखे पतिष्यति । तस्मै तस्य धनं त्वमेव दास्यसि । तव विश्रांतिसाधनाय व्यवहारिणां धनमेवं चेद्व्ययीक्रियेत तर्हि ते वराका नष्टा भवेयुः । त्वं च शीघ्रमेव याचको भविष्यसि । परन्तु त्वमितरपरतन्त्रो भिक्षुको यदि स्याः सार्वजनिककार्यमशेषं विरतिं यास्यति ॥

कृतज्ञोऽस्मि खल्वेवं ब्रुवाणः सुहृदद्यापि जीवति । दक्षिणाफ्रिकादेशे वान्यत्र क्वापि वा परिशुद्धिमत्तरो जनो नाद्यापि मया प्रत्यक्षीकृतः । यदि स लोकानां संशयपात्रं भवेत् स च संशयो निराधारो यदि स्यात्तदा क्षमां याचित्वात्मानं परिशोधयति । सम्यग्रीत्या मामबोधयदिति मया दृष्टम् । बद्रीमहाशयस्यः नष्टं यद्यपि पर्यहार्षं तथापि समानधनविनाशे तथा कर्तुमशक्यत्वात् ऋणी अभविष्यम् । ऋणी त्वहं मम जीवितकाले कदापि नाभवम् । तत्र मे जुगुप्सा महती ॥

विश्रान्तिसाधनायापि मनुष्यः स्वावधिं नातिक्रामेत् । परकीयधनप्रदानं न गीतासु निरूपितम् । मुख्योद्देशोऽपि नानुरुद्धः । फलाभिसंधिं विना समभावेन कर्म कुर्यादित्युपदिश्यते । इयमसत्कृतिः सद्बोधज्योतिरासीन्मे ॥

एवं रीत्या शाकाहारप्रचाराय मया दत्ताहुतिस्तात्विकविद्यमानबलात्संभूता न पुनरुद्देशपूर्वकमासीन्न च सा मयाभिलषिता ॥

Funding by IKS-MoE

सप्तमोऽध्यायः

मृत्तिकाजलचिकित्साप्रयोगः

निराडंबरजीवनेन सह ममौषधेषु निःस्पृहा वृद्धिमागता । यदा हि मया डरबनपत्तने ‘वकील’कार्यं क्रियते स्म तदा मे कंचित्कालं निःशक्तितो वायुप्रकोपनक्लेशितोऽभवम् । डॉ. मेहतामहाशयो मां द्रष्टुमागतः । चिकित्सतस्तेन नीरोगः संवृत्तः । ततःपश्चाद्यावद्भारतभूमिं गतस्तावन्न किंचिदस्वास्थ्यं नाम मया सोढमासीत् । किन्तु जोहानिसबर्गप्रदेशे मलबन्धेन पदे पदे शिरःशूलेन च वेदनां गतः । अवसरेऽवसरे प्रवृत्त्यौषधग्रहणेन समयोचिताहारसेवनेन प्रकृतिस्थोऽहं स्थितः । किंत्वनामयोऽस्मीति वक्तुं न शक्तः । एषां प्रवृत्त्यौषधानां योगेन कदा विमुक्तो भवेयमित्याश्चर्यभरितोऽस्मि ॥

अस्मिन्नेव काले प्रायः मांचेस्टरपत्तने प्रातराहाराभावसंघस्थापनासमाचारपठिषम् । तस्य संचालकानामाशयो यथा – आङ्ग्लजनो बहुकृत्वोऽतिमात्रं चाभुंक्त । तदीय ‘डॉक्टर’महाशयानां व्ययनिरूपकपत्राणि गुरुण्यासन् । यतोऽर्धरात्रपर्यन्तमभुञ्जत । आधुनिकपरिस्थितिं समीकर्तुं प्रातराहारो वर्जनीय इति । एतावत्सर्वं यद्यपि ममान्वयं नागात्तथापि क्वचिद्भागे ममाप्यन्वयमभजत् । यतो मे त्रिवारं भोजनं पुनर्मध्याह्ने ‘चा’पानादिकं च । खादनेऽहं न मन्दः । सूपमाहारानाकण्ठपूरं दलवर्जं भुज्यते स्म । षट्सप्तवादनात्पूर्वं नाहं शयनादुदतिष्ठम् । ततः प्रातराशं यदि त्यजेयं शिरःशूलान्मुक्तो भवेयमिति । कतिपयदिवसमयं तं दुष्करतया प्रयत्नमकार्षम् । शिरःशूलानि सर्वाण्यपि विलयं गतानि । तदेव निदर्शनमासीद्यदहं यावदावश्यकं तदतिक्रम्य भुञ्जान आसमिति ॥

एतत्परिवर्तनेनापि मलबंधक्लेशादहं न मुक्तः । क्युनीमहाशयस्य कटिस्नानमकार्षम् । तेन किञ्चित्स्वास्थ्यमासीत् । संपूर्णपरिहारो नाभूत् । एतदन्तरे शाकाहारिभोजनालयस्य गोप्ता जर्मनंमहाशयो वा सुहृदंतरं वा विस्मरामि ‘जुस्ट’कर्तृकं ‘प्रकृतिं प्रति निवृत्तिः’ इति ग्रन्थमेकं मम हस्ते प्रादात् । अस्मिन्पुस्तके मृत्तिकाचिकित्सा निरूपिता । यया चिकित्सया कलितमाश्चर्यम् । चिकित्साविधानमित्थं – जठरस्योपरि शुद्धमृत्तिका शीतलोदकेन मिलिता समीचीनकपटे प्रसारिता भवतु । अहं शयनात्पूर्वं निधाय रात्रौ वाथवा प्रातर्वा यदा जाग्रदभूवं तदा निष्कास्यते स्म । एतेन रोगो निर्मूलितः । स्वस्योपरि मित्राणामुपरि चेदं परीक्षितम् । न किमपि विषीदितुं कारणं दृष्टम् । हिन्दुस्थाने श्रद्धयेमां चिकित्सां विधातुं न शक्नोमि । यत एकस्मिन्स्थानेऽवस्थाय परीक्षा न शक्या । किन्तु मृत्तिकाचिकित्सायां मे श्रद्धा वर्तते । अद्यापि मृत्तिकाचिकित्सामात्मोपरि करिष्यामि । सहकारिणां सत्यवसरे च तत्प्राशस्त्यं ब्रवीमि ॥

यद्यपि द्विवारमहं रोगाक्रान्तस्तथापि स्वल्पैवावश्यकतासीदौषधं सेवितुम् । सहस्रएकोनसहस्रं सम्यगाहारसेवनेन मृत्तिकोदकचिकित्सया तथाविधगृहस्थितवस्तूपभोगेन च सुख-

Funding by IKS-MoE

संरक्षितं भवति । यस्तु यस्तु स्वल्पास्वास्थ्यकृते 'डॉक्टर-वैद्यो हकीम' इति परिधावति नैकविधशाकं औषधान्तरं च भुङ्क्ते स निजजीवितकालं ह्रस्वीकरोति देहस्योपरि स्वामिभावं दूरीकृत्य दासभावमङ्गीकृत्यात्मनिग्रहं त्यक्त्वा पुरुष एव न भवति ॥

एतान्विषयान्न कोऽप्यन्यथा मन्यतां शयनस्थरोगिणालिखिता इति । मम रोगिणां कारणमहं जानामि । अहमेक एवात्र हेतुभूत इति जानामि । तादृशज्ञानादेव सह्यते मया । वस्तुतो भगवत्यहं कृतज्ञः । तानि खलु शिक्षणानि मे । नैकविधान्यौषधानि सेवितुं प्रेरणामपहृत्य स्थितः । मदीया हठवृत्तिरसकृत् डॉक्टरमहाशयं स्वेदयतीति जानाम्यहम् । किन्त्वेते तां कृपया सहमाना मां न त्यजन्ति ॥

परन्तु इदानींतनस्थितेः सविस्तरं वर्णनमनावश्यकम् । अतः ख्रिस्ताब्दस्य विंशतिशतकस्य चतुर्थं पञ्चमं वा वर्षं पश्यामः । पुरस्ताद्गन्तुमन्तरा पाठकस्य बोधनमेकं प्रदेयम् । एतदध्यायबलाद्ये जुस्टमहाशयस्य पुस्तकं क्रेतुमिच्छन्ति तैस्तद्गतं सर्वं वेदोक्तिरिति न मन्तव्यम् । लेखकः सर्वदैकमुखं प्रदर्शयति । सप्तविधानि प्रदर्शनानि भवेयुः । प्रत्येकं सर्वमपि समीचीनम् । किन्त्वेकस्मिन्काले विषये च समीचीनो न भवेत् । अथानेकानि पुस्तकानि ग्राहकांल्लब्धुं कीर्तिं च संपादयितुं लिख्यन्ते । तत ईदृशानां पुस्तकानां पाठका विवेकमयदृष्ट्या पश्यन्तु । अनुभवशालिनः कस्यापि बुद्धिवादं गृहीत्वा ततः प्रतिपादितविषयान् बुध्वाथवा स्वयं पुस्तकानि सहनेन पठित्वा जीर्णीकृत्य पश्चाद्यथावत्कार्यं विधेयात् ॥

अष्टमोऽध्यायः

प्रबोधः

अग्रिमाध्यायं यावद्विषयान्तरप्रस्तावः कार्य एवेति मन्ये । मृत्तिकाचिकित्साविषयकपरीक्षणैः सहाहारविषयाण्यपि क्रियन्ते स्म । द्वितीयमेतत्प्रकृत्य कतिचित्कथनीयांशाः सन्ति । पश्चादपि तमेव विषयमुद्दिश्योच्यते ॥

आहारपरीक्षणविषयमद्य वा पश्चाद्वा विस्तरेण न कथयामि । यतो गुर्जरभाषामयानां निबंधानां वस्तुतो बहुवत्सरेभ्यः पूर्वमेव 'इंडियन ओपिनियन' पत्रिकायामदृश्यन्त । त एव पश्चात्पुस्तकरूपेण 'गाइड आफ हेल्थ' अथवा 'आरोग्यमार्गदर्शिनी'त्युक्ताः । जगतः पूर्वपश्चिमभागयोर्मम लघुग्रन्थानां मध्येऽयमेव बहुविशिष्टतया जनैः पठ्यते । न खलु कारणं शक्नोमीह विज्ञातुम् । 'इंडियन ओपिनियन' पत्रिकावाचकानामुपयोगायानया पुस्तिकया जगतः पूर्वे पश्चिमेऽप्यदृष्टः 'इंडियन ओपिनियन' जनानामपि मनसि बहुतरां परिष्कृतिमजीजनत् । यतो

विषयमुद्दिश्य पत्रव्यवहारं मया सह ते कुर्वन्ति। लघुपुस्तिकां प्रति किंचिद्वक्तव्यमापतितम्। यतो विषयपरिवर्तने यद्यपि कारणं नास्ति तथापि ममाचारपरिवर्तनमस्तीति सर्वे पाठका न जानन्ति। ततस्ते तन्निवेदयितुमर्हा इति मन्यामहे ॥

मम सर्वाणि लेखनान्तराणीव धार्मिकप्रत्ययं मनसि कृत्येयमपि पुस्तिका लिखिताभूत। प्रत्येकमपि मदीयं कर्म तादृशप्रत्ययस्फुरितमेत्र वर्तते। अत एव मे परमो विषादो यद्ग्रन्थगतानि समाख्यानान्यनुरोद्धुमहं न शक्त इति ॥

मानवाहारेषु दुग्धं नैवावश्यकं शैशवे यत् स्तन्यरूपेण गृह्यते तदन्तरेण तस्याहारस्तु केवलमातपतप्तफलानि शलाटवश्च। द्राक्षासदृशैः फलैर्बदामसदृशलाटुभिश्च त्वचां नाराण्यां ,च पर्याप्ता पुष्टिः लभ्येत। स्त्रीव्यामोहस्येतरकामानां च निग्रहस्तादृशाहारभोजिनः सुलभो भवति। मदीयसहकारिभिर्मया चानुभवादृष्टं या हिन्दुलोकोक्तिर्यथा भुङ्क्ते तथा भवतीति सा सत्यभूता। एते आशयाः पुस्तके विस्तरेण निरूपिता भवन्ति। किन्तु भारते इदमेव दौर्भाग्यं यदाचर्यमाणेषु व्यवहारेषु कतिपये मयैवोक्ता न पारमार्थिका भवन्तीति बलाद्वक्तुमुचितम्। 'खेडा'प्रदेशे जनसंग्रहकार्यप्रयुक्तोऽहं यदा तदाहारे कृतमेकं स्खलितं मां नीचैरपातयत्। मां मृत्युद्वारमनयत्। दुग्धं विना भग्नशरीरं पुनर्निर्मातुं यो यत्नः कृतः स व्यर्थोऽभवत्। अहं 'डॉक्टर'महाशयानां वैद्यानां वैज्ञानिकानां च साहाय्यममार्गं दुग्धस्थाने किंचिदन्यदुच्यतामिति। कतिचिन्मुंगजलं सूचयामासुः। पुनः कतिपये मौरातैलम्। केचिद्बादां दुग्धम्। अहमेतैः परीक्ष्यमाणोऽपि रोगिशयनं विमोक्तुं मे न किंचित्साहाय्यमकरोत्। वैद्याश्चरकग्रन्थं प्रमाणीकृत्य धार्मिकबुद्धिविकल्पानामाहारविषयस्यापि न कोऽपि संबंध इति श्लोकान्पेठुः। एतेन दुग्धं विना जीवितुं साहाय्यकरणे ते नहि शक्ताः। कथमन्ये वृषभमांसस्य'चा' सुरां च विकल्पं विना ग्राह्यतया प्राशंसन्ते दुग्धशून्यमाहारं गृहीत्वा वर्तने मम साह्यं कुर्युः ॥

कृतेनैकेन शपथेन बद्धोऽहं गोर्वा महिष्या वा दुग्धसेवने प्रतिषिद्धः। एतद्व्रतं तावत्सर्वदुग्धानां परित्यागाय। किन्तु व्रतग्रहणकाले मनसि गौरिति महिषीति द्वयमेव कृतमासीत्। जीवितुमिच्छावानहं व्रतस्याक्षरशो दृढीकरणाय कथमप्यात्मानं वंचयित्वाजादुग्धं ग्रहीतव्यमिति निश्चितवान्। अजादुग्धसेवनकाले नितरामहं जागरूक आसम्। बत हृदयभङ्गोऽभवदिति जानन् ॥

'रॉलेट-अेक्ट'प्रतिकूलवर्तनं मनसि निरूढमासीत्। तेन जीवितुमभिलाषोऽवर्धत। अत एव मम जीविते महत्परीक्षणमेकं विरतिमागतम् ॥

जानाम्यहं मनुष्यः खादति पिबति च। किन्तु तस्यात्मा तु न खादति न च पिबति वा। बाह्यतो यदन्तर्निक्षिपसि तन्न किञ्चित्। अन्तर्भागतो बहिः प्रकाश्यते तन्मुख्यम्। किन्तु तस्य

Funding by IKS-MoE

परीक्षणं विहाय एतावताहं संतुष्यामि यावता दृढं ब्रूमो यद्भगवद्गीत्यान्वेषकस्य साक्षादेनं पश्यत आहारे नियमः प्रमाणे गुणे चालोचनाभाषणयोरिव मुख्यः ॥

यत्र मदुक्तिरेव स्खलिता वर्तते तत्र विषयो नैव निवेदनीयः । किन्तु तदनुरोधो न कर्तव्य इति विशिष्य सद्बोधनं कर्तव्यम् । मदीयोक्तिबलात् यैर्दुग्धपानं परित्यक्तं तैस्तत्परीक्षणं न कर्तव्यं यद्युपयोगो दृश्यते अथवानुभवशालिनां वैद्यानां बुद्धिवादस्तथाविधः स्यात् । एतावत्पर्यन्तं ममानुभवे येषां दुर्बलो जीर्णकोशो ये च शयनपतितास्तेषां दुग्धसदृशो लघुः पुष्टिकरश्चाहारो न विद्यते ॥

यदि कश्चिदेनमध्यायं पठित्वा स्वानुभवेन न तु पठनेन शाकाहारवत्पुष्टिकरं जीर्णकारि च दुग्धस्थाने प्रतिनिधिं मे ब्रूयात्तदाहं तस्य बहूपकृतः स्यामिति ॥

नवमोऽध्यायः

अधिकारिभिः कलहः

अथैशियासंस्थोपरि दृष्टिं निक्षिपामः ॥

जोहानिसबर्गपत्तनमेशियाधिकारिणां बलीयः स्थानमासीत् । एत अधिकारिणः भारतीयचीनदेशीयादीनन्यांश्च नैवारक्षन्किन्तु पिंषन्ति स्म । प्रतिदिनं मत्पार्श्वमायान्ति स्म विषण्णानां वचनानि एतादृंशि । येषामस्त्यधिकारस्तेन प्रवेश्यन्ते । येषां तावन्नास्ति तेभ्य एकशत-'पौंड'-स्वीकृत्य रहसि प्रवेक्ष्यन्ते। यदि भवान् कष्टमीदृक् न विचारयेदन्यः को नः करोतीति। अहमपि तन्मना अभवम्। यद्यहमेतदनिष्टं न विनाशयेयं तर्हि ट्रान्सवालदेशे मम वर्तनं व्यर्थमेव स्यात् ॥

ततोऽहं साक्ष्यं संग्रहीतुमुपक्रम्य लब्धेऽस्मिन् पर्याप्तप्राये 'पोलीसकमिशनर' अधिकारिणं द्रष्टुमगाम्। असौ पारमार्थिकः पुरुष इवादृश्यत । औदासिन्यं दूरीकृत्य सर्वमशृणोत् । भवतः साक्ष्यसंग्रहं प्रदर्शयेति पृष्टः यावदासीन्मत्समीपे तावद्दत्तवान्। साक्षिणः स्वयमेव परीक्ष्य तृप्त आसीत् । किन्तु दक्षिणाफ्रिकादेशे सवर्णजनानामुपर्यानीताभियोगेषु गौरांगापराधिने गौरांगपंचायितस्य पुरस्तात् दंडयितुं दुष्करमिति यथा मया तथा तेनापि ज्ञातम् । नैतद्यूक्तं प्रतिभाति यत्पंचायितजनास्तान्विमोचयिष्यन्तीति भियापराधिनो मोचयितुम् । तान्ग्राहयितुं प्रयतिष्य एव ॥

तादृशी दृढोक्तिर्नावश्यक्यासीत् । बहूनामधिकारिणामुपरि संशयो ममासीत् । किन्तु तेषां सर्वेषामुपरि प्रामाणिकं साक्ष्यं नासीत् । अतो ययोरपराधं प्रति न मे संशयलेशोऽप्यासीत्तयोर्द्वयोरेव ग्रहणाय ग्रहणाज्ञापत्राणि प्रेषितानि ॥

Funding by IKS-MoE

ममेतस्ततः परिक्रमो रहोऽज्ञातवन्निक्षेप्तुं न शक्य आसीत्। बहवोऽज्ञासिषुर्यत्प्रत्यहं ‘पोलीसकमिशनर’स्य पार्श्वं गच्छामीति। गृहीतौ द्वावधिकारिणौ गूढान्वेषकौ समर्थप्रायावास्ताम्। इमे ‘मदीयकार्यालयं संचर्य स्वाधिकारिणां मम चलनानि निवेदयतः। एतावधिकारिणौ तथा दुष्टावास्तां यथानयोर्गूढान्वेषका बहवो न मिलन्ति स्म। यदि भारतीयचीनदेशीयजना मम साहाय्यं नाकरिष्यन् तदा तयोरासेधो न शक्योऽभविष्यत्। अनयोरेकः पलायितः। देशांतराद्गृहीत्वानयनाय ग्रहणाज्ञां दत्वा ट्रान्सवालप्रदेशं प्रापितः। न्यायस्थाने विचारणायां स्वप्रतिकूलसाक्ष्यं यद्यपि बहुलमासीदपि च यद्यपि पंचायितजनः पलायितस्यैकस्य साक्ष्यं प्राप्तवान् तथाप्युभावपि निर्दोषिणाविति विमुक्तावभूताम्॥

अहं तावन्निराशः संवृत्तः। ‘पोलीसकमिशनर’ अपि विषण्णोऽभूत्। न्यायस्थानकार्येषु जुगुप्सा समजनि। बुद्धिरेव विषादकरी यदेषापराधं निगूहितुं साधनं जाता॥

अनयोरुभयोरधिकारिणोरपराधः सार्वजनीन आसीत्। यद्यपि न्यायस्थाने विमोचितौ तथापि ‘गवर्नमेंट’ एवैतयोराश्रयं न ददौ। उभावप्युद्योगान्निवर्तितौ। ‘एशियाटिक’ संस्था च परिशुद्धप्राया भूत्वा भारतीयसमाजो मनसि दृढीकृत आसीत्॥

एतत्कार्यं मम गौरवमवर्धयत्। न्यायस्थानकार्याणि बहून्यभवन्। प्रतिमासं व्ययीक्रियमाणं शतानि।‘पौंड’द्रव्यस्य रक्षितान्यासन्। आत्मनश्चौर्यात्। सर्वं न रक्षितुं साध्यमासीत्। यतोऽसत्यवर्तिनः स्वव्यापारमद्यापि कुर्वन्ति स्म। किन्तु सत्यवर्तिनो जनस्य सत्यं रक्षितुं शक्यमासीत्॥

इदं तावद्वक्तव्यं यदेतावधिकारिणौ दुष्टावपि तयोरुपरि मे न किंचिदासीत् स्वतः। इदं तयोरपि विदितमासीत्। संकटपतितौ मत्समीपमागतौ च। अहं च साह्यमकरवम्। जोहानिसबर्ग ‘म्युनिसिपालिटि’संस्थायामुद्योगं लब्धुमवकाशोऽविद्यत। यद्यहं तयोर्न प्रतिकूलः। अस्मिन्संदर्भे तयोः सुहृदेको मां द्रष्टुमागतः। नाहं प्रतिकूलो भविष्यामीत्यवोचम्। तौ विजयं प्रापतुः॥

येषामुद्योगिनां संपर्को मे जातस्तैः सह मदीयवृत्तिः सुखकरी बभूव। अपि च यद्यपि वारं वारं तत्संस्थाविषये परुषोक्तिप्रयोगं कृत्वा कलहायितुमुद्युक्तस्तथापि मया सह सौहार्देनावर्तन्त। सोऽहं मम स्वाभाविकोंऽश इति तदा मे न ज्ञातम्। स्वयं सत्याग्रहस्यावश्यको भागः। अहिंसायाश्च स्वरूपमिति पश्चादवेदिषम्॥

पुरुषस्तत्कृत्यं च भिन्नवस्तुनी। सत्कार्यं संमतिमसत्कार्यमवमतिं च भजति। कार्यकर्ता तु साधुर्वा दुष्टो वा सर्वदा मर्यादां कारुण्यं वा यथार्हतः प्राप्नोति। पापे द्वेषो न पुनः पापकारिणि। इयं लोकोक्तिः सुलभा विज्ञातुम्। तदभ्यासस्तु विरलः। अत एव द्वेषरूपं विषं प्रपंचे प्रसरति॥

Funding by IKS-MoE

इयमहिंसा सत्यान्वेषणस्याधारः। इदानीमहं प्रतिदिनं जानामि सत्यान्वेषणं व्यर्थमहिंसाधारं विना। जगदभियोक्तुं प्रतिविधातुं च युक्ततरमेव कर्ता चेत्करोति तदात्मानमेव प्रतिविधत्तेऽभियुङ्क्ते च ॥

एकस्यापराध इवान्यस्यापि वर्तते। वयं सर्वेऽपि एकस्यैव स्रष्टुरपत्यानि। दिव्यशक्तयोऽस्मदन्तरनन्ताः। मानवप्राणिन एकस्यापि तिरस्कारस्तासां शक्तीनामेव तिरस्कारः। न केवळं प्रहतं तं प्राणिनं किन्तु सर्वामपि जगतीम् ॥

दशमोऽध्यायः

पवित्रस्मृतिः प्रायश्चित्तं च

मम जीवितेऽनेकविधा व्यवहारा बहळमतस्थानां बहळसमाजानां च पुरुषैः समीपसंपर्कमकार्षीत्। तेषां परिचयेन दृढं वक्तुमिदं शक्यं यद्बंधूनां दूरस्थानां च मध्ये देशीयानां विदेशीयानां च गौरांगानां सवर्णानां च हिन्दुनां भारतीयजनानामितरमतस्थानां च ‘मुसळमानपारसीक्रिश्चियन’ अथवा ‘ज्यू’जनोऽस्त्वेतेषां मध्ये च न भेदं पश्यामि। तादृशभेदप्रत्ययो मे मनसि न जायते। अयमेको गुणविशेष इत्यपि न वक्तुं युज्यते। तदेतन्मम स्वभावे निरूढं न पुनर्मम प्रयत्नकृतं फळम्। परंत्वहिंसाब्रह्मचर्यापरिग्रहेषु तेषामभ्यासं कर्तुं प्रयतमानोऽस्मीति संपूर्णज्ञानं मे वर्तते ॥

डरबनपत्तने न्यायस्थानकार्याणि यदाहमकार्षं तदा मम कार्यालयस्य लेखका मया सह बहुशः स्थिताः। तेषां मध्ये ‘हिंदुक्रिश्चियन’जनाश्चाथवा देशतो वर्णने गुजरातीयास्तामिळजनाश्चैतानर्हबन्धुमित्राणीव गणयन्नासमन्यथा तान्न जानामि। ते सर्वे मम कुटुंबस्य जन इति सर्वदा मे गणना। भार्या मे मार्गे निरुध्य स्थिता चेन्न समीचीनमासीत्। लेखकानामेकः ‘क्रिश्चियना’सीत्। स च पंचमदंपत्त्योः पुत्रः ॥

गृहं पाश्चात्यरीत्या निर्मितमासीत्। प्रकोष्ठेभ्योऽशुद्धजळं निष्कासयितुं नाभूदवकाशः। प्रतिप्रकोष्ठं मूत्रपात्राण्यासन्। भृत्यादिभिः कार्यकरणापेक्षया भार्या वाहं वा स्वयमकार्ष्व। स्वमन्दिर इव चरन्तो लेखका स्वपात्राण्यशोधयन्। किन्तु ‘क्रिश्चियन’ लेखको नूतनमागतः। तस्मै शयनागारमालोकितुमस्मत्कर्तव्यमासीत्। भार्यान्येषां पात्राणि निरवाहयत्। पंचमस्य पात्राणि स्वच्छीकर्तुं तस्याः सहनशक्तिमतिक्रान्तमासीत्। अतो ह्यावयोः कळहः प्राप्तः। मां पात्राणि शोधयन्तं दृष्ट्वा सहितुं न शक्ता भार्या स्वयं वा कर्तुं नारोचयत्। स्मरामि किळाद्यापि यथा मां निन्दन्ती क्रोधेन रक्तनयना कपोळयोरुपरि जळबिन्दून्पातयन्ती पात्रहस्ता निःश्रेणिकामवरोहन्ती दृश्यते स्मेति। परंत्वहं क्रूरतया मृदुः पतिर्मया सा शिक्षणीयेति मत्वान्धप्रेम्णा तामक्लेशयम् ॥

Funding by IKS-MoE

केवलं पात्रमवहदिति न मे तृप्तिरासीत् । प्रीत्या कार्यं करणीयमिति मे मतिः । अतोऽहमवोचमुच्चैः शब्दं कृत्वा मम गृहे एतादृशीं मन्दबुद्धितां नाहं सहिष्य इति ॥

वाक्यमिदं तां बाणवदविध्यत् । सा पुनरक्रंदत् । तव गृहं तवैव स्थापयाहं गच्छेयमिति । अहमात्मानं व्यस्मरम् । प्रेमरसः शुष्कोऽभूत् । हस्ते तां वराकीं गृहीत्वा निःश्रेणिकासमीपवर्ति बहिर्द्वारमुद्घाटयितुमिच्छन् तां च बहिर्निष्कासयितुमाकृष्य पुरो गतः । नेत्रांशुप्रवाहस्तस्याः कपोलयोरुपरिष्टाद्धावति स्म । अपि च सा चक्रंद यथापि ते लज्जालेशोऽपि न विद्यते । तवात्मा तावद्दूरः किं विस्मरणीयः । भगवानहो वर्तताम् । बहिर्द्वारस्य बंधनं कुरु । मा तावदितरेऽस्मच्चेष्टितानि जानीयुरिति ॥

अहं धीरसुखः स्थितः । परन्तु लज्जित एव भूत्वा द्वारबंधनमकार्षम् । भार्या मां यदि त्यक्तुं न शक्ता तर्ह्यहं च न त्यजेयम् । आवयोर्मध्ये दुश्चेष्टाः सन्ति निःसंख्याः परन्तु पर्यन्ते शान्तिरावयोः स्थिता । भार्या तावदद्वितीयसहनशक्तिः सर्वदा जयशालिनी भवति ॥

अद्याहमसक्त एव प्रस्तुतमभिधातुं शक्नोमि । कालोऽयमन्यः । अस्माद्बहिरागतोऽहं स्थितः । नाहमद्याप्यन्धो मत्तः पतिः । नाहमत्र भार्याया अपि शिक्षकः । ‘कस्तूरबा’ यदि सा तथा इच्छेत्तर्हि मय्यसम्यग्वर्तिनी स्याद्यथा तस्यामहं पूर्वमासम् । आवां परीक्षितौ सुहृदौ परस्परकामोपभोगायेति न मन्यामहे । रोगाक्रांतिकालेषु प्रतिफलमनपेक्ष्य मत्पोषिकाभवत् ॥

प्रस्तुतो विषयोऽष्टनवत्युत्तराष्टादशसहस्राधिकमिते (१८९८) वत्सरे समभवत् । तदा हि मे ब्रह्मचर्यप्रत्ययो नासीत् । तदा हि ममालोचनायां भार्यापत्युः कामभाजनमित्यासीत् । पत्युराज्ञाकारिणी न पुनस्तस्य साहाय्यकारिणी सखीव तस्य हर्षदुःखेषु भागिनीति स्थितम् ।

एकोनविंशे सहस्रमिते वर्षे इमा भावनाः परिवर्तनं जग्मुः । षडुत्तरैकोनसहस्रमितवर्षे (१९०६) ता राशिरूपं भेजुः । किन्तु तद्विषये तस्योचितस्थाने वक्ष्यामि । एतावद्वक्तुं पर्याप्तं यत्कामावेशः क्रमशोऽदर्शनमगात् । तावन्मम गृहस्थजीवनं शान्तं मधुरं सुखकरं च दिने दिनेऽधिकाधिकं भवति ॥

पवित्रस्मृतेः कथया न कोऽप्येवं निश्चिनुयाद्यथावां प्रामाणिकदंपती स्मः । अथवावयोर्मध्ये विषयाणां संपूर्णः समभावोऽस्तीति । ‘कस्तूरबा’एव प्रायशो जानाति मत्तो भिन्ना विषयाः स्वस्य सन्ति वा न वेति । अद्यापि मया क्रियमाणानां संमतिर्नास्तीति प्रायो दृश्यते । आवां तद्विषये चर्चां न कुर्मः । चर्चायां च न विद्यते शुभम् । न पितृभ्यां न च मया सा युक्तवेलायां विद्याभ्यासं कारिता । किन्तु महानेको गुणोऽस्याः हिन्दुभार्याजनस्यापि किंचिद्वर्तते बहुधा त्वस्याः । तदेतद्यथा मनःपूर्वकं वा न वा जानती वा न वा प्रयतमाननियममार्गे न कदापि प्रतिकूलं स्थिता । मम पादक्रमानेवानुसरन्ती च स्थिता । यद्यप्यावयोर्बुद्धिविशेषे महान्व्यत्यासो भवेत्तथापि सर्वदेयं मे भावना यदावयोर्जीवने मनस्तृप्तिः सुखमभ्युदयश्च विद्यन्त इति ॥

Funding by IKS-MoE

एकादशोऽध्यायः

'ऐरोप्यैः' सह गाढः परिचयः

अनेनाध्यायेनानीतोऽस्मि येनेदं वाचकाय वक्तुमावश्यकं भवति यथेयं कथा सप्ताहात्सप्ताहं लिख्यते ॥

यदाहं तां लेखितुमारब्धवान् तदा लेखनमार्गो न निश्चितः । दैनंदिनपुस्तकलेखनं पुस्तकं वेतरपत्राणि वात्मकथालेखनस्याधारो न निक्षिप्तः । लेखनकाले यथा भगवान् प्रेरयेत्तथा लिखामि । ममात्मचिंतनानि कार्याणि च भगवता प्रेरिता भवन्तीति मन्ये । परन्तु मम जीवनकाले मया बहुधा कृतेषु परीक्ष्यमाणेषु तथा स्वल्पास्वपि क्रियासु परीक्ष्यमाणासु सर्वाण्यपि भगवतैव प्रेरितानीति वक्तुं नानुचितं भवेत् ॥

मयासौ न प्रत्यक्षीकृतः न चाहं तं जानामि। या भगवति जगतो भक्तिः सैव मया स्वकीया कृता । सा चावरोपयितुं न शक्येत्यस्मान्मयानुभवोऽयमिति मन्ये । मम भक्तिरेवानुभव इति वचनं सत्यमनर्थं करोतीति चेद् भगवति भक्तिं निरूपयितुं शब्द एव नास्तीति वक्तव्यम् ॥

ज्ञातुमिदानीं सुलभं यथा भगवत्प्रेरणयैव कथां लेखिष्यामीति । यदाहं गताध्यायमलेखिषं तदास्याध्यायस्य शिरोवर्णनमेवं प्रादाम् । किन्तु लेखनं सर्वतो ममास्फुरद्यथा 'युरोपीय'जनैः सह ममानुभवस्तस्य पीठिकां किंचिल्लेखितुमुचितमिति । अत एव तस्य परिवर्तनेन शिरोवचनमन्यथाकृतम् ॥

एतमध्यायमारभमाणस्य नव्यो विषयोऽवस्थितः । आंग्लसुहृदां विषयकलेखने किं वक्तव्यं किं मोक्तव्यमितीव चिन्तनीयम् । संबद्धा विषया यदि परित्यज्यन्ते तर्हि सत्यं मन्दीभवति । अस्याः कथाया लेखने संबद्धतां प्रति यदा मे न दृढः प्रत्ययस्तदा संबद्धतायाः प्रस्तुतत्वेऽपि निश्चेतुं दुष्करम् ॥

चिरात्पूर्वं मया यत्पठितमात्मकथायाश्चरित्रादप्यपर्याप्तता तदिदानीं स्पष्टं विजानामि । यावदहं स्मरामि तत्सर्वमस्यां कथायां न लिखामि । सत्यं चिंतयता मया कियत्प्रदेयं कियत्त्यक्तव्यमिति वक्तुं शक्यम् । मम जीवने परोक्षसंवृत्तानां कतिचिद्विषयाणामपर्याप्तसाक्षित्वस्य न्यायस्थाने किं मूल्यं स्यात् । लिखितपूर्वानध्यायानधिकृत्य परकीयकृत्यविचारकः कोऽपि यदि मां परीक्षेत तदा बहुलमज्ञातपूर्वं प्रकाशमायाति ॥

यदि मे विरोधी कश्चित् शिल्पावलोकी परीक्षेत तदा मम सत्यप्रधानां गाधतां प्रकाश्यात्मनः स्तुतिपात्रतां प्रदर्शयेत् ॥

अतोऽहमाश्चर्यचकितश्चिन्तयामि । एषामध्यायानां लेखनमेव कुतो न त्यजेदिति ।

Funding by IKS-MoE

किंत्वाभ्यन्तरनादेन निषेधो यावन्न स्यात् तावल्लेखनं चलतु । यावन्न स्यान्नीतिविरुद्धा तावन्न परित्यजेदिति कल्याणी लोकोक्तिरनुसरणीया ॥

परकीयकृत्यशिल्पिनः संतोषयितुमहमात्मकथां न लिखामि । तल्लेखनमेव सत्येनानुभवः । मम सहकारिणां किंचिदानुकूल्यं स्मरणायाहारं च प्रदातुं निश्चितमेवोद्देशानामेकः । तेषामभिलाषानुसारेणैवाहं लेखकः प्रवृत्तः । जेरामदास – स्वामीआनंदश्च यदि सूचनां न ददतुस्तर्हीयं नैव लिखिताभविष्यत् । आत्मकथालेखने ताभ्यां दोषभागिभ्यां भवितव्यम् ॥

परन्तु शिरोवचनानुसरं विषयं ग्रहीष्यामः । मम कुटुंबस्य जन इव यथा भारतीयजनो मया सह न्यवसत्तथांग्लसुहृदोऽपि । मया सह निवसद्भ्योऽखिलेभ्यो नेदमरोचत । परंत्वेतान्निक्षेप्तुं निर्बन्ध आसीत् । नाहं प्रतिविषयं बुद्धिमानासम् । आसन्मे विषया अनुभवाः । परंत्वेते भारतीयाः ‘ युरोपियन ’ चोभये । अननुभवानां नाहं विषीदामि । यद्यप्येवं स्थितेषु यद्यप्यनानुकूल्यं क्लेशश्चोत्पादितः सुहृद्भ्यो मच्चरितमहं नान्यथाकृतवानपि च सुहृदः सोढवन्तो मया । आगन्तुकानां संपर्को यदि दुःखकरस्ततस्तान्दूषयितुं नैव संशय आसीत् । अन्ये यथा स्वेषु स्वेषु भगवन्तं पश्यन्तोऽन्येष्वपि तथा पश्यन्तः सर्वेषां मध्ये प्रत्येकं निवस्तुमर्हन्ति । अपि चैव निवस्तुं या शक्तिः साभ्यासनीया । न हि संपर्कनिवारणेनापि तु सेवाधर्मेण स्वयं तैरपरिहारिताः ॥

‘बोअर’युद्धं यदाभवत् तदा मम गृहं संपूर्णमासीत् । जोहानिसबर्गप्रदेशादागतौ द्वावांग्लौ प्राप्तौ । उभये च भागवतौ (Theosophists) तयोरेकः किचन्महाशयः । तं पुरस्ताद्विज्ञातुमवसरो वर्तते । एतौ सुहृदौ मम भार्याया नयनांबुजनकौ । दूरदृष्टवशान्मत्कारणादनेकसंकटान्यन्वभूताम् । अयमेव प्रथमोऽवसर आंग्लसुहृदः कुटुंबजन इवावसन् । यदाहं ‘ इंग्लैंडदेशे ’ न्यवसं तदा तेषु दिवसेषु आंग्लगृहेष्वासम् । परन्तु तत्र तज्जीवनमार्गानन्वसरम् । क्वचिद्भोजनालयवास इवासीत् । अत्र तु तदन्यथाभूत् । आंग्लसुहृदः कुटुंबवर्ती जन आसन् । अनेकविधासु तौ भारतीयरीतिमाश्रितौ बहुषु विषयेषु । गृहस्य बहिः सूचना पाश्चात्यरीत्यैव । आंतरजीवनं तु प्रायः सर्वं भारतीयपद्धत्या । कुटुंबजनमिव तौ निधातुं किंचित्कष्टमासीत् । परन्तु गृहस्यान्तरे सुखेन तौ निवेशयितुं नैव किंचिदपि क्लेश आसीत् । जोहानिसबर्गप्रदेशएते परिचया डरबनपत्तने भूयांस आसन् ॥

Funding by IKS-MoE

द्वादशोऽध्यायः

'युरोप'जनेन संपर्कः

एकदा जोहानिसबर्गपत्तने चत्वार भारतीयलेखका मत्पार्श्वे स्थिताः। न ते लेखकाः किन्तु मदीयपुत्रा एव। परन्त्वेते मत्कार्याय न पर्याप्ता आसन्। 'टाईपरायटिंग' विना कार्यं न चलंति स्म। एतन्मध्ये तद्वेद्यहमेक एव। द्वौ लेखकावहं तदशिक्षयम्। परन्तु तावांग्लभाषानभिज्ञतया पर्याप्तशक्तियुक्तौ नाभूताम्। एतेष्वेकमायव्ययज्ञं कर्तुमैच्छम्। नातालप्रदेशान्न कोऽपि मिलति स्म। अनुज्ञापकपत्रं विना ट्रान्सवालप्रदेशं न कोऽपि प्रवेष्टुमर्ह आसीत्। मम स्वतानुकूल्यायानुज्ञाप्रदमधिकारिणं तदनुग्रहाय प्रार्थयितु न सज्ज आसम्॥

अहं किंकर्तव्यतामूढः स्थितः। कार्यरोषः समारोहति स्म। स्वतः कार्यं सार्वजनकं च कार्यमुभयं च कर्तुमशक्यमिव प्रत्यभात्। मम प्रयतनबाहुल्येऽपि 'युरोपियन' 'लेखकमे'कं नियोक्तुमैच्छम्। किन्तु मामित्र सवर्णं पुरुषं सेवितुं गौरांगं गौरांगीं वा लब्धुं निश्चयो नासीत्। मम विदितपूर्वस्य 'टाइपरायटर'स्य नियोक्तारमेकं गत्वाहमपृच्छम्। 'स्टेनोग्राफर' संपाद्यानयेति। कन्या मिलन्ति स्म। तदेकामानेष्यामीति वाग्दानमकरोत्। 'स्कॉटलेण्ड'निवासिनी 'मिस डिक'नाम्नी तेन दृष्टा। सत्यजीवनं कर्तुं नास्त्याक्षेप इति सोक्तवती। तस्याश्चावश्यकतासीत्। तामानीय नियोक्ता मम प्रादात्। तत्क्षणं सा मामन्वरंजयत्। अहं तामपृच्छम् – भारतीयपार्श्वे सेवां कर्तुं किमाक्षेपोऽस्ति? नहीति दृढं प्रत्युत्तरमागतम्॥

कियद्वेतनं वाञ्छसि।

सार्धाधिकसप्तदशपौंड नातीवेति मन्यसे।

मया वाञ्छितं कार्यं करोषि चेन्नातीव। कदा कार्यायागमिष्यसि।

भवदिच्छायामेतत्क्षणमेव॥

अहमतीव संतुष्टः। तत्क्षणमेव लेखान्वाचयित्वा लिख्यतामित्यवोचम्॥

अचिरादेव सा न केवलं वर्णसंकरलेखिका (stenotypist) परन्तु मम दुहिता भगिनी वा प्रवृत्ता। तस्याः कार्ये स्खलितं द्रष्टुमवकाशं सा प्रादात्। असकृत्सा सहस्राधिकपौंडमितद्रव्यस्योपयोगे नियुक्तायव्ययपुस्तकानि च न्यक्षिपत्। सा मम संपूर्णविश्वासपात्रीबभूव। अधिकं च वक्तव्यम्। यदेषा स्वांतर्गतचिंता भावनाश्च मयि विश्वस्य कथयति स्म। पत्युरन्वेषणवादं मामपृच्छत्। विवाहे तस्याः प्रतिपालगौरवं ममैवासीत्। 'मिस डिक' यदा

मॅकडोनल्डपाणिग्रहणमकरोत्तदा मां पर्यत्यजत् । अथापि विवाहानंतरं कार्यवशादाहूता प्रतिवचनमदादेव ॥

किन्त्विदानीं तस्याः स्थानेऽपरा 'स्टेनोटाइपिस्ट' अपेक्ष्यते स्म । अदृष्टवशादन्या च लब्धा । सा :च 'मिस श्लेसिन' यामहं परिचायितः कॅलनबॅकमहाशयेन । इमं महाशयं वाचकः क्रमेण ज्ञास्यति । सेदानीं ट्रान्सवालप्रदेशवर्त्युच्चविद्यालयानामेकस्मिन्नध्यापिकाभूत् । यदा सा मत्पार्श्वमागता तदा सप्तदशवर्षदेशीयासीत् । कतिचित्तस्या विलक्षणभावाः कॅलनबॅकमहाशयस्य मम च कदाचिद्दुःसहा आसन् । वर्णसंकेतलेखिकाकार्यं कर्तुं सा नागता किन्त्वनुभवं लब्धुम् । असितांगगौरांगेति वर्णत असूया तस्याः स्वभावस्यातिदूरे । तस्या वयो वाऽनुभवो वा न किंचिन्मनस्यासीत् । यं कंचिदधिक्षेप्तुं वा यस्य कस्यापि मुखत एवैतादृशस्त्वमिति वक्तुमपि निश्चितवत्यासीत् । तस्या आतुरोऽविवेको मां बहुवारं संकटेऽपातयत् । किन्तु तस्याः शुद्धनिर्दोषस्वभावस्तानि संकटान्युत्पन्नमात्राणि दूरमपास्यत् । तस्याः 'टाइप'कृतपत्राणि पुनरालोकनं विना स्वाक्षरीकृतवानस्मि । यतस्तस्या आंग्लभाषा मदीया निर्दुष्टासीदित्यहममंसि । तस्या भक्तौ मम संपूर्णविश्वास आसीत् ॥

सा बहुनष्टमन्वभूत् । चिरकालं मासे मासे षट् पौंडमितं द्रव्यं गृह्णाति स्म । प्रतिमासं दशपौंडमिताद्धनादधिकं ग्रहीतुं नेति वक्ति । अधिकं गृहाणेत्युक्ता मामधिक्षिप्य ब्रवीति यथा वेतनार्थमहमत्र न स्थास्यामि । यतोऽहं भवता सह कार्याणि कर्तुं स्थितास्मि । इष्टा मे तवोपदेशाः ॥

एकदा सा मत्सकाशाच्चत्वारिंशत्पौडद्रव्यमृणीकृत्य गृहीतवती । व्यतीते वत्सरे पूर्णं धनं मे प्रादात् । तस्या धैर्यं तदीयत्यागकृतेः समानमासीत् । इयमेका स्त्री मया दृष्टा यस्याश्चारित्रं मुक्ताफलमिव निर्दुष्टं यस्याश्च धैर्यं भयस्यापि त्रपाकारिणम् । इदानीमेव वयःस्था युवतिर्मया सह यदा स्थिता तत्काले तन्मनसो वृत्तिर्यथासीत्तथेदानीमपि वर्तते न वेति न जाने । परंत्वेतया सह परिचयो मे पवित्रा स्मृतिर्भवति । सत्यादहं भ्रष्टो भवेयं यदि जानन्नपि तद्विपयान्निगूहेयम् ॥

अंगीकृतपक्षस्य कृते सा रात्रिं दिवं प्रयस्यति । रात्रावंधकारे कार्यवशाद्गच्छति स्म । सहयायिनमेकं नयेति सूचिता क्रोधेन सूचनां निराकरोति । सहस्राधिको बलिष्ठभारतीयजनस्तामेव मार्गदर्शिकामपश्यत् । सत्याग्रहदिवसेषु प्रायः सर्वे नायकाः कारागृहे स्थिताः । तदैकाकिनी सा समूहमचालयत् । लोकानां सहस्राणि तस्या वशे आसन् । पत्रव्यवहारा बाहुल्येन तद्वशेऽभूवन् । 'इंडियन ओपिनियन' समाचारपत्रं तदीयहस्तगतमासीत् । किन्तु सा न कदाप्यायासमभजत ॥

Funding by IKS-MoE

निरंतरमहं ‘ श्लेशन ’ विषये लिखेयम् । गोखलेमहाशयस्य गणनां निरूपयन्नियमध्यायमन्तं गमिष्यामि । मम सहकारिणः सर्वान् गोखलेमहाशयो व्यजानात् । तेषां बहुभिरयं सन्तुष्टः । असकृत्तत्कृते स्वाभिप्रायमदात् । सर्वेषां भारतीय‘युरोपियन्’ जनानां मध्ये श्लेशिनमहाशयायै प्रथमस्थानमदात् । तेन किलोक्तं यथा इदृशस्त्यागः पवित्रताधैर्यशालित्वं कुशलता च मया अल्पेषु जनेषु दृश्यन्ते । भवतः सहकारिणां मध्ये ‘ मिस श्लेशिन ’ महाशयाग्रस्थानमाश्रयतीति ॥

त्रयोदशोऽध्यायः

‘ इंडियन–ओपिनियन ’

अन्यैः परिचितयुरोपियनजनसंपर्कैः पुरोगमनात्प्राक् द्वित्राः प्रधानविषया निरूपणीयाः । संपर्काणामेकस्तावत्क्षणेऽस्मिन्नैव वक्तव्यः । ‘ मिस डिक ’ महाशयाया नियोगो ममोद्देशस्य पर्याप्ता नासीत् । अधिकसाहाय्यमावश्यकमासीत् । ‘ रीच ’ महाशयः पूर्वाध्यायेषु कथितः किल । अहमेनं सम्यगवेदिषम् । कस्मिंश्चिद्वाणिज्यस्थाने कार्यकर्ताधिकारी आसीत् । तमधिकारिणं परित्यज्य मत्पार्श्वे उद्योगकरणायागन्तुं सूचितः आगतोऽभूत् । एतेन मम भारोऽतीवलघूकृतः॥

प्रायेणैतत्कालं मदनजितमहाशय आगत्य ‘ इंडियन ओपिनियन ’ पत्रिकासंचालने ममाशयमपृच्छत् । पूर्वमेव मुद्रायंत्रमेकं चालयति स्म । अहं तस्याभिप्रायमन्वमंसि । चतुरुत्तरैकोनविंशतिसहस्रमिते वत्सरे (१९०४) पत्रिका संचलितुमारब्धा । ‘ मनसुखलाल-नाजर’महाशयः प्रथमपत्रिकास्वामी बभूव । परन्तु सर्वकालं पत्रिकास्वाधीनतां प्राप्य तस्य भारं वोढुमुद्युक्तोऽभवम् । मनसुखलालमहाशयस्तं वोढुमशक्त इति न । यदायं भारतदेशे स्थितस्तदा वृत्तान्तवाहनकार्यं बहुलं करोति स्म । किंतु दक्षिणाफ्रिकादेशे यावदहं स्थितः तावत्तत्रत्यदुष्करविषयेषु प्रवेष्टुं न धैर्यमकरोत् । मम विवेकदृष्टौ महती यस्य श्रद्धासीत् । अत एव पत्रिकाविषयलेखनेषु प्रतिवाक्यदायित्वं ममोपर्यपतत् । पत्रिकाद्यापि साप्ताहिकी भवति । गुजराती-हिन्दी-तामिल-आङ्ग्लभाषासु चलति । तामिल-हिन्दीविभागौ वञ्चनामयौ । यदुद्देशेन तावागतौ तदुद्देशं नैवापूरयताम् । अत एव तौ विरामं प्रापितौ । तयोः परिस्थितौ वञ्चनोद्गतास्यात् ॥

पत्रिकार्थे यत्किंचिद्धनं प्रयोक्तव्यं स्यादिति न मे चिन्तासीत् । परन्तु शीघ्रमेव दृष्टं यन्मम द्रव्यसाहाय्यं विना चालयितुं न शक्यमिति । अपि च भारतीय ‘ यूरोपियन ’जनानां विदितमासीद्यद्यपि नाहं पत्रिकास्वामी तथापि तस्य संचालनं मदायत्तमिति । पत्रिका नैव संजात

यदि न कापि चिंता। परन्तु संजाता तत्पश्चात् विरतेति चेद्द्रव्यनष्टमगौरवं च संभवेत्। इत्थं मम द्रव्यमुपयुंजानस्य यद्यद्रक्षितुं तत्सर्वं व्ययीकृतम्। तं कालमिदानीमहं स्मरामि यदा रूप्यकाणां पंचसप्ततिः प्रतिमासं मया प्रेषणीयाभवत्॥

परंत्वेतेभ्यो वत्सरेभ्यः पश्चाज्जनसेवां पत्रिका सम्यक् कृतवती। सा वाणिज्यप्रयोजनाय नासीत्। मदग्रवर्तिन्यां पत्रिकायां दृष्टपरिवर्तनानि मम जीवने या न्यासन् तानि प्रदर्शयन्ति। अद्य 'नवजीवन' 'यंग इंडिया 'च यथा भवतस्तथा तेषु दिवसेषु 'इन्डियन ओपिनियन 'मम जीवितमार्गस्य दर्पण इवासीत्। वारं वारं मदात्मानं तत्र प्रसार्य सत्याग्रहस्य नियमान् अभ्यासविधानं च यावन्मे विदितं तावददर्शयम्। दशवत्सराणां मध्ये चतुर्दशोत्तरैकोनविंशति (१९१४) वत्सर-पर्यन्तं कारागृह आत्मनो दत्तविश्रांतिकालावकाशाद् विना 'इंडियन ओपिनियन' पत्रिकायां प्रत्येकायां मम लेखनमासीदेव। तत्र मम लेखनेष्वालोचनां सम्यग्विवेचनां च विना नैकोऽपि शब्दः प्रयुक्तः। न चातिशयेन निरूपणं कृतम्। न च किंचिदन्येषां हर्षाय मयाभिहितम्। ममात्मनिग्रहाभ्यासाय सुहृदां च मन्मनोगतस्य निवेदनाय पत्रिकोपयुक्ताभूत्। सदसद्विमर्शकस्य न कोऽप्याक्षेपणीयो विषयो दृष्टः। 'इंडियन ओपिनियन' पत्रिकायास्तादृशी वृत्तिरासीद्यादृशीं विलोक्य विमर्शकः स्वलेखन्या उपरि निग्रहं पातुं बलात्कृत आसीत्। 'इंडियन ओपिनियन' पत्रिकां विना सत्याग्रहः साधयितुमशक्योऽभूत्। वाचकाः सत्याग्रहवृत्तान्तवेदनाय पत्रिकां निरीक्षन्ते स्म। अपि च दक्षिणाफ्रिकाप्रदेशे भारतीयजनो निजपरिस्थितिं विज्ञातुं निरीक्षते स्म। मम तु मानुषस्वभावस्य सर्वरूपेषु परीक्षणाय साधनमासीत्। मम पत्रव्यवहारिणां पत्रप्रवाहेनाहमूढोऽभवम्। लेखकस्य स्वभावानुरूपं तानि पत्राणि सौहार्दरूपकानि सदसद्विमर्शरूपाणि विषमयानि चासन्। मम तावदेष समीचीनोऽभ्यासो जीर्णकारी मार्गश्चासीत्। प्रतिवचनदानं च तावतः पत्रव्यवहारस्य मदायत्तं च। जनो मया सह संभाषणं पत्रव्यवहारेण करोतीव प्रत्यभात्। पत्रिकासंचालकस्य प्रतिवचनदायित्वं इत्थमीदृशमिति मे ततो विदितम्। ईदृक्प्रकारेण जनस्योपरि प्राप्तं तद्ग्रहणं भविष्यत्कार्यजातमकरोत्सुकरं प्राप्तगौरवं दुराधर्षं च॥

'इंडियन ओपिनियन' संचालनस्य प्रथममासमेव ज्ञातं यत्पत्रसंचालनस्योद्देश लोकसेवेति। समाचारपत्रिकामुद्रायन्त्रं नाम महती शक्तिः। किन्तु यथानियंत्रितो जलप्रवाहः समस्तग्रामदेशान् जलांतर्नीत्वा सस्यानि विनाशयति तथैवानिगृहीता लेखनी नाशमात्रं करोति। यदि निग्रहो वहिष्टः स्यात्तदा निग्रहशून्यतापेक्षया विषमयः संघटेत। अंतस्थः संचालने तु लाभकारी स्यात्। यद्येतावद्वचनं समीचीनं तदा प्रपंचे स्थिताः कियत्यो वृत्तान्तपत्रिकाः परीक्षामुत्तरेयुः। निरुपयुक्तान् को वा स्थापयेत्। उपयुक्ता अनुपयुक्ताश्च सदसदिव सह गच्छन्ति। मनुष्यः स्वयमेव चिनुयात्। परिग्रहाय परित्यागाय वा॥

चतुर्दशोऽध्यायः

‘कुली’स्थानानि अथवा ‘घेटो’

अतिमहता लोकसेवामस्माकं कुर्वतः कतिचिद्वगा अस्माभिर्हिन्दुजनैरस्पृश्यत्वेन पत्तनस्य ग्रामस्य वा दूरे ‘ढेडवाडो’ इति गुजरातीभाषायामुक्तास्तन्नामधेयं च दुर्वासनामयमिव तिष्ठति। इत्थमेव ‘क्रिश्चियन युरोप’ प्रदेश एकदा ‘यहूदी’ जना अस्पृश्या इत्युक्ताः ‘घेटो’ इति दुर्नामधेयेनाहूताः। तथैव वयमपि दक्षिणाफ्रिकादेशे अस्पृश्याः संभूताः। ॲन्ड्रुझमहाशयेन कृतो यज्ञोऽपि च शास्त्रे गृहीतं भूतयंत्रमस्मान्पूर्वस्थानं प्रापयिष्यतः॥

पुराण‘यहूदी’जनः आत्मानमेव भगवतानुगृहीतं मन्यते स्म। इतरान् सर्वानप्यन्यथाभूतान् मेने। अत एव तद्वंशजाः सर्वेऽपि न केवलमाश्चर्यकरमपि त्वन्याय्यं प्रतीकारं भेजिरे। तथैव हिन्दुजना अप्यत्मानमार्यान्नागरिकान् मन्यन्ते। स्वेषामेवाङ्गभूताञ्जनान् प्राकृतानार्येत्यादिकमाकलयन्ति। अत एव ते तस्यान्यायस्य फलमनुचितविचित्रप्रकारेण दक्षिणाफ्रिकादेशे अनुभवन्ति। एवं च समानदेशस्थाः समानवर्णयुक्ताश्च ‘मुसलमान-पारसी’ जना अपि तादृशफलभाजभूता इति मे मतिः॥

वाचकस्येदानीं विदितं स्यादर्थेऽध्यायस्य शिरोवचने कुलीस्थानानीति प्रोक्तस्य। दक्षिणाफ्रिकादेशेऽस्माकं कुलीति नामधेयम्। भारतदेशे कुलीत्यस्य द्वारपाले भाटकगृहीतः कर्मकर इत्यर्थः स्यात्। अपि तु दक्षिणाफ्रिकादेशे तस्य तिरस्कारणीयो भावो वर्तते। यथास्माकं अर्थोऽस्पृश्यो भवति तथा। तेषां नियुक्तवसतिस्थानानां कुलीस्थानमिति निर्देशः। ‘जोहानिसबर्ग’ प्रदेशे तादृगेकं स्थानमासीत्। किंतु कुलीस्थानयुक्तेष्वन्यप्रदेशेषु भारतीयजनानां निवासाधिकार आसीत्। जोहानिसबर्गकुलिस्थाने भारतीय जना एकोनशतवत्सरपर्यन्तं निवस्तुमनुज्ञा गृहीत्वा स्थिताः। तत्स्थानं जनबहुलमासीत्। जनसंख्या वर्धते स्म। स्थानविस्तारस्तु यथापूर्वमेवैकरीत्या स्थितः। ‘नगरपालिका मलमूत्रविसर्जनस्थानान्याकस्मिकरीत्या स्वच्छीकरोति स्म। आरोग्यसंविधानानि न किंचिदकरोत्। मार्गव्यवस्था दीपसंयोजना च नास्त्येव। निवासिनां योगक्षेमं विचारयितुमुदासीनतायां तस्यारोग्यरक्षणं करोतीति को विश्वासः। न खल्वेते जानन्ति गृहारोग्यविधानं शरीरारोग्यरक्षणं च नगरपालिकासहाय्यं तत्परीक्षणं च विना। तत्र गताः सर्वेऽपि भारतीया यदि ‘रॉबिन्सन् क्रूसो’ऽभविष्यत्तदा तेषां कथान्यैवाभविष्यत्। जगत्यस्मिन् ‘रॉबिन्सन् क्रूसो’–स्थापितमेकमपि स्वास्थ्यं न जानीमः। सामान्यतो जना द्रव्यवाणिज्यार्थे बहिर्गच्छन्ति। परंतु दक्षिणाफ्रिकादेशं गतेषु भारतीयेषु प्रायो भूयिष्ठा मूर्खा निर्गतिकाश्च कृषिका बभूवुः। आदरपूर्वकं रक्षणं सर्वमपि तेषामावश्यकमासीत्। बहुस्वल्पा व्यापारिणः

Funding by IKS-MoE

सुशिक्षिताश्च भारतीयास्ताननुसृता आसन् । पौरसभायाः ‘ क्रिमिनळ ’ अजागरूकता कृतवसतीनां भारतीयजनानां मूर्खता च स्थानमारोग्यशून्यं कर्तुं व्यवस्यताम् । पौरसभामुत्तमरीतिमापादयितुमुक्त्वात्मकृतमनारोग्यमेव कारणीकृत्य स्थानं विनाशयितुं प्रयेते । तदुद्देशेनैव निवासिनः स्वार्थशून्यान् कर्तुं अधिकारिभ्योऽनुज्ञां प्राप । एषा किलासीद्रीतिर्यदा जोहनिसबर्गस्थाने कृतनिवासोऽहमासम् ॥

स्वस्वभूमिष्वधिकारयुक्ता निवासिने नष्टप्रतीकारद्रव्यमाप्तुमधिकारिणो बभूवुः । भूग्रहणविषयान् परीक्षणीयान्परीक्षितुं विशिष्टन्यायस्थानमेकं स्थापितमासीत् । यदि गृही पौरसभया प्रदेयं नांगीकर्तुमैच्छत्तदा न्यायस्थानं गच्छेत् । अथ न्यायस्थानस्य निर्णये पौरसभया देयाधिकं दत्तं चेत् पौरसभा तावद् व्ययद्रव्यं सहेत ॥

प्रायः सर्वे गृहिणो मामेव स्वेषां ‘ वकीलं ’ चक्रुः । एतान्परीक्षणीयान्विषयान्गृहीत्वा द्रव्यमर्जयितुं न मेऽभिलाषासीत् । न्यायस्थानं यावत्प्रदेयद्रव्यमाज्ञापयत्तावता संतुष्ये यद्यमी विजयिनः स्युः । कृषिगृहीतासु भूमिषु प्रतिभुदशपौंडमितं धनं मे देयं स्यात् । फलितं यथा कथाचिद्भवतु नाम । अहं तान् पुनरवोचं युष्माभिर्दत्तद्रव्येष्वर्धभागं निष्किंचनानामुपयोगाय वैद्यशालां वेतरसंस्था वा प्रतिष्ठापयितुं प्रयुज्मह इति । एतत्तान् सर्वानानन्दयत् ॥

सप्ततिः परीक्षणीयविषयाः । तेष्वेकमेव निष्फलमासीत् । अतो मे प्रतिग्रहाद्द्रव्यस्य महती संख्या प्राप्ता । किन्तु तत्रासीद् ‘ इंडियन ओपीनियन ’ पत्रिका तदर्थं ममोपरि रूप्यकाणां षोडशसहस्राणि व्ययः संवर्तते स्म । एतावत्परीक्षणीयविषयार्थे मया महान् क्लेशोऽनुभूतः । व्यवहारिणः सर्वदा मत्समन्तात् स्थिताः । प्रायेण सर्वेऽपि ते संमतिबद्धाः कर्मकरा बिहारतत्परिसरप्रदेशाद्दक्षिणभारतप्रदेशाच्चागताः । तेषां विलक्षणक्लेशपरिहाराय स्वीयः संघ एकः कल्पितः । स च वणिजां क्रयविक्रयिणां च स्वतंत्रसंघादन्यः । तेषां कतिचित् सहृदया उदारपुरुषा उच्चचरित्रसंपन्नाश्च । तेषां नायकाः संघाध्यक्षो ‘ जयरामसिंग् ’ इत्येकः सभाध्यक्षसमानो बद्रिमहाशयः । इदानीमुभयेऽपि मृताः । तौ ममातीव साह्यकारिणावास्ताम् । बद्रीमहाशयो मम समीपसंपर्कं गतः सत्याग्रहे प्रधानभागमुवाह । एषामितरेषां च सुहृदां संपर्केनोत्तरदक्षिणभारतादागतैर्निःसंख्यैर्भारतीयनिवासिभिः समीपसंपर्कं गतोऽहम् । न केवलं ‘ वकीलः ’ परन्तु भ्रातेव स्थितस्तेषां स्वकीयसार्वजनिककार्येषु दुःखसंकटेषु च भागी अभवम् ॥

भारतीयजनः कथं मामाह्वयन्निति ज्ञातुं समीचीनमस्ति । अब्दुल्लाशेठमहाशयो मां गांधिरित्याह्वातुं निराकरोत् । अदृष्टवशान्न कोऽपि मां ‘ साहेब ’इत्याभिधानेनाप्यनिन्दन् । अब्दुल्लाशेठमहाशयो रमणीयनामधेयं ‘ भाई ’ इति भ्रातरिति वा जगाद । यावद्दक्षिणाफ्रिकादेशमत्यजं तावत्तन्नाम्नेतरेऽप्याह्वयांचक्रुः ॥

भारतीयजनैः संमतिबद्धैः कर्मकरैरुपयुक्ते नामधेये कश्चिन्मधुरो रस इवास्तीत्यभात् ॥

Funding by IKS-MoE

पंचदशोऽध्यायः

असितप्लेगोपद्रवः (१)

पौरसभायाः स्वीयताप्राप्तेरचिरादेव भारतीयजनः स्थानान्नापनीतः । गृहेभ्यो बहिष्करणात्पूर्वं तत्तद्योग्यवसतीः प्राप्तुमावश्यकमासीत् । किन्तु पौरसभायाः सौलभ्येनेदं कर्तुमशक्यमासीत् । अत एव भारतीयजनाः पूर्वस्मिन्नशुचिस्थान एव वर्तितुमनुज्ञाताः ।'तस्य फलितं च तदवस्था पूर्वापेक्षया हीनतराभूत् । स्वामित्वाद्विरम्येदानीमधिवासिनोऽभूवन् । अतः परिवेष्टकप्रदेशा अनारोग्यमया बभूवुः । तादृगनारोग्यस्थितिदृष्टपूर्वा । यदा ते स्वामिनः स्थितास्तदा शासकभयादपि यत्किंचिच्छुचित्वरक्षणं कर्तुं व्यवसिता आसन् । पौरसभायास्तादृशं भयं नासीत् । गृहस्थायिनां संख्या वृद्धिमागात् । एतेनाशुचित्वं क्रमभंगश्च ववृधे ॥

यदा भारतीयजना एतादृक् स्थानानुभवेन व्यथिता आसन्' तदाकस्मादसितप्लेगुपद्रवः संबभूव । तमेनं 'न्यूमोनिक' प्लेगेत्यपि वदन्ति । इदं 'बूबोनिक' अपेक्षया भयंकरं मृतिकारकं च ॥

एतद्रोगोत्पत्तेः कारणं जोहानिसबर्गपरिसरे सुवर्णखनिरेका ॥ अस्मिन्नाकरे कर्म कुर्वन्तो जनाः प्रायः सर्वे निग्रोपदवाच्याः । एषां शुचित्वरक्षणाय गौरांगा नियोगिनः सर्वथा प्रत्युत्तरदायिन आसन् । कतिचिद् भारतीयजना अपि खनिसंबंधे कर्म कुर्वन्ति स्म । तेषां त्रयोविंशतिरेतद्रोगेणाकस्मात् परिग्रस्ता सायंकाले स्ववसतीराजग्मुः । तत्काले मदनजितमहाशयः 'इंडियन ओपिनियन' पत्रिकार्थे ग्राहकानन्वेषयति स्म । कृतकार्यः स्थानेऽस्मिन् क्षणं स्थितः । स किल निर्भयः प्रसिद्धपुरुषः । तस्य हृदयमेतान् रोगग्रस्तान् वीक्ष्य क्रंदति स्म मत्सकाशं लिखिताक्षरं लेखमेकं प्रैषयत् । यथाकस्मादसितप्लेगोपद्रवः प्राप्तः । एतत्क्षणमेवागम्य शीघ्रं यथायुक्तं संविधानं कर्तव्यम् । नो चेद्वयं भयंकरान्परिणामान् द्रष्टुमर्हामः । एतत्क्षणमेवागन्तव्यमिति ॥

धीरो मदनजितमहाशयः शून्यगृहस्यैकस्य बंधनं भित्त्वा रोगिणः सर्वान् तत्र स्थापयामास । अहं स्थानं प्रति पादनोद्यथानेन गत्वा पत्तनलेखकस्य न्यवेदयं गृहं स्वाधीनीकृतसंदर्भान् ॥'

डॉ. विल्यम–गॉडफ्रेमहाशयः समाचारमाकर्णितमात्र एव स्वकार्यालयादागत्य वैद्यस्य कर्म धात्रीकर्म चोभयं निर्वहति स्म । किन्तु त्रयोविंशतिरोगिणां परीक्षणाय वयं त्रयो नालमभूम ॥

अस्तीयं मे श्रद्धा स्वानुभवमाश्रिता यदेकस्य हृदयं स्वच्छं स्याद्यदि संभवन्नुपद्रवः सहैव तत्प्रतिशोधनाय पुरुषानुपायांश्चानयति । मम कार्यालये तदा चत्वार भारतीयजना आसन् । ते च

Funding by IKS-MoE

'कल्याणदास-माणिकलाल-गुणवन्तरायदेसाई' अपि च चतुर्थोऽन्यो यस्य नामधेयं नेदानीं स्मरामि। कल्याणदासमहाशयः स्वपित्रा मद्वशे स्थापितः। कल्याणदासमहाशयापेक्षयाधिकमुपकारिणं मनःपूर्वकतया परमविधेयं च प्रायो नैव दृष्टवान्। अदृष्टवशात्तदानीमयमनूढ आसीत्। महांत्यपाययुक्तानि तस्य दत्त्वा कारयितुं नैव विकल्पं प्राप्तवानहम्। जोहानिसबर्गपत्तने माणेकलालमहाशयो मे प्राप्तः। यथाहं स्मर्तुं शक्तस्तथा सोऽप्यनूढ एवासीत्। अतोऽहं चत्वारोऽपि लेखकाः सहकारिणः पुत्रा वा भवतु तानाहुतीकर्तुं निरणैषम्। अन्ये तु सज्जा वयमाहूतास्तिष्ठामः इति। यत्र भवांस्तत्र वयं चेत्येषामल्पं मधुरं च प्रत्युत्तरमासीत्॥

रीचमहाशयस्य कुटुंबो महान्। स च लंघितुं सज्जस्थितः। किंत्वहं तं प्रत्यरोधयम्। अपाये पातयितुं तं मम हृदयं न धीरमासीत्। असावपायवलयाद्बहिरेव कार्यं करोति स्म॥

सा भयंकरी रात्रिः। जागरपरिपोषणाभ्यां रोगिणो मयोपचरिताः। किंत्वसितप्लेगोपद्रवग्रस्तो न कोऽपि। डॉ. गॉडफ्रेमहाशयस्य धैर्यं सांक्रामिकमिवासीत्। परिपोषणकृत्यं न बहुलमावश्यकमासीत्। पानायौषधमात्रापेक्षितस्य विधानं रोगिणः शयनीयं च स्वच्छशुचीनि कृत्वा स्थापनं रोगिण आनंदनमेतावदेव कर्तुमावश्यकं बभूव॥

तरुणानामतिमहतीं श्रद्धां निर्भयतां च दृष्ट्वा ममातिमात्रमानन्दोऽभूत्। मदनजितसदृशस्यानुभवशालिनः पुरुषस्य धैर्यं जानीमः। किन्तु निर्वाससां तरुणानामेषां स्वभावं कथम्॥

यावदहं स्मरामि तावत्तद्रात्रौ सर्वे रोगिण उपचरिताः॥

परन्तु सर्वोऽयं विषयः करुणारसजनको मम धर्मसारो वर्तते च। तस्मात्प्राय अध्यायद्वयं तदर्थे उदाहरिष्यामः॥

षोडशोऽध्यायः

असितप्लेगोपद्रवः (२)

शून्यगृहं रोगिणश्च मद्वशे गृहीतवानिति कृतज्ञतां प्रादर्शयन्नगरलेखकः। स च सरलतयाङ्गीचकार यदिदानीमेवेदृशाकस्मिकसंभवान् प्रतिरोद्धुं नगरसभायाः साधनं नासीत्। परन्तु यावच्छक्यं सर्वमपि साहाय्यं दीयत इति वाचं ददौ। कर्तव्यं प्रत्येकदा जागरिता नगरपालिका कार्यानुष्ठाने विलम्बं न चकार॥

परेऽहनि शून्यशालामेकां मद्वशे कृत्वा तत्र रोगिणोऽपतीयन्तामिति सूचयामासुः। परन्तु पौरसभास्थानानि शोधयितुं नाङ्गीचकार। गृहमशुद्धमसंमृष्टं स्थितम्। वयमेव तदशोधयाम।

Funding by IKS-MoE

धार्मिकभारतीयकार्यालयात् कतिचिच्छयनान्यपि चान्यान्यावश्यकानि संपाद्य तात्कालिकीमेकां वैद्यशालामकल्पयाम । पौरसभा त्वेकां सेविकां प्रैषयत् । डॉ. गॉडफ्रेमहाशयस्वाधीनतायां वैद्यशाला स्थिता ॥

सेविका दयालुः स्त्री । रोगिणः परामर्शने सानंदा संमतिं ददाति । परन्तु तान्प्रष्टुमपि नानुज्ञाता । मा तावत् स्वयं रोगेण कृतसंक्रमाभूदिति ॥

रोगिणां पदे पदे मद्यौषधमात्राः प्रदातुमस्माकमनुज्ञासीत् । सेविका जागरयास्मानपि ग्रहीतुमब्रवीत् । स्वयं सा तथा करोति स्म । अस्मासु न कोऽपि तत् स्पृशति स्म । रोगिणामप्युपयोगोऽनेन भविष्यतीति मे श्रद्धा नासीत् । गोडफ्रेमहाशयस्यानुज्ञामादाय मद्यमनिच्छतस्त्रीन् रोगिणो मृत्तिकाचिकित्सामग्राहयम् । आर्द्रमृत्तिकाबंधनानि तेषां हृदयेषु शिरस्सु च निक्षेप्तव्यानि । एवं द्वौ रक्षितौ । अन्ये विंशतिर्पण्यसंग्रहशालायामेव मृता बभूवुः ॥

एतदन्तरे पौरसभान्यानि कार्याणि करोति स्म । जोहनिसबर्गनगरात् त्रिक्रोशदूरे सांक्रमिकरोगचिकित्सायै चर्मरोगशालैका स्थिता । सजीवौ द्वौ रोगिणौ चर्मरोगशालायाः समीपे पटमंडपेषु स्थापितौ । तत्र नूतनरोगिणः प्रेषयितुं संविधानानि क्रियमाणान्यासन् । वयमित्थमस्मत्कार्यान्मुक्ता अभूम ॥

केषुचिद्दिवसेषु गतेषु साध्वी सेविका रोगग्रस्ता मृता च । कथमे तौ द्वौ रोगिणौ रक्षितौ वयं विमुक्ता इति वक्तुमशक्यम् । परंत्वयमनुभवो मृत्तिकाचिकित्सायां मे श्रद्धामवर्धयत् । मद्यमौषधरूपेण वास्तु । तदुपयुक्ततायाः संशयो मे स्थितः । इयं श्रद्धा वायं संशयो वा पर्याप्तकारणाधारौ न स्त इत्यहं जानामि । किन्तु तदानीमागता भावनाद्यापि रक्षितेत्यत्र तद्वक्तुमावश्यकमित्यमंसि ॥

आगते प्लेगोपद्रवे मुद्रायंत्रतः प्रसाराय तस्यैकं बलवल्लेखनमकार्षम् । यथास्थानं पौरसभाया वशमागतम् । ततःपरं सानवधानाभूत् । तस्यैवायमपराध उपद्रवसंभवस्य कारणीभूतोऽयं प्रत्युत्तरवादीति । अयं लेखः हेनरीपोलाकमहाशयं समपादयत् । तन्मुखेन माननीयजोसेफडोकमहाशयस्य मैत्री प्राप्ता ॥

उक्तं मया पूर्वतराध्याये यच्छाकाहारिणां भोजनालये मया भुज्यते स्मेति । अत्र हि आल्बर्ट – वेस्टमहाशयेनाहं संगतवान् । अस्मिन्भोजनालये प्रतिसायमागम्यते स्म । भोजनानन्तरं बहिः सह चलन्तौ स्वः । वेस्टमहाशयः क्वचिदल्पायां मुद्रासंस्थायां भागमुवाह । स च मुद्रांकितं चक्रे । प्लेगोपद्रवसंभवं मम लेखं दृष्ट्वा भोजनालये मामनवलोक्य दुःखितोऽभूत् ॥

उपद्रवादनन्तरं सहकारिणोऽहं च भोज्याहारमल्पीकृतवन्तः । महारोगसंभवे लघुभोजनं नियमेन क्रियते स्म । अत एवैतेषु दिवसेषु सायंभोजनं परित्यक्तवान् ॥

अल्पाहारं चेतरभोक्तृणामागमनात्पूर्वमेव समापयम् । भोजनालयस्य स्वामी मे सम्यक्

परिचितः। प्लेगरोगिणां चिकित्सायां निरतोऽहं मित्राणां संपर्कं यावच्छक्यं दूरीकर्तुमिच्छामीति मयासौ निवेदितपूर्वोऽभूत् ॥

भोजनालये दिनद्वयान्मामदृष्ट्वा वेस्टमहाशयः प्रातस्तरामेकदा बहिः परिक्रमाय गन्तुं सज्जस्थिते मयि कवाटं कुट्टितवान्। द्वारमुदघाट्यम्। भोजनालये भवन्तं नाद्राक्षम्। अतोऽहं वस्तुतो भीतो भवतः किंचिदप्यापतितं स्यादिति। अतः समागत्य भवान् प्रातः गृहे स्थास्यतीति श्रद्धयागतोऽस्मि। बाढम्। अत्राहं स्थितः। भवद्देशे रोगिणः प्रतिपालयितुं साहाय्यदाने सज्जस्थितोऽस्मि। मदायत्तः कोऽपि नास्तीति भवान् जानाति ॥

कृतज्ञोऽस्मीत्युक्त्वा निमेषार्धमप्यालोचयितुमगृहीत्वा मया प्रत्युक्तं यथा – धात्रीकृत्यस्य त्वामहं न गृह्णीयाम्। एकद्विदिनेषु वयमितो विमुक्ता भविष्यामो नाधिका रोगग्रस्ताः संभवन्ति चेत्। किंत्वेकोऽस्ति विषयः ॥

को न्वयम्? डरबनपत्तने 'इंडियन ओपिनियन' मुद्रायंत्रं भवद्देशे स्थापयितुं किं मन्यसे। मदनजिन्महाशयस्यात्रैव कार्यं विद्यते। डरबनपत्तनैक आवश्यकः। यदि गच्छेद्भवांस्तदर्थमहं विमुक्तो भविष्यामि ॥

मद्देशे मुद्रायंत्रमेकमस्तीति भवान् वेत्ति। प्रायो गन्तुमहं शक्नोमि। परंतु प्रत्युत्तरं सायं दास्यामि। सायंकालपरिक्रमे संभाषावहे ॥

परितुष्टोऽहमभूवम्। संभाषणं वृत्तम्। गन्तुं संमतिमदात्। वेतनं तस्य न गणनीयमासीत्। वेतनार्जनं तस्य नोद्देश आसीत्। प्रतिमासं दशपौंडवेतनम्। अपि च लाभे सति तदेको भाग इति व्यवस्थापितम्। परेऽहन्येव वेस्टमहाशयः सायंकालीन'मेल'शकट्यां डरबन पत्तनाय प्रतस्थे। तस्याधमर्णैरितरैर्देयं मया प्रत्युपलब्धव्यम्। यदाहं दक्षिणाफ्रिकासमुद्रतीरमत्यजं तावत्पर्यन्तमयं मम सुखदुःखेषु भागी स्थितः ॥

वेस्टमहाशयो लाउथपत्तने कृषीवलकुटुंबे जातः। सामान्यविद्याभ्यासं प्राप्तः। परंत्वहं ममानुभवशालायामात्मसाहाय्यमात्रमुपलभ्य स्थितः। जानामि तं परिशुद्धं गंभीरवृत्तिं भगवद्भीरुं परोपकारशीलं च ॥

तद्विषयेऽधिकतरं च तस्य कुटुंबं चागाम्यध्यायेषु ज्ञास्यामः ॥

सप्तदशोऽध्यायः

घस्मरं कूलीस्थानम्

यद्यपि मे सहकारिणोऽहं च रोगिणां रक्षणाद्विमुक्तास्तथाप्यसितप्लेगोपद्रवसंबद्धा' बहवो विषयाः स्थिताः। कूलीस्थानविषये पौरसभाया अनवधानता प्रत्युक्तपूर्वा मया। परन्तु सा गौरांगनिवासिनामारोग्यविषयेऽतीवजागरूकासीत्। तेषामारोग्यरक्षणाय बहुधनं व्ययीकृत्येदानीं प्लेगविध्वंसनाय बलाभिषेकमिव धनाभिषेकं चकार। भारतीयजनस्योपरि पौरसभया कृतेषु बहुषु लोपदोषेषु प्रदर्शितेषु गौरांगनिवासिनां कृते तदौन्मुख्यं दृश्यते। तस्याः प्रशंसनीयप्रयत्नेषु यावच्छक्यमहं साहाय्यमकरवम्। मम सहकारिता त्यक्ता भविष्यच्चेत्तस्याः कार्यं साधयितुं कष्टतरमभविष्यत्। सा सेनाप्रयोगमप्यकरिष्यदित्यस्ति मे भावना॥

परन्तु सर्वमेतत्परिहृतम्। पौरसभाधिकारिणो भारतीयजनस्य चारित्रेण संतुष्टाः। प्लेगविषयकस्य भविष्यत्कार्यस्यानुष्ठानं सुकरं जातम्। पौरसभाया आकांक्षामनुसृत्य वर्तनीयमिति भारतीयजनेषु यावती मे शक्तिस्तावती प्रयुक्तवान् साधयितुम्। भारतीयजनः सर्वमपि कार्यं कर्तुमशक्तोऽपि ममाज्ञामुल्लंघ्य नैवावर्तत। इदमहं स्मरामि॥

कूलीस्थानं प्रबलरक्षामुखे स्थापितम्। अंतर्बहिश्च गमनागमनाय यथा न शक्यमासीत्। मम सहकारिणां च निर्मुक्तानुज्ञापत्राण्यासन्। आसीत्किलायं निर्णयः स्थानस्य सर्वे निवासिनः स्थानं परित्यज्यान्यत्र गच्छेयुः। जोहानिसबर्गप्रदेशात् सप्तक्रोशदूरे समभूमिस्थले स्थूलपटमंडपेषु त्रीन् सप्ताहान् वसेयुः। ततश्च स्थानमग्निदग्धं कुर्यात्। पटमंडपेषु संभारानन्यदावश्यकद्रव्यं चानीय निक्षेप्तुं पर्याप्तः काल आवश्यक आसीत्। एतदन्तरे कश्चिद्रक्षकश्चावश्यकस्तिष्ठेत्॥

निवासिनो भयंकरत्रासयुक्ता आसन्। परन्तु मम सार्वेदिकी स्थितिः किंचित् समाधानमकरोत्। अकिंचना बहवो जनाः स्वरक्षितं स्वल्पमपि भूमेरन्तर्न्यक्षिपन्नेतदुत्खाय द्रष्टव्यमापतितम्। तेषां द्रव्यस्थापनकोशो नासीत्। ते न कंचिदजानन्। अहं तेषां (बेंकर) कोशस्थापितद्रव्यग्रहीताभवम्। द्रव्यप्रवाहा मम कार्यालये निपेतुः। तादृशकार्यनिर्वाहक्षणे मम प्रयासस्यः शुल्कमादातुं न शक्यमासीत्। कथंचिन्मम कार्यं निरवाहयम्। कोशाध्यक्षो मे सम्यग्विदितः। एतानि धनानि भवत्पार्श्वे निक्षेप्तुं भवति प्रसंगः। बहूनि ताम्र-रजतनाणकानि स्वीकर्तुं न चिंतामाकलयन्। प्लेगोपद्रवस्थानेभ्य आगतानि धनानि स्प्रष्टुं तिरस्कुर्वन्तीति भयमासीत्। कोशाधिकारी मम सर्वरीत्या समाधानमकल्पयत्। कोशं प्रति धनप्रेषणात्पूर्वं रोगदोषपरिहारः कर्तव्य इति निश्चितम्। मम स्मृतौ षष्टिसहस्र' पौंड 'मितद्रव्यं कोशे न्यस्तमासीत्। येषां

चशे पर्याप्तं धनमासीत्तानहमवोचं न्यस्यतामिदं धनं प्रतिष्ठितन्यासरूपेणेति । ते तथा चक्रुः । यत्फलमेतदासीत्तेषां कतिपये वित्तकोशेषु वित्तविन्यासस्य संप्रदायं भेजिरे ॥

स्थाननिवासिनो विशिष्टशकटीद्वारा जोहानिसबर्गसमीपे ‘ क्लिपस्प्रुट ’क्षेत्रं प्रति संचालिताः । तत्र ते पौरसभया सार्वजनिकद्रव्यव्ययेन संभारान् दापिताः । पटमंडपीयमेतत्पत्तनं सैनिकशिबिरमिवादृश्यत । अनभ्यस्तशिबिरजीवनाः क्लेशप्राप्ताः परपाटिमवलोक्याश्चर्यभरिता बभूवुः । परन्तु किमप्यनानुकूल्यं तैर्न सोढम् । प्रत्यहं मया पादनोद्यचक्रयानेन गम्यते स्म । चतुर्विंशतिहोराभ्यंतरे सर्वक्लेशं ते व्यस्मरन् । आनंदेन च जीवितुं प्रवृत्ताः । यदा यदाहं तत्रागमं तदा तान् गीतेन हासेन चानुभवतोऽद्राक्षम् । सप्ताहत्रयपर्यन्तमनावृतप्रदेशे स्थित्या स्पष्टमासीदारोग्यप्रकर्षः ॥

मम स्मृतौ निवासिनामागमनात्परेऽहन्येव स्थानमग्निदग्धमभूत् । पौरसभा दहनज्वालायाः किमपि रक्षितुमीषदपिं लोभं नादर्शयत् । इमामेव वेलां तेनैव कारणेन क्रयविक्रयस्थाने स्थितं दारु सर्व ददाह । दशसाहस्र‘ पौंड ’मितद्रव्यं नष्टमन्वभूत् । पण्यस्थाने मृतमूषकाः कतिचिद् दृष्टा इत्येतदेव कारणं शीघ्रकरणाय ॥

पौरसभा बहुव्ययमसहत । परन्तूपद्रवस्य वृद्धिमवारयत् । पत्तनं पुनः सुखेन श्वासोच्छ्वासमकरोत् ॥

अष्टादशोऽध्यायः

एकपुस्तकस्येंद्रजालप्रभावः

असितप्लेगोपद्रवो निष्किंचनभारतीयजनेषु मम प्रभावमवर्धयत् । मम कार्यं पर्यनुयोज्यतां च बहुलीचकार । ‘युरोपियन’जनैः कतिचित्संपर्कास्तथा समीपपरिचिता यथा मे नैतिक्यां कर्तव्यतायां प्राचुर्यं चक्रुः ॥

यथा वेस्टमहाशयस्य तथा पोलाकमहाशयस्यापि परिचयं शाकाहारभोजनालयेऽकार्षम् । सायमेकदा स्वल्पदूरे विषण्णस्तरुणो मां द्रष्टुमिच्छामीति पत्रमेकं प्रैषयत् । मम भोजनमंचकपार्श्वमेहीत्यवोचम् । स तथाकरोत् ॥

तेनोक्तं यथा – अहं ‘ क्रिटिक ’ पत्रिकाया उपप्रकाशकः । मुद्रायन्त्रे प्लेगविषये भवतो लेखनमपठिषम् । भवान् द्रष्टव्य इति बलवतीच्छा जाता । इदानीं तत्समयः प्राप्त इति संतुष्यामीति ॥

पोलाकमहाशयस्योदारभावो मामाचकर्ष । तदैव सायमावां परस्परं ज्ञातुं प्रवृत्तौ । जीवनस्य मुख्यविषयेषूभयोरपि समानोऽभिप्राय आसीत् । अकृत्रिमं जीवनं तस्येष्टम् ।

तस्यासीदाश्चर्यकरी शक्तिर्बुद्धिमागतस्यानुभवमार्गमानेतुम् । स्वजीवने कृतानि कतिपयपरिवर्तनानि मूलतस्त्वरितवृत्तानि बभूवुः । 'इंडियन् ओपिनियन्' पत्रिका प्रत्यहमधिकव्ययवती भवति स्म। वेस्टमहाशयादागता प्रथमविज्ञापना भयंकर्यासीत् । तेन हि लिखितं यथास्मद्व्यापारतो यथा भवानालोचयत तथा लाभो न भावीति। नष्टमपि स्यादित्यहं भीतोऽस्मि। पुस्तकानि क्रमवर्तीनि न भवन्ति। प्रत्युपलम्भनीयो ऋणशेषो महान् विद्यते। तस्य शिरोलांगूलं न जानीमः। इतस्ततो बहुशः समाकर्षणीयं भवति। परंत्वेतत्सर्वं भवन्तं न त्रासयितुमलम्। यावच्छक्यं विषयान्सम्यक् स्थापयितुं प्रयतिष्ये। लाभोऽस्तु वा न वाहं पुनः स्थास्यामीति ॥

वेस्टमहाशयो लाभो न भवतीति प्रत्यक्षीकृत्य परित्यक्तवान् भवेत्। नाहं तस्य दोषं ब्रूयाम्। वस्तुतो व्यापारो लाभकारीति प्रमाणं विना मद्वचनं श्रुत्वा मामभिशप्तुमधिकारवान् भवेत्। परंत्वयमेकमपि प्रवादशब्दं नोक्तवान्। अस्तीयं मे भावना यदेतद्विलोक्य वेस्टमहाशयो मां श्रद्धालुं मन्येत। मदनजितमहाशयस्य परिसंख्यानं परीक्षणं विना समादाय लाभकारीति वेस्टमहाशयमवोचम् ॥

इदानीमहं सिद्धमतिरस्मि। यत्सार्वजनीनः सहकारी स्वयमनिश्चितो भाषणं न कुर्यादिति। सत्यव्रतो वस्तुतो महतीं जागरूकतां भजेत। प्रमाणतः सम्यक् शोधनं विना भाषणं सत्याभासः। इदं स्वीकर्तुमहं दुःखितोऽस्मि यदेतद् ज्ञात्वापि श्रद्धालुतास्वभावो न विजितो मयेति। शक्यादधिकं कर्तुमाशैव कारणम्। इयमाशा बहुधा मम सहकारिणामेव क्लेशहेतुः। न तावन्मम ॥

वेस्टमहाशयस्य लेखं प्राप्य नातालदेशं प्रति प्रस्थितः। पोलाकमहाशयो मम केवलं विश्वासपात्रमासीत् । अग्निरथसंचालितमानारोढमग्निरथविरामस्थानं गतस्य प्रस्थानमालोक्य प्रयाणं कुर्वता भवता पुस्तकमिदं पठ्यतामित्युक्त्वा इदं ते रोचत इति प्रत्येमीत्यवदत् । तत्पुस्तकं रस्किनमहाशयरचितं 'अन्टु धिस लास्ट' इति ॥

एकदा पठितुमारब्धस्य विरम्य स्थापयितुमशक्यमासीत्। जोहनिसबर्गस्थानात् डरबनपर्यन्तं चतुर्विंशतिहोराकालमितं प्रयाणम्। बाष्पसंचालितयान तत्र सायं प्रापत्। तस्यां रात्रौ नाहं निद्रां कर्तुमशकम्। प्रस्तुतानुसारेण मम जीवनं परिवर्तयितुं निरचैषम् ॥

इदमेव प्रथमं पुस्तकं रस्किनमहाशयप्रणितं मया पठितम् । मम विद्याभ्यासदिवसेषु नियमितपुस्तकानि विना न किंचिदन्यन्मया पठितम्। यदाहं कर्मोद्युक्तस्तदा स्वल्पकालवशान्न पठितुमशकम्। पुस्तकोत्पन्नं ज्ञानं मे बहुलं नास्ति। बलान्नियमनेन न मे नष्टमासीत्। प्रत्युत परिमितपठनेन यत्पठितं तत्संपूर्णमेव जीर्णीकृतम् । पठितपुस्तकेषु तात्कालिकपरिवर्तनं सत्वरमुत्पादितवत्पुस्तकं एकं 'अन्टु धिस लास्ट' इति। तस्य भाषांतरीकरणं पश्चात्कृतं गुर्जरभाषायां सर्वोदयनाम्नि लेखने ॥

Funding by IKS-MoE

रस्किनमहाशयरचितेऽस्मिन्महाग्रन्थे ममागाधहृदयगतनिश्चयानवालोकयमिति विश्वसिमि । अतः मामाचकर्ष जीवनं च परिवर्तयामास ॥

मानुषस्य हृदये गूढं यत्समीचीनं वर्तते तदाकृष्य प्रदर्शयितुं शक्तः कविः । कवयः सर्वानेकरीत्या न प्रवर्तयन्ति । यतः प्रतिमनुष्यः समानपरिमाणेन न प्रसारितः ॥

'अन्टु धिस लास्ट' अस्य योऽर्थः स इत्थमहं जानामि –

(१) प्रत्येकमानवस्य यत्साधु तत्सर्वेषां साधु वर्तते ।

(२) 'वकील' कार्यस्य मूल्यं नापितकार्यस्य मूल्यं च समानं यतः सर्वेऽपि स्वस्वकार्याज्जीवनं संपादयितुमधिकारिणः ।

(३) भूमेः कर्षकस्य कर्मकारस्य च जीवनानि सुजीवनानि ।

एतेषां प्रथममहमज्ञासिषम् । द्वितीयं मे बुद्धौ मन्दं मन्दं स्थितम् । तृतीयं न मे कदाप्यस्फुरत् ॥

'अन्टु धिस लास्ट' दिनवत्प्रकाशीकृतवान् यथा द्वितीयं च तृतीयं च प्रथमगतानीति । प्रत्यूषेऽहमुत्थित एतानि कारणान्यनुभवमार्गमानेतुं सज्जस्थितः ॥

एकोनविंशोऽध्यायः

'फीनिक्स' –आश्रमः

वेस्टमहाशयेन सह सर्वोऽपि विषयः संभाषितः । 'अन्टु धिस लास्ट' पुस्तकं मम मानसोपर्युत्पादितं फलमप्यवर्णयम् । 'इंडियन ओपिनियन' कृषिक्षेत्रं प्रत्यानेतव्यं तद्विषये प्रत्येकेनापि परिश्रमितव्यं पूर्वं जीवनवेतनमेव ग्रहीतव्यमवकाशे प्राप्ते मुद्रायंत्रकार्यमपि द्रष्टव्यम् । इत्येवं कर्तव्यसूचनामकरवम् । वेस्टमहाशयः संमतिं ददौ । प्रतिमासस्य प्रत्येकं वेतनं वर्णदेशाभिमानौ निरपेक्ष्य 'पौंड' त्रयमिति निश्चितम् ॥

परन्तु प्रश्न एकः स्थितः । मुद्रायन्त्रे कार्यकारिणो दश वा तदधिका वा दूरक्षेत्रं गत्वा केवलभृतिमात्रेण किं संतुष्टा भविष्यन्तीति । एतदुपायस्वीकारे न योग्या ये भवन्ति तैः पूर्ववद्वेतनं गृह्णानैः क्रमशः क्रमश आश्रमस्यांगीभवनाय प्रयतितव्यम् ॥

कर्तव्यसूचनामुद्दिश्य कर्मकारिभिः सह भाषणं कृतवान् । मदनजितमहाशयायेदं नारोचत । अपरिग्राह्यामेनां समेत्य स्वस्य सर्वस्वस्य :विनियोगोऽपि विनष्टो भवेत् । कर्मकारिणः सर्वेऽपि पलायेरन् । 'इंडियन ओपिनियन' व्यापारो विरंस्यति । मुद्रायन्त्रं चानुपयोगात् स्थापितं भवेत् ॥

मुद्रायन्त्रे कर्म कुर्वतां मध्ये मम ज्ञातीनामेकतमः छगनलाल-गांधिमहाशय एक आसीत् । कर्तव्यसूचनां वेस्टमहाशयस्य यदाकरवं तदैवास्यापि कृतवान् । भार्यापत्यानि च तस्यासन् । परन्तु शैशवात्प्रभृति मयैव शिक्षितो मद्वशे स्थितः । मयि तस्य श्रद्धा संपूर्णासीत् । अतो विवादं विनोक्तोपायस्य संमतिं दत्वाद्यावधि मत्समीपमेवास्ते । यन्त्रकारः गोविंदसामीमहाशयोऽपि मत्सूचनामंगीचकार । इतरे तु नैवोपायं स्वीचक्रुः । परन्तु मुद्रायन्त्रं यत्र गच्छेत्तत्र गन्तु संमेनिरे ॥

इमान् विषयानेतैर्मनुष्यैर्व्यवस्थापयितुं दिनद्वयादधिकं कालं नाग्रहीषम् । अतोऽहं विलम्बं विना डरबनपत्तने बाष्पसंचालितयानविरामस्थानसमीपस्थितभूमिरेकापेक्षितेति संवादपत्रेणाप्रकाशयम् । प्रतिगृह्यतामिति फीनिक्सस्योपहार आगतः । भूमिं परीक्षितुमहं वेस्टमहाशयश्च गतौ । सप्ताहाभ्यंतरे विंशति‘एकर’परिमिता भूमिरस्माभिः क्रीता । तत्र समीचीनः स्वल्पो निर्झरः कतिपये नारंगचूतवृक्षाश्चासन् । तत्समीप एवाशीति ‘एकर’परिमिता भूमिरासीत् । तत्र च बहवः फलवृक्षा जीर्णकुटीरश्चैक आसन् । इदं च क्रीतमस्माभिः । समग्रव्यय एकसहस्रपौंडमितद्रव्यम् ॥

दिवंगतो रुस्तुमजीमहाशय एतादृशोद्यमेषु मम हस्तावलंबं यच्छति स्म । उपायोऽयं तस्येष्ट आसीत् । महासंभारगृहस्य प्रयुक्तपूर्वलोहफलकान् गृहनिर्माणवस्तूनि चास्मद्वशे निचिक्षेप । अस्माभिश्च कार्यमारब्धम् । कतिपयभारतीयतक्षकाः प्रस्तरन्यासकृतश्च ‘बोअर’ युद्धे मया सह कार्यकर्तारो मुद्रायन्त्राय मंडपिकां निर्मातुं साहाय्यमकुर्वन् । एतद्भवनं परिमाणे पंचसप्तति ‘ फीट ’ दीर्घं पंचाश ‘ त्फीट ’ विस्तीर्णमेकमासात्पूर्वमेव सज्जस्थितमभूत् । वेस्टमहाशय इतरेजनाश्च तक्षकैः शिलाशिल्पिभिश्चात्मापायेऽपि निर्भीकाः स्थिताः । निवासः शून्यस्तृणैरतिप्ररूढः सर्पैराक्रान्तो निवस्तुं भयंकर आसीत् । प्रथमतः सर्वेऽपि पटमंडपे उषिताः प्रायः सर्वाणि वस्तूनि शकटेषु ‘ फिनिक्स ’ प्रदेशं प्रति नीतानि । डरबनपत्तनात् त्रयदशक्रोशदूरे ‘ फीनिक्स ’ स्थानं बाष्पसंचालितयानविरामस्थानात् सार्धद्विक्रोशदूरे स्थितम् ॥

‘ मरक्युरि ’ मुद्रायन्त्रे ‘ इंडियन ओपिनियन ’ पत्रिकैकवारमेव बहिर्मुद्रापिताभूत् ॥

अहमिदानीं ‘ फीनिक्स ’ पत्तनं प्रति भारतदेशान्मया सह स्वादृष्टपरीक्षार्थमागतान् तत्तत्कार्येषु प्रसक्तानाक्रष्टुं प्रायतिषि । धनान्वेषणाय ते आगताः । तस्मात्ताननुनेतुं कष्टमासीत् । परंतु कतिपये संमेनिर एतेषु मगनलालगांधिमहाशयस्य नामधेयमेकं स्मरामि । अन्ये कार्याय प्रतिनिवृत्ताः मगनलालगांधिमहाशयः स्वकार्यमेकान्ततः परित्यज्य मया सह स्थितः शक्त्यात्मनिग्रहे श्रद्धायां च मम नैतिकपरीक्षासु मम पूर्वोक्तसहकारिणां मध्ये प्रथमस्तिष्ठति । स्वयंशिक्षितशिल्पविद्यस्य तस्य तन्मध्ये स्थितिर्विलक्षणा भवति ॥

एवं ‘फीनिक्स’व्यवस्थापनं चतुरुत्तरेकोनसहस्रपरिमितवर्षे समारंभितम् । तत्राद्यापि ‘इंडियन ओपिनियन’ पत्रिका बहुक्लेशान्ते पतितापि मुद्रणं प्राप्स्यति ॥

परेत्वारंभिकक्लेशाः कृतानि परिवर्तनान्याशा नैराश्यं चान्यमध्यायमपेक्षन्ते ॥

Funding by IKS-MoE

विंशतितमोऽध्यायः

प्रथमा रात्रिः

‘ **इंडियन-ओपिनियन** ’ प्रथमसंख्यां ‘ फीनिक्सा ’श्रमाद्विनिर्गमयितुं नासीत्सुलभो विषयः ।

द्विप्रकारेण पूर्वविधानं नाकरिष्यं यदि प्रथमा संचिका त्यक्ता वा विलंबिता वाभविष्यत् । यन्त्रेण मुद्रायन्त्रप्रसारणं मम बुद्धिं नारूढम् । यत्र कृषिकार्यं हस्तेन क्रियते, तत्र हस्तशक्तिरेव योग्येति मे मनस्यासीत् । परन्तु मनोगतं न शक्यमित्यस्माभिस्तैलयन्त्रं प्रतिष्ठापितम् । यन्त्रहानौ यथा कयाचित् लघुक्रियया यन्त्रहानेः परिहारः स्यात्तथा भवितव्यमिति वेस्टमहाशयस्य सूचनां दत्तवान् । अतोऽसौ हस्तेन भ्रमणयोग्यं चक्रमेकं व्यधापयत् । विदूरस्थ‘ फीनिक्स ’सदृशस्थलस्य पत्रस्य परिमाणं दैनंदिनपत्रिकावन्न योग्यं मतमासीत् । ‘ फूलस्केप’ परिमाणाय तथा नयनीकृतमासीद्यथा पादनोद्ययंत्रेण प्रतिलिपयो निर्मिताः स्युः ॥

आदौ मुद्रापणदिवसात्पूर्वं कालातीतं सर्वे वयं कार्यप्रसक्ता अभूम । प्रत्येको युवा वृद्धो वा पत्रिकापुटीकरणेन साहाय्यं कुर्यात् । दशहोरार्धरात्र्योर्मध्ये प्रायशोऽस्मत्कार्यं समाप्तिमगमत् । परन्तु प्रथमावृत्तिः संस्मरणीया भवति । फलकास्तालयन्त्रबद्धाः स्थिताः । परन्तु यन्त्रं न चचाल । यन्त्रशिल्पिनमेकं डरबनपत्तनाद्वयमानीय यन्त्रचालनाय स्थापितवन्तः । सोऽयं वेस्टमहाशयश्च बहुक्लेशेन वृथा प्रायतिषाताम् । प्रत्येकः पुरुषोऽपि बहूत्सुक आसीत् । वेस्टमहाशयो निराशो भूत्वा नेत्राम्बुपूर्णः समागत्योवाच यथा – यन्त्रं न चलति । समये पत्रिकां संचालयितुमशक्यमिति ॥

यद्येतदेवं किं कुर्मः । अलं नेत्रजलं मुक्त्वा । पुरुषप्रयत्नसाध्यं यत्किंचिदन्यदेव कुर्मः । हस्तचक्रं किल स्यात् ।·इति समाधानेनावोचम् ॥

तेन प्रत्युक्तं यथा-कार्यकरणायास्मद्वशे जनाः कुत्र सन्ति । कार्यं कर्तुं वयं न पर्याप्ताः । प्रत्येकं चत्वार आवश्यकाः । अस्मज्जनाः सर्वेऽप्यायस्ता भवन्तीति ॥

गृहनिर्माणकार्यमद्यापि न समाप्तम् । अत एव तक्षका अस्मद्वशे तिष्ठन्ति । मुद्रायन्त्रभूमितले निद्राणाः स्थिताः । इमानेवोपयोक्तुं किं न शक्यम् । सर्वां रात्रिं कार्यं कुर्मः । अयमुपायोऽस्माकं सज्जस्थितो भवति ॥

तक्षकानुत्थापयितुं भीतोऽस्मि । अस्मज्जनो नूनमतीवायस्तः । उक्तं मया यथा – अयं व्यवहारो ममास्तामिति ॥

वेस्टमहाशयः प्रत्युवाच । तर्हि कार्यानुष्ठानं शक्यमेव ॥

अहं तक्षकानुत्थाप्य युष्मत्सहकारित्वं प्रार्थय इत्यवोचम् । निर्बन्धो नैवापेक्षितः । तैरुक्तं यथा – आकस्मिकसंभवेऽपि यदा वयं न प्रयोजितास्तर्हि किमस्माभिः प्रयोजनम् । यूयं विश्रान्तिं गृह्णीत । चक्रं वयं चालयामः । सुलभं नस्तत्कार्यमिति । अस्मत्स्वीयजनः सज्जस्थितः ॥

वेस्टमहाशयो बहु संतुष्टोऽभूत् । कार्यं कर्तुमुपस्थितेषु स एकं मन्त्रं गातुमुपचक्रमे । तक्षकैः सहाहं भागी । अन्ये सर्वेऽपि पर्यायेण समायुक्ता बभूवुः । इत्थं प्रातः सप्तवादनपर्यन्तं गताः । अद्यापि कर्तुं बहुलमासीत् । वेस्टमहाशयस्याहमसूचयम् यथा – यंत्रशिल्पी समुत्थाय यंत्रचालनं कर्तुं पुरः प्रयततां यदि विजयं प्राप्तास्तर्हि समये समाप्तिं गमिष्याम इति ॥

वेस्टमहाशयस्तमबोधयत् । तत्क्षणमेव स यंत्रप्रकोष्ठमगमत् । आश्चर्यमाश्चर्यं तेन स्पृष्टमात्रमेव यंत्रं चचाल । सर्वमपि मुद्रायन्त्रं हर्षोद्गारेण चस्वाण । कथमिदमेवं स्यात् । रात्रावस्मत्प्रयत्ना वृथाभवन् । अद्य प्रातरिदं चलति । आदितो निर्दोषमिव । इत्यहं व्यचारयम् ॥

उक्तं वेस्टमहाशयेन वा यंत्रशिल्पिना वा यथा कष्टमिदं वक्तुम् । कानि यंत्राणि वयमिव विश्रांतिमपेक्षन्ते इति ॥

यन्त्रहानिः सर्वानस्मान्परीक्षितुमागता । सुसमये चलितुमारब्धं च । अस्मत्सत्योदारप्रयत्नानां फलमिति जाने ॥

प्रतिलिपयः सकालं प्रेषिताः । अपि च सर्वे सुखिता बभूवुः ॥

अयं प्राथमिको निर्बन्धः पत्रिकायाः क्रमिकचालनाय दृढीकरणमासीत् । 'फीनिक्स'प्रदेश आत्माधीनताया मंडलमसृजत् । आगतः स च कालो यदा यन्त्रोपयोगं मनःपूर्वकं परित्यज्य केवलं हस्तबलेन कार्यानुष्ठानं नाम । ते किल मम मानसे 'फीनिक्स'प्रदेशाय प्राप्तो नैतिकोच्छ्रायः ॥

एकविंशोऽध्यायः

पोलाकमहाशयो निमज्जनं प्राप्नोति

यद्यपि 'फीनिक्स'प्रदेशे व्यवस्थापनं मया समारब्धं तथापि तत्रात्यल्पकालमेव स्थातुमशकमिति सर्वदा विषण्णोऽस्मि । क्रमशः क्रमशो न्यायस्थानव्यवहारान्परित्यज्य 'फीनिक्स' आश्रमे हस्तबलेन जीवनं संपादयन् 'फीनिक्स'संसिद्धौ सेवानन्दं प्राप्स्यामीत्यमंसि । परन्तु ना तत्सिद्धिमगात् । अनुभवेन किल मयेदं ज्ञातं यन्मनुष्य उपायान्कल्पयति ते च भगवता पर्यस्त भवन्तीति । परन्तु तस्मिन्नेव काले यश्चांतिमः परिणामः सत्यान्वेषणं भवति नैव चिन्ता यद्यप्युपाया भग्ना भवन्तीति चरमा गतिर्न हानिकरी परन्तु चिन्तितादधिकमेव फलं प्रसूते ।

Funding by IKS-MoE

'फीनिक्स' गृहीतोऽनिरीक्षितपर्यायोऽनिरीक्षितसंभवाश्च नैव हानिकरा अभूवन्। परन्तु पूर्वनिरीक्षितादुत्तममिति वक्तुमशक्यम् ॥

हस्तप्रयासेन प्रत्येकं जीविकां लब्धुं मुद्रायन्त्रपरिसरवर्तिनीं भूमिं खण्डशो विभज्य दृष्टे प्रत्येकं 'एकर' त्रयमागतम्। तेषामेको मम भागः। एषां स्थलानामुपर्यनपेक्षायामपि लोहमयानां गृहाणां निर्माणमकार्षम्। आसीदस्मदभिलाषो यत्तृणच्छन्नानि मृत्तिकाकुटीराण्यथवा सामान्यकृषीवलोचितानीष्टकामंदिराणि निर्मातुम्। परंतु न शक्यमासीत्। तेषां व्ययोऽधिको भविष्यति। कालोऽप्यधिकोऽपेक्ष्यते स्म। प्रत्येकोऽपि यावच्छक्यं शीघ्रमेवावस्थातुमुत्सुकोऽभूत् ॥

पत्रप्रकाशकोऽद्यापि मनसुखलालनाजरमहाशय एवासीत्। नवीनोपायस्तेन नांगीकृतः। पत्रिकां डरबनपत्तनात् संचालयति स्म। तत्र 'इंडियन ओपिनियन' पत्रिकायाः शाखाकार्यालय आसीत्। यद्यपि दत्तवेतनाः मुद्राक्षरविन्यासकृतः स्थितास्तथाप्याश्रमस्य प्रत्येकः पुरुषो मुद्राक्षरस्थापनं मुद्रायन्त्रचालनक्रमेषु प्रयासं कमपि सुलभतरं शिक्षितुमुद्युक्त आसीत्। अज्ञातपूर्वकर्माणः शिक्षन्ते स्म। अहं तावदद्यपर्यन्तं मूर्ख एव स्थितः। मगनलालगांधिमहाशयो नः सर्वानप्यतिशयितवान्मुद्रायन्त्रकार्यालये यद्यपि नैव कार्यमकरोत्तथाप्यतिनिपुणो मुद्राक्षरविन्यासकारी बभूव। न केवलं शीघ्रतां प्रापदपि तु मुद्रायन्त्रस्य सर्वास्वपि शाखासु शिक्षणीयमशिक्षतेति ममातीवाश्चर्यम्। स किलात्मीयशक्तिं प्रति नैव सचेतन आसीदिति मे सार्वदिको वितर्कः ॥

वयं पुनरिदानीमवस्थिताः गृहाणि च सज्जस्थितानि तावदेव नूतननिर्मितानि। इमानि परित्यज्य जोहानिसबर्गप्रदेशं गन्तव्यमापतितम्। तत्र कार्यमवधानं विना चिरकालपर्यन्तं त्यक्त्वा स्थातव्यपरिस्थितिं न प्राप्तः ॥

जोहनिसबर्गप्रदेशं प्रतिनिवृत्तो मया कृतानि मुख्यपरिवर्तनानि पोलाकमहाशयमवोचम्। पुस्तकदानं तावत् फलकार्यासीदिति परानन्दमभजत्। सोऽप्यैच्छद्यथा नूतनकार्ये भागं वोढुं किं मे शक्यं स्यादिति। व्यवस्थापनं संयोक्ष्यसि चेच्छक्यमेवेत्यहमवोचम्। तेन प्रत्युक्तं यथा—अहं सज्जस्थितः प्रवेशनीयश्चेदिति ॥

तस्य निश्चयबुद्धिर्मां वशीचकार। मुख्याध्यक्षस्य पूर्वसूचनां दत्वा 'क्रिटिक' पत्रिकायाः समुत्तारितः क्रमेण 'फीनिक्स'स्थलं प्राप। स्वस्य लौकिकयुक्तिभिः सर्वेषां हृदयं निर्जित्य शीघ्रमेव कुटुंबजनो बभूव। स्वस्वभावस्तथा सरलो यथा 'फीनिक्स'स्थले जीवनं विचित्रं कष्टतरं वा न मेने। हंसाय जलमिव तस्मै तदरोचत। परन्त्वेनं तत्र चिराय स्थापयितुमशक्यमासीत्। रीचमहाशयः 'इंग्लेण्ड' देशे 'लॉ' अभ्यासं समापयितुं निरचैषीत्। अत्र मयैकेन कार्यालयभारं सोढुमशक्यमासीत्। पोलाकमहाशयस्याहमसूचयं यद्भवान्कार्यालये समायुक्तः प्रतिपुरुषत्वस्य योग्यो भवितुमर्हसीति। पर्यन्ते उभावपि कार्यान्निवृत्य 'फीनिक्स' स्थलेऽवस्थितौ भवतेत्यावाभ्यामालोचितम्। तत्तु तथा न संवृत्तम्। पोलाकमहाशयस्तथा श्रद्धालुस्वभावः यथा

Funding by IKS-MoE

मित्रे विश्वासं करोति चेत्तेन सह संमन्यते न तु चर्चां करोति। 'फीनिक्स' स्थलात्तेन लिखितं यथा–यद्यपि तत्रत्यजीविकया प्रीतस्तथाप्यद्यसुखितोऽस्मि। आश्रममूर्जितं कर्तुं मे आशा विद्यते। तथापि परित्यज्य कार्यालयमागन्तुमस्मि सज्जस्थितः। यदि प्रतिपुरुषीभवनेन योग्यता संपाद्यते यदि चास्मदुपायस्य सिद्धिर्भविष्यति शीघ्रतरमेवेति। तस्य पत्रं मनःपूर्वकमभिनन्दितम्। पोलाकमहाशये 'फीनिक्स' स्थलं परित्यज्य जोहानिसबर्गपत्तनमागत्य मया सह नियमपत्रं स्वहस्ताक्षरी चकार ॥

तस्मिन्नेव काले 'स्कॉटलेंड' देशीयो भागवतः पोलाकमहाशयमुदाहृत्य समाहूतो लेखकविशेषो भूत्वा स्थितः। तस्य नामधेयं मेकिनटायरमहाशय इति ॥

एवं 'फीनिक्स' स्थले उपायसिद्धौ प्रशंसनीयोद्देशेनागाधमगाधं गन्ता। प्रतिकूलप्रवाहे पतितः सरलजीवननामधेयेन प्रसारितया वागुरया बद्धोऽभविष्यं यदि भगवता नान्यथामतमासीत् ॥

कतिपयाध्यायानतिक्रम्य वर्णयितुं प्रवर्तेय कथमहं ममोपायान् रक्षितवान् यथा केनाप्यभ्युदयितुमशक्यमिति रीत्या ॥

द्वाविंशोऽध्यायः

देवः कं रक्षति

इदानीं मयाशा परित्यक्ता भारतदेशं पुनर्गन्तुम्। वर्षाभ्यन्तरे गृहं प्रत्यागमिष्यामीति भार्यायै वाञ्छयादायि। प्रतिवृत्त्याशां विना एकवर्षमत्यक्रामत्। पुत्रसमेतां तामानेतुं निरणैषम् ॥

दक्षिणाफ्रिकागामिन्यां नौकायां मम तृतीयपुत्रो रामदासो नौकाध्यक्षेण सह खेलाप्रसक्तः स्वबाहुं बभंज। नौकाध्यक्षस्तं पालयति स्म। नौकावैद्योऽप्यवैक्षत। रामदासः प्रक्षेपणीसमेतस्तीरमवतीर्णः। गृहप्राप्तेरनन्तरमेव केनचिदलंकर्मीणेनैव क्षतं वस्त्रयितव्यमिति नौकावैद्येनोक्तम्। अस्मिन्नेव काले मृत्तिकाचिकित्सायां मम पूर्णश्रद्धासीत्। मम दुश्चिकित्सायां श्रद्धाढ्यन् मम व्यवहारिणश्च मृत्तिकोदकमौषधं सेवितुमवोचन् ॥

रामदासस्य किमिदानीं कर्तव्यम्। स किलाष्टवर्षदेशीयः। क्षतं तवाहं चिकित्सयामि किमित्यपृच्छम्। नैव चिन्ता म इति स मन्दहासमवोचत्। तस्मिन्वयस्यात्मनः किमुत्तममिति विभावयितुं निश्चेतुं वा शक्यमासीत्। परन्तु दुश्चिकित्सायाः समुचितवैद्यचिकित्सायाश्च भेदं सम्यगजानात्। मम गृहचिकित्सायाश्च स्वभावो विदितः। मयि दृढप्रत्ययं कर्तुं श्रद्दधीत। भीतभीतः कंपमानश्च बंधनमुद्धृत्य क्षतं प्रक्षाल्य मृत्तिकालेपं दत्वा बाहुमुदबध्नम्। एवंविधं

परिवेष्टनमेकमासपर्यन्तमकारि । व्रणं संपूर्णमेव प्रशान्तम् । सामान्यरीत्या यावान्कालोऽपेक्ष्यते तावता कालेनैव प्रशाम्यतीति नौकावैद्योक्तप्रकारेणान्तरायं विना तावता कालेनैव शान्तिमागात् ॥

एतदन्यानि च परीक्षणानि गृहौषधेषु मम श्रद्धामवर्धयत् । अधिकेनात्मविश्वासेन तानि समचालयम् । मृत्तिकोदकलंघनचिकित्सां क्षतेषु ज्वरेष्वजीर्णिपांडुरोगेष्वपि चान्येष्वामयेषु विशालीकृत्य पर्यैक्षिषि । सर्वदा विजयवानभूवम् ॥

दक्षिणाफ्रिकादेशे यावान् विश्वास आसीत्तावानद्य नास्ति । अनुभवेन च प्रदर्शितं यथेमानि परीक्षणानि सुस्पष्टमपाययुक्तानीति ॥

अत्र सूचनमेषां परीक्षणानां विजयप्रतिपादनाय नाभिप्रेतम् । नास्ति मेऽधिकारः संपूर्णविजयस्य परीक्षणे । वैद्या अपि स्वपरीक्षणानां विजयस्य नाधिकुर्वते । यस्तु नूतनपरीक्षणं करोति स स्वकीयमेवारमेत । एतेन शीघ्रतरमेव सत्यं प्रकाशते । देवः सदा न्यायवर्तिनं परीक्षकं रक्षति ॥

‘ युरोपियन ’ जनेन समीपसंपर्काभ्यासेऽपायाः प्रकृतिचिकित्सायामिव गुरुतराः स्थिताः । तेऽपायास्त्वन्यविधा आसन् । परन्तु तत्संपर्काभ्यासेऽपायविषयो न मे मनस्यस्फुरत् ॥

आगत्य मया सह स्थातुं पोलाकमहाशयो मयाहूतः । एकोदरभ्रातर इवास्माभिर्निवस्तुमारब्धम् । पोलाकमहाशयस्य भाविनी भार्या कतिपयवर्षेभ्यो विवाहाय बद्धादरा परन्तु विवाहोऽनुकूलकालं यावद्विलम्बितम् । विवाहितजीवनाय व्यवस्थानतः पूर्वं धनसंग्रहं कर्तुमैच्छदिति मे भावना । मदपेक्षया साधुतरं रस्किनमहाशयस्य तत्त्वान्यजानात् । परन्तु पाश्चात्यसंबंधः रस्किनमहाशयस्य शिक्षणमभ्यासमार्गमानेतुं अन्तरायोऽभवत् । परन्त्वहं तेनोपन्यासमकरवं यथा युवयोरिव हृदयैक्ये सति धनविषयं पर्यालोच्य विवाहं विलंबयितुं न साधु । दारिद्र्यमन्तरायश्चेद्दरिद्रा अविवाहिता एव तिष्ठन्ति । मया सह स्थीयते त्वया । गृहव्ययो न प्रष्टव्यः । शीघ्रतरं विवाहः करणीय इति । गताध्याये उक्तरीत्या पोलाकमहाशयेन सह द्विवारं नैव भाष्यते । तत् क्षणमेव वध्वा सह पत्रव्यवहारमकरोत् । तदानीं सा ‘ इंग्लंड ’ देशे स्थिता । लेखनेनातिसंतुष्टाभवत् । कतिपयमासेषु जोहानिसबर्गपत्तनं प्राप्ता । विवाहाय व्ययो न प्रष्टव्यो वेषभूषादिकस्य विचार एव नास्ति । ताभ्यां धार्मिका विषया नापेक्षिताः । विवाहबन्धनस्य मुद्रा नापेक्षिता । वधूरत्र ख्रिस्तानुयायिन्यासीज्जन्मनः । पोलाक यहूदीजनः । तयोः सामान्यधर्मो नैतिकः ॥

एतद्विवाहविषये विनोदांशो वक्तव्यः । ‘ युरोपियन ’ जन-विवाहेषु लेख्यारोपकः (‘ रजिस्ट्रार ’) असितवर्णयुक्तानां विवाहं नैव लेख्यप्राप्तं करोति । ‘ युरोपियन ’ मित्रं दुर्लभ इति न । परंतु पोलाकमहाशयः सूचनां न सेहे । अतो वयं त्रयो विवाहलेख्यारोपकं

प्रति गताः। कथं ज्ञायेत यत्राहं 'साधिष्ठःपुरुषः' विवाहे पक्षयोर्गौरांगाः स्युः। विचाराय प्रवृत्तः लेख्यप्राप्तं विलंबयितुमियेष। परेद्युः भानुवार आसीत्। अनन्तरदिवसो नूतनवत्सरदिनम्। अयं च सर्वविश्रामदिवसः। सुघटितविवाहदिनं निःसारव्याजवशादन्यथाकर्तुं मनुष्यमात्रस्य दुःसहमासीत्। लेख्यारोपणविधानस्याध्यक्षं प्रधानप्राड्विवाकमहमवेदिषम्। अतस्तस्य पुरस्ताद्विवाह्ययुगलेन सह गत्वा स्थितः। दृष्ट्वा जहास। लेख्यारोपकस्य पत्रमदात्। विवाहो लेख्यारूढ आसीत्॥

अद्य यावदस्माभिः सहोषिता 'युरोपियन'जनाः पूर्वमेव मम विदिताः बभूवुः। परन्त्विदानीमपूर्वज्ञातांग्लस्त्री कुटुंबे प्रविष्टाः। नवोढयुगलेन सह मनःक्लेशप्राप्तिं न स्मरामि। यद्यपि पोलाकमहाशयस्य भार्या मम प्रीतिहीने भवेतां तथापि सुव्यवस्थितसमानकुटुम्बेषु तत्संभवति। इदं तु स्मरणीयं यन्मदीयकुटुम्बं वस्तुतो विजातीयमिति। तत्र हि नानाविधस्वभावाः सर्वविधो जने निर्यन्त्रणं प्रवेशं लेभिरे। चिंत्यमाने सजातीयविजातीययोर्भेदो मनःकल्पित एव। सर्वे वयमेककुटुम्बस्थाः॥

अस्मिन्नेवाध्याये वेस्टमहाशयस्य विवाहमपि करिष्यामि। मम जीवितस्यास्यामेवावस्थायां ब्रह्मचर्यविषयका भावना न पक्वाः संजाताः। अत एवाहं सर्वान् मम ब्रह्मचारिसुहृदो विवाहितान् कर्तुमुत्साहं ग्रहीष्यामि। यदा वेस्टमहाशयो विधिवशात्स्वपितराववलोकितुं 'लाऊथ' पत्तनं प्रति यात्रां चकार तदा यदि शक्यं स्यात्तदा विवाहितः प्रत्यागम्यतामिति बुद्धिवादमदाम्। 'फीनिक्स'स्थलं सर्वसाधारणं गृहम्। सर्वे वयं कृषीवलाः संजाता इति भाविताः। अतो विवाहात्तस्य परिणामाच्च न भीताः। वेस्टमहाशयो भार्यया सहागतः। लेसेस्टरपत्तनाद्भार्या सुंदरी युवतिश्चागता। सा नापितकुटुम्बे समुत्पन्ना। तत्र शिल्पगृहे कर्म करोति स्म। सा सुंदरीति मया भाषिता। तस्याः सौन्दर्यं च नैतिकं यन्मां चकर्ष। पारमार्थिकं सौन्दर्यं हृदयशुद्धौ वर्तते। वेस्टमहाशयेन सह तस्य श्वश्रूरप्यागता। सा वृद्धा स्त्री। अद्यापि जीवति। तस्या दृढव्यवसायः सानंदोत्साहवान् स्वभावो लज्जितानस्मान् चकार॥

यथा 'युरोपियन'सुहृदो विवाहे प्रोत्साहितवांस्तथा भारतीयसुहृदश्च स्वगृहेभ्यः स्वकुटुंबान्यानेतुं धैर्योक्तिभिः प्रेरितवान्। इत्थं 'फीनिक्स' ग्रामटिकाभूत्। षट् कुटुम्बान्यागत्यावस्थितानि। तत्र तानि ववृधिरे॥

Funding by IKS-MoE

त्रयोविंशोऽध्यायः

गृहकृत्यस्यैकं दृश्यम्

दृष्टपूर्वं हि यथा गृहव्यया गुरुतराः। लघूकरणं तेषां डरबनपत्तने प्रारभत। परन्तु जोहनिसबर्गगृहे रस्किनमहाशयस्य शिक्षामनुसृत्य कठिनतरो विमर्शः प्राप्तः॥

उत्तरवादिनो (बारिस्टर) गृहे यावल्लाघवं शक्यं तावल्लघुत्वं निवेशितम्। कतिचिदुपस्कारान् विना वर्तितुमशक्यमासीत्। परिवर्तनमाभ्यंतरिकं न पुनर्बाह्यम्। स्वतो दैहिकप्रयासान् कर्तुमिच्छा ववृधे। अत एव पुत्रानपि तदभ्यास एव परिश्रान्तान् कर्तुमारब्धवान्॥

आपूपिकादपूपक्रयणं परित्यज्य 'क्युने'महाशयस्य निर्देशानुसारेण गृहे आकिण्वापूपः कर्तुमारब्धः। सामान्यतो यंत्रपिष्टमस्य न किंचित्प्रयोजनम्। पर्यालोचितं च यद्धस्तपिष्टेनाधिकसारल्यमारोग्यं मितव्ययश्च लभ्यन्त इति। अतो हस्तयन्त्रमेकं सप्त'पौंड'मितद्रव्येण क्रीतवान्। तदेकेनैव पुरुषेण धारयितुमशक्यं द्वाभ्यां सुकरम्। पोलाकमहाशयोऽहं च पुत्राश्च प्रायेण कुर्वन्ति स्म। मम भार्या च हस्तं योजयति स्म। तस्याः कालः पाकशालाकर्मारंभात्पूर्वम्। पोलाकमहाशयस्तस्यागमनादनन्तरमस्माभिर्मिलितः। पेषणमपत्यानां बहूपयुक्तो व्यायाम आसीत्। एतद्वान्यद्वा कर्म तदुपरि न्यस्तम्। परन्तु तेषामिदं क्रीडनमिवासीत्। आयस्ताश्चेत् परित्यज्य गन्तुं स्वतंत्राः। परंत्वपत्यान्यग्रे वक्तव्यानि न कदापि मां तत्यजुः। विलंबकारिणो न स्थिता इति न। परंतु प्रायः सर्वेऽपि सोत्साहं कर्म चक्रुः। विरलाः खलु युवानस्तत्कालं कर्मत्याजका आयासवक्तारो वा॥

गृहरक्षणाय सेवक एको नियुक्त आसीत्। कुटुंबजन इवास्माभिः सहोषितवांस्तस्य कर्मण्यपत्यानि तस्य साहाय्यं कुर्वन्ति स्म। नगरपालिकासंमार्जकः रात्रिविसृष्टान्यमेध्यानि शोधयामास। परन्तु वयं भृत्यमनुक्त्वा कुटुम्बे स्वयमेव मार्जयामासिम। अत एव मम पुत्राणां मध्ये नैकोऽपि संमार्जकस्य कर्म कर्तुं प्रतिकूल आसीत्। अपि च ते सामान्यारोग्यविषये दृढीकृतबुद्धयो बभूवुः॥

जोहानिसबर्गपत्तने नैकोऽपि रुग्णः स्थितः। आमये सति रोगिणं पुत्रा मनःपूर्वकं चिकित्सयामासुः। तेषां विद्याभ्यासविषयेऽहमुदासीनः स्थित इति नाहं ब्रूयाम्। परन्तु तत्परित्याजयितुं नासीन्मे विकल्पः। अस्ति पुत्राणां ममोपर्याक्षेपकारणम्। तत्तदवसरेषु तैरिदं व्यक्तमुक्तमेव। अहमपराधीति किंचित्संमतं मे। विद्याभ्यासः कारयितव्य इति मनस्यासीत्। मयैव विद्यां शिक्षयितुं प्रयतितम्। परन्तु प्रतिवारं यः कश्चिदप्यंतरायः स्थितः। मया सह प्रत्यहं परिक्रमाय बहिर्नीताः कार्यालयं प्रति गमनं ततः प्रतिनिवर्तनमिति कोशद्वयदूरं गतागतं कारिताः।

गृहे शिक्षणाय न कोऽपि नियुक्त आसीत् । अनेन परिक्रमणेनास्माकं व्यायामाधिक्यं जातम् । परिक्रमणेष्वनन्यभावे संभाषणेन शिक्षा प्रदीयते स्म । भारतदेशस्थितं ज्येष्ठपुत्रं हरिलालमहाशयं विनेतरे सर्वेऽपि जोहानिसबर्गपत्तनेऽनया रीत्या शिक्षिताः । तेषां विद्याभ्यासायैकहोरापर्यन्तं सावकाशो यदि क्रमेण तेषामहं संपूर्णाभ्यासं कारितवान् स्यामिति मन्ये । परन्तु पर्याप्तं शिक्षणं नैव दत्तमिति तेऽहं च विषण्णाः । ज्येष्ठपुत्रो बहुधा ममाग्रे सर्वजनप्रकाशं च मुद्रायन्त्रेष्वात्मनः क्लेशं न्यरूपयत् । अन्ये पुत्रा अपरिहार्यमकारणमित्युदारभावेन स्थिताः । एतद्विषये नाहं भग्नाशः परन्तु विषादोऽयं नाहमभ्यर्हितः पितेति । अयं मे दृढः प्रत्ययो लोकसेवार्थं बालशिक्षा परित्यक्ता यद्यपि मे श्रद्धोचिता वानुचिता वा । स्पष्टमिदं वच्मि यथा न मयोपेक्षितं तदीयचारित्ररक्षणम् । सर्वस्यापि पितुरिदमवश्यकर्तव्यमिति मन्ये । मया प्रयत्ने कृतेऽपि पुत्राः प्रतिकूलं दृष्टाश्चेदस्ति मे दृढः प्रत्ययस्तदेतन्मम जागरूकताया अभावं दर्शयति परन्तूभयोः पित्रोर्लोपदोषान् व्यनक्तीति ॥

अपत्यानि न केवलं पित्रोः शारीरिकलक्षणान्यपि तु तयोर्गुणानपि प्राप्नुवन्ति । इतस्ततः संदृश्या परिस्थितिरपि प्राधान्यं वहति । यन्मूलधनं प्राप्य शिशुरारभते तत्पूर्वजैरागतं मन्तव्यम् । दृष्टा हि मया शिशवो ये पैतृकरिक्थस्य दुष्टपरिणामानुत्तीर्णाः । परिशुद्धिरात्मनः सहजो गुणः ॥

पोलाकमहाशयोऽहं च शिशूनामांग्लविद्याभ्यासः स्पृहणीयः किं वा न वेति बहुवारं चर्चायां सक्तौ स्म । अस्त्ययं मे दृढः प्रत्ययो यच्छैशवात्प्रभृति शिशूनामांग्लभाषायां वक्तुं चिंतयितुं च ये शिक्षयन्ति ते शिशुभ्यो देशाय च द्रुह्यन्ति । राष्ट्रस्य दैविकं सार्वजनीनं दायमपहरन्ति । तावन्मात्रेण लोकसेवार्थमयोग्यान्कुर्वन्ति । एतान्निश्चयान्मनसि कृत्वा मम शिशुभिः सह सर्वदा गुजरातीभाषायां व्यवहरामि । इदं पोलाकमहाशयस्य नेष्टमासीत् । तेन चिन्तितं तेषां भाविजीवनमेव दूष्यत इति । यावन्तावस्य प्रीतिविश्वासौ तावद्भ्यां तेनोक्तं यथा – आंग्लभाषा सार्वलौकिकी वाणी बाल्यात्प्रभृत्यभ्यस्ताश्चेदन्येषामुपरि जीवनमार्गे उत्कर्षं प्राप्नुयुः शिशवः । मां समाधातुमशक्तोऽभूत् । न स्मरामि यन्मम भावस्य याथार्थ्यं तदेव स्वीचकाराथवा केवलहठवादीति मां तत्याजेति । एतद्विंशतिवत्सरेभ्यः पूर्वं संबभूव । मम निश्चया अनुभवेन साकं दृढतराः संजाताः । यद्यपि मे पुत्रा विद्याभ्यासं विना नष्टमापन्नास्तथापि तैः प्राप्तं मातृभाषाया ज्ञानं तेषां देशस्य च लाभाय बभूव । नो चेद्विदेशीया अभविष्यन् । ते स्वभावतो भाषाद्वयवेदिन आंग्लसुहृदां प्रात्याहिकसंपर्कादांग्लभाषां भाषमाणा लिखन्तश्च । अपि च देश आंग्लभाषा मुख्यव्यावहारिकभाषासीत् । इति हि द्वैभाषिका आसन् ॥

चतुर्विंशोऽध्यायः

‘ झूलु ’ प्रकृतिक्षोभः

जोहानिसबर्गपत्तनेऽवस्थितोऽहमिति यदा मया चिन्तितं तदा नाहमवस्थितो वस्तुतः। शांतोऽहमिदानीं निश्वसिमीति यदा मया चिन्तितं तदानीमेवानिरीक्षितो विषयः कोऽपि समुपस्थितः। समाचारपत्रिकासु नातालदेशे झूलुजनः राजद्रोहे समुद्युक्त इति वार्तागता। झूलुजनस्योपरि न मया मत्सरो व्यूढः। नापायस्तैः कृत भारतीयजनस्योपरि। राजद्रोहविषयेऽपि संशयित आसम्। परन्तु ‘ ब्रिटिश ’सार्वभौमता जगतो योगक्षेमायेति मे विश्वास आसीत्। स्वामिभक्तिश्च तस्यानिष्टमपि भावयितुमवारयत्। राजद्रोहवार्ता तस्मान्मम निर्णयं नान्यथा कर्तुमशकत्। नातालपत्तनेऽयाचितरक्षाबलमेकमासीत्। अधिकं जनं सैन्ये प्रवेशयितुं स्वातंत्र्यमभूत्। मया क्वचित् पठितं यदेतद्बलमेव राजद्रोहं शमयितुं संचलनप्रवृत्तमिति ॥

मम नातालपत्तनस्य समीपसंपर्कत्वात्तन्नगरस्याहं नागरिक इति चिन्तितम्। देशस्याधिपतिं प्रत्यलेखिषम् यद् भारतीयसेनादलमेकं रचयितुं सज्जस्थितोऽस्म्यावश्यके सतीति। अस्त्विति तत्क्षणमेव प्रत्युक्तिरागता। तादृशः शीघ्रोऽङ्गीकारो मया न निरीक्षितः। अदृष्टवशात्पत्रस्य लेखनात्पूर्वमेवावश्यकानि सर्वाणि संविधानानि मया कृतानि। मम प्रतिज्ञा स्वीकृता चेज्जोहानिसबर्गमंदिरं विभिद्यतामिति निश्चितोऽहम्। पोलाकमहाशयस्य गृहमल्पतरं कल्पितम्। मम भार्यया तु ‘ फीनिक्स ’स्थलं गत्वा स्थातव्यम्। अस्य निश्चयस्य तदीया पूर्णा संगतिः प्राप्ता। एतादृशसंदर्भेषु सा न कदापि प्रतिकूला स्थिता। देशाधिपतेः प्रतिवचनं यदा लब्धं तदा गृहपतेरेकमासात्पूर्वं गृहत्यागसूचनां कृत्वा कतिपयसंभारान् ‘ फीनिक्स ’ स्थलं प्रति प्राहैषम्। कतिपये पोलाकवशे मुक्ताः ॥

डरबनपत्तनं गत्वा पुरुषानन्विष्टवान्। महद्दलं नावश्यकमासीत्। वयं चतुर्विंशतिस्तेषां मां मिलित्वा चत्वारो गुजरातीजना अन्ये दक्षिणभारतादागताः कर्मबद्धाः पुरुषाः स्वतन्त्र ‘ पठाण ’-जनमेकं विना ॥

मम गौरवस्थानं दत्वा कर्म च सुकरं कर्तुं वर्तमानसमयानुसारेण प्रधानवैद्याधिकारी ‘ सार्जंट मेजर ’पदे मां नियुक्तवान्। ततस्त्रीन् पुरुषानहं ‘ सार्जंट ’पदेऽन्यं ‘ कोरपोरल ’ पदे च वरयित्वा नियुज्य स्थितः। आधिशक्यात्सैन्यवेषाश्च प्राप्ताः। अस्मद्दलं प्रायः षट्सप्ताहपर्यन्तं सेवायां स्थितम्। राजद्रोहस्थानं गते मयि राजद्रोहनामपि समाधातुं न किंचिन्मया तत्र दृष्टम्। पर्यवस्थापि नासीत्। कश्चि‘ज्झूलु’प्रधानपुरुषः स्वजनस्योपरिन्यस्तं नूतनं राजकरं न प्रदेयमित्याज्ञाप्य तत्संग्रहणार्थमागतं सैनिकाध्यक्षं प्राहरत्। जनक्षोभः संजातः। अयमेव राजद्रोह

इति महत्तरीकृतः। मम हृदयं 'झूलु'जनेष्वासीत्। अग्रस्थानमागतेऽस्मत् प्रधानकार्यं क्षतस्य 'झूलु'जनस्य परिपोषणमिति श्रुत्वा सानंदोऽभवम्। वैद्योऽधिकार्यस्मान्प्राशंसयत्। तेनोक्तं यथा – गौरांगाः क्षत'झूलु'जनस्य मनःपूर्वकं धात्रीकर्म न चक्रुः। क्षतानि पूतानि भवन्ति। किंकर्तव्यमिति न जानामीति। अस्मदागमनेन देवप्रेरितेनेव संतुष्टा निष्कपटाश्च ते जनाः। स प्रादादस्माकं बंधनानि निर्विषीकरणानि। ततः कल्पितवैद्यशालां प्रत्यस्मान्निनाय। अस्मान् दृष्ट्वा 'झुलु'जनः संतुष्टः। गौरांगयोधा अस्मभ्यः पृथक् स्थिताः। छिद्रेभ्यो नः सूक्ष्ममीक्षन्ते स्म। अपि च क्षतानीमान्यदृष्टानि कुरुध्वमिति प्रेरयितुं प्रयेतिरे। अस्मान्निरवधानान् दृष्ट्वा कुपिताः 'झुलु'जनस्योपर्यश्राव्यदुर्वचनानि ब्रुवन्ति स्म॥

क्रमशः क्रमश एतैर्योधैः सह समीपतरसंपर्कं प्राप्तः। परव्यापारात्ते दूरे तस्थुः। शासकाधिकारिणां मध्ये 'कर्नल स्पार्क्स' 'कर्नल वायली' च षण्णवत्युत्तराष्टादशसाहस्रमिते वत्सरे मामेकान्ततः प्रत्यवस्थितौ। मम मनोलक्ष्यं दृष्ट्वाश्चर्यभरितौ विशेषतो मामाहूय कृतज्ञतामूचतुः। 'जनरल मेकेन्झी'महाशयेन सह ते परिचयमकारयन्। इमे सैनिकयोधा इति मा वाचकश्चिन्तयतु। 'कर्नल वायली'महाशयो डरबनपत्तने प्रसिद्धो न्यायवादी। 'कर्नल स्पार्क्स'महाशयः डरबनपुर एव मांसविक्रयिण आपणस्य स्वामी। 'जनरल मेकेन्झी'महाशयः नातालदेशस्य प्रसिद्धः कृषीवलः। एते सर्वे महाशयाः स्वयमागता युद्धे शिक्षणमनुभवं च प्राप्ताः॥

अस्मद्वशे स्थिताः क्षता जना न किल युद्धे परिक्षतास्तेषां कतिपये संशयेन गृहीता बन्द्यः। 'जनरल वान' कशाघातेन दंडितवान्। तेन घातेन व्रणाः समुत्पादिताः। एतेऽलक्षिताः पूयन्ते स्म। इतरे 'झूलु' मित्राणि यद्यप्येत आत्मानं शत्रोर्विरोधयितुं दत्तचिह्ना योधैः प्रमादेन गुलिकप्रक्षेपेण ताडिताः॥

एतत् कर्म विना गौरांगयोधेभ्यो निर्दिष्टौषधानि मिश्रीकृत्य कल्पितानि प्रदेयानि मया। 'डाक्टर बूथ'महाशयस्याल्पा या वैद्यशाला तस्यामेकवर्षपर्यन्तं शिक्षणं ममासीत्। अत एतत्सुकरमासीत्। अनेन कार्येण अनेकै'र्युरोपियन'जनैः सह समीपसंपर्को मे जातः॥

शीघ्रसंचारिगणस्य वयं बद्धाः। यत्र कुत्राप्यपायः सूचितश्चेत्तत्र चलितव्यमित्याज्ञास्मद्गणस्य। एतत्प्रायोऽश्वारूढं पादातिकं सैन्यम्। यावदस्मच्छिबिरं चलितुमारब्धं तावदस्मद्बाहूपरि रोगिप्रवहणं निक्षिप्य पादक्रमेणानुसर्तव्यमासीत्। द्वित्रवारं प्रत्यहं विंशतिक्रोशदूरं गन्तव्यमापतितम्। देवस्य सत्कर्म कर्तव्यमिति कृतज्ञोऽस्मि यत्र कुत्रापि गतः। प्रमादतः परिक्षतान् 'झूलु'स्नेहशीलान् रोगिप्रवहणेन स्कंधोपरि वहद्भिर्धात्रीव तानुपचरद्भिर्देवकार्यं निर्व्यूढम्॥

पंचविंशोऽध्यायः

हृदयमन्थनम्

‘झूलु’राजद्रोहो नवनवानुभवपूर्णश्चिन्तयितुं बहुलावकाशं ददौ । युद्धस्य भयकंपितानि यथा राजद्रोहः स्पष्टतयानीतवांस्तथा ‘बोअर’युद्धेऽपि न संबभूव । एतन्न युद्धमपि तु मनुष्याणां मृगया । न केवलमयं ममाभिप्रायः परं कृतभाषणानामांग्लजनानामपि । प्रातः प्रातः योधानां गुलिकाप्रक्षेपणे महाशब्दं शब्दस्फोटसदृशं निर्दोषग्रामटिकासु शृण्वतां तन्मध्ये निवासो दुष्करः । परंतु मया तिक्तगुलिका निगीर्णा । यतो मम गणस्य कार्यं परिक्षत‘झूलु’ जनानां परिपोषणम् । अस्मदवधानं विना ‘झूलु’जनश्चिन्तायुक्तोऽभविष्यत् । अत एतत्कार्यं मनःसुखमकरोत् ॥

मनुष्यं चिन्ताकुलं कर्तुमन्यद्बहुलमासीत् । अल्पैर्जनैरुषितो देशविभागोऽयमासीत् । शैलकंदरेषु अव्याकृता अनागरिका ‘झूलु’जनस्य विरलाः ग्रामटिकाः स्थिताः । परिक्षतैः सह वा विना वा चलन् बहुवारमगाधविचारसागरे मग्नोऽभूवम् ॥

ब्रह्मचर्यं प्रत्यालोचयं तस्य पूर्वपरिणामैः सह । मम निर्णया अगाधमूलं भेजिरे । सहकारिभिश्च चर्चामकरवम् । तदा मया न ज्ञातं कियदावश्यकं तद्भवतीति । स्पष्टमहमद्राक्षं सर्वात्मना लोकसेवां कर्तुमुत्सुकस्तद्विना नैव स्थातुमर्हति । मया क्रियमाणसेवार्थमवकाशोऽधिकाधिकमावश्यकः । अपि च कुटुंबजीवनस्य जननपोषणकृत्ययोः प्रसक्तश्चेदहं कार्यनिर्वाहशून्यो भविष्यामीति मे प्रतिभाति ॥

एकेनैव शब्देन वच्मि यथा योगी च भोगी चोभयमेकदा भवितुमशक्यमिति । वर्तमानावसरे दृष्टान्तो यदि मे भार्या शिशु-प्रसविनी स्यात्तदा कलहप्रसक्तिर्नाभविष्यत् । ब्रह्मचर्यानुष्ठानं विना कुटुंबसेवा लोकसेवा च परस्परविरुद्धौ भवतः । ब्रह्मचर्येण सह तौ समग्रसंगतौ स्तः ॥

इत्थं चिंतयभन्तिमव्रतग्रहणाय किंचिदसहमान आसम् । व्रतस्य भाविनी दृष्टिः कमप्यानंदं मानसमानिनाय । भावनापि स्वतंत्ररूपं प्राप । ततोऽपरिमितमार्गान् सेवाया उद्घाटयत् ॥

एवं यदाहं गाढविचारे परिश्रमे च निरतोऽभवं तदा प्रवृत्तिरागता राजद्रोहनिग्रहकार्यं समीपप्रायमिति । वयं सर्वे विमोचिता भविष्याम इति । एकद्विदिवसान्तरे विमोचनमागतं वयं च सर्वे गृहाणि प्राप्ताः ॥

किंचित्कालानन्तरं देशाधिपतेः सकाशाल्लेख आगतः । रोगिप्रवहणस्य सेवया तव कृतज्ञोऽस्मीति ॥

‘फीनिक्स’स्थलं प्राप्तः छगनलाल-मगनलाल-वेस्टमहाशयैरितरैश्च ब्रह्मचर्यविषये प्रस्तावमकरवम्। मनोगतं तेभ्योऽरोचत । व्रतग्रहणस्यावश्यकतामङ्गीचक्रुः । परन्तु कार्यस्य दुष्करत्वमूचुः । कतिपये धैर्येण कर्तुमुद्युक्ताः । कतिपयेऽहं जाने जयं प्राप्ताः ॥

अहमपि निमग्नः यावज्जीवं ब्रह्मचर्यं साधयितुम् । अङ्गीकर्तव्यं यत्तदैवाहमस्य प्रमाणमपरिमितत्वं च नाज्ञासिषम्। तत्कष्टान्येतस्मिन्नपि दिवसे द्रष्टुं व्यक्तीभवन्ति । व्रतस्य प्राधान्यमधिकाधिकं मनसि रूढं भवति। ब्रह्मचर्यं विना जीवनं निःसारं पशुप्रायं च प्रतिभाति। पशुः स्वभावत आत्मनिग्रहं न जानाति । मनुष्योऽस्ति मनुष्यो यतः स निग्रहे शक्तः। अस्मद्धर्मशास्त्रेषु ब्रह्मचर्यस्तुतेरतिशयोक्तिरित्यभाद्यत्तदिदानीं मे दिने दिने स्पष्टतरं प्रतिभाति सर्वमत्यंतयुक्तमनुभवसमर्थितं चेति ॥

प्रत्यक्षीकृतं मया यदाश्चर्यकरप्रभावशालिं ब्रह्मचर्यं न खलु सुलभो विषयो न चेदं शरीरमात्रसंबंधि । शारीरनिग्रहेणारंभः परन्तु न तत्रैवान्तः । सिद्धिर्यदा भवेत्तदापवित्रा मानसीवृत्तिरपि न विद्यते। पारमार्थिको ब्रह्मचारी स्वप्नेऽपि न शारीरकामं शमयितुमिच्छति। एतदवस्थाप्राप्तिपर्यंतं गन्तव्या पदवी महती वर्तते ॥

मम शारीरब्रह्मचर्यमपि दुष्करं भवति। अस्मिन् दिने सुरक्षितोऽस्मीत्यहं ब्रूयाम्। अपि त्वद्यापि मनो जेतव्यम्। मनोजय आवश्यकः। निश्चयबुद्धिः प्रयत्नो वा नास्तीति न। अनिष्टा मनोवृत्तयः कथंकारं गुप्तरीत्याक्रमणं कुर्वन्तीति चिन्तनीयम् । एतेन पृथक् पृथक् सर्वं द्रष्टव्यम्। सिद्धै ऋषिभिश्च स्वानुभवो निर्दिष्टः। परन्तु कैर्निश्चितः सार्वजनीने निर्देशो व्यधायि। सिद्धिनिर्दोषता वा दैवानुग्रहेणायाति। भगवदन्वेषकैर्मन्त्रा निर्दिष्टाः। यथा रामायणं तपःशुद्धिसमन्वितम् । भगवतः शरणागतिं विना मानसोपरि संपूर्णस्वातंत्र्यमशक्यम्। अयं धर्मशास्त्रस्य महानुपदेशः । ब्रह्मचर्यसाधनाय प्रयतमानोऽस्य याथार्थ्यं प्रतिक्षणं भावयामि । परन्तु क्लेशपरिश्रमाणां चरितस्य भागोऽग्रेतमाध्यायेषु निरूप्यते। वर्तमानमध्यायं कथं मया कार्यमारब्धमित्युक्त्वा समापयामि। उत्साहस्य प्रथमभागे सुकरं कर्तुमित्यचिन्तयम्। जीवनरीतौ प्रथमं परिवर्तनं भार्यया सहैकशय्याशयनमथवा तया सहैकान्तस्थितिः ॥

एवं ब्रह्मचर्यमेकोनविंशसाहस्रमिताब्दे यद्वा तद्वानुष्ठीयमानं षडधिकैकोनविंशतिमिते वत्सरे व्रतनियमेन बद्धोऽभूवम् ॥

षड्विंशोऽध्यायः

सत्याग्रहोदयः

जोहानिसबर्गपत्तने तथावृत्ता घटना यथेयं मे आत्मशुद्धिः सत्याग्रहात्पूर्वतराभूत् । इदानीं किल दृश्यते महात्मनो जीवनस्य मुख्यसंभवा ब्रह्मचर्यव्रतावसाना रहो मां तदर्थं मार्गे नयन्ति स्म । सत्याग्रहाख्यतत्त्वं नाम कल्पनात्पूर्वमेवागतम् । यदा तत्प्रसूतं तदाहं किमेतदिति वक्तुं नाशकम्। गुजरातीभाषायामांग्लवाण्यात्मकं 'सहनप्रतीकार' (Passive Resistance) इति वर्णयितुं रूढिरागता। 'सहनप्रतीकार' इत्यतीव संकुचितोऽर्थः। निर्बलानां शस्त्रं द्वेषनामांकितं पर्यन्ते बलात्काररूपेण प्रादुर्भावः। अहमेतानि वचनानि शङ्कमानः शृण्वन् स्थितः। भारतीयसंचालनं प्रति व्याख्येयमासीत् । स्पष्टं भारतीयजनैः स्वकलहस्य नामधेयमेकं कल्पनीयम् ॥

परंत्वहं नवनामधेयं नाज्ञासिषम्। अत एव 'इंडियन ओपिनियन'पत्रिकाद्वारा पारितोषिकमुत्तमसूचकाय देयं कृतवान्। मगनलालगांधिमहाशयेन शब्दः कल्पितः सदाग्रह इति। सतः सत्यस्य आग्रहः स्थैर्यमिति। अयं पारितोषिकं प्राप। इत्यपि स्पष्टतरं कर्तुं स एव शब्दः सत्याग्रह इति परिवर्तितः। गुजरातीभाषायां सत्याग्रह इति कलहस्य रूढिरागता ॥

एतत्कलहस्य चरितं व्यवहारयोग्यसर्वोद्देशेन दक्षिणाफ्रिकादेशे मम जीवनशेषस्यापि च सत्यशोधनस्य चरितं भवति। 'येरवडा'कारागृहे एतच्चरितस्य भूयान् भागो लिखितः। ततो मम विमोचनानन्तरं समाप्तिं गमिता। नवजीवनपत्रिकायां प्रकाशितं तदनन्तरं पुस्तकरूपेण संचालितम्। वालजीगोविंदजीदेसाईमहाशयः 'करन्ट थोट'पत्रिकायै आंग्लभाषायां परिवर्तयति। परंत्वहमांग्लभाषानुवादं पुस्तकरूपेण प्रकाशयितुं शीघ्रमेव प्रयतमानोऽस्मि। एतेन दक्षिणाफ्रिकादेशे मम मुख्यपरीक्षणान्यपेक्षायां सत्यां परिचाययेयुः। दक्षिणाफ्रिकायां मम सत्याग्रहचरितं ये न पठितवन्तस्तैरिदमवलोकनीयमिति बोधयामि। तत्र मया यदुपन्यस्तं तन्न पुनर्वर्णयामि। परन्त्वग्रे तु न कतिपयाध्यायेषु दक्षिणाफ्रिकायां निर्वृत्तात्मीयसंगतीस्तस्मिंश्चरितेन निरूपिता उदाहरिष्यामि। एतेषु कृतेषु भारतदेशे विहितान् सूचयितुं तत्क्षणमेव प्रवर्तिष्ये। यः कालक्रमानुसारमेतानि परीक्षणानि पर्यालोचयितुमिच्छति स दक्षिणाफ्रिकासत्याग्रहचरितमग्रे स्थापयितुमर्हति ॥

सप्तविंशतितमोऽध्यायः

आहारनियमान् प्रकृत्याधिकपरीक्षणानि

कायेन मनसा वाचा ब्रह्मचर्यं पालयितुमुत्सुकोऽभवम् । अधिकमपि कालं सत्याग्रहस्य विनियोज्य शौचमभ्यस्यन् तद्योग्यमात्मानं कर्तुमुत्सुकश्च संवृत्तः । अतोऽहमाहारविषयेऽन्यानि परिवर्तनानि कृत्वा भूयसे निग्रहायात्मानं लक्षीकर्तुं मार्गमानीतः । पूर्वपरिवर्तनानामुद्देश आरोग्यविषयकः । परन्तु नवपरीक्षणानि धर्मविषयकाणि ॥

मम जीवने उपवास आहारनियमश्च मुख्यतमौ । विषयवासना सामान्यतो जिह्वाचापल्येन सह वर्तते । मम विषये तथैवासीत् । मया बहवः' क्लेशा अनुभूताः कामस्य निग्रहे । अद्यापि संपूर्णविजयस्तयोः कृत इति नैव ब्रूयाम् । अहं गुरुतरो भोक्तेति मया चिन्तितम् । यत्सुहृदो मे नियन्त्रणमिति मन्यन्ते तथा तन्मे न प्रतिभाति । यद्यहं नियन्त्रणामेवं नाभ्यस्तवांस्तदा पशुभ्योऽप्यधस्तात्पतित्वाचिरान्मे गतिं प्राप्तवान् स्याम् । परन्तु मम लोपानहमज्ञासिषम् । अत एव तान्निष्कासयितुं महाप्रयत्नानकार्षम् । सफला हि प्रयत्ना यत एतान् वत्सरान् शरीरं रक्षित्वा मम कार्यभागं निवेशितवान् । मम दौर्बल्यं विजानन् समानशीलानां संपर्कमकस्मात्प्राप्तः फलाहारमेकादश्यां ग्रहीतुमथवौपवस्तुमारब्धः । अपि च जन्माष्टमीमितरकार्यविरामदिवसांश्चाचरितुमुपक्रान्तवान् ॥

फलाहारः समारब्धः । फलाहारधान्याहारयोर्मध्ये वरयितुं न किंचिदस्ति । आस्वादश्च पूर्वापरयोः शक्य इति लक्ष्यते । इतोऽप्याधिकमभ्यस्तं चेदुपवासोऽथवा कार्यविरामदिवसेषु दिनस्यैकमेव भोजनमित्यनयोर्महत्तरं प्राधान्यमदाम् । प्रायश्चित्तादिकस्य समयो यदि स्यात्तदापि संतुष्योपवासमकरवम् ॥

किन्तु लक्षितं मया शरीरं साफल्येन शोधितम् । अत आहार आस्वादनीयो जातः । बुभुक्षा च तीव्रतरा संवृत्ता । मनसि ममास्फुरद्यदुपवास नियन्त्रणेव समर्थमेकं शस्त्रं क्रियेत । अनेके तादृशा अनुभवा ममेतरेषां च दीयेरन् । अस्याश्चर्यकरविषयस्य प्रामाण्येन मम शरीरं संस्कर्तुं शिक्षयितुं च ममेष्टमासीत् । किन्त्वधुना मम प्रधानोद्देशो नियन्त्रणां साधयितुं तालु च विजेतुम् । वृतो मया प्रथममेक आहारस्ततश्चान्य इति । तस्मिंन्नेव काले द्रव्यमियदिति निश्चितम् । किन्त्वास्वादो मामनुसृतः । एकं परित्यज्य द्वितीयं गृहीतं चेदेतच्चरमं नूतनं महत्तरं चास्वादमदात्पूर्वगृहीतात् ॥

एतानि परीक्षणानि कुर्वाणस्य कतिपयसहचारिण आसन् । एषां मुख्यतमो हरमानकेलनबेकमहाशयः । दक्षिणाफ्रिकायां सत्याग्रहचरित एनं सुहृदमुद्दिश्यालेखिषम् । पुनः सा वार्ता मा भूत् । केलनबेकमहाशयः सर्वदोपवासाहारनियमेषु वा मत्सहचार्यासीत् । सत्याग्रहकलहो

यदा तीव्रतरोऽभूत्तदाहं तस्य स्थल एव तेनैव सहोषितवान्। आवामाहारविषये चर्चामकरवाव। पूर्वस्मात्परमेव हर्षप्रदमासीत्। एषः स्वभावः संभाषणं च तेषु दिवसेषु रमणीयमासीत्। इदमनुचितमिति मम नास्फुरत्। अनुभवेन शिक्षितोऽहं यदाहारास्वादस्य भाषणं वितथामिति। तालुप्रहर्षाय न भुंजीताहारम्। किन्तु शरीरपोषणाय। यथा प्रतीन्द्रियं शरीरं परिसेवते शरीरादात्मानं तस्य विशिष्टास्वादोऽदर्शनं याति। तदेव स्वभावोद्दिष्टप्रकारेण व्यापृणोति ॥

परीक्षणानां संख्यात्यल्पा महदपि महत्तरं बलिदानं स्वभावेनैकतामधिगन्तुम्। परन्तु दौर्भाग्यात्प्रवाहोऽपरदिशा बलवच्चलति। न लज्जिताः स्मो यज्जीवितत्रातं विनश्वरदेहमलंकर्तुं तस्य सत्तां कतिपयपलायमानक्षणपर्यन्तं स्थापयितुं चोपहारीकुर्मः। फलितं च यदात्मानं शरीरं च विनाशयामः। एकरोगचिकित्सायां शतमन्यानुत्थापयामः। विषयानन्दानुभवाय प्रयतमानाः पर्यन्तेऽनुभवशक्तिमपि विनाशयिष्यामः। एतत्सर्वं प्रत्यक्षमेव चलति। द्रष्टुमनिच्छन्तोऽन्धा भवन्ति ॥

तेषामुद्देशं तान्प्रतिनीतवतो भावनाप्रवाहानेवमुदाहृत्येदानीमाहारनियमान्वर्णयितुमिच्छामि ॥

अष्टाविंशोऽध्यायः

कस्तुरबाईमहाशयाया धैर्यम्

मम भार्या त्रिवारं गुरुतरव्याधिपीडिता मरणं निस्तीर्णा। गृहौषधैरेव स्वस्था बभूव। प्रथमतो रोगाक्रमणकाले सत्याग्रहश्चलति स्माथवारभमाण आसीत्। वारंवारं सा रक्तं स्रवति स्म। कश्चिद्वैद्यसुहृदस्त्रचिकित्सा कर्तव्येत्याह। सा किंचिदिव विकल्प्य संमतिं ददौ। सातीव कृशतराभूत्। वैद्यो निश्चैतन्यकरमौषधं विना शस्त्रोपचारं कृतवान्। कार्यं सिद्धमासीत्। किन्तु महती वेदना तयानुभूता। धैर्येणोत्तीर्णेत्याश्चर्यमेव। वैद्यस्तस्य भार्या च धात्री कर्मकर्त्र्यतीवसावधानावास्ताम्। एतत् डरबनपत्तने चलितम्। वैद्यो मे जोहानिसबर्गनगरं प्रतिगन्तुमनुज्ञां ददौ। रोगिविषये मा किंचिदुत्सुको भूरित्यब्रवीत् ॥

कतिपयदिनेषु गतेषु लेखः प्राप्तो यथा कस्तुरबाईमहाशयाधिकरोगिणी भवति। शय्यायामुपवेष्टुमपि कष्टतरं जातम्। एकवारमचेतनासीदिति। वैद्यस्य विदितं मम संमतिं विना मद्यं मांसं वा न देयमिति। जोहानिसबर्गगृहं प्रत्यागतं ध्वनियंत्रद्वारा गोमांसं चापानं प्रदातुमनुज्ञा दीयतामिति। अनुज्ञां न दद्याम्। परन्तु सा चेतनावस्थायामस्ति चेदपि च ग्रहीतुं संमन्यते यदि सा यथेष्टं कुर्यात्। उक्तं च वैद्येन यथा रोगिण इच्छां न ग्रहीष्यामि। ममेच्छानुसारमाहारं दातुं नानुजानीया यदि तव भार्याजीवितस्य नाहं प्रतिवचनकारी भवेयमिति।

डरबनपत्तनस्य शकटीमारुह्य तद्दिनमेव वैद्यमद्राक्षम् । स च मंदं वृत्तांतमवादीद्यथा ध्वनियंत्रद्वारा पृच्छापूर्वमेव तव भार्यायै गोमांसं चापानं च दत्तवानहमिति । पश्य वैद्य एषा किल वंचना । वंचना नैवायाति रोगिण आहारनिर्देशे । वस्तुतो वयं वैद्या रोगिणो बंधून् वा वंचयितुमेवास्मद्धर्मं मन्यामहे यदि ते न प्राणरक्षणं कुर्मः – इति निश्चितमुवाच वैद्यः ॥

अहमतीवदुःखितोऽपि असंतप्त इवासम् । वैद्यः सत्पुरुषो मम साक्षान्मित्रम् । स तद्भार्या च कृतज्ञोऽहमस्मीति जानीतः । तयोर्ध्वनितार्थं सोढुमहं नैव सज्जस्थितोऽभवम् ॥

वैद्य किमिदानीं कर्तुमिच्छसि । मम भार्यायाः मांसं गोमांसं वा दातुमनुज्ञां नैव दास्यामि मरणे संभवत्यपि । यदि सा ग्रहीतुमिच्छेत्तथास्तु ॥

तव तत्त्वज्ञानं तवैवाभिनंदनीयम् । यावत्ते भार्या मम चिकित्साधीना भवति तावन्ममेष्टानुसारेण दद्याम् । इदं भवते न रोचते यदि सान्यत्र नीयतामिति वक्तुं विषीदामि । मम गृहे तन्मरणं न द्रष्टुमिच्छामि ॥

एतत्क्षणमेवान्यत्र नीयतामिति तवेच्छा ॥

अन्यत्र गच्छत्विति कदाहमवोचम् ? स्वतंत्रां परिस्थितिमिच्छामि । तथा करोषि चेन्मम भार्याहं च तस्या यावच्छक्यं तावत्कुर्मः । अपि च तस्या विकृते सर्वचिन्तां परित्यज्य पुनः निवर्तितुमर्हसि । एतावन्मात्रं यदि त्वं न जानासि तर्हि मम स्थानादन्यत्र तां नयेति वक्तुं बलात्कृती भविष्यामि ॥

मम पुत्राणामेको मया सह स्थित इति चिन्तयामि । स्वस्य मात्रे गोमांसं चापानं च न दातव्यमिति सोऽपि संमेने । ततोऽहं कस्तूरबाईमहाशयामेतदपृच्छम् । अस्मिन्विषये समालोचयितुं सातीव निर्बलासीत् । परन्तु तथा कर्तुं मम धर्म इत्यचिन्तयम् । मम वैद्यस्य च मध्ये यद्यद्वृत्तं तदहमवोचम् । सा किल निश्चितं प्रत्याह यथा नाहं गोमांसं चापानं ग्रहीष्यामि । मनुष्यजन्मलाभ एव विरलः । अहं ते बाहुमध्ये म्रियेय न पुनर्देहं गर्ह्यद्रव्यस्पर्शेन मलिनीकुर्याम् । तया सह वादप्रवादमकरवम् । अहमनुसर्तव्य इति नास्ति निर्बन्धः । हिन्दुसुहृदः परिचिताश्च यथाविकल्पं विना मांसं मद्यं वौषधरूपेण गृह्णन्तीत्यत्रोचम् । परन्तु सा कठोरनिश्चयैतत्क्षणमेवान्यत्र नीयतामित्यवोचत् ॥

अहं संतुष्टः । किंचित् क्षोभं विना तामन्यत्र नेतुं निरचैषम् । तस्या निश्चयं वैद्यस्य न्यवेदयम् । स तु क्रुद्धो विचुक्रोश यथा कीदृशः कठिनहृदयो भवांस्तस्या वर्तमानदशायामिदं वक्तुं कुतस्त्वं न लज्जितः । वदामि त्वां तव भार्यान्यत्र नेतुमनर्हास्यामवस्थायाम् । किंचिच्चलनमपि सोढुमशक्ता सा । मार्गे यद्यपि म्रियेत तदपि नाश्चर्यम् । यदि त्वं निश्चितोऽसि तथास्तु । गोमांसं चापानं च न दास्यसि । अहं चैकमपि दिनं तां निवेशयितुं मम गृहपटलादधस्तात् संमन्येय ॥

Funding by IKS-MoE

अतस्तत्क्षणमेव स्थलं परित्यक्तुं निरचैषम्। तदा शीकरं वर्षति स्म। शकटीस्थानं स्वल्पदूरे स्थितम्। डरबनपत्तना 'फीनिक्स'स्थलं गन्तव्यम् । ततोऽवस्थानं सार्धक्रोशदूरगामिना मार्गेण प्राप्यते । असंशयमेव महान्तमपायं ग्रहीतुं मार्गः स्थितः । देवे विश्वस्य कार्यमकार्षम् । 'फीनिक्स'स्थलं प्रति संदेशमग्रे प्राहैषम् । वेस्टमहाशयेऽस्मान् शकटीस्थाने प्रेक्षेत वस्तुभिरेतैरेकादोलिकैकं शीसकमुष्णदुग्धान्वितं उष्णोदकस्यैकं चेति । कस्तुरबाईमहाशयां दोलायां वोढुं षट्पुरुषाश्च । एतान् गृहीत्वागन्तव्यमिति संदिष्टम्। अनन्तरं लोहमार्गेण तां नेतुं मनुष्यवाह्यशकटीमेकां प्राप्य तां तादृग् भयंकरदशास्थायिनीं तदंतर्निवेश्य प्रयातोऽहम् ॥

कस्तूरबाईमहाशया प्रत्याश्वासं नापैक्षत । प्रत्युत मामानंदयत् कथयन्ती न किंचिन्मम संभवति मा क्लेशितो भवेति ॥

बहुदिवसेभ्यो युक्तपोषणं विना सा चर्मास्थिमात्रशेषा स्थिता । अवस्थानस्य वेदिका सुमहत्यासीत् । मनुष्ययानमंतर्नेतुमशक्यम् । अतो लोहमार्गशकटीप्राप्तेः पूर्वं स्वल्पदूरं क्रमितुमावश्यकमासीत् । अतोऽहं बाहुभ्यां तामुद्धृत्य शकटीप्रकोष्ठे न्यवेशयम्। 'फीनिक्स'-स्थलात् दोलायां वाह्यमाना तत्र जलचिकित्सया शनैः शनैर्बलं प्राप ॥

'फीनिक्स'स्थलप्राप्तेर्द्वित्रदिनेभ्यः पश्चादेकः स्वाम्यस्मत्स्थानमागतः । वैद्यस्य बुद्धिवादो निश्चयेन तिरस्कृत इति श्रुत्वा कारुण्येनास्माभिः प्रमाणीकरणार्थमागतः । मम द्वितीयतृतीयपुत्रौ मणिलाल–रामदासौ स्वामी यदागतस्तदा तत्रोपस्थितौ । मांसाहारः शास्त्रानुज्ञात इति,-मनुस्मृतिस्तेन प्रमाणीकृता । मम भार्याया अग्रे वादकरणं मे नारोचत । प्रथमादहं तूष्णीमासम् । मनुस्मृतेः श्लोकानहमज्ञासिषम् । ते मम निर्णयाय नावश्यका आसन् । विदितं च मे केचिदिमान् श्लोकान् प्रक्षिप्तान् मेनिरे । तदभावेऽपि धर्मशास्त्रगणनां विना शाकाहारविषये मम स्वतंत्राभिप्रायः स्थितः । कस्तूरबाईमहाशयायाः श्रद्धा निष्कंपाभूत् । तस्याः शास्त्रीयमूलग्रन्था न विदिताः । परन्तु सांप्रदायिकधर्मः पूर्विकाणां पर्याप्त आसीत् । शिशवः पितुः श्रद्धानुसारिणः । अतः स्वामिनः संभाषा तैर्मन्दीकृता । परन्तु कस्तूरबाईमहाशया संलापस्य पर्यन्तं तत्क्षणमेवागमयत् । उक्तं तया यथा भवद्भिर्यद्वा तद्वा समुच्यताम् । नाहं गोमांस–चापानेन स्वस्था भवितुमिच्छामि । इतोऽप्यधिकं न वयं क्लेशनीयाः । मम पत्या शिशुभिः सह चर्चा क्रियतां यद्यपेक्ष्यते । मम मानसं निश्चितं भवतीति ॥

Funding by IKS-MoE

एकोनत्रिंशोऽध्यायः

आंतर्वेश्मिकः सत्याग्रहः

कारागृहस्य मम प्रथमानुभवोऽष्टोत्तरैकोनविंशतिसहस्रमिते संवत्सर आसीत् । बंदिभिरनुभूयमानान्यनुशासनानि ब्रह्मचारिणात्मनिग्रहमिच्छता बुद्धिपूर्वकं परिपालनीयानि । उदाह्रियते यथा – अंतिमं भोजनं सूर्यास्तमयात्पूर्वमेवेति । भारतीयाफ्रिकाबंदयः ‘चा’ अथवा ‘काफी’ नामकं पानं ग्रहीतुं नानुज्ञाताः । यदीष्टं तदा पक्काहारस्य लवणं मिश्रयेत् । परंतु ताल्वा स्वरोचमानं न किंचिद् गृह्णीयात् । कारागृहस्य वैद्योऽधिकारी शाकचूर्णं पृष्टोऽपि चाहारे पच्यमाने लवणनिक्षेपं च । स उवाच यथा – तालुसमारोचनाय यूयमत्र न स्थ । आरोग्यदृष्ट्या शाकचूर्णं नावश्यकं भवति । पचनात्पूर्वं वा पश्चाद्वा लवणमिश्रणे नास्ति व्यत्यास इति ॥

पर्यन्ते इमानि नियन्त्रणानि रूपांतरं गतानि । तच्च न गुरुतरक्लेशं विना । परन्तु द्वावपि पथ्यकरौ । बहिष्टो निवेशिताः संयमाः कदाचित् सिध्यन्ति । परन्तु यदा स्वयं निवेशितास्तदा हितकरा भवन्ति । कारागारन्मुक्तेनैव मया द्वावपि नियमावंगीकृतौ । तदा यावच्छक्यमासीत् तावत् कृत्वा पश्चाच्चापानं परित्यक्तम् । सूर्यास्तमयात्पूर्वमेव भोजनं समाप्तम् । उभयमपीदानीं करणे प्रयत्नं नापेक्षते ॥

लवणं च सर्वात्मना परित्यक्तुं समय आगतः । इदं नियन्त्रणं दशवर्षपर्यन्तं निरवाहयम् । पठितं मया कतिपयपुस्तकेषु यल्लवणं नावश्यक आहारो मनुष्यस्य प्रत्युत लवणं विना भोजनमारोग्यकरं लवणशून्याहारेण ब्रह्मचारिणः प्रयोजनमस्तीति । पठितं च दुर्बलशरीराः सातीलकं परिहरेदिति । तस्मिन्मेऽतीवाभिरुचिरासीत् ॥

शास्त्रोपचारादनन्तरं स्वल्पकालं स्वस्था ,कस्तूरबाईमहाशया पुनःरक्तं स्रावयितुं प्रवृत्ता । रोगश्च कठोरः प्रत्यभात् । जलचिकित्सा निष्प्रयोजनासीत् । ममौषधेषु तस्या नैव श्रद्धा । प्रतिकूला नासीत् । बहिष्टं साहाय्यं नापैक्षत । यदा मम सर्वौषधानि निष्प्रयोजनानि तद तामपृच्छं लवणं सातीलकं च परित्यजेति । न सा संमन्यते स्म यद्यपि प्रमाणग्रन्थानुदाहृत्या प्रार्थितापि । भवानप्येतानि वस्तूनि न परित्यजेत् परित्यजेति बोधितोऽपि । इत्थमवोचत् । अहं पीडितः संतुष्टश्च । संतुष्टस्तु प्राप्तोऽस्म्यवसरमिदानीं तदुपरि प्रीतिवर्षं वर्षयितुमिति । उक्तं च मया त्वं प्रमादिनी । यद्यहमस्वस्थो यदि च वैद्य इमानि वस्तूनि त्यजेति ब्रूयाद् विनाविकल्पमहं तथा कुर्याम् । किन्तु वैद्यवचनं विना एकवर्षपर्यन्तं लवणं सातीलकं चाहं परित्यजामि यदि त्वं करोषि वा न वा ॥

Funding by IKS-MoE

सा सरौक्ष्यं कंपिता महता रोषेणोच्चैर्जुघोष । यथा मां क्षन्तुमर्हसि । विदितोऽसि मम । तथापि त्वां क्रोधयुक्तमकरवम् । एतानि वस्तूनि परित्यक्तुं प्रतिजाने । किन्तु व्रतं परिह्रियताम् । इदं ममोपर्यतिकठोरं पततीति ॥

इमानि वस्तूनि परिहर्तुमत्यन्तमुत्तमं तव । एतद्विना त्वं स्वस्थतरा भवसीति न मे ईषदपि संशयः । अलाघवेन गृहीतव्रतं न निवर्तयामि । एतन्ममोपकरोति । नियन्त्रणायामपि यत्प्रेरयति तत्पथ्यकरं मनुष्याणाम् । मामेकमभ्यनुजानीष्व । तदेतन्मे परीक्षणं भवति । तव निश्चयं निर्वाहयितुं तव नैतिकाधिकारः ॥

अतो मां परित्यक्तवत्युक्तं च तया यथा त्वं हठवादी कस्यापि त्वं न शृणोषीत्युक्त्वा नेत्रांबूनि ववर्ष ॥

इदमेकं सत्याग्रहमिति गणयितुमिच्छामि । तदेतदतिमधुरं जीवनस्मरणमिति मन्ये ॥

तदनन्तरं कस्तूरबाईमहाशया अतिशीघ्रं स्वस्थीभवितुं प्रवृत्ता । लवणशून्यसातीलकाहारस्वीकारेण वा तदाहारेऽन्यपरिवर्तनेन वा जीवितनियमानुष्ठाने मम जागरेण वा कार्योत्पन्नमनःप्रहर्षेण वा यद्येवं तदा कियत् प्रमाणमिति वक्तुं न शक्यते । सा शीघ्रमेव स्वस्था बभूव । रक्तस्रावो निवृत्तः । दुश्चिकित्सकोऽहमिति प्रथा वृद्धिमगात् ॥

नूतनप्रत्यादेशैरहं स्वस्थतरो जातः । परिव्यक्तवस्तूनि न मया पुनरपेक्षितानि । एकं वर्षं वेगतो जगाम । ममेन्द्रियाणि निर्जितान्यासन् । आत्मनियन्त्रणायेच्छा वृद्धिमागता । वस्तुभ्यः परिवर्जनमहाभारतदेशस्य पुनः प्राप्तिपर्यन्तमकार्षम् । एकवारमेव द्वेऽपि वस्तुनी चतुर्दशैकोनविंशतितमे वत्सरे 'लंडन'पत्तने ग्रहीतुं प्रावर्ते । परन्तु तत्समयः कथमुभयमपि प्रतिग्रहीतुमित्यग्रेतनाध्याये वर्णयिष्यामि ॥

मम सहकारिणामनेकजनोपरि लवणशून्यसातीलकाहारपरीक्षणं दक्षिणाफ्रिकादेशे कृतम् । वैद्यप्रपंचे एतदाहारं प्रत्यभिप्रायद्वयं स्यात् । परन्तु नैतिकरूपेणाहं प्रतिजान आत्मापह्नव आत्मनेऽत्यन्तोत्तमं भवति । आत्मनियन्त्रकस्याहार आनंदासक्तमनुष्ये भिन्नः । यथा तस्य जीवनमार्गा भिन्नाः स्युः । ब्रह्मचर्यव्रताभिलाषुक आनंदजीवितमार्गानवलम्ब्य स्वकीयोद्देशमेव निहन्ति ॥

Funding by IKS-MoE

त्रिंशोऽध्यायः

आत्मनियन्त्रणामुद्दिश्य

उक्तं मया व्यतीताध्याये यथा कस्तूरबाईमहाशयाया रुग्णता ममाहारपरिवर्तनं कर्तुं कारणभूतमासीत् । एतदुत्तरकालेऽधिकपरिवर्तनानि ब्रह्मचर्यालंबनार्थं प्रवेशितानि ।।

दुग्धपरित्यागः प्रथमस्तावदेषाम् । रायचंदभाईमहोदयेन प्रथमं मया शिक्षितं यद्दुग्धं पाशवं काममुद्दीपयतीति । शाकाहारग्रन्था भावनामिमां पर्यपुष्यन् । यावन्मया ब्रह्मचर्यव्रतं न गृहीतं तावद्दुग्धलोपो मे न संमतः । पूर्वमेव मे विदितं यद्दुग्धं शरीरपोषणाय नावश्यकमिति । परन्तु त्यक्तुमिदं दुष्करमासीत् । यथा यथा क्षीरपरिवर्जनावश्यकतात्मनिग्रहार्थे वर्धमानाभवत्तदानीं ‘कलकत्ता’पत्तनात्किंचिद् वाङ्मयं मया लब्धं यत्र वर्णितमासीद्यथा गावो महिष्यश्च पालकैर्यातनां गमिताः । मदुपर्येतेनाश्चर्यकरो भावः संजातः । कॅलनबॅकमहाशयेन सह चर्चामकरवम् ।।

यद्यप्यहं दक्षिणाफ्रिकासत्याग्रहचरिते कॅलनबॅकमहाशयस्य परिचयं वाचकानां कारितवान् व्यतीताध्याये चायं तथा सूचितस्तथापि किंचिदधिकं तद्विषये वक्तव्यमिति चिन्तयामि । आवयोरकस्मात्समागम आसीत् । ‘खान’महाशयस्य सुहृदेषः । खानमहाशयोऽस्मिन्नंतर्गतां वैराग्यवृत्तिमवालोकयत । अतो मे तत्परिचयमकारयत् ।।

यदाहं तमपश्यं तदा तस्याभोगासक्तिमतिव्ययं च दृष्ट्वाश्चर्यचकितोऽभवम् । परन्त्वावयोः प्राथमिकसमागमे धर्मविषयकान्सूक्ष्मतरान् प्रश्नानपृच्छत् । आपाततो गौतमबुद्धस्य वैराग्यविषय उक्तः । आवयोः परिचयः सुहृत्त्वेन परिपाकमाप । यथैकप्रकारेण व्यचिन्तयाव । यानि परिवर्तनानि मम जीविते कृतानि तानि स्वयं करिष्यामीति जातनिश्चयोऽभूत् ।।

तस्मिन्काले स एककः प्रतिमासं द्वादशशतानि रूप्यकाणां व्ययं गृहभाटकं विना करोति स्म । इदानीं तथा सरलजीवने प्रवृत्तो यथा प्रतिमासं विंशत्युत्तरशतमेव व्यय आसीत् । मम गृहसंभेदान्मम कारागृहात्प्रथममोचनाच्चानन्तरमावां सहोषितौ । सहनिवासश्च क्लिष्टतर आसीत् । दुग्धविषयकचर्चास्मिन्काले प्रवृत्ता। कॅलनबॅकमहाशयेनोक्तं यथा वयं दुग्धस्य सदा हिंसाकरं रूपमुद्दिश्य संभाषामहे । कुतस्तन्न परित्यजामः । नावश्यकं हि तदिति । इमां सूचनामाकर्ण्य यथासुखमाश्चर्यभरितोऽभवम् । एतत्क्षणमेव दुग्धं त्यक्तव्यमिति प्रतिज्ञामकरवाव । इदं द्वादशोत्तरैकोनविंशतिशताब्दमिते वत्सरे ‘टॉलस्टॉय फार्म’स्थले संवृत्तम् ।।

एतत्प्रत्याख्यानं मां तर्पयितुं न पर्याप्तमासीत् । एतदनन्तरं फलाहारेण जीवितुं निरचैषम् । तदप्यत्यल्पमूल्यवत् । अतिदरिद्रजन इव वर्तितुं ममाशासीत् ।।

फलाहारोऽनूकूल आसीत् । न हि पाचनं संभवति । एतावान्मम प्रायश आहारो यथा— भूचणकः कदली द्राक्षा नारंगो जितवृक्षतैलमिति ।।

ब्रह्मचर्योत्सुकानां संदेश एको वक्तव्यः । यद्यपि ब्रह्मचर्याहारयोः समीपतरसंबन्धो मयोक्तस्तथापि मन एव प्रधानम् । मम मानसमशुद्धमिति ज्ञात्वा स्थितवत उपवासेन नैव शुद्धिः । आहारे विपरिणामा नैव फलिष्यन्ति । मनसः कामुकत्वं निमीलयितुं न शक्यम् । आत्मपरीक्षणं देवस्य शरणागतिरन्ते च प्रसादः । एतान्यावश्यकानि । मनःशरीरयोः समीपसंबन्धो वर्तते । कामुकं मनो भोजनविशेषं सौरस्यं च कामयते । ईदृक्परिणामं निवारयितुं नियन्त्रणान्युपवासाश्चावश्यकानीति प्रतिभाति । कामुकं मन इंद्रियनिग्रहं विना तेषां दासो भवति । अतः शरीरं सर्वदानुद्दीपकमाहारं नित्यनैमित्तिकोपवासं चापेक्षते ॥

ये त्वाहारनियंत्रणान्युपवासं च लघूकुर्वन्ति ते प्रमाद्यन्ति । सर्वस्वं ये विनियुंजेते तथैव भ्रान्ता भवन्ति । अनुभवेन शिक्षितोऽस्मि यद्येषां मनांस्यात्मनिग्रहाय प्रयतन्ते तेषामाहारनियमा उपवासश्चातीव साहाय्यकराः । वस्तुतस्तेषां साहाय्यं विना कामुकत्वं संपूर्णतया मनसो निष्कासयितुं न शक्यम् ॥

एकत्रिंशोऽध्यायः

उपवासः

यदा मया दुग्धं धान्यं च परित्यज्य फलाहारः प्रारब्ध आत्मनिग्रहाय लंघनमारब्धम् ।

अस्मिन् कॅलनबॅकमहाशयो मया समायुक्तः । यदा कदा मयारोग्यकारणेनोपवासः क्रियते स्म । आत्मनिग्रहायोपवास आवश्यक इति कुतश्चित्सुहृदः सकाशान्मया शिक्षितम् ॥

अहं वैष्णवकुटुंबे कष्टव्रताचरणं कुर्वन्त्या मातुः प्रसूत भारतदेश एकादशीतरोपवासाश्च मया क्रियन्ते स्म । परन्तु तन्मातरमनुकर्तुं पितॄन् संतोषयितुं च ॥

तदानीमुपवासप्रयोजनं न मे विदितम् । न च मे श्रद्धाभूत् । परन्तु निरूपितपूर्वः सुहृदाचरति स्म प्रयोजनं च लभते स्म । इति दृष्ट्या ब्रह्मचर्यालंबनाय तमनुकृत्यैकादश्यामुपवासमकरवम् । सामान्यतो हिन्दुजनः फलं च दुग्धं चोपवासदिन आहरति स्म । परन्तु तादृगुपवासो मया प्रत्यहं क्रियते स्म । अत इदानीमुदकमात्रं गृहीत्वा मया संपूर्णोपवासः स्वीकृतः ॥

यदा परीक्षणमिदमारब्धं तदा हिन्दुश्रावणमास मुसलमानमहाशयानां 'रमझान'-मासश्चैकदिने प्रवृत्तौ । गांधिकौटुंबिका वैष्णवव्रतं शैवव्रतं चोभयमाचरन्ति स्म । शिवदेवस्थानं विष्णुदेवस्थानं चोभयं गम्यते स्म । कुटुंबस्यैके जनाः श्रावणमासे प्रदोषमाचरन्ति स्म (सायंपर्यन्तमुपवासं) । अहमपि तथा कर्तुं प्रवृत्तः ॥

इमानि मुख्यपरीक्षणानि यदा टॉलस्टॉयस्थले स्थितास्तदा स्वीकृतानि कर्तुम् । तत्र हि कॅलनबॅकमहाशयेन मया च कतिपयसत्याग्रहिकुटुंबैः सह स्थीयते स्म । तरुणाः शिशवश्च तत्रासन् । तत्पार्श्वे एका पाठशाला स्थिता । तन्मध्ये चतुःपंच मुसलमानमहाशया आसन् । तेषां स्वधर्माचरणं कर्तुं मया प्रोत्साह्यन्ते स्म । प्रत्यहं 'निमाज' इति दैनिकप्रार्थनां ते कारयन्ति स्म । 'क्रिस्टियनपारसी'जनोऽप्यासीत् । स किल स्वकीयधर्माचरणं करोति स्म । तथा कारयितुं मम कर्तव्यमित्यहं व्यभावयम् ॥

अतोऽस्मिन्मासे 'रमझान'मासप्रयुक्तोपवासं कर्तुं 'मुसलमान'तरुणानुदसाह्यम् । मया हि निश्चितं प्रदोषमाचरितुम् । 'हिन्दुपारसीक्रिस्टियन' तरुणानेकत्र मिलितुं प्रोत्साह्यात्मसंयमनायेदमुत्तममित्यवोचम् । बहवः कृषीवला ममोक्तिमग्रहीषुः । 'हिन्दुपारसी'तरुणा 'मुसलमान'जनं प्रत्येकविषये न प्रत्याचख्युः । तन्नावश्यकमासीत् । 'मुसलमान'तरुणैः सायंकालपर्यन्तं प्रातर्भोजनाय प्रतीक्षितव्यम् । इतरे तु तथा न चक्रुः । 'मुसलमान'मित्रेभ्यः स्वाद्वन्नं सज्जीकृत्य परिवेषयितुमनुकूलास्तस्थुः । हिन्दुजना अन्ये च तरुणाः 'मुसलमान'सहवासं न चक्रुः । परेद्युः प्रातरुदयात्पूर्वं चरमभोजनं चक्रुः । वस्तुतो मुसलमानजनं विनेतरे सर्वेऽपि उदकमाजह्रुः । एषां परीक्षणानां फलितं यथोपवासप्रभावं सर्वे जज्ञिरे । तन्मध्ये तेजोमय प्रखर ऐक्यताभावोऽरोहत् ॥

टॉलस्टॉयफार्मस्थले वयं सर्वेऽपि शाकाहारिण आसन् । कृतज्ञोऽस्मि यत् सर्वे सज्जस्थिता मम चेतो मानयितुम् । 'मुसलमान'तरुणानां 'रमझान' काले भोजनलोपः संवृत्तः स्यात् । परन्तु न कोऽपि यथावृत्तमवोचत् । सन्तुष्टास्तु ते । तेषां शाकाहारः सुस्वाद आसीत् । हिन्दुतरुणा बहुवारमाश्रमे सारल्यानुसारेण शाकाहारविशिष्टान्नं तेभ्यश्चक्रुः ॥

उपवासविषयके एतदध्यायमध्ये मनःपूर्वकमेव विषयान्तरं गृहीतवान् । यत इमे हर्षप्रदाः स्मृतयो न क्वापि देया भवन्ति सारल्यं विना मदीयगुणो वर्णितः । यथा मम सहकारिणो यत्र क्वाप्युत्तमे कर्मणि मया सह निवेशयामि । उपवासस्तेषां नवोऽभवत् । परन्तु कृतज्ञोऽस्मि प्रदोष 'रमझान'उपवासद्वारा सुलभोऽभूत् । आत्मनिग्रहस्य साधनत्वेनोपवासप्रीतिमुत्पादयितुम् ॥

एवमात्मनिग्रहावकाश आश्रमस्थल उदयं प्राप । आश्रमसहवासिनः सर्वेऽप्यर्धपूर्णोपवासेऽस्मान्समायोक्तुमारभन्त । कियद्दूरं तेषां हृदयमात्मनिग्रहोऽस्पृशदिति वक्तुमशक्यम् । स्वीकरोम्यहं यदेतेन शरीरं नैतिकं मम बहुप्रयोजनमासीदिति । उपवास इतरनियमैश्च सर्वेषामेकमेव फलं न प्रसूत इत्याख्येयम् ॥

उपवास आत्मनिग्रहार्थं क्रियते चेत् पाशवं काममवरोद्धुं साहाय्यं करोति । केचिदस्माकं सुहृदः पाशवं कामं जिह्वाचापल्यं चोपवासानामनन्तरफलत्वेन समुद्दीपितं पश्यन्ति । उपवासो

व्यर्थो यद्यात्मनिग्रहाभिलाषेण निरन्तरं संयुक्तो न स्यात् । भगवद्गीताया द्वितीयाध्यायगतश्लोकोऽयमस्मिन्विषये लेखनीयः—

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्ज रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥

उपवासस्तत्सदृशो नियमश्चात्मनिग्रहस्यैकं साधनम् । किन्तु सर्वमिदं न भवति । शरीरोपवासः मानसिकौपवासेन संयुक्तो यदि न स्यात् कापट्यं विपत्तिश्च जायेते ॥

द्वात्रिंशोऽध्यायः

पाठशालाध्यापकः

एष्वध्यायेष्वहं दक्षिणाफ्रिकासत्याग्रहचरिते क्षेपेणाख्यातान् विषयान् वर्णयामीति वाचकः स्मर्तुमर्हति । यद्येवं कुर्यात्तदार्वाचीनाध्यायानां संबंधं सौकर्येण जानीयात् । यदाश्रमोभिवर्धमान आसीत्तदा बालानां बालिकानां च विद्याभ्यासाय नियमोपकल्पनमावश्यकमासीत् । तन्मध्ये 'हिन्दु मुसलमान पारसी क्रिस्टियन' बालका अपि च कतिपये हिन्दुबालिकाश्च स्थितास्तेषामर्ध्याधिकान् योजयितुं नावश्यकमित्यहमालोचयम् । वस्तुतस्तत्साध्यमपि नासीत् । यतो योग्या भारतीयाध्यापका विरलाः । उपलभ्याश्चेत् सार्धदशक्रोशदूरवर्तिस्थानात् स्वल्पवेतनाय गन्तुं नैव सज्जस्थिता भवन्ति । न चास्मान् धनप्रवाह आगच्छेत् । आश्रमस्य बहिर्भागादध्यापकानानेतुं नाहमावश्यकं मन्ये । वर्तमानविद्याभ्यासरीत्यां न मे विश्वासः । अनुभवपरीक्षणाभ्यां यथार्थमार्गं मदीयमधिगन्तुं मनस्यासीत् । एतावन्मे विदितमासीद्यद्यथार्थविद्याभ्यासः पितृभिरेवानुकूलसंदर्भेषु कर्तव्य इति । तदानीं बहिष्टं साहाय्यमत्यल्पमेव ग्रहीतव्यम् । टॉल्स्टॉय–आश्रम एकं कुटुंबकं यस्याहमेव पिता । तरुणानां शिक्षणाय यथाशक्यं प्रतिवक्तृता वोढव्या ॥

भावना तावान्निर्दोषासीत् । शैशवात्प्रभृति सर्वे तरुणजना मया सह न स्थिताः । भिन्नभिन्नप्रकारेण परिवेष्टनैश्च शिक्षिताः । तेषां धार्मिकं मतं नैकमासीत् । तरुणजनानां न्यायतः किं कुर्यां तदीयपितृस्थानमंशीकृत्यापि ॥

मानसशिक्षणस्यैव प्रथमं स्थानमदाम् । चारित्रनिर्माणं मुख्यतमम् । नैतिकशिक्षा सर्वेषामेकरूपेण दातुं शक्यते यद्यपि तेषां वयांसि शिक्षणं च भिद्यन्ते । चतुर्विंशतिहोराकालं तन्मध्ये निवासमंगीकृत्य पितेव स्थितोऽस्मि । चारित्रनिर्माणमेव तेषां विद्याभ्यासाय समुचितोऽस्ति भारः । अस्ति भारः स्थैर्येण प्रतिष्ठापितो यदि शिशवः स्वयमेव वा सुहृदां साहाय्येन वान्यत्सर्वं शिक्षेरन् ॥

परन्त्वधिकं शास्त्रिकशिक्षणस्यावश्यकता विज्ञाता। अतः ‘कॅलनबॅक–प्रागजी देसाई’ इत्यनयोः साहाय्येन कतिपयश्रेर्णारुदघाटयम् । शरीरपोषणं च मया न विस्मृतम् । इदं ते प्रात्यहिककार्यक्रमेणैव प्रापुः । यत आश्रमे सेवका नासन् । वाचनात्प्रभृति संमार्जनपर्यन्तं सर्वमपि कार्यं सहवासिभिरेव कृतम् । बहवः फलवृक्षाः प्रतीक्षणीया आसन् । कॅलनबॅकमहाशयस्योद्यानकर्मणि प्रीतिरासीत् । अस्मिन्कर्मणि तस्यानुभवो ‘गवरमेन्ट’ आदर्शोद्याने तेन प्राप्तः । सर्वेषामपि कर्तव्यमिदं पाकशालायामुद्युक्ताद्विना यदुद्यानकर्मेति । शिशूनामधिकतमो भागः प्राप्तः । स च गर्तोत्खातनं दारुपातनं भारोद्धरणं च । एतेन तेषां पर्याप्तो व्यायाम आसीत् । अतस्तेषां कर्मणि तेषां संतोष आसीत् । अतस्तेषां कार्यान्तरं वेलाश्च नावश्यकान्यासन् । नूनं तेषां कतिपये कदाचित्ते सर्वेऽप्यस्वास्थ्यव्याजेन वान्यथा वा छलेन कर्तव्यतां तत्यजुः । कदाचिन्मया तेषां कुचेष्टा उपेक्षिताः । परन्तु बहुधाहं जागरूकः । कठोरत्वं न तेषामिष्टमासीत् । परन्तु प्रतिकर्तुमुद्यतान्न स्मरामि । यदाहं कठोरस्तदा कार्यं क्रीडाकर्तुं न योग्यमित्यपन्यस्य तानाश्वासयाम । परिज्ञानं स्वल्पकालजीवि भवति । यतोऽपरे क्षणे कार्यं परित्यज्य खेलितुं गच्छन्ति । वयं कथंचित्प्रवृत्ताः । ते समीचीनं शरीरं प्रापुः । आश्रमे रुग्णता विरला । शोभनो वातः समीचीनं जलं प्राप्तकालं भोजनमिमानि प्रतिवक्तव्यानि भवन्ति ॥

कार्योद्योगशिक्षाविषये किंचिद्वक्तव्यम् । तरुणानां प्रत्येकमुपयुक्तहस्तनिर्वाह्यकार्यमध्यापयितुं ममेच्छासीत् । एतदुद्देशेन कॅलनबॅकमहाशयः ‘टेपिस्ट’मठं गत्वोपानत्करणं शिक्षित्वा प्रत्यागतः । तस्मादिदमहमशिक्षयम् । तद्ग्रहीतुं ये सज्जस्थितास्तेषां शिल्पमशिक्षयम् । कॅलनबॅकमहाशयस्य वर्धकि व्यापारानुभव आसीत् । अन्यः कोऽपि सहवासी तदजानात् । अत एकां स्वल्पश्रेणीं तत्क्षणं शिल्पेऽकार्षम् । पाचनं सर्वे तरुणा अवेदिषुः ॥

सर्वमेतत्तेषां नूतनमासीत् । क्वचिद्दिवस एते विषयाः शिक्षितव्या इति स्वप्नेऽपि तेषां न विदितम् । यतो दक्षिणाफ्रिकायां भारतीयशिशुभिर्गृहीतमेकमेव शिक्षणं ‘र’कारत्रयवेद्यं – रीडिंग-राइटिंग एरिथमेटिक–पठनं, लेखनं अंकगणितं च – ॥

‘टॉलस्टॉया’श्रमे शासनं कृतं यदध्यापका न चक्रुस्तत्र तरुणाः कर्तुं न वक्तव्या अतो यत्किंचित्कार्यं कर्तुमुक्ताश्चेदेकोऽध्यापकः सर्वदा सहकारी । तैः सह कार्यकर्ता च स्थितः । अतस्तरुणैर्यत्किंचिच्छिक्षितं संतोषेण शिक्षितं स्यात् ॥

अग्रेतनाध्यायेषु शास्त्रिकशिक्षा सौशील्यसंपादनं च निरूप्येते ॥

त्रयस्त्रिंशोऽध्यायः

अक्षरशिक्षणम्

दृष्टं हि व्यतीताध्याये व्यायामशिक्षार्थं 'टॉलस्टॉय'आश्रमे किं कृतमिति। प्रसंगाद्व्यवसायार्थं च। यद्यप्येतन्न तृप्तिकरं तथापि विनयशीलमित्येव वक्तव्यम्॥

शास्त्रिकशिक्षणं तावदधिककष्टतरो विषयः। उपपत्तिर्वावश्यकसंभारा वा मन्निकटे नासन्। प्रस्तुतविषयावगाहनाय पर्याप्तः कालोऽपि नासीत्। मया क्रियमाणं शारीरं कर्म दिनान्ते मां साकल्येन परिक्षीणावस्थमकरोत्। अतो यदा विश्रांतिरपेक्षिता तदानीमेव छात्रश्रेणीपुरस्तादवस्थिता। यदा श्रेण्यामविकलतेजसा स्थातव्यं तदा महता कष्टेन सूपविष्टेन वर्तनीयम्। प्रत्यहं प्रातःकाल आश्रमस्य कर्मणां कृते 'गृहकृत्यार्थं च विनियुज्यते स्म। अतः शालाकालो मध्याह्नभोजनानन्तरं निर्देष्टव्यमासीत्। न काचिदन्या वेला पाठशालाकार्ययोग्या। शास्त्रिकशिक्षणार्थं त्रयः पर्यायाः परिक्लृप्ताः। 'हिन्दी' 'तामिल' 'गुजराती' 'उर्दू' एतत्सर्वं शिक्षितम्। बालकानां मातृभाषया शिक्षणं कृतम्। आंग्लभाषापि शिक्षिता। गुजराती-हिन्दुबालकेभ्यः किंचित् संस्कृतं सर्वेभ्यः शिशुभ्यो मूलिकं चरितं भूगोलवर्णनं गणितं च शिक्षयितुमावश्यकमासीत्। 'तामिल-उर्दू'भाषे शिक्षयितुं मया समारंभः कृतः। अल्पं तामिलभाषाज्ञानं समुद्रयात्रासु कारागृहे च मया लब्धम्। 'पोप'महाशयस्य दिव्यं तामिलहस्तपुस्तकमतिक्रम्य न मया चलितम्। उर्दूलेखनस्य ज्ञानं एकस्मिन्नेव समुद्रयान आगतम्। भाषाज्ञानं तु 'मुसलमान' सुहृदां संपर्केणोपलब्धपरिचित'फारसी अरबी' शब्दमात्रेणासीत्। संस्कृतमहं यावदुच्चविद्यालये शिक्षितं तावन्मात्रमेव प्राप्तवान्। गुजरातीभाषापि यावत्पाठशालायामुपलब्धा तावतैव॥

ईदृशं मे मूलधनं येन कार्यं निर्वोढव्यम्। शास्त्रिकसंभाराणामकिंचनत्वेऽपि मम सहवासिन उत्तमगतिं प्रापुः। अस्मद्देशभाषासु प्रीतिरध्यापने मम श्रद्धा मम छात्राणामज्ञानं च शोभनावस्थं मां चक्रुः॥

तामिलबालकाः सर्वेऽपि दक्षिणाफ्रिकायां जाताः। अतः स्वल्पमेव तामिलभाषाज्ञानमेषाम्। न ज्ञातं तैस्तामिललेखनम्। अतो मया लेखनं व्याकरणप्रक्रियाश्चेति विषयाः शिक्षणीया आसन्। इदं तु सुकरमासीत्। तामिलसंभाषणे मां मम विद्यार्थिनः पराजयेरन्। स्थितिरेषां विदिता। आंग्लभाषानभिज्ञस्तामिलियनजनो यदा मां द्रष्टुमागतस्तदा मद्भाषणं व्याचख्युः। अहं सानंदमभवम्। यतो ममाज्ञानं विद्यार्थिभ्यो निगूहितुं न कदापि प्रयतितं मया। प्रत्येकविषयेऽपि यथास्थितोऽहं तथात्मानं तेषां प्रदर्शितवान्। अतो मम महामूर्खतायां सत्यामपि प्रीतिं गौरवं च नैवाहापयम्। 'मुसलमान'बाळकानामुर्दूशिक्षणं सुकरमासीत्। तेषां हि लेखनं विदितम्। पठने हस्तलेखने च प्रोत्साहनं मम कर्तव्यमासीत्॥

इमे तरुणा बहुधा निरक्षराः शालागमनवर्जिताश्च । परन्तु दृष्टं मया कार्यवशाद्यत्स्वल्पमेव तेषां शिक्षणीयमासीत् । तेषामालस्यात्परिहारो विद्याभ्यासस्योपरि दर्शनं चैतावद्दीक्षणीयम् । यतोऽहमनेन संतृप्तस्तद्भिन्नभिन्नवयांसो बालका भिन्नभिन्नविषयान् शिक्षमाणा एकस्मिन्वर्गे स्थिताः स्युः ॥

बहुभिः श्रुता मूलग्रन्थाः पाठ्यपुस्तकानि नापेक्षितानि । लभ्यपुस्तकानामुपयोजनं न स्मरामि । पुस्तकभारान् बालकोपरि निधातुमावश्यकता मया न दृष्टा । विद्यार्थिनः प्रामाणिकः पाठ्यग्रन्थः स्वस्याध्यापकः । पुस्तकेभ्योऽध्यापका यन्मे शिक्षयामासुस्तदिदानीं नैव स्मरामि । परन्तु पुस्तकं विना यान् विषयानशिक्षयंस्त इदानीं मम स्मृतौ वर्तन्ते ॥

कर्णापेक्षया नेत्रेभ्य एव शिशवो ग्रहीष्यन्ति स्वल्पेनैव प्रयासेन । मम बालकेन सह यत् किंचिदपि पुस्तकं पत्रात्पत्रं पठितं नाहं स्मरामि । किन्त्वनेकपुस्तकेभ्यः पठितं जीर्णीकृत्य गृहीतं स्वकीयभाषया प्रादाम् । अद्यापि तैरदः स्मर्यते इति वक्तुं शक्यम् । पुस्तकेभ्यो यत्तैः शिक्षितं तत्स्मर्तुं कष्टतरमासीत् । किन्तु यदहं मुखतः प्रादां तत्ते सौलभ्येन महता उदीरयन्ति । पठनं तेषां कष्टतरमासीत् । श्रोतुं मा पुनरानंद एव । मया शिक्षणीयविषयान्निरुत्साहकरान् कृत्वा स्थितश्चेदानंदाभावः स्यात् । प्रश्नान् प्रष्टुं प्रेरितान् श्रुत्वा कियत्तैरुपलब्धमिति प्रमाणतो जानीयाम् ॥

चतुस्त्रिंशोऽध्यायः

आध्यात्मिकशिक्षणम्

आध्यात्मिकशिक्षणं शारीरमानसिकशिक्षापेक्षयाधिकदुष्करम् । आत्मशिक्षणार्थे मया धार्मिकग्रन्था नैवावलंबिताः । विद्यार्थी स्वकीयधर्मस्य मूलतत्त्वानि जानीयात् । स्वधर्मसंस्थानां सामान्यज्ञानमावश्यकम् । अतो मया तादृशज्ञानायापि परिकल्पितम् । परंत्वयं बुद्धिशिक्षाभाग इति मे मतम् । 'टॉलस्टॉय'आश्रमस्य तरुणानां विद्याभ्यासचिन्ता यदा गृहीता ततोऽपि दीर्घकालात्पूर्वमेव विदितं यदात्मशिक्षणं नाम तदेकान्ततः स्वस्वरूपमेवेति । आत्मप्रकाशो हि चारित्रनिर्माणमपि च भगवद्ज्ञानात्मानुभवयोः संपादनाय मार्गान्वेषणं च भवति । यूनां शिक्षणभागे इदं मुख्यम् । आत्मनः परिष्कारं विना सर्वमप्यात्मशिक्षणमनुपयुक्तम् । हिंसाकरमपि स्यात् ॥

आत्मसाक्षात्कारः संन्यासाश्रमे शक्यः परन्तु सर्वेऽपि जानन्ति यदेतदमूल्यानुभवमार्गान् विलंबमाना न किलात्मसाक्षात्कारं भजन्त्यपि तु वार्धक्यं द्वितीयानुकंपनीयशैशवावस्थां भूमार-

निवासप्राप्तिम् । आसन्निमे ममाभिप्राया यदाहं शिक्षकोऽभूवमेका दशद्वादशाधिकैकोनविंशतिसहस्रमिते वत्सरे काले । परन्तु विभिन्नभाषया नोक्तं स्यात् ॥

कथमिदानीमात्मशिक्षणं दातव्यम् । बालकाः स्तोत्राणि यथा कंठे कुर्वन्ति तथाकार्षम् । नीतिशिक्षणविषयकपुस्तकेभ्यस्तदग्रेऽपठिषम् । किंत्वेतेन मे तिलशोऽपि तृप्तिर्नासीत् । यदा तैः सह संबंधो निकटतरोऽभूत् तदाहमज्ञासिषम् यदाध्यात्मिकशिक्षणं पुस्तकद्वारा न कर्तव्यमिति । यथा शारीरकशिक्षणं शरीरव्यायामतो मानसिकशिक्षणं मनोव्यवसायतः क्रियते तथाध्यात्मिकशिक्षणमप्याध्यात्मिकाभ्यासैरेव साध्यम् ॥

एतदात्मव्यवसायस्य शिक्षकस्य जीवनरीतिस्तस्य शीलं चाधारः । शिक्षको बालकानां मध्ये तिष्ठतु वा न वा स्वचारित्रस्य सूक्ष्मांशानां विषये सदा जागरूकेण भाव्यम् । परःशतक्रोशदूरवर्तिनो गुरोः स्वजीवनरीत्या स्वशिष्याणामात्मोपरि परिणामं जनयितुं शक्यम् । स्वयं मृषावादी भूत्वा स्वबालकानां सत्यवादित्वकरणे यत्नो व्यर्थः । भयशीलः शिक्षकः स्वशिष्यान् धैर्यशीलान् कर्तुमशक्तः । इन्द्रियनिग्रहस्य गंधानभिज्ञः स्वविद्यार्थिभ्यः संयमस्य मौल्यं कथं शिक्षयेत् । अतो मया मत्पार्श्ववर्तिबालकबालिकानामादर्शो प्रायेण भवितव्यमिति ज्ञातम् । एवं मम शिष्या मम शिक्षका बभूवुः । तेषामुद्देशेन वा मया साधुनार्जवसंपन्नेन च भाव्यमित्यहमशिक्षयम् । 'टॉलस्टॉय'आश्रमे शनैः शनैरहमधिकाधिकं निर्बन्धाधीनः संयमाधीनश्च यत्संजातस्तदेतेभ्यो मम शिष्येभ्य एवेति वक्तव्यम् ॥

एषामेकोऽसभ्योऽनिर्बद्धः कलहकारी चासीत् । सोऽयमेकदात्यन्तं दुःशासनोऽभूत् । एतेनाहं क्षमातीतोऽभवम् । न कदापि बालकानहं दंडयेयम् । किन्त्वतीवाहं क्रुद्धो जातः । तथापि तस्य बुद्धिवादं वक्तुं प्रयतितवान् । किंत्वसौ न चलितः । न केवलमिदं वंचयितुमपि मामयतत । ततोऽहं निकटस्थितरेखादंडमादाय तस्य बाहुं सकृदताडयम् । ताडनकालेऽहं कंपमानः स्थितः । इदं प्रायस्तेन दृष्टम् । एतत्सर्वेषां तेषां नूतनोऽनुभव आसीत् । स बालकः रुदित्वा क्षमां प्रार्थितवान् । तस्य रोदनकारणं प्रहारवेदना न हि । सप्तवर्षदेशीयो दृढकायो युवको यदीच्छेत्तदा प्रतिकारं कुर्यात् । किंत्वेतद्धिंसाया उपायोऽवलंबनीय आपतित इति दुःखितं मां वीक्ष्य मनसा ज्ञातवान् । एतद्घटनानन्तरं कदाचिदप्ययं ममाविधेयो नासीत् । परन्तु तद्वेदनार्थेऽद्यापि मे पश्चात्तापो भवति ।' तदानीं तदग्रे यन्मया प्रदर्शितं न मे आत्मशक्तिरासीत्परं मे पाशविकवृत्तिः । इयमेव मे शंका ॥

अहमस्य सर्वदा देहदंडनस्य विरोधी । ममापत्येष्वेकस्यैव देहदंडनं कृतमिति स्मरामि । अतो रेखादंडप्रयोगः साधुर्दुष्टो वेति निर्णेतुमद्यापि साध्यं न जातम् । प्रायशस्तदनुचितमासीत् । यतः क्रोधो दण्डनेच्छा च तस्य कारणमासीत् । यद्येतत्केवलं मम दुःखसूचना तर्हि तदुचितमिति गण्यते स्म । किन्तु संदर्भेऽस्मिन्नुद्देशो मिश्र आसीत् ॥

एतत्प्रसङ्गो मां रोचनाशीलं कृत्वा बालकानां समाधानायैतंदपेक्षयोत्तमं मार्गं प्रादर्शयत् । पूर्वोक्तसंदर्भे एतन्मार्गस्योपयोगः कियत्सफलः स्यादिति न जाने । स युवकः प्रसङ्गममुं केषुचिद्दिवसेषु व्यस्मरत् । अतीव यदि वर्तनं ततोऽयं प्रदर्शितवानिति न जाने । विद्यार्थिनः प्रत्युपाध्यायस्य कर्तव्यं पूर्वापेक्षया सम्यग्विदितमासीत्। एतदनन्तरं बालका बहुवारं प्रमादं चक्रुः । किंत्वहं दण्डनीतिं नानुसृतवान् । मम पार्श्वस्थितानां बालकब्रालिकानामाध्यात्मिकशिक्षणप्रयत्नेऽहमात्मबलमितोऽपि सम्यक्त्तरामवेदिषम् ॥

पंचत्रिंशोऽध्यायः

गोधूममध्यवर्ती कक्षः

मयाज्ञातपूर्वो विषयः 'टॉलस्टॉय'आश्रमे कॅलनबॅकमहाशयेन निवेदितः । यथा मया पूर्वोक्तरीत्याश्रमवर्तिनः कतिपयबालका दुष्टा अदम्याश्चासन्। एषु कतिपये स्वच्छन्दवार्तिनोऽप्यभवन् । एतैः सह मम त्रयो बालकास्तत्सदृशा इतरे च स्थिताः । एतेन कॅलनबॅकमहाशयश्चिन्ताक्रान्तः । किन्तु तस्य लक्ष्यविशेषतो मम बालका न तैर्निरंकुशबालकैः सह वर्तनस्यायुक्ततामुद्दिश्यासीत् ॥

एकदासौ कंठोक्त्या जगाद यथा युष्मदीयापत्यानि दुष्टबालकैः सह मिलन्तीति न मे रोचते । एतेनैक एव परिणामः साध्य एतेन दुःसहवासेन तेऽपि दुष्यन्तीति ॥

तदा ममायं प्रश्नः कठिनः प्रत्यभाद्वा न वा न स्मरामि । परन्तु तस्य मया एवमुक्तं स्मरामि यथा—मम पुत्राणामेषां स्वेच्छावर्तिनां बालकानां च भेदकल्पना कथम् । उभयेषामपि समाना मम प्रतिवक्तव्यता । मयाहूता एते बालका अत्रागताः । इदानीं स्वल्पद्रव्यं प्रदाय त्यक्ताश्चेत्तत्क्षणमेव जोहानिसबर्गस्थलं प्रति धावित्वा स्वेषां पूर्वमार्गमाश्रयन्ति । अत्रागमनेन वयमुपकृता इति ते तत्पालकाश्च मन्यन्ते । अत्र तैर्बहून्यनुकूलानि सोढव्यानीति भवतो मम च विदितो विषयः । परन्तु मम कर्तव्यं स्पष्टं वर्तते । मया तेऽत्र स्थापनीया एव । अतो ममापत्यैश्चावश्यमेव तैः सह वर्तितव्यम् । अपि च भवानितरबालकापेक्षया मम बालका महत्तरा इतिव्यद्यप्रभृति तैर्ज्ञातव्यमिति यद्यभिप्रेयात्तन्मा भूत् । तेषां मनसि तादृशमहत्त्वस्य भावनाया उत्पादनेन तेऽनुचितमार्गं नीयन्ते इव । इतरबालकैः सह मेलनं तेषां साधु शिक्षणं स्यात् । यतस्ते स्वयमेव सदसद्विविच्य वर्तितुं शिक्षन्ते । वस्तुतस्तेषु साधुरंशो यदि स्यात्तत्प्रभावस्तेषां सहचारिषु प्रकाशत इति कस्मान्न विश्वसनीयम् । तद्यथा वास्तां ते

Funding by IKS-MoE

बालका अत्रैव स्थापनीयाः । नास्त्युपायांतरम् । तेन क्वचिदपायसंभवेऽस्माभिरनुभवितव्यमिति ॥

कॅलनबॅकमहाशयः शिरः कंपयामास ॥

अस्य परिणामो दुष्टो बभूवेति न वक्तुं शक्यते । वस्तुतस्तेषां क्वचिल्लाभः संजात इति मम स्पष्टं भवति । तेषु स्वयं महत्तरा इति भावनायाः छायापि चेदभविष्यत्तल्लोपं गत्वा इतरबालकैः सहवासं शिक्षन्ते स्म । एतेन ते शीलशिक्षणस्य लक्ष्यीकृत्य परीक्षिता बभूवुरिव । साधुबालकान् दुष्टबालकानां सहवासे निवेश्य शिक्षाप्रदानेन तेषां न कापि परीक्षतिर्भवित्रीति एतत्सदृशानुभवैर्मम गोचरमायातम् । परन्त्वेतादृशकर्मण्यङ्गीकृते बालकानां मातापितरे ज्येष्ठाश्च तानतिजागरूकतया द्रष्टुमर्हन्ति ॥

एतेन कदलीफलराशिमध्ये प्ररूढा बालका मोहदूरा दोषरहिताश्च भवन्तीत्येतन्न नित्यसिद्धम् । परन्तु भिन्नभिन्नप्रकारेण प्रवर्तमाना बालकबालक्यः सहैव शिक्षणं दीयमाना यदा भवन्ति तदा तन्मातापितरः शिक्षकाश्चात्यन्तकठिनपरीक्षाया लक्ष्यीभूता भवन्तीति सत्यम् । तैः सदा जागरूकैर्भवितव्यम् ॥

षट्त्रिंशोऽध्यायः

उपवासः प्रायश्चित्तरूपः

बालकान् शिशूंश्च युक्तमार्गेण पुरस्तादानीय तेषां शिक्षाप्रदानं नाम कियद्दुष्करमिति मम दिने दिने स्पष्टतरं प्रत्यभात् । यद्यहं वस्तुतस्तेषां शिक्षकः पालकश्च भवेयं यदि मया तेषां हृदयं प्रवेष्टव्यम् । तेषां सुखदुःखेषु भागिना भवितव्यम् । तेषां पुरोवर्तीनि कार्याणि विधातुं साहाय्यं प्रदातव्यम् । तदीययौवनस्याशाप्रवाहं योग्यभूमौ नेतव्यम् ॥

यदा सत्याग्रहिणां कतिपये कारागृहाद् विमुक्तास्तदा ‘ टॉलस्टॉय ’आश्रमः प्रायशो निर्जन एवाभूत् । तत्रत्यानां बहवः ‘ फीनिक्स ’आश्रमवर्तिन आसन् । अतस्तानहं ‘ फीनिक्स ’-आश्रमं प्रेषितवान् । अत्राहमुग्रपरीक्षांतरागतः । मया ‘ जोहानिसबर्ग–फीनिक्स ’स्थलयोर्मध्ये गतागतं क्रियमाणमापतितम् । एकदा जोहानिसबर्गवर्तिनो ममाश्रमवासिनां द्वयोर्नीतिपतनस्य वृत्तांत आगतः । सत्याग्रहयुद्धे पराजयः प्राप्त इव भवतीति वार्तायामपि नाहं त्रस्तोऽभविष्यम् । परन्त्विदं श्रुत्वा ममोपरि वज्रपातोऽभवदिव । तद्दिनमेवाहं अग्निरथसंचलितयानेन फीनिक्स-आश्रमं प्रति प्रस्थितः । कॅलनबॅकमहाशयो मया सहागमिष्यामीति साग्रहमुवाच । ममैकस्यैव गमनं तस्मै नारोचत । यतो मम बुद्धिभ्रमणस्य कारणीभूतप्रवृत्तिमिमामानीतवान् स एषः ॥

मार्गे मम कर्तव्यं मम स्पष्टमासीत् । अथवा स्पष्टमासीदिति मया चिन्तितम् । स्वस्य पोषणायामथवा कार्यविक्षणे स्थितबालकस्य प्रमादस्यास्ति स्वयं किंचिदपि प्रतिवक्तव्यता इति मम प्रत्यभात् । अतोऽस्मिन्सन्दर्भे मम बाध्यता मम स्फटिकमिव स्पष्टमासीत् । मम भार्या ममैतद्विषये पूर्वबोधं दत्तवती । किन्त्वहं विश्वसनीयस्वभावस्तां गमनं नानिनाय । तस्मिन् प्रमादे ये भागिनस्ते मम खेदं स्वदोषस्यागाधतां च यदा मनसि चक्रुस्तेषां प्रमादकृते प्रायश्चित्तांगीकार एक एव मार्ग इति मे प्रत्यभात्। अतोऽहमेकसप्ताहमुपवासं ततः परं सार्धं चतुर्मासानेकवारमेव भोजनं कर्तुं प्रतिज्ञामकरवम्। कॅलनबॅकमहाशयो मां निवारयितुं प्रायतत। किन्तु तत्सफलं नासीत् । पर्यन्ते सोऽप्येतत्प्रायश्चित्तस्य युक्ततां स्वीकृत्य स्वयमपि मया सह भागी भवितुं हठमकरोत्। तस्य सुविमलप्रेमबलं प्रति वोढुं न शक्यमासीत् ॥

एतन्निश्चयेन मम मनोभारश्चिंतां च बहुधाल्पीबभूवतुः । कृतापराधानामुपरि यो मम क्रोधः शांतिमागत्य तेषां विषये निष्कलं करुणायाः स्थानमदात् । इत्थं बहुशः शांतचित्तो भूत्वा ‘फीनिक्स’आश्रममहं प्राप्तः । पुनर्विमृश्य मया ज्ञातव्यविषयानितरानप्यज्ञासिषम् ॥

मम प्रायश्चित्तेन सर्वेपि दुःखिता इत्येतत्सत्यम् । किन्तु तत्रत्यवातावरणं निर्मलीचकार । पापकार्यानुष्ठानं कियद्भयंकरो विषय इति प्रत्येकोऽपि जज्ञे । तत्रत्यबालबालिकाभिः सह ममोपवेशनस्य संबंधो नैजो निकटश्च बभूव ॥

अस्यां घटनायामेवांकुरितप्रसंगादहमितः स्वल्पदिनानन्तरं चतुर्दशदिवसोपवासांगीकार आपतितः । इतो भावी परिणामो मम निरीक्षामतिक्रांत आसीत् ॥

यदा यदा स्वशिष्याः प्रमाद्यन्ति तदा तदोपवासकरणं शिक्षकस्य कर्तव्यमिति एताभिर्घटनाभिः साधनं ममाशयो न भवति । किन्तु केषुचित् संदर्भेष्वयं कटुः कषाय एव भेषजमिति ममाभिप्रायः । किन्त्वस्य दृष्टिसौष्ठवमाध्यात्मिकयोग्यता च भवेतामेव । गुरुशिष्ययोर्नैज-प्रेमाभावे विद्यार्थिनः पापकृत्यं यदा शिक्षकस्यांतःकरणं न प्रविशति शिष्यस्य गुरौ भक्त्यभावे चोपवासो न युक्तः । तादृशसंदर्भे तेन हानिरपि संभवेत् । यद्यप्येवमुपवासानां साफल्यविषये संशयस्यावकाशो भवति तथापि शिष्यस्य दोषाणां शिक्षकस्य प्रतिवक्तव्यतां प्रति तिलशोऽपि संदेहो नास्ति ॥

प्रथमप्रायश्चित्तमस्मासु कस्यापि दुःसहं न प्रत्यभात् । मम दैनंदिनचर्यास्तु न किंचित्कार्यं प्रति रोद्धव्यमासीत् । एतत्प्रायश्चित्तस्यावसानपर्यन्तं मया केवलं फलान्येव सेव्यन्ते स्मेति वाचकानामवबोधं नेतुं शक्यम् । द्वितीयोपवासस्य चरमभागे कष्टतरमासीत् । तदानीं मया रामनाम्नो महिमा न ज्ञातः । कष्टसहनशक्तिरपि स्वल्पैवासीत् । अपि च ममोपवास-कलाज्ञानमपि मम नासीत् । तत्रापि विशेषतः उदकमसह्यमस्वादु यद्यपि स्यादधिकं पातव्यमिति मया न ज्ञातम् । अपि च प्रथमोपवासः सुलभो दृष्टः । अतो द्वितीयस्य विषयेऽजागरूक

आसम्। तद्यथा प्रथमोपवासे प्रतिदिनमहं ‘क्युनि’क्रमप्रकारेण मया स्नानं क्रियते स्म। द्वितीयोपवासे द्विन्दिनेभ्यः परमहमेतत्स्नानं त्यक्तवान्। उदकपानं तदरुचिकरं वमनकारकं च दृष्ट्वा तदतीवाल्पमकरवम्। कंठः शुष्को ध्वनिश्च क्षीणो भूत्वा पर्यन्ते केवलं श्वासेन भावितुमिव शक्त आसम्। तथापि लेखने आवश्यके सति लेखयित्वा मम कार्यं निर्वाहयिताभवम्। रामायणप्रभृतिपवित्रग्रन्थान् श्रुतानकरवम्। अत्यगत्यविषयान्प्रति विचारं कृत्वाभिनंदितुं पर्याप्तचैतन्यमपि मय्यासीत् ॥

सप्तत्रिंशोऽध्यायः

गोखलेदर्शनार्थम्

दक्षिणाफ्रिकासंबंधिन्यः स्मृतयो मया त्याज्या एव। चतुर्दशोत्तरैकोनविंशतिमिते वत्सरे सत्याग्रहयुद्धावसाने मया ‘लंडन’द्वारा स्वदेशमागम्यतामिति आज्ञापत्रमागतम्। अतः कस्तुरबाईमहाशया कॅलनबॅकमहाशयोऽहं च ‘जुलाई’मासे स्वदेशं प्रति प्रयाताः ॥

सत्याग्रहयुद्धकालेऽहं तृतीयश्रेण्यां प्रयातुमारब्धवान्। अतोऽहमेतत्प्रयाणस्यापि तृतीयश्रेणीप्रयाणानुज्ञापत्रं क्रीतवान्। परन्त्वेतत्संचारपथस्य नौकायां तृतीयश्रेणीपांथानां विहितसंविधानस्य भारतदेशस्य समुद्रतीरे संचरनौकासु तत्रत्यबाष्पसंचालितयानेषु वैतच्छ्रेणीप्रयाणिकानां लभ्यसौकर्यस्यापि विद्यते महान् भेदः। भारतवर्षे प्रयाणे तावदुपवेष्टुमपि पर्याप्तस्थलं न लभ्यते। शयनस्य तु का कथा। शुचित्वं चाल्पम्। किन्तु यदा वयं लंडनं प्रति यातास्तदा पर्याप्तस्थलमासीत्। निर्मलं चासीत्। अपरं च नौकासंस्थाजनेन प्रत्येकमस्माकमनुकूलानि परिकल्पितानि। अस्मदर्थे प्रत्येकं शौचकूपः स्थितः। यतो वयं फलाहारिणस्ततो द्राक्षाप्रभृतिफलानि प्रदेयानीति नौकाकार्याधिपतिराज्ञप्त आसीत्। सामान्यतस्तृतीयश्रेणीप्रयाणिकानां फलप्रदानमपूर्वम्। एतैः सौकर्यैर्वयं नौकायामष्टादशदिनानि सुखमयापयाम ॥

अस्मिन् प्रयाणे प्रवृत्ताः कतिचिद्घटना लेखनीयाः। कॅलनबॅकमहाशयाय द्विनेत्रयंत्राणि बह्वरोचन्त। तन्निकटे मूल्यवती एकद्वि द्विनेत्रयन्त्रे आस्ताम्। अनयोरेकस्य विषये प्रत्यहं चर्चा क्रियते स्म। एतन्निक्षेपणमस्माभिः साधनीयसरलजीवनस्यादर्शप्रतिकूलमिति द्रढयितुं मया प्रयतितम्। अस्मद्वादप्रवादा एकस्मिन्दिने ग्रस्थानमापुः। शालिकायाः पार्श्वछिद्रसमीपे सद्यस्थिता वयम्। इदमस्मन्मध्ये कलहकारणीभूतं स्यात्। अतः समुद्रे प्रक्षिप्य सर्वं समापयिष्यामः—इत्युक्तं मया। निश्चितमेव पापिष्ठं वस्तु प्रक्षिप्यतामिति कॅलनबॅकमहाशयोऽ-

Funding by IKS-MoE

चोचत् । अयं मे निश्चितोऽभिप्राय इत्युक्तं मया । ममाप्येवमिति शीघ्रमेव प्रत्युत्तरमायात् । अहं तत्क्षणमेव समुद्रे विक्षिप्तवान् । तस्य मूल्यं प्रायः सप्त‘ पौंड ’मितम् । तस्य मूल्यं नहि तस्य क्रये स्थितम् । किन्तु कॅलनबॅकमहाशयस्य तद्वस्तुनि मोहस्तादृशः । वस्तु नष्टमिति ततः परं स नैव विषसाद ॥

आवयोर्मध्ये संभवद्वृत्तानामयमेकः ॥

प्रत्यहमेवं किंचिन्नूतनं शिक्षणीयमासीत् । यत उभावपि सत्यमार्गे चलितुं प्रयतमानावभूव । सत्यमार्गे चलितः क्रोधः स्वार्थपरतो द्वेष इत्यादिकं स्वभावतो नश्यति । अन्यथा सत्यमुपलब्धुमशक्यमेव । कामोपहतो मनुष्यः शोभनमनस्को भवेत् । वाचि सत्यवांश्च स्यात् । किन्तु न कदापि सत्यं लघयते । सफलं सत्यान्वेषणं रागद्वेषसुखदुःखेत्यादिद्वंद्वसमूहाद्विमुक्तं भवेत् ॥

यदा प्रयाणमंगीकृतं तदा ममोपवाससमाप्तेश्चिरकालो नासीत् । ममाद्यापि मम सामान्यशक्तिर्नागता । व्यायामेन बुभुक्षोत्पादनाय नौकावेदिकायां परिक्रमं कुर्वाण आसम् । किन्त्वयं व्यायामोऽपि मम शक्तिमतिक्रान्त आसीत् । जंघापिण्डे दुःखं वर्तते स्म । ‘लंडन’पत्तनं यदा प्राप्तस्तदेयं वेदना नाल्पीयसी बभूव किन्त्वधिकैवासीत् । तत्र मे डॉ. जीवराज-मेहतामहाशयस्य परिचयोऽभूत् । तस्य मया कृतमुपवासं जंघावेदनोत्पत्तिं च न्यवेदयम् । भवता पूर्णविश्रांतिः स्वीकार्या । नो चेत्तव जंघा पूर्णमेव हीयेतेति सोऽवोचत् ॥

दीर्घोपवासादात्मनःशक्तिं पुनः संपादयितुं नातुरो भवेत् । किन्तु बुभुक्षां नियन्त्रयेत् । अधिकजागरूकता प्रायोऽधिकनिग्रहश्चावश्यकावुपवासनिवृत्तौ उपवासकरणापेक्षया । ‘ मदीरा’-पत्तने श्रुतमस्माभिर्यत्क्षणमात्रेण महायुद्धं संभवेदिति । आंग्लजलसंधौ प्रविष्टैः श्रुतं संग्राम आरब्ध इति । वयं किंचित्कालं स्थापिताः । कुल्यायां सर्वत्र प्रसारित ‘गुलिका’खनिस्पर्शं विना नौकां नेतुं दुष्करो व्यापारः । साउधेम्पटनपत्तनं प्राप्तं प्रायो दिनद्वयमासीत् ॥

‘ ऑगस्ट’मासस्य चतुर्थदिने युद्धघोषणा संवृत्ता । ‘ लंडन’पत्तनं वयं षष्ठदिवसे प्राप्ताः ॥

अष्टत्रिंशोऽध्यायः

संग्रामे मम भागित्वम्

‘ इंग्लेंड ’देशं प्राप्तस्य मे विदितमासीद्यद् गोखलेमहाशयः आरोग्यलाभकारणात् ‘ पेरिस ’-पत्तनं गत्वा तत्रोत्कूलितः स्थितो भवतीति । ‘ पेरिसलंडन ’पत्तनयोः संसर्गस्य

Funding by IKS-MoE

विच्छिन्नत्वात् कदा प्रतिनिवर्तत इति ज्ञातुं न शक्यमासीत् । तमदृष्ट्वा गृहं गन्तुं न मयापेक्षितम् । परन्तु कदा प्राप्स्यतीति न कोऽपि निश्चितं वक्तुमशकत् ॥

अत्रान्तरे किं मया कर्तव्यम्? युद्धसंबंधे किं मया विधातव्यम्? कारागृहे मम सहवास्यपि च सत्याग्रही 'सोराबजी-अडाजणीयामहाशयस्तदा 'लंडन'पत्तने ब्यारिष्टर-परीक्षार्थमधीते स्म । अत्युत्तमसत्याग्रहिष्वयमेक आसीत् । अयं दक्षिणाफ्रिकां प्रतिनिवर्तनानन्तरं मम स्थानमंगीकर्तुमुद्दिश्य 'ब्यारिष्टर्' भवितुं प्रेषितः । डॉ. प्राणजीवनमहेतामहाशयोऽस्य सर्वव्ययं वहति स्म । 'इंग्लेंड'देशे विद्याभ्यासं कुर्वाणैः डॉ. जीवराजमहेतामहाशयप्रभृतिभिः संभावनं कृतवान् । तेषां सर्वेषां सूचनामंगीकृत्य 'ब्रिटिश' द्वीपवर्तिनां भारतीयानां सभामेकां परिकल्प्य तस्याः सभाया ममाभिप्रायं न्यवेदयम् ॥

'इंग्लेंड'देशवर्तिनो भारतीया युद्धे स्वीयभागं वोढुमर्हन्तीति मम प्रतिभाति स्म । आंग्लविद्यार्थिनः सैन्यं प्रवेष्टुं स्वयमेव पुरस्तादायान्ति स्म । भारतीयजनैस्तन्न्यूनं न करणीयमिति ममाभिप्राय आसीत् । एतादृशतर्कस्य बहव आक्षेपाः प्रत्यभिहिता यथा भारतीयाः क्व । आंग्लेयाः क्व । वयं दासास्ते स्वामिनः । स्वामिनः संकटप्राप्तौ दासः कथं साहाय्यं कुर्यात्? स्वातंत्र्यमपेक्षमाणो दासः स्वस्वामिनः संकटकाले स्वबंधविमोचनं कर्तुं न किमर्हति इति वादं चक्रुरमी । तदायं तर्को मम मनसे नारोचत । भारतीयस्यांग्लेयस्य च महत्त्वे व्यत्यासो मया ज्ञातः । परंतु तेऽस्मान् दास्यस्थितौ निहितवन्त इति न मे मतमासीत् । अस्याः परिस्थितेः 'ब्रिटिश'राज्यपद्धतिमुक्त्वा कतिपया'ब्रिटिश'अधिकारिणः एव कारणभूता इति तेऽस्माभिः प्रेम्णा परिवर्तनीया इति च मम प्रतिभाति स्म । 'ब्रिटिश'तनस्य सहायसहकारैर्वयमस्मत्परिस्थितिमुत्तमां कर्तुमिच्छास्ति चेत्तेषां कष्टकाले साहाय्यं कृत्वा तत्साहाय्यं लब्धुमस्मत्कर्तव्यमिति ममाभिप्राय आसीत् । यद्यपि तदीयराज्यपद्धतिर्दोषयुता स्याद्यथा सेदानीं मे दृश्यते तथा मे सहनातीता न दृष्टा परन्त्वद्य मे तत्पद्धतौ विश्वासो नष्टो भूत्वा मम ब्रिटिशराज्येन सह कर्तुमसंमतौ तदा न केवलमस्यां पद्धतावपि त्वधिकारिष्वपि । विश्वासाभावं प्राप्ताः ते सुहृदः कथं सहकारं कुर्युः ॥

प्रतिपक्षीयाः सुहृदो भारतीयेभ्यः प्रदेयानधिकारानुद्घोषयितुं भारतीयानां परिस्थितिमुत्तमां कर्तुं चायमेव सुसमय इत्यभिप्रायं ददुः ॥

मया तावच्चिन्तितं यथा 'इंग्लेंड'देशस्यापदास्माकं लाभो मा भूत् । युद्धे प्रवर्तमानेऽस्मदधिकारेभ्यो 'ब्रिटिश'जने निर्बन्धं विना वर्तितमेव योग्यं दूरदृष्टिसंमतमिति च । अतो मम सूचनानुसारेण येषामिष्टं स्यात्तैः स्वयंसेवकैरागन्तव्यमित्याह्वानं मयादायि । बहवो जनाः स्वनामधेयानि ददुः । तत्र सर्वप्रान्तीयाः सर्वधर्मवन्तश्चासन् । एषां विषयाणामपि चास्मत्प्रार्थना-

Funding by IKS-MoE

याश्च स्वीकारात्पूर्वमेवास्माभिः शुश्रूषाक्रमे शिक्षणं लब्धव्यमिति निर्धारिते वयं तथा शिक्षिता भवितुं सज्जस्थिताः स्म इत्येतत्सर्वं निवेद्य ‘ लॉर्ड क्रू ’ महाशयं प्रति लेखमलेखिषम् ॥

प्रथमतो निर्दढा भूत्वा ततोऽस्मत्साहाय्यमंगीकृत्य साम्राज्ये संकटप्राप्ते साहाय्यं कर्तुं सज्जस्थितानामस्माकं स्वकृतज्ञतां व्यक्तीचक्रुः । स्वयंसेवकाः परिक्षतानां चिकित्साक्रमस्याभ्यासं प्रसिद्ध ‘ डॉ. केंटली ’महाशयस्य सकाशाच्छिक्षितुमारभन्त । अस्मिन्नभ्यासे षट्सप्ताहमात्रगामिन्यपि प्रथमचिकित्सायाः सर्वकार्याण्यपि अभ्यन्तरीकृत्य स्थितः ॥

अस्मदीयश्रेण्यां प्रायोऽशीतिर्जना आसन् । षट्सप्ताहेषु वयं सर्वे परीक्षिताः । एकं विना सर्वेऽप्युत्तीर्णाः । एषां राज्याधिकारेण शस्त्राभ्यासम् । इतरशिक्षणं च शिक्षयितुं कल्पयामासुः । एतस्मिन्कार्ये ‘ कर्नल बेकर ’महाशयो नियमितोऽभूत् ॥

तदानीं लंडनपत्तनस्य दृश्यमतिदर्शनीयमासीत् । जनो नहि त्रस्त आसीत् । सर्वे यथाशक्ति साहाय्यकरणे युक्ता आसन् । दृढकाया युवकाः सैनिका भूत्वा युद्धविद्यां शिक्षितुं प्रस्थिताः । किन्तु वृद्धैरशक्तैः स्त्रीभिश्च किं करणीयम् । यदीच्छाभूत्तेषामपि पर्याप्तकार्यमासीदेव । अतस्ते वस्त्रं विच्छिद्य वेषकल्पनं कर्तुमारभन्त । क्षतस्य बन्धनानि कर्तुं चौद्युक्ता बभूवुः ॥

‘ धि लाइसियम ’नाम महिलासमाजेन यथाशक्ति कर्पटसीवनभारो वोढः । श्रीसरोजिनीदेवी तत्समाजस्य सदस्यासीत् । सा उत्साहपूर्वकं तत्कार्यं कर्तुमारभत । अयमेव तया सह मे प्रथमः परिचयः । सादर्शमनुसृत्य छिन्नवस्त्रराशिं ममाग्रे स्थापयित्वा तत्सीवनं कारयित्वानेतव्य इति मामवोचत् । इमामाज्ञामहमानन्देन शिरसोढ्वा मित्राणां साहाय्येन प्रथमचिकित्साशिक्षणमध्ये मम यावन्ति साध्यानि तावन्ति वस्त्राणि सीवयित्वा दत्तवान् ॥

एकोनचत्वारिंशोऽध्यायः

धार्मिकसमस्या

इतरभारतीयैः सहाहं युद्धे सेवां कर्तुं सिद्धोऽस्मीति राज्याधिकारस्य मम नाम दत्तमिति वार्ता दक्षिणाफ्रिकादेशं यदैव प्राप तदा मम तन्त्रीसंदेशद्वयमागातेष्वेकः पोलाकमहाशयेन प्रेषितो यथा भवता कृतमिदं कार्यमहिंसातत्त्वस्य विरुद्धं न किमिति ॥

अयमाक्षेपः प्रायो मया निरीक्षितमेव । यतो मयायं प्रश्नो मम ‘ हिन्दीयस्वराज्य ’ इति पुस्तके न केवलं विमर्शितं परमयं विषयो दक्षिणाफ्रिकायां रात्रिंदिवं मित्रैः सह मया चर्चां नीयते स्म । युद्धमनीतिमयमासीदिति सर्वेषां नः संमतिरासीत् । यदाहं मम प्रहर्तुरुपरि व्यवहर्तुं

न सज्जस्थितस्तदा युद्धे प्रवेष्टुं तत्रापि मम पथा विपक्षाणां धर्माधर्मेष्वविज्ञातेषु मम संमतिः कथं प्राप्या । अहं 'बोअर'युद्धे भाग्यासमिति मम मित्राणां विदितमासीत् । परन्त्वर्वाक् ममाभिप्राय परिवर्तित इति मेनिरे ते ॥

वस्तुतः 'बोअर'युद्धे प्रवेष्टुमहं यया विचारसरण्या प्रेरितः सैवास्मिन् संदर्भेऽपि मां समादधीत । युद्धे प्रवेशोऽहिंसाधर्मस्य प्रतिकूल एवेति ममात्यन्तस्पष्टमासीत् । किन्तु स्वकर्तव्यं सदैतावत् स्पष्टतया मनुष्यस्य फणायां न लिखितम् । सत्योपासकेन बहुशोऽन्धकारे मार्गः परामर्शनीयो भवति ॥

अहिंसातत्त्वमनन्तव्यापनयुक्तं भवति । वयं हिंसायाः प्रज्वलने निपतिता निःशक्ता अनित्यजीविनः । जीवस्य जीव आहार इत्युक्तिरगाधार्था भवति । मनुष्यो ज्ञात्वा वाज्ञात्वा वा बाह्यहिंसामकुर्वन् क्षणमात्रं न जीवेत् । तस्य जीवितमेव—भोजनं पानं चलनं च हिंसात्मकं भवति । अत्यल्पे सत्यपि प्राणहानिकरं भवति । अतो यद्यहिंसोपासकस्य सर्वापि क्रियानुकंपात्मका स्यात् । सोऽयमल्पजन्तोः प्राणहानिं प्रति कारणभूतो यदि स्यात्तथा वर्तितुं यावच्छक्यं प्रयतते चेद्यदि तद्रक्षितुं यत्नं कुर्याद्यद्येवं निरंतरं हिंसाया यमपाशेन मुक्तो भवितुं परिश्राम्यति चेदयं स्वधर्मं रक्षति । स किल सदात्मनिग्रहे कारुण्यवृत्तौ च प्रवर्तते । परन्त्वयं बाह्यहिंसायाः संपूर्णमेव विमुक्तो न स्यात् ॥

अपरं चाहिंसातत्त्वस्य मूले सकलजीवस्यैक्यता यस्मात् स्थिता तस्मादेकस्य दोषः सर्वानपि स्पृशेदेव । अतो मनुष्यो हिंसासंपर्कं विनैव न खलु स्यात् । स यावत्सामाजिकवृत्तिर्भवेत्तावत्समाजस्यास्तित्वस्यैव प्राप्तहिंसायां भागी न भवितुमशक्तः । यदा जनांगद्वयं युध्यते तदाहिंसोपासकस्य कर्तव्यं युद्धस्य गतिस्तम्भः । एतत्कर्तव्यमपालयन्युद्धे न प्रतियुध्यते । युद्धे प्रतियोद्धुं योग्यताहीनः । युद्धे भागी स्यात्तथापि स्वं स्वीयं जनांगं लोकं च युद्धाद्विमुक्तान् कर्तुं मनःपूर्वकं प्रयतेत ॥

अहं 'ब्रिटिश'चक्राधिपत्यद्वारा मम मम देशस्य च परिस्थितिं भद्रतरीकर्तुमाशंसायुक्त आसम् । यदाहं 'इंग्लेंड' देशे स्थितस्तदा 'ब्रिटिश'नौकाबलस्य संरक्षणाधीन आसम् । यतोऽहमस्यायुधबलस्याश्रये स्थितस्ततस्तत्र निगूढहिंसावृत्तौ स्वतो भाग्येवासम् । अतोऽहं चक्राधिपत्यस्य संबंधमपरिवर्ज्य तस्य छत्रच्छायायां वर्तितुमिच्छेयं यद्येभ्यस्त्रिभ्यो मार्गेभ्य एको वरणीय आसीत् । युद्धं कंठघोषेण प्रतिरुध्य यावच्चक्राधिपत्यं युद्धनीतिं त्यजेत्तावत्सत्याग्रहनियमानुसारेण चक्राधिपत्यस्य बहिष्करणम् । अथवा शासनानि सविनयं भंक्त्वा कारागृहाश्रयणम् । अथवा चक्राधिपत्यपक्षे युद्धे प्रविश्य तद्द्वारा युद्धस्य हिंसाप्रतिरोधनयोग्यतायाः सिद्धतायाश्च प्राप्तिः । मय्येतद्योग्यताया अभावाद्युद्धे प्रवेशं विना नास्त्यन्यो मार्ग इति मया चिन्तितम् ॥

Funding by IKS-MoE

योद्धृणामयोद्धृणां मध्ये ममाहिंसादृष्ट्या न कोऽपि भेदः'प्रतिभाति। यदा स्तेना आक्रमणचौर्यं कुर्वन्ति तदा चोरत्रातस्य स्वयंसेवका मे वहन्ति रक्षन्ति च यदा चोराः स्वकार्यनिरता धात्रीकार्यं कुर्वन्ति च ते चोरा इव स्वयमपराधिनः। तथैव युद्धे परिक्षतान्ये निरीक्षन्ते तेऽपि युद्धापराधतो न विमुक्ता भवेयुः ॥

पोलाकमहाशयस्य तन्त्रीसंदेशात्पूर्वमहं स्वयमेवैतत्सर्वमेवं विचारितवान्। तत्प्राप्तेः स्वल्पकालेनैव ममेमानभिप्रायान् कतिपयमित्रैः सह चर्चां कृत्वा युद्धे प्रवेष्टुमग्रतोगमनमेव मम धर्म इति निरणैषम्। अद्यापि विचारसरणौ कमपि दोषं न पश्यामि। सामान्यविषये यतोऽहं सदभिप्रायवानासं ततः कृतस्य पश्चात्तापं न वहामि ॥

ममाभिप्रायो निर्दुष्ट इति तदानीमपि मम सुहृदः संमानयितुं नाहं शक्तोऽभवमिति जानामि। सातिसूक्ष्मा समस्या। ,अत्र मतभेदायास्त्यवकाशः। अतोऽहिंसायां श्रद्धालूनां तद्धर्मं जीवनस्य प्रत्येकभागेऽप्यनुसर्तुं श्रद्धायुक्तं प्रयत्नं कुर्वाणानां च ममैतं मनोविचारं यथा साध्यस्पष्टमुक्तवानस्मि। सत्योपासकः सामान्यतः शिरो विनम्य न किंचित्कार्यं करोति। स्वप्रमादं समीकर्तुं सदा सज्जो भूत्वा दोषे ज्ञाते सति यद्वा तद्वा भवत्विति संमन्य तस्य प्रायश्चित्तं तेन करणीयम् ॥

चत्वारिंशोऽध्यायः

सत्याग्रहस्य सूक्ष्मचित्रम्

यद्यप्यहं धर्मदृष्ट्या युद्धे प्रविष्टोऽदृष्टवशादहं तत्र स्वयं भागी नाभूवम्। किन्तु सत्याग्रहस्य सूक्ष्मचित्रं बलात्तादृक्कालेऽप्यर्पयितुमाहूत इव ॥

उक्तपूर्वं हि मया यदस्मन्नामानि दृष्ट्वा संमत्यांगीकृते सर्वेषामस्माकं शस्त्रशिक्षां शिक्षयितुमधिकारी कश्चिन्नियमित इति। केवलयुद्धशिक्षणस्य संबंधिविचारेषु मात्रं सोऽधिकार्यस्मत्स्वामीत्यवशिष्टविचारेष्वहमेवास्मद्दलस्य नायक इति चान्तर्नियमानां सर्वदलस्था मम प्रतिवक्तव्या इति दलेनाधिकारी व्यवहारं मन्मूलकं निर्वाहयेदिति वयं सर्वे विदितवन्तः। किन्तु सोऽधिकारी प्रथमत एव तादृग्भ्रमस्यावकाशं न ददौ ॥

सोराबजी-अडाजणीयामहाशयश्चतुर आसीत्। स इत्थं मां प्रबोधयामास। यथा -एतन्मनुष्यस्य विचारे जागरूका भवत। अयमस्मदुपर्यधिकारं चालयितुमिच्छतीति प्रतिभाति।

Funding by IKS-MoE

अस्याज्ञां वयं नापेक्षामहे। अयमस्मदीयशिक्षक इति भावयितुं वयं सिद्धाः स्मः। किन्त्वस्माकं शस्त्रशिक्षां बोधयितुं नियमिता युवका अपि स्वयमस्मदीयस्वामिन इति जानन्तीवेति ॥

एते युवका 'ऑक्सफर्ड'विश्वविद्यानिलयस्य विद्यार्थिनो बभूवुः। ते नः शिक्षणं दातुमागताः। मुख्याधिकारी तानस्मद्दलविभागानां नायकान्नियमितवान् ॥

मयाप्यधिकारिणमिति मतिक्रांतो दर्पो न दृष्टः। किन्तु सोराबजीमहाशयमलं चिंतयेति समाधातुमयते। किंत्वसौ सौलभ्येन संमन्यमानो मनुष्यो नासीत् ॥

तेन समन्दहासमुक्तं यथा – भवानतिविश्वासशीलः। एते मनुष्या दुष्टवचसा भवन्नेत्रयोर्मृत्तिकां क्षिपन्ति। पर्यन्ते भवानुन्मीलितनेत्रः सन् गम्यतां सत्याग्रहं कुर्म इत्युक्त्वा न केवलं भवानपि तु वयं च क्लेशिता भवाम इति ॥ "मम सहवासे पतितस्य क्लेशं विना किमन्यन्निरीक्ष्येत। सत्याग्रहिणां जन्मैव नेत्रयोर्मृत्तिकाक्षेपलाभाय। अधिकार्यस्मान्वंचयतु। वंचकः पर्यन्ते स्वात्मानमेव वंचयतीति परःसहस्रवारं किं मया नोक्तम् ॥"

इदं श्रुत्वा सोराबजीमहाशय उच्चैर्जहास। बाढं बाढं नेत्रयोर्मृत्तिकाक्षेपश्चलतु। एकस्मिन्दिने भवान् सत्याग्रहे मरणं प्राप्यास्मादृशानिर्भाग्यान् भवत्सहैवाकृष्य प्रयाति -इत्यवोचत् ॥

एतानि वचनानि दिवंगता 'मिस एमिली हॅाबहाउस'महाशया यन्मेऽलिखत्तन्मम स्मृतिमानयन्ति यथा सत्यस्यार्थेऽद्य वा श्वो वा वधस्थाने लुप्तशिरो भवान् भवति चेन्नाश्चर्यं भवेत्। भगवान् भवतः सत्पथं प्रदर्श्य भवन्तं पायादिति ॥

सोराबजीमहाशयेन सहायं संवादोऽधिकारिणो नियामकत्वात् स्वल्पकाल एव संवृत्तः। कतिपयदिवसेष्वेवाधिकारिणा सहास्मत्संबंधः सहनातीतः परिणतः। चतुर्दशदिनोपवासात्परं मम शरीरबलस्य यथास्थितिसंपत्तेः पूर्वमेव मया शस्त्रविद्याभ्यास आरब्धः। एतदर्थेऽनेकशो गृहान्नियतस्थानं प्रति प्रायो क्रोशदूरं पादचारेण गम्यते स्म। अनेन मम पार्श्वशूलमुत्पद्य शयने पतितोऽभवम्। एतादृशस्थितिमापन्नेन सप्ताहस्य पर्यन्ते प्रवासशिक्षणार्थं गम्यते स्म। अत्रैव सत्याग्रहसंदर्भः प्राप्तः ॥

अधिकारीं स्वस्याटोपस्य मितिमतिक्रम्य कर्तुमारभत। न केवलं युद्धस्य विचारसंबंधिविषयेष्वपि तु विषयान्तरेऽपि स्वयं याजमान्यं निश्चित्य तथा च निवेद्य स्वाधिकारस्य रुचिं दर्शयामास। सोराबजीमहाशयो मम पार्श्वमभिद्रुत्यागतः। तस्येदं निरंकुशप्रवर्तनमसह्यमासीत्। तेनोक्तं यथा–सर्वा अप्याज्ञा, मां प्रति युष्मद्द्वारैवागन्तुमर्हन्ति। वयमद्यापि शिक्षणस्य शिखरे वर्तामहे। तथापि सर्वविधा अर्थशून्या आज्ञाः कुर्वन्ति। अस्माकमपि चास्मदीयशिक्षणार्थे नियमितानां युवकानां मध्येऽनुचितभेदान् कल्पयन्ति। अस्मिन्विषये वयमधिकारिणा सह निश्चितं भाषितुमिच्छामः। नो चेत् कार्यं न चलति। अस्माभिः सहास्मदीयदलस्था भारतीयविद्यार्थिनोऽन्ये

चार्थशून्यामाशां नाङ्गीकुर्वन्ति । न च क्षमापयन्त्यात्मगौरवाय स्वीकृते कार्ये मानच्युतिसंभवेनैव सहामह इतिः ॥

अहमधिकारिणः पार्श्वमुपेत्य मम विदितानाक्षेपांस्तस्य लक्ष्यमानैषम् । तान् लिखित्वा निवेदयेति मम लेखमलिखत् । आक्षेपकैरिदानीं नियमितस्वदलविभागस्य नायकद्वारा तेषां निवेदनं युक्तो मार्गः । नायकास्ते शिक्षकाणां मुखेन मम निवेदयिष्यन्तीति तान् ब्रहीति लिखितवान् ॥

अस्य मया लिखितं यथा — कोऽप्यधिकारो मदीय इति नाहं ब्रवीमि । सैनिकानां दृष्ट्याहं सामान्ययोधान्नाधिकतरोऽस्मि किन्तु यतोऽहं स्वयंसेवकदलस्याध्यक्षस्ततोऽहमनधिकारी तदीय-प्रतिनिधिरित्यनुज्ञेयो भवामीति । प्रत्युक्तं मया । तस्मिन्नेवाहं मम लक्ष्यमानीतान् शोकान् प्रार्थनाश्च तथा च दलस्थानामभिप्रायानगणयित्वा दलविभागेषु नायकानां नियमनं बह्वतृप्तेः कारणमासीदिति च तान् पश्चादाहूय दलेन नूतननायकान् वरयितुमनुज्ञा देया किंन्त्वेतद्वरणमधिकारिणोऽनुमतिं विना न भवितव्यमित्यलेखिषम् ॥

इदमधिकारिणे नारोचत । दलविभागस्य नायकानां दलस्थैरेव वरणीयता सेनानियमभाव-स्यैव विरुद्धम् । नियमितनायकानां पश्चादाह्वानेन दलस्य बंधः शिथिलीभविष्यतीति स प्रत्यवोचत् ॥

अतो वयं सभाया मिलित्वा तत्र पश्चादागन्तव्यमिति निरधारयाम । अहं तत्रत्यानां सत्याग्रहस्य गंभीरपरिणामानवेदयम् । तथाप्यधिकारिणा निश्चितदलविभागानां नायकान् पश्चादाहूय दलस्थानामेव स्वनायकानां 'वरणायावकाशदानाभावे दलस्था इतः परं शस्त्राभ्यासं न कुर्वन्ति सप्ताहस्य पर्यन्ते प्रवासशिक्षणाय न यान्ति । एवं कर्तव्यमिति निर्णयो बहुमतेन स्वीकृतोऽभूत् ॥

अतोऽहमधिकारिणे मम सूचनां निराकृत्य तेन लिखितलेखेन मम कियदाशाभंगोऽभवदिति निवेद्य लेखमेकमलेखिषम् । अधिकारं कर्तुं न मे काप्याशा वर्तते । सेवा कर्तव्येत्येव मम प्रबलेच्छास्तीति दृढोक्तिमवोचम् । व्यतीतघटनामेकां तस्य लक्ष्यमानैषम् । बोअरयुद्धकाले दक्षिणाफ्रिकाया भारतीयानां शुश्रूषादले यद्यपि मे न कोऽप्याधिकार आसीत्तथापि मम मुख्याधिकारिणः 'कर्नल गेल्वे'महाशयस्य मध्ये सकृदप्यसमाधानस्य कारणं नासीत् । दलस्य मनो वेदितुं मामविचार्यासौ किमपि कार्यं न करोति स्मेति तमवोचम् । एतल्लेखेन सह पूर्वदिनसंध्यायां कृतनिर्णयस्य प्रतिलिपिमेकं च निक्षिप्य प्राहैषम् ॥

एतेनाधिकारिणं प्रति सत्परिणामः कोऽपि नाभूत् । सभा च निर्णयश्च महान्नियमभंग इति तस्य प्रत्यभात् ॥

ततोऽहं भारतवर्षस्योपरितनविचारकस्य सचिवस्य सर्वविषयान् विशदीकृत्य निर्णयस्य प्रतिलिपिमेकं निक्षिप्य लेखमलेखिषम् । स चोत्तरमदाद्यथा दक्षिणाफ्रिकायाः परिस्थितिर्भिन्नासीत् ।

Funding by IKS-MoE

दलविभागानां नायकान् सेनानियमप्रकारेण मुख्याधिकार्येव नियमयेत्। किन्त्वप्येतेषां निर्णयकाले मुख्याधिकारी स्वसंदेशस्याप्यवधास्यत इति ॥

इतः परमावयोरितो बहुलः पत्रव्यवहारः प्रवृत्तः। किन्तु ममेमां विषादप्रसार्क्तिं दीर्घं वर्णयितुं नेष्यते । भारतवर्षेऽस्माकं प्रात्यहिकानुभवसदृशमेवैतदप्यासीदित्युक्तेऽलमिति त्रासेन कौशलेन चाधिकार्यस्मद्दले भेदमुदपादयत् । निर्णयस्याभिमतदायकेषु कतिपयेऽधिकारिणो भयेन वा तद्वाक्यमन्दा भूत्वा वा स्ववाचोभङ्गं चक्रुः ॥

येऽधिकारिणः संमतारस्ते ‘नेटली’ रुग्णालयं जग्मुः । शेषा न यास्याम इत्यूचुः । अहं शयने निपतित आसम्। तथाप्यस्मद्दलस्थैः सह मया व्यवह्रियते स्म। उपसचिवः ‘श्रीरोबर्ट्स’-महाशयो मां द्रष्टुमागमनेन मम गौरवमकरोत्। इतरेऽपि कार्याय गन्तुं मया प्रेरणीया इति मां निरबध्नन्। एते सर्वेऽपि मिलित्वा दलांतरं भवितव्यम्। ‘नेटली’वैद्यशालायां ते तत्रत्यमुख्याधिकारिणः केवलं प्रतिवक्तव्या भवेयुः । अनेनात्मगौरवस्य हानेः संभव एव नास्ति । एतेन राज्यस्य न केवलं समाधानं भविष्यत्यपि तु वैद्यशालायां परःशतानां परिक्षतानां साहाय्यकरणोपकारः स्यादिति सूचयामासुः। अयं बुद्धिवादो मम सहवर्तिनां ममापि समीचीन इति प्रत्यभात्। अस्य फलितं च पश्चादवस्थिता अपि ‘नेटली’रुग्णालयं जग्मुः ॥

किन्त्वहमेक एव पश्चादवस्थितः शयनपतितो यद्यपि तस्यां दुःस्थितौ वर्तमानोऽपि हसन्मुखीभवितुं प्रयस्यन् स्थितः ॥

एकचत्वारिंशोऽध्यायः

गोखलेमहाशयस्यौदार्यम्

मम ‘इंग्लेंड’देशे हृदयशूलमागतमिति पूर्वमेव निवेदितम्। इतः स्वल्पदिनेषु गोखलेमहाशयः ‘इंग्लेंड’देशमागतः। कॅलनबॅकमहाशयोऽपि तत्पार्श्वे नियतमेव गच्छति स्म। अस्मत्कथालापः प्रायेण युद्धसंबंधी बभूव। कॅलनबॅकमहाशयः जर्मनीदेशस्य भूपटं सम्यगजानात्। स च ‘युरोप’खंडेऽधिकं प्रयाणमकरोत्। अत एव युद्धसंबंधीनि स्थानानि पृथक्पृथग् भूपटे दर्शयति स्म। यदा मे पार्श्वशूलमागतं तदानीं तत्प्रत्यहं चर्चासामग्री बभूव। तदानीमप्यहमाहारविषयकप्रयोगानचालयम्। भूचणकः कदलीफलं जंबीरं ‘जीतुन’तैलं ‘टमाटा’फलमपि च द्राक्षा मया भुज्यन्ते स्म। दुग्धं धान्यं दलप्रभृतींश्चाहं संपूर्णमेव पयत्यजम् ॥

Funding by IKS-MoE

डॉ. जीवराजमेहतामहाशयो मम वैद्य आसीत् । मया दुग्धं धान्यं च भोक्तव्यमिति स निरबध्नात् । परन्त्वहं न चलितः । इयं वाक् गोखलेमहाशयस्य श्रोत्रमागात् । फलानामाहार उत्तम इति यो मे वादस्तस्याधिकं गौरवं न दीयते स्म । वैद्यो मदीयारोग्यस्य कृत उक्तं सर्वमपि गृह्णीयादित्यैच्छत् ॥

गोखलेमहाशयस्य बलात्कारे सत्यकरणिः सुलभा नासीत् । न करिष्य इति न वक्तव्यमिति साग्रहमुक्त एतद्विषयमालोचयितुं चतुर्विंशतिहोरावकाशं प्रार्थितवान् । तस्मिन्दिने सायं 'कॅलनबॅकमहाशयोऽहं च गृहं प्रतिनिवर्तमानौ एतद्विषये मम कर्तव्यं किमित्यचर्चयाव । अस्मिन्प्रयोगे स मत्पर आसीत् । इदं स संमेने । तथापि ममारोग्यस्य कृतेऽवश्यं चेदस्य प्रयोगस्य परित्याग एव युक्त इत्यस्याभिमतमासीदिति मया दृष्टम् । अतो मयैकेनैव ममान्तरात्मन आज्ञानुसारेण विषयोऽयं निर्धार्यासीत् ॥

इमं विचारमालोचयन्नेव सर्वां रात्रिमयापयम् । प्रयोगस्त्यक्तव्यश्चेत्तत्संबंधे ममाभिप्रायाणां सर्वेषामपि तिलतर्पणं प्रदेयमासीत् । परन्तु तेषु मे दोषः कोऽपि न दृष्टः ॥

गोखलेमहाशयस्य प्रेमनिर्बन्धस्य कियद्दूरं वश्यो भवेयम् । आरोग्यकारणवशादयं प्रयोगः परिवर्तनीय इत्येष एव तदानींतनः प्रश्न आसीत् । पर्यन्तेऽहं प्रयोगस्योद्देशो मुख्यशो यावद्धार्मिको भवति तावत्तदनुष्ठेयं नोचेत्मिश्रभावनायां वैद्यस्य बुद्धिवादो ग्राह्य इति निरचैषम् । दुग्धस्य त्यागे धार्मिकदृष्टिरेव प्रधानाभवत् । कलकत्तापत्तनस्य गोपाला गोमहिषीभ्यो दुग्धबिंदुमप्यपावृत्य दोहनं कुर्वन्तीत्येषां दुष्टविधानानि मम नेत्रयोः स्थितानीव दृश्यन्ते स्म । अपरं च मांसं यथा मनुष्यस्याहारो न भवति गोदुग्धमपि तथेति मम प्रतिभाति स्म । अतो दुग्धत्यागसंकल्पे मया दृढेन भवितव्यमिति निश्चित्य प्रातः शयनादुत्थितोऽभवम् । एतेन मम मानसं लघुतरमासीत् । गोखलेमहाशयस्य पार्श्वं गन्तुं मम भीतिर्भवति स्म । परन्त्वयं मम संकल्पं क्षमत इति मे विश्वास आसीत् ॥

सायमहं कॅलनबॅकमहाशयश्च गोखलेदर्शनाय 'नेशनल-लिबरल-क्लब'प्रति गतौ । वैद्यस्य बुद्धिवादः स्वीकार्य इति निर्धारितं वेत्थमेव प्रथमः प्रश्न आसीत् ॥

मया नम्रतया तथापि निश्चयपूर्वकमुक्तं यथा—अहमेकं विचारं विनाशेषमपि संमन्तुं सिद्धोऽस्मिं । केवलमस्मिन्विषये नाहं निर्बंधनीय इति प्रार्थये । दुग्धं दधि नवनीतं मांसं वा न स्पृशामि । एषामग्रहणान्मम मरणे संभवत्यपि मरणमेव साधीयः प्रतिभातीति । किमयं भवतोऽन्तिमो निर्णय इति गोखले पप्रच्छ । प्रत्युक्तं यथा--ममान्यो निर्णय साध्य एव न भवतीति प्रतिभाति । एतेन भवतां दुःखं भविष्यतीति ज्ञातं मया । परन्तु किं कुर्याम् । प्रार्थये भवदीयक्षमामिति ॥

किंचिद्दु:खितस्तथाप्यत्यन्तप्रेम्णा गोखलेमहाशयो भवन्निर्धारणं मे न संमतमिति मामुक्त्वा डॉ. जीवराजमहेतामहाशयमभिमुखीभूय 'गांधि'रितो न क्लेशनीयस्तेन निर्धारितमित्यनतिक्रम्येष्टमौषधपथ्यं विधीयतामिति। वैद्यः स्वस्यासंमतिं व्यक्तीचकार। किन्त्वयं निरुपायः स्थितः। हिंगुमिश्रितो मुद्गसूपो गृह्यतामिति बुद्धिवादमदात् । संमन्य एकद्विदिनपर्यन्तं गृहीतवान्। किन्त्वनेन मम वेदना ववृधे। इत्थमिदं न युक्तमासीदिति पुनः फलाहारमारब्धवान्। वैद्यस्तावद्बाह्यचिकित्सां चालयति स्म। एतेन मम वेदना स्वल्पीयसी बभूव। किन्तु मम नियमेन तस्य हस्तो बद्ध इवासीत्॥

एतदंतरे गोखलेमहाशयो 'ऑक्टोबर'मासे 'लंडन'पत्तने हिमपातं सोढुमशक्तो भारतवर्षं प्रति न्यवर्तत॥

द्विचत्वारिंशोऽध्यायः

पार्श्वशूलस्य चिकित्सा

यतः पार्श्वशूलं न शांतं ततः स्वल्पाचिंतायाः कारणमासीत्। किंत्वौषधपातेन तन्न शाम्यति। पथ्यबाह्योपचारा एवास्य चिकित्सेति मे विदितमासीत् । शाकाहारसंबंधे प्रसिद्धो डॉ॰ 'एलिन्सन 'महाशयश्चिकित्सयितुमाहूतः। स किलाहारसुधारणया जाड्यं शमयति स्म। तस्य परिचयो मेऽशीत्यधिकाष्टशतोत्तरैकसाहस्रे संवत्सरे आसीत्। तमहं चिकित्सां कर्तुमाह्वापयम्। स मे शरीरं सूक्ष्मतया पर्यैक्षत। मया गृहीतदुग्धनिषेधव्रतं तस्य सविस्तरमाख्यातवान्। मां धीरयित्वा मा भवान् दुग्धं गृह्णातु। भवता कतिपयदिवसपर्यन्तं मेदोमयपदार्थं नैव ग्रहीतव्यमित्येव ममाभिप्राय इति सोऽब्रवीत् । अपरं चेतःपरं शुद्धकपिलापूपान् भुंक्ष्व । एतैः सह पालंगशाकमूलकपलाण्डु-कंद-हरितकेत्याद्यपक्वशाकं ग्रहीतव्यम् । नूतनफलं च विशेषतो नारंगफलानि च भोक्तव्यानि। शाकं न पाचयितव्यम्। मम चर्वितुमशक्यं चेच्चूर्णीकरणीयम्॥

दिनत्रयमिदं मयाङ्गीकृतम्। परंत्वपक्वशाकं न मे योग्यमासीत्। मम परिक्षीणशरीरं सोढुं नाशकत्। अपक्वशाकग्रहणेऽहं सकंप आसम्॥

डॉ. एलिन्सनमहाशयेन पुनरुक्तं यथा प्रकोष्ठस्य सर्वान् गवाक्षान् विवृतान्कुर्वीत। चतुर्विंशतिहोराकालमपि। मंदोष्णजले स्नातव्यम्। आकुलभागानामुपरितैलेन संवाहनं कर्तव्यम्। पंचदश वा त्रिंशद्वा निमेषान् पवने परिक्रमितव्यमिति। एताः सूचनाः सर्वा अपि मेऽरोचन्त॥

मम प्रकोष्ठस्य वृष्टिग्राहिणो गवाक्षा आसन् । 'फ्रेंच' आदर्शो गवाक्षो नाम उच्चैर्गवाक्षः । अस्य कवाटानि पुटीकर्तुं शक्यते । बहिर्गन्तुमन्तरागन्तुं चोपयुज्यन्ते । पूर्णतया विवृतं चेद् वृष्टिरन्तरपतिष्यत् । उपरितनो व्यजनगवाक्षो विवरीतुं नायाति । अतोऽहं तस्य पवनमन्तश्चलितुमवकाशं दत्वा कार्यं व्यच्छिदम् । यथा वृष्टिधारा नान्तः पतन्ति तथा गवाक्षानर्धविवृतानकरवम् ॥

सर्वेणैतेन यद्यपि मम शरीरस्थितिः स्वल्पमुत्तमादृश्यत तथापि रोगः पूर्णतया न शांतः । 'लेडी सिसिलिया रॉबर्ट्स' महाशया कदाचिन्मां द्रष्टुमागच्छति स्म । अस्मन्मध्ये मैत्री ववृधे । अहं दुग्धपानमङ्गीकर्तुं प्रेरणीय इति तस्याः प्रबलेच्छा बभूव । पूर्णां मदसंमतिं दृष्ट्वा दुग्धसदृशानन्यपदार्थान् परिज्ञातुं प्रयेते । तदीयमित्रमेकः दुग्धचूर्णं सूचयित्वात्रदुग्धांशः कोऽपि नास्ति तथापि दुग्धस्य सकलगुणविशिष्टो रासायनिकः पदार्थ इति विश्वासयितुमयतत । किन्तु तद्विचारस्तस्या न विदितः । लेडीसिसिलियामहाशयाया धार्मिकनियमेषु विश्वास आसीदिति मया ज्ञातम् । अतोऽहं तद्वाक्ये संपूर्णश्रद्धां न्यवेशयम् । चूर्णं जले मिलित्वा मुखे क्षिप्ते सति तस्य स्वादो दुग्धरुचिरेव दृष्टः । शीसकस्योपरि चीटिका पठित्वायं दुग्धपरिकल्पितः पदार्थ इति ज्ञातम् । इत्थं जलपानानन्तरं जलप्रदातुः का जातिरिति प्रश्न इवासीत् । मया चूर्णस्योपयोगः परित्यक्तः ॥

इमं विचारं लेडीसिसिलियामहाशयायै निवेद्य एतदर्थे नैव चिन्तनीयमित्यहमलिखम् । सा तत्क्षणमेवागत्य स्वीयदुःखं व्यक्तीचकार । तदीयमित्रैः शीसकस्योपरितनलेखनं नैव पठितमासीत् । एतद्विषये न चिन्तनीयमित्याशंस्य महता कष्टेनानीय दत्तं पदार्थं नाहमुपयोजितवानिति मम विषादं न्यवेदयम् । अपि च यतो दुग्धमज्ञात्वा पीतमासीत्ततो मे प्रमादकारिणी बुद्धिर्न प्रत्यभादिति विश्वासवचनमवोचम् ॥

लेडीसिसिलियामहाशयया सह मम परिचयस्येतरमधुरसंस्मरणानि मया वक्तव्यानि । संकटानामाशाभंगानां च मध्ये मम समाधायकानि मित्राणि बहवः स्मृतिमायान्ति । श्रद्धालव एतेषु स्मरणेषु यदीश्वरः दुःखमयानि कटुकौषधानि यथा ददाति तथा सौहार्दरूपाणि मिष्टानुपानानि ददात्येव पश्यन्ति ॥

डॉ. एलिन्सनमहाशयो यदा पुनरागतस्तदा नियमान् शिथिलीकृत्य भूचणकं वा नवनीतं वा 'जीतुन'तैलं वा ग्रहीतुं ममापेक्षायां शाकमन्नेन सह पाचयित्वा भोक्तुं चानुज्ञां ददौ । यद्यप्येतानि परिवर्तनानि मह्यमरोचन्त तथाप्येतैर्मम रोगः संपूर्णमेव प्रशांत इति वक्तुमशक्यम् । बहुजागरूकतया शुश्रूषाद्याप्यपेक्ष्यते स्म । मया शयनं विसृज्यागन्तुं न शक्यमासीत् ॥

डॉ. महेतामहाशयो मां तदा द्रष्टुमागच्छति स्म । मद्वचनं यदि शृणोषि तदा त्वां स्वस्थं करिष्यामीति मां व्रवीति स्म । इत्थमेकदा श्रीरॉबर्ट्समहाशयो मां द्रष्टुमागतः । मया स्वदेशं प्रति निवर्तितव्यमिति साग्रहमुवाच । वर्तमानस्थितौ भवान् नेटली–रुग्णालयं प्रति गन्तुं न शक्तः ।

Funding by IKS-MoE

शैत्यमितःपरमितोप्यधिकं वर्धते। भवता भारतवर्षं प्रति गन्तव्यमेवेति दृढं वच्मि। यतस्तत्रैव भवान्सम्पूर्णमेव स्वस्थीभवितुं शक्यः। यद्यारोग्यलाभादनन्तरमपि युद्धं प्रचलेत्तदा साह्यं कर्तुं पर्याप्तोऽवकाशो लभ्यते। अद्य यावद्भवता कृतं तदप्यगण्यमिति नाहं कदापि गणयामि ॥

अहं तस्य बुद्धिवादं श्रुत्वा भारतवर्षं गन्तुं सज्जीकर्तुमारभे ॥

त्रयश्चत्वारिंशोऽध्यायः

स्वदेशं प्रतिगमनम्

कॅलनबॅकमहाशयो भारतवर्षं प्रति गमनाय ,मया सह ‘ इंग्लेंडदेश ’मागतः। आवासुभावेकत्रावतीर्णौ। एकदा नौकया गन्तुमावयोरिष्टमासीत्। किन्तु राज्याधिकारो ‘ जर्मन’जनेषु दृष्ट्या बहुजागरूकया पश्यति स्म। अतः कॅलनबॅकमहाशयस्यानुज्ञापत्रप्राप्तिविषय आवयोः संदेह आसीत्। तदर्थमहं यावच्छक्ति प्रयत्नमकरवम्। अनुज्ञापत्रं तस्मै दापयितव्यमिति ‘ रॉबर्ट्स’-महाशयस्याप्यभिप्राय आसीत्। अतोऽयं तदर्थं तन्त्रीसंदेशं राजप्रतिनिधेः प्राहैषीत्। परन्तु तत्क्षणमेव लॉर्डहार्डिंजमहाशयसकाशादुत्तरमागतं यथा— एतादृक्प्रतिवक्तव्यतां वोढुं भारतवर्षस्य राज्याधिकारो नैव सज्जो भवतीति विषीदाम इति। अस्योत्तरस्य परिणामं वयं सर्वेऽपि ज्ञातवन्तः ॥

कॅलनबॅकमहाशयात् पृथग्भवितुं ‘मम बहुदुःखकरमासीत्। तस्य तावदितोप्यधिक संकटमभूदिति मम प्रत्यभात्। तस्य भारतवर्षं प्रति गमनं यदि साध्यमासीत् तदासौ तत्र भूकर्षणं कर्पटसीवनं एतादृशसरलजीवनं करोति स्म। अद्यायं दक्षिणाफ्रिकायां स्वयं पुरा यथा करोति स्म तथैव जीवनं कुर्वन् शिल्पकार्येण हस्तपूर्णं कर्म करोति ॥

वयं तृतीयश्रेण्यां प्रयातुं कृतसंकल्पाअभूम। किन्तु ‘ पी. ॲन्ड. ओ. ’नौकासु तृतीयश्रेणीप्रयाणानुज्ञापत्रं न प्राप्यते स्म। अतो द्वितीयवर्गे गन्तव्यमासीत् ॥

नौकायां नूतनफलेषु लब्धव्येष्वपि शुष्कफलं नाधिगन्तव्यमासीत्। अतो दक्षिणाफ्रिकायाः आनीतं फलं सह नीत्वा गताः ॥

डॉ. जीवराजमहेतामहाशयो मम पार्श्वस्य ‘ मीड्झ प्लास्टर् ’ इति चूर्णस्य पट्टीं बद्ध्वा रक्तसागरप्राप्तिपर्यन्तं नोद्ग्रथितव्यमित्यवोचत्। मया दिनद्वयमस्य क्लेशः सोढः किन्तु पर्यन्ते न सह्यमासीत्। पट्टीमुन्मुच्य हस्तपादं परिमृद्य शुद्धस्नानविधानस्वातन्त्र्यं संपादयितुं बहुकष्टमासीत् ॥

Funding by IKS-MoE

फलान्येव मुख्यशो ममाहार आसीत्। दिने दिने मम शरीरस्थितिरुत्तमा भवति स्मेति प्रत्यभात्। मया 'सुएझ'कुल्याप्राप्तिकाले बहुशः स्वास्थ्यमासीत्। निःशक्तिस्तावद् दृश्यते स्म। किन्त्वपायः संपूर्णमुत्तीर्ण इति धैर्यमागतम्। व्यायामं शनैश्शनैरधिकाधिकमकरवम्। समशीतोष्णवलयस्य निर्मलः पवन एव ममारोग्याभिवृद्धेर्मुख्यकारणमिति मया परिगणितम्॥

अस्यां नौकायांमाग्लेयानां भारतीयानां मध्ये मया दृष्टो भेदभावो दक्षिणाफ्रिकायाः स्वदेशं कृतप्रयाणेऽपि न दृश्यते स्म। अस्य कारणं पूर्वानुभवो वाथान्यो वा न जाने। कतिपयांग्लैः सह मया भाषणं कृतमिति सत्यम्। परन्त्वेष कथालापः सुप्रभातं शरणार्तीत्येतावतैव समाप्तमभूत्। दक्षिणाफ्रिकानौकासु यथा भवति स्म तथात्र संभाषणानि हार्दिकान्यभूवन्नित्येतदेवापूर्वम्। व्यक्तं वाव्यक्तं वांग्लेयस्य मनस्यहं शासककुलस्थ इति तथैव भारतीयस्य मनस्यहं पराधीनकुलस्थ इति भावनैव कारणमिति मम प्रतिभाति। एतद्वातावरणाद् बहिर्भूत्वा गृहं प्रवेष्टुमातुरोऽहमासम्॥

'एडन' पत्तनं प्राप्तानां प्रत्यभाद् गृहमागता इवेति। यतोऽस्माकं 'एडनवाला'गृहं सम्यग्ज्ञातमासीत्। यतोऽस्माभिः श्रीकेकोबादकावसजीदीनशामहाशयो डरबनपत्तन एव दृष्टः। तत्र तेन तस्य भार्यया च गाढपरिचय आसीत्॥

कतिपयदिनेषु वयं मोहमयीं प्राप्ताः। दशवर्षप्रवासानन्तरं स्वदेशं प्रत्यागमनस्यानन्दोऽनिर्वचनीयः। गोखलेमहाशयो मम स्वागतस्य सन्नाहं कृतवान्। यद्यपि तस्य देहस्थितिः सूक्ष्माभवत्तथाप्येतदर्थे मोहमयीमागतो बभूव। तस्मिन्नैक्यमुपेत्य मम भारमेव तारयितुमुत्साहेन भारतवर्षे पदं निक्षिप्तवान्। परन्तु दैवेच्छा पृथगासीत्॥

चतुश्चत्वारिंशोऽध्यायः

मम न्यायवादि वृत्तिं प्रकृत्य किंचित्स्मरणम्

भारतवर्षे मम जीवनचरित्रस्य वर्णनात्पूर्वमेव मयोद्देशपूर्वकमलिखितस्थितान् कतिपयदक्षिणाफ्रिकानुभवान् विवरीतुमावश्यकमिति प्रतिभाति। मम न्यायवादिसुहृदो मम न्यायवादिवृत्तिकालीनानि संस्मरणानि निवेदयितुं पृच्छन्ति। एषा संख्या तथा महती वर्तते यथा सर्वस्यास्य वर्णने ग्रन्थ एकः परिकल्पेत। अपरं च तादृग्वर्णनमेतत्पुस्तकस्य परिमितिमतिक्रामेत्। परंतु सत्योपासनासंबद्धान् कतिपयान् स्मृतिमानेतुं प्रायशोऽनुचितं न स्यात्॥

मम न्यायवादिन उद्योगे मया नानृतं कदाप्याश्रितम् । अस्मिन् कार्ये बहुलो भागः सार्वजनिकसंबद्ध आसीत् । एतदर्थे मया पारमार्थिकं व्ययद्रव्यमात्रं गृहीतमासीत् । कदाचिन्मयैतदपि स्वहस्तदेयमासीत् । यावदहं स्मरामि तावत्सर्वं मया तदानीमेव निवेदितम् । एतावत्कथनेन न्यायवादिवृत्तेः संबद्धमावश्यकं सर्वमभिहितमिति ज्ञातं मया । परंत्वितोऽप्यधिकं निवेदनीयमिति मित्राण्यपेक्षन्ते । सत्यमार्गं विहातुं प्रत्याख्याताः संदर्भाः–तेषां स्थूलमस्तु वा वर्णनम्–तादृशन्यायवादिनां लाभो भवेदिति तैर्गणितमिति प्रतिभाति ॥

यदाहं विद्यार्थी स्थितस्तदा न्यायवादीति चेदनृतवादीति तस्योद्योगोऽयमिति श्रुतं मया । परन्तु मिथ्योक्तिभिः पणं वा पदवीं वाधिगन्तुं नासीत्प्रवृत्तिरतो ममोपरि न कोऽपि परिणामः संजातः ॥

अयं मे सिद्धान्तो बहुशः परीक्षणीयः संवृत्तः । असकृदेतन्मम विदितं यत्प्रतिपक्षेण स्वसाक्षिणो मिथ्या वदितुं शिक्षिताः । यद्यहमस्मदीयसाक्षिणां व्यवहारिणां वा मृषा वक्तुमुत्तेजनं दत्तवान् तदा व्यवहारो जयतीति मम ज्ञातमासीत् । परंत्वहं यथा वागुरायामस्यां न पतेयं तथा जागरूकः स्थितः । मम व्यवहारी कश्चिन्मामवंचयदिति संशयो व्यवहारजयादनन्तरं मम मनसि संजातं संदर्भमेकमात्रं स्मरामि । यदि मे कक्षिगारस्य व्यवहारः सत्यो भवेत्तदा जयमाकांक्षन् मम हृदयान्तरे स्थितः । व्यवहारे जिते एतावद्द्रव्यं प्रदेयमिति शुल्कनिष्कर्षं कृतं न स्मरामि । मम कक्षिगारो जयतु वा पराजितोऽस्तु वा निश्चितं शुल्कं निरीक्ष्यते स्म । नाधिकं वा न चोनं वा । मया मिथ्याव्यवहारो गृह्यते कक्षिगाराणां मिथ्यासाक्ष्यं शिक्षयिष्यतीति नैव निरीक्षणीयमिति प्रत्येकनूतनव्यवहारिणं पुरस्तादेव प्रबोधयामि । अस्य फलितं च मम नाम गृहीतं चेन्न कोऽप्यसत्यो व्यवहारो मदीयकार्यालयमागच्छति स्म । तावत्कुतः । मम कक्षिगारेषु कतिपये सत्यभूतान् स्वव्यवहारान् पृथक् स्थापयित्वा मदर्थे ददति । इतरानितरपार्श्वं गमयन्ति स्म ॥

एको व्यवहारो गृहीतो मां कठिनपरीक्षायां लक्ष्यीचकार । ममात्युत्तमः कक्षिगारः कश्चिदेतन्मम पार्श्वमानिनाय । अयं संकरीकृत आयव्ययसंबंधी अनेकदिनानि चलति स्म । अस्य कतिपयो भागश्चतुःषष्ठन्यायस्थानानां पुरस्तात्प्रत्यक्षीकृतः पर्यन्ते तमायव्ययभागो न्यायस्थानेन निर्णयायायव्ययेषु प्रवीणस्य 'पंचायत'स्य वशेऽदायि । तस्य निर्णयः संपूर्णमेव मम कक्षिगारस्य पक्षे स्थितः । परन्तु स 'पंचायत' आयव्ययविधानेऽजागरूकतया प्रमादमेकं चकार । स च यद्यपि परिणामे स्वल्पस्तथापि स्वभावे गुरुतर आसीत् । अतोऽयं व्यये लेखनीयं आयेऽलिखत् । प्रतिपक्षः पंचायतस्य निर्णयं कारणांतरेण प्रत्यवस्थितः । अहमस्मत्कक्षिगारस्य उपन्यायवाद्यासम् । ज्येष्ठन्यायवादिनः उपर्युक्तप्रमादे ज्ञाते सति सोऽस्मदीयकक्षिगारस्तत्संमंतुमहं न बद्ध इत्यभिप्रायं ददौ । न कोऽपि न्यायवादी स्वकक्षिगारस्य हितविरुद्धं विषयं संमन्येतेति तस्य मतमासीत् । अहं प्रमादस्वीकारोऽस्मत्कर्तव्यमित्यवोचम् ॥

Funding by IKS-MoE

परन्तु ज्येष्ठन्यायवादिनोक्तं यथा – तथा वा तं चेन्न्यायस्थानं ‘ पंचायत ’ निर्णयं संपूर्णमेव निराकर्तुं संभवो बहुलः । प्रज्ञावान्न्यायवादी स्वकक्षिगारस्य व्यवहारं तादृगपाये न लग्नीकुर्यात् । आस्तामिदं तावत् । तादृशप्रतिवक्तव्यतां वोढुमहं न कदापि संमन्ये । व्यवहारः प्रथमतो विचारणां कर्तुं प्रहीयते यद्यस्मत्कक्षिगारस्य कियान् व्ययो भविष्यतीति वक्तुं न शक्यमिति ॥

यदायं संवादः प्रवृत्तस्तदा व्यावहारिकोऽपि तत्रैव स्थितः ॥

अहमपृच्छं यथा – अस्मद्व्यावहारिका वयं चैतेन संवर्तमानापायस्य सिद्धा भवितुमर्हामः । अस्माकं प्रमादासंमतेः केवलं यद्यपि सोऽन्याय्यो भवति तथापि न्यायस्थानं संमन्यत इति निश्चितं कथं जानीयात् । अपि चास्मत्सम्मत्यास्मद् व्यावहारिकः पराजित इति ब्रूमः । तेन का हानिरिति । ज्येष्ठन्यायवादिनोक्तं यथा – कुत एव संमन्तव्यम् ॥

न्यायस्थानं वा प्रतिपक्षो वा न परिज्ञास्यतीति निश्चितं कथं नामावगतमित्यहमपृच्छम् ॥

ज्येष्ठन्यायवादी दृढतयोवाच यथा – बाढं तर्हि भवानिमं व्यवहारं वादयति किं । भवताद्योक्तप्रकारेण वादयितुमहं न सज्जस्थितः ॥

नम्रेण मया कथितं यथा – यदि भवान्न वादयेद्यदि च व्यवहारी मां तथा कर्तुमपेक्षते यदि प्रमादो न स्वीकृतस्तर्हि न मया किंचित्कर्तुमवशिष्यत इति ॥

एवमुक्त्वा मया व्यवहारी दृष्टः । स तु भ्रांत इवासीत् । अस्मिन्व्यवहारे आरंभतोऽहं स्थितः । व्यवहारी मयि संपूर्णश्रद्धालुः । तेनोक्तं यथा एवं तर्हि भवान् वादं कृत्वा प्रमादं स्वीकर्तुमर्हति । नष्टं भवतु यदेतदस्मद् भागधेयम् । भगवान् धर्मं रक्षत्विति ॥

अहं संतुष्टः । नान्यन्मया प्रतीक्षितं तस्मात् । ज्येष्ठो न्यायवादी पुनर्मां प्रत्यादिशत् । हठवृत्तिं मां दयालुतयापश्यत् । परन्तु मां निश्चयेनाभ्यनन्दत् ।

अग्रेतनाध्याये न्यायस्थाने किं संवृत्तमिति द्रक्ष्यामः ॥

पंचचत्वारिंशोऽध्यायः

विदग्धव्यवसायः

मम बुद्धिवादस्य निर्दोषतां प्रति न मे संशय आसीत् । संदिग्धा तावन्मम योग्यता एतद्विषयसंपूर्णन्यायतां कर्तुम् । :सर्वप्रधानन्यायस्थानस्य पुरस्तादेतादृशकष्टतरव्यवहारवादं कर्तुमतीव शंकाक्रान्तं मनः प्रत्यभात् । न्यायस्थानस्याग्रे भीतः कंपमानश्चोपस्थितः ॥

Funding by IKS-MoE

आयव्यये प्रमादं निर्दिश्य वदन्तं मामेको न्यायाधीशः पप्रच्छ । यथा – भवन्तं मध्ये बाधित्वा विषीदामि । व्यत्यासमधिकृत्य वादः प्रचलत्विति ॥

मम विवरणाधारभूतं वस्तु पर्याप्तमासीत् । कृतज्ञोऽस्मि यन्न्यायाधिपतिरिमं प्रश्नमुत्थापितवान् । आरंभतो न्यायस्थानस्यावधानं स्थिरीकृत्य स्थापयितुमीश्वरोऽभवम् । महद्धैर्यमालम्ब्य विस्तरेण विवरणे प्रक्रियां गृहीतवान् । न्यायस्थानं मम वादं सहिष्णुतयाशृणोत् । व्यत्यासः प्रमादेन संवृत्त इति न्यायाधिपतीन् विच्छिन्नसंशयानकरवम् । ततस्ते कार्यबाहुल्यनिष्पन्नं समस्तनिर्णयं निराकर्तुमनसो नासन् ॥

प्रमादस्यांगीकृतत्वादतीव वादो नावश्यक इति प्रतिपथा न्यायवादी विचिन्त्य श्रद्धया स्थितः । परन्तु न्यायाधिपतयः प्रमादोऽयं केवलस्खलितं सौकर्येण समीकर्तुं शक्यत इति विश्वस्य तं प्रत्यादिशन्ति स्म । प्रतिन्यायवादी निर्णयमास्कंदितुमतीव प्रयेते । परन्तु स न्यायाधिपतिर्यः पूर्वं संदिह्य स्थितः स मदीयपक्षं निश्चयेनागतः ॥

सोऽपृच्छद्यथा – वितर्क्यतां गांधिः प्रमादं नांगीकृतवानिति तदा त्वया किं कृतं स्यादिति ॥

अस्माभिर्नियुक्तादधिकसमर्थः सत्यवादी कुशलश्चायव्ययकर्ता तस्य सेवांगीकारो दुर्लभः ॥

उक्तं च न्यायाधिपतिना यथा – न्यायस्थानेऽनुमीयते व्यवहारी निजव्यवहारं सम्यग्जानातीति । यदि त्वं कुशलेनायव्ययकर्त्रा स्खलितमेकं प्रमादं विना नान्यत्प्रदर्शयितुं शक्नोषि तदा न्यायस्थानं स्पष्टस्खलितकारणान्नूतनव्यवहारस्तदर्थव्ययश्च क्रियतामिति बलान्निष्कासयितुं व्यवहारिणो नेच्छन्ति । वयं नूतनश्रवणदिनं व्यवहारस्य न दातव्यं मन्यामहे । यतः प्रमादः सौकर्येण समीकर्तुं शक्यते ॥

एवं न्यायवादिनो दोषारोपो निष्कासितः । न्यायस्थानेन निर्णयः स्खलितं समीकृत्य स्थिरीकृतो वा प्रमाणपुरुषस्यैव प्रमादः समीकर्तुमाज्ञप्तं वा विस्मरामि ॥

अहं संतुष्टस्तथा मम व्यवहार्यपि । ज्येष्ठन्यायवादी चानन्दितः । सत्यं यथास्थितं विहाय व्यवहर्तुमपि शक्यमिति मनसि दृढीकृतम् ॥

वाचकेन स्मर्यतां यथा व्यवहारे सत्यवादित्वं मूलिकान्यूनतायां स्थितायां नोपशमयतीति ॥

Funding by IKS-MoE

षट्चत्वारिंशोऽध्यायः

व्यवहारिणः सहकारिणो जाताः

धर्म्यानुष्ठाने ट्रान्सवालनातालपत्तनयोऽयं विशेषः । यन्नातालपत्तने समाना धर्मसभा वर्तते । धर्मसभाध्यक्षो वादपंडितस्य पदप्राप्त एव प्रतिपुरुषवदभ्यवसेवेत । ट्रान्सवालस्थले मोहमय्यामिव वादपंडितप्रतिपुरुषयोः कार्यमंडलं भिन्नम् । वादपंडितवद्वा प्रतिपुरुषवद्वा कार्यं करोतु । वरणाधिकारस्तस्य वर्तते । नातालनगरवादपंडितः सन् ट्रान्सवालनगरे प्रतिपुरुषपदं मयान्विष्टम् । वादपंडितः सन् भारतीयजनैः सह साक्षात्संपर्को न लभ्यः स्यात् । दक्षिणाफ्रिकायां गौरांगप्रतिपुरुषा मत्सकाशान्निवेदनं पत्रं न गृह्णीयुः ॥

ट्रान्सवालस्थलेऽपि प्रतिपुरुषाः प्राड्विवाकानां न्यायस्थाने वादायानुज्ञाताः । एकस्मिन्नवसरे जोहानिसबर्गस्थले प्राड्विवाकन्यायस्थाने वादं कुर्वाणो मम व्यवहारिणा वंचित इति दृष्टम् । साक्षिपेटिकायामयमुत्तराणि ददानः संपूर्णमेव खंडितः । अतः कमपि वादं विनैव व्यवहारोऽपास्यतामिति प्राड्विवाकमुक्तवान् । प्रतिपक्षन्यायवाद्याश्चर्यचकितोऽभूत् । प्राड्विवाकः संतुष्टः । असत्यव्यवहारं मत्सकाशमानीतवन्तं व्यवहारिणमध्यक्षियम् । तेन विज्ञातं मयासत्यव्यवहारा न स्वीक्रियन्त इति । यदाहं तत्सर्वं तत् प्रत्यक्षमानीतवांस्तदा प्रमादमङ्गीचकार । ममेदं प्रतिभाति यदेष मह्यं नाक्रुध्यत् । प्राड्विवाकं प्रति व्यवहारमपसारयेत्युक्तवानहमिति । अस्मिन् व्यवहारे मम कार्यं सुलभतरमासीत् । मम सत्यव्रतत्वं न्यायवादिनां मध्ये मम प्रसिद्धिमवर्धयत् । वर्णभेदं प्राप्तोऽपि केषुचिद्व्यवहारेषु तेषां प्रीतिपात्रमप्यभूवम् ॥

अयमासीन्मम स्वभावो यन्मम मौर्ख्यं मम व्यवहारिभ्यस्तुल्यवृत्तिभ्यश्च नाहं कदापि न्यगूहयम् । यत्र यत्राहं मुग्धः स्थितस्तत्र तत्रेतरन्यायवादिना सहालोच्यतामिति व्यवहार्युच्यते स्म । अथवा यद्ययं ममैव संलग्नः स्थातुमिच्छेत्तदा ज्येष्ठन्यायवादिनो बुद्धिवादः श्रूयतामित्यवोचम् । एतन्निष्कापट्यं व्यवहारिणामपरिमितप्रीतिं श्रद्धां च समपादयत् । यदा यदा ज्येष्ठन्यायवादिना सह समालोचयितुमावश्यकमासीत्तदा तदा नियतशुल्कं दातुं सज्जस्थितास्ते । एषा प्रीतिः श्रद्धा च मम सार्वजनिककार्येषु साहाय्यमकुर्वन् ॥

पूर्वमेव निर्दिष्टं मया यद्दक्षिणाफ्रिकायां मम व्यवहारः स लोकसेवार्थमित्येतदुद्देशार्थमपि लोकविश्वासार्जनमवर्जनीयो नियमः । उदारहृदयो भारतीयजनो द्रव्यार्थे कृतं व्यावहारिककार्यं सर्वं महत्तरीकृतवान्ः स्वाधिकारप्रयोजनाय काराबंधनप्रवेशदुःखान्यनुभवितुं प्रेरिताः परमानन्देन बुद्धिवादमङ्गीचक्रुः । कर्तव्यस्य निर्दोषतां विचार्य तथा न कृतं परन्तु मयि श्रद्धाप्रीतिहेतोः ॥

Funding by IKS-MoE

एतल्लिखत बह्व्यः पवित्राः स्मृतयो मम हृदयमायान्ति । पर:शता व्यवहारिणो लोकसेवार्थं सुहृदो निश्चितं सहकारिण्यश्च बभूवुः । तेषां समागमेन जीवितं मधुरीकृतमासीत् । अन्यथा संकटापायभरितं यत् स्थितम् ॥

सप्तचत्वारिंशोऽध्यायः

कथं व्यवहारी रक्षितः

अत्रान्तरे वाचकः ' पारसीरुस्तमजी 'नामधेये परिचितो भवति । स किल एकदा मम व्यवहारी सहकारी च बभूव । अथवा प्रायेण प्रथमतः सहकारी ततो: व्यवहारी भवेति वचनं यथार्थतरं स्यात् । मयि तस्य तावती श्रद्धाभूत् यावती स गृहकृत्येष्वपि मम बुद्धिवादमनुसरति स्म । रुग्णश्चेदपि मम साहाय्यमन्वियेष । यद्यप्यावयोर्जीवनरीतयोऽभिद्यन्त तथापि मद्दुश्चिकित्सामङ्गीकर्तुं विकल्पवान्नासीत् । अयं सुहृदेकदा संकटे पपात । प्रायशः स्वकीयसर्वकार्याण्यपि मह्यं निवेदयति स्म । किन्त्वेकमात्रं मनःपूर्वकं मत्सकाशान्न्यगूहत् । तेन मोहमयीनगरात् कलकत्तानगराय बहूनि वस्तून्यानायितान्यभवन् । भूयो भूयः स च्छलेन वस्तून्यलभत । शुल्कग्रहणशालालेखकैः सह प्राप्तमैत्रीकत्वान्न कोऽपि तस्मिन् संशयमकरोत् । समर्पितद्रव्यपरिसंख्यापत्राणि तस्माद्विश्वासेन गृह्णन्ति स्म । कतिपये ज्ञात्वाप्युपेक्षां शुल्कचौर्ये कृतवन्तः स्युः ॥

'अखा'नाम्नः गुजरातीकवेः फलवदौपम्यं प्रयुक्तं चेच्चौर्यं पारदवन्निगूह्यत इति पारसीरुस्तमजीमहाशयो नैव वर्जनीयः । सन्मित्रमेष मां प्रति शीघ्रतरमुपाधावत् । नयनाभ्यामश्रूणि कपोलयोः पतन्ति स्म । तेनोक्तं यथा – भ्रातः मया त्वं वंचितोऽसि । अस्मिन्दिने ममापवादः प्रकाशितः । वस्तूनां छलेनानयनं मया कृतम् । अहं विनष्टः । कारागृहं मया गन्तव्यम् । ध्वंसितोऽहमस्मि । भवानेक एव मां कष्टाद्रक्षितुं समर्थः । मया त्वत्सकाशान्नान्यन्निगूहितम् । ईदृशानि कुव्यापारतन्त्राणि तुभ्यमुक्त्वा त्वां न क्लेशयेदितीदं शुल्कचौर्यं कदापि नोक्तवान् । परन्त्विदानीं कियदनुतप्यत इति ॥

तं शान्तं कृत्वाहमवोचं यथा – रक्षितुं वा न रक्षितुं वा भगवदायत्तम् । मां प्रकृत्य मम मार्गं त्वं जानासि । आत्मापराधस्वीकारेण त्वां रक्षितुं प्रयतिष्य इति ॥

साधुः पापी नष्टचैतन्य इवासीत् । भवतः पुरस्तादपराधस्वीकारः किं न पर्याप्तः ॥

त्वं मयि नापराद्धः किन्तु राज्याधिकारे । कथं मत्पुरस्तात्कृतोऽपराधस्वीकारस्त्वयोपयुज्येतेति समार्दवं मया प्रत्युक्तम् ॥

Funding by IKS-MoE

पारसीरुस्तमजीमहाशयः प्रोवाच यथा – भवतो बुद्धिवादमनुसृत्य सर्वं करिष्यामि। परन्तु मम पूर्वन्यायवादिनापि किं नालोचयसि। असावपि मित्रमिति॥

विचारे क्रियमाणे शुल्कचौर्यं दीर्घकालाच्चलति स्म। किन्तु यदापराधः प्रकाशितस्तत्संबंधिद्रव्यमत्यल्पम्। वयं तस्य न्यायवादिसकाशं गताः। तत्क्षणे पठित्वा तेनोक्तं यथा व्यवहारः स्थेयगणेन विचार्यते। नातालन्यायस्थानस्य स्थेयगणो भारतीयजनं नैव विमोचयिष्यति। परन्त्वहं निराशो न भविष्यामीति॥

अयं न्यायवादी मया सम्यग् न ज्ञातः। पारसीरुस्तमजी मध्ये प्रोक्तवान्यथा कृतज्ञोऽस्मि किन्त्वस्मिन् व्यवहारे गांधिमहाशयेन नीयमानमात्मानमिच्छामि। स मां सम्यग्जानाति। आवश्यकत्वे सति तं बोधयितुमर्हसीति। इत्थं न्यायवादिनः प्रश्नमपास्य पारसीरुस्तमजीमहाशयापणं वयं गताः॥

ततो ममाभिप्रायं प्रकाशयन्नहमुक्तवान्यथायं व्यवहारो न्यायस्थानं नैव प्रवेष्टुमर्हति। शुल्काधिकार्येक एव जानाति। यन्न्यायस्थाने व्यवहारः प्रवेशनीयोऽथवा त्वं विमोचनीय इति। स च प्रतिपुरुषाध्यक्षेण नीयते। उभावपि द्रष्टुमहं सज्जस्थितोऽस्मि तैर्निर्दिष्टं दण्डं दास्यामीति त्वया वक्तव्यम्। ते संमन्यन्ते। नो चेत्कारागृहं प्रवेष्टुं सज्जस्थितेन त्वया भाव्यम्। अत्र लज्जा न तावत्काराप्रवेशे यावदपराधकरणे। कर्म तावत्कृतमेव कारागृहबंधनं प्रायश्चित्तमिति मन्तव्यम्। वास्तविकं तु प्रायश्चित्तं शुल्कचौर्यं न कदापि करिष्यामीति मनसि निश्चयः॥

पारसीरुस्तमजीमहाशयः सर्वमेतत्कुशलमिति जग्राहेति वक्तुं न शक्यते। स तावद्धीरः पुरुषः। परन्तु तद्धैर्यं तात्कालिकं संप्रति परिक्षीणमासीत्। तस्य नामधेयं यशश्च बाधितमासीत्। तावज्जागरूकतया प्रयासेन च निर्मितं भवनमेव च्छिन्नभिन्नं यदि भवेत्तदा क्व पुरुषस्तिष्ठेत्॥

उक्तं खलु मयाहं समग्रमेव तव हस्ते स्थितः। यथा रोचते तथा क्रियताम्। अस्मिन् व्यवहारे सुहेतुवादस्य सर्वशक्तिमहं प्रयोजितवान्। शुल्काधिकारिणं दृष्ट्वा निर्भयमेव सर्वो विषयो निवेदितः। सकलपुस्तकानि च युष्मद्वशे स्थापयिष्यामीति वाचं दत्तवान्। पारसीरुस्तमजीमहाशयः पश्चात् कियत्तप्यत इत्यवोचम्॥

शुल्काधिकारिणोक्तं यथा – वृद्धः पारसीमहाशयो मह्यं रोचते। मूर्खमात्मानमकरोदिति विषीदामि। किं मे कर्तव्यमिति जानासि त्वम्। प्रतिपुरुषाध्यक्षेणाहं नेतव्यः। अहं त्वां बोधयामि तेन सह समाधानवचांसि प्रयोक्तव्यानि॥

न्यायस्थानं प्रति तमाक्रष्टुं नैव बद्धमानसश्चेत् संतोषः॥

तत्सकाशादेतावद् वाग्दानमादाय प्रतिपुरुषाध्यक्षाय पत्राणि लिखित्वा तं द्रष्टुं गतः। संतुष्टोऽस्मि वक्तुं यदयं मम निष्कापट्यमभ्यनन्दत्। निःशेषं मयाभिहितमिति व्यश्वसच्च॥

इदानीं विस्मृतं मया यदस्मिन् व्यवहारेऽन्यस्मिन् वा मम निर्बन्धो निष्कापट्यं च तस्मादिमां वाचमाकर्षत् पश्याम्यहं यद् भवान्नेति प्रतिवचनं न कदापि गृह्णातीति॥

पारसीरुस्तमजीमहाशयव्यवहारः समये कृत्वा व्यवस्थापितः। यावच्चौर्यं कृतमित्यङ्गीकृतं तावतो द्विगुणद्रव्यं दण्डः प्रदेयोऽभवत् । व्यवहारस्य सर्वानपि विषयान् लिखित्वा पत्रं समीकृत्य निजकार्यालये व्यलंबयद्यथोत्तराधिकारिणां सहवाणिज्यकारिणां च स्मृतिर्जायेतेति ॥

रुस्तमजीमहाशयस्य इमे सुहृदोऽनेन चंचलपश्चात्तापेन वंचितेन भाव्यमिति प्रत्यादिशन् । इमं प्रत्यादेशं रुस्तमजीमहाशयः यदा निवेदितस्तदा तेनोक्तं यद्यहं त्वां वंचयेयं तदा कामे गतिर्भविष्यतीति ॥

इति श्री गान्धिमहात्मनः
सत्यशोधनाख्यायामात्मकथायां
चतुर्थो भागः
समाप्तः

Funding by IKS-MoE

पञ्चमो भागः

Funding by IKS-MoE

प्रथमोऽध्यायः

मम प्रथमानुभवः

गृहप्राप्तेः पूर्वमेव फीनिक्सआश्रमान्निर्गतो जनः समागतोऽभूत् । प्राक्चिंतितप्रकारेणाहमेव पूर्वमागतः स्याम् । परंतु 'इंग्लेंड'देशे युद्धे संबद्धा मम प्रवृत्तिः सर्वमनोरथान् व्यत्यस्तानकरोत् । 'इंग्लेंड'देशे कालानुमानं विना निरुद्धे मयि फीनिक्सस्थलजनस्य निवासाय स्थानान्वेषणचिंतागता । शक्यं चेत्तैः सर्वैरप्येकत्र स्थित्वा फीनिक्सस्थले यज्जीवनं कुर्वन्ति स्म तदेवात्रापि कुर्युरिति मयापेक्षितम् । मया न कोऽप्याश्रमो ज्ञातो यत्र तान्प्रेषयितुं शक्यं स्यात् । अतस्तन्त्रीद्वारा तेभ्यो न्यवेदयं 'अेन्ड्रुस'महाशयः दृश्यतां तदुक्तप्रकारेण क्रियतामिति ॥

एवं ते प्रथमतः कांगडीगुरुकुले स्थापिताः । तत्र हि स्वामीश्रद्धानंदमहाशयः स्वपुत्रेष्विव तेष्वाचरत् । ततः पश्चाच्छांतिनिकेतनाश्रमे स्थापिताः । यत्र कविरितरे लोकाश्च तान्निजप्रीतिमग्नान् चक्रुः । एषु स्थलेष्वनुभवस्तान्मां च सुस्थितान् चक्रुः ॥

'अेन्ड्रुस'महाशयस्य यथाहमत्रादिषं व्यक्तित्रयं नाम कविः श्रद्धानंदः प्रधानोपाध्यायः सुशीलरुद्रश्च । दक्षिणाफ्रिकादेशे यदा वयं स्थितास्तदा तानधिकृत्य भाषणेन वयमायस्ताः । तथा च दक्षिणाफ्रिकायां संवृत्तानां स्मृतिः 'अेन्ड्रुस'महाशयस्य व्यक्तित्रयवृत्तान्तो रात्रिंदिवं भाष्यमाणोऽतीव स्पष्टमधुरः प्रतिभाति । 'अेन्ड्रुस' महाशयः फीनिक्सजनस्य सुशीलरुद्रसंपर्कं कृतवान् । प्रधानाध्यापकस्य रुद्रस्याश्रमो नासीत् । किन्तु तस्यैकं गृहमासीद्यत्र फीनिक्साश्रमजनकुटुंबानि स्थापितानि । तेषामागमनादेकस्मिन्नेव दिने तदीयो जन एतांस्तथा सुखितान् चकार यथा ते फीनिक्सस्थलपरित्यागं नास्मरन् ॥

यदाहं मोहमय्यामवतीर्णस्तदाज्ञासिषं यत् फीनिक्सजनः शांतिनिकेतनमागत इति । तस्माद् गोखलेमहाशयं दृष्ट्वा तानवलोकितुमुत्सुकोऽभवम् । मोहमय्यां मम स्वागतीकरणे स्वल्पसत्याग्रहस्यावकाशं ददौ ॥

'जहांगिर पेटिट' स्थले मम गौरवार्थं कृतसभामेलने गुजरातीभाषायां वक्तुं नाहं धैर्यमास्थितः । उज्ज्वलतेजोविशिष्टराजमंदिरप्रांतपरिवेष्टकेष्वागरकर्मकराणां मध्ये कृतजीवनोऽहं ग्रामीणमिवात्मानममंसि । प्रावारशिरोवेष्टनधोत्रैरद्यापेक्षयाधिकनागरिक इव प्रेक्ष्यमाणोऽपि केंद्रप्रसादस्यांडंबरतेजो विशेषेणाचेतन इवासम् । तथापि कथमप्यहं निस्तीर्णः फिरोजशहामहाशयस्य रक्षामण्डपे ॥

आसीदन्या गुजरातीव्यापृतिरेका। स्वागतं विना गन्तुं गुजरातीजनो न माममुञ्चत्। प्रत्यादिष्टमेतत् स्वागतं 'उत्तमलाल त्रिवेदि'महाशयेन। पूर्वमेव कार्यानुक्रमो मया ज्ञातः। जिन्नामहाशयः उपस्थितः सभाध्यक्षो वा प्रधानभाषणकृद्वा न जाने। स आंग्लभाषायां संक्षिप्तभाषणं चकार। यावदहं स्मरामि तावदभूत्सर्वमांग्लभाषायां भाषणम्। मम वारे प्राप्ते गुजरातीभाषायामेव मम धन्यवादपुरःसरं गुजरातीहिन्दुस्तानीभाषयोः पक्षपातमुक्त्वा गुजरातीसभायामांग्लभाषाप्रयोगस्यासंमतिख्यापनं कृत्वा स्थितः। दीर्घप्रवासानन्तरं निवृत्यानुभवशाली प्रतिष्ठापिताचाराणां विरोधेन वर्तत इत्येतदसभ्यमिति प्रतिभाति। गुजरातीभाषया प्रतिवचनानन्तरं न कोऽपि ममासंमतिख्यापनमन्यथा भावयत्। असंमतिख्यापनस्य सर्वे समाहिता आसन्॥

सभायां मम धैर्यमागतम् यथा मम भिन्नभिन्नाभिप्रायान् मम देशजनस्य पुरस्तात् स्थापयितुम्। प्राथमिकानुभवपूर्णायां मोहमय्यां स्वल्पकालं स्थित्वाहं पुण्यपत्तनं (पूनापत्तनं) गतः। यत्र गोखलेमहाशय आव्हानमदात्॥

द्वितीयोऽध्यायः

पुण्यपत्तने गोखलेमहाशयेन सहवर्तनम्

मोहमय्याः प्राप्तिक्षणमात्र एव गोखलेमहाशयो मां समदिशद्यथा राज्याधिपतिर्मा द्रष्टुमिच्छति। पुण्यपत्तनं प्रति गमनात्पूर्वमेव द्रष्टुमुचितमिति। तदनुसारेण गत्वा तद्दर्शनमग्रहीषम्। कुशलवार्ताविचारानन्तरं तेनोक्तं यथा भवन्तमेकविषयमेव पृच्छामि। यद्राज्यव्यवहारे यत्किंचित् भवान्कर्तुमिच्छति तदागत्य मां द्रष्टुमर्हतीति॥

मया प्रत्युक्तं यथा सौकर्येण संमतिं दद्याम्। यतो मम सत्याग्रहिणो नियमोऽयं यत्प्रतिकक्षेरभिमतं ज्ञात्वा यावच्छक्यं तदनुरोधिना भवितव्यम्। दक्षिणाफ्रिकायां मयायं नियमोऽनुष्ठितः। तदेवात्रापि कर्तुमिच्छामीति॥

लॉर्ड-विलिंग्डन् मामभिनंद्योक्तवान्यथा – यदा गंतुमिष्यते तदा गम्यताम्। अस्मद्राज्याधिकार उद्देशपूर्वकं नैव प्रमाद्यतीति॥

इयमेव श्रद्धास्मदाधारस्तंभो भवतीत्यवोचम्॥

ततोऽहं पुण्यपत्तनं गतः। एतदमौल्यकालस्य स्मृतीः सर्वा निवेदयितुमसाध्यम्। गोखलेमहाशयो भारतसंघस्य सदस्याश्च मामत्यादरेणापश्यन्। मम स्मृतौ गोखलेमहाशयो मां द्रष्टुं तान् सर्वानाह्वयत्। सकलविधान् विषयान् तैः सह निरातंकं मयालपितम्॥

मया भारतसेवासंघः प्रवेष्टव्य इति गोखलेमहाशयस्य तीव्रेच्छासीत्। ममापि तथैवासीत्। परन्तु मम संघस्य च ध्येयानां कार्यानुष्ठानरीतेश्च बहुव्यत्यासस्य विद्यमानत्वात् संघप्रवेशो नोचित इति सदस्यानां प्रत्यभात्। स्वकीयनीतिनियमानां विषये यद्यप्यहं निश्चितमनास्तेषां नीतिनियमान् सोढुमहं सज्जस्थित इति गोखलेमहाशयो व्यश्वसत्॥

किंत्वितरेषामभिमतस्य योग्यं मूल्यं प्रदातुं यूयं सिद्धा इति संघस्य सदस्यानां न विदितम्। ते किल नीतिनियमानां विषये हठवादिनो भवन्ति । ते भवन्तं स्वीकरिष्यन्तीत्याशा मम विद्यते। कदाचित्तथा न कुर्वन्ति चेत्तेषां युष्मासु गौरवं वादरो वा नास्तीत्येकं क्षणमपि मा मन्यताम्। युष्मासु तैर्निविष्टगौरवस्यापायः संभवेदिति ते भवतः प्रवेशाय विकल्पन्ते । परन्तु ते भवन्तं प्रवेशयितुमेव। वयं तावद्भवन्तं सदस्य इत्येव मन्यामहे इति गोखलेमहाशयोऽब्रवीत्॥

अहं गोखलेमहाशयस्य ममोद्देशान् न्यवेदयम्। मां सदस्यत्वेन परिगृह्णातु वा न वा मम फीनिक्स्कुटुम्बेन गुजरातदेशे क्वचिदाश्रमं परिकल्प्य तिष्ठेयमित्याशा ममासीत् । यतोऽहं गुजरातीदेशस्थो गुजरातसेवाकरणाद्देशसेवाकरणमित्येष एव मम साधुमार्ग इत्यवेदिषम्। गोखलेमहाशयायायमभिप्रायोऽरोचत ॥

उक्तं च तेन यथा – अवश्यमेव भवता तथा कर्तव्यम्। सदस्यैः सह युष्मत्संलापस्य फलं यद्वा तद्वा भवतु। आश्रमस्य व्ययद्रव्यं मत्सकाशादेव ग्रहीतव्यम्। आश्रमो मदीय इत्येव भावयामीति ॥

मम हृदयमानन्दभरितोऽभूत् । द्रव्यसंग्रहपरिश्रमोऽपास्तः । अहमेक एवास्मिन् कर्मणि प्रवर्तितुमावश्यकता नास्ति। यदा यदाहं कष्टे पतितस्तदा तदा कष्टपरिहारकर्ता एको मिलितः। सर्वमेतत् हर्षदायकमासीत्॥

सर्वतोऽस्मात् मम मनःस्थितो भारोऽवतीर्णः। दिवंगतो डॉ. देव आहूतः। संघस्यायव्ययपुस्तकेषु मम नाम्नैकं खातापुटं निवेश्याश्रमस्य सार्वजनिककार्यस्य च व्ययार्थं मयापेक्षितद्रव्यं दातव्यमित्याज्ञप्तम्॥

अहं शांतिनिकेतनं गन्तुं सज्जीकृतवान् । प्रस्थानात्पूर्वं गोखलेमहाशयः कतिपयमित्राणि वृत्वा वृत्वा कूटमेकं पर्यकल्पयत्। ममेष्टाहारपदार्थाः फलानि बीजानि चानायिताः। प्रकोष्ठाच्चतुष्पददूरे कूटो मिलितः। तावद्दूरं परिक्रम्य कूटे भागं वोढुं न शक्यमासीत्। मम निविष्टप्रेमातिशयो नागतः। परन्तु मूर्च्छां गत इति पश्चाद्वोढव्य आसीत् । इदं प्रथममेव तथा न मूर्च्छितः । पुनश्चैतन्यं प्राप्तः। कूटश्चालनीय इति वाचं प्रैषयत्॥

अयं कूटः संघस्यातिथिगृहस्याभिमुखे स्थितस्यानावृतप्रदेशे कतिपयमित्राणि मिलित्वा

भूचणकं खर्जूरं तत्काललभ्यफलानि च सेवमानः परस्परं मनोगतं सर्वं वदन् कथालापानकुर्वाणश्च कालातिवाहनं करोति । तदर्थमेव परिकल्पितोऽयम् ॥

परन्तु मूर्च्छापतनं मम जीवने सामान्यविषयो न परिणतः ॥

तृतीयोऽध्यायः

तत् किं भर्त्सनम्

अहं मोहमयीतो राजकोटं पोरबंदरं च गतः । तत्र मया हि मम भ्रातृजायेतरबन्धवश्च द्रष्टव्या आसन् ॥

दक्षिणाफ्रिकायां सत्याग्रहयुद्धकालेऽहं मम वेषं यथाशक्यं नियमकर्मकराणां वेषवत्परिकल्पितवान् । ‘ इंग्लेंड ’देशेऽप्ययमेव वेषो धार्यते स्म । मोहमय्यां नौकावतरणकाले धारणाय मन्निकटे ‘ काठियावाडी ’वेषः स्थितः । एका हस्तांगिकैकं धोत्रमेका दीर्घांगिकापि चैकं श्वेतं शिरोवेष्टनम् । सर्वमेतद्हिन्दुस्थाने यंत्रनिर्मितकर्पटनिष्पन्नमासीत् । परंत्वहं तृतीयश्रेण्यां प्रयाणं कुर्वाण इति दीर्घांगिका शिरोवेष्टनं भार इति विमुच्य ‘काश्मीरीटोपी’मक्रैषम् । एवंविधवेषधारकं द्रष्टॄणां दीनोऽयमिति गणनायां नैव संशयोऽभूत् ॥

तदा ग्रंथिज्वरे–(प्लेग) प्रसृते तृतीयश्रेणीप्रयाणिकान् वैद्याः परीक्षन्ते स्म । मम स्वल्पज्वर आसीत् । मम शरीरस्योष्णतां दृष्ट्वा वैद्यो राजकोटे वैद्याधिकारी द्रष्टव्य इत्युक्त्वा मम नामधेयमलिखत् ॥

अहं वढवाणद्वारा प्रयाणं करोमीति वृत्तांतस्तेनापि प्रेषित इति प्रतिभाति । यतस्तत्रत्यप्रसिद्धप्रजासेवकः सौचिको मोतीलालमहाशयो लोहशकटीस्थानवेदिकायां मां दृष्ट्वा वीरमगामशुल्कघट्टस्य विचारमनेन कारणेन प्रयाणिकैरनुभूयमानसंकटानि च मह्यं न्यवेदयत् । मम ज्वरेण ग्रस्तत्वाद् भाषितुं नैवेच्छासीत् । अतः संक्षिप्तमुत्तरं दत्त्वा तत्प्रसंगं समापयितुं मया प्रयतितम् । एतदुत्तरं एवंविधप्रश्नरूपमासीत् । यूयं कारागृहं प्रवेष्टुं सज्जस्थिताः किमिति । तेन च दृढतापूर्वमुत्तरं दत्तं यथा यदि भवानस्मत्पुरोगमः स्यात्तदा वयं कारागृहमवश्यमेव गमिष्यामः । यतो वयं ‘ काठियावाडी ’ जनास्ततो भवदुपरि प्राथमिकोऽधिकारोऽस्मदीय एव । भवन्तमत्र प्रयाणच्छेदं कर्तुं न वयमपेक्षामहे । परन्तु भवान्पुनरागमनेऽत्र स्थास्यतीति वाग्दानमिच्छामः । अस्मद्युवकानां कार्यमुत्साहं च दृष्ट्वा संतुष्टा भविष्यथ । भवतास्मदाह्वानमेव निरीक्ष्यते । विलंबं विनागत्य संमिलिष्याम इति विश्वासमस्मासु कुरुध्वमिति ॥

मोतीलालमहाशयेनाहं मनसा सूचितः । तस्य सहवासिनामेकस्तं स्तुवन्नाह यथा—सौचिकोऽयमस्मन्मित्रम् । किंत्वयं स्वकार्ये कियद्घटक इति चेद्दिनस्यैकां होरां कार्यं कृत्वैकस्मि-

Funding by IKS-MoE

न्मासे सौलभ्येन पंचदशरूप्यकान् संपादयति । तेनापेक्षितं च तावदेव । अवशिष्टकालं सर्वमपि सार्वजनिकसेवायां विनियुङ्क्ते । शिक्षितपाठलेखनानां सर्वेषां पुरोगामी स्थित्वास्मांल्लज्जयतीति ॥

ततो मोतीलालमहाशयस्य मम च गाढपरिचयो यदाभूत्तदास्यां स्तुतावतिशयोक्तिः कापि नासीदिति ज्ञातम् । सत्याग्रहाश्रमस्य स्थापनानंतरं प्रतिमासं कतिपयदिवसांस्तत्र नीत्वा तत्र बालकानां सीवनकार्यं शिक्षयित्वाश्रमस्य कर्पटेषु कतिपयान् स्वतः सीव्यति स्म । वीरमगामनगरस्य विषयं तत्र प्रयाणिकैरनुभूयमानानि संकटानि च प्रत्यहं मम निवेदयति स्म । पान्थानां संकटं दृष्ट्वा सोढुमेषां केवलमसाध्यमासीत् । आकस्मिकं जाड्यमेनं प्रथमयौवने गृहीत्वा चलितम् । एतदनंतरमवशिष्टानां वढवाणजनानां जीवनं नष्टकल्पमासीत् ॥

राजकोटं प्राप्य परेऽहनि प्रातःकालमेवाहं तत्रत्यं वैद्याधिकारिणमपश्यम् । अयं लज्जितो मम परीक्षकस्योपरि क्रुद्धोऽभवत् । एतदनावश्यकमासीत् । यतः परीक्षकः स्वकर्तव्यमकरोत् । नान्यत् । कोऽहमित्येतत्तस्य न विदितम् । कदाचिद्विदितवानपि तस्मिन् रीत्यंतरेण न वर्तितुमर्हः । वैद्याधिकारी मां स्वपार्श्वं नागच्छति तथा कृत्वा मत्समीपमेकं परीक्षकं प्रेषयति स्म ॥

एतादृशसंदर्भेषु तृतीयश्रेणीप्रयाणिकानां परीक्षणमारोग्यसंरक्षणदृष्ट्यावश्यकमासीत् । महापुरुषा इच्छापूर्वकं तृतीयश्रेण्यां प्रयान्ति चेन्निष्किंचनानामन्वयं गच्छतां नियमनिबंधनानां सर्वेषामपि स्वयं मनःपूर्वकमेव वशीभूय तैः स्थातव्यम् । अपि चाधिकारिभिर्विषयेऽस्मिन् निष्पक्षपातिभिर्भवितव्यम् । ममानुभवं वक्ष्यामि । अधिकारिणस्तृतीयश्रेणीप्रयाणिकान् स्वयमिव तेऽपि मनुष्या इत्यगणयित्वा मेषवत्तान् पश्यन्ति । तैः सह तिरस्कारेण भाषन्ते । तेषामुत्तरेभ्यो न श्रोत्रमर्पयन्ति । तृतीयवर्गप्रयाणिकं भृत्यवदधिकारिण आज्ञां निर्वाहयेरन् । अधिकारी तं ताडयेत् । तस्माद्द्रव्यमपहरेत् । तं यथाशक्ति क्लेशयित्वा तस्य प्रयाणानुज्ञापत्रिकां दद्यात् । बहुवारं तस्य लोहमार्गशकटीप्रयाणमवरोधयेत् । एतत्सत्यं मया मम नेत्राभ्यामेव दृष्टम् । विद्यावतां धनिकानां कतिपये निष्किंचनपदमवतीर्य तृतीयश्रेण्यां प्रयाणं कृत्वा दरिद्राणामलभ्यसौकर्याणि निराकृत्य परिहार्य संकटानामन्यायस्याविनयस्य च शिरोऽनमयित्वा तानि निर्मूलयितुं यावद्यत्नः क्रियते तावत्कापि सुधारणा न साध्या भवति ॥

अहं काठियावाडदेशे 'यत्र कुत्रापि गतो वीरमगामनगरस्य शुल्कघट्टस्य विचारे जनस्य दुःखख्यापनमशृणवम् । अतोऽहं लॉर्डविलिंग्डन्कृतसूचनामनादृत्य प्रवर्तितुं तत्क्षणमेव निरचैषम् । एतद्विषयसंबद्धप्राप्तसर्वपत्राणि मेलयित्वा दुःखख्यापनस्याधारोऽस्त्यतिविश्वासं प्राप्य मोहमयीराज्येन पत्रव्यवहारं कृतवान् । लॉर्डविलिंग्डनस्याप्तकार्यदर्शिनं दृष्ट्वा राज्याध्यक्षं च विलोकितवान् । अस्मिन्विषये निजसहानुभूतिं व्यक्तं चकार । परन्तु प्रमादं दिल्लीराज्यस्योपरि समर्पितवान् । कार्यदर्शिनोक्तं यथा – अस्मदीयहस्तवशे स्थितं चेच्छुल्कघट्टमितः पूर्वमेवापास्तमभविष्यत् । भवता भारतराज्यस्य पुरस्ताद् गन्तव्यमिति ॥

Funding by IKS-MoE

अहं भारतराज्यस्य पत्रमलेखिषम्। परंत्वेतत्पत्रमागतमिति विनान्यदुत्तरं न लब्धम्। अहं लॉर्डचेम्सफर्डराज्यप्रतिनिधिं यदा दृष्टवांस्तदैवैतत्संकटं परिहृतमभूत्। अहमेतत्संबद्धविषयान् सर्वानस्मै न्यवेदयम्। तदाश्चर्यभरितोऽभूत्। तस्य विरमगामनगरविषय एव न विदितः ॥

मम निवेदनं सह तेन कृत्वा वीरमगामनगरस्य संबद्धपत्राणि सर्वाण्यपि ध्वनियंत्रद्वारानाय्यन्त। अधिकारवर्गस्थाः किमपि समाधानं वक्तुसमर्थाश्चेच्छुल्कघट्टं निष्कास्यत इति वाचं ददौ। तद्दर्शनानंतरं कतिपयदिवसाभ्यंतरे वीरमगामनगरशुल्कघट्टो निष्कासित इति वृत्तान्तं वृत्तपत्रेष्वपठम् ॥

एषा घटना हिंदुस्थाने सत्याग्रहस्योदय इत्यहमगणयम्। यतो यदाहं मोहमयीराज्याध्यक्षं द्रष्टु गतस्तदा कार्यदर्शी बगसारे (काठीयावाडदेशे तथा ग्रामः) दत्तभाषणं सत्याग्रहविषये मयोक्तमाकर्ण्य तथाविधभाषणं न हि मेऽरोचतेत्यब्रवीत् ॥

पृष्टं च तेन यथा—अयं भयोत्पादः किम्। प्रबलराज्यं भर्त्सनानां शिरो न नमयतीति किं भवान् मन्यते—इति ॥

प्रत्युक्तं मया यथा—एष भयोत्पादो न हि। एतत् प्रजाशिक्षणम्। निजसंकटानि दूरीकर्तुँ न्याय्यतां सर्वमिव जनस्य निवेदयितुं मादृशानां धर्मः। प्रजास्वातंत्र्यमर्जनीयमिति इच्छज्जनांगं तत्स्वातंत्र्यसाधनाय सर्वमार्गानुपायांश्च जानीयात्। सामान्यतः एषूपायेषु पशुबलमेवान्तिमोपायः। सत्याग्रहस्तावच्छुद्धाहिंसात्मक उपायः। तस्योपयोगं तस्य मर्यादाश्च जनस्य विशदीकर्तुँ मम कर्तव्यमित्यहं मन्ये। ‘ब्रिटिश’राज्यं प्रबलराज्यमित्यत्र न संदेहः किन्तु सत्याग्रहः समस्तसंकटानां दिव्यौषधमिति न मे संदेह इति ॥

बुद्धिमान् कार्यदर्शी शिरश्चालयित्वा संशयं सूचयन् द्रक्ष्याम इत्युवाच ॥

चतुर्थोऽध्यायः

शांतिनिकेतनम्

अहं राजकोटाच्छांतिनिकेतनं गतः। तत्रत्याः शिक्षका विद्यार्थिनश्च ममोपरि वात्सल्यवृष्टिं पातयामासुः। अस्मिन्स्वागतसरलता कलाकौशल्यं प्रेम च सम्यगेकत्रस्थितानि। अत्रैवाहं प्रथमतः काकासाहेबकालेलकरमहाशयं दृष्टवान् ॥

कालेलकरमहाशयं ‘काकासाहेब’ इति कस्मादाह्वयन्ति स्मेति तदानीं मम न विदितमासीत्। ‘इंग्लेंड’देशे यदाहं स्थितस्तदैव केशवरावदेशपांडेमहाशयोऽप्यासीत्। तेषां मम चागाधमैत्र्यासीत्। एष वटोदरसंस्थाने गंगानाथविद्यालयं यदा चालयति स्म तदा गृहस्य वातावरणं

कल्पयितुं शिक्षकानां बंधुत्वनामानि ददाविति मम पश्चाद्विदितमासीत् । तत्रैव शिक्षकस्य श्रीकालेलकरमहाशयस्य ‘ काका ’ (पितृव्यः) इति फडकेमहाशयस्य (मातुलस्य) ‘ मामा ’ इत्यपि च हरिहरशर्मणः (भ्रातुः) ‘ अण्णा ’ इति च नामधेयानि रूढिमागतानि । इतरे चेदृशान्येव नामान्यलभन्त । आनन्दानन्दस्वामी ‘ काका ’महाशयस्य मित्रम् । पटवर्धनमहाशयो ‘ मामा ’महाशयस्य सुहृत्त्वेन तदनन्तरमेतत्कुटुंबं प्रविष्टः । एते सर्वेऽपि कालक्रमेण मदीयसहकार्यकारिणोऽभवन् । श्रीदेशपांडेमहाशयः ‘ साहेब ’ इत्याहूयते स्म । विद्यालयो यदा व्यरमत्तदैतत्कुटुंबं च निवृत्तम् । परन्त्वेते निजाध्यात्मिकसंबन्धं निजरूढनामानि वा नात्यजन् ॥

‘ काकासाहेब ’ अन्यासां संस्थानामनुभवं लब्धुं प्रस्थितः । यदाहं शांतिनिकेतनं गतस्तदा स तत्रासीत् । तस्यैव भ्रातृवर्गस्य चिंतामणिशास्त्रिणस्तत्रासन् । उभावपि तत्र संस्कृतशिक्षणे साहाय्यमकुरुताम् । शांतिनिकेतने फीनिक्सकुटुंबस्य प्रत्येकवसतिर्दत्ताभवत् । ‘ मगनलालगांधि ’ महाशयोऽस्य कुटुंबस्य मुख्यस्थोऽभवत् । फीनिक्साश्रमस्य सकलनियमान् स्वल्पमपि स्खलितं विनात्रापि निर्वाहयति स्म । सोऽयं निजप्रेम ज्ञानमभिनिवेश एतैर्निजसौरभं शांतिनिकेतने सर्वत्र प्रसारितवानित्यहमपश्यम् ॥

‘ ॲन्ड्रुझ ’ महाशयः तत्रासीत् । तत्रैव ‘ पियर्सन ’ अपि । अस्माकं गाढपरिचयं गतानां बंगशिक्षकाणां मध्ये ‘ जगदानंदबाबु-नेपालबाबु-संतोषबाबु-क्षितिमोहनबाबु-नागेनबाबु-शरदबाबु ’ अपि च ‘ कलिबाबु ’ सहस्थिताः ॥

मम पद्धतिमनुसृत्याहं तत्क्षणमेव शिक्षकैर्बालकैश्च मिलितः स्वावलंबनस्य विचारं चर्चितवान् । शिक्षका बालकाश्च वेतनग्राहिणं पाचकं त्यक्त्वा निजाहारं स्वयमेव साधयन्ति चेत्तद्बालकानां देहारोग्यदृष्ट्याध्यात्मिकदृष्ट्या चाहारनियमसाधनं शिक्षकाणां शक्यं भविष्यति । एतदेव बालकानां स्वावलंबनस्य वस्तुपाठो भविष्यतीति शिक्षकाणामहमवोचम् । तेषां कतिचिदस्मदादिसूचनायाः संमतिं ददुः । बालकाश्च नान्यदर्थेऽपि स्वाभाविककुतूहलेन सूचनामिमामादरेण स्वीचक्रुः । एवमस्माभिः पाकप्रयोगः समारब्धः । अहं कवेरभिप्रायं पृष्टवान् । स च शिक्षकाणां संमतौ मत्तः कोऽपि प्रत्यूहो नास्तीत्यवोचत् । बालकानां स्वराज्यसाधनबीजमस्मिन्प्रयत्ने स्थितमित्यब्रवीत्सः ॥

‘ पियर्सन ’ अस्य समारंभस्य विजयार्थे स्वदेहं कर्शयितुं प्रवृत्तः । त्रिकरणशुद्ध्यात्रासक्तोऽभूत् । शाकच्छेदाय कृतं मेलनं धान्यप्रक्षालनायान्यत् । एवं रीत्या मेलनानि संवृत्तानि । नगीनबाबुमहाशय इतरे च पाकशालां तत्पार्श्वस्थलं च निर्मलं स्थापयितुं भारमूढवंतः । खनित्रहस्तैरिव कार्यकारणं वीक्ष्य संतुष्टोऽभवम् ॥

किन्तु पंचविंशत्युत्तरशतानां बालकानां तदीयशिक्षकाणां च देहश्रमपूर्णं कार्यं मत्स्यानां जलमिव संप्रविष्टं भवतीति निरीक्षितुं शक्यते किम् । एतद्विषयिणी चर्चा प्रत्यहं भवति स्म ।

कतिचिज्जनाः शीघ्रमेवायासचिह्नानि प्रदर्शयितुं प्रवृत्ताः । किन्तु पियर्सनमहाशय आयासग्राही पुरुषो न । सर्वदापि मन्दहासेन पाठशालाया आवरणकमपि कार्यं कुर्वाण एव स्थितः । महन्महद्भांडप्रक्षालनभारं स वहति स्म । एतत्कार्यकर्तुर्मेलनस्यायासपरिहाराय बालकानामन्यन्मेलनं तस्य पुरस्तात् 'सितार'वाद्यं ध्वनयति स्म । सर्वेऽपि समरीत्योत्साहेन श्रद्धया च कार्यं कर्तुमारभन्त । शांतिनिकेतनं कार्यशीलतया मधुकोशेनेव झंकारं करोति स्म ॥

ईदृक्परिवर्तनानि यदा प्रारभन्ते तदा विवृत्ताः प्रयान्ति । पाकशालाकार्यकारिणः स्वयमेवं सर्वं निर्वर्तयन्ति स्म । अपि च पाकोऽपि साधारण आसीत् ॥ उपस्करादिकं नोपयुज्यते स्म । शालिधान्यं मुद्गशाकं गोधूमपिष्टं चैकदा बाह्यचुल्लिकायां पाचयन्ति स्म । शांतिनिकेतनस्य बालका अपि बंगपाकशालायामेतत्सुधारणमेवारब्धुमुद्दिष्टा नूतनपाकशालामकल्पयन् । एकद्विशिक्षकाः कतिपयविद्यार्थिनश्चैतच्चालयन्ति स्म ॥

किन्तु स्वल्पकालानंतरमिमां नूतनपद्धतिं व्यरमयन् । स्वल्पकालमेतत्पाकप्रयोगेन सा प्रसिद्धसंस्थानेन किंचिन्नष्टमन्वभूदिति मेऽभिप्रायः । अस्माज्जातानुभवेनोपाध्यायानां लाभदायकेन भवितव्यम् ॥

अहं शांतिनिकेतने कतिचिद्दिनानि स्थातुमना आसम् । किन्तु दैवसंकल्पोऽन्यथाभवत् । एकसप्ताहाभ्यन्तरे पुण्यपत्तनाद् गोखलेमहाशयस्य मरणवार्ता तंत्रीद्वारा प्राप्ता । शांतिनिकेतनं शोकमग्नमासीत् । तत्रत्याः सर्वेऽपि मां समाधातुमागताः । देशेनानुभूयमानं नष्टं प्रति दुःखसूचनायाश्रमस्य देवालये सभा मिलिता । सभाकार्यं गंभीरतया संवृत्तम् । तस्मिन्नेव दिनेऽहं भार्यया मगनलालमहाशयेन च सह पुण्यपत्तनं प्रति प्रस्थितः । अवशिष्टाः सर्वे शांतिनिकेतने स्थिताः ॥

ॲन्ड्रुझमहाशयः मया सह बर्दवानपर्यन्तमागतः । तेनाहं पृष्टो यथा भारतदेशे सत्याग्रहाचरणकाल आगमिष्यति किम् । आगमिष्यति चेत् कदेति किं भवाञ्जानातीति ॥

प्रत्युक्तं मया यथा—वक्तुमिदं कष्टम् । एकवर्षपर्यन्तं मया न किंचित्कर्तव्यम् । यतोऽनुभवसंपादनायास्मिन्देशे मया संचरितव्यम् । अस्मिन्काले सार्वजनिकविचारानधिकृत्य ममाभिप्राया न प्रकाशनीया इति गोखलेमहाशयेन पृष्टस्तथेति वाग्दानं कृतवानस्मि । एतद्वर्षान्तेऽपि भाषितुं ममाभिप्रायान्प्रकटीकर्तुं च नातुरोऽस्मि । तस्मान्मन्ये इतः पंचवर्षाणि सत्याग्रहाचरणस्य संदर्भो न भविष्यतीति ॥

'हिन्दुस्वराज' इति पुस्तके लक्ष्यमाणान्मम कतिपयाभिप्रायान् दृष्ट्वा एकवर्षपर्यन्तं भारतवर्षे भवतः स्थित्यन्तरं भवदभिप्रायाः स्वयमेव सम्यग्भविष्यन्तीति वदति स्मेत्येतदस्मिन् संदर्भे निवेदयितुमर्हम् ॥

Funding by IKS-MoE

पंचमोऽध्यायः

तृतीयश्रेणीप्रयाणिकानां संकटानि

प्रयाणानुज्ञापत्रिकां क्रेतुमपि तृतीयश्रेणीप्रयाणिकानां संभवत्संकटानि वयं बर्दवाननगरे स्वतोऽन्वभूम । तृतीयश्रेणीपत्रिकामियच्छीघ्रं नैव दद्म इत्यूचुरस्माकम् । अहमग्निरथविरामस्थानाधिकारिणं गतः । कोऽपि दयालुस्तस्य स्थानं प्रादर्शयत् । तत्पार्श्वं गत्वास्मत्संकटे प्रोक्ते सोऽपि तदेव प्रत्युत्तरं ददौ । प्रयाणानुज्ञापत्रिका प्रदानगवाक्षे विवृतेऽहं प्रयाणानुज्ञापत्रिकां क्रेतुं गतः । परंतु तद्ग्रहणं सुकरं नासीत् । तत्र पशुबलं विना न किंचिदासीत् । इतरानलक्षयित्वा पुरः पुरोऽतिरभसेन गच्छन्तो जना मां पश्चाद्विक्षिपन्त आगताः । अतः प्रथमतो मिलितसंघे प्रयाणानुज्ञापत्रिकां ग्रहीतुं प्रायोऽहमेवान्तिमोऽभवम् ॥

अग्निरथः आगतः । तदन्तःप्रवेशोऽप्यन्यत्संकटमासीत् । शकटीमारूढानामारोढुं प्रयतमानानां च परस्परनिन्दनं रभसेन क्षेपणं चलन्ति स्म । वयं वेदिकायामितस्ततः प्रधाविताः । किन्तु प्रतिशकटीद्वारेऽप्यत्र नास्त्यवकाशोऽत्र नास्त्यवकाश इत्येव प्रत्युक्तम् । अहं अग्निरथरक्षकस्य पार्श्वं गतः । यत्र शक्यं तत्र गत्वोपविशेत् । नोचेदन्यस्मिन् शकटे गन्तव्यमित्युवाच । किन्तु मम त्वर्यं कार्यमस्तीति नम्रभावेनावोचम् । इदं श्रोतुं नासीदवसरः । अहं दिग्भ्रांतोऽभवम् । यत्र शक्यं तत्र गत्वोपवेष्टव्यमिति मगनलालमहाशयमुक्त्वाहं मम भार्यया सह मध्यमकक्षाशकटे निषण्णः । अस्मानुपविष्टान् अग्निरथरक्षको ददर्श । 'आसनसोल'शकटीस्थानेऽधिकभाटकं ग्रहीतुमागतः । स मया प्रोक्तो यथा — अस्माकं स्थानप्रदानं युष्मत्कर्तव्यमासीत् । अस्माकं स्थलं दुर्लभमित्यत्रोपविष्टाः स्मः । तृतीयश्रेण्यामवकाशो दीयते यदि तत्र गन्तुं संतोष एवेति ॥

मया सह चर्चां मा कुरुध्वम् । न मे शक्यं वः स्थलं दातुम् । अधिकभाटकं दीयताम् । नो चेदवतीर्य गन्तव्यमित्यब्रवीत् सः ॥

मया कथंचित्पुण्यपत्तनं गन्तव्यमासीत् । अतोऽग्निरथरक्षकेन सह कलहायितुं नैव सज्जस्थितः । तदुक्तप्रकारेण पुण्यपत्तनपर्यन्तं यावदधिकं तावददाम् । किंत्वेतदन्याय्यं मर्मघातकमभवत् ॥

प्रातर्वयं 'मुगलसराई' प्राप्ताः । मगनलालमहाशयस्तृतीयश्रेण्यां स्थानं लब्धवान् । वयं तच्छकटं गताः । तत्राहं प्रयाणानुज्ञापत्रिकापरीक्षकस्य सर्वविषयान्निवेद्य 'मुगलसराई'स्थाने श्रेणीपरिवर्तनाय साक्षिपत्रं विलिख्य दीयतामित्यपृच्छम् । अस्य स न संमेने । 'रेल्वे' अधिकारिणामहमलिखम् । ततः प्रत्युत्तरमागतम् । यथा साक्षिपत्रं विनाधिकभाटकं निवर्तयितुं नास्माकं पद्धतिरस्ति । केवलं युष्मद्विषये पद्धतिरियं लुप्यते । किन्तु बर्दवानात् मुगलसराईपर्यन्तमधिकभाटकं यद्दत्तं तन्न प्रतिदीयते इति ॥

एतदनन्तरं मम तृतीयश्रेणीप्रयाणस्यानुभवा बहवः समभवन् । तत्सर्वमुल्लिख्यते चेत्तदेव पुस्तकं भवति । एषु प्रकरणेषु संदर्भे प्राप्ते सति किंचित् किंचिल्लेखितुं शक्यम् । मम शारीरिकदौर्बल्येन तृतीयश्रेणीप्रयाणमसाध्यं भवति । अयं मेऽत्यंतविषादहेतुर्यद्दौर्बल्यं मे तृतीयश्रेणीप्रयाणं त्याजयतीति ॥

तृतीयश्रेणीप्रयाणिकानां संकटानां 'रेल्वे' अधिकारिणां निरंकुशप्रवर्तनमेव कारणमित्यत्र न संदेहः । किन्तु प्रयाणिकानामविनीतवृत्तिरशौचपद्धतयः स्वार्थपरताज्ञानं च लघूनि कारणानि भवन्ति । अत्र खेदस्य कारणमेतद्भवति यथा वयमौद्धत्येन स्वार्थपरतया च वर्तामह इति तेषां न विदितमिति । स्वयं यद्यत् क्रियते तत्सर्वं स्वाभाविकमेवेति तेषां प्रतिभाति । एतत्सर्वस्यापि मूलकारणं सुशिक्षितमिति मन्यमानैरास्थीयमानमौदासीन्यमेव ॥

यदा वयं कल्याणपत्तनं प्राप्तास्तदा परमायासयुक्ता अभूम । अग्निरथविरामस्थलात् जलं गृहीत्वा मगनलालमहाशयोऽहं च स्नानमकरवाव । मम भार्यायाः स्नानाय परिकल्पयितुमुद्युक्तान् भारतसेवासंघस्य कोलमहाशयः परिचीयास्मत्पार्श्वमागतः । सोऽपि पुण्यपत्तनगाम्यासीत् । तेनोक्तं यथा मम भार्यां द्वितीयश्रेणीस्नानगृहमानेष्यामीति । तस्यादरेण कर्तुमुद्यतस्य साहाय्यं स्वीकर्तुं विकल्पिंतवान् मम भार्याया द्वितीयश्रेण्यां स्नातुमधिकारो नास्तीति मया विदितमासीत् । परंत्वस्मिन्ननुचिते कार्ये भागी संवृत्तः । सत्योपासकस्यैतदनुचितमित्यहमजानम् । तत्र गत्वा स्नानं कर्तव्यमिति भार्यातुरा स्थितेति न । परं पत्युः पत्न्यां यः पक्षपातः स तस्य सत्यपातं जिगाय । सत्यस्य मुखं मायायाः सौवर्णाच्छादनस्य पश्चान्निगूहितमित्युपनिषत् ॥

षष्ठोऽध्यायः

प्रेमोत्पादने प्रयत्नः

पुण्यपत्तनमागत्य सर्वासां श्राद्धक्रियाणां समाप्त्यनन्तरं वयं सर्वे भारतसेवासंघस्य भविष्यद्वृत्तिं स मया प्रवेष्टव्यो न वेति चर्चयितुं प्रवृत्ताः । एतत्प्रश्ननिर्धारणं मम सूक्ष्मकार्यत्वेन पर्यणमत । गोखलेमहाशयस्य जीवितान्तपर्यन्तं मम संघसदस्यत्वं नावश्यकमासीत् । गोखलेमहाशयस्येच्छानुसारेण मम वर्तनं पर्याप्तमासीत् । इयं परिस्थितिर्मम सुखदायिन्यासीत् । क्षुब्धार्णवे नौकानयनाय यथा समर्थो नायकोऽपेक्ष्यते भरतखंडस्य सार्वजनिकजीवने मम मार्गदर्शी कश्चिदपेक्षित आसीत् । गोखलेमहाशयो ममगार्गदर्श्यासीत् । तस्याश्रयेऽहं सुरक्षितो निर्भयश्चासम् । अद्य तस्याभावाद् भारो ममोपर्येव पतितः । संघप्रवेशाय प्रयतनं मम कर्तव्यमिति मन्मतमासीत् । यतः गोखलेमहाशयस्यात्मन एतेन

संतोषो भविष्यतीति मम प्रत्यभात्। ततोऽहं निःसंकोचं दृढतापूर्वकं संघस्य प्रीत्युत्पादनाय प्रयत्नं कर्तुमुद्युक्तः ॥

अस्मिन् समये प्रायः सर्वे संघसदस्याः पुण्यपत्तने स्थिताः। तत्पार्श्वमहं गत्वा विज्ञाप्य तेषां मद्विषये स्थितं संशयं दूरीकर्तुमुद्युक्तोऽभवम्। परन्तु तेषु भिन्नोऽभिप्राय आसीदिति मम प्रत्यभात्। एकः पक्षो मां प्रवेशयितुं सज्जस्थित इतरपक्षायेदं सर्वथा नारोचत। द्वावपि पक्षौ मयैकरीत्याधिकप्रेमशालिनावभूतामिति मम विदितमासीत्। परन्तु तेषां स्वसंघभक्तिस्ततोऽप्यधिकासीत्। यद्वा तद्वा भवतु मयि निविष्टप्रेमापेक्षयाल्पीयान् नासीत् ॥

ततोऽस्मद्विषयचर्चासु नासीदवकाशो मनःकषायस्य। तत्केवलं मुख्यतत्त्वानां संबद्धमासीत्। मम विरुद्धपक्षीयानां स्वाभिप्राया मदभिप्रायाश्चानेकमुख्यविचारेषूत्तरदक्षिणध्रुवसदृशत्वान्मम संघसदस्यत्वे संघसंस्थापनाया मुख्योद्देशानामेव भंगप्राप्तिर्भविष्यतीति संभवः प्रतिभाति स्म। स्वभावत इदं तेषां सहनशक्तिमतिचक्राम ॥

बहुचर्चासमाप्तौ वयं पृथग्भूताः । अन्तिमनिर्णयायान्यां वेलां मिलितव्यमिति निश्चितमासीत्। गृहं गच्छन्नहमालोचनायां मग्नः। संघस्य सदस्येष्वधिकजनानामभिमतबलात् संघप्रवेशः किं युक्तः। एवं कृते गोखलेमहाशये निविष्टगुरुभक्तिः किं भग्ना न भविष्यति। मम सदस्यत्वविषये सांघिकेष्वेतावति तीक्ष्णमतभेदे सति संघप्रवेशस्योद्देशं स्वयं परित्यज्योभयपक्षीयानुभयसंकटादुत्तारयितुमत्युत्तमो मार्ग इति मम स्पष्टं प्रत्यभात्। इत्थमनुष्ठानादेव गोखलेमहाशयविषये मम धर्मपालनं भविष्यतीत्यालोचयम्। एतन्निर्धारणमकस्मान्मम मनस्यस्फुरत्। तत्क्षणमेवाहं श्रीश्रीनिवासशास्त्रिणा मम संघप्रवेशनाय सभा नैव मेलनीयेत्यलिखम् । विरुद्धपक्षीयेभ्यो मे निर्णयोऽयमतीवारोचत । इदं तान् धर्मसंकटादुदतारयत् । एतेनास्मत्स्नेहसंबंधो गाढतरोऽभूत्। वस्तुतोऽहं संघस्य सदस्योऽभवम् ॥

अहं नियमपूर्वकं संघस्य सदस्यो भवितुं युक्त आसम् । विरुद्धपक्षीया मां प्रतिभटीकृत्य स्थिता इत्येतच्च न्याय्यमेवेति। अस्मदीयमुख्यतत्त्वानां विचारेऽस्मन्मध्ये बहलो भेद आसीदित्यनुभवेन ज्ञातम्। परन्तु एतन्मतभेदेनास्मन्मैत्र्या न्यूनता वास्मत्संबंधे कटुत्वं वा न जातम्। तदात्वादेव वयं भ्रातर इव स्थिताः। पुण्यपत्तने यत्संघभवनं तन्मे यात्रास्थानं भवतीति ॥

अहं संघस्य सदस्यो न जात इत्येतत्सत्यं किन्त्वन्तःकरणेऽहं सर्वदा सदस्य इव स्थितः। लौकिकसंबंधादाध्यात्मिकसंबंधो गरीयान्। आध्यात्मिकसंबंधेन विना भूतो लौकिकसंबंध आत्मशून्यो देह इव ॥

सप्तमोऽध्यायः

कुम्भमेलः

डॉ. मेहतामहाशयदर्शनार्थं मार्गे कलकत्तायां स्थातव्यमासीत् । अहं तत्र दिवंगतस्य भूपेन्द्रनाथवसोर्मंदिरेऽवतीर्णः । बंगदेशस्यातिथिसत्कारोऽत्र परां काष्ठामगमत् । तत्कालं मया फलाहारः सेव्यते स्म । ततः कलकत्तायां लभ्यानि फलानि सर्वाण्यपि मदर्थे संग्रहीतान्यासन् । गृहस्त्रियः सर्वां रात्रिं जागरित्वा 'बदाम–द्राक्ष' इत्यादीन् निस्तुषीकुर्वन्ति स्म । एतद्देशपद्धत्यास्वादनाय फलानि सज्जीकर्तुं प्रयतन्ते स्म । मम सहवासिभ्यो नानाविधभक्ष्याणि ददुः । यद्यपि मे मनसे रुचितः प्रेमपूर्वकः सत्कारस्तथापि द्वित्रातिथीनां सुखाय परिश्रमो मम सहनातीत आसीत् । परंत्वेतत्संकटादुत्तरीतुमुपायो न प्राप्तः ॥

रंगूननगरगामिनीं नौकामारुह्य नौकावेदिकायां प्रयाणमकरवम् । वसुमहाशयस्य मंदिरे बहुलसत्कारसंकटे पतितः । अत्र नौकावेदिकायां प्रयाणिकानां सामान्यसौकर्येऽप्यत्यंतानादरस्यानुभवभागोऽस्माकमागत आसीदेकः स्नानप्रकोष्ठो नाम । तस्यानैर्मल्यमसह्यमासीत् । मलस्थानानि दुर्गंधमलकूपा आसन् । तान्युपयोक्तुं मलमूत्राणि पादन्यसनेन वातिक्रम्य वा गंतव्यमासीत् ॥

रंगूननगरं प्राप्य तत्रत्यनौकास्वामिनः प्रतिनिधेः सर्वान्विषयान्निवेद्यालिखम् । एतत्पत्रस्य परिणामेन डॉ. मेहतामहाशय अस्मिन् विषये गृहीतपरिश्रमस्य फलरूपेण वा ममानन्तरप्रयाणं यद्यप्यहं नौकावेदिकाप्रयाणिकोऽभवं पूर्ववन्न कष्टमासीत् ॥

रंगूनपत्तनेऽपि मम फलाहारशपथो गृहस्वामिनः संकटहेतुरासीत् । परंतु डॉ. मेहतामहाशयगृहे मम गृहे यावत्स्वातंत्र्यं तावत्स्वातंत्र्यमासीत् । तत आहारस्य समृद्धिं यथाशक्यं निग्रहीतुं साध्यमभूत् । मम भोज्यपदार्थानां विषये मया न किमपि परिमाणं नियमितमासीत् । अतो मदर्थे आनायितनानाविधफलोपरिस्थमोहं मम नेत्रं जिह्वा च परित्यक्तुं न शक्तौ बभूवतुः । भोजनालयनियतः कालो नासीत् । अहं तावदस्तमयात्पूर्वं दिनस्य चरमं भोजनं समापयितुमनापि सामान्यतोऽस्मद्भोजनं रात्रावष्टनववादनात्पूर्वं न संपद्यते स्म ॥

एतद्वर्षे पंचदशोत्तरैकोनविंशतिमितेऽब्दे कुम्भमेलः प्रवर्तते स्म । अयं मेलो द्वादशवर्षानंतरमेकदा हरिद्वारे चलति । एतदुत्सवायागन्तुं मम तीव्रेच्छा नासीत् । परंतु स्वगुरुकुले स्थितं मुनशीरामजीमहाशयं द्रष्टुमातुरोऽभवम् । गोखलेसंघो महान्तं स्वयंसेवकदलं कुंभमेले सेवार्थं प्रेषितवान् । पंडितहृदयनाथकुंझरुमहाशयोऽध्यक्ष आसीत् । डॉ. देवमहाशयः वैद्याधिकारी ।

Funding by IKS-MoE

फीनिक्सदल एषां साहाय्यार्थं प्रेषयितव्य इत्यामंत्रणमागतम् । ततो मगनलालगांधिमहाशयो मत्तः पूर्वमेव गतः । रंगूनपत्तनात्प्रतिनिवर्तमानोऽहं तद्दलं प्राप्तः ॥

कलकत्तापत्तनात् हरिद्वारपर्यन्तं प्रयाणमतीव दुष्करमासीत् । कदाचिच्छकटे दीप एव नासीत् । शहरानपुरनगरेऽस्मान् वस्तुपूर्णशकटे पशुगोष्ठे वा पूरयामासुः । अस्य पटनाच्छादनाभावाच्छीर्षोपरि मध्याह्नस्य चंडातपस्तस्याधस्तात्प्रज्वलल्लोहभूमिका । एतन्मध्ये वयं दग्धा अभूम । एतादृशप्रयाणोत्पादितपिपासायां सत्यामपि युष्मदीयहिन्दुजनस्य मुसलमानसंस्पृष्टोदकं न पेयमासीत् । हिन्दुजनाज्जलप्राप्तिपर्यन्तं ते निरीक्षमाणाः स्थिताः । इमे हिन्दुजनारुग्णपतिताः वैद्या मद्यं ददातु गोमांसं चापानं वादिशतु 'मुसलमानो'ऽथवा 'ईसायी' औषधस्य मिश्रीकृत्य ददातु वा पुरः पश्चान्न पश्यन्ति न च विचारयन्ति ॥

शांतिनिकेतनेऽस्मदनुभवेन मार्गसंमार्जकस्य कार्यमेव हिन्दुस्थानेऽस्मदनिष्ठकार्यं भवतीति विदितमस्माकम् । हरिद्वारे स्वयंसेवकार्थे धर्मशालायां पटमंडपा निविष्टाः । वायुचालनाय डॉ. देवमहाशयः शौचकूपान् निखानितवंतः । एतत्प्रेक्षणाय कतिपयवेतनग्राहिणां मार्गसंमार्जकानामुपरि भारं निवेशयितव्यमासीत् । अत्र हि फीनिक्सदलस्य कार्यं लब्धम् । एषु शौचकूपेषु मलस्योपरि मृत्तिकां क्षिप्त्वा वयं तान् शुचीन् निवेशयिष्याम इत्यब्रूम । डॉ. देवमहाशयः संतोषेण संमेने । एवं सेवां करिष्याम इति वक्ता यद्यप्यहं तथापि कार्यकारको मगनलालगांधि आसीत् । मम कार्यं मुख्यतः पटमंडप उपविश्य दर्शनादानम् । मां द्रष्टुमागतैरनेकैर्यात्रिकैर्धर्मसंबद्धानितरविचारांश्चाधिकृत्य चर्चानुष्ठानमासीत् । एतदन्तरे मम स्वल्पोऽप्यवकाशो न लभ्य आसीत् । स्नान'घाट' प्रत्यप्येते दर्शनार्थिनो मामनुपतन्ति स्म । भोजनकालेऽपि ममैकस्यैव वर्तनस्यापि नावकाशं ददति स्म । दक्षिणाफ्रिकायां कृताल्पसेवया भरतखंडे सर्वत्र गंभीरपरिणामः संवृत्त इत्येवं हरिद्वारे मनसापश्यम् । परन्त्वियं स्थितिस्तावन्मम संतोषदायिका नासीत् । अहं रीतिद्वयस्य संकटमध्ये लग्न आसम् । अहं केनाप्यपरिचीयमानस्थानेऽस्मिन्देशे लक्षांतरजनैरनुभवितव्यानि कष्टनिष्ठुराणि मया सोढव्यान्यासन् । रैल्वेप्रयाणं कुर्वाणो मद्विषयज्ञानां मध्येऽहं तेषां दर्शनाकांक्षाया लक्ष्यमासम् । अनयोर्द्वयोः का परिस्थितिरतीवकरुणाजनका इति निर्धारयितुमसक्तन्मम कष्टतरं भवति । एतावति संवृत्तेऽपि जानेऽहं दर्शिनार्थिनामन्धप्रेम्णाहमनेकशः कोपं गतः । इतोऽप्यधिकवारं मनस्तापं गतः । परन्तु तृतीयश्रेणीप्रयाणमसकृत् कष्टतरं परिणतम् । तथापि ममांतःकरणशुद्धेः कारणं भवति । न तु कोपोद्रेकस्य कारणं नैव जातमिति वक्तुं शक्यम् ॥

तदात्वे मम पर्याप्ता कार्यशक्तिरासीत् । जनो मां वीथीषु प्रेक्षणक्षणमेव संभ्रमकारिणीं प्रसिद्धिमहमद्यापि न प्राप्तः । अस्मिन् गतागते मम यात्रिकाणां धर्मभावनापेक्षया तेषामजागरूकता कापट्यमालस्यं च दृष्टिपथमागतानि । तत्र साधूनां गणा उत्प्लुत्योत्प्लुत्यागताः ।

तद्दर्शनेन ते साधुभोजनं भुक्त्वा सुखशय्यायां शयित्वा संविनोदेन जीवनपथं गन्तुमेव जन्म प्राप्तमिति प्रतिभाति स्म ॥

अत्राहं गां पंचपादामपश्यम् । एतेन ममाश्चर्यमभूत् । परंत्वनुभविनो जना परमार्थं न्यवेदयन् । इदं पंचपादवराकी गौर्दुर्जनानां लोभस्याहुतिरासीत् । सजीवस्य गोवत्सस्य पादमेकं छित्वा तद्गोभुजस्य संलग्नीकृत्य यत्संवृत्तं तदेव पंचमपाद इति ज्ञातमासीत् । द्वयोः प्राणिनोः हिंसाकरणेन संवृत्तमिदं फलमज्ञानिनां द्रव्याकर्षणायोपयुक्तमासीत् । पंचपाददर्शनमनपेक्षमाणो हिन्दुः क्व वर्तते । एतादृशाद्भुतगवार्थे शक्तिमतिक्रम्य दानं कथं न करणीयम् ॥

कुम्भमेलस्य दिनमागतम् । तन्मे चिरस्मरणीयं संवृत्तम् । अहं यात्रार्थी हरिद्वारं न गतः । पवित्रतामन्विष्य तीर्थक्षेत्राणि गन्तुं मया कदापि नापेक्षितम् । तत्र प्रायेण सप्तदशलक्षजना आगता इत्यभ्यूहितमासीत् । सर्वेऽप्येते कपटिनो द्रष्टुमागता इति वक्तुं किं शक्यम् । एषां बहवो जनाः पुण्यमर्जयितुमात्मशुद्धये चागताः स्युरित्यत्र न मे संशयः । एवंविधा श्रद्धात्मनः पुरो वृद्धये सहायका भवतीति वक्तुमसाध्यं न भवेत्तथापि कष्टसाध्यमिति ब्रयात् ॥

अतोऽहं तामखिलां रात्रिं विचारे मग्नोऽयापयम् । सर्वत्रप्रसृतकापट्यमध्ये स पवित्रात्मा स्थितः । भगवतो दृष्ट्या स निष्कल्मषोऽभूत् । हरिद्वारं प्रति यात्रागमनमेव पापकृत्यं चेदहं लोकानां पुरस्तादभिप्रायमेतं प्रकटीकृत्य कुंभदिनमेव हरिद्वारं त्यक्तवान् । हरिद्वारं कुंभमेलं च यात्रार्थिनागमनं निष्कल्मषं चेत्तत्र प्रसृतस्थितपापवृत्तेः प्रायश्चित्तरूपेण मया किमपि त्यागव्रतमंगीकृत्यान्तःशुद्धिः करणीया । तन्मे केवलं सहजमासीत् । मम जीवनं नियमपूर्वकव्रताचरणस्योपरि रचितमस्ति । तावता औदार्येण मां कलकत्तापत्तने रंगूनपत्तनेऽपि कृतसत्काराणां गृहस्थानामहमनावश्यकमेवोत्पादितकष्टं मम स्मरणमायाति । ततोऽहमाहारवस्तूनां संख्यापरिमाणं निर्धार्यास्तमयात्पूर्वमेव भोजनं समापनीयमिति निरचैषम् । एतन्नियमान्न वहामि चेदग्रे मां सत्कुर्वाणानां गृहस्थानामधिकमननुकूलतायाः कारणं भविष्यामि । परसेवोपक्रमं विना मम सेवायामेव तैर्निरतैर्भवितव्यमिति मम मनस्यागतम् । अतोऽहं हिन्दुदेशे यदा स्थितस्तदा चतुर्विंशतिहोरासु पंचभिः पदार्थैरधिकं न भोक्ष्ये रात्रौ न भोक्ष्ये इति व्रतं गृहीतवान् । एतेन मम संभवन्ति कष्टान्यहं पूर्णमालोचयम् । परंत्वन्यथाकर्तुं लेशतोऽप्यवकाशो न देय इति ममेच्छासीत् । अहं यदा रुग्णपतितस्तदौषधमेकं पंचपदार्थेषु गणनायाः परिणाममचिन्तयम् । पथ्यग्रहणपदार्था गणनायां प्रवेष्टव्या इति निरचैषम् । पर्यन्ते केन हेतुनापि नियममेतं नातिक्रमितव्यमिति निश्चयमकार्षम् ॥

एतानि व्रतान्याचरतो मम त्रयोदशवर्षाणि बभूवुः । एतानि मां कठिनपरीक्षाया लक्ष्यमकुर्वन् । एतैरहं रक्षित इत्यपि वक्तुं शक्यम् । एतैर्मम जीवनपरिमाणमधिकमभूत् । अनेकजाड्यानि दूरीभूतानीत्यहं मन्ये ॥

अष्टमोऽध्यायः

लक्ष्मणसेतुः

गुरुकुलं प्राप्य भीमकायं महात्मानं मुनशीरामजीमहाशयं दृष्ट्वाहं शांतचित्तोऽभवम् । हरिद्वारस्य कोलाहलो गुरुकुलस्य शांतिरनयोर्मध्ये महदन्तरं तत्क्षणमेव प्रत्यभात् ॥

महात्मा मां स्वप्रेमणि निमज्जयामास । ब्रह्मचारिणो मम शुश्रूषायां निरता बभूवुः । अत्रैव मम प्रथमत आचार्यदेवजीमहाशयस्य परिचयो जातः । ते कीदृशा महानुभावा इति तत्क्षणं मे चित्तगोचरमागतम् । कतिपयविषयेषु यद्यपि वयं भिन्नमतस्थास्तथापि संबंधोऽस्माकं शीघ्रमेव मैत्रीरूपेण परिणतः ॥

गुरुकुले औद्योगिकशिक्षणस्यारंभविचारमधिकृत्याहं रामदेवजीमहाशयाभिरितराध्यापकैश्च सह दीर्घं चर्चामकरवम् । ततः प्रस्थानवेलायां प्राप्तायामहं दुःखितोऽभवम् ॥

श्रुतमासीन्मया लक्ष्मणसेतोः प्रशंसनं बहुशः । अयं हृषीकेशस्य स्वल्पदूरवर्ती लंबमानसेतुरासीत् । मया सेतुमेतमविलोक्य हरिद्वारान्न प्रतिनिवर्तितव्यमिति बहवः सुहृदः साग्रहं मामवोचन्। अहमिमां यात्रां पद्भ्यामेव कर्तुमपेक्ष्य प्रयाणद्वयेन समापयं हृषीकेशस्यैकं ततो लक्ष्मणसेतुं प्रत्येकम् ॥

हृषीकेशे बहवः संन्यासिनो मां द्रष्टुमागताः । तेषामेको मयातीवाकृष्टोऽभवत् । फीनिक्सदलस्वनस्थितस्तद्विषयमधिकृत्य ते स्वामिनोऽनेकप्रश्नानपृच्छन् । अस्मन्मध्ये धर्मसंबंधे चर्चा संवृत्ता । धार्मिकविषयेषु मम श्रद्धा महती स्थितेति तेषां विदितम् । गंगायां स्नात्वा नग्नशिरः पृष्ठमागच्छन्तं मामपश्यन् । मम शिरसि शिखा शरीरोपरि यज्ञोपवीतं च नासन्निति दृष्ट्वा खिन्ना मामवोचन्यथा—आस्तिकहिन्दुजनान् युष्मान् शिखा यज्ञोपवीतं विना स्थितान् दृष्ट्वा दुःखितोऽहम् । एतद् द्वयं हिन्दुधर्मस्य बाह्यचिह्नम् । प्रत्येकेन पुरुषेणेदं द्वयं स्थापयितव्यमेवेति ॥

मयैतद्द्वयस्य त्याग एवैकास्ति कथा । यदाहं दशवर्षदेशीयो बालकस्तदा पोरबंदरबालकान् कुंचिकासरं यज्ञोपवीतस्य बद्ध्वा झणझण इति नादं कुर्वतो दृष्ट्वा ममापि तथाकर्तुमाशाभवत् । तस्मिन्काले काठियावाडदेशस्य वैश्येषु यज्ञोपवीतधारणं न रूढिमागतम् । परन्तु प्रथमत्रयवर्णा यज्ञोपवीतं धारयेयुरित्येवाभ्यासस्तदात्व एव प्रारभ्यते स्म । अस्य परिणामः संवृत्तो यथा गांधिमहाशयकुटुंबीयाः कतिपये धारयितुं प्रवृत्ताः । रामरक्षामध्यापयन् ब्राह्मणोऽस्माकं पितृबालकान् यज्ञोपवीतं धारयामास। यद्यपि मे कुंचिकासरस्यावश्यकता नासीत्तथाप्येकमादाय

Funding by IKS-MoE

तस्मिन्निवेश्य नादयितुं प्रवृत्तः। ततस्तद्‌यज्ञोपवीते छिन्ने सति तत्र व्यामोहोऽद्यापि स्थितो न वा न स्मरामि परंत्वहं नूतनयज्ञोपवीतं नैवाधारयमिति ज्ञातम्॥

यदाहं प्राप्तवयस्कोऽभवं तदा पुनस्तद्धारणाय हिन्दुस्थाने दक्षिणाफ्रिकायां च कतिपये सदुद्देशपूर्वकाः प्रयत्नाः संवृत्ताः। परंतु ते न फलिताः। यदि शूद्रैर्यज्ञोपवीतं न धार्यं तर्हीतरवर्णानां को वास्त्यधिकार इत्यहं वादमकरवम्। अपि च ममानावश्यकपद्धतिमनुसर्तुं मया पर्याप्तो हेतुर्न दृष्टः। ब्रह्मोपवीतये न ममाक्षेपः। किन्तु तद्धारणाय कारणमेव नास्ति॥

अहं वैष्णवः सन् कंठे मया कंठी धार्यते स्म। शिखा तावदावश्यकमेवेत्यस्मज्ज्येष्ठा अगणयन्। किन्तु 'इंग्लैंडदेशं' प्रति प्रस्थानात्पूर्वं शिखां निरकासयम्। शीर्षोपरि यदा किंचिन्न विद्यते इदं लोकानां लक्ष्यभूतं हास्यजनकं भूत्वानागरिकोऽहमित्यांग्लजनो मां गणयेदिति भीतिः। एतन्न मम कातर्यं कियद्दूरं गतमिति चेच्छ्रद्धया शिखां रक्षन्तो मम ज्येष्ठभ्रातुः पुत्राः। छगनलालगांधिमहाशयोऽन्ये च स्वशिखा यथा निष्कासयन्ति तथाकरवम्। शिखारक्षणेन तेषां सार्वजनीनकार्यस्य प्रत्यादेशः स्यादिति भीतोऽहं तेषां मम खेदमप्यविचिंत्य यथा निष्कासयन्ति तथा कृतवान्॥

एकोऽहं सर्वांस्तान् विषयान् स्वामिभ्यो निवेद्यावोचं यथा – अहं यज्ञोपवीतं न धारयामि। यद्यप्यसंख्या हिंदवो नैतद्धारयन्ति तथापि मम धारणावश्यकता न मे प्रतिभाति। अपरं च यज्ञोपवीतेनाध्यात्मिकपूर्वजन्मचिह्नेन भाव्यम्। ईदृक् पुनर्जन्मनो यज्ञोपवीतधारी विशुद्धतरमुच्चतरं च जीवनं कर्तुमिच्छापूर्वकं प्रयतनमावश्यकम्। भारतदेशस्य हिन्दुधर्मस्य चाधुनिकपरिस्थितौ हिन्दुजना ईदृग्गूढार्थं यज्ञोपवीतं धारयितुं स्वाधिकारसार्थकीकर्तुमर्हन्तीति मम तावत्संशयास्पदं भवति। हिन्दुधर्मोऽस्पृश्यतां निष्कास्योच्चनीचभेदं विहायैवमेव मर्यादामतिक्रम्य स्थितानितरानेकदोषांश्चापसार्य तत एवाधिकारमेतं संवादयितुं साध्यम्। अत एव यज्ञोपवीतधारणं न मे रोचते। परन्तु यूयं शिखाधारणस्य विषये कृता सूचना विचारयोग्येति न संदेहः। एकस्मिन्कालेऽहं शिखावानासम्। असत्यलज्जया सा निष्कासिता। अतस्तां पुन आरोपयेमिति मे प्रतिभाति। एतं विषयमहं सहवासिभिः सह चर्चयिष्यामीति॥

यज्ञोपवीतविषये यन्मयोक्तं तत्स्वामी न संमेने। तद्धारणाय यानि कारणानीति प्रत्यभात्तान्येव तेषां धारणावश्यकतां साधयितुमलमित्यलक्ष्यत। अद्याप्यस्मिन्विषये ममाभिप्रायः प्रायेण हृषीकेशे यथाभूत् तथैव स्थितः। भिन्नभिन्ना धर्मा यावद्विद्यन्ते तावत् प्रत्येकस्य किमपि बाह्यचिह्नमपेक्षितं स्यात्। किन्तु तच्चिह्नमेवाराध्यदैवतमिति गणयित्वा तद्द्वारा स्वधर्म इतरधर्मापेक्षया श्रेष्ठमिति प्रतिपादयितुमारब्धे तदा तच्चिह्नमपक्षिपेत्। अद्य यज्ञोपवीतं हिन्दुधर्ममुत्तमं कर्तुं साधनमिति न मे प्रतिभाति। ततोऽहं तद्विषये तटस्थः स्थितः॥

परन्तु शिखानिष्कासनाय मम लज्जैव कारणमासीदिति मित्राणां बुद्धिवादग्रहणानन्तरं तां पुन आरोपयितुं निश्चयं कृतवान् ॥

हृषीकेशस्य लक्ष्मणसेतोश्च प्रान्तवर्ति प्रकृतिसौन्दर्यं दृष्ट्वाहं मुग्धोऽभवम्। अस्मत्पूर्विकाणां सौन्दर्योपासनायाः प्रकृतेः सौन्दर्यस्य धार्मिकभावदायिन्यास्तेषां प्रतिभायाश्च भक्त्याहं नमस्कृतवान्। किन्त्वेतान्सुंदरसंनिवेशान् यथा जन उपयुंक्ते स्म तदालोक्य मम संकटं जातम् ॥

यथा हरिद्वारे तथा हृषीकेशेऽपि जना वीथी गंगानदीतटं च मलेन दूषयन्ति स्म। गंगायाः पवित्रोदकं मलिनीकर्तुमपि नैव व्यकल्पंत। लोकानां गमनागमनस्थलं विहाय स्वल्पदूरं गंतुं यद्यपि न कष्टमासीत्तथापि वीथीषु नदीतटे च मलमूत्रविसर्जनं कृतं दृष्ट्वा मम हृदयं खेदेन बहुव्यथामापत् ॥

लक्ष्मणसेतुर्नाम गंगानद्युपरिनिबद्धलंबमानलोहसेतुरासीत्। न कंचिदन्यत्। प्रथमतस्तत्र रमणीयरज्जुनिर्मितसेतुरासीदिति निवेदितम्। उदारबुद्धिः कश्चन मारवाडिमहाशयो रज्जुसेतुमेनं निर्मूल्याधिकद्रव्यव्ययेन लोहसेतुं निर्माप्य कुंचिकां राज्यस्य वशे प्रादात् किल। मया नैव दृष्टो रज्जुसेतुरिति तद्विषये न किंचिद्वक्तुं शक्तम्। किन्तु लोहसेतुस्तादृक्संनिवेशे केवलमनुचितं भूत्वा तत्रत्यसौन्दर्यं विनाशयति ॥

एषां यात्रिकाणां सेतोः कुंचिकाया राज्यायार्पणं मम तादात्विकराजनिष्ठायाः सहनमप्यतिक्रांतमासीत्। सेतोरतिक्रमानन्तरं प्राप्यः स्वर्गाश्रमः शोचनीयस्थितावासीत्। कतिपयछिन्नभिन्नलोहकुटीराणि विना न किंचिदन्यदासीत्। श्रुतं मयैतानि साधकेभ्यो निर्मितानीति। तदा तत्र बहवः साधकजना नाविद्यन्त। मुख्यमंदिरे स्थितानेकद्विजनान्वीक्ष्य मम न संतोषोऽभूत् ॥

किन्तु हरिद्वारे ममानुभवा अमूल्यमेव परिणताः। मया कुत्र स्थातव्यं किं कर्तव्यमिति निर्धारयितुं मम तेभ्यो बहुलं साहाय्यं संवृत्तम् ॥

नवमोऽध्यायः

आश्रमस्थापनम्

कुंभमेलं प्रति गमनात्पूर्वमेकदाहं हरिद्वारं गतः ॥

सत्याग्रहाश्रमः पंचदशोत्तरैकोनविंशतिमिति वत्सरे 'मे'मासस्य पंचविंशे दिने स्थापित आसीत्। मया हरिद्वारे निवसितव्यमिति श्रद्धानंदस्वामिनामपेक्षासीत्। कलकत्तावासिनो मम कतिचिन्मित्राणि वैद्यनाथधामनि स्थातव्यमित्यसूचयन्। मया राजकोटनगरं वरणीयमितीतरे

Funding by IKS-MoE

साग्रहं सूचनामदुः । परन्तु यदाहममदाबादनगरद्वारा प्रयाणमकरवं बहवः सुहृदो मया तत्रैवावस्थातव्यमिति निर्बन्धं विधायाश्रमस्य व्ययद्रव्यस्य स्वयं संगृह्य प्रदानं मे प्रतिज्ञाय निवासगृहं दापयिष्याम इत्यवोचन् ॥

ममापीच्छामदावादनगरस्योपर्येवासीत् । यतोऽहं गुजरातीजनस्ततो गुजरातीभाषाद्वारा सेवां कर्तुं मम शक्यमित्यहममंसि । अपरं च हस्तसूत्रयन्त्रस्य पुरातनकेंद्रं गृहव्यवसायोऽपि च हस्तसूत्रवयनमनयोः पुनरुज्जीवनस्यामदाबादपत्तनमेवात्यनुकूलं क्षेत्रं परिणमेदिति निरीक्ष्यते स्म । अपरं च तत्पत्तनं गुजरातस्य राजधानीति धनिकप्रजानां साहाय्यमितरस्थलापेक्षयाधिकमत्र लभ्येतेत्याशावर्तत ॥

अमदावादपत्तनस्थैर्मित्रैः सह चर्चितानां विषयाणामस्पृश्यताप्येकासीत् । अवकाशस्य प्राप्तिक्षणमेव यं कंचिद्योग्यमंत्यजमाश्रमं प्रवेशयिष्यामीति स्पष्टमेव न्यवेदयम् । वैष्णवमित्रमेको युष्मन्नियमरक्षकोन्त्यजः पुत्रलभ्य इत्यात्मविश्वासेनापृच्छत् । पर्यन्त आश्रमं अमदाबादपत्तने स्थापयितुं निश्चयं कृतवान् ॥

वासस्थलस्य प्राप्तिविषये अमदावादपत्तनवर्ती ब्यारिस्टरश्रीजीवनलालदेसाईमहाशयः सर्वापेक्षयाधिकमालंबनं ददौ । ते स्वकीय ' कोचरब ' बंगलो ' भाटकेन दातुं संमेने । वयं तदेव ग्रहीतुं निरचैष्म ॥

अस्माभिः प्रथमतो निर्धारणीयो विषय आश्रमस्य किं नामधेयमिति । अहं मम मित्राणां मतमपृच्छम् । तैः सूचितनामधेयेषु सेवाश्रमस्तपोवनमित्यादि स्थितम् । सेवाश्रम इति नामधेयं मह्यमरोचत । परन्तु ततः किंविधा सेवेति न स्पष्टमासीत् । तपोवनमित्याडंबरवान् प्रत्यभात् । यतो यद्यपि तपोऽस्माकं प्रियं वयं च तपस्विन इत्याख्यातुमर्हता न दृष्टा । सत्योपासनमेवास्मिन्मतमासीत् । सत्यशोधनं सत्यसाधनं चास्मदुद्योग आसीत् । दक्षिणाफ्रिकायां मया प्रयुक्तां पद्धतिं भरतखंडस्य परिचयं कारयितुमिष्टवान् । एवं परिचितीकरणं कियद्दूरं शक्यमिति भरतखंडे परीक्षणीयमितीच्छास्माकमासीत् । तस्मान्मम सहवासिभिर्मया च सत्याग्रहाश्रम इति नामधेयं वृतम् । यतोऽस्मिन् पदेऽस्मद्ध्येयं सेवापद्धतिश्च मिलितस्थितावास्ताम् ॥

आश्रमकार्यस्य निर्वहणाय नियमनिबंधावलिरेकावश्यक्यासीत् । ततस्तां सज्जीकृत्य मित्राणामभिप्रायार्थे सा प्रेषिता । अस्माभिः प्राप्तानेकाभिप्रायेषु सरगुरुदासबेनरजीमहाशयेन यो दत्तः स मे स्मृतौ वर्तते । स नियमान् संमेने । परन्तु तेषु नम्रतायाश्च स्थानं देयमित्यसूचयत् । यतस्तादात्विकयुवकेषु नम्रता नासीदेवेत्ययममन्यत । यद्यप्येषा न्यूनता मम विदितासीत्तथापि नम्रताया व्रतत्वेन ग्रहणे तन्नम्रतारूपेण न स्थातुं शक्यमिति शंकितोऽहम् । नम्रतायाः पारमार्थिकोऽर्थो निरहंकारः । अहंकारनाशो नाम मोक्षः । मोक्ष एव व्रतं भवितुं न साध्यम् । परन्तु तत्साधनायेतरव्रतान्यावश्यकानि स्युः । मुमुक्षोरथवा सेवकस्य कार्येषु

नम्रताया अथवा निरभिमानस्याभावे तस्य मोक्षस्याशा नास्ति । सेवा करणीयेतीच्छा नास्ति । नम्रताविरहिता सेवा स्वार्थपरताहंकारः ।।

कालेऽस्मिन्नस्मद्देशे त्रयोदशतामिलजना अविद्यन्त । पंचतामिलबालका दक्षिणाफ्रिकादेशान्मया सहागताः । सर्वैर्मिलित्वा वयं पुरुषाः स्त्रियश्च पंचविंशतिरास्म ।।

आश्रमस्थापनमित्थमासीत् । सर्वेऽप्येकस्यां पाकशालायां भोजनमकरवाम । सर्वैरप्येककुटुंबस्थैरिव वर्तितुं प्रयत्नः क्रियते स्म ।।

दशमोऽध्यायः

दुष्परीक्षोत्तरणम्

आश्रमस्थापनात्कतिपयमासाभ्यंतरेऽस्माकमेका ' परीक्षागता । एवंविधा परीक्षा मया न निरीक्षिता । अमृतलालठक्करमहाशयोऽकिंचनानां प्रामाणिकानामस्पृश्यानां कुटुंबमेकमाश्रमं प्रवेष्टुमिच्छति । किं वो नानुज्ञास्यथ इति तस्य पत्रमेकमागतम् ।।

अहं भीतोऽभवम् । अन्त्यजनानां कुटुंबमेकं तत्रापि 'ठक्करबापा' महाशयसदृशजनस्य माध्यस्थ्येनाश्रमं प्रवेष्टुं तावच्छीघ्रमागमिष्यति—इति मया नैव परिगणितम् । मम सहवासिभ्यः पत्रमपठम् । ते तस्य विज्ञापनामादरेण संमेनिरे ।।

तत्कुटुंबस्य सर्वेऽपि जना आश्रमनियमान् पालयितुं सिद्धाश्चेद्वयं संमन्यामह इति स्पष्टतयामृतलालठक्करमहाशयस्य पत्रमलिखम् ।।

दूदाभाईमहाशयाय तस्य भार्या 'दानीबहेन' अपि च तत्कालमेव शिक्ष्यमाणपरिक्रमा शिशुर्लक्ष्मीरेते तत्कुटुंबजनाः । दूदाभाईमहाशय एतत्पूर्वमेव मुंबईपत्तने उपाध्यायोऽभवत् । ते सर्वेऽप्याश्रमस्य नियमानुसारं वर्तितुं संमेनिरे । ततस्ते प्रवेशिताः ।।

परन्तु तेषां स्वीकारेणाश्रमस्य साहाय्यं कुर्वाणेषु मित्रेषु संभ्रमः प्रवृत्तः । कूपविचार एव प्रथमतः कष्टमागतम् । अयं कूपो 'बंगलो'मंदिरस्य स्वामिनः स्वाधीन आसीत् । अस्मज्जलभांडस्य जलबिंदुपतनात् स्वयमपवित्रो भविष्यामीति जलोद्धारस्य सेवक आक्षेपमकरोत् । ततोऽयमस्मान्निंदितुं दूदाभाईमहाशयं च पीडयितुं प्रवृत्तः । अधिक्षेपवचनानि सोढव्यानि जलोद्धरणं नैव परित्यक्तव्यमिति प्रत्येकोऽपि निवेदितः । निंदावचः श्रुत्वापि निराकुलस्थितान् वीक्ष्य लज्जयास्मान्क्लेशयितुमत्यजत् ।।

परन्तु द्रव्यसाहाय्यं सर्वं व्यरमत् । आश्रमस्य नियमाननुसृत्यास्पृश्यस्य विचारे कृतप्रश्नाः सुहृदस्तादृगागमिष्यतीति नैव निरीक्षां चक्रिरे ।।

द्रव्याशायां निवृत्तायामस्मान्बहिष्कुर्वन्तीति वार्ता श्रुता । वयं सर्वस्याप्यस्य सज्जस्थिताः । अस्मान् बहिष्कृत्य सामान्यसौकर्येषु वर्तितेष्वपि वयममदाबादनगरं न त्यजामः । ततः प्रति चंडालवीथीं प्राप्य स्वयं संपादनेन यत्किंचिल्लुब्ध्वापि जीवनं निर्वाहयिष्याम इति सहवासिभ्य उक्तमासीन्मया ॥

अस्मदीया परिस्थितिः कीदृशी संवृत्तेति चेदेकस्मिन्दिने मगनलालगांधिमहाशय आगामिमासस्य व्ययार्थं न किंचिदस्तीत्यवोचत् ॥ अहं समाहित एव तर्हि 'भंगी'वीथीं गमिष्याम इत्यवोचम् ॥

एवंविधपरिणामा इदं प्रथममेव न । ईदृशसंदर्भेषु सर्वेषु भगवानन्तिमक्षणे साहाय्यं प्रेषितवान् । मगनलालमहाशयस्य स्वधनकोशस्य स्थितिप्रत्यादेशात्परं कतिपयदिनेष्वेकस्मिन् दिवसे प्रातरेको बालको मत्पार्श्वमागत्य कश्चिच्छ्रेष्ठी बहि'र्मोटर'याने मां निरीक्षमाणः स्थित इत्यवोचत् । तमहं द्रष्टुं गतः । अहमाश्रमस्य स्वल्पसाहाय्यं कर्तुमिच्छामि । तद्भवान् किं स्वीकरिष्यतीत्यपृच्छत् । उक्तं मया यथावश्यमेव । अपि चाद्य मम द्रव्याभावेन मार्गमेव न पश्यामीवेति ॥

श्वः प्रातरिमां वेलामत्रागंतास्मि । किं भवानत्र स्थास्यति इत्यपृच्छत् । अस्त्वेति प्रोक्ते स प्रस्थितः । परेद्युर्निश्चितवेलायां 'मोटर'यानमागत्याश्रमस्य पार्श्वे स्थितः । यानस्य शृंगनादोऽभूत् । बालका वार्तामिमां वस्तुं मत्पार्श्वमागताः । श्रेष्ठी अन्तर्नागतः । अहमेव गत्वा तमपश्यम् । स मम हस्ते त्रयोदशसहस्रमित'नोट'पत्राणि दत्वा प्रस्थितः । मयैतदाशापूरणं नैव निरीक्षितमासीत् । अपि च साहाय्यकरणस्य रीतिः । अयं सद्गृहस्थ आश्रमस्यांतः पदं नैव निवेशितवान् । यावदहं स्मरामि तावदेकवारमात्रं मया दृष्ट आसीत् । आश्रममागत्य नैव दृष्टवान् । नैव विचारितवान् । निराकुलं धनं दत्त्वा गतः । एष मेऽत्यंतासाधारणोऽनुभव आसीत् । एतेन साहाय्येनास्माभिः 'भंगी' निवासगमनं निरुद्धम् । अस्माकं सौकर्यं प्राप्तमेकवर्षपर्यंतं निरातंकं जीवनं समभवत् ॥

यथा बहिश्चंडमारुत उत्थितस्तथाश्रमस्यान्तेऽपि प्रचंडवातश्चलितः । आफ्रिकायामस्पृश्यमित्राणि मद्गृहमागत्य मया सह यद्यपि भुंजते स्म तथाप्याश्रमेऽस्पृश्यप्रवेशो मम भार्याया इतरस्त्रीणां चेष्टं नासीदिति प्रतिभाति । दानीबहेनविषये आसामप्रीतिर्नासीदिति चेत्तासामौदासीन्यं मम सूक्ष्मदृष्टौ पतितमेव । मम सूक्ष्मश्रोत्रयोरश्रुतं नासीत् । परंत्वाश्रमांतःस्थितमेतन्मनःकषायं मम सहनशक्तिमतिक्रम्यावर्तत । 'दानीबहेन' सामान्यस्त्री आसीत् । दूदाभाईमहाशयोऽल्पशिक्षणं प्राप्तवानपि बुद्धिमानासीत् । तस्य सहनं दृष्ट्वा मम संतापो जातः । सकृत् सकृत् क्रुद्धो भवति स्म । तथापि तस्य सहनं विशिष्टमासीदिति मम लक्ष्यमागतम् । अल्पाल्पा अपमानाः सोढव्या इति मया प्रार्थितः । तस्यायं न केवलं संमतिमदात्परं स्वभार्याया अपि तथा कर्तुं प्रेरितवान् ॥

Funding by IKS-MoE

एतत्कुटुंबप्रवेशेनाश्रमस्य लाभदायकं शिक्षणं लब्धम्। आश्रमेऽस्पृश्यताया नास्ति स्थानमिति पूर्वमेव प्रपंचस्य प्रसारितम्। आश्रमस्य साहाय्यं कर्तुमिच्छतामनया रीत्या प्रत्यादेशो दत्त इव। एतद्विषयमधिकृत्याश्रमस्य कार्यं बहुशः सरलं जातम्। प्रत्यहं वर्धमानस्याश्रमव्ययद्रव्यस्य प्रदाने बहवः पूर्वाचारनिष्ठा हिन्दुजना इति वीक्ष्यास्पृश्यताया आधारस्तंभ एव चलित इति स्पष्टं व्यक्तीकृतम्। इतरप्रमाणानि च बहूनि विद्यन्ते। तथाप्यस्पृश्यैः सह पंक्तिभोजनं कुर्वंत आश्रमस्य साहाय्यं कर्तुं सनातनीहिन्दुजना न विकल्पन्ते इत्येतदल्पप्रमाणं न भवतिं॥

एताः प्रधानसमस्या या उद्भूताः कतियोसूपमसमस्याः कथमपूरयामाअनिरीक्षितानि कतिचित्कष्टानि कथं निर्वोढान्येतदादिसत्यशोधनवर्णनस्य प्रकृतानपि चैतदध्यायसंबद्धानेकविचारानहं परित्यक्तुमास्थितः। एतेन विषण्णोऽस्मि। अग्रेतनाध्यायेष्वयं लोपः स्पष्टीभवति। मया कतिपयविचाराः परित्यक्तव्या भवन्ति। यदेतन्नाटकपात्राणां मध्ये बहवो जीवन्ति। तत्संबंधघटनावर्णने तन्नामधेयान्यनुज्ञां विनोपयोक्तुं न युज्यते। तेषां संमतिलाभोऽथवा स्वसंबद्धानध्यायान्परिशोधयितुं यदा कदा वाप्याह्वानं न साध्यं वचनम्। परमेतादृशक्रम एतदात्मवृत्तस्य परिमितौ नास्ति। अतोऽग्रिमकथा मन्मते सत्यशोधकानां लाभदायिका यद्यप्यनिवार्ययासंपूर्णतया कथनीया भवन्तीति शङ्कितोऽस्मि। तद्यथा तथापि भवतु। इममितिहासमसहयोगयुगपर्यन्तमाख्येयमिति ममेच्छापि चाशा। एतत्सिद्धिर्दैवायत्ता। असहकारदिवसपर्यन्तमिमां कथां प्राख्यास्यामीति मनसि वर्तते॥

एकादशोऽध्यायः

कर्मकराणां विदेशयात्राप्रतिरोधः

इत्थमाश्रमेण प्रथमत एवांतरिकबाह्यविप्लवा निरोद्धव्या बभूवुः। एतत्क्षणमात्रं विहायास्मिन् समये मम दृष्टिमागतमेकं विषयं संक्षेपतो ब्रवीमि॥

प्रतिज्ञाकर्मकरा नाम पंचवर्षाण्यथवा न्यूनकालं कार्यं करिष्याम इति प्रतिज्ञाय भरतखंडाद् गतास्ते। चतुर्दशोत्तरैकोनविंशतिमिते वत्सरे संवृत्त ‘स्मट्स्–गांधि’ नियमानुसारेण प्रतिज्ञाकर्मकरत्वेन नातालपत्तनं प्रविष्टाः। देयः करो यद्यपि निष्कासितस्तथापि भरतखंडाद्विदेशं प्रति जीवनार्थं गत्वावस्थायिनां विषये परिशोधनमावश्यकमासीत्। षोडशोत्तरैकोनविंशतिमिते वर्षे भारतभूषणपंडितमदनमोहनमालवीयाः प्रतिज्ञाकर्मकरत्वं निष्कासनीयमिति साम्राजिकशासनकेंद्रसभायां निर्णयमानयन्। लॉर्डहार्डिंगनामा साम्राज्यप्रतिनिधिरेतदङ्गीकुर्वाणः पद्धतिमिमां कालक्रमेण निर्मलां कर्तुं सार्वभौमराज्येन वाग्दानं कृतमस्तीत्यवोचत्।

एवंविधा स्पष्टश्रद्धावचनेन न तर्पितव्यं प्रतिज्ञाकर्मकरत्वमेतत्क्षणमेव निष्कासयितुं प्रयतनीयमित्यस्माकं प्रत्यभात् । भरतखंडं केवलमौदासीन्येन पद्धतिमिमामनिरुध्य स्थिता । आसीन्मे विश्वासो यत्क्लेशमुक्तये जनैर्मिलित्वा कृत आडंबरः सफलो भविष्यतीति । पुरोगमान्कतिपयानहमपश्यम् । ज्ञातं मया पद्धतिरियं विना विलंबं निष्कासनीयेति लोकमतमस्तीति । अयं सत्याग्रहयोग्यः किं विषयो भवेत् । तथेति मम संदेहो नासीत् । परंतु तदाचरणरीतिर्न मे ज्ञाताभवत् ॥

एतदंतरे साम्राज्यप्रतिनिधिः कालक्रमेण निर्मूलनमित्यर्थं विशदीकृतवान् । अन्यत्संविधानं कर्तुं कालयापने सति पद्धतिरियं निष्कासनीयेति तदर्थः ॥

ततः सप्तशतोत्तरैकोनविंशतिमिते वत्सरे पंडितमालवीयः पद्धतिरियं निष्कासनीयेति शासनं कारयितुमनुज्ञामपैक्षत । लॉर्डचेम्सफर्डमहाशयेनानुज्ञा नैव दत्ता । अतोऽखिलभारतेऽपि क्षोभोत्पादनाय प्रयतनं कर्तुं कालः प्राप्तः ॥

एतदारंभात्पूर्वं राज्यप्रतिनिधेर्दर्शनमुचितमिति मत्वा तस्मिन्निवेदिते ममाशयं स संमेने । सरजॉनमेफीमहाशयस्तस्याप्तकार्यदर्शी बभूव । आवयोरुभयोगाढः संबंधो जातः । लॉर्डचेम्सफर्डमहाशयेन सह संवृत्तं संभाषणं तृप्तिकरमासीत् । यद्यप्ययं निश्चयपूर्वं किंचिदपि नोक्तवानपि तु साहाय्यं करिष्यामीति वाग्दानमकरोत् ॥

अहं मम प्रयाणं मोहमयीतः प्रारब्धवान् । जहांगीरपिटीटमहाशयः ‘ इंडियन् सिटिजन्शिप ॲसोसिएशन् ’ (अधिराज्यप्रजामंडली) नाम्ना समाह्वानभारमुवाह । तत्संस्थायाः कार्यकारिणीसमितिः सभायाः पुरतः स्थापनीयान् प्रस्तावान्निर्धारयितुं प्रथमं मिलितासीत् । डॉ. रीड–सर लल्लुभाई-शामलदास-नटराजन–इत्यादयो महाशया अपि समितेः सभ्या बभूवुः । राज्यं कतिपयदिनाभ्यंतरे प्रतिज्ञाकर्मपद्धतिं निष्कासयेदिति विचारे चर्चा प्रववलासीत् । एतत्संबद्धास्तिस्रः सूचना आसन् । एता यथा–(१) यथाशक्यं शीघ्रं निर्मूलनीयम् । (२) जुलाईमासस्यैकत्रिंशतारीकाभ्यन्तरे निर्मूलनीयम् । (३) एतत्क्षणमेव निष्कासनीयमिति । निश्चितप्रतिज्ञाकर्मकरत्वं दिवसाभ्यंतरे निर्मूलनीयमिति ममाभिमतमासीत् । यतस्तद्दिनाभ्यंतरे राज्यं यदि नैवास्मदिच्छां पूरयेत्तदास्माभिरग्रे किं कर्तव्यमिति निर्धारयितुं समयः प्राप्यते । सरलल्लुभाईमहाशयेन तत्क्षणमेव निर्मूलयितुमिति सूचनानुमोदिता । तत्क्षणमिति जुलाई ३१ दिवसात्पूर्वमेवेत्यर्थ इति सोऽब्रवीत् । जनसामान्यस्य तत्क्षणमिति स्पष्टमर्थो न भवति । ततः किमपि कार्यमपेक्ष्यते चेदितोऽपि स्पष्टतरार्थं पदं प्रयोक्तव्यम् । तत्क्षणमिति प्रत्येको यथा स्वप्रतिभानरीत्या राज्यमेकरीत्या लोका अन्यरीत्यार्थं कुर्वन्तिं । जुलाई ३१ अस्यार्थद्वयं न घटते । तद्दिवसाभ्यंतरे यदि न किंचित्कृतं तदास्माभिः कार्यक्रमश्चालनीय इति मया विवृतमासीत् । अस्य वादस्यौचित्यं डॉ. रीडमहाशयेन ज्ञातम् । पर्यन्ते सरलल्लुभाईमहाशयोऽपि संमेने । प्रतिज्ञाकर्मकरपद्धतिं

Funding by IKS-MoE

जुलाई ३१ दिनाभ्यंतरे राज्येन प्रकटीकर्तव्यमिति निर्धारितमस्माभिः । सार्वजनिकसभाया निर्णयोऽयं संमत आसीत् । भरतखंडे सर्वत्राप्येतदर्थपरो निर्णयः सभाभिरङ्गीकृतः ॥

श्रीमती–जायजी–पिटीटमहाशया राजप्रतिनिधिं द्रष्टुमेकां स्त्रीमंडलीं संविधातुं सर्वप्रयत्नं विनियुङ्क्ते स्म । एतन्मंडलीस्थानां मोहमयीमहिलानां मम ‘ लेडी ताता ’ अपि च ‘ दिलशाद-बेगम ’ इत्यनयोर्नामनी स्मर्येते । अनया मंडल्या राजप्रतिनिधेर्दर्शनं सफलमासीत् । राजप्रतिनिधिर्महिलानामाशाजनकमुत्तरं ददौ ॥

अहं ‘ कराची–कलकत्ता ’ इत्याद्यनेकस्थलानि गतः । सर्वत्रापि महत्यः सभा मिलिताः सर्वत्राप्युत्साहः पूर्ण आसीत् । क्षोभस्य प्रारंभे मयैतत्सर्वं न निरीक्षितमासीत् ॥

तदात्वे मयैकेनैव प्रयाणं क्रियते स्म । एतेन ममापूर्वा अनुभवा बभूवुः । राज्यस्य गुप्तचराः सदा मामनुसरन्ति स्म । तेभ्यो निगूहितं न किंचिन्ममासीत् । अतो मां न पीडयन्ति स्म । ते मया नैव क्लेशिताः । अदृष्टवशात्तदा ‘ महात्मता ’इति ख्यातिर्न ,प्राप्तासीत् । यत्र लोकानां विदितोऽभूवं तत्र तन्नामघोषः सामान्य आसीत् ॥

एकदा गूढचरा अनेकलोहशकटीवेदिकासु मम प्रयाणानुज्ञापत्रिकां दृष्ट्वा तत्संख्यां लिखित्वा गताश्च । अहं तावत्तैः पृष्टप्रश्नानां शीघ्रमेवोत्तरमदाम् । मम सहप्रयाणिकाः सर्वेऽपि मामेकं साधुमथवा ‘ फकीर ’ इति गणयामासुः । प्रतिलोहशकटीवेदिकायां मां क्लेशयतो जनान् वीक्ष्य बहुक्रुद्धा गूढचरानधिक्षिप्य कुतः साधुमेनं पीडयथेति । एषां दुर्जनानामनुज्ञापत्रिकां मा प्रदर्शयेति मामूचुर्जनाः ॥

उक्तं मया विनयेन प्रयाणानुज्ञापत्रिकाप्रदर्शनेन मम किमपि कष्टं न भवति । ते स्वकर्तव्यं कुर्वन्तीति । एतेन ते समाहिता न बभूवुः । ते मम पक्षं पूर्वापेक्षयाधिकं स्वीकृत्य निर्दोषाणां पीडनमखंडयन् ॥

एतैर्गूढाचारैरुत्पादितसंकटानि न गणयितुमर्हाण्यासन् । तृतीयश्रेण्यां प्रयाणमेव वस्तुतो मम क्लेशकरम् । लाहोरपत्तनाद्दिल्लीनगरं प्रति प्रयाणे ममानुभवाः सर्वापेक्षया कठिनतराः कटुतराश्चासन् । अहं करांचीपत्तनात् कलकत्तानगरं लाहोरद्वारा गच्छन्नासम् । लाहोरनगरे मया शकटीपरिवर्तनं कार्यं लोहशकट्यां स्थलमेव दुर्लभमासीत् । शकट्यः पूर्णा बभूवुः । अतः प्रवेष्टारः देहबलमुपयुज्य पुरः पुरः गच्छन्ति स्म । द्वारं कीलकेन बद्धं चेद्‌गवाक्षतोऽन्तः प्रविशन्ति स्म । सभामेलनस्य निर्दिष्टदिवसे मया कलकत्तानगरी प्राप्तव्या । एतां शकटीं विहाय तत्र सकालं गन्तुं न शक्यमासीत् । स्थललाभे निराशः स्थितः । न कोऽपि मे स्थलमदात् । तत्कालमेव कश्चित्कर्मकरो मम परिस्थितिं वीक्ष्य मम द्वादशाणका दीयन्ते यद्यहं स्थलं दापयिष्यामीत्यवदत् । स्थलं मे दाप्यते चेद्द्वादशाणकाः प्रयच्छामीति तस्यावोचम् । स युवकः प्रयाणिकान् शकटाच्छकटं याचमानो गतः । परंतु तस्य वचनं न कोऽपि श्रोत्रयोर-

गृह्णात् । प्रस्थितकल्पायां शकट्यामत्र स्थलं नास्ति । तथापीष्यते चेन्मामन्तः प्रवेशयेत् । परन्तु तिष्ठता भाव्यमित्यूचुः । कर्मकरो युवकः किं ब्रूथेति मामपृच्छत् । तत्क्षणमेवाहमनुमत्य स मां गवाक्षान्तः पापितवान् । एवमहं शकटांतः प्रविष्टः । कर्मकरो द्वादशाणकान् संपादयामास ॥

सा रात्रिः क्लेशकरी जाता । अन्ये प्रयाणिकाः कथंचिदुपविष्टाः । अहमुपरितनफलकं गृहीत्वा होराद्वयं यावत् स्थित एवासम् । एतदंतरे प्रयाणिकाः कतिपये मां पीडयन्ति स्म । भवान् कुतोऽद्यापि नोपविष्ट इति पप्रच्छुः । स्थलाभावादिति वक्तुं प्रयत्नमकरवम् । उपरितनफलके पादं प्रसार्य शयिता अपि मां तिष्ठन्तं न सोढुमशकत् । मां क्लेशयित्वा स नायास्यति । विनयेन प्रतिवक्तुं नाहमायस्तवान् । एतेन पर्यन्ते स शांतोऽभूत् । तेषां कतिपये मम नामधेयमपृच्छन् । उक्ते तस्मिंस्ते लज्जिता बभूवुः । मां क्षमापयित्वा मम स्थलं दद्युः । इत्थं क्षमा सफलाभूत् । अहमत्यन्तमायस्तोऽभवम् । शिरो भ्राम्यति स्म । मम साहाय्य आवश्यके सति भगवताहं रक्षितः ॥

एवं कथंचिद्दिल्लीं ततः कलकत्तां च प्राप्तः । 'कासमबजार' महाराजः कलकत्तामेलनेऽध्यक्षो ममातिथ्यकृदासीत् । यथा करांचीनगरे तथात्राप्यपरिमितमौदार्यमासीत् । सभायां कतिपये आंग्लजना आसन् ॥

चतुर्नवत्युत्तराष्टादशमिते वर्षे पर्यायविरोधेन प्रथमां प्रार्थनपत्रिकामलिखम् । तदानीमेव ममाशासीद्यथैतदर्धदास्यमयं पर्यायः सरहंटरमहाशयेन निर्दिष्टः कदाचिदन्तं गमिष्यतीति । चतुर्नवत्युत्तराष्टादशमिते वर्षे संवृत्तक्षोभस्य बहवः साहाय्यं चक्रुः । शक्तिमत्सत्याग्रहोऽस्तं त्वरयामासेति वक्तुं शक्यम् ॥

तत्क्षोभस्याग्रेतनविस्तरमवगन्तुं येऽभिलषन्ति के तस्मिन्सत्याग्रहे भागमूहुरिति ज्ञातुमिच्छन्ति तैर्दक्षिणाफ्रिकासत्याग्रहेतिहासोऽवलोकनीयः ॥

द्वादशोऽध्यायः

नीलकलंकः

चंपारण्यं जनकराजस्य देशः । स इदानीमत्रारामैः पूर्ण इव सप्तदशोत्तरैकोनविंशतिमितवत्सरपर्यन्तं नीलारामैर्भरित आसीत् । चंपारण्यस्य कृषीवलो भूस्वाम्यर्थं भूमेः शते विंशतिभागेषु नीलं रोपयेदिति शासनेन विहितमासीत् । अस्य 'तिनकठिया' पद्धतिरिति नामधेयम् । यतो विंशतिकठानां (एक एकर) त्रिषु नीलं रोपणीयमासीत् ॥

Funding by IKS-MoE

अस्मिन्समये मम चंपारण्यस्य स्थलं न ज्ञातम्। तस्य नामापि न श्रुतमासीत्। नीलिकारामाः कीदृशा भवन्तीति मया नावगतम्। नीलिकाया बंधनानि तावद् दृष्टानि। परन्तु ते चंपारण्ये सिध्यन्ति। तेन परःसहस्रकृषीवलानां कष्टं समभवदिति स्वप्नेऽपि नालोकितम्॥

राजकुमारशुक्ल एवं कष्टपतितानां कृषीवलानामेकः। स्वयमिव दुःखितानां परःसहस्रजनानामुपलक्षितं नीलस्य कलंकं निष्कासयेदित्यावेशपूर्ण आसीत्सः॥

अहं षोडशोत्तरैकोनविंशतिवत्सरस्य महासभां लखनौपत्तने संवृत्तां प्रतिगत आसम्। तदा मां महाशयो गृहीत्वा वकीलबाबुमहाशयोऽस्मत्संकटानि सर्वाणि तुभ्यं निवेदयतीत्युक्त्वा चंपारण्ये गमिष्याम इति मां निरबध्नात्। वकीलबाबुमहाशय इत्यन्यः कोऽपि न। चंपारण्यप्रकरणे मम मान्यवरः सहयोगी बीहारप्रदेशे सार्वजनिकजीवनस्य प्राणभूतो बाबुव्रजकिशोरप्रसादः। राजकुमारशुक्लस्तं मम पटमंडपमानिनाय। सोऽयं कृष्ण‘ आलपाका’निर्मितदीर्घांगिकां जंघावस्त्रं च धृतवान्। तं दृष्ट्वा तदा मम मनस्यसाधारणं गौरवं नैव जनितम्। निष्कपटानां कृषीवलानां द्रव्यापहारकर्ता ‘वकीलमहाशयो’ऽयमेक इत्यहमज्ञासिषम्। चंपारण्यविषये तेनोक्तं किंचिदाकर्ण्य मम पद्धतिमनुसृत्य प्रत्युक्तवान् यथाहं प्रत्यक्षमेव तत्रत्यस्थितदर्शनं विना ममाभिप्रायं न दद्याम्। एतद्विषये महासभायां निर्णयोऽस्तु सद्यो मां मुञ्चेति राजकुमारशुक्लेन महासभायाः साहाय्यमपेक्षितम्। बाबुव्रजकिशोरप्रसादश्चंपारण्यजनैः सहानुभूतिसूचकं प्रस्तावं महासभायामानीतवान्। सर्वसंमत्या सोऽङ्गीकृतः॥

एतेन राजकुमारशुक्लो यद्यपि संतुष्टस्तथापि तावता संतृप्तिं न यातः। स्वतो मयैव चंपारण्यं गत्वा तत्रत्यकृषीवलानां कष्टवृत्तिर्द्रष्टव्येत्यैच्छत्। अहं देशाटनाय प्रवृत्तः। तन्मध्ये चपारण्येऽप्येकद्विदिवसान् यापयिष्यामीत्यवोचम्। एकं दिनं पर्याप्तम्। भवानेव तत्रत्यस्थितिं द्रक्ष्यतीति सोऽब्रवीत्॥

लखनौपत्तनादहं कानपूरं गतः। राजकुमारशुक्लो मां तत्रान्वसरत्। चंपारण्यमितो बहुसमीपे वर्तते। दिनमेकं दीयतामित्यवोचत् सः। इमां वेलामहं क्षन्तव्यस्तत्राहमागमिष्यामीति वाग्दत्ता मयेत्यहमुक्त्वेतोऽपि बलवद्बद्धोऽभवम्॥

अहमाश्रमं प्रति निवृत्तः। सर्वव्यापी राजकुमारस्तत्रापि स्थितः। कदागम्यते इत्येतन्निर्णीयाधुना ब्रूथेति सोऽब्रवीत्। मयोक्तं यथा—मया हीदृग् दिवसे कलकत्तानगरे भवितव्यम्। तदागत्य मां दृष्ट्वा ततो नेतुमर्हथेति। क्व गंतव्यम्। किं कर्तव्यम्। किं द्रष्टव्यमित्येतत् किमपि मया न ज्ञातमासीत्॥

मया कलकत्तायां भूपेंद्रबाबोर्गृहगमनात्पूर्वमेव राजकुमारशुक्लस्तत्र गत्वा स्थितः। एवं निरक्षरो नागरिकताशून्यस्तथापि दृढप्रतिज्ञः कृषीवलो मामाचकर्ष॥

Funding by IKS-MoE

एवं वयं सप्तदशोत्तरैकोनविंशतिमितवर्षस्यारंभे कलकत्तानगराच्चंपारण्यं प्रति प्रस्थिताः। उभावपि ग्राम्यौ कृषीवलाविव दृश्येते स्म। कां शकटीमारुह्य मया गंतव्यमित्यपि मया न ज्ञातम्। स मां तत्र निनाय। उभावपि सहप्रयाणं कृत्वा प्रातः पटणापत्तनं प्राप्तौ ॥

इदं प्रथममेवाहं पटणापत्तनं गतः। तत्र कस्यचिद्गृहेऽवतरीतुं मित्राणि वा परिचिता वा नासन्। राजकुमारशुक्लो यद्यपि सरलमतिः कृषीवलः पटणानगरे तस्य परिचितैर्मित्रैर्वा भवितव्यमेवेति मया गणितमासीत्। प्रयाणे मम 'तदीयपरिचय इतोऽपि साधीयान् संवृत्तः। पटणापत्तनप्राप्त्यनंतरं तद्विषये ममासमीचीना अभिप्राया न स्थिताः। स न किंचिदज्ञासीत्। अयं 'वकील' महाशयं मित्रं मन्यमानोऽपि नैव मित्रमासीत्। तद्दृष्टौ राजकुमारशुक्लो भृत्यवत् स्थितः। एवं व्यवहारिणां कृषीवलानां तेषां 'वकील'महाशयानां च मध्ये उत्थितप्रवाहगंगानदी पुटभेदवदंतरं विद्यते ॥

राजकुमारशुक्लो मां पटणापत्तने राजेंद्रबाबुमहाशयगृहं निनाय। राजेंद्रबाबुमहाशयो नगरे न स्थितः। जगन्नाथपुरीं गतो वान्यत्र कुत्रापि गतो वा न स्मरामि। 'बंगलो'मंदिरे एकद्विभृत्याः स्थिताः। ते मां नैव लक्षयामासुः। मन्निकटे कश्चिदाहारपदार्थ आसीत्। मया खर्जूरमपेक्षितम्। तन्मह्यं राजकुमारशुक्लः पण्यस्थानादानीय ददौ ॥

बिहारप्रदेशे नियतास्पृश्यतासीत्। किंजातीयोऽहमिति भृत्यानां न विदितम्। अतो यदा ते कूपोदकमपयुंजते स्म तदा मया सेकपात्रे जलं नोत्तोलनीयम्। पात्रात्पतज्जलबिंदव एतान्स्पृष्ट्वा मलिनीकुर्युरिति भयात्। राजकुमारो मम गृहांतःस्थितं शौचकूपं प्रादर्शयत्। भृत्यस्तत्क्षणमेव बहिः स्थितमदर्शयत्। एतत्सर्वेण ममाश्चर्यं वा कोपो वा नाजायत यतो मयेदमभ्यस्तचरमासीत्। भृत्याः स्वकर्तव्यं कुर्वन्ति स्म। राजेंद्रबाबुमहाशयस्य यथेष्टं तथाकार्षुः ॥

एतत्कुतूहलजनकादनुभवाद्राजकुमारशुक्लं न केवलमज्ञासिषम्। परं तस्मिन्मम गौरवमवर्धत। ममेदानीं स्पष्टमभूद्यद्राजकुमारशुक्लो मम मार्गदर्शीति न खलु स्यान्मयैव सूत्रं वोढव्यमिति ॥

त्रयोदशोऽध्यायः

साधुशीलो बिहारी

मौलनामझरूलहक्कमहाशयो यदा लंडनपत्तने बारिस्टरपरीक्षार्थमधीते स्म तदा तस्य परिचयो मे जातः। पंचदशोत्तरैकोनविंशतिमिते वर्षे मोहमय्यां मिलितमहासभायां (तस्मिन् वर्षेऽसौ 'मुस्लिम'अधिवेशनाध्यक्ष आसीत्) मया दृष्टोऽयं पूर्वपरिचयस्य नूतनजीवकलां दत्त्वा यदा

यदाहं पटणानगरं गन्तास्मि तदा तदा तस्य गृह एवावतरीतव्यमिति निमंत्रणं तेन दत्तमासीत् । तदाह्वानं स्मृत्वा तस्य ममागमनकृत्यं निवेद्य लेखं प्राहैषम् । स स्वीय-'मोटर'यानेनागत्य मया तस्यातिथ्यं स्वीकरणीयमिति निरबध्नात् । अहं तस्य मम कृतज्ञतां व्यक्तीकृत्य प्रथमतो लभ्यया लोहशकट्याहं चंपारण्यं प्रति प्रेषणीय इति व्यज्ञापयम् । लोहशकटीविषयसूच्या मादृशबाह्यजनस्य किमपि प्रयोजनं नासीत् । राजकुमारशुक्लमुखेन मया प्रथमं मुझफ्फरपुरं गंतव्यमित्यसूचयत् । तत्सायमेव तत्र गंत्री लोहशकट्यासीत् । तया मां प्रेषितवान् ॥

आचार्यकृपलानीमहाशयस्तदा मुझफ्फरपुरे स्थितः । हैद्राबादनगरं प्रति गमनात्प्रभृति तस्य विषयो मया ज्ञातः । डॉ. चोईथराममहाशयस्तस्य महात्यागवृत्तिं विषयं तस्य जीवनस्य सरलतां तेन प्रदत्तद्रव्येण निर्वाह्याश्रमसंगतिं च मम न्यवेदयत् । सोऽयं मुझफ्फरपुरस्य राजकीयप्रौढविद्याशालाया अध्यापकानामेको मया तत्र गमनकाल एव कार्यं परित्यज्य स्थितः । ममागमनं तस्य तंत्रीद्वारा निवेदितमासीत् । लोहशकटी तत्र मध्यरात्रं गतापि बहुभिर्विद्यार्थिभिः सह मां शकटीवेदिकायामभ्युत्तस्थौ । तस्य स्वीयं गृहं नासीत् । अध्यापकमल्कानीमहाशयस्य मंदिरे निवसति स्म । ततो मल्कानीमहाशय एव ममातिथ्यं चकार । तदात्वे राजकीयसेवकानां मादृशस्य निवासप्रदानमासीदसाधारणो विषयः ॥

आचार्यकृपलानीमहाशयो मम बिहारप्रदेशस्य तत्रापि तिरहुत्प्रांतस्यातिशोचनीयामवस्थां विवृत्य मदीयकार्यं कियत्कठिनमस्तीति न्यवेदयत् । बिहारवासिनां तस्य च निकटसंबंध आसीत् । मया बिहारप्रदेशगमनोद्देशः पूर्वमेव जनस्य निवेदित आसीत् ॥

प्रांतन्यायवादिनामेकोऽल्पो गणो मां द्रष्टुमागतः । तेषां मध्ये रामनवमीप्रसादस्य स्थितिमद्यापि स्मरामि । यतस्तस्य श्रद्धा ममावधानमग्रहीत् ॥

तेनोक्तं यथा – भवत्कार्यमत्र मल्कानीमहाशयगृहे स्थित्वा कर्तुं न शक्यम् । अस्माकं कस्यचिद्गृहमागत्य स्थातव्यम् । गयाबाबुमहाशयोऽत्र प्रसिद्धो न्यायवादी । भवन्तं तस्य वचनात्तद्गृहं नेतुमहमत्रागतः । सर्वेषामस्माकं राज्याधिकाराद्भीतिरस्तीत्यस्माकं संमतम् । परंतु यथाशक्ति साहाय्यं कर्तुं सज्जस्थिताः स्मः । राजकुमारशुक्लेनोक्तमशेषं बहुशः सत्यमेव । अस्मदग्रेसरा अस्मिन्दिने यद्यत्र स्थिताः समीचीनमभविष्यत् । मयानयोरुभयोर्बाबुव्रजकिशोरप्रसादो बाबुराजेंद्रप्रसाद इत्यनयोस्तंत्रीद्वारा वार्ता प्रेषिता । तयोरागमननिरीक्षणमस्ति । ताभ्यां युष्मदपेक्षितसर्वविषयस्यापि निवेदनमधिकसाहाय्यप्रदानं च भविष्यतीति निश्चितमेव । कृपया गयाबाबुमहाशयस्य गृहमागन्तव्यमिति ॥

अस्य संमतिप्रदाने गयाबाबुमहाशयस्य कष्टं भवेदिति क्षणमेकं शङ्कितमपि तस्य प्रार्थना नैव निराकृता । गयाबाबुमहाशयो संकोचं पर्यहरत् । ततोऽहं तद्गृहे गतः । सोऽयं तद्गृहस्थाश्च ममोपरि वात्सल्यधारां प्रासारयन् ॥

इदानीं व्रजकिशोरबाबुमहाशयो दरभंगानगराद् राजेंद्रबाबुमहाशयश्च पुरीपत्तनादाजग्मतुः। व्रजकिशोरबाबुर्मया लखनौपत्तने दृष्टः। व्रजकिशोरबाबुमहाशय इव न दृष्टः। एतद्वारं तेषु दृश्यमाना विहारिणो नम्रता सरलता साधुतासाधारणश्रद्धा च मम मनसि लग्नीकृताः। एतेन मम हृदयं हर्षपूर्णमासीत्। बिहारस्थन्यायवादीमण्डल्यास्तस्मिन् विन्यस्तगौरवं दृष्ट्वा ममाश्चर्यमानंदश्चाभूत्॥

अनया मित्रमण्डल्याहं यावज्जीवमैत्र्या बद्धो भवन्नासमिति शीघ्रमेवाहमपश्यम्। व्रजकिशोरबाबुमहाशयो मह्यं वस्तुस्थितिं न्यवेदयत्। स किल निष्किंचनकृषीवलानां व्यवहारांश्चालयति स्म। यदाहं तत्र गतस्तदा व्यवहारद्वयं चलति स्म। व्यवहारे जिते सति जनस्यैतावत् साहाय्यं दत्तमिति समाहितोऽभूत्॥

यद्येतेभ्यः कृषीवलेभ्यः शुल्कं न गृहीतं स्वकुटुंबनिर्वाहाय द्रव्याभावाद्दरिद्राणां सफलसाहाय्यं कर्तुं न शक्यत इति मिथ्यावगम्यते। तैर्गृह्यमाणशुल्कं बंगालबिहारदेशेषु चलत्प्रमाणं च वीक्ष्याहं भ्रांतोऽभवम्। स स्वाभिप्रायदानार्थे दशसाहस्रं रूप्यका दत्ता इति मामवोचन्। सहस्रादूनं नैव गणनीयम्॥

एतद्विषयमधिकृत्य सदुद्देशपूर्वकं मया कृतं वाग्दंडनमयं सुहृदन्यथा न मत्वा श्रोत्रयोरगमयत्॥

मयोक्तं यथा–एतद्व्यवहारपरिशीलनानंतरं ममेदं प्रतिभाति यन्न्यायस्थानानि न गन्तव्यानि। ईदृग् विवादं न्यायस्थानं प्रवेश्य न कोऽपि लाभः संपद्यते। कृषीवला एव कष्टपतिता भयाकुला यदा स्थिताः न्यायस्थानैः किं प्रयोजनम्। भीतिपरिहार एवास्य पारमार्थिकमौषधम्। 'तीनकठिया' पद्धतिर्बिहारप्रदेशाद्बहिर्यावन्निष्कासिता तावन्निश्शब्दमुपवेष्टुं न योग्यम्। दिनद्वयेनेतः प्रस्थातव्यमिति मनस्यकरवम्। परन्तु कार्यमिदं वर्षद्वयं गृह्णाति चेत्तावन्तं कालमत्र यापयितुं सज्जस्थितोऽस्मि। मम पुरोमार्गः किंचित्किंचिद् दृश्यते। परन्तु युष्मत्साहाय्यमपेक्ष्यत इति॥

बाबुव्रजकिशोरप्रसादोऽसाधारणस्थिरप्रज्ञया स्थित इत्यपश्यम्। शांतेन तेनोक्तं यथा–अस्माकं यावच्छक्यं करिष्यामः। परन्तु युष्माभिरपेक्षितं किमिति कृपया ब्रुथेति॥

एवं वयं मध्यरात्रपर्यन्तं भाषमाणा उपविष्टाः॥ उक्तं च मया यथा–शासनसंबद्धेन युष्मदीयपरिश्रमेण न मे किंचिदुपयोगो भविष्यति। मया लेखकानां द्विभाषिणां च साहाय्यमपेक्षितम्। कारागृहप्रवेशसंभवोऽप्यस्ति। परंतु यद्यपि युष्माभिस्तदपायाङ्गीकारो ममेष्टोऽपि यूयं कियद्दूरगमनशक्तिर्युष्माकं स्यात्तावद्दूरमात्रं गच्छत। युष्मदुद्योगं विनिश्चितकालपर्यन्तं विहाय लेखककार्यस्वीकारोऽपि नाल्पो विषयः। अत्र भाष्यमाणं हिन्दीप्रांतिकविभेदमवगन्तुं मम कष्टं भवति। कैथिभाषायां अथवा उर्दुभाषायां लिखितपत्राणि मम पठितुं

नायाति । तानि युष्माभिर्भाषान्तरीकरणीयानि । एतत् सर्वस्यापि वेतनं दातुं न शक्यते । एतत्सर्वं प्रेमपूर्वकं सेवाभावेन च करणीयमिति ॥

व्रजकिशोरबाबुमहाशयः सर्वमेतत्तत्क्षणमेवावागच्छत् । स इदानीं मां स्वसहवासिभ्योऽप्येकैकशो नानाविधैः प्रश्नैर्मां मोहयितुं प्रवृत्तः । मयोक्तस्य सर्वस्यापि फलितार्थः कियन्ति दिनानि सेवाकार्ये स्थातव्यम् । कियन्तो जना अपेक्ष्यन्ते । पर्यायशः कार्यं करणीयं वेत्याद्यवगन्तुं प्रयेतिरे । एतदनन्तरं न्यायवादिषु त्यागशक्तिः कियती विद्यते इत्येतदधिकृत्य तानपृच्छत् ॥

पर्यन्ते ते ममैवं रीत्या प्रत्यादिशन्यथास्मास्वेतावन्तो जना भवदुक्तप्रकारेण करिष्यामः ॥ अस्माकं यावन्ति दिनान्यावश्यकानि तावन्ति युष्मत्पार्श्वे स्थास्यामः । कारागृहगमनमस्माकं नूतनो विषयः । तथाप्यानुकूल्याय प्रयतिष्यामह इति ॥

चतुर्दशोऽध्यायः

अहिंसादेव्याः संमुखे

चंपारण्यस्य कृषीवलानां परिस्थितिं विमृश्य तैर्नीलभूस्वामिनां विषये निर्दिश्यमानान्यारोपणानि ज्ञातुं ममोद्देशोऽभूत् । एतदर्थेऽहं परःसहस्रकृषीवलान् द्रष्टुमावश्यकमासीत् । विमर्शारंभणात्पूर्वमस्मिन्विवादे भूस्वामिनां पक्षं ज्ञातुं तत्प्रांत्यविभागस्याधिकारिणो द्रष्टुं चातिमुख्यमिति मया परिगणितम् । उभयोर्ममाशयं निवेद्य पत्राण्यलिखमुभावपि तस्मिन् काले मया द्रष्टुमागन्तव्यमिति मह्यं न्यवेदयताम् ॥

भूस्वामिनां संघस्य कार्यदर्शी विस्पष्टमेव त्वं बाह्यो जनः । भूस्वामिनां कृषीवलानां च मध्य आगन्तुं नास्ति कोऽप्यधिकारः । तथापि यत्किंचिन्निवेदयितुमिष्यते चेल्लेखनद्वारा निवेद्यतामिति मामाह । मया तावद्विनयेन कार्यदर्शी प्रोक्तो यथाहं बाह्यो जन इति न मन्ये । कृषीवला इच्छन्ति चेत्तेषां स्थितिगतीर्विचारयितुं मम संपूर्णाधिकारोऽस्तीति । प्रांत्यविभागस्याधिकारी च दृष्टः । स मां त्रासयितुमारब्धः । अपि च मया तिरहुतप्रांतं परित्यज्य गंतव्यमित्यसूचयत् ॥

अहं निरोद्धव्यश्चेन्मम बंधनं मोतीहारीस्थलेऽथवा बेतियास्थले जायमानमत्युत्तमम् । अतो मया तत् स्थलगमनं त्वरया कर्तव्यमिति ॥

चंपारण्यं तिरहुतप्रांतविभागस्यैकं मंडलम् । मोतीहारीस्थलं च तस्य मुख्यपत्तनम् । राजकुमारशुक्लस्य स्थलं बेतियास्थलसमीपस्थितम् । तस्यासमंतात् स्थितकोटीकृषीवलास्तन्मंडलेऽत्यंतदरिद्रा बभूवुः । मया ते द्रष्टव्या इति राजकुमारशुक्लस्य तीव्रेच्छासीत् । ममाभिलाषोऽपि तावत्प्रबलः स्थितः ॥

Funding by IKS-MoE

अतोऽहं तस्मिन्नेव दिने मम सहवासिभिः सह मोतीहारीस्थलं प्रति प्रस्थितः । बाबुगोरखप्रसादः स्वगृहेऽस्माकमाश्रयं ददौ । सैका धर्मशाला बभूव । अस्माकं सर्वेषामपि तत्र स्थातुमवकाशः कष्टतर आसीत् । मोतीहारीस्थले प्रायः पंचमैलदूरे कस्यचित्कृषीवलस्योपर्यत्याचारप्रवृत्त इति वार्ता तद्दिनमेवागता । परेद्युः प्रातरस्माभिर्धरणीधरप्रसादेन सह गत्वा स द्रष्टव्य इति निश्चितमभूत् । तथा वयं गजमारुह्य तत्र प्रस्थिताः । यथा गुजरातदेशे वृषभशकटी साधारणा तथा चंपारण्ये गजः साधारण इति वक्तव्यम् । अर्धमार्गातिक्रमात्पूर्वमेव 'पोलीस' अधिकारिणः सेवक एकः पार्श्वमागत्य 'पोलीस' अधिकारिणो वन्दनानि न्यवेदयत् । तस्यार्थो मया ज्ञातः । धरणीधरबाबुमहाशयमग्रे पूर्वस्थलं प्रति गन्तुमनुज्ञाय सेवकेनानीतायां भाटकशकट्यामहमुपविष्टः । तदा सोऽयं चंपारण्यं परित्यज्य गन्तव्यमित्याज्ञापत्रं मम प्रदाय मां पूर्वस्थलं निनाय । आज्ञापत्रप्राप्तये मया हस्ताक्षरं कर्तव्यमित्युक्तोऽहं चंपारण्यस्य कृषीवलानां स्थितिगतेः परिशीलनपर्यन्तं चंपारण्यपरित्यागे ममोद्देशो नास्तीत्यलिखम् । एतदनन्तरं मया बहिष्कारनिक्षपो धिक्कृत इति परेद्युरेव न्यायस्थाने विचारणायाज्ञापत्रमागतम् ॥

अहं सर्वरात्रं जागरितो भूत्वा पत्रलेखने बाबुव्रजकिशोरप्रसादस्यानुशासनप्रदाने च कालमयापयम् । प्रतिबोधनपत्रं आह्वानपत्रं चेत्युभयोर्वृत्तांतो दावाग्निवत् प्रसारितः । तस्मिन्दिने मोतीहारीस्थले केनाप्यदृष्टपूर्वं दृष्टमिति मयावगतम् । गोरखबाबुमहाशयमंदिरं न्यायस्थानं च जनैः पूर्णमासीत् । सौभाग्यवशान्मया रात्रावेव सर्वं कार्यं समाप्तमासीत् । अतो जनसमूहं निरोद्धुं साध्यमासीत् । मम सहवासिभिरत्यंतसाहाय्यमर्पितम् । जनानां नियंत्रणे त उद्युक्ता यतः सर्वत्रगामिनं मां जनसमूहोऽनुसरति स्म । मंडलस्याधिकारी 'मेजिस्ट्रेट' 'पोलिस सुपरिंटेंडेंट' अपि चाहमेतदस्मन्मध्ये काचिन्मैत्री उदियाय । मदुपरि प्रयुक्तप्रतिबोधनपत्रेत्यादीनि मया शासनानुरोधेनैव विरोधयितुं शक्यान्यासन् । एतत्प्रति मया ते सर्वे स्वीकृताः । अधिकारिणां विषये मम वृत्तमनिर्वचनीयमासीत् । अहं तान् व्यक्तिगत्यानविरुद्धवांस्तेषामाज्ञायाः सविनयं विरोधनमित्येतेषामवगतमासीत् । एवं तेषां मनः परिवृत्तम् । अतो मत्पीडनं परित्यज्य जनसमूहस्य नियन्त्रणाय मम सहवासिनां च साहाय्यं संतोषेणोपायुज्यत । परन्तु स्वाधिकारः सर्वोऽपि शिथिलीभूत इत्येतेन तद्दृष्टेर्व्यक्तमासीत् । जनास्तत्क्षणे दण्डभयं त्यक्त्वा स्वेषां नूतनमित्रस्य प्रेमशक्तिं प्रणेमुः ॥

चंपारण्ये मम कस्यापि परिचयो नासीदिति स्मर्तव्यम् । कृषीवलाः सर्वेऽनभिज्ञाः । चंपारण्यं गंगानद्या उत्तरे बहुदूरे हिमवत्पर्यन्तस्य पादे नेपालस्यातिसमीपस्थित्या भरतखंडस्येतरभागेन संपर्कशून्यमासीत् । तस्मिन् प्रांते महासभाया नामापि नावगतमिति वक्तुं शक्यम् । श्रुतमहासभानामधेया अपि तां प्रवेष्टुं तन्नामोच्चारयितुं वा भीत्या पश्चाद्भवन्ति स्म । परन्त्वद्य महासभा तत्सभ्याश्च महासभायां नाम्ना न यद्यप्यत्यन्तवास्तविकरीत्या तत्प्रान्तं प्रविष्टाः ॥

मम सहवासिनां सूचनामादाय किंचिदपि कार्यं महासभाया नाम्ना न करणीयमिति निर्धारितं मया । अस्माभिरपेक्षितं न कीर्तिः परं कार्यम् । यतो राज्याधिकारोऽपि च तत्सूत्रधारिणो भूस्वामिनो महासभां क्रोधेन तिरस्कारेण च पश्यन्ति स्म । तद्दृष्टौ महासभा नाम न्यायवादिनां वादविवादः शासनस्य भंगानन्विष्याक्रमकार्यसाधनं पावकौषधस्यानायकत्वस्याकृत्यानि । व्यवहारचातुर्यमाषाढभूतिकपटविद्यैषां सर्वेषामपि जन्मभूमिः । अस्माभिस्तदुभयोरयुक्तबोधो निष्कासनीय आसीत् । अतोऽस्माभिर्महासभाया नाम न प्रकाशितम् । कृषीवलादिजनानां महासभाया नाम सुस्थायाः स्थितिरपि न वक्तव्येति निरचैष्म । तैर्महासभाया अंतःकरणं ज्ञात्वानुसृते सत्यलम् । अक्षरश एतदवलंबनमपेक्षितमित्यस्मदाशयोऽभूत् । अतोऽस्मदागमनात्पूर्वं भूमिकां साधयितुं महासभायाः पक्षमाश्रित्य गूढचारा इतरे वा न प्रेषिताः । राजकुमारशुक्लस्य परःसहस्रकृषीवलानां हृदयमवगाहितुं न साध्यमासीत् । तन्मध्ये किंचिदपि राजकीयकार्यं न कृतम् । चंपारण्याद्बहिः स्थितो लोकः तैर्नावगतः । तथापि वयं जन्मारभ्य संवृत्ताः सुहृद इव तेऽस्मानागमयामासुः । एवं रीत्यास्मन्मेलने ईश्वरस्याहिंसाया अपि च सत्यद्वयसाक्षात्कारोऽभवदित्युक्ते तदक्षरशः सत्यमेव नातिशयोक्तम् ॥

एतत्साक्षात्कारसिद्धेर्मम को वाधिकार इत्यालोच्यमाने मया जनेषु प्रेमैकं विना नान्यद् दृश्यते । एतदपि किम् । अहिंसायां ममाचला श्रद्धा नान्यत्किंचित् ॥

चंपारण्ये नीतं तद्दिनं मम जीवनं कदापि न विस्मर्यं भवति । तत्रत्यजनानां मम च तद्दिनमपूर्वानंदसुदिनम् ॥

शासनानुरोधेन न्यायस्थानेऽहं विचारणीय आसम् । परन्तु वस्तुतो राज्याधिकार एवापराधिस्थाने स्थितः । प्रांत्यविभागाधिकारिणो मदर्थे प्रसारितवागुरायां राज्याधिकारं तदन्तः पातयामासुः ॥

पंचदशोऽध्यायः

व्यवहारो व्यपनीतः

विचारणा प्रारेभे । राज्याधिकारस्य न्यायवादी 'मेजिस्ट्रेट'महाशय इतरेऽधिकारिणश्च दिग्भ्रांताः स्थिताः । किं कर्तव्यमिति तेषां न प्रत्यभात् । व्यवहारः पुरस्ताद् यात्विति राजकीयन्यायवादी 'मेजिस्ट्रेट' महाशयं निर्बध्नाति स्म । परंत्वहं निवार्य चंपारण्यं परित्यक्तव्यमित्याज्ञाया उल्लंघनापराधमहं संमन्तुमिच्छालुरस्मि । इत्युक्त्वाधस्ताद् गतं संक्षिप्तभाषणं पठितवान् यथा—

Funding by IKS-MoE

‘ क्रि. प्रो. कोड’गतचतुश्चत्वारिंशदुत्तरशतस्य निबंधनसंबद्धामाज्ञामहमुल्लंघितवानिति प्रतिभाति खलु । अतिगंभीरपरिणामवदेतद्वर्तनं किमित्यनुसृतमित्येतद् व्यक्तीकर्तुं न्यायस्थानस्यानुज्ञाया संक्षेपेण वक्तुं प्रवृत्तोऽस्मि । एतदत्रत्याधिकारिणां मम चाभिमतभेदविषय इति प्रतिभाति । जनसेवा राष्ट्रसेवा च कर्तव्येत्युद्देशेन मयास्मिन्देशे पादो न्यस्तः । नीलिकाभूस्वामिनोऽस्माभिः सह न्यायरीत्या न वर्तन्त इत्यत्रत्याः कृषीवला वदन्ति । मयात्रागत्य कृषीवलानां साहाय्यं कर्तव्यमिति निर्बध्यमानोऽहमागतोऽस्मि । अत्रत्यस्थितिगतीरविज्ञाय मया न किंचित् साहाय्यं करणीयमासीत् । ततोऽहं शक्यं चेद्राज्याधिकारिणामपि च भूस्वामिनामाश्रयं प्राप्यात्रत्यविषयानवगन्तुमागतः । ममोद्देशान्तरं नास्ति । मयात्रागमनेन कयापि रीत्या प्रजाशांतिभंगः प्राणहान्यादयश्च भविष्यन्तीति न विश्वसनीयम् । एतादृशविषयेषु ममाधिकानुभवो विद्यत इति वक्तुं शक्यम् । परन्तु राज्याधिकारिभिरन्यथा पर्यालोचितम् । तदीयकष्टं मम संपूर्णमेव विदितम् । तेषामागतसमाचारस्याधारेणैव तैः प्रवर्तितव्यमित्यपि संमन्ये । शासनानुरोधेन प्रवर्तमानानां प्रजानामहमेको मया प्राप्ताज्ञा पालनीयेति मनसः प्रतिभातीत्येतत्सहजम् । अस्मिन् संदर्भे संवृत्तमपि तथैव । परमहमत्र येषां कृते आगतस्तेषां विषये मम कर्तव्यमुल्लंघ्य मया तथा करणीयं नासीत् । अस्मिन् समये तेषां मध्यस्थितेनैव तेषां सेवा कर्तुं शक्येति मम प्रतिभाति । ततो मया स्वयमेव प्रतिनिवर्तितुं न शक्यमासीत् । एतत्कर्तव्यसंग्रामे मामेतज्जनमध्याद्बहिर्निष्कासनभारं राज्याधिकारिणामुपरि धारणमात्रं मम साध्यं स्थितम् । भरतखंडस्य सार्वजनिकजीवने मादृशैः स्थानप्राप्तैरितरेषामुदाहरणप्रदानेऽत्यंतजागरूकैर्भाव्यमिति मया ज्ञातम् । अद्य वयमतिसंकीर्णराजकीयव्यवस्थायां जीवामः । ईदृश्यां परिस्थितौ ममाग्रस्थितेषु संदर्भेष्वेष्वात्मगौरववतां मनुष्याणां निरपायो मानकरो मार्गो मयावलंबितस्तावदेक एवेति मम दृढो विश्वास आज्ञोल्लंघनफलं दण्डः । निःशब्दमेव सोढुं स मार्गः । मम विधीयमानदण्डं कयापि रीत्या न्यूनीकर्तुं न मया भाषणं कृतम् । मयाज्ञोल्लंघनकारणं शासने तिरस्कारबुद्धिर्न । तथानुष्ठानं ममात्मशासकमुच्चतरनियममन्तरात्मन आज्ञां पालयितुमेवेति निवेदनमेतद्भाषणस्योद्देश इति ॥

अद्य विचारणां परोगमयितुमवश्यकमेव नासीत् । परन्तु न्यायाधिपतिना राजकीयन्यायवादिना चैवंविधं भाषणं न निरीक्षितमिति निर्णयं पठितुमन्यद्दिनं निरचायि । एतदन्तरेऽस्माभिः सर्वे विषयाः पटणापत्तनसुहृद्भ्यः पंडितमदनमोहनमालवीयेभ्य इतरेभ्यश्च तंत्रीद्वारा प्रकाशिताः ॥

मम विहितं दण्डमवगन्तुं न्यायस्थानगमनात्पूर्वमेव न्यायाधिपतिर्मम पत्रमलिखद्यथा विहारप्रांतस्य राज्याधिपतिर्ममोपरिस्थितव्यवहारं विरमयितुमाज्ञापयदिति । मंडलाधिकारी च पत्रमलिखद्यथा—अहं कृषीवलानां परिस्थितिविमर्शं कर्तुं नास्ति कोऽप्यंतरायः । अधिकारिणः सकाशात् सर्वसाहाय्यं लप्स्यत इति । एतावच्छीघ्रमीदृशः परिणामो भविष्यतीति न केनाप्यस्माकं निरीक्षितम् ॥

अहं मंडलाधिकारिणं हेकोकमहाशयं गत्वापश्यम् । न्यायतत्परः सज्जन इव सोऽदृश्यत । तेनोक्तं यथा मयापेक्षितपत्राणि द्रष्टुं पृच्छेत् । यदापेक्ष्यते तदा द्रष्टुमागम्यतामिति । एवं देशस्य विनयेन शासनभंगे प्रत्यक्षं प्रथमो वस्तुपाठो लब्धः । तस्मिन् स्थले वृत्तपत्रिकासु चैतद्विषयमधिकृत्य चर्चा संवृत्ता । मम विमर्शकार्यमनिरीक्षितप्रकटनासौकर्यं प्राप । एतद्विमर्शकार्यस्य राज्याधिकारस्तटस्थो भवितुमावश्यकमासीत् । परन्तु वृत्तपत्रिकाणां वार्तानिवेदकानां च संपादकीयलेखनानां चावलंबो नापेक्षितः । वस्तुतश्चंपारण्यगृहपरिस्थितिस्तथा सूक्ष्मक्लिष्टाभवद्यथा प्रबलटीका वातिवर्णितनिवेदनानि वा मम यत्साध्यमानकार्यं सौकर्येण विनाशयितुं शक्यमासीत् । ततो मया लिखितं वृत्तपत्रसंपादकानां यथा—प्रकटयितुमावश्यकान्सर्वान् विषयान् युष्माकं प्रेष्यात्रत्यपरिस्थितेर्निरंतरं परिचयं कारयिष्यामि । कृपया वृत्तान्तनिवेदकान् प्रेषयितुं न परिश्रमं वोढुमर्हथेति ॥

राज्याधिकारिणो मामत्र स्थातुं न निवारयन्तीति दृष्ट्वा चंपारण्यस्य भूस्वामिनः क्रुद्धा इति मया विदितम् । अधिकारिणामपीदं मुखं विवृत्त्य नोच्यमानमपि नेष्टमासीदित्यस्माभिर्ज्ञातम् । ततो वृत्तपत्रेष्ववास्तवविपरीताभिप्रायप्रदा वृत्तान्ताः प्रकटीकृताश्चेत्ततस्तेषां क्रोधज्वालाया इतोऽप्युद्रेकगमनसंभवः स्थितः । अपि च ते क्रोधमेतं ममोपर्यनपसार्य वराकाणां भयभीतानां कृषीवलानामुपर्यपसारयन्तीति न कोऽपि संशयोऽभवत् । एतेन मम सत्यशोधनस्य महाप्रत्यूहो लगति स्म ॥

एतावज्जागरूकस्थितेऽपि मयि भूस्वामिनो मम विरुद्धा अतिविषमयं क्षोभमुपाक्रमन्त । मम सहकारिणां च विषये नानाविधान्यनृतानि वृत्तपत्रिकासु प्रकटीबभूवुः । परंत्वहमतिजागरूकतया स्थितत्वात्केवलाल्पविचारमारभ्य सर्वविषयेषु सत्यस्यैव साधितत्वात्तैर्मुक्तबाणा निरर्थका बभूवुः ॥

व्रजकिशोरबाबुमहाशयस्योपरि मृत्तिकाक्षेपे भूस्वामिनः स्वप्रयत्नान् सर्वान् व्ययीचक्रुः । परन्त्वधिकं च तन्निंदाधिकं च लोकानां गौरवमित्यारोहति स्म ॥

एतादृशसूक्ष्मसंदर्भे इतरप्रांतेभ्यो नायकानामाह्वानमुचितमिति न मया परिगणितम् । पण्डितमालवीयो यदापेक्ष्यते तदा निवेद्यताम् । अहमागमिष्यामीति वाचं प्रेषितवान् । परन्त्वहं तं नाक्लेशयम् । एवमयं संग्रामो राजकीयस्वरूपं यथा न प्राप्नुयात् तथा मया निरुद्धम् । परन्तु मया नायकेभ्यो मुख्यवृत्तपत्रेभ्यश्च वृत्तान्तः प्रेष्यते स्म । इदं प्रकटनाय न तेषामवगमनाय । अंतिमे फले राजकीये सत्यपि कारणं राजकीयं न भवति चेत्तस्य राजकीयस्वरूपप्रदानेन तद्विनश्येदेतादृशस्वरूपमप्रदाय तस्मिन्निजपरिमितौ स्थापिते तल्लाभं प्राप्नोमीति मयानुभवेन ज्ञातम् । यः कोऽपि वा विषयो भवतु निष्कामबुद्ध्या कृतया लोकसेवया पर्यन्ते देशस्य राजकीयलाभो भविष्यतीति चंपारण्यसंग्रामो निदर्शनम् ॥

षोडशोऽध्यायः

सेवाक्रमः

चंपारण्यविमर्शे यत्पूर्णेतिहासकथनं तात्कालिककृषीवलानां चरितस्य लेखनमेव भविष्यति । इदमेषु प्रकरणेषु न साध्यम् । चंपारण्यस्य विमर्शः सत्याहिंसोपेतो धीरतरः प्रयोग आसीत् । अनया दृष्ट्याहं केवलं वर्णनायोग्यमेवं प्रतिसप्ताहं लेखितास्मि । इतोऽप्यधिकविवरणमपेक्ष्यते चेद्बाबुराजेंद्रप्रसादेन हिन्दीभाषायां लिखितं चंपारण्यस्य सत्याग्रहेतिहास एव पठनीयः ॥

एतदध्यायस्य विषयं पर्यालोचयामः । वराको गोरखबाबुमहाशयो वस्तुतो गृहं न परित्यज्यते चेत्तस्य गृहे विमर्शं कर्तुं न शक्यमासीत् । मोतीहारीस्थलजनोऽस्माकमेकं गृहं भाटकेन प्रदातुमद्यापि भीतिग्रस्त एव स्थितः । तथापि व्रजकिशोरबाबुमहाशयः स्वचातुर्येण गृहमेकं भाटकेन प्रदापयामास । तस्यावरणे विशाल अनावृतप्रदेश आसीत् । वयं तद्गृहं गत्वा स्थिताः ॥

एतत्कार्यानुष्ठानं द्रव्यं विना साध्यमिति न प्रतिभाति स्म । ईदृशकार्याय प्रजाभ्यो द्रव्ययाचनं न पद्धतिरासीत् । व्रजकिशोरबाबुमहाशयस्तन्मित्राणां च बहवो न्यायवादिन आसन् । एते संदर्भेष्वागतेषु स्वयं वा स्वमित्रेभ्यो वा द्रव्यमुपस्थापयन्ति स्म । ते स्वयं स्वसदृशाच्चापेक्षितप्रदाने समर्थाः सन्तो लोकयाचनं कथं कार्यमिति तेषां भावनेति प्रतिभाति । चंपारण्यस्य कृषीवलेभ्य एकापि काकिणी न स्वीकर्तव्येति मनसि निश्चितं मया । तथा स्वीकारेऽपार्थं कुर्वन्तीति निश्चितम् । एतद्विमर्शनाय हिन्दुस्थाने सर्वतो द्रव्यदानाय प्रार्थना नैव कर्तव्येति च दृढमवधारितम् । तथानुष्ठानेन तस्याखिलभारतस्वरूपं राजकीयवर्णश्च प्रायश आयातः स्म । मोहमयीनगरस्य कानिचिन्मित्राणि रूप्यकाणां पंचदशसहस्रं प्रदातुमागताः । कृतज्ञतापूर्वकं तन्निराकृतं मया । चंपारण्याद्बहिर्निवसद्भ्योऽनुकूलस्य बिहारनिवासिभ्यो व्रजकिशोरबाबुमहाशयस्य साहाय्यं प्राप्य मासलभ्यं द्रव्यं संगृह्येतोऽप्यधिकमपेक्षितं चेन्मम मित्रं डॉ. प्राणजीवनदासमहेतामहाशयः प्रष्टव्य इति निरचैषम् । यावदावश्यकं तावद्द्रव्यं प्रेषयिष्यामीति डॉ. महेतामहाशयस्तत्क्षणमेव संमेने । एवमस्माकं द्रव्यसंबद्धा चिंता न कार्यासीत् । चंपारण्यस्याकिंचनत्वोचितं यावत्साध्यं तावत्प्राप्य मितव्ययेन वर्तनीयमित्यस्माभिः संकल्पितत्वादस्माकमधिकद्रव्यस्यावश्यकताप्रसंगो नासीत् । वस्तुतोऽस्माकमधिकद्रव्यस्यावश्यकता कथं नासीदिति पर्यन्ते दृष्टम् । सर्वं मिलित्वा त्रिसाहस्ररूप्यकाणां व्ययः कृत इति मे प्रतिभाति । यावदहं स्मरामि तावता वक्तुं शक्यमस्माभिः संगृहीतधनाच्चतुःपंचशतानि रूप्यकाणां रक्षितानीति प्रतिभाति ॥

Funding by IKS-MoE

मम सहवासिनां जीवनवैचित्र्यं प्रारंभे निरंतरविनोदविषय आसीत् । प्रत्येकस्य न्यायवादिन एको वाचक एको भृत्यश्चासन् । तस्मात्तेषां प्रत्येकं पाकशालाप्यासीत् । असकृन्मध्यरात्रे भुंजते स्म । यद्यपि ते स्वीयं व्ययं स्वयमेव सहन्ते स्म तथापि तज्जीवनक्रमे नियमराहित्यमुपद्रवं ददौ । तथापीमां वेलां वयं गाढमित्राण्यभूमेत्यतो वैमनस्यमस्माकं न संबभूव । मम हास्यकुचोद्यानि नान्यथाज्ञासिषुः । पर्यन्ते निश्चितं यथा भृत्या निष्कासनीयाः सर्वेषामेकयैव पाकशालया भवितव्यं सर्वैः क्लृप्तकालं कार्याण्यनुष्ठातव्यानीति चेति । सर्वेऽपि शाकाहारिणो नाभवन् । द्वाभ्यां पाकशालाभ्यां व्ययोऽधिकाधिको भवति स्म । तस्मात्सर्वेषामेकैव शाकाहारस्य पाकशाला भवेदिति निरचैष्म । साधारणमेवाहारं सर्वेऽपि गृह्णीयुरिति नियमयितुमावश्यकमित्यदृश्यत ॥

अनया व्यवस्थया न केवलं व्ययो न्यूनोऽभवत्परं कालोऽप्यल्पीयान् जातः । कार्यशक्तिश्च रक्षिताभूत् । अस्माकमेकदावश्यकतापि बहुलासीत् । कृषीवलाः स्वभाषणानि दातुं गणश उपस्थिताः । तेषां सहचराणां सैन्यं तत्पृष्ठत आगत्यांगणमारामश्च जनैरुत्सिक्तानि बभूवुः ॥

दर्शनार्थिभ्यो मां रक्षितुं मत्सहवासिनां साहसमसकृद् व्यर्थीबभूव । निश्चितकालमेव दर्शनं प्राप्यमासीत् । षट्सप्त वा स्वयंसेवका भाषणानि लेखितुमावश्यका आसन् । तदानीमपि कतिभिश्चिद्भाषणानि प्रदातुमवकाशं विना सायं गंतव्यमापतितम् । एतानि विज्ञापितानि सर्वाण्यपि सारभूतानि न बभूवुः । तेषां बहूनि पुनरुक्तान्येवासन् । परन्तु लोकरीत्यंतरेण समाधातव्यान्यासन् । अस्मिन्विषये तेषां मनोभावोऽपि मया ज्ञायते स्म ॥

उक्तलेखकैः कतिपये नियमा अनुसर्तव्या आसन् । प्रत्येकः कृषीवलो नानाविधैः प्रश्नैर्मोहनीय आसीत् । ये केचिदनुत्तीर्णाः परीक्षायां तेषां विज्ञापितानि त्यज्यन्ते स्म । एतत्सर्वमधिकं कालमपैक्षत । परन्तु बहूनि लिखितोक्तानि सत्यसिद्धानि परिणेमुः ॥

एषां भाषणानां लेखनकाले गुप्तचराणामेकः सर्वदोपस्थितः । तस्योपस्थानं परिहर्तुं शक्यमासीत् । परमस्माभिः पूर्वमेव निर्धारितं यथा गुप्तचराधिकारी न निवारणीयः । विनयेन दृष्ट्वा निवेदनीयवृत्तांतमशेषं निवेदनीयमिति । एतेनास्माकं न किमपि नष्टमभवत् । नेतावदेव गुप्तचराधिकारिणः पुरस्ताद्भाषणानां लेखनं कृषीवला निर्भया भवन्त्वित्येव कारणमासीत् । अस्याधिकारिण उपस्थानादेकतः कृषीवलानां भयं पलायितम् । अन्यतः कृषीवलेभ्योऽतिशयोक्तिं कर्तुं सहजो निर्बंधोऽलभ्यत । लोकान् वागुरायां पातयितुमेव गुप्तचराधिकारिणां कर्तव्यमित्यतः कृषीवलैर्जागरूकैर्भवितव्यमासीत् ॥

भूस्वामिनो न क्रोधनीया इति ममेष्टमासीत् । साधुवृत्त्या तेषां मन आवर्जनीयमित्यासीन्ममोद्देशः । अतो येषां येषां विषये महाप्रमादस्यारोपणं कुर्वन्ति स्म तेषां तेषां भूस्वामिनां पत्रं लिखित्वा ते मया दृश्यन्ते स्म । इदमुक्त्वाहं भूस्वामिनां संघं गत्वा तेषां पुरः कृषीवलानां

सर्वकष्टान्युक्त्वा तैरयं विषयः कीदृग्दृष्ट्या वीक्ष्यते इत्यवगम्यागतः । कतिपये भूस्वामिनो मयि द्वेषं निदधुः । कतिपये मामश्रद्धयापश्यन् । चतुःषष्ठा जनाः मां विनयेन दृष्टवन्तो बभूवुः ॥

सप्तदशोऽध्यायः

मम सहचराः

व्रजकिशोरबाबुमहाशयो राजेन्द्रबाबुमहाशयश्चेत्यनयोर्युगलं नैव लभ्यमिति वक्तुं शक्यम् । तयोर्मयि प्रेमातिशयात्तत्साहाय्यं विनाहमेकपदमप्यग्रे न न्यवेशयम् । तयोः शिष्या अथवा सहचराः ‘ शंभुबाबु – अनुग्रहबाबु – धरणीबाबु – रामनवमीबाबु ’ इत्यादिन्यायवादिनः सदा मया सहैव वसन्ति स्म। विंध्याबाबु – जनकधारीबाबुमहाशयौ तदा तदागत्य साहाय्यं चक्रतुः । एते सर्वेऽपि बिहारिण एव । कृषीवलानां भाषणलेखनमेव एषां मुख्यकार्यमासीत् ॥

अध्यापकः कृपलानीमहाशयोऽस्माभिः सह कथं न मिलेत् । यद्यप्ययं सिंधी जन्मारभ्य बिहारिणोऽप्यधिकबिहारी भवति । प्रांतग्रामस्थः कोऽपि वा भवतु । तं स्वीयमिव कृत्वा तत्रत्यैर्जनैः संमेलनशक्ता अल्पा एव जना मया दृष्टाः । ईदृग्जनेषु कृपलानीमहाशय एकः । सोऽन्यप्रांतीय इति वक्तुं न शक्यमासीत् । स एव मम द्वारपालक आसीत् । तत्र मद्दर्शनाकांक्षिभ्यो जनेभ्यो मां रक्षितुमेव तां वेलां स्वपरमपुरुषार्थं चकार । एतद्द्वारं निजविनोदवाग्बाणानां प्रयोगेणान्यद्द्वारं अहिंसात्मतात्रासनैः त्रासनेनैवं जनान्निरुरोध । सायं निशामुख्येऽन्धकारे प्रवर्तमाने सति शिक्षकवृत्तिं वहन् स्वसहचरानितिहासिकपाठैः टीकाभिश्चानंदयन् भीरुस्वभावो यः कश्चिदागतश्चेत् तस्मिन्शौर्यमुत्पादयामास ॥

मौलानामजहरूलहकमहाशय आवश्यके सत्यागन्तॄणां पङ्क्त्यां स्वनामधेयं ददौ । स प्रतिमासमेकद्विवारमागत्यास्मान् दृष्ट्वा गच्छति स्म । तदानीमसौ स्वजीवनं वैभवेनातिशोभया च चकार। तस्यापि चाधुनिकसरलजीवनस्य च भूम्याकाशयोरिवांतरं भवति । तस्य लौकिकाचारं दृष्ट्वा बाह्यजनस्य प्रकारांतरेण यद्यपि स प्रत्यभात् तथाप्यस्माभिः सह मिलितत्वात् सोऽप्यस्माकमेक इति गण्यते स्म ॥

बिहारे योग्यशिक्षणव्यवस्थां विना चिरकालस्थायि कार्यं न साध्यमिति मया ज्ञातम् । कृषीवलानामज्ञानं करुणाजनकमासीत् । ते निजापत्यानि परिभ्रमितुमनुजानन्ति स्म । नो चेद्घर्षणकार्यं प्रातरारभ्य सायं यावन्नीलिकारामेषु व्यापारयन्ति स्म । तत्कालं प्रायः दिनस्य वेतनं पुरुषस्य सार्धाणकद्वयं स्त्रियः सार्धैकाणको बालकस्यार्धाणक एवं स्थितम् । दिने दिने

Funding by IKS-MoE

चतुराणकान् यः संपादयति सोऽत्यंतादृष्टशालीति गण्यते स्म । मम सहचराणां मतमादायाहं षड्ग्रामेषु प्राथमिकशाला उद्घाटयितुं निरचैषम् । ग्रामस्थैः सहासीदयं नियमो यत्तैः शिक्षकाणामाहारो वासस्थानं च देयम् । इतरव्ययोऽस्माभिर्देय इति । ग्रामस्थानां हस्ते पणकं नैवासीत् । परंत्वाहारसामग्रीमुपस्थापयितुं तेषां साध्यमासीत् । वस्तुतः पूर्वमेव तैर्निवेदितं धान्यादिपदार्थान् वयं दातुं सज्जस्थिताः स्म इति ॥

शिक्षकाः कुतो लभ्याः । इयमेकसमस्या स्थिता । अल्पवेतनेनाथवा वेतनं विनापि कार्यकर्तारः शिक्षकास्तत्र दुर्लभा बभूवुः । सामान्यशिक्षकाणां हस्ते शिशूनामर्पणं न मेऽभिमतमासीत् । तेषां साहित्यप्रवीणतापेक्षया चारित्रसंपन्नता मुख्यतरा बभूव ॥

अतोऽहमेतच्छिक्षणकार्यार्थे स्वयंसेवका अपेक्ष्यन्त इति सार्वजनिकविज्ञापनां प्रकटीकृतवान् । एतद्विज्ञापनायास्तत्क्षणमेवागतान्युत्तराणि । श्रीगंगाधररावदेशपांडेमहाशयो बाबासाहेबसोमण-पुंडरीकमहाशयौ प्रेषयामास । मोहमयीतः श्रीमती-अवंतिकाबाईगोखले-पुण्यपत्तनात् श्रीमती–आनंदीबाईवैशम्पायनमहाशया चागते । मोतीलाल-सुरेंद्रनाथोऽपि च मम पुत्रो देवदास एतान्प्रेषयितुमाश्रमस्य पत्रमलिखम् । अस्मिन्नेव समये महादेवदेसाईमहाशयोऽपि च नरहरिपरीखमहाशयो एतौ भार्याभिः सहागत्यास्माभिः सह मिलितौ । कस्तुरीबाईमहाशयाप्येतत्कार्यार्थे समाहूता । एतान् सर्वान्मिलित्वा प्रबलं सैन्यमेवासीदिति वक्तव्यम् । श्री. अवंतिकाबाई-महाशयापि च आनंदीबाईमहाशया सुशिक्षिते आस्ताम् । परन्तु श्री. दुर्गादेसाई-श्री. मणिबेनपरीख–इत्येतयोर्गुजराती-अक्षरज्ञानमात्रमासीत् । कस्तूरीबाईमहाशयायास्तदपि नासीत् । एता महिला बालकानां हिन्दीभाषायां पाठं कथं शिक्षेरन् ॥

ताभिर्बालकानां व्याकरणस्य पठनस्य लेखनस्य गणितस्य च शिक्ष्यमाणापेक्षयाधिकं स्वच्छतां सद्वृत्तं च शिक्षणीयमिति निरीक्ष्यते । इहमुक्ताक्षरज्ञानविषयेऽपि गुजराती-हिन्दी-मराठी-भाषाणां मध्ये तैरवगतं यावत्तावदंतरं नास्तीति प्राथमिकवर्गेष्वक्षरमालाया गणितस्य च शिक्षणं दुष्करमिति न्यवेदयम्। अस्य परिणामप्रकारेणैताभिर्महिलाभिः शिक्ष्यमाणवर्गा अत्युत्कृष्टमेव चलन्ति स्म । तासां स्वानुभवेनात्मविश्वासः कार्ये उत्साहश्च संजाताः । श्री. अवंतिकाबाई-महाशयायाः शालादर्शविद्यालयोऽभूत् । सा पाठशालायै स्वात्मानमेवार्पयत् । निजाद्वितीयगुणान् सर्वानप्यस्मिन् कार्ये उपयुयोज । एतन्महिलाद्वारा ग्रामस्त्रीणां जीवनस्य परिवर्तनमपि स्वल्पशः साध्यमासीत् ॥

परन्तु प्राथमिकविद्याभ्यासस्यानुकूलतां विधाय परित्यागो मम नेष्ट आसीत् । ग्रामा अशुचयोऽभवन् । मार्गा अमेध्यपूर्णा आसन् । कूपान् परितः पंकस्थित्या दुर्गंधमायाति स्म । गृहाणामंगणान्यसह्येन पूतिगंधेन पूरितान्यभवन् । शौचरक्षणं महतामपि शिक्षणमावश्यकमासीत् ।

ते सर्वेऽपि चर्मरोगेण ग्रस्ता बभूवुः। अतो यावच्छक्यं ग्रामनैर्मल्यकार्यं करणीयम्। तेषां जीवनस्य प्रत्येकभागोऽपि प्रवेष्टव्य इति निर्धारितमभूत्॥

एतत्कार्यस्य वैद्यसाहाय्यमावश्यकमासीत्। दिवंगत डॉ. देवमहाशयोऽस्मत्पार्श्वं प्रेषणीय इति भारतसेवासंघजनः प्रार्थितः। वयमाप्तसुहृदोऽभूम। सोऽस्मानुपागत्य षण्मासान् कार्यं कर्तुं संमेने। शिक्षकाः सर्वाः स्त्रियः पुरुषाश्च तस्य वशे स्थित्वा कार्यं कुर्युः॥

भूस्वामिनामारोपणानि राजकीयविचारांश्च मनसि कृत्वा न प्रवर्तनीयमिति ते सर्वेऽपि बलवन्निर्बद्धाः। यत्किंचित्संकटं निवेदनीयं चेत् स जनो मत्पार्श्वं प्रेषणीय आसीत्। केनापि नियतमार्गं परित्यज्य न चलितव्यमासीत्। मम सुहृदः सर्वेऽपि एतान्नियमान् स्खलितं विन चालयामासुः। नियमातिक्रमणसंदर्भो नैकोऽपि मया स्मर्यते॥

अष्टादशोऽध्यायः

ग्रामान्तःप्रवेशः

प्रत्येकशालानिर्वहणमेकस्याः स्त्रिय एकस्य पुरुषस्य च वशं स्थापितमभूत्। एभिः स्वयंसेवकैरौषधोपचारस्य ग्रामनैर्मल्यस्य च व्यवस्था द्रष्टव्यासीत्। स्त्रीवर्गसंबद्धं कार्यं स्त्रीभिरेव कर्तव्यमासीत्॥

औषधोपचारस्य कार्यं सुकरमासीत्। एरण्डतैलं ज्वरगुलिकागंधकस्य लेप एतान्यौषधानि स्वयंसेवकानां वशे भवन्ति स्म। रोगिणो जिह्वायां श्वेतायामथवाजीर्णे निवेदिते तस्यैरण्डतैलमदीयत। ज्वरपीडितानां प्रथमं किंचिदेरण्डतैलं दत्त्वा तदनु ज्वरगुलिका दीयते स्म। व्रणकण्डूतिभिः पीडितानां रोगस्थानं क्षालयित्वा तदुपरि गंधकलेपं चक्रुः। न किमप्यौषधं गृहं नेतुमनुज्ञासीत्। अधिकरोगस्थलेषु डॉ. देवमहाशयस्य निर्देशानुसारमाचेरुः। स प्रतिकेन्द्रं सप्ताहे सकृत्सकृत् निश्चितदिने गच्छति स्म॥

बहवो जना एतत्सुकरं चिकित्साक्रममुपायोजयन्। तत्र प्रसृता रोगा अल्पाल्पा बभूवुः। तन्निवारणायैषा चिकित्सा प्रायः पर्याप्ता बभूव। महावैद्यानां साहाय्यं नापेक्ष्यत। एतेषु स्मृतेष्वियं कार्यव्यवस्था न विचित्रा प्रतिभायात्। लोकानामियं व्यवस्थानुकूला बभूव॥

ग्रामनैर्मल्यस्य कार्यं कठिनमासीत्। जनाः किमपि कर्तुं न सज्जस्थिताः। क्षेत्रस्य कर्मकरा अपि मार्गसंमार्जनं कर्तुं न सिद्धा बभूवुः परन्तु डॉ. देवमहाशयः सौलभ्येन भग्नहृदयो न भविता। एकस्मिन्ग्रामे आदर्शनैर्मल्यं यथा भवेत्तथा स्वयंसेवकैः सहात्मशक्तिमुपयुयुजिरे। ते

वीथ्यरंगणानि च संमार्जयामासुः। कूपान् शोधयामासुः। इतस्ततः स्थितानि गर्तान्यपूरयन्। ग्रामस्थाः स्वयमेव स्वयंसेवकान् व्यवस्थापयितुं प्रेम्णा प्रेरयामासुः । एतैर्मधुरैरनुभवैरौदासीन्यप्रयुक्ताः कटवोऽनुभवाः संकीर्णा न बभूवुरिति न। कतिपये ग्रामजना एवंविधं कार्यं तेषां नेष्टमासीदिति स्पष्टमूचुरित्यहं स्मरामि ॥

इतःपूर्वं बह्वीषु सभासु मया वर्णितस्यानुभवस्यैकस्य विवर्णमसंगतं न स्यात् । 'भीतिहरवा' इति एक स्वल्पो ग्रामः। तत्रास्मदीया शालासीत्। तत्समीपस्थितमन्यं ग्रामं यदाहं गतस्तदा बहुमलिनानि वासांसि धारयन्ती स्त्रीरपश्यम्'। ताः' स्ववासांसि कस्मान्न क्षालयन्तीति विचारयेति कस्तूरबाईमहाशयामब्रुवम्। सा तासामेकया सह भाषमाणा तया स्वकुटीरं नीत्वा पश्यतु भवती, अत्रान्यद्वासो निवेशयितुं पेटिका वा कुशूलो वा नास्ति। मया धार्यमाणा एकैव 'साडी' मन्निकटेऽस्ति। कथं मया सा क्षालनीया। महात्माजीं ब्रूहि। अन्यां सार्डामानीय देहीति। ततोऽहं प्रत्यहं स्नात्वा धौतवस्त्रं धारयामीति प्रतिजान इत्यब्रवीत् ॥

इदृक्कुटीरमिदमेकमेव न । भारतवर्षस्यानेकग्रामेषु एतादृशानि सन्ति। भरतखंडस्य निःसंख्यकुटीरेषु वस्तुशून्या मानरक्षणाय शरीरोपरि च्छिन्नवस्त्रं निवेश्यान्यद्वासो विना जीवनं कुर्वन्ति॥

अनुभवांतरमत्र निवेदयिष्यामि। चंपारण्ये तृणवेणूनां समृद्धिरस्ति। भीतिहरवाग्राम एतत्सामग्रीमुपयुज्य शालाकुटीरं निर्मितमासीत्। कोऽपि समीपस्थितभूस्वामिनां भृत्येष्वेकः स्यात्। तस्य कुटीरं रात्रावग्निसाच्चकार । कुटीरान्तरस्य तृणवेणुभिर्निर्माणमनुचितमिति प्रत्यभात्। श्रीसोमणमहाशयो योग्यमेकं मंदिरमेव निर्मातुमुचितमिति निरचैषीत् । तस्य परिश्रमं दृष्ट्वा इतरे बहवस्तेन सह मिलिताः। एवमेकमिष्टिकागृहमेव शीघ्रं सिद्धमभूत् । तस्य दहनभीतिर्नासीत् ॥

एवं स्वयंसेवकास्तेषां शालाग्रामनैर्मल्यव्यवस्था औषधोपचार इत्येतैर्ग्रामजनस्य विश्वासं गौरवं च संपाद्य ग्रामजनस्योपरि सत्प्रभावं प्रसारयितुं शक्ता बभूवुः ॥

परन्त्वेतद्ग्रामोज्जीवनकार्यं चिरस्थायिनोऽस्ति भारस्योपरि स्थापयितुमाशा मम न सिद्धेति विषादपूर्वकं संमन्तव्यम्। स्वयंसेवकाः स्वल्पकालमात्रं स्थातुमागताः। बहिर्ग्रामादधिको जनो न लब्धः। सदा प्रतिफलं विना कार्यकर्ता जनो बिहारेऽपि नालभ्यत। चंपारण्ये मम कार्यसमाप्तेरनन्तरमेवान्यत्र सज्जीभवत्कार्यं मामाकृष्य जग्राह । तथापि चंपारण्ये चतुःषण्मासपर्यन्तं कृतकार्यमगाधमूलमरोहदिति चेत्तस्य प्रभावोऽद्याप्येकस्मिन्नन्यस्मिन्वा रूपे दृश्यते ॥

Funding by IKS-MoE

एकोनविंशोऽध्यायः

राज्याधिपतिर्यदा सज्जनः

मया पूर्वाध्यायेषु विवृतं समाजसेवाकार्यमेकतश्चलत्यन्यतः कृषीवलानां दुःखविषयकानां भाषणानां लेखनकार्यं शीघ्रं चलति स्म। तादृशानि परःसहस्रजनानां भाषणान्यलेखिषत। तैः किमपि फलं न जायेत वा। भाषणानि प्रदातुमागच्छतां कृषीवलानां संख्या दिने दिनेऽवर्धत। एतेन भूस्वामिनो वर्धमानक्रोधा अस्माभिः क्रियमाणानि विचारणानि निरर्थकानि कर्तुं विश्वप्रयतनं चक्रुः॥

एकस्मिन्दिने ब्रिहारप्रांतस्य राज्याधिकारादेकं पत्रं मम करतलमागतम्। तद्यथा—दीर्घकालात्क्रियते विचारणा भवता। इदानीं तत्परित्यज्य विहारं विहाय निर्गमनसमयः किं न प्राप्त इति॥

पत्रमिदं विनयपूर्वं भाषायां लिखितमासीत् परन्तु तस्यार्थः स्पष्टः॥

अस्य प्रत्युक्तं मया यथा—“विचारणा दीर्घकालाच्चलतीति सहजम्। एतेन लोकानां कष्टपरिहारो यावद् भवति तावदितो बिहाराद्गन्तुमुद्देशो मम नास्ति। मया क्रियमाणविचारणां विरमयितुं राज्याधिकारायत्तमासीत्। कृषीवलानां दुःखस्य कथा यथार्थभूतेति संमत्या तत्कष्टपरिहारोऽथवा कृषीवलानां भाषणेषु याथार्थ्यं ’स्यादित्यवगम्य तत्क्षणमेव राज्याधिकारेण विचारणोपक्रम इमेऽस्य मार्गाः खल्विति मया व्यक्तीकृतम्॥

प्रतिनिधी राज्याधिपतिः सरएडवर्डगेइटमहाशयो मामाह्वाय्य विचारणोपक्रमं कर्तुं न केवलं स संमतिं प्रदर्शितवान् परं सदस्यत्वेन ममाह्वानं प्रजिघाय। अहमितरसदस्यानां नामानि विचार्य मम सहचराणामाशयमादाय समितेः सदस्यो भवितुं संमतिमदाम्। परंत्वेतन्नियमानुरोधेन यदा समितेः विचारणं चलति तदा मम सहचराणामाशयं ग्रहीतुं स्वतंत्रः स्याम्। यतोऽहं समितेः सदस्यः कृषीवलानां पक्षे वक्तुमधिकारं न हास्यामीति विज्ञातव्यम्। समितेर्विचारणायां फलितांशो यदि न समर्पको न स्यात्तदा कृषीवलैरग्रे कया रीत्या वर्तितव्यमिति तेषां बुद्धिवादं प्रदाय मार्गप्रदर्शनाय स्वतंत्रेण भवितव्यमिति॥

सरएडवर्डगेइटमहाशय एते नियमा न्याय्या उचिताश्चेति स्वीकृत्य विचारणासमितेः स्थापनं प्रकटयामास। दिवंगतसरफ्रँकस्लाईमहाशयः समितेरध्यक्षः कृतः॥

समितिः कृषीवलानां पक्षं निर्णीय भूस्वामिभिर्गृहीतकरादेको भागः पुनः प्रदातव्यः शासनस्य विरुद्धत्वादपि च ‘तीनकठिया’ पद्धतिः शासनेन निष्कासनीया इत्यसूचयत्॥

Funding by IKS-MoE

समितिः सर्वसंमत्या निर्णयं लेखितुं समितेराशयानुरोधेन रचितशासनमङ्गीकर्तुं च सरएडवर्डगेइटमहाशयो बहुशः कारणकर्ताभूत् । तेन दृढमवस्थाय तद्विषये स्वकौशलं सर्वं यदि नोपयुज्येत तदैकमत्यं कृषीवलानां शासनस्वीकारः साध्यो नाभविष्यत् । भूस्वामिनां विशेषतः प्राबल्यमासीत् । निर्णयमगणयित्वा शासनांगीकारस्य प्रचंडविरोधं चक्रुः । परन्तु सरएडवर्डगेइटमहाशयोऽन्तिमकालपर्यन्तं दृढं स्थित्वा समितेराशयान् संपूर्णमेव कार्यरूपमानिनाय ॥

प्रायः शतवर्षपर्यन्तं निरूढा 'तीनकठिया' पद्धतिरेवं बहिष्कृता बभूव । तेन सह भूस्वामिनां शासनमवसितमभूत् । तदात्वपर्यन्तं संमृदिताः कृषीवलाः शनैः शनैः शिरांस्युच्चक्रुः । नीलिकावर्णः कदापि न निष्कास्यत इति या मूढभक्तिः सादृश्यं गता ॥

व्यवस्थाकार्यमितः कतिपयवर्षाणि चालयित्वा इतोप्यधिकाः पाठशाला उद्घाट्य ग्रामजीवनमितोऽपि सूक्ष्मतया प्रवेष्टुमाशा ममासीत् । अस्य सर्वं सिद्धमासीत् । परन्त्वितः पूर्वमनेकशो यथा संवृत्तं तथाद्यापि ममोद्देशं पूरयितुं भगवतश्चित्ते नायातम् । दैवनियमोऽन्य आसीत् । स मामितरकार्यं ग्रहीतुं व्यवास्यत् ॥

विंशोऽध्यायः

कर्मकरैः सह संबन्धः

यावच्चंपारण्यसमितौ मम कार्यं समाप्यते स्म तावदेव मम श्रीमोहनलालपंड्या-श्रीशंकरलाल-परीखमहाशयाभ्यां 'खेडा' जनपदे क्षाममागत्य सस्यानि नारोहन् कृषीवलाः करं दातुमशक्ताः संजातास्तेषां मार्गो दर्शनीय इति पत्रमागतम् । ततस्तत्स्थलमगत्वाविचार्य तेभ्यो निवेदयितुं ममेष्टं वा धैर्यं वा नासीत् ॥

अस्मिन्नेव समये श्रीमती-अनसूयाबाईमहाशयासकाशादहमदाबादनगरे कर्मकराण परिस्थितिमधिकृत्य पत्रमेकमागतम् । भृतिः स्वल्पाभवत् । अस्य वृद्ध्यै कर्मकरा बहोः कालाद्वादानुवादं कुर्वन्ति स्म । शक्यं चेन्मार्गदर्शी भवितुमिष्टमासीत् । परन्त्वेकमल्पविषयमपि तावद्दूरान्निर्वाहयितुं नासीच्छ्रद्धा । अतोऽहमदाबादनगरं गन्तुं प्रथमोऽवकाशो मया गृहीतः । एतत्कार्यद्वयं शीघ्रमेव समाप्य चंपारण्ये समारब्धस्य रचनात्मककार्यस्यावेक्षणं कर्तुं तत्र पुनर्गन्तव्यमित्याशा ममासीत् ॥

परन्तु मया यथापेक्षितं तथा शीघ्रमेव कार्योद्यमे न संवृत्तः । चंपारण्यं प्रति पुनर्गमनं न शक्यमासीत् । अत एताः शाला एकैकशो विरताः । मया मम सहचरैश्च बहूनि गगनकुसुमानि निर्मितान्यासन् परन्तु तानि सर्वाण्यपि तत्कालमेवादृश्यं गतानि ॥

चंपारण्ये ग्रामनैर्मल्यं शिक्षणं च मुक्त्वा गोरक्षणं चैकमासीत् । गोरक्षणं हिंदीप्रचारश्च केवलं ‘मारवाडी’जनस्य कार्यं संवृत्तमिति प्रयाणेषु मम चित्तगोचरमासीत् । ‘बेतिया’ग्रामे मारवाडीमित्रमेकं धर्मशालायां ममाश्रयं ददौ । इतरो मारवाडीजनो गोशालाविषये मय्यासक्तिमजनयत् । गोरक्षणमधिकृत्य ममाभिप्राया अस्मिन्काले स्फुटं रूपमाश्रिताः । तद्विषये मम तादात्त्विकी कल्पनाधुनिक्येवासीत् । ममाभिप्राये गोरक्षणक्रमे गोवंशवृद्धिर्गोजातिसुधारणा वृषभाणामादरेण दर्शनमादर्शदुग्धालयानां निर्माणमित्यादिसर्वमास्थितमासीत् । कार्येऽस्मिन्मारवाडीसुहृदः संपूर्णसहकारं प्रत्यजानन् । परन्तु मम चंपारण्ये स्थातुमशक्यतया कार्यक्रमोऽयं न फलितः ॥

‘बेतिया’स्थलेऽद्यापि गोशाला चलति । किन्तु सादर्शदुग्धालयत्त्वेन न परिणता । चंपारण्यस्य वृषभेभ्यस्तेषां शक्तिमतिक्रम्याद्यापि कर्म कारयन्ति । ‘हिन्दवः’ नामैतेऽद्याप्येतं वराकं प्राणिनं निर्दयं प्रहरन्तः स्वधर्मस्य कलंकं वितन्वन्ति ॥

एतत्कार्यस्य फलाभावो मम निरंतरविषादस्य कारणं भवति । मम चंपारण्यगमनकाले सर्वदा मारवाडी-विहारि-सुहृदां मृदुनिन्दां श्रुत्वा मया हठात् परित्यज्यमानोद्दिष्टकार्याणि स्मारं स्मारं गाढनिःश्वासं मुञ्चामि ॥

शिक्षणकार्यं बहुषु मार्गेष्वनेकस्थलेषु चलति । परन्तु गोरक्षणकार्यमद्यापि दृढं रूढमूलं नासीदित्येतन्मयोद्दिष्टरीत्या नाग्रतो गतम् ॥

‘खेडा’जनपदस्य कृषीवलानां प्रश्नो यदा चर्च्यमान एवासीत्तदाहमहमदाबादनगरे पेषणयंत्रकर्मकराणां प्रश्ने प्रविष्ट आसम् ॥

मम परिस्थितिरत्यंतसूक्ष्मासीत् । कर्मकराणां विवादः साधारण आसीत् । यतः पेषणयंत्रस्वामिपक्षे त एव मुख्यभूतास्तस्थुः । तैः सह मम मैत्र्यासीदित्यतस्तैः सह वादानुवादकरणमितोऽपि कष्टं परिणतम् । अहं तैर्मिलित्वा संभाव्यविवादो माध्यस्थवशे दातव्य इति प्रार्थनामकरवम् । किं तु ते माध्यस्थ्यतत्त्वमेव न संमेनिरे ॥

अतो मया कर्मकराणां कर्मत्यागसाहसं कुरुध्वमिति बुद्धिवादो वक्तव्य आसीत् । तथानुष्ठानात्पूर्वं तेषां तदीयनेतॄणां च गाढपरिचयं प्राप्य कर्मत्यागेन सकलेन भवितव्यं यद्यावश्यकान् विषयान् विवृतवान्यथा—

(१) अहिंसाभङ्गः कदापि न कर्तव्यः ।

(२) कर्मत्यागनिश्चयस्य विरोधेन कार्यकर्तारं न हिंसेत् ।

(३) भिक्षान्नं नैव भुञ्जीत ।

(४) कर्मत्यागानुष्ठानं चिरकालगाम्यपि निश्चलं स्थित्वा देहश्रमेण कर्मत्यागकाले न्यायतः पिष्टं संपादनीयम् ।

Funding by IKS-MoE

कर्मत्यागस्य मुख्यस्थाः सर्वानेतान्नियमानर्थतो गृहीत्वा तत्र संमेनिरे । कर्मकराः सभामाहूय यावत्पेषणयंत्राणां स्वामिनः कर्मकराणां नियमानङ्गीकुर्युरथवा विवादमाध्यक्ष्यनिर्णयस्य संमन्येरन् तावत्ते पुनः कार्याय न गच्छाम इति प्रमाणमकुर्वन् ॥

एतत्कर्मत्यागकाल एव श्रीवल्लभभाईपटेलमहाशयः श्रीशंकरलालबँकरमहाशयः– अनयोर्निकटपरिचय आसीत् । श्रीअनसूयाबाईमहाशया तु पूर्वमेव सम्यग्परिज्ञाता ॥

साबरमतीनद्यास्तटवृक्षच्छायायामस्माभिः प्रत्यहं कर्मकराणां सभाहूयते स्म । ते सभायां सहस्रशो मिलित्वा बभूवुः । तैः कृतैः प्रमाणं शांतिमात्मगौरवं च न भञ्जनीयमिति मया मम भाषणेषु तत्स्मृतिमानीयते स्म । ते प्रत्यहं 'एक टेक' इति लेखनधारिणं ध्वजमादाय तन्नगरस्य वीथीषु शांत्यालोकयात्रां वितेनुः ॥

कर्मत्याग एकविंशतिदिनानि बभूव । अस्मिन्कालेऽहं पेषणयंत्रस्वामिनो ,यदा तदा दृष्ट्वा कर्मकराणां न्यायः करणीय इति प्रार्थनामकरवम् । ततस्तैः प्रत्युक्तं यथा – किमस्माभिर्न कृतं प्रमाणम् । अस्माभिः सह कर्मकराणां संबन्धः पितृशिशूनां संबन्धः तृतीयो जनो यदि प्रतिरुध्नाति तत्कथं सहेम । माध्यस्थ्यस्य कुतोऽवकाश इति ॥

एकविंशोऽध्यायः

आश्रमान्तः सूक्ष्मनिरूपणम्

कर्मकराणां पेषणयंत्रस्वामिनां मध्यवर्तिन्यायविवादकथाया विवरणात्पूर्वमाश्रमं प्रति दृष्टिप्रसारणमावश्यकम् । चंपारण्ये निवसतो मम मानसादाश्रमः किल न दूरीबभूव । तदा तदा विरामं प्राप्य तत्र धावितेन मया प्रतिनिवर्तनीयमासीत् ॥

तत्कालमाश्रमोऽहमदाबादस्य निकटवर्तिनि कोचरबनामकग्रामे स्थितः । तस्मिन्ग्रामे ग्रंथिज्वरः प्रारेभे । एतेनाश्रमशिशूनामपायः संभवेदिति स्पष्टमदृश्यत । आश्रमान्तर्नैर्मल्यनियमेषु विशेषतः सूक्ष्मतया चर्यमाणेष्वपि समन्तादवस्थितमशुचित्वपरिणामं संपूर्णमेव परिहर्तुमसाध्यमासीत् । कोचरबग्रामस्थजनो यथा नियमानेतान् पालयेत्तथा कर्तुं वा ग्रामस्य रीत्यंतरेण सेवां कर्तुं वास्माकं तदा न सामर्थ्यमासीत् ॥

अस्मदाश्रमेण पत्तनाद् ग्रामाच्च पर्याप्तदूरवर्तिना भवितव्यम् । तथापि नातिदूरे भवितव्यमित्यस्माकं ध्येयमासीत् । अपि च स्वीयभूमेरुपरि कदाचिदेकस्मिन् दिनेऽवस्थातव्यमेवेत्यस्माभिः संकल्पितमासीत् ॥

Funding by IKS-MoE

कोचरबग्रामं परित्यज्य गन्तुं ग्रंथिज्वर एव पर्याप्तः प्रत्यादेश इति मम प्रत्यभात्। अहमदाबादनगरे कश्चिद्वणिगासीत्। श्रीपूंजाभाईहिराचंदनामेति। तस्याश्रमस्य च गाढसंपर्कः संजातः। स बहुषु विषयेष्वाश्रमस्य निर्मलनिरभिमानभावेन साहाय्यं करोति स्म। अहमदाबादसंबद्धव्यवहारेषु तस्य विशेषतोऽनुभव आसीत्। युष्माकमनुकूलां भूमिमहमुपस्थापयिष्यामीति स्वयमेवाब्रवीत्। अहं स्थलान्वेषणाय तेन सह कोचरबग्रामस्योत्तरदक्षिणभागेषु भ्रमंस्त्रिचतुःक्रोशदूर उत्तरदिग्वर्तिनीं भूमिमेकामन्विष्य तमब्रवम्। सोऽप्यद्यतनाश्रमस्थानं निरणैषीत्। तत् साबरमतीकारागृहनिकटवर्तीत्यतो विशेषगुणः प्रत्यभात्। कारागृहगमनं सत्याग्रहिणां साधारणी स्थितिरिति ,गणनया स्थानमेतन्मह्यमरोचत। अपि च कारागृहस्थानार्थं वृतभूमेः समन्तात्स्वच्छता विद्यत इति मया ज्ञातम्। प्रायः सप्ताष्टदिवसेषु क्रयपत्रं लेखितम्। तद् भूमेरुपरि मंदिरं वा वृक्षको वा नासीत्। परन्तु नदीतीरे एकांतस्थाने तस्य वर्तनं बह्वनुकूलमासीत्॥

गृहनिर्माणात्पूर्वमस्माभिः पटमंडपेषु वस्तव्यम्॥
कुटीरान् निर्माय तत्र पाकः करणीय इति निरचैष्म॥

आश्रमः शनैः शनैर्वर्धते स्म। पुरुषाः स्त्रियः शिशवश्च सर्वे मिलित्वास्माभिश्चत्वारिंशज्जनैः एकस्यामेव पाकशालायां भुज्यते स्म। एतत्स्थलं गत्वावस्थानकल्पना सर्वा मदीया। तां कार्यरूपमानेतुं यथासंप्रदायं भारो दिवंगतमगनलालमहाशयस्योपरि पतितः॥

निवासाय स्थिरगृहाणां निर्माणात्पूर्वं वयं बहु क्लेशिताः। वर्षाकालः समीप आगत आसीत्। वस्तूनि चतुःक्रोशदूरवर्तिनो नगरादानेतव्यान्यासन्। तत्कालपर्यन्तं वंध्यायां भूमौ सर्वाः स्थिताः। अस्यां परिस्थितौ बालशिशुभिः सह निवस्तुमपायो बहुलः प्रत्यभात्। अहननं सर्पाणां सामान्यतो नियम आसीत्। परंत्वेतद्विषजंतुभ्यो भयमस्माकं स्थितमेवेति संमन्तव्यम्। अस्मिन्दिनेऽपि तन्न गतम्॥

विषजंतूनामहननियमः फिनिक्सस्थले टॉलस्टॉयक्षेत्रे साबरमत्यांच्च बहुश आचरितः। एतत्प्रत्येकस्थलेऽपि मया वंध्यभूमावस्थातव्यमासीत्। परन्तु सर्पदंशेन प्राणहानिर्न संजाता। एतत्संदर्भे समालोचिते मम श्रद्धापूरितदृष्टेः करुणामयस्य परमेश्वरस्यामृतहस्तः प्रतिभाति। देवो न पक्षपाती। मनुष्याणां दैनंदिनकार्ये प्रवेष्टुं तस्य समयो नास्तीत्युक्त्वा मम श्रद्धां प्रति न कोऽपि हसतु। एतमेकमेवानुभवं वर्णयितुमेतद्विषयस्य वास्तव्यतां व्यक्तीकर्तुं च मम वागन्तरं न प्रतिभाति। भगवतो मार्गवर्णने मानुषभावनायाः पूर्णचैतन्यं नास्ति। भगवतः कार्याण्यवर्णनीयानि। मनुष्यस्य बुद्ध्या न प्राप्यानीत्यहं जानामि। परन्तु पामरो मनुष्यस्तानि वर्णयितुं प्रवृत्तश्चेन्ममाव्यक्ताक्षरमेव गतिर्नान्यो मार्गो विद्यते। पंचविंशतिवर्षकालपर्यन्तं प्राणिनामहननियमो न्यूनाधिकत्वेनाचरितोऽपि तत्कालमपायराहित्ये [illegible] संभवो न भवति। सेश्वरस्य

कृपेति श्रद्धापि मूढविश्वास इत्युक्तेऽपि तां मूढभक्तिमेवालिंगिताहमस्मीति न संदेहः ॥

अहमदाबादनगरे कर्मकराणां कर्मत्यागकलहे चलति सति वयनशालाया वास्तु निवेश्यते स्म। यतो वयनमाश्रमस्य मुख्यकार्यमासीत्। सूत्रतांतवं तदात्वपर्यंतमस्माकमसाध्यमासीत्॥

द्वाविंशोऽध्यायः

उपवासः

प्रथमसप्ताहद्वये पेषणयंत्रस्य कर्मकरा बहुलं धैर्यमात्मसंयमं च प्रादर्शयन्। प्रत्यहं महतीः सभाः कुर्वन्ति स्म। अवसरेषु तदीयप्रतिज्ञास्तत्स्मृतिमानीयन्त। अस्य ते प्राणत्यागमपि कुर्मो न पुनः प्रतिज्ञातं न कुर्म इति उच्चैरूचुः ॥

परन्तु पर्यन्ते शिथिलीभवनचिह्नं प्रादर्शयन्। यथा मनुष्याणां दौर्बल्यं क्रोधावस्थायां दृश्यते तथा कर्मत्यागविरोधेन कर्म कर्तुं गच्छतां कर्मकराणां क्रोधः कर्मत्यागः शिथिलीभविष्यतीति दृष्ट्वा परं ववृध इति ॥

ते कलहकारित्वमातिष्ठन्तीति मया शङ्कितम्। प्रत्याह्निकसभासु जनसंख्याल्पाल्पा भवति स्म। तत्रागतानां मुखे नैराश्यमुद्रा सत्यं ददृशे। पर्यन्ते कर्मत्यागिनः कर्मकराः पतयालवो बभूवुरिति वार्ता ममागता। अहमत्यन्तं खिन्नोऽस्मिन्संदर्भे किं मम कर्तव्यमिति तीव्रमनोविचारे निमग्नः। दक्षिणाफ्रिकायां संवृत्तस्यागाधकर्मत्यागस्यानुभवो ममासीत्। किन्त्वत्र मे परिस्थितिरन्या बभूव। कर्मकरैर्मया निर्दिष्टप्रकारेण प्रतिज्ञातम्। ते तत्र प्रतिदिनं ममाग्रे पुनः पुनरब्रुवन्। तेऽधुना तद्विरुद्धमाचरेयुरिति कल्पनापि मम मनसि नोत्तिष्ठेत्। अस्य मनोभावस्याधारो ममाहंकारो वा कर्मकरेषु स्थितं मम प्रेम वा मम तीव्रसत्योपासना वा को ब्रूयात् ॥

यदेकस्मिन्दिने प्रातः कर्मकराणां सभा भवति स्म। अहमंधकारे मार्गमपश्यन्मार्गमन्विष्यामि तदा दिव्यज्योतिर्मत्साहाय्यार्थमागतम्। कमपि प्रयत्नं विनोदतिष्ठत् ॥

उक्ता च सभा मया — यावत्कर्मत्यागिनो मिलित्वा यः कोऽपि निर्णयो भविष्यति यावच्च पेषणयंत्राणां परित्यागपर्यन्तं कर्मत्यागं न तन्वन्ति तावदहमाहारं न स्पृशामीति ॥

कर्मकराणामुपरि वज्रपात इवाभूत्। श्रीअनसूयाबाईमहाशयायाः कपोलयोर्जलप्रवाहो निःसर्तुमुपाक्रमत्। उक्तं च कर्मकरैर्यथा — उपवासं मा कुरुध्वम्। वयमिह स्थास्यामः किमिदमुपवासः क्रियत इति। अस्मत्प्रमादः क्षन्तव्यः। इतो वयमस्मत्प्रतिज्ञां यावत्पर्यन्तं करिष्याम इति ॥

प्रत्युक्तं च मया यथा — युष्माकमुपवासो नावश्यकः। युष्मत्प्रतिज्ञानुष्ठीयते यद्यलं तावता।

Funding by IKS-MoE

अस्मन्निकटे धनं नास्तीति युष्माकं ज्ञातमेव लोकेभ्यो भिक्षामादाय जठरं पूरयित्वा कर्मत्यागानुष्ठानं मह्यं न रोचते । अतः कर्मत्यागः कियन्ति चिद्दिनानि चलतु । युष्माभिर्निश्चितैर्भूत्वा केनचिदुद्योगेन जीवनस्य पर्याप्तं संपादयितुं प्रयतनीयम् । ममोपवासः कर्मत्यागसमाप्तावेवान्तं गमिष्यतीति ॥

एतदन्तरे वल्लभभाईमहाशयः कर्मत्यागिनां कर्मकराणां पौरसभायां यत्किंचित्कार्यं संपादयितुं प्रयतमान आसीत् । परन्तु तत्रैतदाशापूरणायाधिकमवकाशो नासीत् । आश्रमस्थित-तांतवशाला या भूतले वालुकायाः संग्रहणीयत्वादेतत्कार्ये कतिपयजना नियमितव्या इति मगनलालगांधिमहाशयः सूचयामास । कर्मकरा एतं निर्देशमादरेण स्वीचक्रुः । श्रीअनसूयाबाईमहाशया शीर्षोपरि कंडोलं विन्यस्याग्रेसरी स्थिता । शीघ्रमेव नदीतलकंदराद्वालुकाकंडोलात् धारयित्वा प्रचलतां कर्मकराणां संततप्रवाहो ददृशे । एतद्दर्शनयोग्यं दर्शनमासीत् । कर्मकरेषु नवचैतन्यं प्रदिष्टमेव तेषां प्रत्यभात् । तेषां भृतिप्रदानं कष्टकरं परिणतम् ॥

ममोपवासे एको दोष आसीत् । यतो मया पूर्वोक्तप्रकारेण मम पेषणयंत्रस्वामिनां च निकटमधुरसंबन्ध आसीत् । ममोपवासेन तन्मानसोपरि परिणामो न भवतीति किं न स्यात् । मम सत्याग्रहिणः सत एतद्विरोधेनोपवासो न कर्तव्यः । कर्मकराणां कर्मत्यागस्यैकस्यैव प्रभावेन तन्मानसोपरि यथा पतेत्तथा कर्तव्यमिति मम विदितमासीत् । पेषणयंत्रस्वामिभिः कृतकस्यापि दोषस्यार्थे मयैतदुपवासव्रतमंगीकृतम् । कर्मकराणां दोष एव तस्य कारणमासीत् । यतोऽहं तत्प्रतिनिधीभूत्वा दोषभागी आसमिति मम प्रत्यभात् । स्वामिष्वहं सविनयनिवेदनमात्रं कर्तुं साध्यमासीत् । तान् प्रत्युपवासग्रहणं बलोद्बंधोऽभविष्यत् । कथं ममोपवासस्तन्निबध्नातीति यद्यपि मे विदितं–वस्तुतस्तथैव परिणतम् । तस्योपायान्तरं नास्तीति मे प्रत्यभात् । उपवासाङ्गीकारो मम कर्तव्यमिति मे स्पष्टमदृश्यत ॥

स्वामिनां मनः शान्तं स्थापयितुं मया प्रयतितम् । युष्मन्मार्गं परित्यक्तुं वो लेशतोऽपि नावश्यकमित्यहं तानब्रुवम् । परन्तु तैर्ममोक्तानि गौरवेण न दृष्टानि' । एतावदेव न । परं ते ममोपरि तीक्ष्णान् सूक्ष्मांश्च वाग्बाणान् चिक्षिपुः ॥

कर्मत्यागविषये पेषणयंत्रस्वामिनां निश्चलस्थितेः कारणभूता मुख्यव्यक्तिः शेठ-अंबालाल-महाशय आसीत् । तस्य मनोदार्ढ्यं निर्मलनिष्कापट्यं च विस्मयजनके बभूवतुः । तौ मम हृदयमाचकर्षतुः । तदग्रे स्थित्वा कलहायितुं संतोषकार्यमासीत् । ममोपवासनिर्बन्धो मम मनोऽतीवादुःखयत् । इदमुक्त्वा तद्धर्मपत्न्याः श्रीसरलादेव्याः ज्येष्ठभ्रातृवद् भावनासीत् । अतस्तां ममोपवासकारणाद्दुःखमनुभवन्तीं दृष्ट्वा सोढुमशक्यमासीत् । प्रथमदिवसे श्रीअनसूयाबाईमहाशया इतराणि कतिचिन्मित्राणि कर्मकराश्चोपवासं चक्रुः । परन्तूपवासो न कर्तव्य इति कष्टेन तान् प्रेरितवान् ॥

Funding by IKS-MoE

एतत्सर्वस्य फलरूपेण सौहार्दस्य वातावरणं सर्वत्रापि प्रससार । पेषणायंत्रस्वामिनामन्तःकरणं द्रवीभूय विवादमेतमन्तं गमयितुं कमपि मार्गमन्वेष्टुं प्रावर्तत । अनसूयाबाईमहाशयाया गृहं चर्चाकूटानां मन्दिरमासीत् । पर्यन्ते श्रीआनन्दशंकरध्रुवमहाशयं मध्यस्थं चक्रुः । मम कृतोपवासस्य त्रीणि दिनान्यभूवन् । तावदंतर एव कर्मत्यागो व्यरमत् । कर्मकराणामिष्टं विभज्य स्वामिनः सुसंधेः स्मृतिं स्थिरीचक्रुः । एवमेकविंशतिदिनानि कर्मत्यागे चलति विवादः समाप्तोऽभूत् ॥

उत्सवाय मिलितानां कूटे पेषणयंत्रानां स्वामिनस्तस्य मुख्याधिकारी चागताः । अस्मिन्संदर्भे मुख्याधिकारी कर्मकरानधिकृत्य यूयं सर्वदा गांधिमहाशयस्योक्तप्रकारेण प्रवर्तध्वमिति बुद्धिवादमवदत् ॥ एतद्घटनासमाप्तेरल्पकालेनैवैतैः सद्गृहस्थैः सह कलहः संवृत्तः । परन्तु तादात्विकसंदर्भा व्यत्यस्था बभूवुः । तेन सह तेऽपि परिवर्तनं गताः । तदा ते खेडाग्रामस्थकृषीवलानां मम वचनं न श्रोतव्यमिति प्रत्यादिशन् ॥

यावद्विनोदकरं तावत्करुणाजनकं विषयमेकमनावेद्य प्रकरणमिदं न समापनीयम् । एतन्मिष्टविभजनसंदर्भे संवृत्तम् । पेषणयंत्रस्वामिनः परः'शतमण'मितं मिष्टमानायितं चक्रुः । तत्परः सहस्रकर्मकराणां कथं विभजनीयमिति महान् प्रश्न आसीत् । यस्य वृक्षस्याधस्तात् कर्मकराः प्रतिज्ञां चक्रुस्तस्यैव वृक्षस्याधो विभजनमुचितमिति निर्धारितम् । इदमुक्त्वेतरत्र तत्समाहारो बह्वनानुकौल्यकारणमभविष्यत् ॥

एकविंशति दिनानि नियमेन वृत्तो जनो मिष्टप्रदानकाले यत्किंचिदपि संकटं विना पंक्तौ क्रमेण स्थास्यति । मिष्टार्थ एकस्योपर्यन्यो यथा न पततीति मम सरला बुद्धिर्ममोवाच । परन्तु परीक्षाकाले प्राप्ते विभजनाय कृतः सर्वोपायो न सार्थको बभूव । निमिषद्वयं यावत्प्रदाने पंक्तिं परित्यज्याभिधावति स्म। कर्मकराणां मुख्यस्थास्तत्र सर्वं क्रमेण यथा चलति तथा यावच्छक्यं साहसं चक्रुः । परन्तु तत्सफलं नासीत् । तत्रत्याभिधावनं त्वरा चान्ते कियदधिकं बभूवेति चेद्बहुतरं मिष्टं पादप्रहारेण नष्टं बभूव । अनावृतप्रदेशे मिष्टविभजने प्रयत्नः पर्यन्ते परित्याज्य एवासीत् । मिरजापुरस्थित शेठ-अंबालालमहोदयस्य गृहेऽवशिष्टमिष्टं कथंचित् नीतमस्माभिः । परेद्युस्तद्गृहावरण एव मिष्टं क्लेशं विना विभक्तमासीत् ॥

अस्यां घटनायां विनोदास्पदोंऽशः स्वल्प एवास्ति । परन्तु करुणाजनकस्यांशस्योल्लेखनमुचितं भवति । ततो विचार्यमाणेऽहमदाबादस्थभिक्षुकवर्गः 'एकटेक' वृक्षस्याधो मिष्टप्रदानसमाचारं कथंचिज्ज्ञात्वा तत्र गणश आगतः पिष्टशून्यजठर आतुरेण हस्तं लंबयन्नित्येतदेव तावदभिधावनस्य कोलाहलस्य च कारणमभूदिति विदितमासीत् ॥

अस्मद्देशस्य वेदनारूपं बहुदारिद्र्यं निराहारवेधश्च कियत्कठिनमिति चेद्वर्षे वर्षेऽधिकजनान्याचकसमूहे मज्जयति । पिष्टार्थेऽनुभूयमाना तेषां गतिर्मानमर्यादात्मगौरवं चैतस्य

संपर्कमेव निष्कासयति । अपि चास्मद्धनिकदानिनः कार्ये नियोजनं विना एतेषां भिक्षां प्रयच्छन्ति ॥

त्रयोविंशोऽध्यायः

खेडासत्याग्रहः

मम विरामः स्वल्पोऽपि न लब्धः । यावदहमदाबादनगरस्य पेषणयंत्रकर्मकराणां कर्मत्यागो न समाप्तस्तावदहं खेडाजनपदसत्याग्रहयुद्धाय गन्तव्यमापतितम् ॥

खेडाजनपदस्य बहुभागेषु सस्यानामरूढत्वात्तत्रत्यापरिस्थितिः क्षामसदृशी बभूव । खेडाजनपदस्थकृषीवलास्तद्वर्षस्य भूकरविलंबनाय प्रयतमानाः स्थिताः ॥

यावदस्मिन् विषयेऽहं कृषीवलानां निर्दिष्टाशयप्रदानात्पूर्वं श्रीअमृतलालठक्करमहाशयस्तत्रत्यपरिस्थितिं विमृश्य तद्विषयकं सर्वं न केवलं लिखितवान् परं तत्प्रांतस्य मुख्याधिकारिण प्रश्नमेकं मुखतश्चर्चयामास । श्रीमोहनलालपंड्याशंकरलालपरीखमहाशयावेतावेतद्युद्धाय प्रविश्य श्रीविठ्ठलभाईपटेलमहाशयोऽपि च दिवंगतसरगोकुलदासकहानदासपारेखमहाशयद्वारा मोहमयीशासनसभायां वादानुवादं कारयामासतुः । एतद्विषये राज्याधिपतिं द्रष्टुं कतिपयाः समितयस्तस्तत्पार्श्वं गताः ॥

अस्मिन्समयेऽहं गुजरातसभाया अध्यक्षोऽभवम् । इयं सभा राज्याधिकारिणं प्रति प्रार्थनापत्राणि तंत्रीप्रार्थनां च प्राहैषीत् । अधिकारिणोऽधिक्षेपांस्त्रासवचनानि च क्षमया निगीर्णवती ॥

अस्मिन्विषयेऽधिकारवर्गस्य कर्मनिर्वहणं कियद्धास्यकरं मर्यादाशून्यं चासीदित्येतत्स्मृतौ इदानीं नैतच्छ्रद्धातव्यं भवति ॥

कृषीवलानां प्रार्थना दिनप्रकाशवद्विस्पष्टा बभूव । परिमिता च सा येन राजकीयाः संमन्तुं न कोऽप्यन्तरायआसीत् । भूकरस्य नियमानुसारेण चतुराणकापेक्षया सस्यवृद्धिरल्पतरा भवेद्यदि कृषीवलैर्भूकरस्य विलंबनं प्रार्थनीयमासीद्राजकीयास्तु चतुराणकापेक्षया अधिका सस्यवृद्धिर्जातेति स्वमतमाख्यान्ति स्म । कृषीवलास्तु चतुराणकादल्पेति वदन्ति स्म । परन्तु राजकीयानां लोकवार्तायाः श्रवणं न प्रथमम् । मध्यस्थो नियोजनीय इति लोकैः प्रार्थिते सति तां प्रार्थनां राजकीया द्रोहमित्यगणयन् । प्रार्थनपत्रिका विज्ञापनाश्च यदा निष्फला बभूवुस्तदा मम सहचराणां मतमाश्रित्य कृषीवलानां सत्याग्रहमाचरितुं समादेशयमदाम् ॥

एतस्मिन् कलहे न केवलं खेडास्वयंसेवकाः परं श्रीवल्लभभाईपटेल-शंकरलालबँकर-श्रीमतीअनसूयाबाई अपि च श्रीइन्दुलालकनैयालालयाज्ञिक-महादेवदेसाई-महाशयप्रभृतयो मम सहचरा आसन्। अस्मिन्युद्धे प्रविश्य श्रीवल्लभभाईमहाशयेन सम्यक्चलितं वर्धमानं च न्यायवादिकार्यं परित्याज्यमासीत्। तत्पुनः नैव प्रारंभितमिति वक्तव्यम्॥

सर्वेषामस्माकं निवस्तुं पर्याप्तोऽवकाशो न लभ्य आसीदिति नडियादनगरस्यानाथाश्रमेऽस्मत्कार्यकेन्द्रं प्रवृत्तम्॥

सत्याग्रहिणः अधोलिखितप्रमाणस्य स्वहस्ताक्षरं ददुः॥

अस्मद्ग्रामेषु सस्यं चतुराणकापेक्षयाल्पतरं जातमिति वयं राजकीयानागामि वर्षं यावद्भूकरं न गृह्णीध्वमिति प्रार्थयाम। राजकीयास्त्वस्मत्प्रार्थनां नागणयन्। अतो वयमधस्तात् स्वहस्ताक्षरकृतो राज्याधिकाराय पूर्णं भूकरप्रदानमथवैतद्वर्षस्य शेषं च न दास्याम इत्येवं प्रमाणतो वक्ष्यामः। राजकीयाः स्वापेक्षापूर्वं व्यवहर्तुमस्मदन्तरायो नास्ति। वयं भूकरस्याप्रदानेन यः परिणामः स संतोषेणानुभविष्यामः। अस्माभिः स्वयं भूकरप्रदानेनास्मत्पक्षो न सत्य इति गणयितुमवकाशप्रदानापेक्षया राज्याधिकारोऽस्मदीयभूमिं परित्याजयितुं संमन्यामहे। परं तु मंडलेऽस्मिन्राजकीया द्वितीयभागप्रदानं विलंबयन्ति चेदस्माकं ये प्रदाने शक्तास्ते भूकरं समग्रं वा प्रदाय शेषं वा प्रदास्यामः। प्रदाने समर्थाः कुतो न प्रदास्यन्तीति चेत्तैः प्रदाने दरिद्राः कृषीवला वित्रस्ताः स्वैः प्रदेयं दातुं स्ववस्तुविक्रयेण वा ऋणं कृत्वा वात्मोपरि दुःखमापातयेयुरित्येव प्रदाने शक्तेऽपि भूकरप्रदानं दरिद्राणां कृते स्वकर्तव्यमित्यस्माकं प्रतिभाति॥

एतत्कलहमधिकृत्य ममानेकाध्यायान् लेखितुमशक्यम्। अतस्तत्संबद्धानि मधुरस्मरणानि व्यक्तव्यानि भवन्ति। एतन्मुख्यकलहसंबद्धानतिशयानवगन्तुमिच्छन्ति तैः श्रीशंकरलालपरीख-महाशयेन विरचय्य प्रकटीकृतः खेडाजनपदसत्याग्रहस्य संपूर्णविश्वसनीय इतिहासः पठनीयः॥

चतुर्विंशोऽध्यायः

पलांडुचोरः

चम्पारण्यं भरतखंडस्य बहुदूरकोणे स्थितत्वाद्वृत्तपत्रिकाप्रतिनिधीनां तद्युद्धस्य बहिष्कृतत्वाद्बहवो बाह्यावेक्षका अनाकृष्टा बभूवुः। परन्तु खेडासंग्रामस्य विषयोऽन्य आसीत्। अस्य घटनाः प्रत्यहं वृत्तपत्रिकासु प्रकटीक्रियन्ते स्म॥

Funding by IKS-MoE

गुजरातीजना अस्मिन् रणक्षेत्रेऽतीव कुतूहलिनो बभूवुः । अस्मिन् विजयलाभाय ते द्रव्यप्रदानाय सज्जस्थिताः। केवलं धनसहायेन सत्याग्रहं कर्तृमशक्यमित्यवगन्तुं तेषां न सुलभमासीत्। सत्याग्रहस्य साधनेषु द्रव्यापेक्षयाल्पतरमूल्यं वस्तु न किंचिद्विद्यते। बहुधोक्तापि मोहमयीस्थश्रेष्ठिनो यावदस्माकमावश्यकमासीत्ततोऽप्यधिकं द्रव्यं प्रेषयामासुः । अस्य फलं किं जातमिति चेद्रणसमाप्तावस्मदीयहस्ते धनमवस्थितम् ॥

सत्याग्रहिभिः स्वयंसेवकः सरलजीवनस्य नूतनः पाठः शिक्षणीय आसीत्। तैस्तत्सर्वं संपूर्णतया वक्तुमशक्यम्। किन्त्वेते स्वजीवनक्रमं बहुशः पर्यवर्तयन् ॥

कृषीवलानामपि तद्युद्धं नूतनो विषय आसीत् । अतोऽस्माभिर्ग्रामाद्ग्रामं गत्वा सत्याग्रहस्य तत्त्वानि विवरणीयानि बभूवुः । अधिकारवर्गस्था लोकप्रदत्तकरद्रव्येण स्व-वेतनं लभन्ते तस्मात्ते प्रजानां भृत्या न तु स्वामिन इत्यवगत्य भयं यस्मात्त्यजन्ति तथाकर्तुमेव मुख्यो विषय आसीत् । अपि च निर्भये सति विनयरक्षणं च स्वकर्तव्यमिति यथा जानीयुस्तथा कर्तुमसाध्यमिव प्रत्यभात् । अधिकारिभ्यस्त्यक्तभयानामपमानः संभवति चेत्तत्प्रतीकारविधानात् कथं ते दूरीकर्तव्याः । किन्तु तेऽविनयेन यदि वर्तन्ते तद्दुग्धभांडस्थदुग्धमिव विषबिन्दुना सत्याग्रहं विनाशयति। तैर्विनयवृत्तिपाठो मया निरीक्षितप्रकारेण सम्यङ् न शिक्षित इति मया पश्चाद्विज्ञातम्। विनय एव सत्याग्रहस्य कठिनांश इति ममानुभवात्सम्यगवगतम् । अत्र विनयो नाम प्रतिपक्षस्य शुभं करणीयमित्याशापि च नैजमाधुर्यं च भवति । न पुनः समयानुकूलमभ्यस्ता मृदुवाक् । एतैः सत्याग्रहिणः प्रतिकार्यरूपमास्थेयम् ॥

प्रथमतो बहुना धैर्येण यद्यपि जनाः प्रवृत्तास्तथापि राजकीयाः प्रबलदंडं विधातुमिच्छव इव नादृश्यन्त । किन्तु तेषां मनस्थैर्यं न चलतीति दृष्ट्वा राज्याधिकार उग्रतरं दण्डं प्रारेभे । वस्तुग्रहणाधिकारिणो गोधनं विचिक्रियुः । अपि च स्वहस्तग्राह्याणि चरवस्तूनि सर्वाणि जग्रहुः । दंडार्पणपत्राणि स्वीकारयामासुः । तत्र तत्र रूढसस्यान् जग्रहुः । एतेन कृषीवला धैर्यहीनाः कतिपये प्रदेयं ददुः । इतरेऽधिकारिभिश्चरवस्तुग्रहणं कृत्वा प्रदेयकरं यथा गृह्णीयुस्तथा कर्तुमैच्छन्। अन्ये च कतिपयेऽन्तपर्यन्तं कलहायितुं सज्जस्थिताः ॥

एतासु घटनासु प्रवर्तमानासु श्रीशंकरलालपरीखमहाशयस्य कृषीवलः कश्चित् स्वेन कृष्यमाणाया भूमेः करं प्रादात् । एतेन कलकल उत्थितः । शंकरलालपरीखमहाशयस्तां भूमिं धर्मकार्यार्थे प्रदाय स्वकृषीवलेन कृतं प्रमादं तत्क्षणमेव समीचकार । एवं स निजमानरक्षणं न केवलं चक्रे परमितरेषामप्युदाहरणमस्थापयत् ॥

त्रस्तानां हृदयं प्रस्तरीकर्तुं मोहनलालपंड्यामहाशयस्य नेतृत्वे पलांडुसस्यमपनेतुमाशयमदाम् । तत्पलांडुसस्यं राजकीयैः प्रमादेन गृहीतमासीत् । इदमहं शासनस्य सविनयभङ्ग इति नागणयम् । यद्यपि कदाचित्तत्तथैवासीत् । निरूढसस्यानामेवं ग्रहणं यद्यप्यक्षरशः

शासनानुरोधेनैव तथापि नैतिकदृष्ट्या तदपराध एव । अपि च बलादपहारो नान्यत् ॥ अतो राजकीयग्रहणमलक्षयित्वा पलांडुग्रहणं जनस्य धर्म एवेत्यहमसूचयम् । एवंविधशासनभङ्गेन फलितं कारागृहवासो दण्डप्रदानं यथा जनः स्वयमेव लभते । तथा पाठशिक्षितुरेतत्सुसंधिर्बभूव । श्रीपंड्यामहाशयस्य तावदीदृगनुभवोऽत्यादरविषयोऽभवत् । सत्याग्रहस्य तत्त्वानुसारेण प्रवृत्तयत्किंचित्कार्यकारणाच्छिक्षामननुभूय संग्रामस्यान्तगमनं तस्मै न रुरुचे । तस्मात्स्वयमेव क्षेत्रात्पलांड्रूनपनेष्यामीत्यग्रेसरः स्थितः । अस्मिन्कार्ये समाष्टजना मिलिताः ॥

राजकीयाः कथमेतान् स्वतंत्रान् मुञ्चेयुः । मोहनलालमहाशयस्तन्मित्राणि च राजकीयैर्गृहीता इति जनस्योत्साहो ववृधे । कारागृहस्य त्रासे पलायिते सति दंडनस्योग्रता यथा वर्धते तथा जनस्य धैर्यमुत्साहश्च वर्धेते । विचारणादिने जना गणशो न्यायस्थानमुपस्थिताः । पंड्यामहाशयस्तस्य सहचराश्चापराधिन इति निर्णीय तेषामल्पकालपर्यन्तं कारागृहवासोऽदीयत । पलांड्रूनामपनयेन 'पीनलकोड'प्रकारेण चौर्यापराधलक्षणानि सन्तीति न्यायाधिपस्य निर्णयोऽन्याय्य इति मे मतमासीत् । किन्तु न्यायस्थानानां परित्याग एवास्मन्नीतिपद्धतिरित्यतस्तन्निर्णयोपरि 'अपील' न चक्रे ॥

एतानपराधिनो यात्रामास्थाय जनैः कारागृहं गताः । तद्दिने श्रीमोहनलालपंड्यामहाशयो लोकैः 'पलांडुचोरः' इति गौरवप्रदं बिरुदं समपादयत् । एतद्गौरवमद्याप्यस्य चलति ॥

खेडासत्याग्रहस्य परिसमाप्तिमग्रेतनाध्याये विवरिष्यामि ॥

पंचविंशोऽध्यायः

खेडासत्याग्रहस्यान्तः

सत्याग्रहकलहोऽनिरीक्षितमवसानं प्राप । लोकाः परिश्रान्ता इति स्पष्टमासीत् । अतिदृढकाया रभसेनाक्रम्य विनष्टा भवितुमनुमन्तुं मया विकल्पितम् । संग्रामं विरमयितुं सत्याग्रहिणां स्वीकार्यः समीचीन एको मार्गो मयान्विष्यते स्म । ईदृगेकः केवलमनिरीक्षितो लब्धः । नडियादतालूकस्थो 'अमलदारो' "धनिकाः कृषीवला यदि प्रदेयं करं यच्छन्ति तदा निर्धनैः कृषीवलैः प्रदेयं विलम्बं सहते" इति संदेशं प्राहैषीत् । इदं मम लेखनद्वारा निवेदनीयमित्युक्तोऽसौ तथा चकार । किंतु अमलदारः स्वजनपदमात्रस्य पर्यनुयोज्य आसीत् । अतो मंडलाधिकार्येव मंडलस्य सर्वभागानां संबंधेऽधिकारयुक्त आसीदिति च ज्ञायमानत्वान्मयोपरि निवेदितकार्यं सर्वमंडलस्याप्यन्वयं भजति न वेति विचार्याहमलिखम् । तैः प्रत्युक्तं तथाविधाज्ञा

सर्वत्र प्रेषितेति। ममेदं न विदितमासीत्। किंतु तस्मिन्यथार्थे सति लोकस्य प्रतिज्ञा पूर्णाभवत्। अस्मत्प्रतिज्ञाया उद्देशोऽपि तदेवासीदिति वाचकानां स्मृतिरस्तीति मन्ये। अतो वयमनयाज्ञया तृप्ता इति व्यक्तीकृतम्॥

परंत्वनया समाप्त्या मम संतोषो नाभूत्। यतः प्रतिसत्याग्रहयुद्धस्यान्ते द्रष्टव्यं माधुर्यमत्र नासीत्। मंडलाधिकारी स्वेन व्यवस्थापयितुं न किंचित्कृतमितीव वर्तते स्म। निर्धनेभ्यः करग्रहणमाज्ञप्तमासीत्। किंत्वेतेनात्यल्पजनानामानुकूल्यमासीत्। को निर्धन इति निर्धारणं लोकायत्तम्। परन्तु ते तन्नाचरन्। तदाचरितुं चैतन्याभावं तेषु वीक्ष्य दुःखितोऽभवम्। अत एतद्युद्धसमाप्तिः सत्याग्रहस्य विजय इति जनस्य विजृंभणे सत्यप्यहं तत्रोत्साहवान्नाभवम्। यतः पूर्णविजयस्य मुख्यांशा अत्र न स्थिताः॥

सत्याग्रहिण आरंभापेक्षयान्तेऽधिकशक्तिमन्तस्तेजोवंतश्च यदि भवन्ति तदा तादृशं सत्याग्रहयुद्धं योग्यमिति वक्तुं शक्यम्॥

यद्यप्येवं तथाप्यप्रत्यक्षाः सत्परिणामा नाभूवन्निति न। एतेऽद्यास्मद्गोचरमायान्ति। एतेषां फलं वयमद्य भुंज्महे। खेडासत्याग्रह एव गुजरातीकृषीवलानां जागर्तेरुदयचिह्नम्। तदेवैषां राजकीयशिक्षणस्याक्षराभ्यासः॥

डॉक्टरबेसन्टमहाशया 'होम रूल' प्रसरणं कृषीवलानस्पृशदिति सत्यम्। किंतु खेडासत्याग्रह एव सुशिक्षिताः सार्वजनिकसेवकाः कृषीवलानां जीवनेन संपर्कमास्थातुं शक्यमकुर्वन्। एतेनैते राष्ट्रसेवकाः स्वेषां कृषीवलानां चैक्यमशिक्षन्त। स्वकार्यस्य योग्यं क्षेत्रं तैर्लब्धम्। तेषां त्यागशक्तिरवर्धत। श्रीवल्लभभाईमहाशयोऽस्मिन्युद्धे प्रविष्ट इत्येतदेव प्रशंसनीयम्। गतवर्षे गुजरातदेशेऽतिवृष्ट्या यदानाहुतमभूत्तदा जनस्य साहाय्यकरणादस्मिन् वर्षे 'बारडोली' सत्याग्रहाचरणाच्च तस्य प्रमाणमस्माकं विदितमासीत्। गुजरातीजनजीवने नूतना कला वीर्यं च पूर्णमासीत्।

तत्रत्यकृषीवलस्याविस्मर्यस्वशक्तेर्ज्ञानमुत्पन्नं स्वस्य मुक्तिः स्वहस्ते स्थिता। अपि यत् मुक्तिः स्वीयसहनशक्तिं त्यागशक्तिं चानुरुध्य वर्तत इति पाठो मनस्यप्रमृज्यरीत्या लग्नोऽभूत्। 'खेडा' कलहद्वारा सत्याग्रहो गुजरातीभूतले दृढमूलः स्थितः॥

एवं मम सत्याग्रहपरिसमाप्तौ संतोषमनुभवितुं यद्यपि न किंचिद्दृष्टं तथापि खेडाकृषीवला अत्युत्साहं प्रापुर्यतः स्वप्रयत्नयोग्यफलं लब्धमिति तेषां विदितम्। अपि च दुःखनिवारणाय सत्यं रामबाणसदृशं मार्गमवालोकयन्। तेषामुत्साहस्यैतद्ज्ञानं पर्याप्तं कारणमासीत्॥

तथापि खेडाकृषीवलाः सत्याग्रहस्यान्तर्यस्वरूपं नाजानन्। अस्य कटुरनुभवः पश्चात्तेषामभूत्। एतदग्रतनाध्याये विवरिष्यते॥

षड्विंशोऽध्यायः

ऐक्यार्थे प्रबलापेक्षा

खेडासत्याग्रहारंभे यूरोपखंडस्य भयंकरः संग्रामः प्रवर्तते स्म । राजप्रतिनिधिर्दिल्हीपत्तने युद्धसभां विधाय तदर्थेऽनेकानग्रेसरानाह्वयत । अहमपि तां सभां गन्तुं निर्बद्धः । पूर्वमेव निवेदितो मया राजप्रतिनिधिना लॉर्डचेम्सफर्डमहाशयेन सह मम स्नेहसंबन्धः ॥

आमंत्रणं स्वीकृत्याहं दिल्हीपत्तनं गतः । तथापि सभां प्रवेष्टुमासन्नन्तरायाः । ‘अली'सहोदरयोरनाह्वानं सभायास्तत्र मुख्यस्य । तौ तदा कारागृह आस्ताम् । यद्यपि तद्विषयो मयाधिकं श्रुतस्तथाप्येकद्विवारमात्रं तयोर्दर्शनमासीत् । प्रत्येकोऽपि तयो राष्ट्रसेवां धैर्यं च प्रस्तौति स्म । मम ‘हकीमसाहेब’महाशयस्य निकटपरिचयस्तदानीं न संबभूव । स्व.आचार्यरुद्रमहाशयो दीनबंधु-अँड्रुझमहाशयश्च तयोर्महतीं प्रशंसामकुरुताम् । कलकत्तापत्तने प्रवृत्तायां मुसलमानानां महासभायामहं श्वेबकुरेशीमहाशयं न्यायवादीख्वाजामहाशयं चादर्शम् । डॉ.अनसारी–डॉ. अबदुरहेमान–महाशयाभ्यां मया परिचयः कृत आसीत् । मया मुसलमानसज्जनानां मैत्री अन्विष्यते स्म । एतेषां संपर्कद्वारा मुसलमानजनानां चित्तं ग्रहीतुं मम तीव्रेच्छासीत् । अतस्तैः सह गाढसंबन्धं कर्तुं यत्रकुत्रापि तैराहूतेन मया गम्यते स्म । मयि निर्बंधोऽनावश्यक आसीत् ॥

हिन्दुमुसलमानजनानां सत्सौहार्दं नासीदिति मम दक्षिणाफ्रिकायां स्वल्पेनैव कालेन विदितमासीत् । ऐक्यमार्गे स्थितानन्तरायान् निर्मूलयितुमवकाशे सति तादृगवकाशो मया न परिहीयते स्म । यस्य कस्यापि स्तुत्या अथवा स्वगौरवहान्येतरांस्तोषयितुं मम :स्वभावे नासीत् । किन्तु ममाहिंसातत्त्वस्य हिंदुमुसलमानजनानामेकताप्रश्न एवातिकठिना सूर्मी भविष्यति । अहिंसाप्रयोगानां तदेव विशालक्षेत्रमिति दक्षिणाफ्रिकायां ममानुभवैर्मनसो दृढमासीत् । अद्याप्यहं तथैव मन्ये । भगवान् मां परीक्षत इति मम जीवनस्य प्रतिक्षणं विज्ञायते ॥

यदाहं दक्षिणाफ्रिकायाः प्रतिनिवृत्तस्तदेदृशदृढाभिप्रायवानासम् । अतः ‘अली’भ्रात्रोः संबन्धममूल्यमगणयम् । तथापीतोऽप्यधिकमैत्र्याः संभावनात् पूर्वमेव राजकीयास्तौ जनसंपर्काद्दूरीचक्रतुः । मौलानामहमदलीमहाशयः कारागृहाधिकारिणामनुज्ञां प्राप्य मम ‘बेतुल’कारागृहात् ‘छिंदवाडा’कारागृहाच्च पत्राणि दीर्घाणि लिखति स्म । ‘अली’सहोदरौ द्रष्टुमहं राज्याधिकारमनुज्ञां प्रार्थयम् । किन्तु तन्निष्फलमभूत् ॥

अनयोः सहोदरयोर्बंधनादनंतरं कलकत्तायां मिलिते ‘मुस्लिमलीग’ अधिनिवेशने मुसलमानमित्राणि मामाह्वयन्त । भाषणं कर्तुमहं प्रार्थितः सन् कारागृहाद् ‘अली’भ्रात्रोर्विमोचन-

कर्तव्यमधिकृत्य भाषणमकरवम् । ततः स्वल्पकालेनैतानि मित्राणि मामलिगढपत्तनस्य मुस्लिम्विद्याशालां प्रति निन्युः । तत्रत्यं युवकानामहं देशसेवाप्रवृत्तैः “फकीरैः” युष्माभिर्भवितव्यमित्याह्वानमदाम् ॥

अनन्तरं ‘अली’ भ्रात्रोर्बंधविमोचनाय राज्याधिकारे पत्रव्यवहारमकरवम् । अहं ‘खिलाफत’ विषयेऽस्मिन्संबन्धे ‘अली’भ्रात्रोरभिप्रायान् प्रवर्तितकार्याणि च परामृष्टवान् । मुसलमानमित्रैः सह बहुशस्तां चर्चामकार्षम् । यद्यहं मुसलमानजनानां वस्तुतः सुहृद् भवेयं तथा ‘अली’भ्रात्रोर्विमोचनाय ‘खिलाफत’समस्यां न्यायेन पूरयितुं च साध्यं सर्वसाहाय्यं मया करणीयमिति मम प्रत्यभात् । तत्प्रार्थनायां नीतिविरुद्धं किमपि न चेदस्ति तावतालम् । तत्प्रश्नस्य स्वतंत्रगुणदोषाणां गणना मम कार्यं न हि । धर्मसंबद्धविषयेषु भिन्नाः सन्ति विश्वासाः । प्रत्येकपुरुषस्यापि स्वीयविश्वास एव परमोत्तमः । प्रत्येकस्मिन्धार्मिकविषये सर्वेषामेक एव विश्वासश्चेत्सर्वस्मिञ्जगत्येक एव धर्मः स्थितो भवेत् । दिनेषु गच्छत्सु मुसलमानजनानां ‘खिलाफत’संबंधे या प्रार्थना सा नीतिनियमविरुद्धा न भवति । अपि च न्याय्यं भवतीति आंग्लप्रधानमंत्रीलॉइडज्यॉर्जमहाशयः संमतिमदादिति मम ज्ञातमासीत् । ततः प्रधानमंत्रिणा दत्तवचनं यथासौ निर्वाहयति तथा कर्तुं यथाशक्ति साहाय्यकरणं मम कर्तव्यमिति मम प्रत्यभात् । तेन दत्तं वचनं कियत्स्पष्टमासीदिति चेन्मुसलमानजनप्रार्थनाया गुणदोषविमर्शः केवलं ममान्तरात्मनस्तृप्तये भवति ॥

मित्रैर्विमर्शकैश्च ‘खिलाफत’प्रश्नविषये मम वर्तनं खंडितम् । तथापि ममाभिप्रायान् परिवर्तयितुं मुसलमानजनैः सहकारेण विषादं प्राप्तुं वा मम न किंचित्कारणमस्तीति प्रतिभाति । तादृक्संदर्भस्य पुनः प्राप्तौ मम वर्तनं पूर्ववदेव तिष्ठेदिति ॥

अतो दिल्लीं गतेन मया मुसलमानजनानां पक्षो राजप्रतिनिधेरवधानाय नेतव्य इति मम पूर्ण उद्देश आसीत् । ‘खिलाफत’ प्रश्नः पश्चाल्लब्धरूपो न तदाद्यापि प्राप्त आसीत् ॥

किन्तु दिल्लीं प्राप्ते मयि मम युद्धसभायां भागीभवनविषयेऽन्योऽन्तराय आसीत् । दीनबंधु-अँड्रूझमहाशयः युद्धसभायां मम प्रवेशो नीतिविरुद्धः खल्विति प्रश्नमुपास्थापयत् । ‘इंग्लेंडइटली’देशयोर्मध्ये प्रवृत्तगुप्तनियमानधिकृत्यांग्लपत्रिकासु चर्च्यमानं विषयं मे न्यवेदयत् । ‘इंग्लेंड’ देशे इतर ‘ऐरोप्य’ राज्याधिकारेण गुप्तसंधीनकरोद्यदि मयास्यां सभायां भागिना भवितव्यं कथमिति अँड्रूझमहाशयः पप्रच्छ । अतः सभागमने मम संकोचं, विवृत्याहं लॉर्डचेम्सफर्डमहाशयानां पत्रमलिखम् । स तं प्रश्नमात्मना सह चर्चयितुं ममाह्वानं ददौ । तेनापि च तस्याप्तकार्यदर्शिना मेफीमहाशयेन सह दीर्घकालमहमचर्चयम् । सभामागन्तुं मम संमतिरेवास्य फलितमासीत् । राजप्रतिनिधेर्वाद एवं स्थित इति वक्तव्यः—यथा यद् ‘ब्रिटिश’मंत्रिणां कूटे न क्रियते तत्सर्वं राजप्रतिनिधिर्जानातीति भवता नावगतं खलु । ‘ब्रिटिश’राज्याधिकारो न कदापि प्रमाद्यतीत्यहं वेतरे वा न ब्रूमः । किंतु चक्राधिपत्येन

Funding by IKS-MoE

समष्ट्या सदैव कृतमिति यदि भवान् संमन्यते ‘ब्रिटिश’संबंधेन हिंदुस्थानस्य लाभ एवासीदिति भवता विश्वस्यते चेत् संकटे निपतिते साम्राज्ये तस्य साहाय्यं कर्तुं प्रत्येकभारतीयस्य कर्तव्यमिति किं भवता न संमन्यते । आंग्लपत्रिकाभिर्गुप्तनियमानधिकृत्य यल्लिखितं तन्मयापि पठितम् । तन्मुक्त्वा एतद्विषये न किंचिन्मया ज्ञायत इतीमाः पत्रिका बहुवारमसत्यवार्ताः स्फोटयन्तीति भवता ज्ञायत एव । साम्राज्यस्यैतादृक्कष्टकाले प्राप्ते केवलवृत्तपत्रिकावृत्तांतस्याधारेण साहाय्यं न दास्यामीति किं ब्रूत । युद्धसमाप्तौ भवदिष्टप्रकारेण नैतिकप्रश्नानादायास्मान्यथेच्छं खंडयत । किंत्वद्य मास्तु ॥

एवंविधो वादो न हि नूतनः । किन्तु तद्वचनविधया तत्संदर्भस्य महिम्ना च स मे नूतन इव प्रत्यभात् । अहं सभायां भागी भवितुं संमतिमदाम् । मुसलमानप्रार्थनाविषये राजप्रतिनिधिं प्रति पत्रं लेखिताभवम् ॥

सप्तविंशोऽध्यायः

सैनिकानां प्रवेशः

एवमहं युद्धसभां गतः । सैनिकानां संग्रहविषयो निर्णयो मयानुमोदितव्य इत्यतीवोत्सुक 'आसीद्राजप्रतिनिधिः । अहं हिंदी-हिंदुस्तानीभाषायां वक्तुमनुज्ञां प्रार्थयम् । राजप्रतिनिधिरस्य संमेने । किंत्वांग्लभाषायामपि वक्तव्यमित्यसूचयत् । मम वक्तव्यं भाषणं नासीत् । मया एकमेव वाक्यमुच्चारितम् । तस्य तात्पर्यं यथा मम पर्यनुयोज्यतामवगत्य निर्णयमेतमनुमोद इति ॥

हिंदुस्तानीभाषायामुक्तमाकर्ण्य बहवो मामभ्यनंदन् । तादृशसभायां हिंदुस्तानीभाषायां यस्य कस्यापि भाषणं जीवत्स्मृतावयमेव प्रथमो वार इति तैरुक्तम् । एतान्यभिनंदनान्यपि च हिंदुस्तानीभाषायां भाषणकृदहमेक एवेति ज्ञानं च मम राष्ट्रियमात्मगौरवं भंक्त्वा मम हृदयं दुःखितमकुर्वन् । अहं भूगर्भमवतीर्य निगूढो भवेयमित्यमंसि । अस्मद्देशकार्यसंबद्धास्वस्मद्देश एव मिलितासु सभास्वस्मद्देशभाषाया बहिष्कारः । मादृशो यः कश्चित् हिंन्दुस्तानीभाषायां भाषते चेत् सोऽभिनन्दनयोग्यो विषयः । कीदृशीयं विषादकरी वाक् । एतादृग्घटना वयं कियत्क्षीणदशामवतीर्णा इति स्मारयन्ति ॥

सभायां मयोक्तमेकं वाक्यं मम बह्वर्थगर्भितमासीत् । सभा वा मयानुमोदितप्रस्तावो वा मया न विस्मरणीयोऽभवत् । दिल्हीस्थेनैव मया पूरणीया पर्यनुयोज्यतैकासीत् । मया राजप्रतिनिधेः पत्रं लेखनीयमासीत् । एष मे न सुलभो विषयः । अहं सभां प्रविष्टः कथं किमर्थं चेति विवृत्य राज्याधिकाराजनैर्निरीक्षितं किमित्येतत्स्पष्टं निवेद्य पत्रलेखनं राज्याधिकारस्यापि च प्रजानां लाभाय मम कर्तव्यमिति मम प्रत्यभात् ॥

Funding by IKS-MoE

अस्मिन् पत्रे लोकमान्य तिलक-‘आली’सहोदरप्रभृतीनां नायकानामेनां सभां प्रत्यनाह्वानकृते मम विषादो राजकीयसंबंधे लोकानां संमतिप्राप्तये राजकीयैः कनिष्ठपक्षे कर्तव्याः सुधारणा युद्धात्संवृत्तपरिस्थितेर्विषये मुसलमानजनैः प्रार्थितं च व्यक्तमकार्षम् । तत्प्रकटनाय राजप्रतिनिधेरनुज्ञामपेक्षितामसौ संतोषेण प्रददौ ॥

सभासमाप्तेरनंतरमेव ‘सिमलां’प्रति राजप्रतिनिधेर्गमनात्तत्र पत्रं प्रेषणीयमासीत् । मम दृष्ट्या तन्महत्त्वपूर्णमासीत् । प्रेषणाधिकरणात्प्रेष्यमाणे विलंबोऽभविष्यत् । कालमल्पीकर्तुमासीन्ममेच्छा । तथापि यस्य कस्यापि संदेशहारिणो वशे प्रेषयितुं न रोचते स्म । यः कोऽपि परिशुद्धहृदयस्तदादाय राजप्रतिनिधेर्भवनं स्वहस्तेनैव प्रापयेदिति ममेच्छासीत् । दीनबंधुअँड्रुझमहाशयो मुख्याध्यापकसुशीलरुद्रमहाशयश्च ‘केंब्रिज्मिशनपाद्रि’ आयरलेंडमहाशयस्य नामधेयमसूचयताम् । स सज्जनः पत्रमालोक्य सदिति दृष्टे नेतुं संमेने । तदात्ममात्रपत्रं नासीदित्यतो नासीत् कोप्यंतरायः । स तत् पठितवान् । तस्मायिदमरोचत । तन्नीत्वा प्रदातुं संमेने । द्वितीयश्रेणीप्रयाणशुल्कं प्रदित्सुरहम् । तथापि तन्न गृहीत्वा मध्यमश्रेण्यां प्रयातुमभ्यासो ममेत्यब्रवीत् । तस्मिन्रात्रिप्रयाणे सत्यपि तस्यामेव श्रेण्यां प्रयातः । तस्य सरलता ऋजु स्वभावो निष्कपटा वाक् च मम मानसमाचकर्षुः । एवंरीत्या पवित्रमानससज्जनद्वाराप्रेषितपत्रेणाभीप्सितमेव फलं लब्धमिति मे प्रत्यभात् । एतेन मम मनोभारोऽवतारितः । मम मार्गः सुगमोऽभवत् ॥

योधानां संग्रहो मम द्वितीयपर्यनुयोज्यतासीत् । खेडां विना कथमन्यत्र मयारंभणीयम् । मया सह कार्यकर्तॄन् विना प्रथमतो योधा भवितुं के वान्ये आह्वातव्याः । तस्मात् ‘नडियाद’पत्तनं प्राप्य वल्लभभाईप्रभृतिमित्रैः सहैतद्विषयं चर्चितवान् । तेषां कतिपयैरियं गुलिका सौलभ्येन निगरितुमशक्या भवति । अंगीकृतमदीयसूचनास्तस्य फलकारित्वविषये संशयग्रस्ता बभूवुः । अहं येषां पार्श्वं गत्वा सैन्यं प्रवेष्टव्यमिति प्रष्टुमीप्सितवांस्तेषां राज्याधिकारस्यापि मध्ये प्रेमोत्सेको नासीत् । राजकीयसेवकानां संबंधे तैरनुभूतः कटुरनुभवस्तत्स्मृतावद्यापि नूतनः स्थितः ॥

तथापि ते कार्यारंभपक्षेऽभिमता आसन् । आरब्धे मया कार्ये ममांधत्वं गतम् । ममाशाप्रवाहस्याकस्मादंतरायोऽभूत् । ‘खेडा’सत्याग्रहकाले जनाः स्वशकटं भाटकं विना प्रयच्छन्ति स्म । इदानीं पुनः स्वयंसेवकानां वाक् तिष्ठतु । भाटकस्यापि शकटं दुर्लभमासीत् । शकटानि विहाय पादक्रमणेन् प्रयातव्यमिति निरचैष्म । एवं दिनस्य विंशतियोजनदूरं गंतव्यमासीच्छकटानामप्यलाभे जना आहारं प्रयच्छन्तीति निरीक्षणं कथं स्यात् । आहाराय प्रार्थनाप्यनुचितेति वक्तुमशक्यमासीत् । निश्चितं च स्वयंसेवकैः प्रत्येकेनापि स्वकीयमाहारं स्वयमेव कोशे स्थापयित्वा प्रयातव्यमिति निर्धारितम् । तदोष्णकाल इति शयनं वा निशारो वा नावश्यकमासीत् ॥

यत्र यत्र वयं गतास्तत्र तत्र सभा आकारिताः । जनास्तावदायान्ति स्म । परंत्वेकद्विपुरुषा अपि सैन्यं प्रवेष्टुमग्रे नायाताः । भवानहिंसोपासकस्तथापि शस्त्रास्त्रग्रहणं कथं ब्रवीति । वयं

राज्याधिकारस्य साहाय्यकर्तारश्चेत्तेन को वोपकारः कृतोऽस्माकम् । इमान् प्रश्नान् तथाविधानन्यानपि पृच्छन्ति स्म ॥

तथाप्यस्मन्निरंतरोद्यमः फलकारी भवितुं प्रवृत्तः । बहवो जनाः स्वनामानि प्रददुः । प्रथमसमूहस्य प्रेषणात्परमवशिष्टान् गणान् प्रेषयितुं साध्यं भविष्यतीत्यस्माभिर्निरीक्षितम् । एवं नूतनप्रविष्टाः कुत्रावतारणीया इति विषयमधिकृत्याहं प्रांतविभागाधिकारिभिः सह पूर्वमेव वाग्व्यवहारं कुर्वन्नासम् । प्रत्येकप्रांतविभागाधिकारिणः (कमिशनर्) दिल्हीसभावत् सभाश्चालयन्ति स्म । एतादृगेव गुजरातीदेशे मिलिता । अहं मम सहवासिनश्च तत्राहूताः । वयं तत्र गताः । परंतु मद्वर्तनस्यौचित्यं दिल्हीसभापेक्षयात्राल्पीयस्तरमिति प्रत्यभात् । नीचदासत्वरूपवातावरणे नाहं सुखित आसम् । अहं स्वल्पदीर्घं भाषणमकार्षम् । मम भाषणेऽधिकारिणां रुचिकरं न किंचिदुक्तम् । तावदेव न । एकद्विकठिणवाचोऽप्यासन् ॥

सैन्यं प्रवेष्टव्यमिति जनं प्रार्थयितुं मया 'चीटयः' प्रदीयन्ते स्म । तेषां मयोपयुक्त एको वादः कमिशनर्अधिकारिणेऽरुचिकरमासीत् । तद्यथा भरतखंडस्य शासने 'ब्रिटिश'जनैः कृतेष्वकृत्येषु सर्वमपि जनीगमेव निरायुधीकरणमकृत्यमत्यंतहीनमिति चरित्रे परिगण्यते । एतच्छासनं निराकर्तुमस्माभिः शस्त्रविद्या शिक्षणीया यद्यद्य सुसमयः प्राप्तः । मध्यमश्रेणीजनः स्वयमग्रत आगत्य राज्याधिकारस्य संजातेऽस्मिन्नापत्काले साहाय्यं करोति चेदविश्वासो विनश्य शस्त्रधारणान्तरायो न स्थास्यतीति ॥

प्रांतविभागाधिकारी एतदधिकृत्य भाषित्वोभयोर्मतभेदे सत्यपि यतो भवान्सभामागतस्ततोऽहं संतुष्ट इत्युवाच । ममाभिप्राया मया यथाशक्ति विनयेनैव समर्थयितव्या एवासन् ॥

अस्ति इहाधस्ताद्राजप्रतिनिधिं प्रति लिखितं पूर्वोक्तं पत्रम् —

" यथा भवान् जानाति तथैतन्मासस्य (एप्रिल) पंचविंशतितारीखदिनस्य पत्रे लिखितकारणैर्युद्धसभामहं नागत इति वक्तव्यमापतितम् । परंतु कृपया दर्शनप्रदानानंतरं यद्यपि विनान्यतः कारणात् परं भवति मम परमादरात् सभां गंतव्यमिति स्वयमेवात्मानं प्रेरयित्वा सभामागतोऽस्मि । लोकमान्य तिलक–मिसिस बेसंट-आलिभ्रातरो (एते प्रजाभिमतनायकेष्वत्यंतप्रमुखा इति मे मतम् ।) सभां प्रति नाह्वानिता इत्यप्येकं कारणम् । तेषामनाह्वानमत्यगाधः प्रमाद इतीदानीमप्यहं गणयामि । एतत्सभानंतरं प्रांतेष्वपि सभा मिलिष्यन्तीति मया ज्ञातम् । तेष्वेतान्प्रमुखानाहूय राज्याधिकारिणस्तदाशयनाकर्ण्य लाभं प्राप्य स्वप्रमादं समीकुर्युरिति विनयपूर्वकं मया सूच्यते । एतान् कोटयंतरप्रजानां प्रतिनिधीन्नायकान् राज्याधिकारस्यानभिमताभिप्रायग्राहिणोऽपि यः कोऽपि राज्याधिकारोऽनादरेण दृष्ट्वा न विजयेतेति विज्ञापयामि । परंतु सभायामुपसमितिषु सर्वे पक्षाः स्वाभिप्रायान् निरांतकं व्यक्तीकर्तुमवकाश आसीदिति वक्तुं मम संतोषो भवति । सभायां वोपसमितौ वा ममाभिमतमुद्देशपूर्वकमेव न व्यक्तीकृतम् । सभाग्रे स्थापितनिर्णयस्यावलंबप्रदानेन सभाया उद्देशानहमत्युत्त-

Funding by IKS-MoE

मतया साधयितुं शक्यमिति मम प्रत्यभात्। अहं कमप्यंतरायं विना तथा कृतवान्। एतेन सह प्रेषिते प्रत्येकपत्रे निवेदितसूचनां राज्याधिकारिणः शीघ्रमेव स्वीकुर्वन्ति चेत्तथा शीघ्रमेव कार्यरूपं नेतुं शक्यत इत्याशां बिभर्मि ॥

इतः किंचित्कालेनैव वयमितरस्वास्थ्यानीव 'ब्रिटिश'चक्राधिपत्यस्य स्वतंत्रभागिनो भविष्याम इत्याशयं रक्षामः । यदा चक्राधिपत्यस्य संकटमागतं तदा निर्मत्सरेण निरांतकेन च साहाय्यप्रदानमस्माकं धर्म इति मम संमतिरस्ति। तथावलंबो दातव्य इति निश्चितमद्यास्माभिः । किंत्वस्मदभीष्टमितरेषामिव त्वरितमेव सेत्स्यतीति निरीक्षणमेवैतस्याः प्रवृत्तेः कारणमिति केवलं सत्यमेव । अतः कर्तव्यस्याचरणं स्वयमेतदुचितमधिकारं संपादयिष्यतीति यथैतदंतरे भविष्यन्तीति. भवदीयभाषणे सूचितराजकीयसुधारणा राष्ट्रमहासभापि च मुसलमानमहासभाभ्यां मिलित्वा रचितनिर्वहणक्रमं स्थूलतयानुसरन्तीति जनस्य निरीक्षणं न्याय्यमेव भवति । युद्धसभायां बहवः सदस्या आत्महृदयपूर्वकं सहकारं प्रदातुमियं श्रद्धाधारभूता भवतीति मे विश्वासः ॥

अस्मद्देशीयो जनो यथा पदं पश्चान्निधत्ते तथा कर्तुमहं शक्तश्चेन्महासभाया निर्णयानखिलान्परावर्त्य युद्धसमाप्तिपर्यंतं स्वराज्यमथवा 'प्रजाप्रतिनिध्यमिति नोच्चारणीयं यथा तथाकरिष्यम्। साम्राज्यस्यैतद्विषमघटीप्राप्तौ भरतखंडं स्त्रीयसुदृढयुवकान् सर्वानपि साम्राज्यस्य कृते आहुतीकर्तुं यथा शक्यं तथा कर्तव्यम्। अनेन कार्येणैकेनैव हिंदुस्थानं चक्राधिपत्ये सर्वत्राप्यत्यंतादरपात्रमङ्गं भूत्वा वर्णभेदः कुलभेदश्च प्रणष्टोऽभविष्यदिति मे विदितम् । किन्तु: प्रायो भारतस्य जनाः सर्वेऽपीतोऽप्यल्पपरिणामं मार्गमनुसर्तुं. निश्चिता भवन्ति । अपि च शिक्षितवर्गो जनसमाजस्योपरि प्रभावशाली न भवतीत्यद्य वक्तुं न शक्यम्। दक्षिणाफ्रिकातो हिंदुस्थानं निवर्तनादनंतरं मम कृषीवलैः सहात्यंतगाढसंपर्को भवति। तेषु राज्याभिलाषो विशेषतः प्रसृत इत्यहं सावधारणं ब्रवीमि। पूर्वं महासभाया मेलने शासनेन निर्धारणपूर्वकं निश्चितावध्यंतरे 'ब्रिटिश'हिंदुस्थानस्य प्रजाप्रतिनिध्यं प्रदेयमिति निर्णयस्याहमपि भागी संवृत्तः। एतत्कार्यं महाधैर्यापेक्षमिति मम संमतिरस्ति। किंतु शीघ्रमेव प्राप्तव्य स्वराज्यसंबंधिप्रेक्षणापेक्षयाल्पतरेणान्येन केनापि भरतखंडस्य प्रजा न तृप्यन्तीति मया सम्यगवगतम्। एतद्ध्येयसाधनाय न काप्याहुतिरधिका भवतीति मन्यमानानेके भारते विद्यन्त इति मम विदितम्। यस्मिन् साम्राज्ये स्त्रीयोऽत्युत्त्वदशारोढव्येति इच्छामाशां च निक्षिप्तवंतस्तदर्थे स्वयमेवात्मानमर्पयितुं सज्जस्थितैर्भवितव्यमित्यवगंतुं पर्याप्ता जागर्तिस्तेषां विद्यते। अत एतच्चक्राधिपत्यस्य प्राप्तमपायं दूरीकर्तुं निःशब्दं निराडंबरं च कायेन वाचा मनसापि कार्यानुष्ठानादस्मदीयलक्ष्यस्य निकटं वेगेन गमनं विना नान्यत्। एतत्सुलभसत्यं न लक्ष्यते चेद्राष्ट्रीयात्महत्या भविष्यति। साम्राज्यस्य रक्षणप्रयत्ने वयं भागिनश्चेत्तस्मिन्कार्य एव स्वराज्यं साधितमित्यस्माभिर्ज्ञातव्यम् ॥

Funding by IKS-MoE

अतोऽस्मासु लभ्यं प्रत्येकं पुरुषं साम्राज्यरक्षणार्थमर्पयितुं संमतिर्देयेति मम स्पष्टमस्ति। किंत्वार्थिकसाहाय्यविषये तदैव वचनं वक्तुं न शक्यम्। भरतखंडेन साम्राज्यस्य कोशे मम योग्यतामतिक्रम्य धनं प्रदत्तमिति मम कृषीवलैः सह संवृत्तनिकटसंपर्केणावगतम्। एवमुक्त्वाहं मम देशबांधवेष्वधिकभागवासिनामभिप्रायं व्यक्तीकुर्वतास्मीति मम विदितम्॥

सर्वेषामस्माकमाशयं साधयितुं वयमस्मज्जीवनस्य विनियोजनेनैषा सभा पदमेकं भवतीति मम मतम्। इतरे बहवोऽस्माकं तथैव भावयन्तीति मे विश्वासः। किंत्वस्मदीया परिस्थितिरतिविचित्रा। अद्य वयं चक्राधिपत्ये स्थिताः स्मः। किंत्वस्माकं तत्रभागिनामधिकारो न विद्यते। अग्रेऽपि परिस्थितिरुत्तमा भवेदित्याशामवलंब्य वयमस्मज्जीवनमेवं विनियुंज्महे। साशा कीदृशीति स्पष्टमेतन्नकिंचिन्निगूह्य युष्माकं निवेद्यते। न चेदहं युष्माकं मम देशस्यापि द्रोही भवेयम्। साशा सिध्यत्विति वयं युष्माभिः संमतिपत्रं नापेक्षामहे। किंत्वाशाभंगे सति तेन सामाज्यभ्रमोऽपि नश्यतीति युष्माभिरवगंतव्यम्॥

विषयमेकमनिवेद्य मया न स्थेयम्। अस्माकमंतर्भेदा विस्मर्तव्या इति युष्माभिरुक्तं खलु। राज्याधिकारिणामत्याचरणं निरंकुशवर्तनं च सोढ्वा स्थातव्यमित्येतदेव तदर्थश्चेदहं युष्मदिच्छामनुसर्तुं न शक्तः। सुसंघटितं निरंकुशप्रवर्तनं प्रत्यास्थातुं मम साहसमशेषं व्ययीकरिष्यामि। नैकोऽपि मनुष्योऽनादरेण द्रष्टव्यः कालांतरापेक्षयातिशयितं प्रजाभिप्रायं ज्ञात्वा तदवधातव्यमित्यधिकारिणां निवेदनीयं भवति। चंपारण्ये बहोः कालादवस्थितं निरंकुशराज्यं प्रत्ययायाहं ‘ब्रिटिश’ न्यायपक्षपात एव सर्वाधिकाशक्तिरिति मया प्रदर्शितम्। ‘खेडा’स्थले राज्याधिकारं शपंतो जना अद्य स्वीयसत्यार्थे कष्टं सोढुं सिद्धा भवेयुश्चेत् स्वयमेव देशस्य शक्तिर्न राज्याधिकार इति ज्ञातम्। अतो राज्याधिकारं प्रति तेषां क्रोधः प्रशाम्यतीव। ते वदन्ति यथा—यदा न्याय्यं शिर उत्थापयेत् तथा सविनयेन क्रमेण प्रत्यवस्थेयम्। अतोऽनेन राज्याधिकारेण प्रजापक्षपातिना भवितव्यमिति। अनया रीत्या चंपारण्यस्य खेडास्थलस्य च समारंभा मया युद्धसंबंधे कृता स्पष्टविशिष्टप्रत्यक्षसेवा भवति। अस्मिन्विषये मम कार्यं विरमयेत्युक्तिरेका मम श्वासोच्छ्वासं विरमयेत्येका उभेऽपि समाने। पशुबलं प्रति प्रेमशक्तिर्नामांतरवत्यात्मशक्तेरुपयोगं जनेषु प्रकाशयितुं यद्यहं शक्तस्तदा प्रपंचमखिलं प्रत्यवस्थातुं समर्थभरतखण्डं युष्मदग्रे स्थापयितुं शक्नोमीति मया ज्ञायते। अत एतद्दुःखसहनस्य नित्यधर्मं मम जीवने व्यक्तीकृत्य तत्र ये सादरास्तत् स्वीकाराय तदग्रे स्थापयितुं कालोऽयमकालोऽयमिति नियमं विहायात्मसंयममभ्यस्यामि। अन्यस्मिन् क्वचित्कार्येऽहं प्रवृत्तश्चेत्तदेतद्धर्मस्य सर्वश्रेष्ठतां प्रतिवादयितुमेव नान्यत्कारणाय॥

पर्यन्ते यूयं चक्रवर्तिनो मंत्रिणो मुसलमानराज्यान्यधिकृत्याभयहस्तप्रदानाय वक्तव्यमित्यहमिच्छामि। प्रत्येकमुसलमानस्यापि विषयेऽस्मिन् गाढासक्तिरस्तीति युष्माकं विदितमेव। हिंदुर्भूत्वाप्यहं तेषां विषय औदासीन्यं न किल सहे। तेषां दुःखान्यस्मद्दुःखानि भवन्ति। तत्र

स्थानाधिकारिणां लेशतोऽपि हिंसनं यथा न भवेन्मुसलमानतीर्थक्षेत्राणां विषये तन्मनोधर्माणामादरणमपि च स्वराज्यसाधनाय हिंदुस्थानस्याधिकारविषये न्यायेन सकालं च व्यवस्थापनमेतत्कार्यक्रम एव साम्राज्यस्य क्षेमाय स्थितः। आंग्लजनांगे मम प्रेमणि स्थिते प्रत्येकभारतीये आंग्लानां विषये आदरोऽस्तु। इतीच्छयैवेदं लिखितम् ॥

अष्टाविंशोऽध्यायः

मृत्युसंमुखे

सैनिकसंग्रहणकार्येऽहं मम देहस्वास्थ्यं प्रायः संपूर्णमेव व्यनाशयम्। तत्काले मया मुख्यशः सेव्यमान आहारो यथा–भूचणकं नवनीतं जंबीरादिः। यद्यपि मया ज्ञातं नवनीतममितं भक्षयित्वारोग्यहानिः सुलभेत्यहं तदधिकमभुंजे। एतेनामशंकारब्धा। इदमहमधिकमलक्षयित्वा यदा कदाचिद्यथा मया गम्यते स्म। तथैव सायमाश्रमं गतः। तत्काले मयौषधसेवनमपूर्वमासीत्। एकवारं भोजनपरित्यागे स्वास्थ्यं भविष्यतीत्यचिंतयम्। परेद्युः प्रातर्न किंचिन्मया भुक्तम्। एतेन मम देहस्थितिरुत्तमाभूत्। किंतु संपूर्णस्वास्थ्यलाभायेतः कतिपयकालमुपवासः कार्यः। यत्किंचिद्भोक्तव्ये सति फलरसमेकं विना नान्यत् स्प्रष्टव्यमिति मे विदितम् ॥

तद्दिनं किंचित्पर्वदिनमासीत्। मध्याह्ने भोक्ष्य इति कस्तुरबाईमहाशयोक्तापि सा ममाशामुपाहरत्। अहमाशाधीनः संलग्नः। अहं दुग्धनवनीतदधिसर्पिरादिभिः कृतपदार्थान्न भोक्ष्य इति संकल्पमाचरन्नासम्। अतः कस्तुरबाईमहाशया मदर्थे गोधूमयूषे मधुरान्नं कृत्वा तस्य सर्पिः प्रति तैलं निक्षिप्य संमिश्रितवती। मदर्थे मुद्गदलपायसं निचिक्षेप। एतानि मह्यमरोचन्त। कस्तुरबाईमहाशयां संतोष्य मम रुचिं च तर्पयितुं पर्याप्तमेव खादामि। एतेन मम देहस्थितेर्हानिर्न भवेदित्यहं तान्यभक्षयम्। किंतु मम दुर्दैवमेतादृक्कालमेव निरीक्षते स्म स्वल्पं मया न भुक्तम्। जठरपूर्णमभुंजे। इतो यमधर्मराजस्यैतदधिकं तांबूलप्रदानेन समाह्वानं नावश्यकमासीत्। एकहोराभ्यंतरे आमशंका तीक्ष्णादृश्यत ॥

तद्दिनसायंकाल एव मया 'नडियादपत्तनं' प्रतिनिवर्तनीयमासीत्। साबरतीनामकमग्निरथविरामस्थानमर्धक्रोशमात्रदूरे स्थितमपि तत्र पादक्रमणेन बहुलः प्रयासोऽभवत्। श्रीवल्लभभाईमहाशयोऽस्माभिः सहामदाबादनगरे मिलितः। ममास्वास्थ्यं तेन ज्ञातमासीत्। किंतु मम वेदना कियदसह्याभूदिति तस्य नाहमदर्शयम् ॥

वयं 'नडियाद'पत्तनं दशहोरावादनसमये प्राप्ताः। तत्रत्यं 'हिंदु'अनाथाश्रममस्मत्केन्द्रं कृतमासीत्। तदग्निरथविरामस्थानादर्धक्रोशदूरे स्थितम्। अहं कथंचित्तत्र गत्वा प्राप्तः।

किंत्वंतर्वेदना वर्धमानाभूत् । पंचदशनिमेषैरेकवारं मलं विसर्जनीयमासीत् । पर्यंतेऽहमायस्तोऽभवम् । मयानुभूयमानक्रूरवेदनां मित्रेभ्यो निवेद्याहं शयने पतितः । तावत्पर्यंतं मया सर्वैरुपयुज्यमानं शौचकूपं गम्यते स्म । अयं दूरे स्थितः । मम पार्श्वे मलोच्चारः (' कमोट ') आनेतव्य इत्यहमब्रवम् । एतत्प्रष्टुमहं लज्जितोऽप्युपायांतरं नासीत् । श्रीफूलचंदबापुजीमहाशयः प्रधावितो मलोच्चारमेकमानिनाय । सुहृदः सर्वे चिंताक्रान्ता मां परितः स्थिताः । तैर्ममोपरि प्रसारितप्रेमधारया अवेक्षमाणजागर्तैश्च नांतमासीत् । किन्तु तैर्मम वेदनां परिहर्तुं न शक्यम् । तेषां निःसहायतां मम हठोऽत्वर्धयत् । वैद्यानां साहाय्यं मा भूत् । अहमौषधं न ग्रहीष्ये । मया कृतप्रमादस्य प्रायश्चित्तमनुभवितुं वरम् । इत्थं मयि हठवादिनि निरुपायाः पश्यंतस्तस्थुः । तस्मिश्चतुर्विंशतिहोरामितकाले त्रिंशद्वारं चत्वारिंशद्वारं वा मलेनोच्चरितेन भवितव्यम् । अहमुपवासमकार्षम् । प्रथमतः फलरसोऽपि न गृहीतः । बुभुक्षा संपूर्णमेव निवृत्ता । तावत्पर्यंतं मया मम शरीरं वज्रमिव दृढं भवतीत्यवगतम् । किंतु तदेवाद्य मृत्तिकापिंडमिवास्तीति मया दृष्टम् । तस्य सहनशक्तिरेव विनष्टासीत् । डॉ.कानूगामहाशय आगत्यौषधं सेव्यतामिति बहुधाब्रवीत् । मया संमतिर्न दत्ता । ' इंजेक्शन ' करोमीत्युवाच । तदपि मे न संमतम् । तत्कालं ' इंजेक्शन '-विषये ममाज्ञानं केवलं हास्यजनकमासीत् । ' इंजेक्शन ' अंतः यस्य कस्यापि प्राणिनो दुग्धेन भवितव्यमिति मया चिंतितमासीत् । अनेन वैद्येन सूचिते ' इंजेक्शन ' अंतः केवलं वृक्षनलिकाभिः सिद्धपदार्थ उपयोजयिष्यते स्मेति मया पश्चादवगतम् । परंत्वेतत्कालं तस्योपयोगायातीवविलंबः संवृत्तः । विरेचनं न व्यरमत् । एतेन मम केवलं निःशक्तिरुदभूत् । फलितं संनिपातज्वरः । मम सुहृदो भीताः । अन्ये केचिद्वैद्यानानिन्युः । किंत्वविधेयं रोगिणं प्राप्य किं वा कुर्यात् ॥

शेठअंबालालमहाशयस्तस्य भार्या च नडियादपत्तनमागत्य मम सहवासिभिरालोच्य महता जागरेण मां ' मिरजापुर 'स्थितस्वीय' बंगलो 'मंदिरं प्रापयामास । अस्यां रुग्णावस्थायां मम कृतसेवापेक्षयाधिकनिर्मलनिष्कामप्रेमपूरितशुश्रूषालाभो न कस्यापि साध्य आसीत् । किंत्वेकविधः स्वल्पज्वरो विरामं विना मम शरीरं कृशयन्नासीत् । चिरकालस्थायीदं जाड्यं कदाचिन्मरणांतं मां गमयेदिति प्रत्यभात् । शेठअंबालालमहाशयगृहे वर्षत्प्रेमादराणामपरिमितावपि मम मनस्यशांतिरुद्भूय मामाश्रमं प्रापयतेति तं निरबध्नाम् । ममाग्रहेणायं वशीकृतो मां तत्र निनाय॥

यदाहमाश्रमे बाधया शयने लुठन्नासं तदा श्रीवल्लभभाईमहाशयो ' जर्मनी 'देशः संपूर्णमेव पराजित इति वर्तमानमानिनाय । इतःपरं सैनिकसंग्रहो निवृत्त इति प्रांताधिकार्युक्तवानिति संदेशं मह्यं न्यवेदयत् । इतः परं योधसंग्रहो निवृत्त इति वृत्तांतो मम मनसो भारं बहुधावातारयत् ॥

अहमिदानीं जलचिकित्साप्रयोगं कुर्वन्नासम् । एतेन मम किंचिदुत्तमं संजातम् । तथापि शरीरदार्ढ्यं पुनः संपादयितुं कष्टसाध्यमासीत् । बहवो वैद्याः निःसंख्यानभिप्रायान् ददुः । किंतु न किंचिदप्यंगीकर्तुं मनसः संमतमासीत् । द्वाभ्यां त्रिभ्यां मया दुग्धस्याप्रतिग्रहणस्य प्रतिज्ञातत्वान्मां-

सस्य सारः सेवनीय इति सूचितम् । एतदाधारतयायुर्वेदग्रंथगताः श्लोकाः पठिताः । तेषामेकः कुक्कुट्यंडानि भक्षणीयानीति बहुशोऽब्रवीत् । किंतु सर्वेषामेषां प्रत्युत्तरमेकमेवासीन्नेति ॥

मयैतद्भोक्तव्यमेतन्न भोक्तव्यमिति विचारः शास्त्रप्रमाणेन निर्धारणीयो नासीत् । मम जीवनपथनिर्णायका नियमा बाह्यप्रमाणं नावलंबन्ते । अयं खाद्याखाद्यप्रश्नो मम जीवनपथेन मिलित आसीत् । ममांतरात्मनः प्रेरणां त्यक्त्वापि जीवितुमिच्छा मम नासीत् । मम भार्यापत्यमित्राणामुपरि नियममेकं निर्दाक्षिण्येन निक्षिप्य स्वयमेव तन्नियमधिक्कारः कथम् ॥

एवं रोगश्चिरकालमस्थात् । मम जीवन एष एव बहुदिनानि रोगेणार्तनादं कुर्वतो मम प्रथमो वारः । मम नियमान्परामृश्य परीक्षितुमनन्यमवकाशमकल्पयत् । एकस्यां रात्रावहं नैराश्येन गिलितोऽभवम् । अहं मृत्युसंमुखं स्थित इति मम प्रत्यभात् । तदा श्रीअनसूयाबाईमहाशया आह्वानिता । साश्रममागता । वल्लभभाईमहाशयो डॉ. कानूगामहाशयेन सहागतः । वैद्यो नाडीं दृष्ट्वा भवतो नाडी यथास्थिता भवति । चिंताया नास्त्यवकाशः । एतदत्यंतनिःशक्त्या प्राप्तमधैर्यमेव । नान्यत् किंचिदित्यब्रवीत् । किंत्वेतेन मम मनःशांतिर्नासीत् । तां रात्रिं निद्रां विनायापयम् ॥

प्रातःकाल आगतः । न तु प्राणा गताः । किंत्वंतः समीपमागत इति भावनां प्रहृत्य पलायनं कारयितुं न शक्यमासीत् । अतो यदा यदाहमुत्थितस्तदा तदा गीतापठनश्रवणेन कालो याप्यते स्म । अहं पठितुमशक्तः । भाषितुं नासीदिच्छा । अल्पस्वल्पभाषणेनापि मस्तिष्कं बाध्यते स्म । जीवन उत्साह एव नष्टः । केवलं श्वासोच्छ्वासेन जीवतीति प्रदर्शनं मम नेष्टम् । एवं न किंचित्कुर्वन्मित्राणां सहवासिनां च सेवां स्वीकुर्वाणः शरीरं शनैः शनैर्जीर्यदवलोकयन्निःसहायतया यज्जीवनं तत्तीव्रवेदनाजनकमासीत् ॥

मरणं केनचित्कालेनायास्यतीति निरीक्षमाणः शयितोऽहं यदा तदा डॉ. तलवलकरमहाशय किंचिद्विचित्रप्राणिनं सहानीयागतः । असौ महाराष्ट्रीयः । नायं प्रसिद्धः पुरुषः । किंतु तद्दर्शनमात्रेण सोऽप्यहमिव कश्चिदुन्मत्त इति दृष्टवान् । अयं स्वीयचिकित्सां ममोपरि प्रयोक्तुमागतः । असौ 'ग्रान्ट' वैद्यशालायां पाठक्रमं प्रायः समापितवान् । परंतूपाधिर्न गृहीतः । असौ ब्रह्मसमाजे प्रविष्ट इति पश्चादवगतम् । केल्करमहाशय इति तस्य नामातिस्वतंत्रवृत्तिर्हठवादी च । प्रत्येकमसौ स्वीयहिमपिंडशुश्रूषामग्रे स्थापयति । 'हिमपिंड' वैद्य इति तस्य नामास्माभिरवगतम् । सुशिक्षितवैद्यैरनालोकिताः कतिपयविषया आत्मनोपलब्धा इत्यस्ति दृढो विश्वासस्तस्य । तं विश्वासं मय्यपि रूढमूलं कर्तुमसौ न शक्त इत्येष उभयोर्दूरदृष्टविषयः । एकावधिपर्यंतं मम तच्चिकित्साक्रमेऽस्ति विश्वासः । किंतु कतिपयविषयाणां निर्धारेऽसावत्यातुरः प्रवृत्त इति मम शंका ॥

तेन परिशीलितविषयाणां गुणागुणास्तिष्ठन्तु नाम । स्वीयप्रयोगं मम शरीरोपरिकर्तुमवकाशमदाम् । बाह्यचिकित्सा मया नावहिता । शरीरस्योपरि सर्वतो हिमपिंडबंधनं सा तस्य चिकित्सा । स्वप्रयोगेण मम शरीरस्योपरि संजातः परिणाम इति सर्वं यद्यपि न संमतं तेन मयि नूतनाशांकुरिता

नवचैतन्यमप्युदियायेति मया संमंतव्यम्। प्रकृत्या मनसि जनितपरिवर्तनं न शरीरस्थितिः परिवर्तिता। मम बुभुक्षोत्पन्ना। पंच वा दश वा निमेषाच्छनैः शनैः परिक्रमितुं प्रवृत्तः। स इदानीं ममाहारे 'परिवृत्तिमसूचयत्। यथा भवतामान्यंडानि यदि सेव्यन्ते तदा तव देहस्याधिकपुष्टिर्जायते। ततो देहस्येतोऽपि शीघ्रं शक्तिरायाति। अंडमपि दुग्धवन्निर्दोषः पदार्थः। इदं मांसं न भवति। सर्वांडेभ्योऽपत्यानि न निर्गच्छन्तीति भवता किं न ज्ञातम्। एतादृङ्निर्बीजान्यंडानि पण्यवीथीषु लभ्यंत इति ॥

अहमीदृगंडान्यपि भक्षयितुं न सज्जस्थितः। किन्तु मम सार्वजनिककार्येषु कुतूहलं कर्तुं पर्याप्ता शरीरस्थितिरुत्तमा बभूव ॥

एकोनत्रिंशोऽध्यायः

'रोलेट'शासनमपि च मम धर्मसंकटम्

'**माथेरान**'**स्थलं** गत्वा देहस्वास्थ्यं शीघ्रमेव भविष्यतीति सुहृदो वैद्याश्च दार्ढ्येनाब्रुवन्। तस्मादहं तत्र गतः। किंतु तत्रत्यमुदकमतीवलवणमयमासीत्। अतो ममावस्थितिस्तत्र बहुकष्टतराभवत्। आमशंकाबाधया ममातनद्वारं बहुसूक्ष्मतया तत्र विदरवशान्मलविसर्जनकाले तीव्रयातना समभवत्। अत आहारजिघ्रहीषोर्भयमुत्पेदे। एकसप्ताहात्पूर्वमेव मया 'माथेरान' स्थानं परित्यज्य गंतव्यमापतितम्। अद्य: शंकरलालबेंकरमहाशयो ममारोग्यशिक्षणभारमुवाह। डॉ. दलालमहाशयस्याशयः प्रष्टव्य इति निरबध्नात्। तदनुसारेण डॉ. दलालमहाशय आहूतः समागतः। एकस्मिन्नेव क्षणे मनोनिर्धारणशक्तिस्तदीया मम मानसमाचकर्ष। व्रणस्य तत्क्षणमेव शस्त्रचिकित्सा कर्तव्येति स ऐच्छत्। तथास्त्वित्यहमुक्तवान्। मम प्रकोष्ठ एव तत्कर्तुं न कोऽप्यन्तरायासीत्। परेद्युरेव तत्संवृत्तम्। तेन पूर्णसाफल्यमप्यलभ्यत ॥

किंतु तावता तस्य तृप्तिर्नासीत्। दुग्धसेवनं विना भवतो देहस्थितिः पूर्ववन्न भविष्यतीत्यब्रवीत्। तेन सह शंखपाषाणस्य लोहस्य च 'सोमल' नामकौषधस्यांतःक्षेपणेन भवतः शरीरं सुदृढं भवतीति दृढप्रत्ययं ब्रवीमि इत्यसावब्रवीत् ॥

अंतक्षेपणं स्तावद्दीयताम्। परंतु दुग्धस्य विषयोऽन्यः। तन्न पास्यामीति प्रतिज्ञातं मयेति प्रत्युत्तरमदाम् ॥

भवत्प्रतिज्ञा कीदृशीति वैद्यः पप्रच्छ। तस्य तत्कथामशेषां मम प्रतिज्ञाकारणानि च न्यवेदयम्। दोहनकाले गोमहिषीणां चित्रहिंसां कुर्वन्तीति यदा ज्ञातं तदारभ्य दुग्धमसह्यमासीत्।

अधिकं च दुग्धं मनुष्यस्य सहज आहारो न भवतीत्यभिप्रेतत्वाद्दुग्धं मया संपूर्णमेव परित्यक्तमिति च मया विवृतमासीत्। तर्ह्यजाया दुग्धं पातुं भवतः कोऽप्यंतरायो न स्यादित्यब्रवीत् ॥

वैद्योऽप्येतदनुसृत्य भवताजादुग्धपानेनाप्यलम्। मत्कार्यं चलतीत्युवाच ॥

अहं पराजितः सत्याग्रहं युद्धं कर्तुमासक्तिर्मम जीवितुमाशामुदयत्। अतोऽहं प्रतिज्ञायाः सारभूतांशस्य तिलांजलिं प्रदाय तामक्षरशः पालयित्वा तृप्तोऽभवम्। यतो यदा मया प्रतिज्ञा कृता तदा मम मनसि गोमहिष्यः केवलमासन्। तथापि सहजार्थे इतरप्राणिनां दुग्धमपि मिलितमासीत्। तदपि मुक्त्वा दुग्धं मनुष्यस्य नैसर्गिकाहारो न भवतीति'यावदभिप्रायो वर्तते तावद्दुग्धसेवनं मम नासीद्धर्मः। यद्यप्येतत् सर्वं मे विदितं तथाप्यजाक्षीरपानाय संमतिर्दत्ता। जीवितुमाशा सत्योपासनां निरर्थकामकरोत्। सत्याग्रहयुद्धं करणीयमित्युत्सुकः सत्योपासक एकदा स्वीयादर्शस्य कलंकमानिनाय। एतत्कार्यस्य स्मरणमद्यापि मम हृदये निगूढं मम पश्चात्तापं जनयति। अजाक्षीरपरित्यागायोपायं सदालोचयामि। परंत्वद्यापि मां ग्रसमानसूक्ष्ममोहेन सेवा करणेच्छया नाहमद्यापि पारं गन्तुं शक्तः ॥

आहारविषये मम प्रयासाः मयांगीकृता हिंसातत्त्वशोधनकार्य एको भागो भवतीति मम प्रियाः सन्ति। तैरहं विनोदमानंदं च लभे। परंत्वद्य मयाजाक्षीरोपयोगोऽहिंसादृश्यापेक्षयाधिकं सत्यदृष्टया प्रतिज्ञाभंगदृष्ट्या तु मां बाधते। अहिंसातत्त्वादपि सम्यक्तरां सत्यस्यादर्शो ज्ञात इति प्रतिभाति। सत्यस्योपरितनग्रहणे मुक्ते सत्यहिंसामहमिमां न कदापि पूरयितुं शक्त इत्यनुभवः प्राह। प्रतिज्ञाः किल न केवलमक्षरशः परमार्थतश्च पूरणीया इति सत्योपासनाया नियमः। प्रकृतसंदर्भेऽहं मम प्रतिज्ञाया बाह्यरूपस्य केवलं मूल्यमास्थाय-तस्यात्मानमर्थं व्यनाशयम्। मम हृदयं तापयते तदेव। परंतु यद्यपि मे एतत्स्पष्टज्ञानमस्ति तथाप्यग्रेतनो मार्गो मम न दृश्यते। एवं चेत्प्रायशो मम समीचीनमार्गे गन्तुं न धैर्यमस्ति। तदुभयस्याप्यर्थः सम्यग्दृष्टयैक एव। यतः संशयस्यानन्यमूलोऽल्पश्रद्धाथवा श्रद्धाभावः। अतो भगवन्मम श्रद्धां देहीति रात्रिंदिवं मम प्रार्थना ॥

इतः शीघ्रमेव मयाजाक्षीरपानमुपक्रांतम्। डॉ. दलालमहाशयो ममोपरि छिद्रस्य चिकित्सां चकार। यदाहं स्वस्थोऽभवं तदा जीवितुमभिलाषः समुत्पन्नः। यतो भगवान् विशेषतो मम कार्यं निक्षिप्तवान् ॥

मम स्वास्थ्यप्राप्तेः काल एव वृत्तपत्रिकासु प्रकटीकृतं ‘रोलेट’समितेरावेदनमकस्मान्मम चक्षुरागतम्। तत्समितेः सूचनां दृष्ट्वाहं कंपितः। श्रीवल्लभभाईमहाशयः प्रायशः प्रतिदिनमागत्य मां दृष्ट्वा गच्छति स्म। अस्य मम भीतिसंशयान् व्यक्तीकृत्यास्य किमपि कर्तव्यमित्यवोचम्। आधुनिकपरिस्थितौ किमस्माभिः कर्तुं शक्यमित्यसौ पप्रच्छ। मया प्रत्युक्तं यथा – पर्यवस्थानकर्तारः स्वल्पा जना मिलिता अप्यलम्। इदमलक्षयित्वा समितेराशयानुरोधेन शासने निर्मिते सति

सत्याग्रहः करणीयः । अहमेवं रुग्णशयितो नाभवं यदि एक एव प्रत्यवस्थायेतरे च मामनुसरिष्यन्तीति निरीक्षमाणः स्थितः स्याम् । किंतु ममाधुनिकनिरुपायस्थितौ एतत्कार्यानुष्ठानाय मम शक्तिरेव नास्तीति प्रतिभातीति ॥

एतद्वादानुवादफलत्वेन मम परिचितैश्चतुःषष्टजनैर्युता सभाह्वातव्येति निर्धारितमासीत् । ‘रोलेट’समितेराख्यानेषु प्रकटीभूतसाक्ष्यमाश्रित्य समितेराशया न तिष्ठन्तीति ममाभिमतमासीत् । आत्मगौरवयुक्तो जनो न कोऽपि तदनुसर्तुं शक्यमिति मम प्रत्यभात् ॥

पर्यंते सभाश्रमे मिलिता । विंशतिजना अपि तत्र नाहूताः । यावदहं स्मरामि श्रीवल्लभभाई-महाशयं मुक्त्वा तत्रागता जनाः श्रीमतीसरोजिनीनाईडुमहाशया – होर्नीमनमहाशयो-दिवंगत-उमरसुबानी – श्रीशंकरलालबेंकरमहाशयोऽपि च श्रीअनसूयाबाईमहाशया बभूवुः । सत्याग्रह-प्रतिज्ञा सभायामेव सिद्धाभूत् ॥

तत्रत्यैः सर्वैरपि स्वस्वहस्ताक्षरी कृतं पत्रमिति मम स्मृतिरायाति । तदानीं मया न कापि पत्रिका चालयते स्म । तदा तदा दैनिकपत्रिकासु ममाभिप्रायाः प्रकाश्यन्ते स्म । इयं पद्धतिरद्याप्यंगीकृता । श्रीशंकरलालबेंकरमहाशयोऽस्मिन् संदर्भेऽत्यंतश्रद्धामुवाह । कार्यक्रमं सुव्यवस्थया सर्वदा कर्तुं तस्यासाधारणशक्तेर्ज्ञानं ममास्मिन्नेव संदर्भे प्रथमतः समुत्पन्नम् ॥

तात्कालिकी संस्था सत्याग्रहसदृशं नवीनमायुधमुपयोक्तुमंगीकरोतीत्याशा निराधारेति मम प्रत्यभात् । अतो मम सूचनामनुसृत्य सत्याग्रहसभेति प्रत्येकसंस्थैका स्थापिताभूत् । तस्याः प्रमुखसदस्या मोहमयीवर्तिन इत्यतस्तस्याः केंद्रं मोहमय्यामेव स्थितम् । प्रतिज्ञापत्रं बहवो जना हस्ताक्षरीकर्तुमुपक्रांताः । प्रसिद्धपत्रिका निरगुः । जनस्य सभा मिलिताः । सर्वमेतदालोक्य मम ‘ खेडा ’ संग्रामस्य सामान्यलक्षणानि सर्वाणि स्मृतिमायान्ति स्म ॥

अहं सत्याग्रहसभाया अध्यक्षोऽभवम् । एतत्सभावर्तिनां सुशिक्षितानां वर्गस्य मम चैकमत्यसंभवोऽत्यल्प इति मम शीघ्रमेव विदितमासीत् । सभाकूटेषु गुजरातीभाषया वक्तव्यमिति मम हठो विचित्रं दृश्यमान इतरकार्यपद्धतयश्च तानविशेषतश्चिंतायामाकुलत्वे च पातयामासुः । परंतु त औदार्येण मम वैपरीत्यानि सेहिरे इति मया संमंतव्यम् ॥

तथापि सभा बहुकालं न जीवेदिति प्रथमतः स्पष्टं प्रतिभाति स्म । सत्याहिंसानां प्राधान्यं मया प्रतिपाद्यमतं तदानीमेव कतिपयानामप्रियमित्येतन्मम दृष्टिमागतम् । एवं स्थितेऽपि प्रारंभेऽस्मत्कार्यमतिरभसेन प्रबलं बभूव ॥

Funding by IKS-MoE

त्रिंशोऽध्यायः

अद्भुतदृश्यम्

एकतो ‘रोलेट’ आख्यानस्य विरुद्धआंदोलने परिमाणे तीक्ष्णत्वे च विद्यमाने सत्यन्यतो राज्याधिकारः समितेः सूचनाः प्रचारमानेतुमधिकं हठमाददे। ‘रोलेट’ शासनं प्रकाशितम्। भरतखंडस्य शासनसभाकार्यकलापमहमेकत्रारमेव मम जीवनकाले दृष्टवान्। एतच्छासनमधिकृत्य चर्चा यदाभूत्तदा श्रीशास्त्रीमहाशय आवेशपूरितं भाषणं कुर्वन् राज्याधिकारस्य पूर्वप्रबोधं ददौ। तस्योष्णवाग्धारायां प्रवहन्त्यां राजप्रतिनिधिः पूर्णद्रष्ट्या तं पश्यन्ननन्यमनस्कतया शृण्वन्निव प्रत्यभात्। एतद्भाषणेन राजप्रतिनिधेर्मनसि गंभीरपरिणामो भवत्येव नान्यथेति तदात्वे प्रत्यभात्। तत्तावत्सत्यमुद्वेगपूर्णं चासीत्॥

परंतु सत्यमेव निद्रितमुद्बोधयितुं साध्यम्। निद्राण इव छलं करोति चेत्सर्वोऽपि प्रयत्नो निष्फलः। राज्याधिकारस्य परिस्थितिरप्येतादृशी बभूव। शासनस्य नियमाननुसृत्य नाटकविधानमात्रे स आतुर आसीत्। अग्रेतनकार्यं पूर्वमेव निर्धार्य स्थापितम्। अतः शास्त्रिणः पूर्वप्रबोधो राज्याधिकारस्योपरि केवलं व्यर्थो बभूव॥

ईदृक् संदर्भे मम वाक्यमरण्यक्रंदनमेव नान्यत्। अहं राजप्रतिनिधिं दृष्ट्वा तादृशमार्गो नावलंबनीय इति बहुधा प्रार्थितवान्। तस्य स्वयं च वृत्तपत्रिकाद्वारा च पत्रमलिखम्। राज्याधिकारस्य कार्यक्रमेण मम सत्याग्रहमेकं विना मार्गांतरनिरुद्धमिति स्पष्टमकार्षम्। किंतु तत्सर्वं निरर्थकमासीत्॥

शासनं राजकीयपुस्तिकान्तोऽद्यापि शासनत्वेन न प्रकाशितमासीत्। मम शरीरमतीव दुर्बलं स्थितम्। तथापि मम मद्रासपत्तनादाह्वानं यदायात् तदा दूरप्रयाणं कर्तुं निरचैषम्। सभासु भाषणाय पर्याप्तमुच्चैः स्वरारोहणं तदा मम न साध्यमासीत्। स्थित्वा सभासु भाषणं ममाद्यापि न शक्यमस्ति। अधिककालं स्थित्वा भाषमाणस्य शरीरमखिलं कंपमानं हृदयं च बलवत् स्फुरितुमारभते स्म॥

दक्षिणदेशं प्राप्तस्य तत्राहं बाह्य इति न कदाप्यदृश्यत। मया दक्षिणाफ्रिकायां कृतकार्येण तामिलतेलगुजनस्योपरि विशिष्टाधिकार आसीदिति मम प्रतिभाति स्म। दाक्षिणात्याः सज्जना मम भावनामेवासत्यां नाकार्षुः। आमंत्रणं दिवंगतकस्तुरी–रंगा–आयंगरमहाशयस्य नाम्नागतम्। परंत्वस्य पश्चादवस्थितः श्रीराजगोपालाचार्य इति मम ‘मद्रास’नगरप्रयाणमार्गे विदितमासीत्। एष एवमेतैः सह प्रथमः परिचय इति वक्तुं शक्यम्। तदास्तां तावत्। व्यक्तिशः परिसृतज्ञानमिदं प्रथममेव॥

दिवंगतकस्तुरी-रंगा-आयंगरमहाशय प्रभृति मित्राणां बलोद्बंधाद्राजगोपालाचार्यः स्वल्पकालात्पूर्वं 'सेलम' स्थानं विहाय मद्रासपत्तने व्यवहर्तुं गतः। सार्वजनिककार्येऽधिकभागवहनं तस्य उद्देश आसीत् । अस्यातिथयो भूत्वा वयं मद्रासनगरे स्थिताः । परंत्वेकद्विदिवसानंतरमेव ममायं विषयोऽभिज्ञातः । अस्माभिरवतीर्णं 'बंगलो' मंदिरं दिवंगतकस्तुरी-रंगा-आयंगरमहाशयस्यासीत् । अत आतिथ्यमपि तदीयमेवेत्यहमज्ञासिषम् । महादेवदेसाईमहाशय एतत् स्खलितं समीचकार । अयं स्वल्पेनैव कालेन राजगोपालाचार्यमहाशयेन गाढपरिचयं प्राप । पश्चादवस्थानं राजगोपालाचार्यस्य स्वभावः । परंतु महादेवदेसाईमहाशयो मां 'प्रत्यादिश्यास्य परिचयो भवता कार्य इत्येकस्मिन्दिने बभाषे ॥

अहं तथैवाकार्षम् । वयं राज्याधिकारेण सह कलहप्रसंगविषये प्रतिदिनं चर्चामकरवाम । परंतु सार्वजनिकसभाश्चालयितुं ममान्यः कोऽपि कार्यक्रमो नास्फुरत् । 'रोलेट'शासनाख्याने शासनत्वे न कृते सति तदग्रे स्थित्वा सविनयभंगः कथं कर्तव्य इति न मे प्रत्यभात् । किं वयमन्यशासनानां सविनयभंगं चालयेम । एवं चेदस्यावधिः कः । एतेऽपि चैतत्सदृशा बहवः प्रश्ना अस्माकं चर्चासामग्रियोऽभवन् ॥

एतद्विषयमालोचयितुं दिवंगतकस्तुरी–रंगा–आयंगरमहाशयः प्रमुखानां सभामल्पां संजग्राह । एतेषां प्रमुखभागवहतां विजयराघवाचार्य एकः । सत्याग्रहशास्त्रसंबद्धान् सूक्ष्मानपि विवरान् परित्यज्य सर्वविषयांतर्भावितो ग्रंथ एको विरचनीय इत्ययं सूचयामास । एतन्मम योग्यतामतिक्रांतं कार्यमिति मम प्रत्यभात् । इत्थमहं तस्योक्तवानपि ॥

एवं रीत्या मनोमथने चलति सति 'रोलेट' आख्यानं शासनत्वेनांगीकृत्य राजकीयूपुस्तिकायां प्रकाशित इति वृत्तांत आगतः । तद्रात्रौ प्रश्नमेतमालोचयन्निद्रावशं गतः । प्रातः पूर्वहोरास्वन्यदिनापेक्षया किंचित्पूर्वमेव जागरित आसम् । अहं निद्राजागरयोर्मध्येऽर्धज्ञानदशायामासम् । तदा मे मनस्यकस्मादेको विचारः' स्फुरितः । एतत्स्वप्ने प्रवृत्तमिव प्रत्यभात् । प्रातः राजगोपालाचार्यस्य सर्वामेतां कथामब्रुवम् ॥

सर्वस्मिन्देशे 'हडताला'ख्यः कार्यविरामः कर्तव्य इति भरतखंडस्य वक्तव्यः । अयं विचारो मम रात्रौ स्वप्नेऽस्फुरत् । सत्याग्रह आत्मशुद्धेः कार्यम् । अस्मदीयः कलहः पवित्रः । कलहमेतमात्मशुद्धिकार्यात्प्रारभ्य वर्तितुं केवलमुचितम् । अतो भरतखंडस्य सर्वे जनास्तस्मिन्दिने कार्यमशेषं परित्यज्योपवासं कृत्वा तद्दिनं 'प्रार्थनायां यापयन्तु । मुसलमाना दिनादधिकं नोपवासं कुर्वन्ति । सर्वैरपि चतुर्विंशतिहोरापर्यंतमात्रमुपवासः क्रियेत । सर्वे प्रांताः अस्माकमाशयाननुरुध्नन्ति :न वेति वक्तुमतीवाशक्यम् । परंतु मोहमयी–मद्रास–बिहारेष्वपि च सिंधप्रांतेषु मम विश्वासोऽस्ति । एतेषु सर्वेषु भागेषु 'हडताल 'आख्यः कार्यविरामो योग्यरीत्या चरन्ति चेत्तदप्यस्माकं तृप्तेः कारणमिति प्रतिभाति ॥

इयं सूचना राजगोपालाचार्यस्य मनसि तत्क्षणमेव निरूढासीत् । अतोऽस्मिन्नितरमित्रेषु निवेद्यमानेषु तेऽपि संतोषेण संमेनिरे । अहं संक्षेपेण विज्ञापनपत्रिकामलिखम् । एकोनविंशत्यधिकनवशतोत्तरैकसहस्रमिते वत्सरे ‘ मार्च ’मासस्य त्रिंशे दिने ‘ हडताल ’आख्यः कार्यविराम आचरणीय इति निश्चितमासीत् । परंतु तत एप्रिलमासस्य षष्ठे दि्ने इति परिवर्तितम् ॥

एवं जनानामस्य वृत्तांत आचरणस्य स्वल्पकालात्पूर्वमेवाज्ञायत । कार्यस्य तत्क्षणमेवारंभणीयत्वाज्जनानामितोऽपि दीर्घतरकालो न प्रादायि ॥

परंतु तत्सर्वमाचरितमिति वक्तारः के । एकांतादपरांतपर्यतं हिंदुस्थानं सर्वं ग्रामाः पत्तनानि च संपूर्णं ‘हडताल’आख्यः कार्यविराममाचरन् । तद्दिनस्य दृश्यमद्भुतमासीत् ॥

एकत्रिंशोऽध्यायः

स्मरणीयः सप्ताहः (१)

दक्षिणभारते स्वल्पकालं संचर्याहं मोहमयीपत्तनं प्राप्तः । तद्दिनं एप्रिलमासस्य चतुर्थो दिन इति स्मरामि । मया एप्रिलमासस्य षष्ठदिनस्य कार्यक्रमे भागिना भवितव्यमिति शंकरलालबेंकरमहाशयसकाशात्तंत्रीवृत्तान्त आगतः । परंत्वेतदंतरे ‘ मार्च ’मासस्य त्रिंशे दिने दिल्हीनगरे ‘ हडताल ’आख्यः कार्यविराम आचरित आसीत्। तत्र दिवंगतस्वामीश्रद्धानंदस्यापि च दिवंगतहकीम–अजमलखानसाहेबमहाशयस्य वाक्यं वेदवाक्यमासीत् । ‘हडताल’ ‘ एप्रिल ’मासस्य षष्ठदिनपर्यंतं विलंबनीयमिति तंत्रीवृत्तांतस्ताभ्यां समये न प्राप्तः । दिल्हीनगरे तादृशः ‘ हडताल ’आख्यः कार्यविरामो न दृष्टपूर्वः । हिंदवो मुसलमानाश्च एकपुरुषवन्मिलिताः । ‘ जुम्मा मस्जिदे ’भाषणं कर्तव्यमिति श्रद्धानंद आहूतः सन् स तथैवाकार्षीत् । सर्वमेतद्राज्याधिकारस्य सहनशक्तिमतिक्रांतमासीत् । ‘ हडताल ’आख्यः कार्यविरामस्य जनयात्रा यदा अग्निरथविरामस्थानात् पार्श्वं गच्छति स्म तदा ‘ पोलीस ’जनस्तां स्थापयित्वा तां प्रति गुलिकाक्षेपमकार्षीत् । बहवः क्षतं प्राप्ताः । कतिपयाः प्राणान् जह्वुः । दिल्हीनगर अत्याचारसाम्राज्यं प्रारभत । श्रद्धानंदो मया तत्क्षणमेव दिल्हीनगरं प्रत्यागंतव्यमिति तंत्रीवृत्तं प्राहिणोत्। मोहमयीपत्तने एप्रिल ६ दिनस्य कार्यसमाप्तेरनंतरमागमिष्यामीति प्रत्युत्तरमलिखम् ॥

दिल्हीनगरे प्रसक्ता कथैव प्रायः लाहोरपत्तनेऽमृतसरपत्तनेऽपि प्रवृत्ता । मयामृतसरं गंतव्यमिति डॉ.सत्यपाल–डा.कीचलुमहाशयश्चाभ्यामाग्रहपूर्वकमाह्वानं प्रेषितं यद्यपि मे

तदा तत्परिचय एव नासीत् । तथापि दिल्हीनगरगमनानंतरममृतसरनगरमागमिष्यामीति ममोद्देशं ताभ्यां न्यवेदयम् ॥

एप्रिलमासस्य षष्ठदिने प्रातः मोहमय्याः परःसहस्रप्रजा ‘चोपाटी’स्थाने समुद्रस्नानार्थं मिलिताः । स्नानानंतरं मिलित्वा ते ‘माधवबाग’दिशा यात्रां चक्रुः । यात्रायां स्त्रियः शिशवश्च बभूवुः । अनेके मुसलमानाश्चासन् । मुसलमानमित्राणि यात्रामिलितान् कतिपया‘न्माधवबाग’समीपवर्तिमस्जिदं नीत्वा श्रीसरोजिनीदेव्या मम च भाषणं कारयामासुः । विठलदासजेराजाणीमहाशयस्तत्र तत्क्षणमेव ‘स्वदेशी’ प्रतिज्ञां हिंदुमुसलमानानामैक्यप्रतिज्ञां च कारयितुं सूचनामदात् । किंत्वहं न केनापि प्रतिज्ञा अत्यवसरे कार्या अद्य क्रियमाणप्रतिज्ञानिर्बहणेनैव तृप्तैर्भवितव्यमिति सूचनां प्रत्यादिशम् । एकदा कृतप्रतिज्ञाया नैव भंगं कुर्यात् । अतः स्वदेशीप्रतिज्ञाया इंगितपरिणामः के जाता इत्यवगन्तुमावश्यकं भवति । हिंदुमुसलमानानामैक्यताप्रतिज्ञाया निगूढस्य महत्तरस्य पर्यावर्तनस्य सर्वैरर्थो ग्राह्यः । इत्यहं वादमकार्षम् । पर्यंते प्रतिज्ञाधारणं चिकीर्षुभिः सर्वैरपि तदुद्देशतः परेद्युः प्रातः पुनः संमेलर्नीयं इत्यसूचयम् ॥

मोहमय्यां ‘हडताल’आख्यः कार्यविरामो निरतिशयेन प्रवृत्त इति वक्तुमेव नावश्यकम् । सविनयशासनभंगं कर्तुं सर्वं सज्जीकृतमासीत् । एतत्संबंधे द्वित्रान् विचारानधिकृत्य चर्चा कृता । जनसामान्येनाभिमुखीभवितुं सुलभसाध्यानां साधनमेव केवलं सविनयभंगः समाचरणीय इति निश्चितम् । लवणस्योपरि करो लोकानामप्रिय आसीत् । एतमपसारयितुं कियता कालेन जनक्षोभः प्रचंडो भवति स्म । तस्माल्लवणशासनानां विरोधेनापि जनाः समुद्रजलेन स्वगृहेष्वेव लवणं सज्जीकुर्यादित्यहमसूचयम् । मम द्वितीया सूचना राज्याधिकारेण बहिष्कृत पुस्तके ‘हिंदी स्वराज्य’ ‘सर्वोदय’ (रस्किन् कवेः Unto The Last इति ग्रंथस्य गुजरातीभाषयानुवादः) एतदुद्देशानुकूलमेव प्राप्ता । ते मुद्राप्य सर्वेषामग्रतः विक्रयणमेव सविनयशासनभंगस्यात्यन्तसुलभो मार्ग इति प्रत्यभात् । अत एते पुस्तके पर्याप्ते मुद्राप्य तत्सायमुपवासानंतरं प्रवर्तमानप्रचंडसार्वजनिकसभया ते विक्रेतुं परिपाटिर्व्यधीयत ॥

एतदनुसृत्य एप्रिलमासस्य षष्ठदिनस्य सायंकाले स्वयंसेवकानामेकं सैन्यमेवैते बहिष्कृते पुस्तके जनानां विक्रेतुमानिनाय । श्रीसरोजिनीदेवी अहं च महात्वरया तेषु प्रस्थितौ । सर्वाःप्रतिलिपयः शीघ्रमेव विक्रीताः । एतद्विक्रयागतद्रव्यं सविनयभंगसमरव्ययार्थ उपयोक्तव्यमिति निश्चितम् । एतत् पुस्तकद्वयस्य प्रतिलिपेरेकस्याश्चतुराणका मूल्यम् । इति निश्चितमपि तन्मूल्येनैव विक्रेतारो न मया स्मर्यन्ते । बहवो जना एकप्रतिलिपेरर्थे कंचुककोशांतःस्थितमखिलद्रव्यं बहिर्ददुः । एकप्रतिलिपेरर्थे पंचरूप्यकाणां दशरूप्यकाणां च ‘नोट’ पत्राण्यागतानि । एतदंतर एका प्रतिलिपिः पंचाशद्रूप्यकैर्विक्रीता इत्यहं स्मरामि । एषां बहिष्कृत-

पुस्तकानां क्रयणेन दंड आसेधश्च भवेदिति यथा रीत्या जनानां विवृतमासीत् । परंतु तत्कालं कारागृहभीतिः सर्वेषां नष्टा बभूव ॥

राज्याधिकारेण बहिष्कृतपुस्तकयोः विक्रयःएव नासीत् । विक्रीतपुस्तके बहिष्कृतपुस्तके इति वक्तुं न शक्यते । एतदर्थे राज्याधिकारिणः टीकां स्वानुकूलामकुर्वन्निति पश्चादवगतम् । पुस्तकानां पुनर्मुद्रणात्तानि बहिष्कृतपुस्तकानां नूतनावृत्तयो भूत्वा तेषां विक्रयः शासनानुरोधेनापराधो न भवतीति राज्याधिकारस्याभिप्राय आसीत् । अयं वृत्तांतो जनानामाशाभंग आसीत् ॥

परेद्युः प्राप्तः स्वदेशीयानां हिंदुमुसलमानानामैक्यमधिकृत्य प्रतिज्ञाधारणाय सभा मिलिता । विठलदासजेराजाणीमहाशयस्य यद्यद्बलं तद्दुग्धं न भवतीत्यनुभवोऽद्य प्रथमवारं समभूत् । स्वल्पो जन उपस्थितः । तत्रागतचतुःषट्सहोदरीणां कतिपयाः स्पष्टं मे स्मृतौ वर्तते । तत्र मिलितानां पुरुषाणां संख्याप्यत्यल्पा । प्रतिज्ञा तावल्लिखित्वा मया सभामानीता । तत्रत्यैर्जनैस्तद्धारणात्पूर्वं तदर्थः सर्वोऽपि विवृतः । तत्र बह्वल्पका जना स्थिता इति मम दुःखं वाश्चर्यं वा नासीत् । यतो जनसामान्यस्य वर्तने मयायं सहजो व्यत्यासो दृष्टः । अग्रेतनकार्ये पक्षपातो मौनेन कर्तव्यरचनात्मककार्येऽस्तीत्येतदंतरमेतद्दिनपर्यंतं तिष्ठति ॥

परंत्वेतद्विषयमधिकृत्यैक अध्याय एव लेखनीयो भवति । कथाया अग्रतश्च लाभः । एप्रिलमासस्य सप्तमदिनरात्रौ दिल्हीनगरममृतसरनगरं च प्रस्थितः । एप्रिलमासस्य सप्तदिने मथुरां प्राप्तेनमया ममासेधं कुर्युरिति सूचना ज्ञाताभवत् । मथुराया अग्रेतनस्थाने आचार्य–गिडवाणीमहाशयो मां दृष्टुमागतः । ममासेधः सत्य इति निवेद्यावश्यके सति मम सेवा स्वीकार्येत्यब्रवीत् । अस्याहं तमभिनंद्यावश्यके सति तथा करिष्यामीत्यवोचम् ॥

मया पंजावप्रांतं प्रविष्टे तत्र प्रजशांतिभंगप्राप्तेः संभवस्य विद्यमानत्वात्पंजाब्रदेशस्यावधिर्नातिक्रमितव्य इति लोहशकट्या 'पलवल' नामकमग्निरथविरामस्थानप्राप्तेः पूर्वमेव मह्यं लिखितामाज्ञां ददुः । शकट्यावतरीतव्यमित्यूचुः । निश्चितमेवागंतव्यमित्यहं पंजाब्रदेशमागंतुमाहूतः । ततोऽहं तत्र गंतुमिच्छामि । मया तत्र गमनं शांतिभंगाय न परं शांतिस्थापनाय । अतो युष्मदाज्ञामनुसर्तुमहं न शक्नोमीत्युक्त्वा शकट्या नावतीर्णः ॥

पर्यंते बाष्पसंचालितशकटी 'पलवल'नामकमग्निरथविरामस्थानं प्राप । महादेवदेसाईमहाशयो मया सह स्थितः । इतः प्रवृत्तवृत्तान्तं स्वामिश्रद्धानंदाय निवेद्य जनानां शांता भवतेति वक्तुमहं तं दिल्हीपत्तनं प्राहैषम् । मया दत्तामाज्ञामुल्लंघ्य तत्फलरूपो दण्डोऽनुभवितव्य इति कस्मान्निर्धारितमिति यादृक् तादृगपि दण्डं मे ददतु वयं चेत्पूर्णशांत्या स्थितास्तदास्माकं जयो भविष्यतीति च तेन विवरणीयमासीत् ॥

'पलवल'स्थाने मां बाष्पसंचालितशकट्या अवतार्य सैनिकवशे ददुः । अचिरादेव दिल्हीनगरतः बाष्पसंचालितशकट्यागता । तत्र मां तृतीयश्रेण्यामंतरुपावेशयन् । सैनिकवर्गः

मया सहैव स्थितः । मथुरां प्राप्य मां सैनिकशिबिरं निन्युः । परंतु किंकर्तव्यमिति वा कुत्र नेतव्योऽहमिति वा न कोऽप्यअधिकारी वक्तुं समर्थ आसीत् । परेद्युः प्रातश्चतुर्वादनसमये मामुत्थाप्य मोहमयीगामिवस्तुपूर्णशकट्यामंतर्मां निन्युः । मध्याह्ने मां सवाईमाधवपुरे पुनरवतारयामासुः । लाहोरपत्तनात् पत्रवाहकशकट्या आगतोऽधिकारी ‘बौरिंग’महाशयो मां स्ववशे स्थापयामास । तेन सह मां प्रथमश्रेण्यां शकट्यामुपावेशयत् । सामान्यो बंदिरहं ‘जेंटलमेन’बंदी संवृत्तः । सोऽधिकारी सरमाइकलओडवायरमहाशयस्य दीर्घस्तुतिपाठमारभत । तेनोक्तं यथा सरमाइकलमहाशयस्य वैयक्तिकतया भवदुपरि न कोऽपि द्वेषोऽस्ति । भवता ‘पंजाब’देशे पदं न्यस्यते चेत्तत्र शांतिभंगो भवेदिति शंकते तावदेवेति । पर्यंते मया स्वयमेव मोहमयीं प्रतिनिवर्तितव्यं ‘पंजाब’देशावधिं नातिक्रमामीति संमंतव्यमिति मामूचुः । मम दत्ताज्ञाप्रकारेणाचरितुं न साध्यं निवर्तितुमहं सिद्धो नासमित्युक्तवान् । सोऽधिकारी प्रोवाच यथान्यो मार्गो न विद्यते । भवदुपरि शासनानुरोधेन कार्यक्रमः स्वीकार्यो भवतीति । किंतु मया न किमन्यत् कर्तुमिच्छितीति पृष्टः सोऽब्रवीद्यथा न जाने । उपरितनाधिकारिणामाज्ञां निरीक्षे । सद्यो भवन्तं मोहमयीं नेष्यामीति ॥

एवं वयं सुरतनगरं प्राप्ताः । अत्र मामन्यस्य कस्यचिदधिकारिणो वशे ददुः । मोहमयीं प्राप्यानंतरं भवेदिदानीं स्वतंत्रः । तथापि मरीनलाइन्सनामकाग्निरथविरामस्थानस्य पार्श्वेऽवतरीतुं वरम् । तत्राहं भवदर्थें बाष्पसंचालितशकटीं स्थापयिष्यामि । ‘कोलाबा’स्थले जनसमूहो मिलित इति संभवो दृश्यते इत्यूचुः । भवदिष्टप्रकारेण वर्तितुं संमतिर्ममेति न्यवेदयम् । अनेनायं संतुष्टो मामवदन्त् । तदुक्तप्रकारेणाहं मरीनलाइन्सस्थलेऽवतीर्णः । मम मित्रस्यैकः शकटस्तत्र गच्छति स्म । स मां रेवाशंकरजवेरीमहाशयस्य मंदिरं निनाय । मदासेधवृत्तांतमाकर्ण्य जना अतिक्रुद्धा आसन् । स क्रोधस्तेषामुन्मादमजनयदिति मह्यं न्यवेदयन् । ‘पायधूनी’ स्थल समीपे यत्र क्वापि क्षणे जनक्षोभो निरीक्ष्यते । न्यायाधिकारी सैनिकाश्च तत्र गता इत्यवोचत ॥

यावदहं गृहं प्राप्तस्तावदेव उमरसोबानीमहाशयो अनसूयाबाईमहाशया चागत्यैतत्क्षणमेव भवता ‘मोटर’ यानेन पायधूनीस्थलं प्रति गंतव्यमित्यवोचताम् । जनाः क्षमामतीताः । अतीवाशांता भवन्ति । अस्माभिस्तान्समाधातुमशक्यम् । भवानेव समर्थ इत्यवोचताम् ॥

अहं ‘मोटर’यान उपविष्टः । पायधूनीस्थलपार्श्वे महान् जनसमूहः स्थित इत्यपश्यम् । मद्दर्शनादेव लोका आनंदेनोन्मत्ता इव । तत्क्षणमेव जनैः मिलित्वा “वंदे मातरम्” “अल्ला हो अकबर” इति ध्वनिना गगनं विदीर्णमिवासीत् । पायधूनीस्थल अश्वारूढाः सैनिका दृष्टाः । उपरिष्टादिष्टिकाखंडानां वृष्टिः पतति स्म । शांतैर्भवितव्यमिति प्रार्थितास्तथापि मृत्तिकाखंडवृष्टिः परिहर्तुं न शक्येव प्रत्यभात् ॥

जनयात्रा ‘ अब्दुलरहेमान ’वीथिनागत्य ‘ क्रॉफडमार्केट ’दिशा यदा संचलति तावदेवाकस्मात् अश्वारोहिणोऽभिमुखीभूय स्थिताः। जनयात्रा इतोऽग्रतो दुर्गपार्श्वं यथा न गच्छेत्तथाकर्तुमागतास्ते। जना निर्विवरतया सांद्रमेव स्थिताः। सैनिकजनानां पंक्तिविच्छेद आसीत्। अस्मिञ्जनसमूहे मम ध्वनिर्न श्राव्य इति वक्तुं, शक्यम्। तावदंतरे अश्वारोहिणामाज्ञां दत्तवान् मुख्याधिकारी जनान् विद्रावयतेति। तत्क्षणमेवाश्वारोहास्तोमरान् भ्रामयंतो जनमध्ये महावेगेन पतिताः। अहमपि क्षतो भवेयमिति क्षणमात्रं मे प्रत्यभात्। परंत्वियं भीतिर्निर्मूलाभवत्। अश्वारोहिषु महावेगेन पतत्सु जनसमूहो भग्नः। क्षोभे प्रवृत्ते जनाः पलायितुमारब्धाः। कतिपयाः पादैस्ताडिताः पतिताः। कतिपयानां शरीरं क्षतमासीत्। तस्मिञ्जनसमूहेऽश्वानां परिचलनाय नैव स्थलमासीत्। जनान् विद्रावयितुमपि नासीन्मार्गः। अतोऽश्वारोहा नेत्रे निमील्य जनमध्ये मार्गमाक्रम्य गताः। स्वेषां वचनाख्यानं किमिति ते व्यजानन्तेत्यभ्यूहितुमपि न शक्यम्। सर्वमेतन्मिलित्वात्यंतभयानकदृश्यमासीत्। अश्वारोहा जनाश्चोन्मत्तक्षोभे मिश्रिता बभूवुः ॥

एवं जना विद्राविताः। अग्रे प्रक्रमितुमासक्ता निरुद्धाः। ‘मोटर’यानस्य गंतुमवकाशं ददुः। अहं तत् ‘कमिशनर कचेरि ’स्थानस्याग्रे विहाय तस्य सैनिकजनस्य वर्तनविचारं वक्तुं तत्रावतीर्णः ॥

द्वात्रिंशोऽध्यायः

स्मरणीयः सप्ताहः (२)

अहं ‘कमिशनर ग्रिफिथ’महाशयस्य कचेरीं गतः। तत्र गंतव्यपदेषु सर्वत्र युद्धायेवापादमस्तकं शस्त्रसज्जितान् तान्सैनिकानद्राक्षम्। वेदिकोद्दीपितेवासीत्। यदाहं कचेरीं प्रवेशितस्तदा तत्र ग्रिफिथमहाशयस्य निकटोपविष्टं बोरिंगमहाशयमपश्यम् ॥

मन्नेत्रपतितानि सर्वाणि दृश्यानि ‘कमिशनर ’महाशयस्यावर्णयम्। तेन संक्षेपतः प्रोक्तं यथा यदि जनयात्री दुर्गं गच्छेत्तदा जनक्षोभः सत्यमेव भविष्यतीति ज्ञात्वा तस्यास्तत्र गमनं नाहमैच्छम्। जनाः सद्वचनं न शृण्वन्तीति मम व्यक्तमासीत्। अतः अश्वारोहिणो जनोपर्याभिधायितुमाज्ञा दत्ता। नासीत्खल्वपरो मार्ग इति ॥

मयोक्तं यथा किंत्वस्य फलं किं भविष्यतीति युष्माकं विदितमासीत्किल। अश्वाः कथं जनान् न मर्दयेयुः। अश्वारोहिणस्तत्र प्रेषयितुमावश्यकमेव नासीदिति मम प्रतिभाति ॥

ततः ग्रिफिथमहाशयेनोक्तं यथा–तन्निश्चयेनाख्यातुमशक्यम् । भवदुपन्यासेन संवर्तमानः परिणामो ज्ञायतेऽस्माभिरधिकारिभिः । प्रथमत एव कठोरसंविधानानि न क्रियन्ते चेदग्रेतना परिस्थितिः परवशा जायते । जना युष्मद्वशा न तिष्ठन्तीति निश्चितं ब्रवीमि । शासनं प्रतिभटीकर्तु शीघ्रमेव जानन्ति । शांता भवितुमस्मत्कर्तव्यमिति न जानीयुः । भवदुद्देशानां विषये मम न कोऽपि संशयो विद्यते । जनास्ताननवगत्य स्वीयां सहजां बुद्धिमनुसरन्तीति ।।

प्रत्युक्तं मया यथा–दृश्यताम् । अत्रैवावयोरस्ति मतभेदः । जनाः स्वभावतः शांता न पुनर्हिंसापरा इति ।।

एवं चिरकालं चर्चामकरवाव । पर्यन्ते ग्रिफिथमहाशयः पप्रच्छ यथा–भवदुपन्यासो जनोपरि सर्वो व्यर्थो भवतीति चेद्दृष्टं तदा किं भवान् करिष्यतीति ।।

तथा यदि स्पष्टं मे प्रतिभाति तदा सविनयशासनभंगं निरोत्स्यामि । तस्यार्थः कः । भवान् विमोचितक्षणमेव पंजाबं प्रस्थास्यत इति बोरिंगमहाशयस्यावोचत् ।।

सत्यम् । प्रथमबाष्पसंचालितशकटेनैव प्रयाणं कर्तव्यमित्यालोचितम् । किंत्वेतस्मिन् दिने तन्न शक्यम् ।।

यदि भवान् क्षमावानास्ते तर्ह्ययं विनयो भवता दृश्यत एव । अद्याहं अमदाबादनगरे किं भवतीति किं भवान् जानात्यमृतसरनगरे वा । सर्वत्र जनानामुन्मादः संवृत्तः । वस्तुतो मम सर्वो विषयो न विदितः । कतिपयस्थलेषु वृत्तांतवाहिनी तंत्री विच्छिन्ना । एषां सर्वक्षोभाणां पर्यनुयोज्यता भवत एवेति ब्रवीमि ।।

यत्र यत्र मया तथा दृश्यते तत्र तत्राहं सिद्धः संमन्ये । मा भूदत्र संशयः । किंत्वमदाबादनगरे प्रवृत्तः क्षोभ इत्येतत्सत्यं चेत्तन्म आश्चर्यं व्यथां च जनयति । अमृतसरनगरविषये वक्तुं न शक्यम् । तत्राहं न गतः । न किंचित्तत्र जानामि । किंतु 'पंजाब,'विषये सम्यक् ज्ञातम् । यदि तत्रत्या राज्याधिकारिणो मम तत्र प्रवेशं न न्यरोत्स्यंस्तदा तत्रत्यां परिस्थितिं शांतां कर्तुमधिकं साहाय्यमभविष्यत् । मां निरुध्य जनानां अनावश्यकतया क्रोधोदीपिनं चक्रुः ।।

एवं रीत्यावयोश्चर्चा भवति स्म । द्वयोरेकमतं न शक्यमासीत् । मया चोपाटीस्थले भाषणं कृत्वा शांतैर्युष्माभिर्भवितव्यमिति वक्तुमिच्छामीत्युक्त्वा तावभिवाद्य ततो निर्गतः । चोपाटीवालुकासु सभा मिलिता । अहमहिंसाधर्मं सत्याग्रहस्य परिमितिं चाधिकृत्य दीर्घकालं भाषमाण इत्थमुक्तवान्यथा सत्याग्रहः सत्यवतामायुधम् । सत्याग्रहिणाहिंसाव्रतमंगीकार्यम् । अतो जना यदि कायेन वाचा मनसाप्यहिंसां नानुसरन्ति तदा सत्याग्रहयुद्धेनाचरितुं मम न शक्यमिति ।।

अमदाब्रादक्षोभवृत्तांतोऽनसूयाब्राईमहाशयामभ्यागतः । साप्यासेधितेति वृत्तांतः केनापि प्रसारितः । कर्माणि त्यक्त्वाहिंसाकार्य उपक्रांताः । कश्चिदधिकार्यस्मिन् क्षोभे प्राणान् तत्याज ॥

अहममदाबादनगरं गतः । नडियादनगरसमीपे लोहशलाका उत्क्षेप्तुं यत्नः कृतः । वीरमगामग्रामे कंचिद्राजकीयाधिकारिणं मारितवंतः । अमदाबादे युद्धशासनस्य प्रयोग उपक्रांत इत्यहमज्ञासिषम् । जना भयग्रस्ता बभूवुः । तैर्हिंसाकार्याणि कृतानि । अथ राज्याधिकारेण कुसीदसहितं दंडं दापिताः । ‘ कमिशनर ’पार्श्वे नेतुं मां कश्चिदधिकारी स्थाने निरीक्षमाणः स्थितः । यदाहं प्रॅटमहाशयस्य पार्श्वं गतस्तदासावतिकोपाविष्ट आसीत् । मया तदग्रे मृदूक्तमासीत् । क्षोभाः प्रवृत्ता इति मम विषादो व्यक्तीकृतः । युद्धशासनं नावश्यकमिति सूचयित्वा शांतेः पुनः स्थापनाय यत्र क्वापि प्रयत्ने कृते तत्साहाय्यं कर्तुं सज्जस्थितोऽस्मीति तस्मै न्यवेदयम् । साबरमती–आश्रमस्य बहिरंगणे सार्वजनिकसभां मेलयितुमनुज्ञा प्रार्थिता । इयं सूचना तस्य मनसे रुचिता । ‘ एप्रिल ’मासस्य त्रयोदशदिने भानुवासरे सभा मिलिता । युद्धशासनं तद्दिनं वा परेद्युर्वोच्छिन्नमभूत् । सभायां भाषमाणो स्वापराधज्ञापनाय प्रयत्नमकार्षम् । प्रायश्चित्तरूपेण त्रीणि दिनान्युपवासं करिष्यामीत्युक्त्वा जनैश्चैकं दिनं तथा करणीयमिति प्रार्थितवान् । यैर्हिंसाकार्यं कृतं तैः कृतं मयेति संमंतव्यमित्यसूचयम् ॥

मम कर्तव्यं मम दिनप्रकाशवत् स्पष्टमभूत् । मया कर्मकराणां मध्ये चिराय सेवा कृता । तत्सकाशादुत्तमं वर्तनं निरीक्षितं मया । एतादृशाः क्षोभविचारा मम सहनातीता आसन् । तेषामपराधस्याहं च भागीति मम प्रत्यभात् । स्वापराधः संमंतव्य इति यथा जनानामवोचं तथा राज्याधिकारिभिरपीमे प्रमादाः क्षंतव्या इत्यसूचयम् । द्वावपि ममाशयं नाशृणुताम् ॥

एवं गते दिवंगतरमणभाईमहाशयो अमदाबादनगरस्येतरजनाश्च मामागत्य सत्याग्रहं निरोधयेति प्रार्थयामासुः । अस्य न किंचिदावश्यकमासीत् । यतो यावज्जनाः शांतिरक्षणपाठं न शिक्षन्ते तावत्सत्याग्रहो निरोद्धव्य इति पूर्वमेव मम मनः कृतम् । एतानि मित्राणि संतुष्टा जग्मुः ॥

एवं ममेदं निर्धारणमन्यसुहृदोऽसंतुष्टानकरोत् । मया सर्वतः शांतिं निरीक्षमाणेन सत्याग्रहोत्पत्तेः पूर्वं तादृशशांतिस्थापनमावश्यकं भवेद्यदि जनसामान्यस्य सत्याग्रहो नैव शक्य इति तेषां प्रत्यभात् । एषां मे मतभेदो मया व्यक्तीकृतः । येषां मध्ये मया कार्यं क्रियते स्मापि च येऽहिंसामनुरोद्धं स्वीयकष्टं च सोढुं सज्जस्थिता इति निरीक्षितास्त एवाहिंसां नानुसरन्ति चेत्सत्याग्रहो न शक्य इति वक्तव्यमेव नास्ति । ये जनान् सत्याग्रहमार्गे नेतुमिच्छन्ति तैर्निरीक्षितमात्रमपि तानहिंसामार्गे स्थापयितुं शक्ता भवितुमर्हन्तीति दृढं मे मतमासीत् । अद्यापि ममाभिप्रायः स एव ॥

Funding by IKS-MoE

त्रयस्त्रिंशोऽध्यायः

हिमालयसदृशः प्रमादः

अमदाबादनगरे मिलिता सभा यावत्समाप्ता तावतः स्वल्पेनैव कालेनाहं नडियादनगरं गतः।
हिमालयसदृशः प्रमाद इति शब्दप्रयोगमिहैवाकार्षम् प्रथमतः। तत एतदपि प्रचारमागतम्। अमदाबादनगरेऽपि मम प्रमादः शनैः शनैर्मम गोचरीभूतः। किंतु मया नडियादनगरं प्राप्य तत्रत्यां परिस्थितिमालोक्य खेडामंडलस्य बहुजनानामासेधमाकर्ण्यापि खेडामंडलस्यापि चेतरप्रांतानां च जनान् शासनस्य सविनयभंगं कर्तुमाह्वातुमुपक्रमोऽगाधः प्रमाद इत्यकस्मान्ममास्फुरत्। तदा तानाह्वातुमद्यापि कालो न प्राप्त आसीदिति मम प्रत्यभात्। तदाहं सार्वजनिकसभायां भाषमाण आसम्। एवमहं मम प्रमादमंगीकृतवानित्यपहास्यपात्रं न जातः। परंतु तथा संमत्या न मया पश्चात्तापोऽनुभूतो यतो यः कोऽपि वा भवतु स्वप्रमादान् पर्वतप्रमाणसदृशानितरदोषान् रजःकणसमानांश्च द्रष्टुं शिक्षते तदानीमेवोभयोस्तुलनेन न्याय्यो भारोऽवगंतुं न शक्य इति सदा मेऽभिप्रायः। अपि च सत्याग्रही भवितुमिच्छुः नियममेनं स्वल्पमपरिहायाचरितुमावश्यकमिति मम श्रद्धा॥

अद्य पश्यामो हिमालयसदृशः प्रमादः क इति। शासनस्य विनयभंगाचरणात्पूर्वं यः कोऽपि वा भवतु स्वदेशशासनानि मनःपूर्वकं विनयेन च पालयेत्। बहुधा शासनानतिक्रमेऽस्माभिस्तद्भंगेन दंडं प्राप्स्याम इत्यालोच्य नैतिकतत्त्वशून्यानां शासनानां विषये तु विशेषतो यथार्थमेव तत्। अत्र दृष्टांतः। न चोरयितव्यमिति शासनमस्तु वा मास्तु वा प्रामाणिको मानी पुरुषोऽकस्माच्चौर्यं न करिष्यति। किंतु स एव पुरुषोऽधिकारे प्राप्ते द्विचक्रयानैर्दीपं विना न संचरितव्यमिति शासनमतिक्रमितुं स्वल्पमपि पश्चात्तापं न धत्ते। अस्मिन् विषयेऽतीवजागरूकेण भाव्यमित्युक्तश्चेदंगीकरोतीति संशय एव। किंत्वेवं शासनातिक्रमेण प्राप्यं न्यायस्थानव्यवहारसंकटं परिहर्तुमपि तदनुसरिष्यति। ईदृगनुसरणं सत्याग्रहिणा कर्तव्यं मनपूर्वकमैच्छिकमनुसरणं न भवति। सत्याग्रही समाजनियमपालनं स्वीयः पवित्रो धर्म इति मन्यते। अतस्तान् स्वीयेच्छया परिज्ञानेन चाचरति। यः कोऽपि वा भवतु स समाजनियमानात्मसाक्षीभूत्वाचरणात्परमेव के नियमाः समीचीनाः के नीतियुक्ताः के सदोषाः केऽन्यायग्रस्ता इति निर्धारयितुं शक्नोति। तदा निवेदितः स कतिपयशासनानि निकृष्टपरिस्थित्या भंजयितुमधिकारं प्राप्नोति। एतदावश्यकम्। परिमितिमलक्षयितुमेव मम प्रमाद आसीत्। जनाः सविनयभंगकर्तार उपयुक्तरीत्या संपादनात्पूर्वमेव तांस्तस्मिन् कार्ये प्रवर्तितमाहूतवानहम्। ममायं प्रमादो हिमालयसदृशोऽगाधपरिणामो वा ददृशे। अहं खेडामंडले पदं न्यस्य तत्क्षणमेव

Funding by IKS-MoE

स्फुरत: खेडासत्याग्रहस्य, स्मृतयो मम मन: प्रविश्य तावत्स्पष्टमास्थिता इत्येतत् कथं मया न दृष्टम्। इत्याश्चर्यभरितो भवामि। यत्किंचिज्जनांगं वा भवतु। शासनस्य सविनयभंगाचरणप्राप्तेः पूर्वमेव तस्य गंभीरतररहस्यं ज्ञातव्यमिति मम मनस्यागतम्॥

अत: सार्वजनिकसविनयशासनभंगस्य पुनरारंभणात्पूर्वं सत्याग्रहस्य कठिनसाधनानि यस्य सम्यग्ज्ञातानि यस्यानुभवसिद्धानि तस्य शुद्धमनस: स्वयंसेवकदलमेकं निर्मातुमावश्यकम्। ते जनानां सर्वविषयान् विवृत्य निद्रां विना जागरूकतया यथा जना असत्पथं न गच्छन्ति तथा द्रष्टुं शक्यम्॥

एभिर्विचारैर्मनसि पूर्णे सति मोहमयीं प्राप्य तत्रत्यसत्याग्रहसभाद्वारा सत्याग्रहिणां स्वयंसेवकदलमेकं संगृह्य: तदालंबनेन सत्याग्रहस्यार्थं तस्यांत: सारं चाधिकृत्य जनानां शिक्षणप्रदानकार्यमारब्धवान्। एतन्मुख्यश एतद्विचारसंबद्धसर्वविषयगर्भितान्नूतनपत्रिकाविभजंत: शिक्षणमकरवाम॥

किंत्वेतत्कार्ये चलति जनानां सत्याग्रहस्य शांतस्वरूपे कुतूहलं जनयितुं दुष्करमिति मम प्रत्यभात्। पर्याप्तसंख्या: स्वयंसेवकाश्च न मिलिता:। अपि क्रमयुक्तमभ्यासं न प्रापु:। दिनेषु गच्छत्सु नूतनस्वयंसेवकानां संख्याधिकीभवनं मुक्त्वा स्वल्पतरा भवितुं प्रवृत्ता। सविनयशासनभंगस्य शिक्षणं मन्निरीक्षितत्वरया न भविष्यतीति मम मनसि दृढं प्रत्ययो जात:॥

चतुस्त्रिंशोऽध्याय:

'नवजीवनं' 'यंग इंडिया' च

एवमहिंसारक्षकगतिरेकतो मंदापि प्रसृत्वरान्यतो राज्याधिकारस्याराजकदंडनीतिरतिरभसेन प्रवहंती 'पंजाब'देशे सर्वस्पष्टं निजस्वरूपं प्रदर्शयति स्म। नायका आसेधिता युद्धकालस्य शासनं—शासनस्य नास्तित्वं–प्रचारमागतम्। प्रत्येकन्यायस्थानानि निर्मितानि। एतानि धर्माधर्मनिर्णायिका: संस्था न बभूवु: परंतु निरंकुशस्य कस्यचित्स्वतंत्रस्य निरंकुशमनोनिश्चयं चालयंत्यायुधान्यासन्। साक्ष्यस्याधारं विना धर्मस्य तिलांजलिप्रदानेन दंडो व्यधीयत। अमृतसरनगरे निर्दोषिण: पुरुषा निर्दोषा वनिताश्च कीटवज्जठरेण यथा चलन्ति तथा चक्रिरे। यद्यपि 'जलियांवाला बाग'नामकस्थानस्य हत्याकांड एव विशेषतो भरतखंडस्यापि सर्वप्रपंचस्यापि दृष्टिमाचकर्ष स एतत्कार्यक्रमस्य पुरस्तात् ममातिसामान्य इवादृश्यत॥

परिणामस्य गणनां विना तत्क्षणमेव पंजाबप्रदेशं प्रस्थातव्यमिति निरबध्नन्। तत्र,गंतुमनुज्ञा देयेति राजप्रतिनिधिं प्रति पत्रमलिखं तंत्रीप्रार्थनां च प्राहैषम्। तत्सर्वं निष्फलमभूत्। तथाप्यनुज्ञां

Funding by IKS-MoE

विना प्रस्थाने पंजाबदेशस्यावधिमतिक्रमितुं न मां मुंचति स्म । सविनयभंगेन या तृप्तिर्भवेत्तावता मया संतोष्टव्यमासीत् । अतः किमग्रे कर्तव्यमिति प्रश्नः कठिनमुभयसंकटग्रस्तमकरोत् । तादात्विकपरिस्थितौ पंजाबप्रदेशांतः पदं न निक्षिपेदित्याज्ञाया उल्लंघनं मम दृष्ट्या सविनयभंग इति नोच्यते स्म । यतो मां परितो मया निरीक्षितशांतेरावरणं नासीत् । पंजाबदेशे परिमितिं विना प्रयुक्तदंडनीत्या जनस्य कोपो ववृधे । अतस्तादृक्काले सविनयोल्लंघनं कृतं चेज्ज्वलदग्नौ घीप्रक्षेप इवाभविष्यत् । एतेनाहं पंजाबप्रदेशं न गमिष्यामीति मित्राशयविरोधेन निरधारयम् । एतन्निर्णयस्य निगिरणं मह्यं न रोचते स्म । प्रतिदिनं क्रूरोऽन्याय्यः प्रजाहिंसावृत्तांतः पंजाबदेशत आयाति स्म । किंतु मया दंतान् कटकटापयता हस्तौ बध्वोपवेष्टव्यमासीत् । न किंचिदन्यत्कर्तुं शक्यमासीत् ॥

तस्मिन्नेव समये होर्नीमॅनमहाशयं राज्याधिकारिणः क्वचिदपाहरन् । ‘बॉम्बे क्रॉनिकल’ पत्रिका तस्य हस्तेऽगाधशक्तिः परिणता । राज्याधिकारिणामिदं कार्यमत्यंतदुर्नीतियुक्तमिति मे प्रत्यभात् तस्य हेयस्वरूपस्य स्मृतावद्यापि मम शरीरे दुर्गन्ध इव जायते । होर्नीमॅनमहाशयेन अराजकत्वं नापेक्षितमित्यहं जाने । पंजाबराज्याधिकारिणां निरोधनरूपोल्लंघनं तेन नाभीप्सितम् ॥

सविनयभंगं स्थापयितुं यन्निर्धारणं तत् संपूर्णमनुमोदितम् । यावन्निर्धारो मया न प्रकटीकृतः तत्पूर्वमेव तस्मात्तात्पर्यशालिपत्रमभ्यागतम् । मोहमयी-अमदाबादनगरयोरतिदूरत्वात्तस्य पत्रं मम निर्धारस्य प्रकाशनादनंतरमागतम् । अतोऽकस्मात्तस्यापहरणेन मम दुःखमाश्चर्यं च संजातम् ॥

एतत्संघटनानां फलं चेदं यत् ‘बॉम्बे क्रॉनिकल’पत्रिकानिर्वाहभारो मया वोढव्य इति पृष्टोऽहम् । ब्रेल्वीमहाशयस्य तत्कचेर्यवस्थानात् मया कर्तव्यमधिकं नावशिष्टम् । तथापि मत्स्वभावानुसारादियं पर्यनुयोज्यता ममोपर्यन्यो भारः परिणतः ॥

किंतु भार एव न वोढव्य आसीत् । राज्याधिकारो मम साहाय्यं कर्तुमागत इव मम कार्यक्रमाद् ‘बॉम्बे क्रॉनिकल’पत्रिका प्रकटनं निवर्तयामास ॥

‘क्रॉनिकल’पत्रिका चालननिर्वाहकतयोमरसोबानी — शंकरलालबेंकरमहाशयोर्हस्त एव ‘यंग इंडिया’ पत्रिकापि स्थिता । क्रॉनिकलपत्रिकाया निरोधात् ‘यंग इंडिया’ संपादकत्वं मया वोढव्यमिति निरुद्धपत्रिकास्थानं सम्यक् पूरयितुमेतत्पत्रिकायाः सप्ताहस्यैकवारं प्रकटनं विज्ञाय द्विवारं प्रकटनं कार्यमिति च मित्राण्यसूचयन् । ममाभिप्रायोऽपि स एव । सत्याग्रहगर्भितमर्थं जनस्य विशदीकर्तुमुत्सुकोऽभवम् । एतत्प्रयत्नद्वारा पंजाबदेशस्य परिस्थितिमुत्तमतरं कर्तुमपि शक्यं स्यादित्याशापि ममासीत् ॥

Funding by IKS-MoE

यतो मम लेखनेषु सर्वेष्वपि सत्याग्रहो गर्भित आसीत् । राज्याधिकारेणाप्येतत् ज्ञातम् । अतो मन्मित्राणां सूचना मम संमतासीत् ॥

किंत्वांग्लभाषाद्वारा स जनसामान्यमखिलं सत्याग्रहाय सज्जीकर्तुं कथम् मम मुख्यक्षेत्रं गुजरातदेश आसीत् । तस्मिन् समये श्रीइन्दुलालयाज्ञिक – सोब्रानी-बेंकरमहाशयसमूहे स्थितः। एतेन गुजराती ‘ नवजीवन ’ मासपत्रिका चाल्यते स्म । अस्याः पत्रिकाया अस्मन्मित्रैर्धनसाहाय्यमासीत् । इयं मासपत्रिका च मद्वशे आगता । एतदधिकं श्रीयाज्ञिकमहाशय एतत्पत्रिकार्थेऽहं कार्य करिष्यामीत्यब्रवीत् । इयं साप्ताहिकपत्रिका कृता ॥

एतदंतरे ‘ क्रॉनिकल’पत्रिका पुनर्जीवं प्राप्ता । अतो ‘ यंग इंडिया’पत्रिका पूर्ववत् साप्ताहिकपत्रिकाभवत् । साप्ताहिकपत्रिकाद्वयस्य भिन्नभिन्नस्थलेभ्यः प्रकटनं ममानानुकूलमधिकव्ययकारि च बभूव । ‘ नवजीवन’स्यामदाबादनगरात् प्रकटीकृतत्वान्ममाशयरीत्या ‘ यंग इंडिया ’ पत्रिकापि तत्रैवानायि ॥

एतत्परिवर्तनस्य कारणांतराण्यासन् । ‘ इंडियन् ओपिनियन ’ पत्रिकासंबंधेन संपादितोऽनुभव एतादृशपत्रिकानां स्वतंत्रमुद्रणालयस्यावश्यकता मया सम्यग् ज्ञाता । अपि च तत्कालं वृत्तपत्रिकाणां संबद्धशासनानि क्रूराणि बभूवुः । अतो ममाभिमतं निरांतकं व्यंजयितव्यं चेत्तादात्विकमुद्रणालयाः प्रकटीकर्तुं विकल्पन्ते स्म । यतस्तासां चालनमार्थिकदृष्ट्या । अतोऽस्मदीय एव मुद्रणालयः कश्चिदावश्यक आसीत् । एवं कर्तुममदाबादनगर एव केवलमनुकूलमासीदतो ‘ यंग इंडिया ’ अपि तत्रैव निर्वहणीयासीत् ॥

अद्याहमेतत्पत्रिकाद्वाराक्षरस्थजनानां सत्याग्रहविषये शिक्षणप्रदानकार्यं यावच्छक्ति निरोद्धुमुपाक्रमे । एतद्द्वयमेकदातिविशालं वाचकवर्गं संपादयति स्म । प्रत्येकस्याः प्रायश्चत्वारिंशत्सहस्रसंख्याका वाचका बभूवुः । नवजीवनस्य ग्राहकाणां संख्यैकदैव ववृधे । किंतु ‘ यंग इंडिया ’ वर्गीयाणां संख्या मंदं मंदमवर्धत । मया कारागृहवासे प्राप्ते एतद्द्वयस्यापि संख्याल्पतराभूत् । अद्यैतदष्टसहस्राभ्यंतरे वर्तते ॥

एतासु पत्रिकासु संवादा न प्रकटनीया इति प्रथमतो मया निर्धारितम् । एतेन तासां न किमपि नष्टं संजातमिति मन्ये । न तावदेव । एतेन ता निजस्वातंत्र्यं रक्षितुं बहुसहाया भवन्तीत्येव मेऽभिप्रायः ॥

अपि चैताः पत्रिका मम मनःशांतिस्थापनाय सहाया बभूवुः । यतो यद्यप्येतत्क्षणमेव शासनस्य सविनयभंगसमालोचनाया अवकाशाभावेऽपि एतद्द्वारा ममाभिमतं निरातंकं व्यक्तीकृत्य धैर्योत्पादनं कर्तुं मम साध्यमासीत् । एवमेतत्पत्रिकाद्वयं जनानामस्मिन् संकटकालेऽधिकसाहाय्यं कृत्वा युद्धशासनस्यात्याचारमल्पीकर्तुं साहाय्यमकरोदिति गणयामि ॥

Funding by IKS-MoE

पंचात्रिंशोऽध्याय :

पंजाबदेशे

सरमाईकल-ओडवायरमहाशयः पंजाबदेशे संवृत्तस्य सर्वस्याप्यहमेव पर्यनुयोज्य इति कतिपयाः कोपोद्दीपिताः पंजाबयुवका युद्धशासनप्रचारस्याहमेव कारणभूत इति चाभिप्रायं ददुः। मयि सविनयशासनभंगमस्थापयति जलियांवालाबागनामकस्थानस्य हत्याकांड एव नाभविष्यदिति प्रतिवादमकुर्वन्। तेषां केचिन्मया पंजाबप्रदेशांतः पदं निक्षिप्यते चेन्मारयिष्याम इति भीतिमुदपादयन् ॥

परंतु मम गणनायां मम कार्यक्रमस्तथा निर्दोष आसीद्यथा न कोऽपि विवेकशाली तमन्यथा जानीयात् ॥

पंजाबप्रदेशं गंतुमहमातुरोऽभवम् यतोऽहं तत्र कदापि न गतः। ततः तत्रत्यां परिस्थितिं साक्षादवगंतुं ममौत्सुक्यं द्विगुणीभूतमासीत्। पंजाबप्रदेशमागंतव्यमिति मामाह्वायकाः डॉ. सत्यपाल–डॉ. किचलुमहाशयौ अपि च रामभजदत्तचौधरिमहाशय एते तदा कारागृहे स्थिताः। परंतु राज्याधिकारिणामेतानितरबंदींश्च चिराय निर्बन्धुं नास्ति धैर्यमिति स्पष्टमेव विदितम्। यदाहं मोहमयीनगरे स्थितो बहवो पंजाबप्रदेशस्थजना मां द्रष्टुमागताः। एषु संदर्भेष्वहं तेषां प्रोत्साहनाय वाचमब्रुवम्। एतेन तेऽपि सुखिता बभूवुः। तदानीं वर्तमान आत्मविश्वास इतरेष्वपि धैर्यमुत्पादयति स्म ॥

परंतु मया पंजाबप्रदेशगमनमनेकवारं विलंबितम्। मया पृष्टराजप्रतिनिधिः सर्वेदेदानीं मेति ब्रवीति स्म। एवं च प्रयाणं विलंबनीयमासीत् ॥

एतदंतरे युद्धशासनसंबंधे पंजाबराज्याधिकारिणः कार्याकार्याणि विम्रष्टुं 'हंटरकमिटि' उत्थितेति प्रकटीकृतम्। दीनबंधुअँड्रुझमहाशय एतदंतरे पंजाबप्रदेशं प्रविष्ट आसीत्। तस्य पत्रेषु पंजाबप्रदेशपरिस्थितेः हृदयविदारकाणि वर्णनान्यासन्। तानि पठतो मे युद्धशासनस्यात्याचारा वृत्तपत्रिकासु वर्णितविषयापेक्षया वस्तुतोऽतिहीना आसन्निति प्रत्यभात्। मया तत्क्षणमेव प्रस्थायागंतव्यमिति साग्रहं पत्रं लिखितम्। तस्मिन्नेव समये पंडितमालवीयजीमहाशयस्तत्क्षणमेव पंजाबप्रदेशमागंतव्यमिति तंत्रीवृत्तं प्राहैषीत्। मयाद्य पंजाबप्रदेशगमनं भवेद्वा न वेति राजप्रतिनिधेः पुनः तंत्रीवृत्तांतं प्रहितवान्। क्लृप्तदिनानंतरं भवतीतिं प्रत्युक्तिरागता। किं तद्दिनमिति न स्मरामि। परंतु ऑक्टोबरमासस्य सप्तदशतमोदिन इति प्रतिभाति मे ॥

यदाहं लाहोरपत्तनं प्राप्तस्तदा तत्र दृष्टं न कदापि विस्मरेयम्। बाष्पसंचालितशकटीविराम वेदिकास्थानमादितोऽन्तपर्यंतं जनस्तोमेन जर्जरितमासीत्। तत्पत्तनवासिनं चिरकाल-

Funding by IKS-MoE

वियोगादागतमात्मबंधोः प्रत्युत्थानायेव तत्रागत्यात्यातुरेण प्रतीक्षमाणा आनंदेन परवशा आसन् । अहं रामभजदत्तचौधरीमहाशयस्य मंदिर अवतीर्णः । ममोपचरणभारः श्रीमतीसरलादेवी। चौधराणीमहाशयायाः शिरसि पपात । वस्तुतः सोऽयं भार इत्येव वक्तव्यः । यतोऽद्येव तदापि मयावतीर्णस्थलमन्नसत्रं परिणमति स्म ॥

यतो मुख्यनायकाः कारालये स्थितास्ततस्तेषां स्थानं युक्तमेव पंडितमालवीयजी-पंडित मोतीलाल-दिवंगतस्वामीश्रद्धानंद-इत्यैतैराक्रांतमिति मया दृष्टम् । ममैतत्पूर्वमेव मालवीयजी-श्रद्धानंदमहाशययोर्गाढः परिचय आसीत् । परंतु मोतीलालमहाशयेन निकटसंपर्कप्राप्तिरिदं प्रथमा । एते नायका अपि कारागृहप्राप्तिसन्मानस्याद्याप्यपात्राणि स्थलीया अग्रेसरा मां स्वकीयमिव ददृशुः । क्षणमप्यहं विदेशीय इव न दृष्टः ॥

'हंटर.'समितेरग्रे साक्ष्यं न देयमिति सर्वे वयमैकमत्येन कथं निर्धारयामेत्ययमैतिहासिको विषयः । तस्य कारणानि तदानीमेव प्रकटितानि । न पुनर्निवेदनीयानि । अलं मे तावद्वचनेन । एतावत्कालानंतरं तस्यां संगत्यां परिशीलितायां समितिर्बहिष्कार्येति कृतोऽस्मन्निर्णयः । तस्य कारणानि च केवलं युक्तानीति ममाद्यापि प्रतिभाति ॥

'हंटर'समितेर्बहिष्कारस्य फलरूपेण राष्ट्रमहासभायाः पक्षे तस्मिन्नेव विषये विचारणं कारयितुं राजकीयानां समितिमेकां कल्पयितुं निर्धारितम् । पंडितमोतीलालनेहरू-दिवंगतदेश-बंधुचित्तरंजन-दास-जयकर-अब्बासतैयबजीमहाशया अपि चाहं समितेः सदस्याः कल्पिताः । पंडितमालवीयजीमहाशयेनैव कल्पिता इति वक्तव्यम् विमर्शार्थं वयमनेकस्थानेषु विभजनं प्राप्ताः । समितेः कार्यक्रमनिर्णयो ममोपरि स्थितः । इतरापेक्षयाधिकस्थलेषु विमर्शनभाग्यं मम संप्राप्तमित्यतः पंजाबप्रदेशस्थलोकान् ग्रामांश्च सूक्ष्मतया परिचेतुं ममापूर्वावकाशो लब्धः । विमर्शनकाले पंजाबप्रदेशस्थमहिलानां परिचयोऽपि प्राप्तः । वयमन्योन्यं युगान्तरेण ज्ञातवन्त इव प्रतिभाति स्म । मम गमनस्थलेषु समूहश आगत्यानीतानामूर्णीसूत्राणां राशीनग्रतो निक्षिपन्ति स्म । एवं विमर्शस्य संबद्धं मम कार्यं पंजाबप्रांतः खादीमहाक्षेत्रं भवितुमर्हेदिति मनसि संजातम् ॥

जनोपरिसंवृत्तात्याचारविषयेऽग्रतो विचार्यमाणे राजकीयनिरंकुशताया अधिकारिणां स्वेच्छाप्रवृत्तेश्च कथा मम श्रोत्रयोः पेतुः । इमा देयाः कियदासन्निति चेन्मयेदृशान्यपि कृत्यानि संवृत्तानीतिनैव निरीक्षितमासीत् । सर्वमेतदाकर्ण्य मम महती मनोव्यथा संजाता । तदानीं किं ममाश्चर्यमजनयदिति चेद्युद्धकाले 'ब्रिटिश' राजस्येतरप्रांतेभ्योऽधिकान्योधानुपस्थापितवान् प्रांत एतादृशपाशविकात्याचारान् कथं हस्तं बद्ध्वा सेहे इत्ययं विषय इदानीमपि मां विस्मापयति ।

अस्याः समितेराख्यानलेखनकार्यमपि मम भाग आसीत् । पंजाबप्रदेशस्थजनस्योपरि जातानत्याचारान् जिज्ञासुभिरेतदाख्यानं पठितव्यमिति मम सूचना । मयात्र वक्तव्यमेतावदेव ।

तस्मिन्न कुत्रापि ज्ञात्वा लिखितातिशयोक्तिरस्ति । तत्रत्यस्य प्रत्येकविषयस्यापि साक्ष्यस्याधारो विद्यते । अपि च प्रकटितं साक्ष्यं समितेर्वशवर्तिनः साक्ष्यस्यात्यल्पभागः । लेशमात्रमपि संशयास्पदो विषय आख्याने न विद्यते । सत्यांशमात्रं बहिः प्रकाशनीयमित्युद्देशेन सज्जीकृतमाख्यानं पठितं चेद् ब्रिटिशराज्याधिकारः स्वप्राबल्यसंरक्षणाय कियद्दूरं गंतुमिच्छति कीदृशानत्याचारानमानुषकृत्यानि च कर्तुं शक्नोतीति स्पष्टं प्रतिभाति । यावदहं जानामि तावदस्मिन्नाख्याने किमपि वाक्यं मृषेति न केनापि प्रदर्शितम् ॥

षट्त्रिंशोऽध्यायः

‘ खिलाफतं ’ प्रति गोरक्षणम्

सद्योस्माभिः पंजाबदेशस्य इमा दुर्घटना विस्मयितव्याः ॥

पंजाबदेशे संवृत्त‘डायरशाही’विषये महासभायाः समितेर्विचारणं प्रारेभे । एतदंतरे ‘ खिलाफत’प्रश्नालोचनाय दिल्हीनगरे संमिलितं हिंदुमुसलमानानामुभयसंमेलनं प्रत्यागंतव्यमिति बहूनां प्रेषितमाह्वानपत्रं ममाप्यागतम्। तस्या हस्ताक्षरकर्तॄणां मध्ये दिवंगतहकीमसाहेब-असफअल्लीमहाशययो नामनी चास्ताम् दिवंगतस्वामीश्रद्धानंदः संमेलनमागमिष्यतीति तत्पत्रे स्थितम् । यावदहं स्मरामि तावत्तत्संमेलनमेतद्वर्षस्य नवेम्बरमासे उपवेष्टव्यमासीत् । स्वामिश्रद्धानंदेन तस्योपाध्यक्षो भवितव्यमित्यालोचितमिति मम स्मृतिरस्ति । तस्मिन् पत्रे प्रस्तावितानेकसंगतिषु तत्संमेलनेन ‘ खिलाफत’द्रोहस्य प्रश्नो गोसंरक्षणस्य च प्रश्नः चर्चयिष्यते । अतस्तां समस्यां पूरयितुं तदापूर्वः संनिवेशो लभ्यत इत्यासीत् । एवं गोरक्षणस्य प्रस्तावनं मम संमतिं न प्राप । अत आह्वानपत्रस्य प्रतिवचनरूपेण लिखितपत्रेऽहं संमेलनमागंतुं सर्वप्रयत्नं करिष्यामि । तत्प्रश्नद्वयं मिलित्वोपकारप्रत्युपकारदृष्ट्या नालोकनीयम् । प्रत्येकमालोच्य प्रत्येकं तत्तद्गुणदोषानुसारेण निर्धारयितव्यमिति सूचयित्वालिखम् ॥

इत्थमालोचयन्नहं संमेलनं गतः । तदनंतरं संवृत्तकूटेष्विवास्मिन्दशसहस्राका विंशतिसहस्राका वा जना यद्यपि न मिलिता अस्य जनसंख्या अधिकाबभूवेत्येव वक्तव्यम् । उपर्युक्तप्रश्नं तत्रागतस्वामिश्रध्दानंदेन सहाचर्चयम् । मम वादस्तस्य संमतिं प्राप । तत्संमेलनस्यावधानमानेतुं तथाहमेतत्प्रश्नद्वयं हकीमसाहेबमहाशयेन सह प्रस्तावितवान् । ‘ खिलाफत ’मामेवान्वजानाति । गतेर्न्यायधर्मयोराधारोऽस्ति चेत् (तादृगाधार आसीदित्येव मे श्रद्धा) राज्याधिकारः केवलमन्यायं नाचरेद्यदि मुसलमानाजनाः ‘ खिलाफत ’संबंधेऽभियोजने हिन्दुभिस्तेषां साहाय्यं कर्तव्यम् । गोसंरक्षणप्रश्नप्रस्तावो वैतं संदर्भं मुसलमानजनैः सह नियमविधानमुपयोजनं वोचितं न भवति ।

Funding by IKS-MoE

तथैव मुसलमानजनैरपि ‘खिलाफत’संबंधे हिन्दुनामवलंबनलाभाय गोहत्यां विरमयितुं संमतिर्वा न योग्या। परंतु मुसलमानजनाः स्वयमिच्छया हिंदुनां धार्मिकमनोरथमादृत्यैतेऽस्मत्परिपार्श्ववर्तिनो भूमातुरेकस्या एतद्देशवर्तिनः शिशव इति गणयित्वा कर्तव्यदृष्ट्या गोवधं विरमयन्ति चेत्तदत्यंतयोग्यं तेषां भूषणप्रायं भविष्यति। स अन्यो विचारो भविता। तथा स्वतंत्रदृष्ट्यावलोकनमेव तत्कर्तव्यम्। तेन तेषामाचारस्य गांभीर्यं द्विगुणं भविष्यति। परंतु मुसलमानाः परिपार्श्ववर्तिनः समालोक्य स्वकर्तव्यमिति दृष्ट्या गोवधो न कर्तव्य इति मन्यन्ते यदि हिंदवः खिलाफतविषये साहाय्यं कुर्वन्तु वा न वा गोवधं प्रतिरुन्ध्नीयुः। अत एतद्विषयद्वयं प्रत्येकं चर्चनीयम्। एतत्संमेलनस्य कार्यकलापैः ‘खिलाफत’प्रश्नस्य केवलं संबद्धैर्भवितव्यम्। इत्यहं संमेलने वादमकरवम्। अयं वादस्तत्रत्यानां मनसि निरूढ आसीत्। अस्य फलं च गोरक्षणविषये तदा न चर्चा कृता॥

परंत्वेवं मम प्रबोधनेऽपि मौलाना-अब्दुलबारीसाहेबमहाशयो हिन्दवोऽस्माकं साहाय्यं कुर्वन्तु वा न वा वयं हिन्दूनां देशबांधवा इति भावेन हिन्दूनां मनोवृत्तिमादृत्य गोवधः प्रतिरोद्धव्य इत्युवाच। अपि चैकदा मुसलमानास्तत्र प्रतिरुन्धन्त्येवेति प्रत्यभात्॥

‘खिलाफत’प्रश्नेन सर्वपंजाबदेशस्यात्याचारप्रश्नमपि परिगृण्हीयादिति कैश्चित्सूचितम्। अहमिदं प्रत्यवस्थितः। उक्तं मया यथा—पंजाबप्रदेशप्रश्नः केवलं प्रांतिको विषयः। युद्धसमाप्तेरुत्सवेष्वस्माभिर्भागिभिर्भवितव्यं वा न वेति तस्य स्थानं न देयम्। संधेर्नियमैरेवोदित‘खिलाफत’-प्रश्नेन सेयं स्थलीयसमस्या मिश्रिता चेन्महानविवेको भविष्यतीति। मम तर्कः सर्वेषां मनः प्राविशत्॥

मौलानाहसरतमोहानीमहाशयः सभामिमामागतः। इतः पूर्वमासीन्मे तस्य परिचयः। परंतु स कीदृशो योध इति ममाद्यैव विदितम्। प्रथमत एव वयं भिन्नमतौ स्वः। केषुचिद्विषयेष्वयं भिन्नाभिप्रायोऽद्यापि तिष्ठति॥

अनेन संमेलनेनानुमोदितनिर्णयेषु हिन्दुभिर्मुसलमानजनैश्च स्वदेशीव्रतमंगीकर्तव्यमित्येकम्। अस्य सहजानुवर्तिततया विदेशीवस्तूनि बहिष्कार्याणीति च प्रस्तावः: स्वीकृतोऽभूत्। ‘खादी’वस्त्रस्याद्याप्युचितस्थानं न :लब्धमासीत्। हसरतसाहेबमहाशयो निर्णयमेतं न संमेने। ‘खिलाफत’विषये न्याय्यो निर्णयो न भवेद्यदि ‘ब्रिटिश’चक्राधिपत्यस्योपरि प्रतीकार एव तस्योद्देश आसीत्। अतोऽयमिदंप्रति यावत्साध्यम् ‘ब्रिटिश’पदार्था बहिष्कार्या इति निर्णयं सभाग्रे आनिनाय। अहमेतं तात्त्विकदृष्ट्या कार्यदृष्ट्या च प्रत्यवस्थितः। एतत्संबंधे मयोक्ता वादा अद्य बहुशो जनानामवगाहनमागताः। एतन्मुक्त्वाहमहिंसाविषये मयाभिमतं सभाया अवधानमानैषम्। मयोक्तं तत्रागतानां मनसि गंभीरपरिणाममजनयदिति मम विदितमासीत्। मत्तः पूर्वं सभा हसरतमोहानीमहाशयस्य भाषणमत्यंतोत्साहेनाशृणोत् इत्यतः मम वचनमरण्यरोदनं भवेदित्यहं भीत

आसम्। संमेलनस्यात्र ममाभिप्रायस्याप्रकटनं कर्तव्यलोपो भवतीति केवलं भाषितुं प्राप्तधैर्य आसम्। परंतु ममाश्चर्यानुसारेण तत्रत्या मम भाषणं संपूर्णावधानेनाश्रुण्वन्। अपि च ममाभिप्रायस्य वेदिकास्थितानां संपूर्णानुमोदनप्राप्त्येकैकशो ममाभिमतं पुष्टीकृत्य भाषणं चक्रुः। 'ब्रिटिश'वस्तूनां बहिष्कारो न केवलमस्मदुद्देशं सार्थकीकरोति। परं तदनुसारेण हास्यास्पदं भविष्याम इति प्रमुखा अजानन्। तत्रागतानां शरीरोपरि यत्किंचिद् 'ब्रिटिश'-वस्तुस्थितमेव। यतो निर्णयमनुमोदमाना एव यदा नाचरितुं शक्तास्तदा तादृशस्यास्माभिः संमतिरनर्थायैवेति तत्रत्यानां बहूनां मनसि स्फुटमासीत्॥

केवलविदेशीयवस्त्रबहिष्कारेण तृप्तिर्न भविष्यति। यावदावश्यकमस्माकं तावत्स्वदेशीयवस्त्रमुत्पादयितुमपि च विदेशीयवस्त्रं संपूर्णमेवापसारयितुं च कियान् कालो भविष्यतीति को वा जानाति। 'ब्रिटिश'जनानां शीघ्रमेव परिणामजनकं किमपि वांछितम्। विदेशीयवस्त्रबहिष्कारस्तिष्ठतु। तस्य नः कोप्याक्षेपो न विद्यते। परंतु तेन सह इतोऽपि शीघ्रतरं त्वरितं साधनं दीयताम्। इत्येतदेव समष्ट्या मौलानाहसरत्मोहानीमहाशयस्य वाद आसीत्। तस्य भाषणं शृण्वत एव विदेशीवस्त्रबहिष्कारेण सह किमप्यन्यन्नूतनमावश्यकमिति मनस्यस्फुरत्। एतं बहिष्कारमपि तत्क्षणमेव कर्तुमसाध्यमिति प्रत्यभात्। अपेक्षायामस्माकं पर्याप्तं खादीवस्त्रमुपस्थापयितुं शक्यमिति तस्मिन्काले न ज्ञातमासीत्। एतदस्माभिः पश्चाद्दृष्टम्। परंत्वस्य बहिष्कारस्य साधनाय निर्माणयंत्रेष्वेव विश्वासिनश्चेद्वयं वंचिताः स्यामेति तदानीमप्यस्माकं विदितमासीत्। यावदहमुभयसंकटे स्थितस्तावदेव मौलानामहाशयः स्वभाषणं समापयामास॥

यतः सम्यग् हिन्दीवचनं अथवा उर्दुवचनं नास्फुरत्ततः संकटे स्थितः। उत्तरदेशस्य मुसलमानजनैर्बहुभिर्मिलितसभायां तार्किकभाषणमिदं प्रथममेव कृतम्। कलकत्तानगरे मुसलमानानां सभायामुर्दुभाषायां भाषणं कृतं परंतु चतुःषणनिमेषमात्रम्। तस्योद्देशः केवलं सभासदां हृदयावगाहनम्। अत्र तावत्सभा न मे विरोधवर्तिनी भवेद्यदि मम वाक्यं विमर्शनदृष्ट्याप्यवदधीत। ईदृक् सभायामहं ममाभिप्रायान्विवृत्य मनसि स्थापयेयम्। परंतु मया लज्जावृतिरखिलापि समुत्सारिता। मम तत्र परिस्थितिर्मम योग्यतामतिक्रांतछिन्नभिन्नहिंदीभाषायां तत्सभायां ममाशयं व्यक्तीकर्तुमेव। न पुनर्दिल्हीनगरस्थमुसलमानजनानां निर्दोषस्वच्छहिन्दीमाश्रित्य भाषणं कर्तुम्। अस्मिन्नुद्देशेऽहं कृतार्थो जातः। हिंदी-उर्दुभाषाप्येकैव हिंदुस्थानस्य राष्ट्रभाषा भवितुं योग्येतीयं सभा मम प्रत्यक्षनिदर्शनं ददौ। आंग्लभाषायां भाषणेन तादृशं गंभीरपरिणामं जनयितुमशक्यमासीत्। मौलानामहाशयः बहुशः स्पर्धा नाकरिष्यत्। स्पर्धाकरणेनापि तस्य सम्यगुत्तरं दातुं शक्यं न भवेत्॥

तदा स्फुरितनूतनभावं व्यक्तीकर्तुं मम हिन्दीभाषाशब्दोऽथवा उर्दूभाषाशब्दो नास्फुरत। अनेनाहं स्वल्पं कुपित इव। पर्यंते तं भावं 'नॉन-कोऑपरेशन' (असहकार) इति वाचं समसूचयम्।

तस्य प्रयोगोऽस्यां सभायामेव प्रथमः। मौलानामहाशये भाषणं कुर्वाणे ममेत्थं प्रत्यभात्। अनेकविषयेषु राज्याधिकारेण सहकारं कुर्वन्ति। अस्माभिरायुधपाणिभिर्भवितुमशक्यं चेदथवानुचितं चेत्ताद्दग्राज्याधिकारं सफलं विरोद्धुं केवलनिरर्थकम्। राज्याधिकारेण यथार्थो विरोधस्तेनासहकारः। 'नॉन कोऑपरेशन' इति वाच उत्पत्तिरेवम्। तस्य अनेकेङ्गितार्थास्तदा मे स्पष्टतया न विदिता आसन्। ततोऽहं विवरणं न गतः। मयोक्तमेतावन्मात्रम्—

मुसलमानैः संप्रति बहुमुख्यो निर्णयः स्वीकृतः। संघेर्नियमा यद्यन्याय्याः (तथा भवितुं भगवानवकाशं मा ददातु) ते राज्याधिकारेण सहकारं परित्यक्ष्यन्ति। एवं सहायसंबंधस्य निराकरणं प्रजानां जन्मसिद्धोऽधिकारः। राज्याधिकारस्य प्रजाभिः स्वीकृतानां 'विरुद'संमानादीनां रक्षणं वा राजकीयसेवायामासक्तिर्वा नास्मत्कर्तव्यम्। 'खिलाफत'सद्दशे महाविषये राज्याधिकारिणोऽस्माकं द्रोहं कुर्युश्चेदस्माकं तैरसहकारं विना नान्यो मार्गो विद्यते। अतो राज्याधिकारः स्वीयवाचा स्खलति चेत्तैरसहकारं कर्तुमस्माकमधिकारोऽस्तीति ॥

परंतु 'नॉन-कोऑपरेशन' इति वाक् साधरणोपयोगमागन्तुं केचिन्मासा व्यतीयुः। तत्कालभात्रं सभायाः कार्यकलापेष्वद्दश्यतां गतः। तावता किम्। तत एकमासानंतरममृतसरनगरे मिलितराष्ट्रमहासभायां राज्याधिकारेण सह कर्तव्यमिति निर्णयसमर्थनं राज्याधिकारः स्ववाक्यं मृषा न करोतीत्याशयैव ॥

सप्तत्रिंशोऽध्यायः

अमृतसरनगरस्य महासभा

युद्धशासनप्रचारे परःशताः पंजाबप्रदेशस्थजना निर्बद्धा एतद्विचारकाणि न्यायस्थानानि नाममात्रन्यायस्थानान्यभवन्। तान्यत्यल्पसाक्ष्यमाश्रित्य कारागृहवासदंडः सर्वेषामेव व्यधीयत। एतान् परःशताञ्जनान् पंजाबराज्याधिकारेण चिरकालं कारागृहबद्धान् विधातुं न शक्यमासीत्। सर्वत एतत्परमान्यायविषये लोकापवादप्रसंगादेताञ्जनान् कारागृहे स्थापयितुमसाध्यमासीत्। महासभायाः प्रारंभात्पूर्वं प्रायः सर्वे बंदयो विमुक्ताः। महासभायां प्रवर्तमानायामेव लालाहरिकिसनलालमहाशयप्रभृतयो नायका व्यमुच्यन्त। 'अली'भ्रातरौ कारागृहात्सद्यस्तत्रागत्यावतीर्णौ। जनस्य -संतोषः पारशून्य आसीत् पंडितमोतीलालनेहरूमहाशयः सभाध्यक्ष आसीत्। अयमत्युत्कृष्टागमां 'वकील'वृत्तिं परित्यज्य स्वकीयनष्टमनवधाय पंजाबप्रदेशमागत्य' तत्रावस्थाय देशसेवां चचार। स्वामीश्रद्धानंदः स्वागतसमितेरध्यक्ष आसीत्। अद्ययावन्महासभाया वार्षिकसंमेलनेषु मम भाग एतावानेवासीत्—

Funding by IKS-MoE

राष्ट्रभाषायां भाषणद्वारा हिन्दीभाषाप्रचारः। अपि च तद्भाषणे विदेशस्थितभारतीयविषयस्य सभाग्रे स्थापनम् । अस्मिन्वर्षे कार्यमधिकमस्तीति न मया गणितम् । परंतु पूर्वमनेकशः संवृत्तमिवाद्यापि पर्यनुयोजनीयं कार्यमकस्मात् मम शीर्षे पर्यपतत् ॥

नवीनसुधारणा अधिकृत्य, चक्रवर्तिनः’ प्रसिद्धपत्रिका तदानीमेव प्रकटीकृता बभूव । ममापि तद्गतं संपूर्णं समर्पकं नासीत् । इतरेषां सर्वेषामपि तदसमर्पकमासीत् । यद्यपि सुधारणाः सदोषास्तथापि स्वीकारयोग्या इति तदा मम प्रत्यभात् । मम तद्भाषायां तत्प्रसिद्धपत्रिकायां च लॉर्डसिंहमहाशयस्य हस्तक्षेपोऽस्तीत्यदृश्यत । एतन्ममाशाजनकमस्फुरत् । परंतु लोकमान्यतिलक–लोकबंधुचित्तरंजनदासमहाशयप्रभृत्यनुभविनो नायकाः शिरःकम्पं चक्रुः । पंडितभारतभूषणमालवीयजीमहाशयस्तटस्थः स्थितः ॥

पंडितभारतभूषणमालवीयजीमहाशयो मह्य स्वप्रकोष्टे आश्रयमदात् । हिन्दुविश्वविद्यानिलयस्य स्थापनकाले तस्य जीवनं बहुसरलमिति विदितमासीत् । परंत्वस्मिन्संदर्भे तस्य प्रकोष्ट एव मया विद्यमानत्वात्तस्य दिनचर्यामत्यंतसूक्ष्मतया द्रष्टुं मयावकाशो लब्धः । यन्मदीयचक्षुःपतितं तन्ममाश्चर्येण संतोषेण च पूरयामास । तस्य प्रकोष्टोऽकिंचनानां धर्मसत्रमिव दृश्यते स्म । एकान्तादपरान्तं गंतुमिव दुष्करमासीत् । यतस्तावद्भिर्जनैः पूर्णमासीत् । यः कोऽपि वा भवतु । या काचिद्वेला वास्तु । तत्रागन्तुं शक्यम् । तथागतानां तेन सह वर्तितुं कालनियमो नासीत् । अस्य कुटीरस्यैकस्मिन् कोणे मम मंचो गांभीर्येण प्रकाशते स्म । परंतु सर्वमध्यायं मालवीयस्य जीवनसंप्रदायस्य वर्णनेन पूरयितुं नार्हम् । इतः प्रकृतविषयं ग्रहीष्यामः ॥

एवं मम प्रत्यहं मालवीयेन चर्चयितुं साध्यमभूत् । सोऽयं यथा ज्येष्ठभ्रातानुजं ब्रवीति तथा विविधपक्षाणामभिप्रायान्मम वर्णयति स्म । सुधारणानां संबद्धनियमस्योपरि चर्चायां मया भागिना भवितव्यमेवेति दृष्टम् । पंजाबदेशस्यात्याचारानधिकृत्य महासभाया आख्याने लेखने मम पर्यनुयोज्यताप्यासीदतस्तत्संबंधे कर्तुमवशिष्टानामनेकविषयाणां मम लक्ष्यं दातुमावश्यकमिति मम प्रत्यभात् । अस्मिन्विज्ञाते राज्याधिकारेण सह व्यवहर्तव्यमप्यासीत् । अपि चैवमेव ‘ खिलाफत ’प्रश्नश्च स्थितः । एतन्मुक्त्वा तदा मॉंटेग्युमहाशयो भरतखंडं न वंचयति इतरेऽपि तं तथा कर्तुमनुजानन्तीत्यासीद्विश्वासः । ‘ अली ’भ्रातृप्रभृतिबंदीनां बंधविमोचनं मया शुभसूचनेति दृष्टम् । एवं स्थिते सुधारणा अपरित्यज्य स्वीकारनिर्णय एवोचित इति मम प्रत्यभात् । देशबंधुचित्तरंजनदासमहाशयस्तु सुधारणाः केवलमल्पासमर्पकाश्च भवन्तीत्यतस्ते निराकर्तव्या इति दृढाभिप्रायवानासीत् । लोकमान्यतिलकमहाशयस्तटस्थः स्थित इति वक्तव्यम् । परंत्वसौ स्वालंबनं देशबन्धुमहाशयस्य अनुमतनिर्णयस्य दातुं निश्चित आसीत् ॥

एतादृशपक्वानुभविभिः सहस्रसमरेषु कृतपरिश्रमैः सर्वैर्मान्यैर्नायकैर्मतभेदः सहनातीत आसीत् । परंत्वन्यतोंऽतःसाक्षिण आज्ञा स्पष्टाभवत् । महासभाधिवेशनस्यावशिष्टभागे ममानुपस्थि-

तिरेव क्षेमकारिणी एवं कृतेऽहं तादृशमान्य प्रमुखैर्भिन्नाभिप्रायोऽहमिति वक्तुमावश्यकता परिह्रियते इति पंडितमालवीयजीमहाशयस्य पंडितमोतीलालमहाशयस्याप्यसूचयम् ।।

परंतु ज्येष्ठावेतौ न संमेनाते । इयं सूचना लालाहरिकिशनलालमहाशयस्य कथंचिज्ज्ञाताभूत् । स चोक्तवान्यथा–तत्सर्वं ,न भवितुमर्हति । तेन पंजाबदेशवासिनां खेदो भविष्यतीति । ममायं विषयो लोकमान्य-झीणा-देशबंधुमहाशयैः सह चर्चितः । संकटं परिहर्तुं मार्गः कोऽपि न दृष्टः । पर्यंते मम दुःखं मालवीयजीमहाशयस्य व्यज्ञापयम् । उभयपक्षयोः संमतिर्मे न शक्या प्रतिभाति । मम निर्णयः प्रस्तावनीयो यदि तद्विषये सभाया मतं निर्धारयितुं ' वोट '(मतसूचनम्) ग्रहीतव्यं भवति । तस्यात्र न किमपि संविधानं दृश्यते । महासभाया अधिनिवेशने हस्तोद्यमनेनैव ' वोट ' ग्रहणमद्यावधिकोऽभ्यासः । अस्य फलं च सदस्यानां प्रेक्षकाणां च व्यत्यासो न कर्तुं शक्यः एतादृशमहासमूहेषु ' वोट ' गणयितुं साधनमेव नास्ति । सर्वस्यास्य सारांशोऽयं भवति यद्यप्यहं ' वोट ' गणयितुमिच्छेयं तस्यानुकूल्यं नास्ति । अर्थोऽपि न । परंतु लालाहरकिशनलालमहाशयः सहायार्थमागतः । अस्य कर्तव्यसंविधानस्य भारमवहत् । तेनोक्तं यथा––' वोट'ग्रहणदिवसे प्रेक्षकान्न प्रवेशयामः । गणनाविचारो ममास्तु । भवता महासभां त्यक्त्वा न गंतव्यमिति ।।

पर्यंतेऽहं पराजितः । मम निर्णयं व्यरचयम् । तं सभाग्रे स्थापयितुममंसि । हृदयमधैर्येण कंपमानमासीत् । पंडितमालवीयजीमहाशयश्चेमं निर्णयं सभायां पुष्टीकुर्यातामिति निर्धारितम् । यद्यप्यस्मन्मतभेदे तिलकोऽपि जठरसंकटं नासीत् । अस्मद्भाषणेषु च तर्कं विहाय नान्यदासीत् । तथाप्यस्मासु भेदस्यावस्थितिरेव जनानां संमता नासीदिति मम मनोगोचरमागतम् । एतत्तेषां मनसि क्लेशमजनयत् । ऐकमत्यं हि तैरपेक्षितम् ।।

भाषणेषु विद्यमानेष्वस्मदांतरिकं भेदमपनेतुं वेदिकोपरि प्रयत्ना भवन्ति स्म । एतदुद्देशेन नायकेषु पत्रखंडा एकैकशः प्रचलन्ति स्म । मालवीयजीमहाशयः समाधानमुत्पादयितुं सर्वसाहसं चकार । तत्कालमेव जयरामदासमहाशयो निर्णयस्य शोधनं मम हस्ते प्रदायास्मिन्संदर्भे प्रतिनिधीन् ' वोट 'प्रदान् संकटादुत्तारयितव्यमिति प्रार्थयामास । तस्य शोधनं ममोचितमेव प्रत्यभात् । मालवीयस्य दृष्टिस्तावदाशाकिरणानन्वेषयन्ती चतुर्षु कालेष्वपि निपतति स्म । जयराममहाशयस्य शोधनमुभयपक्षसमाधानकरं मम प्रतिभातीति मालवीयजीमहाशयो मह्यमब्रवीत् । ततश्च लोकमान्यमहाशयस्य प्रादर्शयाम । देशबंधु महाशयो मनःपूर्वकं संमन्यते यदि ममापि संमतं इत्युवाच सः । देशबंधुमहाशयो विपिनचंद्रपालजीमहाशयमैक्षत । मालवीयजीमहाशय आशापूर्णोऽभवत् । मालवीयजीमहाशयस्य शोधनपत्रखंडमाक्षिप्य देशबंधुमहाशयस्य स्पष्टमेव तथास्त्विति वचनोदीरणात्पूर्वमेव मालवीयजीमहाशयः प्रतिनिधिसहोदराः सर्व समापितमित्युच्चैरवोचत् । ततो यत्संवृत्तं तद्वर्णयितुं न शक्यम् । करास्फोटनशब्देनोपरितनमावरणमकंपत । तत्कालपर्यंतं निराशयाग्रस्तानि सभासदां मुखान्यानंदेन प्रचकाशिरे ।।

Funding by IKS-MoE

शोधनविषयं विशदीकृत्य वक्तुं नावश्यकम् । एतत्प्रकरणविषयभूतेषु मम प्रयोगेषु एकेन निर्णयभारः कथं मया वोढ इति निवेदनमेव ममोद्देशः । इयं समाहितिर्मम पर्यनुयोज्यतामधिकमवर्धयत् ॥

अष्टात्रिंशोऽध्यायः

महासभाप्रवेशः

अमृतसरस्य महासभा संविधानेषु या महासभा सा नीतिशास्त्रे प्रथमोपदेश इति मया मन्तव्यम् ।

व्यतीतमहासभासु ममोपस्थितिर्मम महासभानुशासनस्य वार्षिकं नवीकरणं नान्यथा । विविक्तजनस्य कार्यं विना कार्यान्तरं ममावस्थितं भवतीति न कदाप्यहममंसि। न च मयाधिकमपेक्षितम् ।

अमृतसरे ममानुभवः प्रादर्शयद्यथा यत्राहं यादृशं विशेषमाप्तवान्येन च महासभाया उपयोगो भवेत्तादृशानि एकद्विवस्तूनि ममासन्निति । मम तावल्लक्षयितुं शक्यम् । यथा लोकमान्य – देशबंधु – पंडितमोतीलालजीमहाशया अपि चेतरे नायकाः पंजाबदेशविचारणसंबंधे मम कार्येण संतुष्टा इति । तेषामव्यवस्थितमेलनेषु ,यत्र विषये समितेर्निर्णयाः समुत्पन्ना मामाह्वयन्ति स्म । प्रमुखानां यत्र महती श्रद्धा यत्र च तेषां सेवावश्यकी बभूव । कदाचिद्नधिकारिणोऽप्येषु मेलनेषु प्रवेशं लेभिरे ॥

आगामिवर्षसंबंधे विषयद्वये ममासीत्कुतूहलम् । यतस्तत्संबधे मम प्रायो योग्यताविशेष आसीत् । अत्र ‘जलियांवाला’हत्याकांडस्मारकमेकं महासभैतादृशस्मारकमावश्यकमिति निर्णयस्यात्युत्साहेन संमतिं ददौ । एतदर्थे पंचलक्षरूप्यकाः संग्रहीतव्या आसन् । अहमेको धर्मदर्शीति नियुक्तः । सार्वजनिककार्यार्थे भिक्षाटनप्रसंगे प्राप्ते मालवीयजीमहाशयो भिक्षुकचक्रवर्तीति बिरुदमाप । परंतु विषयेऽस्मिंस्तदपेक्षयाहं नाल्पतर इति मम विदितमासीत् । ममेमां योग्यतां पर्यजाने दक्षिणाफ्रिकादेशे । हिन्दुस्थानस्य राजमहाराजेभ्यः परःसहस्राणि रूप्यकाणि ग्रहीतुं मालवीयजीमहाशये स्थितमिंद्रजालमनन्यं मयि नासीत् । परंतु ‘जलियांवाला ’ स्मारकनिधये राजमहाराजानां संनिधिं गंतुं नास्ति प्रमेयमिति मम विदितमासीत् । एवं निरीक्षितरीत्या धनसंचयस्य मुख्यपर्यनुयोग्यता ममोपरि पतिता । मोऽहमय्यामुदारनागरिका हस्तपूर्णं धनमदुः । इदानीमेतत्स्मारकस्य नाम्ना कोशे निक्षिप्तद्रव्यमल्पं नास्ति । परंत्वद्यतनश्वस्तनसमस्या कथमिति चेद्धिन्दुमुसलमानशीखजनानां संमिलितरक्तेन पवित्रायां तस्यां भूमौ कया रीत्या मंदिरं निर्मातव्यमिति । तिस्रः संस्था एताः मैत्र्या प्रेम्णा चैकीभवितव्याः । परं बहिर्दृश्यमात्रेण परस्परमभियोगे मग्ना भवन्ति । एतन्मध्ये जनांगं निधिः कथमुपयोक्तव्य इति मोहितं निःशब्दं तिष्ठति ॥

Funding by IKS-MoE

मम योग्यताविशेषद्वये द्वितीयो विषयो लेखनम्। यः कोऽपि वा विषयोऽस्तु । तस्य संक्षेपेण व्यक्तीकरणशक्तिर्मय्यासीदिति महासभाप्रमुखानामवधाने स्थितम्। अयं गुणश्चिरकालाभ्यासेन संपादितस्तदानीं महासभाया अंगविधानं गोखलेमहाशयेन निर्मितमासीत्। तैर्विरचितकतिपयसूत्राणामाधारेण महासभायंत्रं चलति स्म । एषां सूत्राणामुद्भवस्य सुकुतूहलमितिहासमहं गोखलेमुखादेवाशृणवम्। परंतु महासभायाः कार्यकलापो वर्षे वर्षे वर्धमान इतीमानि सूत्राण्यसमर्पकाणि बभूवुरिति सर्वेषां प्रतिभाति स्म। अयं प्रश्न : प्रतिवर्षं चर्चास्पदं भवति स्म। तदानीं महासभाया अधिवेशनेषु कार्यव्यवस्था वा वर्षमध्ये संभवनीयानिरीक्षितसंनिवेशानां पर्याप्तकार्यक्रमं निर्धारयितुं संविधानं वा नासीत् । तदानीं विद्यमाननियमाननुसृत्य त्रयाणां कार्यदर्शिनां स्थानमासीत् । एषामप्येक एव वस्तुतः कार्यं करोति स्म। अयमेकोऽपि वर्षपूर्णं कार्यं न चक्रे। तेऽन्यसहायं विना महासभायाः कार्यं चालयद्भिः पुरस्तादालोचयद्भिः पूर्वं महासभाया वोढ पर्यनुयोज्यतां वर्तमानसंवत्सरे निर्वाहयितुं कथं साध्यम्। तस्मिन्वर्षेऽयं प्रश्न इतोप्यधिकमहत्वमाप्नोतीति सर्वैर्निरीक्षितम् । सार्वजनिकविचारांश्चर्चयितुं महासभात्यगाधासीत्। महासभायाः सदस्या इयंत इति वा ईदृगीदृक्प्रांतेनैतावदेतावज्जनप्रतिनिधयः प्रेक्षणीया इति वा नियमो नासीत्। एवंस्थितामनायकपरिस्थितिमुत्तमां कर्तुं किमपि संविधानमावश्यकमिति सर्वेषां दृश्यते स्म। अहं महासभाया व्यवस्थाक्रमं रचयितुं संमतिमदाम् । एकं नियममनुरुध्य तदेतद्यथा जनानामुपर्यत्यंतप्रभावशालिनौ नायकौ द्वौ लोकमान्य-देशबंधुमहाशयाविति दृष्टम् । जनतापक्षे तौ द्वावप्यंगविधानरचनासमितौ मया सह सदस्यौ भवतामिति प्रार्थितवान्। परंतु तावेतौ व्यक्तितो रचनाभागिनौ भवितुमसाध्यमिति स्पष्टमासीत्। अतस्तौ मुक्त्वा तद्विश्वासपात्रौ द्वौ मया सह समितेर्नियोक्तव्यावस्यां च समितौ केवलं त्रिभिरेव भवितव्यमित्यहमसूचयम्। अस्य दिवंगतलोकमान्यदिवंगतदेशबंधुमहाशयौ संमतिं ददतुः। लोकमान्यमहाशयः स्वपक्षीय श्री. केलकरमहाशयं देशबंधुमहाशयश्च आई. बी. सेनमहाशयं न्ययोजयताम्। समितेः सदस्यानां सकृदपि संमिलितुं न शक्यमासीत्। परंतु पत्रव्यवहारेण परस्परमभिप्रायान् वेदितुं साध्यमासीत्। पर्यंतेऽस्माभिरैकमत्याख्यानं समर्पितम् । ममास्मिन् व्यवस्थाक्रमे किंचिदभिमानोऽस्ति । तच्चेत् संपूर्णं कार्यरंगेऽवतारितं तदास्माकं स्वराज्यं लप्स्यत इति मेऽभिप्रायः । यस्माद्दिनादियं पर्यनुयोज्यता मया वोढा ततो मे वास्तविको महासभाप्रवेश इति वक्तुं शक्यम् ॥

Funding by IKS-MoE

नवत्रिंशोऽध्यायः

‘खादी’जन्म

अष्टोत्तरैकोनविंशतिसहस्रतमे वर्षे हिन्दुस्वराज्यपत्रे भारतदेशस्य वर्धमानदारिद्र्यरोगस्य सर्वरोगापहारकमौषधमिति यमवर्णयं स वायदंडः ‘चरखो’ वा मया दृष्ट इति न स्मरामि। तस्मिन् पुस्तके मयैतदवगतं यद्यद्देशस्य निष्पेषकं दारिद्र्यमपसारयितुं साहाय्यं करोति तत्तदेव स्वराज्यस्थापनं करोतीति। पंचदशोत्तरैकोनविंशतिसहस्रतमे वर्षे दक्षिणाफ्रिकादेशतोऽहं पश्चाद्वृत्तः। तदा मया वस्तुतः‘चरखो’ न दृष्टः। साब्रमत्यां सत्याग्रहाश्रमनिर्माणकाले कतिपयान् वायदंडान् वयं प्रावेशयाम। तत्प्रवेशनादनंतरमेव प्रातिकूल्यमुत्थितम्। सर्वे वयमुदारवृत्तिग्राहिणोऽथवा कार्यपराः। नैकोऽप्यस्माकं शिल्पी बभूव। वायदंडेषु कार्यकरणात्पूर्वमस्माकमेको वयनकुशलो वयनं शिक्षयितुमावश्यक आसीत्। पर्यंते पालनपुरग्रामादेको लब्धः। किंतु तस्य सर्वं शिल्पिज्ञानमस्माकं न ददौ। परंतु मगनलालगांधिमहाशयः शीघ्रमेव निराशो न संवृत्तः। शिल्पयंत्रकार्ये स्वभावतः समर्थोऽचिराच्छिल्पविद्यामग्रहीत्। अपि चैकैकशः कतिपयनूतनवायकाः शिक्षिता आश्रमे। स्वहस्तनिर्मितवस्त्रेणात्मानं वासयितुं शक्यं यथा स्यात्तथा भवितुमस्माकमुद्देश आसीत्। अतो वयं तत्क्षणमेव यंत्रनिर्मितवस्त्राणि परित्यज्याश्रमस्य सर्वे जना स्वदेशीयसूत्रैर्निर्मितानि वस्त्राण्येव धारयितुं निश्चिता बभूवुः। एतदभ्यासस्वीकारो महान्तमनुभवमानिनाय। वायकानां जीवितनियमान् साक्षात्संपर्केणावगन्तुं शक्तानकरोत्। अपि चोत्पन्नस्य प्रमाणं सूत्रसंपादनमार्गे स्थितानंतरायान् वंचनाग्रस्ताःभवितुं मार्गोऽपि च पर्यन्ते सर्वदा वर्धमानं ऋणित्वं एतत्सर्वं ज्ञातुं शक्तांश्चकार। यावदस्माकमावश्यकं तावत्सर्वं लब्धुं न समर्था अभूम। अतोऽवशिष्टः पक्षो हस्तवेमस्तंतुवायाद्वस्त्रं संभरणीयम्। परंतु सज्जस्थितवस्त्रं भारतीययंत्रसूत्रनिर्मितवस्त्रविक्रयिभ्यो वा तंतुवायेभ्यो वा लब्धुं न सुकरम्। तंतुवायैर्निर्मितं वस्त्रं सर्वं समीचीनं विदेशीयसूत्रादेव। यतो भारतीययंत्राणि तर्कुद्वारेण तंतूल चक्रुः। अद्यापि यंत्राणामुत्पादनमत्यल्पं स्वदेशीयसूत्राणां तंतुवायान् पर्यन्ते महता प्रयत्नेन लब्धुमशक्नुम। नियमस्तु तैरुत्पादितं सर्वमस्मद्धारणवस्त्राणामिति यंत्रनिर्मितसूत्राणां वस्त्रस्वीकारेण सुहृदां च मध्ये प्रसारणेन भारतीयसूत्रकरणयंत्राणामैच्छिकप्रतिनिधीभूताः। एतद्यंत्रैः सह संपर्कमजनयत्। तेन तेषां कार्यसंविधानं कार्यप्रत्यूहांश्च ज्ञातुमवकाशो लब्धः। यंत्राणामुद्देशो निर्मितसूत्रेण तंतुवायानधिकाधिकं कर्तुमासीत्। हस्तवेमतंतुवायैस्तेषां सहकारः यथेप्सितो नासीत्। किंत्वपरिहार्योऽनित्यश्च। अस्मत्स्वकीयसूत्रस्य तांतवकरणे वयमातुराः स्थिताः। यावद्वयमेतत् कर्तुमवस्थितास्तावद्यंत्राणामालंबनं स्थास्यतीति स्पष्टम्। भारतीययंत्राणां प्रतिनिधीभूय देशसेवां कर्तुं समर्था भवेमेति नान्वभूम॥

Funding by IKS-MoE

संकटानां परंपरा ददृशे । तांतवचक्रं वा तंतुवायान् वा कथं तांतवं करणीयमिति शिक्षयितुमलभेमहि । आश्रमे वयं कतिपयराटानुपायोजयाम । किंत्वेतान्‘चरखा’रूपेणोपयोक्तुं साध्यमिति कल्पनैवास्माकं नासीत् । एकस्मिन् दिने कालिदासवकीलमहाशयः कथं तांतत्रं करणीयमिति प्रदर्शयन्तीं स्त्रियं दृष्टवानहमिति न्यवेदयत् । नूतनविषयाणां सौलभ्येन शिक्षणे प्रवीण इति ज्ञातमेकमस्मदाश्रमादस्याः पार्श्वं प्राहैष्म । किंतु सोऽप्येतत्कलामर्माण्यवशीकृत्य प्रतिनिवृत्तः ॥

इत्थं कालोऽपयातः । एतेन सह ममौत्सुक्यमपि वर्धमानमासीत् । अकस्मादाश्रमगतानस्मिन्विषये एतेभ्यः किमपि ज्ञातेन न भाव्यमिति तांतत्रं प्रतिष्ठव्यमासीत् । किं तु कऊायां स्त्रियः केवलमभ्यस्यन्ति स्म । तास्त्रपि सान्तिमावस्थामागता । देशस्य क्वचिदपिः कोणे एका द्वौ वा स्थितौ यदि तानन्वेषयितुं स्त्रिय एवापेक्ष्यन्त ॥

सप्तदशोत्तरैकोनविंशे वर्षे भरूचपत्तने संवृत्तशिक्षणपरिषदध्यक्षो भवितुं सुहृदस्तत्र मामनैषुः । तत्रैवाहं तां महासाहसिनीं गंगाबाईमहाशयामदर्शम् । सा विधवा । तथापि तस्याः साहसं निरवधिकमासीत् । सामान्यगणनया सा यद्यपि तावच्छिक्षिता नासीत्तथापि धैर्ये ज्ञाने च सास्मत्सुशिक्षितस्त्रीजनमतीवातिक्रांता । सा न केवलमस्पृश्यताकलंकं परित्यक्तवती परं निर्भयेनास्पृश्यैर्मिलित्वा तत्सेवामकरोत् । तस्याः स्वीयं विषयमासीत् । यदस्या आवश्यकं तदत्यल्पम् । सा सुघटितशरीरा सहचरं विना सर्वत्र संचारं करोति स्म । अश्वारोहणं नाम तस्याः सामान्यम् । गोधरानगरे संवृत्तपरिषदि मम तया सह गाढः परिचयोऽभूत् । ‘चरखा’संबंधे मम दुःखमस्य न्यवेदयम् । अहं राटं परिशोधयितुं निरंतरं प्रयतिष्य इत्युक्त्वा सा मम भारमल्पीचकार ॥

चत्वारिंशोऽध्यायः

पर्यंते लब्धम्

अनेकदिनानि गुजरातदेशे पर्यट्य गायकवाडसंस्थानवर्तिनि विजापुरनामके ग्रामे गंगाबाईमहाशया पर्यन्ते ‘चरखम्’ लेभे । तत्रानेकजनानां समीपे ‘चरखा’ बभूवुः । परंतु बहो कालात् पूर्वमेव सर्वं कच्चरमित्युपरिकोष्ठेषु प्राक्षिपन् । यदि कश्चिदस्माकमनारतं तूलपिंडान् दद्याद्यदि च वीततांतवं क्रीणीयात्तदा वयं पुनस्तांतवाय सिद्धाः स्म इति गंगाबाईमहाशयामब्रवन् । इमं संतोषवृत्तांतं गंगाबाईमहाशया मह्यं न्यवेदयत् । तूलपिंडसंभृतिर्दुष्करा प्रत्यभात् । अहमेतत्कष्टं दिवंगत-उमरसुबानीमहाशयं न्यवेदयम् । स च स्वीययंत्रात् प्रेषयिष्यामीति प्रतिपद्यातंकमेकं पर्यहार्षीत् । सुबानीमहाशयाल्लब्धांस्तूलपिंडान् गंगाबाईमहाशयायै प्राहैषम् । अल्पेनैव कालेन

Funding by IKS-MoE

सूत्रमागंतुमुपाक्रमत्। अस्य प्रवाहः कियत् त्वरित आसीदिति चेत्तं निर्वोढुं मे एका समस्या बभूव ॥

उमरसुबानीमहाशयस्यौदार्यं तावदगाधमासीत् । परंतु तेनापरिमितं प्रयोजनं लब्धुं नोचितमासीत् । सर्वदा तन्मूलकं तूलपिंडानामानयनं मम मनःसंकोचस्य कारणमभूत्। एतदधिकं यंत्रनिर्मिततूलपिंडानुपयोक्तमेव प्रथमतो दोष इति मम भासते स्म। यत्रनिर्मिततूलपिंडानुपयोजयेद्यदि यंत्रनिर्मितसूत्रं कस्मान्नोपयोजयेत् । अस्मत्पूर्विकाणां न कुतश्चिद्यंत्रात्तूलपिंडा लभ्यन्ते स्म । एवं चेत्ते तूलपिंडान् कथं कुर्वन्ति स्म । मम मनस्येवंविचारेषु सत्सु तूलपिंडप्रापका ऊर्णामार्जका अन्वेषणीया इति गंगाबाईमहाशयाया असूचयम् । सा सविश्वासं कार्यं स्वीचकार । सा ऊर्णामार्जकं तूलमार्जने सज्जीकृतं नियोजयामास । सा च प्रतिमासं पंचत्रिंशद्रूप्यकाणां तदधिकं वा वेतनममार्गत् । अहं तत्काले यद्वा तद्वा मूल्यमस्तु तदधिकमिति नैवागणयम्। संमृष्टतूलात् तूलपिंडं कर्तुं सा कतिपयबालकानशिक्षयत्। अहं मोहमय्यां तूलार्थे भिक्षामयाचे । श्री यशवंतप्रसाददेसाईमहाशयस्तत्क्षणमिमं भारमुवाह । एवं गंगाबाईमहाशयायाः साहसं निरीक्षितादधिकं प्रवृद्धम् । विजापुरग्रामे वीतसूत्रस्य वयनाय जनमन्वैषयत्। शीघ्रमेव विजापुर ‘ खादी ’ प्रसिद्धमभूत् ॥

एतेषु सर्वेषूद्यमेषु विजापुरे निर्वृत्ते आश्रमे ‘चरखो’ त्वरितगत्या प्रमुखस्थानं लेभे। स्वस्य सहजां यंत्रनिर्माणशक्तिं सर्वामुपयुज्य मगनलालगांधिमहाशयस्तांतवचक्रमनेकविधयोत्तमं चकार। चक्राणि तत्सहायकेतरसामग्री चाश्रमे सिद्धानि भवितुमुपचक्रमिरे। आश्रमे प्रथमतो निर्मित ‘ खाद्या ’ ‘ गजस्य ’ सप्तदशाणका मौल्यमासीत्। एतदतिस्थूल ‘ खादी ’ तन्मूल्येन क्रेतव्यमिति मित्राणां वक्तुं न विकल्पितं मया ॥

अहं मोहमय्यां रुग्ण आसम्। तथापि मम तत्र चक्रमन्वेषयितुं पर्याप्तं चैतन्यमासीत्। पर्यन्ते द्वौ सूत्रकारौ मम चक्षुःपथमागतौ । तौ एक ‘ सेर ’ चतुर्विंशति ‘ तोलानि ’ अथवा प्रायः $\frac{२}{४}$ ‘ पौंड ’सूत्रस्यैकं रूप्यकं मौल्यमगृहीताम्। तदानीं मे ‘ खाद्या ’ अर्थशास्त्रं न विदितम्। तदानीं हस्तनिर्मितसूत्रं लब्धुं मूल्यं यद्वा तद्वा भवतु तदधिकमिति नाहमगणयम्। विजापुरग्रामे प्रचलितमूल्यं एतन्मूल्यं च तुलयित्वा परीक्ष्यमाणे मां वंचयन्ति स्मेति ज्ञातम्। ते सूत्रकाराः स्वीयमूल्यमल्पीकर्तुं न संमेनिरे । ततोऽहं तान् परित्यक्तवान् । किंतु तेभ्य उपयोगं विना नास्थीयत । ते श्रीमती अवंतिकाबाई-रमाबाईकामदार-महाशयाभ्यां श्रीशंकरलालबेंकरमहाशयस्य मातापि च श्रीमतीवसुमतीबाईमहाशयायै च सूत्रं शिक्षयामासुः। चक्रं मम प्रकोष्टे आनंदेन' गातुमुपाक्रमत । अहं पुनरारोग्यस्थितिं प्राप्तुं तस्य मधुरसंगीतेन कृतसाहाय्यं नात्यल्पमिति उक्तिर्नातिशयिता। तस्य परिणामः शारीरिकापेक्षया मानसिकोऽधिकमासीदित्यंगीकरोमि । परंत्वेतन्मनुष्यस्य शरीरोपरि मानसिकपरिणामस्य प्रभावः कियानिति

व्यक्तीभवति । अहमपि चक्रस्य हस्तमाक्षिप्तवान् परंतु तत्कालेऽधिकं मया न कृतम् । पुनः मोहमय्यामपि सैव पुराणी समस्या । हस्तनिर्मिततांतवस्य संपादनं प्राप्तम् । प्रतिदिनमेकः तूलमार्जकः स्वधनुः ‘ ठैं ’ इति शब्दयन् श्रीरेवाशंकरझवेरीमहाशयस्य गृहस्याग्रे गच्छति स्म । सा तस्मिन्नाह्वाय्य विचार्यमाणे शय्यापूरणाय कार्पासमार्जतीति विदितमासीत् । तूलपिंडं कर्तुं कार्पासमार्जनाय स संमेने । तेन मार्गिता भृतिरधिकासीत् । तथाप्यहं तद्दत्तवान् । एवं निर्मितसत्रं पवित्रैकादशीपूजार्थं मालिकां कर्तुं मम वैष्णवमित्रेभ्यः प्रादाम् । श्रीशिवजीमहाशयो मोहमयीनगरे एकां तांतवश्रेणीमुदघाटयत् । एभ्यः प्रयोगेभ्यो बहुधनं व्ययीकृतम् । किंतु तत्सर्वं ‘ खाद्यां ’ विश्वासिनो देशभक्ताः सुहृदः संतोषेणोहुः । एवं व्ययीकृतं धनं न व्यर्थमासीदिति मम नम्राभिप्रायः । तेनास्माभिरमूल्योऽनुभवो लब्धः । ‘चरख’स्य संभाव्योपयोगः स्पष्ट आसीत् ॥

इदानीमहं मम परिधानाय सर्वां ‘ खादी’मेवोपयोक्तुमातुरोऽभवम् । मम ‘धोती’ अद्यापि स्वदेशीयंत्रस्यैवासीत् । आश्रमे विजापुरग्रामे च निर्मीयमाण-‘ खाद्या ’ विशालता त्रिंशदंगुलमात्रा बभूव । एतस्मिन्मासे पंचचत्वारिंशदंगुलखादी धोत्रं न लभ्यते चेदहं स्थूलां ‘ खादी ’ धोतीमेव परिधास्य इति गंगाबाईमहाशयायै सूचनामदाम् । एतेन साकस्मात्त्रासिता तथापि मे प्रार्थना तद्योग्यतां नातिक्रान्ता । सा एकमासात्पूर्वमेवैकं धोत्रयुगलं ५० विशालं प्राहैषीत् । यद्येवं सा नाकरोत्तदा मम संनिवेशः कष्टोऽभविष्यत् । एतेन सा मामुद्धृतवती ॥

प्रायशोऽस्मिन्नेव समये श्रीलक्ष्मीदासमहाशयो ‘ रामजी’नामकतंतुवायं तस्य भार्यां गंगाबाईमहाशयां च ‘ लाठी’ नामकग्रामादाश्रममानीयाश्रमे ‘ खादी’मवाययत् । ‘ खादी’प्रसार एतद्दंपतीभ्यां वोढं पात्रं नागण्यमासीत् । गुजरातदेशे तद्बहिश्च । बहूनामेतौ हस्ततांतवसूत्रस्य वयनं शिक्षयामासतुः । गंगाबाईमहाशयां वेम्नश्चालयन्तीमुपविष्टां द्रष्टुं विस्मयदृश्यमभूत् । निरक्षरापीयं स्वाधीनचित्तसहोदरी वेमश्चालयन्त्युपविष्टा चेत्तस्या मानसीदृष्टिस्तस्मिन्नेव लीना भवति । तदानीं तल्लक्ष्यमितरत्राक्रष्टुं दुष्करम् । वेमानं विहाय यथा तद्दृष्टिरितरत्र पतेत्तथाकर्तुमितोऽपि कष्टतरम् ॥

Funding by IKS-MoE

एकचत्वारिंशोऽध्यायः

शिक्षाप्रदं संभाषणम्

‘**खादी**’**प्रयुक्तः** क्षोभः (एषा स्वदेशीक्षोभ इत्याकार्यते स्म) प्रथमतः प्रारंभात्प्रभृति यंत्रस्वामिनां खंडनस्य टीकायाश्च लक्ष्योऽभूत्। उमरसुब्रानीमहाशयः (अयमेव दक्षो यंत्रस्वामी) स्वीयानुभवस्य परिज्ञानस्य च विषयान्ममाख्याति स्म। अपि च इतरयंत्रस्वामिनामभिप्रायानपि मह्यं निवेदयति स्म। एतेषामेकेन कृतो वादस्तन्मानसमग्रहीत्। मया गत्वा गृहस्थो द्रष्टव्य इत्यहं निर्बद्धः। मया संमतम्। सुब्रानीमहाशय आवयोः समागमाय संविधानमकरोत्। यंत्रस्वामी भाषितुमारभत। इतः पूर्वं स्वदेशीप्रगतिरासीदिति भवतो विदितं खलु। मम विदितम्॥

वंगविभजनकाले वयं यंत्रस्वामिनः स्वदेशीप्रगत्या पर्याप्तं लाभं निगीर्णवंतः। सा प्रगतिर्यदाऽत्युग्रासीत्तदा वयं वस्त्रमूल्यमधिकमकार्ष्म। इतरेऽपि हीनतराणि कार्याण्यकरवाम। एतदपि भवतो विदितं स्यात्॥

आम्। एते विषयाः किंचित् किंचिच्छ्रुताः। एतेन मम खेदः संजातः॥

भवतो यतः खेदस्तदर्थमहं जानामि। किंतु तस्य न किंचित्कारणं पश्यामः। अस्माभिर्व्यापारो न खलु जनोपकारबुद्ध्या क्रियते। लाभसंपादनायैव। अस्मत्‘कंपनीनां’ भागदारा अस्माभिस्तर्पणीयाः। पदार्थस्य मूल्यं मार्गणेन निश्चीयते। मार्गणकृतो यद्यधिका भवेयुस्तदा मूल्यं वर्धेतेति नियमस्य निरोधकाः के। स्वीयगतिप्रचारेण स्वदेशीवस्त्रस्य ग्रहीतृणां संख्या वर्धते यदि तन्मूल्यस्य वृद्धिर्निश्चितेति वंगानां विदितं भवेत्॥

तस्य वचनं निरुध्य मयोक्तं यथा—वंगा अहमिव विश्वसनीयस्वभावा आसन्। यंत्रस्वामिनः स्वदेशस्य विषमसंनिवेशे प्राप्ते वंचनामाश्रित्य विदेशीवस्त्रं स्वदेशीति विक्रेतुमुद्यताः स्वार्थपरा देशघातकाश्च न भविष्यन्तीति वंगा विश्वस्य स्थिता इति॥

भवान् विश्वासशील इति मम विदितमासीत्। अत एवाहं भवंतमत्रागंतुं क्लेशितवान्। सरलमानसा वंगा इव भवानपि प्रमादं न कुर्यादित्यवधानस्थापनाय भवंतं द्रष्टुमिष्टवान्॥

एवमुक्त्वायं पार्श्वस्थितं लेखकमाहूयास्य यंत्रे निर्मितवस्त्राणामादर्शान्प्रदर्शयेत्यवोचत्। तत्प्रदर्शयता तेनोक्तं यथा—इदं पश्यतु भवान्। इदं किलास्मद्यंत्रे नूतनतया निर्मितं प्रतिरूपमिदं सर्वत्र मृग्यते। अन्यवस्त्रेषु निर्मीयमानेष्वनुपयोजितसूत्रेण वयमिदं कुर्मः। अतः सहजतया तस्य मूल्यमल्पम्। वयमिदमुत्तरदिशि हिमाचलस्य कंदरपर्यंतं प्रहेष्यामः। देशे सर्वत्रास्मत्प्रतिनिधयः सन्ति। अतोऽस्माकं प्रतिनिधीनां लोपो नास्तीति स्पष्टं भवति। एतन्मुक्त्वा

हिन्दुस्थानस्यावश्यकवस्त्रापेक्षयात्र सज्जीभवद्वस्त्रमतीवाल्पमित्यवधातव्यम् । अतः स्वदेशीप्रश्न इति चेत्प्रधानतया वस्त्रसंपादनप्रश्न इति परिणमति । पर्याप्तं वस्त्राणि संपाद्य तस्य गुणमुत्तमं विधाय तत्क्षणमेव विदेशीवस्त्राणामागमनं स्वयमेव विरंस्यति । अतो मम सूचनेयती । इदानीं विद्यमानरीत्या स्वगतिप्रचारो निरोधनीयः । भवल्लक्ष्यं नूतनयंत्रकार्यस्थापने परिवर्त्यताम् । अस्माकं यदावश्यकं तत्पर्याप्तवस्त्रनिर्माणमेव । अस्मद्वस्तूनां ग्राहकापेक्षा न विद्यते ॥

पूर्वमेव मया तदेतत्कार्यं क्रियते चेद्यूयं मम प्रयत्नमाशिषा योजयथ खलु । इति पृष्टो मया किंचिदाश्चर्यभरितः प्राह यथा – कथमिदं साध्यम् । भवान्नूतनयंत्राणां स्थापनोद्यममालोचयतीति मन्ये । एवं चेद्भवानभिनंदनार्ह इति ॥

मया तन्न क्रियते । सूत्रनिर्माणचक्रस्य पुनरुज्जीवनप्रवृत्तोऽस्मीति मया विवृत्योक्तम् ॥

किमेतद्भवतोच्यते इति दिग्भ्रांतः पप्रच्छ ॥

अहं तस्य ‘चरख’ विचारं सर्वं मया दीर्घकालेनान्वेषणकथाजातमाख्याय पुनरुक्तं मया यथा भवत इव ममाप्यभिप्रायो विद्यते । अहं वस्तुतो यंत्राणां प्रतिनिधिर्भवितुं नेच्छामि । तेन न किंचित्प्रयोजनमस्तु । तेन देशस्य गुणापेक्षया दोष एव भविता । इतोऽपि बहुकालं यंत्राणां ग्राहकाल्पता न भविष्यति । हस्तसूत्रवस्त्राणां निर्माणाय व्यवस्थाय तद्विनियोगाय पर्याप्तमुपायमधिगंतुं मम कर्तव्यम् । अतः खाद्या उत्पत्तिमुद्दिश्य संपूर्णमवधानं मया दीयते । एतद्विधस्वदेश्यामस्ति मे परमो विश्वासः । यत एतद्द्वारा क्षुधार्तानामुद्योगशून्यानां स्त्रीणामुद्योगलाभो भवेत् । आभिः स्त्रीभिः सूत्रमुत्पाद्य ततो निर्मित‘खाद्या’ हिन्दुस्थानजनानां वेषकल्पनं ममोद्देशः । अयमुद्यमः कियत् फलिष्यतीति वक्तुमशक्यम् । इदानीं तत्केवलमारंभदशायां वर्तते । किंतु मे तत्र संपूर्णविश्वासो विद्यते । यत्किंचिद्वा भवतु । तेनापकृतं न किमपि स्यात् । तथावलोकिते देशोत्पन्नवस्त्रमत्यल्पमपि देशस्य लाभ एव । एवमस्मदुपक्रमे भवदुक्तदोषाः केऽपि न सन्तीति स्पष्टमिति ॥

तेनोत्तरं दत्तं यथा – भवतो व्यवस्थापनाया देशवस्त्रोत्पत्तेर्वर्धनमेव भवदुद्देशश्चेन्मया तद्व्यतिरिक्तं ख्यातव्यं न किंचिदस्ति । एतन्नैसर्गिकबलचलिते यंत्रयुगे सूत्रचक्रप्रगतिः साध्येत्यन्यः प्रश्नः । अहं तावद्भवतो विजयमिच्छामि ॥

Funding by IKS-MoE

द्विचत्वारिंशोऽध्यायः

प्रवाहोद्गमः

इतः ‘खाद्या’ अभिवृद्धिप्राप्तेर्विषये मयाधिकं न लिख्यते । मम विविधकार्यकलापानां लोकावधानागमनात्परं तेषां वृत्तांतलेखनमेषामध्यायानां नोचितम् स्यात् । तथा मया लेखनप्रयत्नोऽपि न शक्यः । यतः कारणांतरे सत्यपि तथा कर्तुमेको ग्रंथ एवापेक्ष्यते । मया सत्यसंबंधे प्रवर्तितशोधनेषु कतिपयविषयाः स्वयमेव मम लक्ष्यमागता इति वर्णनमात्राय एषामध्यायानां लेखनोद्देशः ॥

एवं चेदसहयोगप्रचारकथामग्रतो निरूपयिष्यामः । अलीभ्रातृभ्यां प्रवर्तितप्रचंडप्रचारे संपूर्णरभसेन चलिते सति एतद्विषयेऽहं विशेषतो मुसलमाना अहिंसानियमान् कियत्पर्यन्तमाचरितुं शक्नुवन्तीति विषयमुद्दिश्य दिवंगतमौलाना-अब्दुल-बार्यादिमहाशयैः सह उलेमाभिश्च चर्चामकरवम् । पर्यन्त एते सर्वेऽपि ऐकमत्येन इस्लामधर्मः धर्मेऽहिंसाव्यवहारनीतिरूपेणानुसरणं न निरोत्स्यतीति । तन्नीतिसंमतेरनंतरं तां वंचनां विना संपूर्णतया चालयितुं मुसलमाना बद्धा इति चाभिप्रायं ददुः । पर्यंतेऽसहयोगस्य निर्णयः खिलाफतसभायां निवेशितः । दीर्घचर्चानंतरं संमतिं प्राप । एकदालाहाबादनगर एका समितिरेतद्विषयमधिकृत्य सर्वां रात्रिं चर्चितमित्यहं स्पष्टं स्मरामि । प्रथमतो दिवंगतहकीमसाहेबमहाशयोऽहिंसात्मकोऽसहयोगः कार्यरंगे साध्यं न वेति संशेते स्म । संशयनिवृत्तेरनंतरमसहकारं पूर्णमनसा प्रविष्टः । तस्य साहाय्येन तस्यामूल्यलाभः संवृत्तः ॥

इतः स्वल्पेनैव कालेन मिलितायां गुजरातराजकीयपरिषद्यहमसहकारनिर्णयं सभाग्रे न्यवेशयम् । राष्ट्रमहासभायाः पूर्वमेव निर्णयमंगीकर्तुं प्रांतीयपरिषदो नाधिकार इति प्रतिपक्षस्य प्रथम आक्षेपः । अस्योत्तरं मया सूचितं यथा — अयं निर्बंधः पश्चाद्गमनाय न पुनरग्रे गन्तुमन्वेति । अग्रे गन्तुमधस्तनाधीनसंस्था न केवलं पूर्णाधिकारं प्राप्ताः परंतु स्वेष्वावश्यकं धैर्यं स्थैर्यमात्मविश्वासश्च यदि विद्येरंस्तदा प्रगतिमार्गानुसरणं तेषां कर्तव्यमिति । प्रधानसंस्था यद् गौरवं वर्धयितुं प्रयतनस्य परानुज्ञयावश्यकता नास्ति । तेन संभविष्यदपायस्य स्वयं विना प्रधानसंस्थायाः पर्यनुयोगो नास्तीति मया वादः कृतः । अनंतरं निर्णयस्य गुणदोषाणां चर्चा बभूव । अस्य विशेषांशा यथा चर्चायास्तीक्ष्णतापि च परस्परसहनेन गौरवेण च फलितं स्निग्धवातावरणम् । ‘मत’सूचीनां गणनायां निर्णयोऽत्यधिकबहुमतेनांगीकृतोऽभूत् । इत्थमंगीकारे । श्रीवल्लभभाईमहाशयोऽपि च अब्बासतयबजी इति अनयोर्व्यक्तिप्रभावे नः प्राप्तसाहाय्यं नाल्पमासीत् । द्वितीयोऽध्यक्षः स्थितः । तत्स्वीयाभिप्रायपूर्णमेव निर्णयं परमेवासीत् ॥

Funding by IKS-MoE

एतं प्रश्नमधिकृत्यालोचयितुं विंशत्युत्तरैकोनविंशवर्षस्य 'सप्टेम्बर'मासे कलकत्तानगरेऽखिलभारतराष्ट्रमहासभाया अधिवेशनविशेषं मेलयितुं महासभा समितिर्निरधारयत् । सज्जीकरणकार्यं महदासीत् । लालालजपतराय अध्यक्षः कृतः । मोहमयीतः कलकत्तानगरं प्रति 'कांग्रेस' अपि च 'खिलाफत' इत्येतयोर्विशिष्टा 'रैल'शकटीः प्रस्थापयन् । कलकत्तायां प्रतिनिधीनां प्रेक्षमाणानां च स्तोमो मिलितः मौलानाशौकतअलीमहाशयेन प्रार्थितोऽहं अग्निसंचालितशकट्यामसहकारनिर्णयमलिखम् । एतावत्पर्यंतमहमस्य संबद्धनिर्णयेष्वहिंसात्मक इति पदं प्रायशो न प्रयुक्तवान् । भाषणेषु स शब्दोऽवश्यमेवोपयुज्यते स्म । एतद्विषयकः शब्दकोशः पूर्णो नासीत् । अहिंसात्मकशांतिमय इति एतत् संस्कृतपदद्वारा मुसलमानकूटस्थनिवेदयितुमशक्यं प्रत्यभात् । अतोऽहमब्दुलकलामाझादमहाशयमेतदर्थप्रतिपादकं शब्दं सूचयितुमपृच्छम् । सोऽस्य 'बा-अमोन' इति शब्दमेतद्रीत्यासहकारस्य 'तर्के मवालत' इति पदं चासूचयत् ॥

एवमद्यापि मयि 'हिंदी'-'गुजराती' अपि च 'उर्दू' इत्येतासु भाषास्वसहकारस्य संबद्धां शब्दसामग्रीमुपस्थापयितुं सज्जीभवति सत्येतदंतरे मिलंत्या महासभाया अधिवेशनेऽसहयोगरचनाभारो ममोपर्यापतत् । मया पूर्वलिखितनिर्णयेऽहिंसात्मक इति वाक्परित्यक्तासीत् । इदं मम दृष्टिं नैवागतम् । निर्णयस्तथैव तस्यां शकट्यामेव प्रयाणं कुर्वतो मौलानाशौकतअलीमहाशयस्य वशे दत्त आसीत् । तद्रात्रौ मम अहिंसात्मक इति पदस्याभावोऽस्फुरत् । प्रातरहं महादेवदेसाईमहाशयं निर्णयस्य मुद्रणात्पूर्वमेवैतत्स्खलितं समीकृतं यथा स्यात्तथा कर्तव्यमिति प्राहैषम् । परंतु तथानुष्ठानात्पूर्वमेव मुद्रितमासीदिति स्मरामि । विषयनिर्धारकसमितिस्तद्दिने सायं मिलति स्म । अतो मुद्रितप्रतिलिपिः परिवर्तनीया आसीत् । निर्णयस्य शब्दरूपं न सज्जीकृतं चेद्बहुकष्टमभविष्यदिति मम पश्चाद्विदितमासीत् ॥

तथापि मम स्थितिः करुणाजनका बभूव । निर्णयस्यानुमोदकाः के विरोद्धारः के इति नावगतं मया । लालाजीमहाशय एतत् कया रीत्या पश्यतीति न ज्ञातम् । संग्रामाणां शतेऽनुभवशालिनां वीरयोधानां गभीरव्यूहं कलकत्तानगरे योद्धुं सज्जीभूय स्थितमहमपश्यम् । डॉ. बेसंट-पं. मालवीयः-श्री विजयराघवाचार्यः-पं. मोतीलालमहाशयश्च केचिदेषामासन् ॥

मम प्रस्तावे पंजाबदेशस्यात्याचारस्य खिलाफतवचनभंगस्य च चिकित्सायै केवलमसहयोगः प्रस्तावित आसीत् । परंतु तत् श्रीविजयराघवाचार्यस्य मनसः संमतं नासीत् । तेनैवं वादः कृतो यथा—असहयोगः प्रसारणीयश्चेत् सर्वव्यापकस्य महत्तमान्यायस्य संबंधे प्रसारणं विना एकद्वि अन्यायान् वृत्वा तावन्मात्रं किमिति प्रसारणीयम् । स्वराज्यस्याभाव एव राष्ट्रस्य सर्वाधिकारोऽन्यायः । अतः सहकारः स्वराज्यसाधनायैवोपयोक्तव्य इति । पंडितमोतीलालश्च स्वराज्यसाधनं निर्णयांतर्ग्रहीतुमैच्छत् । अहमेतमाशयं तत्क्षणमेव स्वीकृत्य स्वराज्यसाधनं निर्णये लिखितवान् । निर्णयस्य चर्चा समग्रतया पर्यनुयोज्यताबुद्ध्या प्रवृत्ता । वातावरणं किंचिदशांत-

मासीत् । चर्चानंतरं मम प्रस्तावोंऽशीकृतोऽभूत् ॥

असहकारं प्रथमतो मिलितः पंडितमोतीलालः । निर्णयमधिकृत्य तस्य मम च मध्ये संवृत्तः सुमधुरः संवादोऽद्यापि मम स्मृतौ वर्तते । तस्य शब्दानां विषये कतिचित्परिवर्तनान्यसूचयत् । मयापि तथैव परिवर्तितम् । देशबंधोमहाशयस्य प्रेरणाभारं स एवोवाह । देशबंधुमहाशयस्यांतःकरणं यद्यप्यसहयोगे स्थितं तस्य कार्यक्रममाचरितुं जनस्य योग्यतास्ति वा न वेति संशयग्रस्त आसीत् । असौ लालाजीमहाशयश्च संपूर्णमनसा स्वीकृतवंतौ नागपुरस्य महासभायामेव ॥

विशिष्टाधिवेशने लोकमान्यस्यानुपस्थितिभावो मम मनोऽतीव संकटेऽपातयत् । यदि लोकमान्यस्तदा जीवेत्स ममाशिषा योजयति स्मेति दृढविश्वासोऽस्ति । कदाचिदसावसहयोगचलनवलनं विरुध्नुयात्तथापि तं विरोधं मम गौरवं शिक्षणं चेति परिगण्यते स्म । आवयोरुभयोरपि सर्वदा मतभेदे सत्यपि कश्चिन्मनःकषायः संजातः । आवयोरुभयोः संबंधोऽत्यंतनिकट इति विश्वासं मय्युत्पादितवान् । अद्य मया वाक्येषु तेषु लिख्यमानेषु तन्मरणस्य संनिवेशो मन्नेत्रस्याग्रे तिष्ठति यदा मे सहयोगी पटवर्धनमहाशयो लोकमान्यस्य देहान्तवृत्तांतं 'फोन'द्वारा न्यवेदयत् । तदा प्रायः मध्यरात्र आसीत् ॥

मम सहचराः समंतादुपविष्टाः कंचित्प्रयत्नं विना स्वयमेव मम प्रबलतमं पृष्ठबलं मायामगादिति वाक्यं मम दुःखादुदभूत् । असहयोगचलनवलनं तदानीं पूर्णवेशेन चलति स्म । अहं लोकमान्यस्य प्रोत्साहं स्फूर्तिं चातुरेण प्रेक्षमाण आसम् । असहकारांदोलनस्यांतिमरूपस्य विषये तेषां मनोवृत्तिः कीदृशी भवति इत्येतत्केवलमभ्यूहवचनं तिष्ठति । परं तादृगूहा अन्यथा । तद् यद्वा तद्वा भवत्वेतावन्मात्रं निश्चितम् । तस्य मरणात्संभवदभावेन कलकत्तायां मिलितानां सर्वेषां मनः संकटे पातितम् । जनांगस्येतिहास एतद्विषममुहूर्ते प्राप्ते तस्य बुद्धिवादस्यानधिगमात प्रत्येकः पुरुषो विषण्णोऽभूत् ॥

त्रयश्चत्वारिंशोध्यायः

नागपुरे

कलकत्तानगरस्य विशिष्टाधिनिवेशने स्वीकृतनिर्णयान्नागपुरमहासभाया वार्षिकाधिवेशनेन संमन्य स्थिरीकरणीयमासीत् । पुनः अत्रापि कलकत्तानगरे इव प्रेक्षकाणां प्रतिनिधीनां च प्रवाहः समापतत् । तदानीं महासभायाः प्रतिनिधीनां संख्या न परिमिता । अस्य फलं च यावदहं स्मरामि प्रतिनिधीनां संख्या चतुर्दशसाहस्रमारूढा । लालाजीमहाशयः शालानां बहिष्कारविषयेऽल्पपरिवर्तनं सूचयित्वा यतो निरबध्नात्ततः संमतिर्मे दत्ता । तथा च देशबंधुमहाशयस्य सूचनायाः प्रकारेण केषांचित्परिवर्तनानंतरमसहकारप्रस्ताव ऐकमत्येनांगीकृत आसीत् ॥

Funding by IKS-MoE

महासभाया व्यवस्थाक्रमस्य प्रतिपरिशीलनं प्रकृत्य यो निर्णयः सोऽप्यस्मिन्नेवाधिवेशने चर्चास्पदीकृतमासीत्। उपसमित्या सूचितो निर्णयः कलकत्तानगराधिवेशन एव महासभाया अग्रे स्थापितः । अतस्तद्विषयेऽभिप्रायप्रकटनं चर्चा च संपूर्णतया प्रवृत्तम् । यदा नागपुरस्याधिवेशने एतदंतिमनिर्णयायागतं तदा श्रीविजयराघवाचार्योऽध्यक्षोऽभूत् । विषयनिर्धारकसमितिर्निर्णयमेषा एकेनैव मुख्यपरिवर्तनेन स्वीचकार । मया लिखितनिर्णये प्रतिनिधीनां संख्या पंचशतोत्तरसाहस्रमासीत् । विषयनिर्धारकसमितिरेतत् षट्साहस्रमिति परिवर्तयामास । एष साहसेन कृतो निर्णय इति मम गणना । एतेषु वर्षेषु मम सर्वोऽनुभवो ममैतमभिप्रायं स्थिरीकरोति । प्रतिनिधिष्वधिकसंख्याकेषु कार्यनिर्वाहस्य साहाय्यं भवतीति वैतत्प्रजाप्रभुत्वतत्त्वं रक्षतीति वा विश्वासः केवलं भ्रांतिरेवेत्यहं ब्रवीमि । यथा कथं वा भवत्विति परिगृहीते फले सपदि पर्यनुयोगशून्यजनापेक्षया प्रजाहितरक्षका विशालमानसाः सत्यशीलाश्च पंचदशशतप्रतिनिधयेऽतीवोत्तमाः प्रजातंत्ररक्षका भवन्ति । प्रजातंत्ररक्षणाय जनेषु प्रखरस्वातंत्र्येच्छा स्वाभिमान ऐक्यभावश्च भवितुमर्हन्ति । अपरं च ते सत्यशीलान् प्रामाणिकानेव स्वप्रतिनिधीन् वरितुं कंकणबद्धा भवितुमर्हति । परंतु विषयनिर्धारकसमितेः संख्या भ्रमेण ग्रस्ततया तस्याः षट्सहस्रमतिक्रम्य गन्तुमपि इष्टमासीत् । तथा च संमतः स्वस्वात् किंचिन्निवर्तनेन ॥

महासभाया ध्येयमधिकृत्य विशेषतश्चर्चा संवृत्ता । मया महासभायां समर्पितव्यवस्थाक्रमाख्याने ध्येयं शक्यं चेत् ब्रिटिशचक्राधिपत्यस्यांतो नो चेत्तद्बहिः स्वराज्यं साधनीयमित्यासीत् । महासभाया एकः पक्ष एतद्ध्येयं साम्राज्यस्यांतः स्वराज्यसाधनाय केवलं व्यवस्थापयितुमैच्छत् । अस्य पक्षस्याभिप्रायान् पं. मालवीयजीमहाशयो झीणामहाशयश्च व्यक्तीचक्रतुः । तथापि ताभ्यामधिकमतसूचयो न लब्धाः । तस्मिन्नाख्याने स्वराज्यसाधनं च शांतवादेन न्यायवादेन भवितव्यमित्यासीत् । साधनमार्गो नियमैर्न नियंत्रयितव्य इति वादेनैतां प्रगतिं विरुद्धाः । परंतु एतद्विषयिणी चर्चा शिक्षाप्रदा निःसंकोचा च यदा प्रवृत्ता तदनंतरं महासभा मूलनिर्णयमेवांगीचकार । एतद्व्यवस्थायंत्रं प्रजाभिः प्रामाणिकतया चातुर्येणोत्साहेन च चलितं चेत्तत्प्रजाशिक्षणं प्रसारयितुं प्रबलसाधनं भवति स्म । अपि च कार्यनिर्वाह एवास्माकं स्वराज्यमानेष्यति स्मेति ममाभिप्रायः । परंत्वेतद्विषयमधिकृत्य चर्चयितुमप्रस्तुतं न भवति ॥

हिंदुमुसलमानानामैक्यमस्पृश्यतानिवारणं खादीप्रचार एतद्विषयानधिकृत्यास्मिन्नधिनिवेशने निर्णया अंगीकृता बभूवुः । तदाप्रभृति हिंदुसदस्या हिंदुधर्मेणास्पृश्यताकलंकं दूरीकर्तुं पर्यनुयोगतां स्वोपरि वहन्ति । अपि च महासभा भरतखंडस्य सजीवास्थिपंजरैः सह 'खादी'द्वारा चैतन्यदायकसंबंधं स्थापितवती । 'खिलाफत'मुद्दिश्यासहयोगाचरणं महासभायामंगीकृतं महत्कार्यरूपः प्रयत्न आसीत् ॥

Funding by IKS-MoE

समाप्तिः

एतानध्यायानन्तं गमयितुं कालः प्राप्तः। इतःपरं मम जीवनं कियद्बहिरंगं जातमिति चेत्तत्र जनानामविदितोंऽशो नास्त्येवेति वक्तुं शक्यम्। अपरं चैकविंशत्यधिकोनविंशतिमिताद्वर्षात् प्रभृति राष्ट्रमहासभायाः प्रमुखैः सहात्याप्तसंबंधेन कार्यस्य विहितत्वात्तदितो मम जीवमाने प्रवृत्तां काचिदपि संघटनां तत् संबंधमधिकृत्य लेखनं विना विवरीतुं न शक्यम्। यतः स्वामीश्रद्धानंदो देशबंधुमहाशयो हकीमसाहेबमहाशयोऽपि च लालजीमहाशयो यद्यप्येतेऽद्य न जीवन्ति तथाप्यस्मत्सुदैवेन महासभाया इतरयोधाग्रण्यैरस्माभिः सह कार्यं निर्वहंतो जीवन्ति। मयोपरि विवृतमहासुधारणाभ्योऽर्वाचीनं महासभाचरितमद्यापि न पक्वं भवति। अतो मया मम प्रयोगानितः परं च वर्णयितुमपक्रम्यते चेत् प्रमुखैः सह मम संबंधं न विवरीतुं न शक्यम्। एतदहं सद्य एवापि न कुर्यामौचित्यदृष्ट्या। चरमं कारणं चेदानीं मिलितानां प्रयोगाणां विषये मया कृतनिर्णयाः सुनिश्चिता इति वक्तुं न शक्यम्। अतो वृत्तांतमेतमत्र समापयितुं ममेष्टकर्तव्यं प्रतिभाति। किमेतावता मम लेखन्येव सहजज्ञा सती निश्चलतां प्राप्ता। पाठकाः परिहर्तव्या इति स्थितिमधिगतस्य मम संकटं नास्तीति न। मम प्रयोगाणामधिकं मूल्यमाधास्ये। तेषां योग्यतानुरूपं मया ते विवृता न वेति न जाने। विश्वासयोग्यं वृत्तातं लेखितुं यावच्छक्ति मया प्रयत्नः कृत इति ब्रूयाम्। यथा सत्यं मे दृष्टिगोचरो यथा येन मार्गेण तदद्राक्षं तत्सर्वं यथा तथा वर्णयितुमेव मम निरंतरप्रयत्नो भवति। एतेनाभ्यासेन ममानिर्वर्णनीया मनःशांतिरलभ्यत। यत एतेन संशयात्मनां सत्येऽहिंसायां च भक्तिरुदियादित्याशा ममोत्पन्ना॥

मम सर्वत्रानुभवे सत्यं विना न कोऽपि देवोऽस्तीति मनसि रूढं भवति। सत्यसाधनायाहिंसैक एव मार्ग इत्येतत्कथां प्रत्येकं पुटं न सारयेद्यदि मयैषा सर्वेषामप्यध्यायानां लेखनश्रमोऽपि व्यर्थ इति गणयामि। कदाचिदस्मिन् श्रमे निष्फले परिणमत्यपि तत्र कारणं मूलतत्त्वमहमेव। न पुनस्तत्तत्त्वमिति ज्ञायताम्। अहिंसां साधयितुं मे प्रयत्नाः श्रद्धान्विता यद्यपि तेऽपूर्णा अपक्वाश्च भवन्तीत्येव वक्तव्यम्। अस्माभिः प्रतिदिनं दृश्यमानस्य सूर्यस्य प्रभापेक्षया सत्यस्य तेजो दशलक्षाधिकं भवति तस्य प्रकाशो वर्णयितुमशक्यः। तस्य सहस्रकोटिकिरणेष्विदानीमेकस्तदानीमेक इति मम दृष्टिगोचरः संवृत्तः। अतः सत्यस्य निजकांतेः परिमाणमभ्यूहितुं न शक्यम्। वस्तुतो यन्मे दृष्टांतरहितं तत्तत्प्रचंडतेजोराशेर्मंदद्युतिर्भवति। परंतु मत्प्रयोगाणां फलितांशं प्रकृत्यैतावन्मात्रविश्वासेन वक्तुं समर्थो यतः सत्यस्य पूर्णकांतेर्दर्शनात्पूर्वमहिंसा पूर्णरीत्या साधनीया॥

Funding by IKS-MoE

सर्वव्यापी सत्यनारायणः प्रत्यक्षीकर्तव्यो यद्येतज्जगतोऽतिहीनप्राणिनमप्यात्मवदनुरागेण द्रष्टुं योग्यो भवेत् । एतत्साधयितुमिच्छुर्जीवनस्य किमपि क्षेत्रं त्यक्त न समर्थः । एतेनैव मम सत्योपासना मां राजकीयरंगमाचकर्ष । राजकारस्य धर्मस्य च नास्ति संबंध इति ये प्राहुस्ते धर्मः किमिति न जानन्तीत्यहं निःसंदेहं नम्रतया वक्तुं शक्नोमि ॥

आत्मशुद्धिं विना सकलप्राणिष्वप्यात्मीयतादर्शनमसाध्यम् । आत्मशुद्धिं विनाहिंसाचरणं नाम केवलं स्वप्न एव । यस्यांतः शुद्धिर्नास्ति स ईश्वरसाक्षात्कारं न कदाप्यधिगच्छेत् । अत आत्मशुद्धिस्तावज्जीवनस्य सकलक्षेत्रेष्वपि शुद्धतास्थापनमित्यदोषो भवितुमर्हति । शुद्धिरिति वेगेन प्रसरणस्वभावात आत्मशुद्धिरवश्यमेवापरशुद्धिं करिष्यति ॥

किंत्वात्मशुद्धेः पंथाः कठिनो दुरारोहश्च । संपूर्णशुद्धिसाधकः कायेन वाचा मनसापि निर्विकारो भवितुमर्हति । रागद्वेषौ नाम परस्परविरुद्धौ प्रवाहावतिक्रामेत् । अहं निरंतरप्रयत्नवानप्येषा त्रिमुखशुद्धिर्मया नार्जितेत्यहं जाने । अत एव जगतः प्रशंता मां न संतोषयति । पुनर्दृष्टे तदनेकशो मनोव्यथां जनयति । शस्त्रयुद्धेन बाह्यप्रपंचविजयापेक्षयाग्राह्यौ सूक्ष्मगती रागद्वेषौ जेतुं दुःसाध्यं मे प्रतिभाति । मम भरतखंडं प्रति निवर्तनात्प्रभृति मदंतो निगूढशायिनावेतौ विकारौ ममानुभवमागतौ स्तः । अस्य ज्ञानेनाहं लज्जितोऽस्मि । न पुनर्हृदयभंगो जातः । एतेऽनुभवाः प्रयोगाश्च मम जीवितभारमपनिन्युः । अत्यानंदमजनयन् । किंत्वद्यापि ममाग्रतो दुर्गमो मार्गो विद्यत इति मया ज्ञातम् । मया शून्येन भवितव्यम् । स्वयं सर्वेभ्यो हीन इति स्वतंत्रबुद्ध्यावगमनपर्यंतं कस्यापि नास्ति मोक्षः । अहिंसा हि नम्रभावस्य चरमः सीमा ॥

इतः पाठकानामनुज्ञया एतद्वृत्तांतं तात्कालिकं वापि समापयिष्यामि । तैरनुज्ञापितोऽहमेवं विज्ञापये सत्यमूर्तिरीश्वरो मम कायेन वाचा मनसाहिंसावरं प्रदेयादिति प्रार्थनायां तेऽपि मया सह भागिनो भवन्त्विति ॥

इति श्रीगांधीमहात्मनः
सत्यशोधनाख्यायामात्मकथायां
पञ्चमो भागः
समाप्तः

BVB Sri Santaracharya Sanskrit
443

॥ सत्य शोधनम् ॥